OXFORD:
BY E PICKARD HALL, M.A, AND J H STACY,
PRINTERS TO THE UNIVERSITY


श्रीगणेशाय नमः

॥ संहितापाठः ॥

॥ ओं ॥

॥१॥ १–२५ वसिष्ठः ॥ अग्निः ॥ १–१८ विराट् । १९–२५ त्रिष्टुप् ॥

॥१॥ अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयंत प्रशस्तं। दूरेदृशं गृहपतिमथर्युं॥१॥ तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित्। दक्षाय्यो यो दम आस नित्यः॥२॥ प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ। त्वां शश्वंत उपं यंति वाजाः॥३॥ प्र ते अग्नयोऽग्निभ्यो वरं निः सुवीरासः शोशुचंत द्युमंतः। यत्रा नरः समासंते सुजाताः॥४॥ दा नो अग्ने धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तं। न यं यावा तरति यातुमावान्॥५॥२३॥ उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृताची। उप स्वैनमरमतिर्वसूयुः॥६॥ विश्वा अग्नेऽप दुहारातीर्येभिस्तपोभिरदहो जरूथं। प्र निस्वरं चातयस्वामीवां॥७॥ आ यस्ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पावक। उतो न एभिः स्तवथैरिह स्याः॥८॥ वि ये ते अग्ने भेजिरे अनीकं मर्ता नरः पित्र्यासः पुरुत्रा। उतो न एभिः सुमना इह स्याः॥९॥ इमे नरो वृत्रहत्येषु शूरा विश्वा अदेवीरभि संतु मायाः। ये मे धियं पनयंत प्रशस्तां॥१०॥२४॥ मा शूने अग्ने नि षदाम नृणां माशेषसोऽवीरता परि त्वा। प्रजावंतीषु दुर्यासु दुर्यं॥११॥ यमग्नी नित्यमुपयाति यज्ञं प्रजावंतं स्वपत्यं क्षयं नः। स्वजन्मना शेषसा वावृधानं॥१२॥ याहि नो अग्ने रक्षसो अजुष्टा-



॥ पदपाठः ॥

॥ ओं ॥

॥१॥ अग्निं नरः दीधितिऽभिः अरण्योः हस्तऽच्युती जनयंत प्रऽशस्तं दूरेऽदृशं गृहऽपतिं अथर्युं॥१॥ तं अग्निं अस्ते वसवः नि चक्रुरन् सुऽप्रतिचक्षं अवसे कुतः चित् दक्षाय्यः यः दमे आस नित्यः॥२॥ प्रऽईद्धः अग्ने दीदिहि पुरः नः अजस्रया सूर्म्या यविष्ठ त्वां शश्वंतः उप यंति वाजाः॥३॥ प्र ते अग्नयः अग्निऽभ्यः वरं निः सुऽवीरासः शोशुचंत द्युऽमंतः यं नरः संऽआसते सुऽजातः॥४॥ दाः नः अग्ने धिया रयिं सुऽवीरं सुऽअपत्यं सहस्य प्रऽशस्तं न यं यावा तरति यातुऽमावान्॥५॥२३॥ उप यं एति युवतिः सुऽदक्षं दोषा वस्तोः हविष्मती घृताची उप स्वा एनं अरमतिः वसुऽयुः॥६॥ विश्वाः अग्ने अप दह अरातीः येभिः तपःऽभिः अदहः जरूथं प्र निऽस्वरं चातयस्व अमीवां॥७॥ आ यः ते अग्ने इधते अनीकं वसिष्ठ शुक्र दीदिऽवः पावक उतो नः एभिः स्तवथैः इह स्याः॥८॥ वि ये ते अग्ने भेजिरे अनीकं मर्तीः नरः पित्र्यासः पुरुऽचा उतो नः एभिः सुऽमनाः इह स्याः॥९॥ इमे नरः वृचऽहत्येषु शूराः विश्वाः अदेवीः अभि संतु मायाः ये मे धियं पनयंत प्रऽशस्तां॥१०॥२४॥ मा शूने अग्ने नि सदाम नृणां मा शेषसः अवीरता परि त्वा प्रजाऽवंतीषु दुर्योसु दुर्यं॥११॥ ये अग्नी नित्यं उपऽयांति यज्ञं प्रजाऽवंतं सुऽअपत्यं क्षयं नः स्वऽजन्मना शेषसा ववृधानं॥१२॥ पाहि नः अग्ने रक्षसः अजुष्टात्

त्पाहि धूर्तेरररुषो अघायोः । त्वा युजा पृतनायूँरभि ष्याँ ॥ १३ ॥ सेदग्निरग्नीरत्यंस्त्वन्यान्यच्च वाजी तनयो वीळुपाणिः । सहस्रपाथा अक्षरं समेति ॥ १४ ॥ सेदग्निर्यो वनुष्यतो निपाति समेद्धारमंहस उरुष्यात् । सुजातासः परि चरंति वीराः ॥ १५ ॥ २५ ॥ अयं सो अग्निराहुतः पुरुश्चा यमीशानः समिदिधे हविष्मान् । परि यमेत्यध्वरेषु होता ॥ १६ ॥ त्वे अग्न आहवनानि भूरीशानास आ जुहुयाम नित्या । उभा कृण्वंतो वहतू मियेधे ॥ १७ ॥ इमो अग्ने वीततमानि हव्याजंसो वक्षि देवतातिमच्छ । प्रति न ईं सुरभीणि व्यंतु ॥ १८ ॥ मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतये मा नो अस्यै । मा नः क्षुधे मा रक्षसे ऋतावो मा नो दमे मा वन आ जुहूर्याः ॥ १९ ॥ नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुपूदः । रातौ स्यामोभयासस आ ते यूयं पात स्वस्तिभिः सदा नः ॥ २० ॥ २६ ॥ त्वमग्ने सुहवो रण्वसंदृक्सुदीती सूनो सहसो दिदीहि । मा ते सचा तनये नित्य आ धग्वा वीरो अस्मच्चर्या वि दासीत् ॥ २१ ॥ मा नो अग्ने दुर्भृतये सचेषु देवेष्वग्निषु प्र वोचः । मा ते अस्मान्दुर्मतयो भूमाविंद्रवस्य सूनो सहसो नशंत ॥ २२ ॥ स मर्तो अग्ने स्वनीक रेवानमर्त्य आजुहोति हव्यं । स देवता वसुवनिं दधाति यं सूरिरर्धी पृच्छमान एति ॥ २३ ॥ महो नो अग्ने सुवितस्य विद्वान्रयिं सूरिभ्य आ वहा बृहंतं । येन वयं सहमाद्वन्मदेमाविंदितास आयुषा सुवीराः ॥ २४ ॥ नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुपूदः । रातौ स्यामोभयासु आ ते यूयं पात स्वस्तिभिः सदा नः ॥ २५ ॥ २७ ॥ १ ॥

पाहि धूर्तेः अरंरुषः अघऽयोः त्वा युजा पृतनाऽयून् अभि स्याम् ॥१३॥ सः इत् अग्निः अग्नीन् अति अस्तु अन्यान् यत्र वाजी तनयः वीळुऽपाणिः सहस्रऽपाथाः अक्षरा संऽएति ॥१४॥ सः इत् अग्निः यः वनुष्यतः निऽपाति संऽएदारं अंहसः उरुष्यात् सुऽजातासः परि चरंन्ति वीराः ॥१५॥२५॥ अयं सः अग्निः आऽहुतः पुरुऽचा यं ईशानः संऽइत् ईधे हविष्मान् परि यं एति अध्वरेषु होता ॥१६॥ त्वे' अग्ने आऽहवनानि भूरि ईळानासः आ जुहुयाम् नित्या उभा कृणवंतः वहतू' मिये धे ॥१७॥ इमो' अग्ने वीतऽतमानि हव्या अजंस्रः वक्षि देवऽतातिं अच्छ प्रतिं नः ईं सुरभीणि व्यंतु ॥१८॥ मा नः अग्ने अवीरते परा दाः दुःऽवासंसे अमंतये मा नः अस्यै मा नः क्षुधे मा रक्षसे क्रतुऽवः मा नः दमे मा वने आ जुहूर्थाः ॥१९॥ नु मे ब्रह्माणि अग्ने उत् शंसाधि त्वं देव मघऽवत्ऽभ्यः सुसूदुः रातौ स्याम उभयासः आ ते यूयं पात स्वस्तिऽभिः सदा नः ॥२०॥२६॥ त्वं अग्ने सुऽहवः रण्वऽसंदृक् सुऽदीतौ सूनो' सहसः दिदीहि मा त्वे' सचा तनये नित्ये आ धक् मा वीरः अस्मत् नर्यः वि दासीत् ॥२१॥ मा नः अग्ने दुःऽभृतये सचा एषु देवऽइद्वेषु अग्निषु प्र वोचः मा ते अस्मान् दुःऽमतयः भूमात् चित् देवस्य सूनो' सहसः नशंत ॥२२॥ सः मंतेः अग्ने सुऽअनीक रेवान् अमर्त्ये यः आऽजुहोति हव्यं सः देवतां वसुऽवनिं दधाति यं सूरिः अर्थी पृच्छमानः एति ॥२३॥ महः नः अग्ने सुवितस्य विद्वान् रयिं सूरिऽभ्यः आ वह बृहंतं येन वयं सहसाऽवन् मदेम अविंऽक्षितासः आयुधा सुऽवीराः ॥२४॥ नु मे ब्रह्माणि अग्ने उत् शंसाधि त्वं देव मघवत्ऽभ्यः सुसूदुः रातौ स्याम उभयासः आ ते यूयं पात स्वस्तिऽभिः सदा नः ॥२५॥२७॥१॥

॥ २ ॥ १–११ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥२॥ जुषस्व नः समिधमग्ने अद्य शोचा बृहद्यजतं धूममृण्वन्। उप स्पृश दिव्यं सानु स्तूपैः सं रश्मिभिस्ततनः सूर्यस्य ॥१॥ नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः। ये सुक्रतवः शुचयो धियंधाः स्वदंति देवा उभयानि हव्या॥२॥ ईळेन्यं वो असुरं सुदक्षमंतर्दूतं रोदसी सत्यवाचं। मनुष्वदग्निं मनुना समिद्धं समध्वराय सदमिन्महेम ॥३॥ सपर्यवो भरमाणा अभिज्ञु प्र वृंजते नमसा बर्हिरग्नौ। आजुह्वाना घृतपृष्ठं पृषद्वद्ध्वर्यवो हविषा मर्जयध्वं॥४॥ स्वाध्यो३ वि दुरो देवयंतोऽशिश्रयू रथयुर्देवतातां। पूर्वीं शिश्रुं न मातरा रिहाणे समस्वरन्नक्तोषासनक्ता ॥५॥१॥ उत योषणे दिव्ये मही न उषासानक्ता सुदुघेव धेनुः। बर्हिषदा पुरुहूते मघोनी आ यज्ञियें सुवितायं श्रयेतां॥६॥ विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातवेदसा यजध्यै। ऊर्ध्वं नो अध्वरं कृतं हवेषु ना देवेषु वनथो वार्याणि॥७॥ आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः। सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदंतु ॥८॥ तन्नस्तुरीपमध पोषयित्नु देवं त्वष्टर्विरराणः स्यस्व। यतो वीरः कर्मण्यः सुदक्षो युक्त्ग्रावा जायते देवकामः ॥९॥ वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति। सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद॥१०॥ आ याह्यग्ने समिधानो अर्वाङिंद्रेण देवैः सरथं तुरेभिः। बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयंतां ॥११॥२॥

॥ ३ ॥ १–१० वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥३॥ अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे

॥२॥ जुषस्व नः सऽइधे अग्ने अद्य शोचं बृहत् यजतं धूमं ऋ-
ण्वन् उप स्पृश दिव्यं सानु स्तूपैः सं रश्मिऽभिः ततनः सूर्यस्य
॥१॥ नराशंसस्य महिमानं एषां उप स्तोषाम यजतस्य यज्ञैः ये
सुऽक्रतवः शुचयः धियंऽधाः स्वदंति देवाः उभयानि हव्या॥२॥
ईळेन्यं वः असुरं सुऽदक्षं अंतः दूतं रोदसी सत्यऽवाचं मनुष्वत्
अग्निं मनुना संऽइद्धं सं अध्वराय सदं इत् महेम॥३॥ सपर्यवः
भरमाणाः अभिऽज्ञु प्र वृंजते नमसा बर्हिः अग्नौ आऽजुह्वानाः
घृतऽपृष्ठं पपतत्ऽवत् अध्वर्यवः हविषा मर्जयध्वं॥४॥ सुऽआध्यः
वि दुरः देवऽयंतः अश्रिंयुः रथऽयुः देवऽताता पूर्वीं शिशुं न
मातरा रिहाणे सं अग्मुवः न समनेषु अंजन्॥५॥१॥ उत योषं-
णे दिव्ये मही नः उपसानक्तां सुदुघाऽइव धेनुः बर्हिऽसदा
पुरुऽहूते मघोनी आ यज्ञियें सुविताय श्रयेतां॥६॥ विप्रा
यज्ञेषु मानुषेषु कारू मन्ये वां जातऽवेदसा यजध्यै ऊर्ध्वं नः अ-
ध्वरं कृतं हवेषु ता देवेषु वनथः वार्याणि॥७॥ आ भारती भार-
तीभिः सऽजोषाः इळा देवैः मनुष्येभिः अग्निः सरस्वती सार-
स्वतेभिः अर्वाक् तिस्रः देवीः बर्हिः आ इदं सदंतु॥८॥ तत् नः
तुरीपं अध पोषयित्नु देव त्वष्टः वि रराणः स्यस्व यतः वीरः
कर्मण्यः सुऽदक्षः युक्तऽग्रावा जायते देवऽकामः॥९॥ वनस्पते
अव सृज उप देवान् अग्निः हविः शमिता सूदयाति सः इत् ऊं
होता सत्यऽतरः यजाति यथा देवानां जनिमानि वेद॥१०॥ आ
याहि अग्ने संऽइधानः अर्वाङ् इंद्रेण देवैः सऽरथं तुरेभिः बर्हिः नः
आस्तां अदितिः सुऽपुत्रा स्वाहा देवाः अमृताः मादयंतां॥११॥२॥

॥३॥ अग्निं वः देवं अग्निऽभिः सऽजोषाः यजिष्ठं दूतं अध्वरे

कृणुध्वं । यो मर्त्येषु निधृविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥१॥ प्रोयदस्थो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात् । आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥२॥ उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः । अच्छा द्यामरुषो धूम एति सं दूतो अग्न ईयसे हि देवान् ॥३॥ वि यस्य ते पृथिव्यां पाजो अश्रेत्तृषु यदन्ना समवृक्त जम्भैः । सेनेव सृष्टा प्रसितिष्ट एति यवं न दस्म जुह्वा विवेक्षि ॥४॥ तमिद्दोषा तमुषसि यविष्ठमग्निमत्यं न मर्जयन्त नरः । निशिशाना अतिथिमस्य योनौ दीदायं शोचिराहुतस्य वृष्णः ॥५॥३॥ सुसंदृक्ते स्वनीक प्रतीक वि यद्रुक्मो न रोचस उपाके । दिवो न ते तन्यतुरेति शुष्मश्चित्रो न सूर्यः प्रति चक्षि भानुं ॥६॥ यथा वः स्वाहाग्नये दाशेम परीळाभिर्घृतवद्भिर्हव्यैः । तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि ॥७॥ या वां ते संति दाशुषे अधृष्टा गिरो वा याभिर्नृवतीरुरुष्याः । ताभिर्नः सूनो सहसो नि पाहि स्मत्सूरीञ्जरितॄञ्जातवेदः ॥८॥ निर्यत्पूतेव स्वधितिः शुचिर्गात्स्वयं कृपा तन्वा३रोचमानः । आ यो मातोरुशन्यो जनिष्ट देवयज्याय सुक्रतुः पावकः ॥९॥ एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम । विश्वा स्तोतृभ्यो गृणते च संतु यूयं पात स्वस्तिभिः सदा नः ॥१०॥४॥

॥ ४ ॥ १–१० यमिष्टः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥४॥ प्र वः शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतं । यो दैव्यानि मानुषा जनूंष्यन्तर्विश्वानि विद्मना जिगांति ॥१॥ स

कृणुध्वं यः मर्त्येषु निऽध्रुविः ऋतऽवा तपुःऽमूर्धा घृतऽअन्नः पावकः॥१॥ प्रोथत् अश्वः न यवसे अविष्यन् यदा महः संऽवरणात् वि अस्थात् आत् अस्य वातः अनु वाति शोचिः अध स्म ते व्रजनं कृष्णं अस्ति॥२॥ उत् यस्य ते नवंऽजातस्य वृष्णः अग्ने चरंति अजराः इधानाः अच्छ द्यां अरुषः धूमः एति सं दूतः अग्ने ईयसे हि देवान्॥३॥ वि यस्य ते पृथिव्यां पाजः अश्रेत् नृषु यत् अन्ना संऽअवृक्त जंभैः सेनाऽइव सृष्टा प्रऽसितिः ते एति यवं न दस्म जुह्वा विवेष्टि॥४॥ तं इत् दीपा तं उपसि यविष्ठं अग्निं अत्यं न मर्जयंत नरः निऽशिशानाः अतिथिं अस्य योनौ दीदायं शोचिः आऽहुतस्य वृष्णः॥५॥३॥ सुऽसंदृक् ते सुऽअनीक प्रतीकं वि यत् रुक्मः न रोचसे उपाके दिवः न ते तन्यतुः एति शुष्मः चित्रः न सूरः प्रति चष्टि भानुं॥६॥ यथा वः स्वाहा अग्नये दाशेम परि इळाभिः घृतवत्ऽभिः च हव्यैः तेभिः नः अग्ने अमितैः महःऽभिः शतं पूःऽभिः आयसीभिः नि पाहि॥७॥ याः वा ते संति दाशुषे अधृष्टाः गिरः वा याभिः नृऽवतीः उरुष्याः ताभिः नः सूनोः सहसः नि पाहि स्मत् सूरीन् जरितॄन् जातऽवेदः॥८॥ निः यत् पूताऽइव स्वऽधितिः शुचिः गात् स्वया कृपा तन्वा रोचमानः आ यः माचोः उशेन्यः जनिष्ट देवऽयज्याय सुऽक्रतुः पावकः॥९॥ एता नः अग्ने सौभगा दिदीहि अपि क्रतुं सुऽचेतसं वतेम विश्वा स्तोतृऽभ्यः गृणते च संतु यूयं पात स्वस्तिऽभिः सदा नः॥१०॥४॥

॥४॥ प्रवः शुक्राय भानवे भरध्वं हव्यं मतिं च अग्नये सुऽपूतं यः दैव्यानि मानुषा जनूंषि अंतः विश्वानि विद्मना जिगाति॥१॥ सः

गृत्सो अग्निस्तरुणश्चिदस्तु यतो यविष्ठो अजनिष्ट मातुः। सं यो वना युवते शुचिद्भूरि चिदन्ना समिदत्ति सद्यः ॥२॥ अस्य देवस्य संसद्यनीके यं मर्तासः श्येतं जगृभ्रे। नि यो गृभं पौरुषेयीमुवोचं दुरोकमग्निरायवे शुशोच ॥३॥ अयं कविरकविषु प्रचेता मर्तेष्वग्निरमृतो नि धायि। स मा नो अत्र जुहुरः सहस्वः सदा त्वे सुमनसः स्याम ॥४॥ आ यो योनिं देवकृतं ससाद क्रत्वा हव्यैरमृताँ ऋतायन्। तमीमण्वीश्च वनिनश्च गर्भं भूमिश्च विश्वधायसं बिभर्ति ॥५॥५॥ ईशे हव्यैरमृतस्य भूरेरीशे रायः सुवीर्यस्य दातोः। मा त्वा वयं सहसावन्नवीरा माप्सवः परि षदाम मादुवः ॥६॥ परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम। न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः ॥७॥ नहि यभायारणः सुशेवोऽन्योदर्यो मनसा मंतवा उ। अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः ॥८॥ त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्। सं त्वा ध्वस्मन्वद्भ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री ॥९॥ एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम। विश्वा स्तोतृभ्यो गृणते च संतु यूयं पात स्वस्तिभिः सदा नः ॥१०॥६॥

॥ ५ ॥ १-९ वसिष्ठः ॥ वैश्वानरः ॥ त्रिष्टुप् ॥

॥५॥ प्राग्नये बृहते यज्ञियाय ऋतस्य वृष्णे असुराय मन्म। घृतं न यो धयति सप्तधाम्नो जिह्वामग्नये मधुमतीमशीय ॥१॥ पृष्टो दिवि धाय्यग्निः पृथिव्यां नेता सिंधूनां वृषभः स्तियानां। स मानुषीरभि विशो वि भाति वैश्वानरो वावृधानो वरेण्यः ॥२॥

गृत्सः अग्निः तरुणः चित् अस्तु यतः यविष्ठः अजनिष्ट मातुः सं यः वनाँ युवते शुचिऽदन् भूरि चित् अन्ना सं इत् अत्ति सद्यः॥२॥ अस्य देवस्य सऽसदि अनीके यं मर्तासः श्येतं जगृभ्रे नि यः गृभं पौरुषेयीं उवोच दुःऽओकं अग्निः आयवे शुशोच॥३॥ अयं कविः अकविषु प्रऽचेताः मर्तेषु अग्निः अमृतः नि धायिसः मा नः अत्र जुहुरः सहस्वः सदा ते सुऽमनसः स्याम॥४॥ आ यः योनिं देवऽकृतं ससाद क्रत्वा हि अग्निः अमृतान् अतारीत् तं ओषधीः च वनिनः च गर्भं भूमिः च विश्वऽधायसं बिभर्ति॥५॥५॥ ईशे हि अग्निः अमृतस्य भूरेः ईशे रायः सुऽवीर्यस्य दातोः मा त्वा वयं सहसाऽवन् अवीराः मा अप्सवः परि सदाम मा अदुवः॥६॥ परिऽसद्यं हि अरणस्य रेक्णः नित्यस्य रायः पतयः स्याम न शेषः अग्ने अन्यऽजातं अस्ति अचेतानस्य मा पथः वि दुक्षः॥७॥ नहि यभाय अरणः सुऽशेवः अन्यऽउदर्यः मनसा मन्तवे ऊं अधं चित् ओकः पुनः इत् सः एति आ नः वाजी अभीषाट् एतु नव्यः॥८॥ त्वं अग्ने वनुष्यतः नि पाहि त्वं ऊं नः सहसाऽवन् अवद्यात् सं त्वा ध्वस्मन्ऽवत् अभि एतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥९॥ एता नः अग्ने सौभगा दिदीहि अपि क्रतुं सुऽचेतसं वतेम विश्वा स्तोतृऽभ्यः गृणते च सन्तु यूयं पात स्वस्तिऽभिः सदा नः॥१०॥६॥

॥५॥ प्र अग्नये तवसे भरध्वं गिरं दिवः अरतये पृथिव्याः यः विश्वेषां अमृतानां उपऽस्थे वैश्वानरः ववृधे जागृवत्ऽभिः॥१॥ मूर्धः दिवि धायि अग्निः पृथिव्यां नेता सिंधूनां वृषभः स्तियानां सः मानुषीः अभि विशः वि भाति वैश्वानरः ववृधानः वरेण्यः॥२॥

त्वद्भिया विश्व आयुन्नसिक्नीरसमना जहतीर्भोजनानि। वैश्वानर पूरवे शोशुचानः पुरो यदग्ने दरयन्नदीदेः॥३॥ तवं त्रिधातु पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचंत। त्वं भासा रोदसी आ ततंथाजस्रेण शोचिषा शोशुचानः॥४॥ त्वामग्ने हरितो वावशाना गिरः सचंते धुनयो घृताचीः। पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरमुपसां केतुमह्नां॥५॥७॥ त्वे असुर्यं वसवो न्यृण्वन्क्रतुं हि ते मित्रमहो जुषंत। त्वं दस्यूँरोकसो अग्न आज उरु ज्योतिर्जनयन्नार्याय॥६॥ स जायमानः परमे व्योमन्वायुर्न पाथः पुरि पासि सद्यः। त्वं भुवना जनयन्नभि क्रन्नपत्याय जातवेदो दशस्यन्॥७॥ तामग्ने अस्मे इषमेरयस्व वैश्वानर द्युमतीं जातवेदः। यया राधः पिन्वसि विश्ववार पृथु श्रवो दाशुषे मर्त्याय॥८॥ तं नो अग्ने मघवद्भ्यः पुरुक्षुं रयिं नि वाजं श्नुत्यं युवस्व। वैश्वानर महि नः शर्म यच्छ रुद्रेभिरग्ने वसुभिः सजोषाः॥९॥८॥

॥ ६ ॥ १–९ वसिष्ठः ॥ वैश्वानरः ॥ त्रिष्टुप् ॥

॥ ६ ॥ प्र समाजो असुरस्य प्रशस्तिं पुंसः कृष्टीनामनुमाद्यस्य। इंद्रस्येव प्र तवसः कृतानि वंदे दारुं वंदमानो विवक्मि॥१॥ कविं केतुं धासिं भानुमर्हिवंति शं राज्यं रोदस्योः। पुरंदरस्य गीर्भिरा विवासेऽग्नेर्व्रतानि पूर्व्या महानि॥२॥ न्यक्रन्यूनयिनो मृध्रवाचः पणीरश्रद्धाँ अवृधाँ अयज्ञान्। प्रप्र तान्दस्यूँरग्निर्विवाय पूर्वश्चकारापरीँ अयज्यून्॥३॥ यो अपाचीने तमसि मदंतीः प्राचीश्चकार नृतमः शचीभिः। तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयंतं पृतन्यून्॥४॥ यो देव्यो अनमयद्धरिभ्यां अयंपत्नीरुपसस्तिसृभिः

त्वत्भिया विशः आयन् असिक्नीः अस्मनाः जहतीः भोजनानि वैश्वानर पूरवे शोशुचानः पुरः यत् अग्ने दरयन् अदीदेः॥३॥ तवं चिऽधातु पृथिवी उत द्यौः वैश्वानर व्रतं अग्ने सचंत त्वं भासा रोदसी आ ततंथ अजस्रेण शोचिषा शोशुचानः॥४॥ त्वां अग्ने हरितः वावशानाः गिरः सचंते धुनयः घृताचीः पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरं उपसां केतुं अह्नां॥५॥७॥ त्वे असुर्यं वसवः नि चिक्षन् क्रतुं हि ते मित्रऽमहः जुषंत त्वं दस्यून् ओकसः अग्ने आजः उरु ज्योतिः जनयन् आर्याय॥६॥ सः जायमानः परमे विऽओमन् वायुः न पार्थः परि पासि सद्यः त्वं भुवना जनयन् अभि क्रन् अपत्याय जातऽवेदः दृशस्यन्॥७॥ तां अग्ने अस्मे इषं आ इरयस्व वैश्वानर द्युऽमतीं जातऽवेदः यया राधः मिन्वसि विश्वऽवार पृथुश्रवः दाशुषे मर्त्याय॥८॥ तं नः अग्ने मघवत्ऽभ्यः पुरुऽस्पृहं रयिं नि वाजं श्नुत्यं युवस्व वैश्वानर महिं नः शर्म यच्छ रुद्रेभिः अग्ने वसुऽभिः सऽजोषाः॥९॥८॥

॥ ६ ॥ प्र संऽराजः असुरस्य प्रऽशस्तिं पुंसः कृष्टीनां अनुऽमादस्य इंद्रस्यऽइव प्र तवसः कृतानि वंदे दारुं वंदमानः विवक्मि॥१॥ कविं केतुं धासिं भानुं अद्रेः हिन्वंति शं राज्यं रोदस्योः पुरंऽदरस्यं गीःऽभिः आ विवासे अग्नेः व्रतानि पूर्व्या महानि॥२॥ नि अक्रतून् यथिनः मृध्रऽवाचः पणीन् अश्रद्धान् अवृधान् अयज्ञान् प्रऽप्र तान् दस्यून् अग्निः विवाय पूर्वः चकार अपरान् अयज्यून्॥३॥ यः अपाचीनं तमसि मदंतीः प्राचीः चकार नृऽतमः शचीभिः तं ईशानं वस्वः अग्निं गृणीषे अनानतं दमयंतं पृतन्यून्॥४॥ यः देवः अनमयत् वधऽस्नैः यः अर्यऽपत्नीः उषसः

श्वकार। स निरुध्या नहुषो यह्वो अग्निर्विशश्चक्रे बलिहृतः सहोभिः॥५॥ यस्य शर्मन्नुप विश्वे जनास एवैस्तस्थुः सुमतिं भिक्षमाणाः। वैश्वानरो वरमा रोदस्योरग्निः ससाद पिचोरुपस्थे ॥६॥ आ देवो ददे वुध्याऽ३ वसूनि वैश्वानर उदिता सूर्यस्य। आ समुद्रादवरादा परस्मादाग्निर्ददे दिव आ पृथिव्याः ॥७॥९॥

॥ ७ ॥ १-७ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥७॥ प्र वो देवं चित्सहसानमग्निमर्थं न वाजिनं हिषे नमोभिः। भवा नो दूतो अध्वरस्य विद्वान्मनो देवेषु विविदे मितद्रुः॥१॥ आ यो ववत्रे पथ्याऽ३ अनु स्वा मद्रो देवानां सख्यं जुषाणः। आ सानु शुष्मैर्नदयन्पृथिव्या जम्भेभिर्विश्वमुशधग्वनोनि ॥२॥ प्राचीनो यज्ञः सुधितं हि बर्हिः प्रीणीते अग्निरीळितो न होता। आ मातरा विश्वविरि हुवानो यतो यविष्ठ जज्ञिषे सुशेवः॥३॥ सद्यो अध्वरे रथिरं जनन्त मानुषासो विचेतसो य एषां। विशामधायि विश्पतिर्दुरोणेऽ३ग्निर्मन्द्रो मधुवचा ऋतावा॥४॥ असादि वृतो बर्हिराजगन्वान्नग्निर्यज्ञा नृपदने विधर्ता। धीष्वं पृथिवी बावृधाने आ यं होता यजति विश्ववारं॥५॥ एते घृतेभिर्विश्वमातिरन्त मंहं ये वारं नर्या अतक्षन्। प्र ये विशस्तिरन्त श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्य॥६॥ नू त्यामग्न ईमहे वसिष्ठा ऊर्गपतं मरुतो सहस्रो वसूनां। इषं स्तोतृभ्यो मघवन्नग्न आनड्रयिं पात स्वस्तिभिः सदा नः ॥७॥१०॥

॥ ८ ॥ १-७ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥८॥ इषे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन।

चकारं सः निऽस्ध्यं नहुषः यह्वः अग्निः विशः चक्रे वलिऽहृतः सहःऽभिः॥५॥ यस्य शर्मन् उप विश्वे जनासः एवैः तस्थुः सुऽमतिं भिक्षमाणाः वैश्वानरः वरं आ रोदस्योः आ अग्निः ससाद पिप्रोः उपऽस्थे॥६॥ आ देवः ददे वृष्ट्या वसूनि वैश्वानरः उतऽईता सूर्यस्य आ समुद्रात् अवरात् आ परस्मात् आ अग्निः ददे दिवः आ पृथिव्याः॥७॥९॥

॥७॥ प्र वः देवं चित् सहसानं अग्निं अश्वं न वाजिनं हिषे नमःऽभिः भगं नः दूतः अध्वरस्य विद्वान् त्मना देवेषु विविदे मित्तऽर्दुः॥१॥ आ याहि अग्ने पथ्याः अनु स्वाः मंद्रः देवानां सख्यं जुषाणः आ सानु भुर्मैः नदयन् पृथिव्याः जंभेभिः विश्वं उशधक् वनानि॥२॥ प्राचीनैः यज्ञः सुऽधितं हि वर्हिः प्रीणीते अग्निः ईळितः न होता आ मातरा विश्वऽवारे॰ हुवानः यतः यविष्ठ जज्ञिषे सुऽशेवः॥३॥ सद्यः अध्वरे रथिरं जनंत मानुषासः विऽचेतसः यः एषां विशां अधायि विश्पतिः दुरोणे अग्निः मंद्रः मधुऽवचाः ऋतऽवा॥४॥ असादि वृतः वर्हिः आऽजगन्वान् अग्निः मह्ना नृऽसदने विऽधर्ता द्यौः च यं पृथिवी ववृधाते आ यं होता यजति विश्वऽवारं॥५॥ एते द्युभेभिः विश्वं आ अतिरंत मंवैं ये वा अरैं नयोः अतक्षन् प्र ये विशः तिरंत श्रोषमाणाः आ ये मे अस्य दीधयन् ऋतस्य॥६॥ नु त्वा अग्ने ईमहे वसिष्ठाः ईशानं सूनो सहसः वसूनां इषं स्तोतृऽभ्यः मघवन्ऽभ्यः आनट् यूयं पात स्वस्तिऽभिः सदा नः॥७॥१०॥

॥८॥ इंधे राजा संऽअयैः नमःऽभिः यस्य प्रतीकं आऽहुतं घृतेन

नरो॑ ह॒व्येभि॑रीळते सु॒वाध॒ आग्निर॒यं उ॒पसा॑मशोचि ॥१॥ अ॒य॒मु॒ ष्य सु॒महाँ॑ अवेदि॒ होता॑ मं॒द्रो मनु॑षो य॒ह्वो अ॒ग्निः। वि भा अ॑कः ससृजा॒नः पृ॑थि॒व्यां कृ॒ष्णप॑विरोषधी॒भिर्व॑वक्षे ॥२॥ कया॑ नो अग्ने॒ वि व॑सः सुवृ॒क्तिं काम॑ꣳ स्व॒धाम॑ृणवः श॒स्यमा॑नः। क॒दा भ॑वेम॒ पत॑यः सुदत्र रा॒यो वं॒तारो॑ दुष्टर॒स्य सा॒धोः ॥३॥ प्रप्राय॒मग्निर्भ॑रत॒स्य शृ॒ण्वे॒ वि यत्सूर्यो॒ न रो॑च॒ते बृ॒हद्भाः। अ॒भि यः पूरुं॑ पृतना॒सु तस्थौ॒ द्यु॒ता॒नो दैव्यो॒ अति॑थिः शु॒शोच॥४॥ अस॒न्निक्ते॒ आह॑वनानि॒ भूरि॑ भु॒वो॒ विश्वे॑भिः सु॒मना॒ अनी॑कैः। स्तु॒तश्चि॑दग्ने शृणि॒षे गृ॑णा॒नः स्व॒यं व॑र्धस्व त॒न्वं॑ सुजात ॥५॥ इ॒दं वचः॑ शत॒साः संस॑हस्रमु॒द्नय॑ जनिषीष्ट ब्रि॒बर्हाः। शं यत्स्तो॒तृभ्य॑ आ॒पये॒ भवा॑ति द्यु॒मद॑मीव॒चात॑नं र॒घो॒हा ॥६॥ नू त्वा॑मग्न ईमहे व॒सिष्ठा॒ ईशा॑नं सू॒नो सह॑सो॒ वसू॑नां। इषं॑ स्तो॒तृभ्यो॑ मघवन्न॒ आनड्यू॒यं पा॑त स्व॒स्तिभिः॑ सदा॑ नः ॥७॥११॥

॥ ९ ॥ १–६ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥९॥ अबो॑धि जा॒र उ॒पसा॑मुपस्था॒द्धोता॑ मं॒द्रः क॒वित॑मः पाव॒कः। दधा॑ति के॒तुमु॒भय॑स्य जं॒तोर्हव्या॑ दे॒वेषु॒ द्रवि॑णं सु॒कृत्सु ॥१॥ स सु॒क्रतु॑र्यो॑ वि दुरः॑ पणी॒नां पु॑ना॒नो अ॒र्कं पु॑रु॒भोज॑सं नः। होता॑ मं॒द्रो वि॒शां दमू॑नास्ति॒रस्त॑मो॒ दद॑शे रा॒म्याणां॑ ॥२॥ अमू॑रः क॒विर॑दितिर्विवस्वान्त्सु॒संस॑न्निचो॒ अति॑थिः शि॒वो नः॑। चि॒त्रभा॑नु॒रुषसा॑ भा॒त्यग्रे॑ऽपां गर्भः॑ प्र॒स्व॑१॒॑आ वि॑वेश ॥३॥ इ॒ळेन्यो॑ वो॒ मनु॑षो यु॒गेषु॑-समन॒गा अ॑शुच॒ज्जात॑वेदाः। सु॒सं॒दृशं॑ भा॒नुना॒ यो वि॒भाति॒ प्रति॒ गावः॑ समिधा॒नं जु॑धंत ॥४॥ अग्ने॑ याहि दू॒त्यं॑१॒॑मा रि॑पण्यो॒ देवाँ॑ अच्छा॒ बृह॑त्कृता॑

नरः ह्व्येभिः ईळते सऽवाधः आ अग्निः अयें उषसां अरोचि ॥१॥ अयं ऊं स्यः सुऽमहान् अवेदि होता मंद्रः मनुषः यह्वः अग्निः वि भाः अकः० ससृजानः पृथिव्यां कृष्णऽर्पविः ओषधीभिः ववक्षे॥२॥ कया नः अग्ने वि वसः सुऽवृक्तिं कां ऊं स्वधां चृणवः शस्यमानः कदा भवेम पतयः सुऽदक्ष रायः वंतारः दुस्तरस्य साधोः॥३॥ प्रऽप्र अयं अग्निः भरतस्य शृण्वे वि यत् सूर्यः न रोचते बृहत् भाः अभि यः पूरुं पृतनासु तस्थौ द्युतानः दैव्यः अतिथिः शुशोच॥४॥ असन् इत् त्वे आऽहवनानि भूरि भुवः विश्वेभिः सुऽमनाः अनीकैः स्तुतः चित् अग्ने शृणिषे गृणानः स्वयं वर्धस्व तन्वं सुऽजात॥५॥ इदं वचः शतऽसाः संऽसहस्रं उत् अग्नये जनिषीष्ट द्विऽबर्हाः शं यत् स्तोतृऽभ्यः आपये भवाति द्युऽमत् अमीवऽचातनं रक्षःऽहा॥६॥ नु त्वा अग्ने ईमहे वसिष्ठाः ईशानं सूनो सहसः वसूनां इषं स्तोतृऽभ्यः मघवत्ऽभ्यः आनट् यूयं पात स्वस्तिऽभिः सदा नः॥७॥११॥

॥९॥ अबोधि जारः उषसां उपऽस्थात् होता मंद्रः कविऽतमः पावकः दधाति केतुं उभयस्य जंतोः हव्या देवेषु द्रविणं सुकृत्ऽसु ॥१॥ सः सुऽक्रतुः यः वि दुरः पणीनां पुनानः अर्कं पुरुऽभोजसं नः होता मंद्रः विशां दमूनाः तिरः तमः दृहते राम्याणां॥२॥ अमूरः कविः अदितिः विवस्वान् सुऽसंसत् मित्रः अतिथिः शिवः नः चित्रऽभानुः उषसां भाति अग्ने अपां गर्भः प्रऽस्थः आ विवेश॥३॥ ईळेन्यः वः मनुषः युगेषु समनऽगाः अशुचत् जातऽवेदाः सुऽसंहसां भानुना यः विऽभाति प्रति गावः संऽइधानं घृतंत॥४॥ अग्ने याहि दूत्यं मा रिषण्यः देवान् अच्छ बृहऽकृतां

गृणेन। सरस्वतीं मरुतो अश्विनापो यक्षि देवान्नृत्धेयाय विश्वान् ॥५॥ त्वामग्ने समिधानो वसिष्ठो जरूथं हुन्यक्षि राये पुरंधिं। पुरुणीथा जातवेदो जरस्व यूयं पात स्वस्तिभिः सदा नः ॥६॥१२॥

॥ १० ॥ १–५ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१०॥ उषो न जारः पृथु पाजो अश्वेद्विद्युतद्दीद्यच्छोशुचानः। वृषा हरिः शुचिरा भाति भासा धियो हिन्वान उशतीरजीगः ॥१॥ स्व१र्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म। अग्निर्जन्मानि देव आ वि विद्वान्द्रवद्दूतो देवयावा वनिष्ठः ॥२॥ अच्छा गिरो मतयो देवयंतीरग्निं यंति द्रविणं भिक्षमाणाः। सुसंदृशं सुप्रतीकं स्वंचं हव्यवाहमरतिं मानुषाणां ॥३॥ इंद्रं नो अग्ने वसुभिः सजोषा रुद्रं रुद्रेभिरा वहा बृहंतं। आदित्येभिरदितिं विश्वजन्यां बृहस्पतिमृक्वभिर्विश्ववारं ॥४॥ मंद्रं होतारमुशिजो यविष्ठमग्निं विशं ईळते अध्वरेषु। स हि क्षपावाँ अभवद्रयीणामतंद्रो दूतो यजथाय देवान् ॥५॥१३॥

॥ ११ ॥ १–५ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥११॥ महाँ असि अध्वरस्य प्रकेतो न ऋते त्वदमृता मादयंते। आ विश्वेभिः सरथं याहि देवेभ्यग्ने होता प्रथमः सदेह ॥१॥ त्वामीळते अजिरं दूत्याय हविष्मंतः सदमिन्मानुषासः। यस्य देवैरासदो बर्हिरग्नेऽहान्यस्मै सुदिना भवंति ॥२॥ चिथिद्धि ते मह्यग्ने अदाशुषे मर्त्याय। मन्मोशिजो न रण्यसि ॥३॥ अग्निरीशे बृहतो अध्वरस्याग्निर्विश्वस्य हविषः

गणेन सरस्वतीं मरुतः अश्विना अपः यक्षि देवान् रत्नऽधेयाय विश्वान्॥५॥ त्वां अग्ने संऽइधानः वसिष्ठः जरूथं हन् यक्षि राये पुरंऽधिं पुरुऽनीथा जातऽवेदः जरस्व यूयं पात स्वस्तिऽभिः सदा नः॥६॥१२॥

॥१०॥ उपः न जारः पृथु पाजः अश्रेत् दविद्युतत् दीद्यत् शोशुचानः वृषा हरिः शुचिः आ भाति भासा धियः हिन्वानः उशतीः अजीगः॥१॥ स्वः न वस्तोः उपसां अरोचि यज्ञं तन्वानाः उशिजः न मन्म अग्निः जन्मानि देवः आ वि विद्वान् द्रवत् दूतः देवऽयावा वनिष्ठः॥२॥ अच्छ गिरः मतयः देवऽयंतीः अग्निं यंति द्रविणं भिक्षमाणाः सुऽसंदृशं सुऽप्रतीकं सुऽअंचं हव्यऽवाहं अरतिं मानुषाणां॥३॥ इंद्रं नः अग्ने वसुऽभिः सऽजोषाः रुद्रं रुद्रेभिः आ वह बृहंतं आदित्येभिः अदितिं विश्वऽजन्यां बृहस्पतिं ऋक्वऽभिः विश्वऽवारं॥४॥ मंद्रं होतारं उशिजः यविष्ठं अग्निं विशः ईळते अध्वरेषु सः हि क्षपावान् अभवत् रयीणां अतंद्रः दूतः यजथाय देवान्॥५॥१३॥

॥११॥ महान् असि अध्वरस्य प्रऽकेतः न ऋते त्वत् अमृताः मादयंते आ विश्वेभिः सऽरथं याहि देवैः नि अग्ने होता प्रथमः सदं इह॥१॥ त्वां ईळते अजिरं दूत्याय हविष्मंतः सदं इत् मानुषासः यस्य देवैः आ असदः बर्हिः अग्ने अहानि अस्मै सुऽदिना भवंति॥२॥ चित्रः चित् अक्तोः प्र चिकितुः वसूनि त्वे अंतः दाशुषे मर्त्याय मनुष्वत् अग्ने इह यक्षि देवान् भव नः दूतः अभिशस्तिऽपावा॥३॥ अग्निः ईशे बृहतः अध्वरस्य अग्निः विश्वस्य हविषः

कृतस्य। ऋतुं ह्यस्य वसवो जुषंतार्था देवा दधिरे हव्यवाहं॥४॥ अग्ने वह हविरद्याय देवानिंद्रज्येष्ठास इह मादयंतां। इमं यज्ञं दिवि देवेषु धेहि यूयं पात स्वस्तिभिः सदा नः॥५॥१४॥

॥ १२॥ १–३ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१२॥ अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे। चित्रभानुं रोदसी अंतरुर्वी स्वाहुतं विश्वतः प्रत्यंचं॥१॥ स महा विश्वा दुरितानि साह्वानग्निः ष्टवे दम आ जातवेदाः। स नो रक्षिषद्दुरितादवद्यादुस्मान्गृणत उत नो मघोनः॥२॥ त्वं वरुण उत मित्रो अग्ने त्वां वर्धंति मतिभिर्वसिष्ठाः। त्वे वसु सुषणुनानि संतु यूयं पात स्वस्तिभिः सदा नः॥३॥१५॥

॥ १३॥ १–३ वसिष्ठः ॥ वैश्वानरः ॥ त्रिष्टुप् ॥

॥१३॥ प्राग्नये विश्वशुचे धियंधेऽसुरघ्ने मन्म धीतिं भरध्वं। भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनां॥१॥ त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः। त्वं देवाँ अभिशस्तेरमुंचो वैश्वानर जातवेदो महित्वा॥२॥ जातो यदग्ने भुवना व्यख्यः पशून्न गोपा इर्यः परिज्मा। वैश्वानर ब्रह्मणे विंद गातुं यूयं पात स्वस्तिभिः सदा नः॥३॥१६॥

॥ १४॥ १–३ वसिष्ठः ॥ अग्निः ॥ १ बृहती। २, ३ त्रिष्टुप् ॥

॥१४॥ समिधा जातवेदसे देवायं देवहूतिभिः। हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये॥१॥ वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र। वयं घृतेनाध्वरस्य

कृतस्य क्रतुं हि अस्य वर्सवः जुषंत अर्थ देवाः दधिरे हव्यऽवाहं ॥४॥ आ अग्ने वह हविःऽअद्याय देवान् इंद्रऽज्येष्ठासः इह मादयंतां इमं यज्ञं दिवि देवेषु धेहि यूयं पात स्वस्तिऽभिः सदा नः ॥५॥१४॥

॥१२॥ अगंन्म महा नमसा यविष्ठं यः दीदाय समिद्धः स्वे दुरोणे चिचऽभानुं रोदसी अंतः उर्वी सुऽआहुतं विश्वतः प्रत्यंचं ॥१॥ सः महा विश्वा दुःऽइतानि सहान् अग्निः स्तवे दमे आ जातऽवेदाः सः नः रक्षिषत् दुःऽइतात् अवद्यात् अस्मान् गृणतः उत नः मघोनः ॥२॥ त्वं वरुणः उत मित्रः अग्ने त्वां वर्धंति मतिऽभिः वसिष्ठाः त्वे वसु सुऽअनानि संतु यूयं पात स्वस्तिऽभिः सदा नः ॥३॥१५॥

॥१३॥ प्र अग्नये विष्वऽशुचे धियंऽधे असुरऽअग्ने मन्म धीतिं भरध्वं भरे हविः न बर्हिषि प्रीणानः वैश्वानराय यतये मतीनां ॥१॥ त्वं अग्ने शोचिषा शोशुचानः आ रोदसी अपृणाः जायमानः त्वं देवान् अभिऽशस्तेः अमुंचः वैश्वानर जातऽवेदः महिऽत्वा ॥२॥ जातः यत् अग्ने भुवना वि अख्यः पशून् न गोपाः इर्यः परिऽज्मा वैश्वानर ब्रह्मणे विंद गातुं यूयं पात स्वस्तिऽभिः सदा नः ॥३॥१६॥

॥१४॥ समिद्धः जातऽवेदसे देवाय देवहूतिऽभिः हविःऽभिः शुक्रऽशोचिषे नमस्विनः वयं दाशेम अग्नये ॥१॥ वयं ते अग्ने समिद्धः विधेम वयं दाशेम सुऽस्तुती यजत्र वयं घृतेन अध्वरस्य

होतर्वयं देव हविषा भद्रशोचे ॥२॥ आ नो देवेभिरुप देवहूतिमग्ने याहि वषट्कृतिं जुषाणः। तुभ्यं देवाय दाशतः स्याम यूयं पात स्वस्तिभिः सदा नः ॥३॥ १७॥

॥ १५ ॥ १–१५ वसिष्ठः ॥ अग्निः ॥ गायत्री ॥

॥ १५ ॥ उपसद्याय मीळ्हुष आस्ये जुहुता हविः। यो नो नेदिष्ठमापिम् ॥१॥ यः पंच चर्षणीरभि निषसाद दमेदमे। कविर्गृहपतिर्युवा ॥२॥ स नो वेदो अमात्यमग्नी रक्षतु विश्वतः। उतास्मान्पात्वंहसः ॥३॥ नवं नु स्तोममग्नये दिवः श्येनाय जीजनं। वस्वः कुविद्वनाति नः ॥४॥ स्याहा यस्य श्रियो दृशे रयिर्वीरवती यथा। अग्ने यज्ञस्य शोचतः ॥५॥ १८॥ सेमां वेतु वषट्कृतिमग्निर्जुषत नो गिरः। यजिष्ठो हव्यवाहनः ॥६॥ नि त्वा नक्ष्य विश्पते द्युमंतं देव धीमहि। सुवीरमग्न आहुत ॥७॥ क्षपं उस्रश्च दीदिहि स्वग्नयस्त्वया वयं। सुवीरस्त्वमस्मयुः ॥८॥ उप त्वा सातये नरो विप्रासो यंति धीतिभिः। उपाक्षरा सहस्रिणी ॥९॥ अग्नी रक्षाँसि सेधति शुक्रशोचिरमर्त्यः। शुचिः पावक ईड्यः ॥१०॥ १९॥ स नो राधांस्या भरेशानः सहसो यहो। भगश्च दातु वार्यं ॥११॥ त्वमग्ने वीरवद्यशो देवश्च सविता भगः। दितिश्च दाति वार्यं ॥१२॥ अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः। तपिष्ठैरजरो दह ॥१३॥ अधा महीं न आयस्यनाधृष्टो नृपीतये। पूर्भवा शतभुजिः ॥१४॥ त्वं नः पाह्यंहसो दोषावस्तरयायतः। दिवा नक्तमदाभ्य ॥१५॥ २०॥

॥ १६ ॥ १–१२ वसिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ १६ ॥ एना वो अग्निं नमसोर्जो नपातमा हुवे। प्रियं चे-

होतः वयं देव हविषा भद्रऽशोचे॥२॥ आ नः देवेभिः उप देवऽहूतिं अग्ने याहि वषट्ऽकृतिं जुषाणः तुभ्यं देवाय दाशतः स्याम यूयं पात स्वस्तिऽभिः सदा नः॥३॥१७॥

॥१५॥ उपऽसद्याय मीळ्हुषे आ स्रुचे जुहुत हविः यः नः नेदिष्ठं आप्यं॥१॥ यः पंच चर्षणीः अभि निऽससाद दमेऽदमे कविः गृहऽपतिः युवा॥२॥ सः नः वेदः अमात्यं अग्निः रक्षातु विश्वतः उत अस्मान् पातु अंहसः॥३॥ नवं नु स्तोमं अग्नये दिवः श्येनाय जीजनं वस्वः कुवित् वनाति नः॥४॥ स्याहीः यस्य श्रियः दृशे रयिः वीरऽवतः यषा अग्ने यज्ञस्य शोचतः॥५॥१८॥ सः इमां वेतु वषट्ऽकृतिं अग्निः जुषत नः गिरः यजिष्ठः हव्यऽवाहनः॥६॥ नि त्वा नक्ष्य विश्पते द्युऽमंतं देव धीमहि सुऽवीरं अग्ने आऽहुत॥७॥ क्षपः उस्रः च दीदिहि सुऽअग्नयः त्वया वयं सुऽवीरः त्वं अस्मऽयुः॥८॥ उप त्वा सातये नरः विप्रासः यंति धीतिऽभिः उप अध्वरासहस्रिणीं॥९॥ अग्निः रक्षांसि सेधति शुक्रऽशोचिः अमर्त्यः शुचिः पावकः ईड्यः॥१०॥१९॥ सः नः राधांसि आ भर ईशानः सहसः यहो भगः च दातु वार्यं॥११॥ त्वं अग्ने वीरऽवत् यशः देवः च सविता भगः दितिः च दाति वार्यं॥१२॥ अग्ने रक्ष नः अंहसः प्रति स्म देव रिषतः तपिष्ठैः अजरः दह॥१३॥ अध मही नः आयसी अनाधृष्टः नृऽपीतये पूः भव शतऽभुजिः॥१४॥ त्वं नः पाहि अंहसः दोषाऽवस्तः अघऽयतः दिवा नक्तं अदाभ्य॥१५॥२०॥

॥१६॥ एना वः अग्निं नमसा ऊर्जः नपातं आ हुवे प्रियं चे-

तिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतं॥१॥ स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः। सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानां॥२॥ उदस्य शोचिरस्थादाजुह्वानस्य मीळ्हुषः। उद्धूमासो अरुषासो दिविस्पृशः समग्निमिंधते नरः॥३॥ तं त्वा दूतं कृणमहे यशस्तमं देवाँ आ वीतये वह। विश्वा सूनो सहसो मर्तभोजना रास्व तद्यत्त्वेमहे॥४॥ त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे। त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वायें॥५॥ कृधि रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि। आ नं ऋते शिशीहि विश्वमृत्विजं सुशंसो यश्च दक्षते॥६॥२१॥ त्वे अग्ने स्वाहुत प्रियासः संतु सूरयः। यंतारो ये मघवानो जनानामूर्वान्दयंत गोनां॥७॥ येषामिळा घृतहस्ता दुरोण आँ अपि प्राता निषीदति। तांस्त्वायस्व सहस्य दुहो निदो यच्छा नः शर्म दीर्घश्रुत्॥८॥ स मंद्रया च जिह्वया वह्निरासा विदुष्टरः। अग्ने रयिं मघवद्भ्यो न आ वह हव्यदातिं च सूदय॥९॥ ये राधांसि ददत्यश्व्या मघा कामेन श्रवसो महः। ताँ अंहसः पिपृहि पर्तृभिष्ट्वं शतं पूर्भिर्यविष्ठ्य॥१०॥ देवी वो द्रविणोदाः पूर्णां विवष्ट्यासिचं। उद्वा सिंचध्वमुप वा पृणध्वमादिद्वो देव ओहते॥११॥ तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत। दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषें॥१२॥२२॥

॥ १७ ॥ १–७ वसिष्ठः ॥ अग्निः ॥ द्विपदा विराट् ॥

॥१७॥ अग्ने भव सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीतां॥१॥ उत द्वारं उशतीर्वि श्रयंतामुत देवाँ उशत आ वहेह॥२॥ अग्ने वीहि हविषा यक्षि देवान्त्स्वध्वरा कृणुहि

तिष्ठं अरतिं सुऽअध्वरं विश्वस्य दूतं अमृतं॥१॥ सः योजते अरुषा विश्वऽभोजसा सः दुद्रवत् सुऽआहुतः सुऽब्रह्मा यज्ञः सुऽशमी वसूनां देवं राधः जनानां॥२॥ उत अस्य शोचिः अस्थात् आऽजुह्वानस्य मीळ्हुषः उत धूमासः अरुषासः दिविऽस्पृशः सं अग्निं इंधते नरः॥३॥ तं त्वा दूतं कृणुमहे यशःऽतमं देवान् आ वीतये वह विश्वा सूनो सहसः मर्तऽभोजना रास्व तत् यत् त्वा ईमहे॥४॥ त्वं अग्ने गृहऽपतिः त्वं होता नः अध्वरे त्वं पोता विश्वऽवार प्रऽचेताः यक्षि वेषि च वार्यं॥५॥ कृधि रत्नं यजमानाय सुऽक्रतो त्वं हि रत्नऽधाः असि आ नः भूते शिशीहि विश्वं भृत्विजं सुऽशंसः यः च दक्षते॥६॥२१॥ त्वे अग्ने सुऽआहुत प्रियासः सन्तु सूरयः यन्तारः ये मघऽवानः जनानां ऊर्वान् दयत गोनां॥७॥ येषां इळा घृतऽहस्ता दुरोणे आ अपिं प्राता निऽसीदति तान् चायस्व सहस्य दुहः निदः यच्छ नः शर्म दीर्घऽश्रुत्॥८॥ सः मंद्रया च जिह्वया वह्निः आसा विदुःऽतरः अग्ने रयिं मघवत्ऽभ्यः नः आ वह हव्यऽदातिं च सूदय॥९॥ ये राधांसि ददति अश्व्या मघा कामेन श्रवसः महः तान् अंहसः पिपृहि पर्तृऽभिः त्वं शतं पूःऽभिः यविष्ठ्य॥१०॥ देवः वः द्रविणःऽदाः पूर्णां विवष्टि आऽसिचं उत् वा सिंचध्वं उप वा पृणध्वं आत् इत् वः देवः ओहते॥११॥ तं होतारं अध्वरस्य प्रऽचेतसं वह्निं देवाः अकृण्वत दधाति रत्नं विधते सुऽवीर्यं अग्निः जनाय दाशुषे॥१२॥२२॥

॥१७॥ अग्ने भव सुऽसमिधा संऽइद्धः उत बर्हिः उर्विया वि स्तृणीतां॥१॥ उत द्वारः उशतीः वि श्रयंतां उत देवान् उशतः आ वह इह॥२॥ अग्ने वीहि हविषा यक्षि देवान् सुऽअध्वरा कृणुहि

जातवेदः ॥३॥ स्वध्वरा करति जातवेदा यक्षद्देवाँ अमृतान्पिप्रयंच्च ॥४॥ वंस्व विश्वा वार्याणि प्रचेतः सत्या भवंत्वाशिषो नो अद्य ॥५॥ त्वामु ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज आ नपातं ॥६॥ ते ते देवाय दाशतः स्याम महो नो रत्ना वि दध इयानः ॥७॥२३॥१॥

॥ १८ ॥ १–२५ वसिष्ठः ॥ १–२१ इंद्रः । २२–२५ सुदासः पैजवनस्य दानस्तुतिः ॥ त्रिष्टुप् ॥

॥१८॥ त्वे ह यत्पितरश्चिन्न इंद्र विश्वा वामा जरितारो असन्वन् । त्वे गावः सुदुघास्त्वे ह्यश्वास्त्वं वसु देवयते वनिष्ठः ॥१॥ राजेव हि जनिभिः क्षेष्येवाव द्युभिरभि विदुष्कविः सन् । पिशा गिरो मघवन्गोभिरश्वैस्त्वायतः शिशीहि राये अस्मान् ॥२॥ इमा उ त्वा पस्पृधानासो अत्र मंद्रा गिरो देवयंतीरुप स्युः । अर्वाची ते पथ्या राय एतु स्यामं ते सुमतावित्र शर्मन् ॥३॥ धेनुं न त्वा सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः । त्वामिन्मे गोपतिं विश्व आहा न इंद्रः सुमतिं गंतवच्छ ॥४॥ अर्णांसि चित्प्रप्रथाना सुदास इंद्रो गाधान्यकृणोत्सुपारा । शर्धंतं शिम्युमुचथस्य नव्यः शापं सिंधूनामकृणोदशस्तीः ॥५॥२४॥ पुरोळा इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव । शृष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद्विपूचोः ॥६॥ आ पक्थासो भलानसो भनंतालिनासो विषाणिनः शिवासः । आ योऽनयत्सधमा आर्यस्य गव्या नृत्सुभ्यो अजगन्युधा नॄन् ॥७॥ दुराध्योऽशरितिं सेवयंतोऽचेतसो वि जगृभ्रे पणीं । मन्द्राविव्यक्पृषिवीं पत्यमानः पशुष्कविरंगयच्चायमानः ॥८॥ इयुरर्थं न न्यर्थं पणीमाशुश्चनेदभिपित्वं

जातऽवेदः॥३॥ सुऽअध्वरा करति जातऽवेदाः यक्षत् देवान् अमृतान् पिप्रयत् च॥४॥ वंस्व विश्वा वार्याणि प्रऽचेतः० सत्याः भवंतु आऽशिषः नः अद्य॥५॥ त्वां ऊं ते दधिरे हव्यऽवाहं देवासः अग्ने ऊर्जः आ नपातं॥६॥ ते ने देवाय दाशतः स्याम महः नः रत्ना वि दधः दयानः॥७॥२३॥१॥

॥१८॥ त्वे ह यत् पितरः चित् नः इंद्र विश्वा वामा जरितारः असन्वन् त्वे गावः सुऽदुघाः त्वे हि अश्वाः त्वं वसु देवऽयते वनिष्टः॥१॥ राजाऽइव हि जनिऽभिः क्षेषि एव अवं द्युऽभिः अभि विदुः कविः सन् पिशा गिरः मघऽवन् गोभिः अश्वैः त्वाऽयतः शिशीहि राये अस्मान्॥२॥ इमाः ऊं त्वा पस्पृधानासः अवं मंद्राः गिरः देवऽयंतीः उप स्युः अर्वाचीं ते पथ्या रायः एतु स्यामं ते सुऽमतौ इंद्र शर्मन्॥३॥ धेनुं न त्वा सुऽयवसे दुधुक्षन् उप ब्रह्माणि ससृजे वसिष्ठः त्वां इत् मे गोऽपतिं विश्वः आह आ नः इंद्रः सुऽमतिं गंतु अच्छ॥४॥ अणींसि चित् पप्रथाना सुऽदासे इंद्रः गाधानि अकृणोत् सुऽपारा शर्धंतं शिम्युं उचथस्य नव्यः शापं सिंधूनां अकृणोत् अशस्तीः॥५॥२४॥ पुरोळाः इत् तुर्वशः यक्षुः आसीत् राये मत्स्यासः निऽशिताः अपिंऽइव स्रुटिं चक्रुः भृगवः द्रुह्यवः च सखा सखायं अतरत् विपूचोः॥६॥ आ पक्थासः भलानसः भनंत आ अलिनासः विषाणिनः शिवासः आ यः अनयत् सधऽमाः आर्यस्य गव्या तृत्सुऽभ्यः अजगन् युधा नॄन्॥७॥ दुःऽआध्यः अदितिं सेवयंतः अचेतसः वि जगृभ्रे पणीनां महा अविष्यक् पृथिवीं पत्यमानः पशुः कविः अशयत् चायमानः॥८॥ ईयुः अर्थं न निऽअर्थं पणीनां आशुः चन इत् अभिऽपित्वं

जगाम । सुदास इंद्रः सुतुकाँ अमित्रानरंधयन्मानुषे वध्रिवाचः ॥ ९ ॥ इयुर्गावो न यवसादगोपा यथाकृतमभि मित्रं चितासः । पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं चक्रुर्नियुतो रंतयश्च ॥ १० ॥ २५ ॥ एकं च यो विंशतिं च श्रवस्या वैकर्णयोर्जनान्राजा न्यस्तः । दस्मो न सद्मन्नि शिशाति बर्हिः शूरः सर्गमकृणोदिंद्र एषां ॥ ११ ॥ अधं श्रुतं कवषं वृद्धमप्स्वनुं दुह्युं नि वृणग्वज्रबाहुः । वृणाना अत्र सख्याय सख्यं त्वायंतो ये अमदन्ननु त्वा ॥ १२ ॥ वि सद्यो विश्वा दंहितान्येषामिंद्रः पुरः सहसा सप्त दर्दः । व्यानवस्य तृत्सवे गयं भाग्जेष्मं पूरुं विदथे मृध्रवाचं ॥ १३ ॥ नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट् सहस्रा । षष्टिर्वीरासो अधि षट् दुवोसु विश्वेदिंद्रस्य वीर्या कृतानि ॥ १४ ॥ इंद्रेषिते तृत्सवो वेविषाणा आपो न सृष्टा अधवंत नीचीः । दुर्मित्रासः प्रकलविन्मिमाना जहुर्विश्वानि भोजना सुदासे ॥ १५ ॥ २६ ॥ अधं वीरस्य शृतपामनिंद्रं परा शर्धंतं नुनुदे अभि क्षां । इंद्रो मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनिं पर्यमानः ॥ १६ ॥ आग्नेयं चित्तइकं चकार सिंह्यं चित्पेत्वेना जघान । अवं सक्रीर्वेश्यावृश्चदिंद्रः प्रायच्छद्विश्वा भोजना सुदासे ॥ १७ ॥ शर्धंतो हि शर्वो राधुषे भेदस्य चिच्छर्धतो विंद रंधिं । मर्ता एनः स्तुवतो यः कृणोति तिग्मं तस्मिन्नि जहि वज्रमिंद्र ॥ १८ ॥ आवदिंद्रं यमुना तृत्सवश्च प्राचं भेदं सर्वताता मुपायत् । अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्वानि ॥ १९ ॥ न तं इंद्र सुमतयो न रायः संचक्षे पूर्वी उषसो न नूत्नाः । देवंकं चिन्मान्यमानं जघंयाव त्मना बृहतः शंबरं भेत्

जगामसुऽदासेइंद्रः सुऽतुर्कान्अभिऽचान् अरंधयत्मानुषे वऽध्रिऽवाचः ॥९॥ ईयुः गावः न यवसात् अगोपाः यथाऽकृतं अभि मिचं चितासः पृष्निऽगावः पृष्निऽनिप्रेषितासः भ्रुषिं चक्रुः निऽयुतः रंतयः च॥१०॥२५॥ एकंच यः विंशतिं च श्रवस्या वैकर्णयोः जनान् राजा नि अस्तः० दस्मः न सद्मन् नि शिशाति बर्हिः शूरः सर्गं अकृणोत् इंद्रः एषां॥११॥ अर्ध भ्रुतं कवषं वृद्धं अप्ऽसु अनुं दुह्युं नि वृणक् वज्रंऽबाहुः वृणानाः अत्र सख्यायसख्यं त्वाऽयतः ये अमदन् अनुं त्वा॥१२॥ वि सद्यः विश्वा दुहितानिं एषां इंद्रः पुरः सहसा सप्त दर्दः० वि आनवस्य तृत्सवे गयंभाक् जेषं पूरुं विदथे मघऽवांचं॥१३॥ नि गव्यवः अनवः द्रुह्यवः च पष्टिः शता सुसुप्युः पट् सहस्रा पष्टिः वीरासः अधि षट् दुवःऽयु विश्वा इत् इंद्रस्य वीर्या कृतानिं॥१४॥ इंद्रेण एते तृत्सवः वेविषाणाः आपः न सृष्टाः अधवंत नीचीः दुःऽमित्रासः प्रकल्पऽवित् मिमानाः जहुः विश्वानि भोजना सुऽदासे॥१५॥२६॥ अर्ध वीरस्य मृतऽपां अनिंद्रं परा शर्धंतं नुनुदे अभि क्षां इंद्रः मन्युं मन्युऽम्यः मिमाय भेजे पथः वर्तनिं पत्यमानः॥१६॥ आग्रेण चित् तत् ऊं एकं चकार सिंहं चित् पेत्वेन जघान अव स्रक्तीः वेश्यां अवृश्चत् इंद्रः प्र अयच्छत् विश्वा भोजना सुऽदासे॥१७॥ शश्वंतः हि शर्वः ररधुः ते भेदस्य चित् शर्धतः विंद् रंधिं मर्तान् एनः स्तुवतः यः कृणोतिं तिग्मं तस्मिन् नि जहि वज्रं इंद्र॥१८॥ आवंत् इंद्रं यमुना तृत्सवः च प्र अत्र भेदं सर्वऽताता मुषायत् अजासः च शिग्यवः यक्षवः च बलिं शीर्षाणि जभ्रुः अश्वानि ॥१९॥ न ते इंद्र सुऽमतयः न रायः सं अचक्षे पूर्वीः उषसः न नूत्नाः देवंकं चित् मान्यमानं जघंथ अव त्मना बृहतः शंबरं भेत्

॥२०॥२७॥ प्र ये गृहादमंमदुस्त्वाया परांशरः शतयातुर्वसिष्ठः। न तें भोजस्य सख्यं मृषंताधा सूरिभ्यः सुदिना व्युच्छान्॥२१॥ द्वे नप्तुर्देववंतः शते गोर्द्वा रथा वधूमंता सुदासः। अहंन्नग्ने पैजवनस्य दानं होतेव सद्म पर्येमि रेभन्॥२२॥ चत्वारो मा पैजवनस्य दानाः स्महिष्टयः कृशनिनो निरेके। ऋज्रासो मा पृथिविष्ठाः सुदासस्तोकं तोकाय श्रवसे वहंति॥२३॥ यस्य श्रवो रोदसी अंतरुर्वी शीर्ष्णेशीर्ष्णे विबभाजा विभक्ता। सम्रेदिंद्रं न सवनो गृणंति नि युंध्यामधिमंशिशादभीकें॥२४॥ इमं नरो मरुतः सश्चतानु दिवोदासं न पितरं सुदासः। अविष्टना पैजवनस्य केतं दूणाशं क्षत्रमजरं दुवोयु॥२५॥२८॥

॥ १९ ॥ १–११ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१९॥ यस्तिग्मशृंगो वृषभो न भीम एकः कृष्टीश्यावयंति प्र विश्वाः। यः शश्वंतो अदाशुषो गयस्य प्रयंतासि सुष्वितराय वेदः॥१॥ त्वं ह त्यदिंद्र कुत्समावः शुश्रूषमाणस्तन्वा समर्ये। दासं यच्छुष्णं कुयवं न्यस्मा अरंधय आर्जुनेयाय शिक्षन्॥२॥ त्वं धृष्णो धृषता वीतहव्यं प्रावो विश्वाभिरूतिभिः सुदासं। प्र पौरुकुत्सिं त्रसदस्युमावः क्षेत्रसाता वृत्रहत्येषु पूरुं॥३॥ त्वं नृभिर्नृमणो देववीतौ भूरीणि वृत्रा हर्यश्व हंसि। त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहंतु॥४॥ तव त्यौत्नानिं वज्रहस्त तानि नव यत्पुरो नवतिं च सद्यः। निवेशने शततमाविवेषीरहन् वृत्रं नमुचिमुताहन्॥५॥२९॥ सना ता त इंद्र भोजनानि रातहव्याय दाशुषे सुदासे। वृष्णे ते हरी वृषणा युनज्मि व्यंतु ब्रह्माणि पुरुहू-

॥२०॥२७॥ प्रयेगृहात् अमंमदुः त्वाऽया पराऽशरः शतऽयातुः वसिष्ठः न ते भोजस्य सख्यं मृषंत अधं सूरिऽभ्यः सुऽदिना वि उच्छान् ॥२१॥ द्वे नप्तुः देवऽवंतः शते गोः द्वा रथा वधूऽमंता सुऽदासः अर्हन् अग्ने पैजऽवनस्य दानं होताऽइव सद्म परि एमि रेभन् ॥२२॥ चत्वारः मा पैजऽवनस्य दानाः स्मत्ऽदिष्टयः कृशनिनः निऽरेके चृज्रासः मा पृथिविऽस्थाः सुऽदासः तोकं तोकाय श्रवसे वहंति ॥२३॥ यस्य श्रवः रोदसी अंतः उर्वी शीर्ष्णेऽशीर्ष्णे विऽवभाजं विऽभक्ता सप्त इत् इंद्रं न सवतः गृणंति नि युध्यामधिं अशिशात् अभीके ॥२४॥ इमं नरः मरुतः सश्चत अनु दिवःऽदासं न पितरं सुऽदासः अविष्टन पैजऽवनस्य केतं दुःऽनशं क्षुचं अजरं दुवःऽयु ॥२५॥२८॥

॥१९॥ यः तिग्मऽशृंगः वृषभः न भीमः एकः कृष्टीः च्यवयति प्र विश्वाः यः शश्वंतः अदाशुषः गयस्य प्रऽयंता असि सुस्विंऽतराय वेदः ॥१॥ त्वं ह त्यत् इंद्र कुत्सं आवः शुष्णूपमाणः तन्वा सऽमर्ये दासं यत् शुष्णं कुयवं नि अस्मै अरंधयः आर्जुनेयाय शिक्षन् ॥२॥ त्वं धृष्णो धृषता वीतऽहव्यं प्र आवः विश्वाभिः ऊतिऽभिः सुऽदासं प्र पौरुऽकुत्सिं त्रसदस्युं आवः क्षेत्रंऽसाता वृचऽहत्येषु पूरुं ॥३॥ त्वं नृऽभिः नृऽमनः देवऽवीतौ भूरीणि वृचा हरिऽअश्व हंसि त्वं नि दस्युं चुमुरिं धुनिं च अस्वापयः दभीतये सुऽहंतु ॥४॥ तव श्रौलानिं वज्रऽहस्त तानिं नवं यत् पुरः नवतिं च सद्यः निऽवेशने शतऽतमा अविवेषीः अहन् च वृत्रं नमुचिं उत अहन् ॥५॥२९॥ सनाता ते इंद्र भोजनानि रातऽहव्याय दाशुषे सुऽदासे वृष्णे ते हरी वृषणा युनज्मि व्यंतु ब्रह्माणि पुरुऽ

शाक वाजं ॥६॥ मा ते अस्यां सहसावन्परिष्ठावघाय भूम हरिवः परादै। चार्यस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम ॥७॥ प्रियास इत्ते मघवन्नभिष्टौ नरो मदेम शरणे सखायः। नि तुर्वशं नि याद्वं शिशीह्यतिथिग्वाय शंस्यं करिष्यन् ॥८॥ सद्यश्चिन्नु ते मघवन्नभिष्टौ नरः शंसन्त्युक्थशास उक्था। ये ते हवेभिर्वि पणीरदाशन्नस्मान्वृणीष्व युज्याय तस्मै ॥९॥ एते स्तोमा नरां नृतम तुभ्यमस्मद्यंचो ददतो मघानि। तेषामिंद्र वृत्रहत्ये शिवो भूः सखा च शूरोऽविता च नृणां ॥१०॥ नू इंद्र शूर स्तवमान ऊती ब्रह्मजूतस्तन्वा वावृधस्व। उप नो वाजान्मिमीह्युप स्तीन्पृयं पांत स्वस्तिभिः सदा नः ॥११॥३०॥२॥

॥ २० ॥ १–१० वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२०॥ उग्रो जज्ञे वीर्याय स्वधावाञ्चक्रिरपो नर्यो यत्करिष्यन् । जग्मिर्युवा नृषदनमवोभिस्त्राता न इंद्र एनसो महश्चित् ॥१॥ हंता वृत्रमिंद्रः शूशुवानः प्रावीन्नु वीरो जरितारमूती । कर्ता सुदासे अह वा उ लोकं दाता वसु मुहुरा दाशुषे भूत् ॥२॥ युध्मो अनर्वा खजकृत्समद्वा शूरः सत्वापाड्जनुषेमषाळ्हः । व्यास इंद्रः पृतनाः स्वोजा अधा विश्वं शत्रूयंतं जघान ॥३॥ उभे चिदिंद्र रोदसी महित्वा पप्राथ तविषीभिस्तुविष्मः । नि वज्रमिंद्रो हरिवान्मिमिक्ष्न्त्समंधसा मदेषु वा उवोच ॥४॥ वृषा जजान वृषणं रणाय तमु चिन्नारी नर्यं ससूव । प्र यः सेनानीरध नृभ्यो अस्तीनः सत्वा गवेषणः स धृष्णुः ॥५॥१॥ नू चित्स भेषते जनो न रैष्न्मनो यो अस्य घोरमाविवासात् । यज्ञैर्य इंद्रे दधते दुवांसि क्षयत्स

ऽशाक वाजँ॥६॥ मा ते अस्यां सहसाऽवन् परिष्टौ अघाय भूम हरिऽवः पराऽदै चार्यस्व नः अवृकेभिः वरूथैः तव प्रियासः सूरिषु स्याम ॥७॥ प्रियासः इत् ते मघऽवन् अभिष्टौ नरः मदेम शरणे सखायः नि तुर्वशं नि याद्वं शिशीहि अतिथिऽग्वाय शंस्यं करिष्यन् ॥८॥ सद्यः चित् नु ते मघऽवन् अभिष्टौ नरः शंसंति उक्थऽशासः उक्था ये ते हवेभिः वि पणीन् अदाशन् अस्मान् वृणीष्व युज्याय तस्मै ॥९॥ एते स्तोमाः नरां नृऽतम तुभ्यं अस्मद्र्यंचः ददतः मघानि तेषां इंद्र वृचऽहत्ये शिवः भूः सखा च शूरः अविता च नृणां ॥१०॥ नु इंद्र शूर स्तवमानः ऊती ब्रह्मऽजूतः तन्वा ववृधस्व उप नः वाजान् मिमीहि उप स्तीन् यूयं पात स्वस्तिऽभिः सदा नः ॥११॥३०॥२॥

॥२०॥ उप्रः जज्ञे वीर्याय स्वधाऽवान् चक्रिः अपः नयैः यत् करिष्यन् जग्मिः युवा नृऽसदनं अर्वःऽभिः चाता नः इंद्रः एनसः महः चित् ॥१॥ हंता वृत्रं इंद्रः शूशुवानः प्र आवीत् नु वीरः जरितारं ऊती कर्ता सुऽदासे अह वै ऊं लोकं दाता वसु मुहुः आ दाशुषे भूत ॥२॥ युध्मः अनर्वा खजऽकृत् समत्ऽवा शूरः सत्वा याट् जनुषा ईं अपाळ्हः वि आसे इंद्रः पृतनाः सुऽओजाः अध विश्वं शचुऽयंतं जघान ॥३॥ उभे चित् इंद्र रोदसी महिऽत्वा आ पप्राथ तविषीभिः तुविष्मः नि वज्रं इंद्रः हरिऽवान् मिमिक्षन् सं अंधसा मदेषु वे उवोच ॥४॥ वृषा जजान वृषणं रणाय तं ऊं चित् नारीं नर्यं ससूव प्र यः सेनाऽनीः अध नृऽभ्यः अस्ति इनः सत्वा गोऽएषणः सः धृष्णुः ॥५॥१॥ नु चित् सः भेषते जनः न रेषत् मनः यः अस्य घोरं आऽविवासात् यज्ञैः यः इंद्रे दधते दुवांसि क्षयत् सः

राय ऋतपा ऋतेजाः॥६॥ यदिंद्र पूर्वो अपराय शिक्षन्नयज्ज्याया-न्कनीयसो देष्णं। अमृत इत्मर्यादीत दूरमा चिच्चिच्यं भरा रयिं नः॥७॥ यस्त इंद्र प्रियो जनो ददाशदसन्निरेके अद्रिवः सखा ते। वयं ते अस्यां सुमतौ चनिष्ठाः स्याम वरूथे अघतो नृपीतौ ॥८॥ एष स्तोमो अचिक्रदद्वृषा त उत स्तामुर्मघवन्नक्रपिष्ट। रायस्कामो जरितारं त आगन्वमंग शक्र वस्व आ शको नः॥९॥ स न इंद्र त्वयताया इषे धास्तमना च ये मघवानो जुनंति। वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः॥१०॥२॥

॥ २१ ॥ १–१० वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२१॥ असावि देवं गोऋजीकमंधो न्यस्मिन्निंद्रो जनुषेमुवोच। वोधामसि त्वा हर्यश्व यज्ञैर्वोधा नः स्तोममंधसो मदेषु ॥१॥ प्र यंति यज्ञं विपयंति बर्हिः सोममादो विदथे दुध्रवाचः। न्यु भ्रियंते यशसो गृभादा दूरेउपश्रो वृषणो नृपाचः॥२॥ त्वमिंद्र स्रवितवा अपस्कः परिष्ठिता अहिना शूर पूर्वीः। त्वावक्रे रथ्यो३ न धेना रेजंते विश्वा कृचिमाणि भीषा॥३॥ भीमो विवेषायुधेभिरेषामपांसि विश्वा नर्याणि विद्वान्। इंद्रः पुरो जर्हषाणो वि दूधोदि यज्ञहस्तो महिना जघान॥४॥ न यातवे इंद्र जूजुवुर्नो न वंदना शविष्ठ वेद्याभिः। स शर्धदर्यो विषुणस्य जंतोर्मा शिश्नदेवा अपि गुर्ऋतं नः ॥५॥३॥ अभि क्रत्वेंद्र भूरण्यन्नेन्नो विष्यन्महिमानं रजांसि। स्वेना हि वृत्रं शवसा जघंथ न शत्रुरंतं विविदद्युधा ते॥६॥ देवास्त्वेंद्र असुर्याय पूर्वेऽनु दाधार ममिरे सहांसि। इंद्रो मघानि दयते विषत्रेंद्रं वाजस्य जोहुवंत मातौ॥७॥ कोरि-

रायेऽऋतऽपाःऋतेऽजाः॥६॥ यत् इंद्र पूर्वेःअपराय शिक्षन् अर्यत्ज्यायान् कनीयसःदेष्णंअमृतंःइत् परिआसीत् दूरं आचित् चित्यंभर रयिं नः॥७॥ यः ते इंद्र प्रियःजनेःददाशत् असत् निरेकेअद्रिऽवः सखा ते वयं ते अस्यां सुऽमतौ चनिष्ठाः स्याम वरूथे अग्नतः नृऽपीतौ॥८॥ एषः स्तोमःअचिक्रदत् वृषा ते उत स्तामुः मघऽवन् अक्रपिष्ट रायः कामःजरितारं ते आ अगन् त्वं अंग शक्र वस्वःआ शकः नः॥९॥ सः नः इंद्र त्वऽयतायै इषे धाः त्मना च ये मघऽवानः जुनंति वस्वी सु ते जरित्रे अस्तु शक्तिः यूयं पात स्वस्तिऽभिः सदा नः॥१०॥२॥

॥२१॥ असावि देवं गोऽऋंजीकं अंधः नि अस्मिन् इंद्रः जनुषा ईं उवोच बोधामसि त्वा हरिऽअश्व यज्ञैः बोध नः स्तोमं अंधसः मदेषु॥१॥ प्र यंति यज्ञं विपयंति बर्हिः सोमऽमादः विदथे दुध्रऽवाचः नि ऊं भियंते यशसः गृभात् आ दूरेऽउपब्दः वृषणः नृऽसाचः॥२॥ त्वं इंद्र सवितवे अपः कः परिऽस्थिताः अहिना शूर पूर्वीः त्वत् वावक्रेरथ्यः न धेनाः रेजंते विश्वा कृचिमाणि भीषा॥३॥ भीमः विवेय आयुधेभिः एषां अर्यांसि विश्वा नर्याणि विद्वान् इंद्रः पुरः जर्हषाणः वि दूधोत् वि वज्रंऽहस्तः महिना जघान॥४॥ न यातवः इंद्र जूजुवुः नः न वंदना शविष्ठ वेद्याभिः सः शर्धत् अर्यः विषुणस्य जंतोः मा शिश्नऽदेवाः अपि गुः ऋतं नः॥५॥३॥ अभि क्रत्वा इंद्र भूः अर्धजमन् न ते विव्यक् महिमानं रजांसि स्वनं हि वृत्रं शवसा जघंथ न शत्रुः अंतं विविदत् युधा ते॥६॥ देवाः चित् ते असुर्याय पूर्वे अनु क्षत्राय ममिरे सहांसि इंद्रः मघानि दयते विऽसह्य इंद्रं वाजस्य जोहुवंत सातौ॥७॥ कीरिः

स्थिद्धि त्वामवंसे जुहावेशानमिंद्र सौभगस्य भूरेः। अवो वभूथ शतमूते अस्मे अभिक्षत्तुस्त्वावंतो वरूता ॥८॥ सखायस्त इंद्र विश्वहा स्याम नमोवृधासो महिना तरुच। वन्वंतु स्मा तेऽवंसा समीकेऽभींतिमर्यो वनुषां शवांसि ॥९॥ स नं इंद्र त्वयंताया ड्वे धास्मनां च ये मघवानो जुनंति। वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पांत स्वस्तिभिः सदा नः ॥१०॥४॥

॥ २२ ॥ १–९ वसिष्ठः ॥ इंद्रः ॥ १–८ विराट्। ९ त्रिष्टुप् ॥

॥२२॥ पिवा सोममिंद्र मंदतु त्वा यं ते सुषाव हर्यश्वाद्रिः। सोतुर्बाहुभ्यां सुयतो नार्वा ॥१॥ यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि। स त्वामिंद्र प्रभूवसो ममत्तु ॥२॥ बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिं। इमा ब्रह्म सधमादे जुषस्व ॥३॥ श्रुधी हवं विपिपानस्यादेर्बोधा विप्रस्यार्चतो मनीषां। कृष्वा दुवांस्यंतमा सचेमा ॥४॥ न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान्। सदा ते नाम स्वयशो विवक्मि ॥५॥५॥ भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित्। मारे अस्मन्मघवञ्छंसयोक्तः ॥६॥ तुभ्येदिमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणोमि। त्वं नृभिर्हव्यो विश्वधासि ॥७॥ नू चिन्नु ते मन्यमानस्य दस्मो-दंशुवंति महिमानमुग्र। न वीर्यमिंद्र ते न राधः ॥८॥ ये च पूर्व ऋषयो ये च नूना इंद्र ब्रह्माणि जनयंत विप्राः। अस्मे ते संतु सख्या शिवानि यूयं पांत स्वस्तिभिः सदा नः ॥९॥६॥

॥ २३ ॥ १–६ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२३॥ उदु ब्रह्माण्यैरत श्रवस्येंद्रं समर्ये महया वसिष्ठ।

चित् हि त्वां अवसे जुहावं ईशानं इंद्र सौभगस्य भूरेः अवः चभूथ शतंऽऊते अस्मे अभिऽक्षत्तुः त्वाऽवंतः वरूता॥८॥ सखायः ते इंद्र विश्वहा स्याम नमःऽवृधासः महिना तरुत्र वन्वंतु स्म ते अवसा संऽईके अभिऽईतिं अर्यः वनुषां शवांसि॥९॥ सः नः इंद्र त्वऽयंतायै इधाः त्मना च ये मघऽवानः जुनंति वस्वी सु ते जरित्रे अस्तु शक्तिः यूयं पात स्वस्तिऽभिः सदा नः॥१०॥४॥

॥२२॥ पिव सोमं इंद्र मंदतु त्वा यं ते सुसावं हरिऽअश्व अद्रिः सोतुः वाहुऽभ्यां सुऽयंतः न अर्वा॥१॥ यः ते मदः युज्यः चारुः अस्ति येन वृत्राणि हरिऽअश्व हंसि सः त्वां इंद्र प्रभुऽवसो० ममत्तु॥२॥ बोधं सु मे मघऽवन् वाचं आ इमां यां ते वसिष्ठः अर्चति प्रऽशस्तिं इमा ब्रह्म सधऽमादे जुषस्व॥३॥ श्रुधि हवं विऽपिपानस्य अद्रेः बोध विप्रस्य अर्चतः मनीषां कृष्व दुवांसि अंतमा सचा इमा॥४॥ न ते गिरः अपि मृष्ये तुरस्य न सुऽस्तुतिं असुर्यस्य विद्वान् सदा ते नाम स्वऽयशः विवक्मि॥५॥५॥ भूरिं हि ते सवना मानुषेषु भूरिं मनीषी हवते त्वां इत् मा आरे अस्मत् मघऽवन् ज्योक् कः०॥६॥ तुभ्यं इत् इमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणोमि त्वं नृऽभिः हर्यः विश्वधा असि॥७॥ नु चित् नु ते मन्यमानस्य दस्म उत् श्रुवंति महिमानं उग्र न वीर्यं इंद्र ते न राधः॥८॥ ये च पूर्वे ऋषयः ये च नूत्नाः इंद्र ब्रह्माणि जनयंत विप्राः अस्मे ते संतु सख्या शिवानि यूयं पात स्वस्तिऽभिः सदा नः॥९॥६॥

॥२३॥ उत् ऊं ब्रह्माणि ऐरत श्रवस्या इंद्रं सऽमर्ये महय वसिष्ठ

आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि॥१॥ अयामि घोषं इंद्र देवजामिरिज्यंत यच्छुरुधो विवाचि। नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान्॥२॥ युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः। वि बाधिष्ट स्य रोदसी महित्वेंद्रो वृत्राण्यप्रती जघन्वान्॥३॥ आर्पयश्चित्पिप्युः स्तर्यो३ न गावो नक्षन्नृतं जरितारस्त इंद्र। याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान्॥४॥ ते त्वा मदा इंद्र मादयंतु शुष्मिणं तुविराधसं जरित्रे। एको देवत्रा दयसे हि मर्तानस्मिञ्छूर सवने मादयस्व॥५॥ एवेदिंद्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चंत्यर्कैः। स नः स्तुतो वीरवत्पातु गोमद्यूयं पात स्वस्तिभिः सदा नः॥६॥७॥

॥ २४ ॥ १–६ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ २४ ॥ योनिष्ट इंद्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि। असो यथा नोऽविता वृधे च ददो वसूनि ममदश्च सोमैः॥१॥ गृभीतं ते मन इंद्र द्विबर्हाः सुतः सोमः परिषिक्ता मधूनि। विसृष्टधेना भरते सुवृक्तिरियमिंद्रं जोहुवती मनीषा॥२॥ आ नो दिव आ पृथिव्या चाजीषिन्निदं बर्हिः सोमपेयाय याहि। वहंतु त्वा हरयो मद्यंचमांगूषमच्छा तवसं मदाय॥३॥ आ नो विश्वाभिरूतिभिः सजोषा ब्रह्म जुषाणो हर्यश्व याहि। वरीवृजत्स्थविरेभिः सुशिप्रास्मे दधद्वृषणं शुष्ममिंद्र॥४॥ एष स्तोमो मह उग्राय वाहे धुरी३ वात्यो न वाजयन्नधायि। इंद्र त्वायमर्क ईट्टे वसूनां दिवीव द्यामधि नः श्रोमतं धाः॥५॥ एवा न इंद्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम। इषं

आ यः विश्वानि शवसा ततानोपश्रोता मे ईवतः वचांसि॥१॥ अर्यामि घोषः इंद्र देवजामिः इरज्यंतं यत् शुरुधः विऽवांचि नहि स्वं आयुः चिकिते जनेषु तानि इत् अंहांसि अति पर्षि अस्मान्॥२॥ युजे रथं गोऽएषणं हरिऽभ्यां उप ब्रह्मांणि जुजुषाणं अस्थुः वि वाधिष्ट स्यः रोदसी महिऽत्वा इंद्रः वृत्राणि अप्रति जघन्वान्॥३॥ आर्यः चित् पित्युः स्तर्यः न गावः नक्षन् ऋतं जरितारः ते इंद्र याहि वायुः न निऽयुतः नः अच्छ त्वं हि धीभिः दयसे वि वाजान्॥४॥ ते त्वा मदाः इंद्र मादयंतु शुष्मिणं तुविऽराधसं जरित्रे एकः देवऽचा दयसे हि मर्तान् अस्मिन् शूर सवने मादयस्व॥५॥ एव इत् इंद्रं वृषणं वज्रऽबाहुं वसिष्ठासः अभि अर्चंति अर्कैः सः नः स्तुतः वीरऽवत् पातु गोऽमत् यूयं पात स्वस्तिऽभिः सदा नः॥६॥७॥

॥२४॥ योनिः ते इंद्र सदने अकारि तं आ नृऽभिः पुरुऽहूत प्र याहि अस्मः यथा नः अविता वृधे च ददः वसूनि ममदः च सोमैः॥१॥ गृभीतं ते मनः इंद्र द्विऽबर्हाः सुतः सोमः परिऽसिक्ता मधूनि विसृष्टऽधेना भरते सुऽवृक्तिः इयं इंद्रं जोहुवती मनीषा॥२॥ आ नः दिवः आ पृथिव्याः ऋजीषिन् इदं बर्हिः सोमऽपेयाय याहि वहंतु त्वा हरयः मद्यं चं आंगूषं अच्छ तवसं मदाय॥३॥ आ नः विश्वाभिः ऊतिऽभिः सऽजोषाः ब्रह्म जुषाणः हरिऽअश्व याहि वरीवृजत् स्थविरेभिः सुऽशिप्र अस्मे दधत् वृषणं शुष्मं इंद्र॥४॥ एषः स्तोमः महे उपायं वाहे धुरिऽइव अश्वः न वाजयन् अधायि इंद्र त्वा अयं अर्कः ईट्टे वसूनां दिविऽइव द्यां अधि नः श्रोमतं धाः॥५॥ एव नः इंद्र वार्यस्य पूर्धि प्र ते महीं सुऽमतिं वेविदाम इषं

पिन्व मघवन्नः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥ ८ ॥

॥ २५ ॥ १–६ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ २५ ॥ आ ते मह इंद्रोत्युग्र समन्यवो यत्समरंत सेनाः। पतंति द्युन्नयंस्य बाह्वोर्मा ते मनो विषूद्ग्१ग्वि चारीत् ॥ १ ॥ नि दुर्ग इंद्र श्नथिह्यमित्रान्नभि ये नो मर्तासो अमंतिं। आरे तं शंसं कृणुहि निनित्सोरा नो भर संभरणं वसूनां ॥ २ ॥ शतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु। जहि वधर्वनुषो मर्त्यस्यास्मे द्युम्नमधि रत्नं च धेहि ॥ ३ ॥ त्रावंतो हींद्र क्रत्वे अस्मि त्रावंतोऽवितुः शूर रातौ। विश्वेदहानि तविषीव उग्र श्रोकः कृणुष्व हरिवो न मंधीः ॥ ४ ॥ कुत्सा एते ह्यैष्याय शूषमिंद्रे सहो देवजूतमियानाः। सत्रा कृधि सुहना शूर वृत्रा वयं तरुत्राः सनुयाम वाजं ॥ ५ ॥ एवा नं इंद्र वायैस्य पूधि प्र ते महीं सुमतिं वेविदाम। इषं पिन्व मघवन्नः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥ ९ ॥

॥ २६ ॥ १–५ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ २६ ॥ न सोम इंद्रमसुतो ममाद नाब्रह्माणो मघवानं सुतासः। तस्मा उक्थं जनये यज्जुजोषन्नृवन्नवीयः शृणवद्यथा नः ॥ १ ॥ उक्थमुक्थे सोम इंद्रं ममाद नीथेनीथे मघवानं सुतासः। यदीं सबाधः पितरं न पुत्राः समानदक्षा अवसे हवंते ॥ २ ॥ चकार ता कृणवन्नूनमन्या यानिं द्रुवंतिं वेधसः सुतेषु। जनीरिव पतिरेकः समानो नि मामृजे पुर इंद्रः सु सर्वाः ॥ ३ ॥ एवा तमाहुरुत शृण्व इंद्र एको विभक्ता तरणिर्मे-

पिन्व मघवत्ऽभ्यः सुऽवीरां यूयं पात स्वस्तिऽभिः सदा नः ॥ ६ ॥ ८ ॥

॥ २५ ॥ आ ते महः इंद्र ऊती उप सऽमन्यवः यत् संऽअरंत सेनाः पतंति दिद्युत् नर्यस्य बाह्वोः मा ते मनः विऽमुद्र्यक् वि चारीत् ॥ १ ॥ नि दुःऽगे इंद्र श्रयिहि अमिचान् अभि ये नः मर्तासः अमंति आरे तं शंसं कृणुहि निऽनित्सोः आ नः भर संऽभरणं वसूनां ॥ २ ॥ शतं ते शिप्रिन् ऊतयः सुऽदासे सहस्रं शंसाः उत रातिः अस्तु जहि वधः वनुषः मर्त्यस्य अस्मे द्युम्नं अधि रत्नं च धेहि ॥ ३ ॥ त्वाऽवंतः हि इंद्र क्रत्वे अस्मिन् त्वाऽवंतः अवितुः शूर रातौ विश्वा इत् अहानि तविषीऽवः उप ओकः कृणुष्व हरिऽवः न मर्धीः ॥ ४ ॥ कुत्साः एते हरिऽअश्वाय शूषं इंद्रे सहः देवऽजूतं इयानाः सचा कृधि सुऽहनां शूर वृचा वयं तरुचाः सनुयाम वाजं ॥ ५ ॥ एव नः इंद्र वार्यस्य पूर्धि प्र ते महीं सुऽमतिं वेविदाम इषं पिन्व मघवत्ऽभ्यः सुऽवीरां यूयं पात स्वस्तिऽभिः सदा नः ॥ ६ ॥ ९ ॥

॥ २६ ॥ न सोमः इंद्रं असुतः ममाद् न ब्रह्माणः मघऽवानं सुतासः तस्मै उक्थं जनये यत् जुजोषत् नृऽवत् नवीयः शृणवत् यथा नः ॥ १ ॥ उक्थेऽउक्थे सोमः इंद्रं ममाद् नीथेऽनीथे मघऽवानं सुतासः यत् ई सऽवार्धः पितरं न पुत्राः समानऽदक्षाः अवसे हवंते ॥ २ ॥ चकार ता कृणवत् नूनं अन्या यानिं ब्रुवंति वेधसः सुतेषु जनीःऽइव पतिः एकः समानः नि ममृजे पुरःइंद्रः सु सर्वीः ॥ ३ ॥ एव तं आहुः उत शृणे इंद्रः एकः विऽभक्ता नरां इः

घानाँ। मिथस्तुरः ऊतयो यस्य पूर्वीरस्मे भद्राणि सश्चत प्रियाणि॥४॥ एवा वसिष्ठ इंद्रमूतये नॄन्कृष्टीनां वृषभं सुते गृणाति। सहस्रिणः उप नो माहि वाजान्यूयं पात स्वस्तिभिः सदा नः॥५॥१०॥

॥ २७ ॥ १–५ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२७॥ इंद्रं नरो नेमधिता हवंते यत्पार्या युनजंते धियस्ताः। शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः॥१॥ य इंद्र चुक्लो मघवन्ते अस्ति शिक्षा सखिभ्यः पुरुहूत नृभ्यः। त्वं हि हळ्हा मघवन्विचेता अपा वृधि परिवृतं न रार्धः॥२॥ इंद्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति। ततो ददाति दाशुषे वसूनि चोद्द्राध उपस्तुतश्चिद्वावाक्॥३॥ नू चिन्न इंद्रो मघवा सहूती दानो वाजं नि यंसते न ऊती। अनूना यस्य दक्षिणा पीपाय वामं नृभ्यो अभिवीता सखिभ्यः॥४॥ नू इंद्र राये वरिवस्कृधी न आ ते मनो ववृत्याम मघाय। गोमद्श्वावद्रथवद्यंतो यूयं पात स्वस्तिभिः सदा नः॥५॥११॥

॥ २८ ॥ १–५ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२८॥ ब्रह्मा ण इंद्रोप याहि विद्वान्वाचस्ते हरयो संतु युक्ताः। विश्वे चिद्धि त्वा विहवंत मर्ता अस्माकमिच्छृणुहि विश्वमिन्व॥१॥ हवं त इंद्र महिमा व्यानड्ब्रह्म यत्पासि शवसिन्नृपीणां। आ यद्वज्रं दधिषे हस्त उग्र घोरः सन्क्रत्वा जनिष्ठा अपाळ्हः॥२॥ तव प्रणीतींद्र जोहुवानास्तं यन्नृम्न रोदसी निनेथ। महे क्षत्राय शवसे हि जज्ञेऽतूतुजिं चित्तूतुजिरशिश्नत्॥३॥ एभिर्न इंद्राहभिर्दशस्य दुर्मि-

मघानाँ मिष्ठः ऽतुरः ऊतयः यस्य पूर्वीः अस्मे भद्राणि सश्चत प्रियाणि ॥४॥ एव वसिष्ठः इंद्रं ऊतये नॄन् कृणीनां वृषभं सुते गृणाति सहस्रिणः उप नः माहि वाजान् यूयं पात स्वस्तिऽभिः सदा नः ॥५॥१०॥

॥२७॥ इंद्रं नरः नेमऽधिता हवंते यत् पार्यां युनजते धियः नाः शूरः नृऽसाता शवसः चकानः आ गोऽमंति व्रजे भज त्वं नः ॥१॥ यः इंद्र शुष्मः मघऽवन् ते अस्ति शिक्षा सखिऽभ्यः पुरुऽहूत नृऽभ्यः त्वं हि हव्हा मघऽवन् विऽचेताः अप वृधि परिऽवृतं न राधः ॥२॥ इंद्रः राजा जगतः चर्षणीनां अधि क्षमि विषुंऽरूपं यत् अस्ति ततः ददाति दाशुषे वसूनि चोदत् राधः उपऽस्तुतः चित् अर्वाक् ॥३॥ नु चित् नः इंद्रः मघऽवा सऽहूती दानः वाजैः नि यमते नः ऊती अनूना यस्य दक्षिणा पीपाय वामं नृऽभ्यः अभिऽवीता सखिऽभ्यः ॥४॥ नु इंद्र राये वरिवः कृधि नः आ ते मनः ववृत्याम् मघाय गोऽमंत् अश्वऽवत् रथऽवत् व्यंतः यूयं पात स्वस्तिऽभिः सदा नः ॥५॥११॥

॥२८॥ व्रह्मे नः इंद्र उप याहि विद्वान् अर्वाचः ते हरयः संतु युक्ताः विश्वे चित् हि त्वा विऽहवंत मर्तीः अस्माकं इत् शृणुहि विश्वंऽइन्व ॥१॥ हवं ते इंद्र महिमा वि आनट् व्रह्म यत् पासि शवसिन् ऋषीणां आ यत् वज्रं दधिषे हस्ते उग्र घोरः सन् क्रत्वा जनिष्ठाः अपाळ्हः ॥२॥ तवे प्रऽनीती इंद्र जोहुवानान् सं यत् नृन् न रोदसी निनेथ महे क्षत्राय शवसे हि जज्ञे अतूतुजिं चित् तूतुजिः अशिश्नत् ॥३॥ एभिः नः इंद्र अहंऽभिः दशस्य दुःऽमि-

वासो॒ हि क्षि॒तयः॑ पवंते । प्रति॒ यच्चष्टे॒ अनृ॑तमने॒ना अ॑व॒ द्रुहा॑ वरु॒णो मा॒यी नः॑ सात् ॥ ४ ॥ वो॒चेमे॑दिंद्रं॒ मघ॑वानमेनं म॒हो रा॒यो रा॑धसो॒ यद्दद॑न्नः । यो अर्च॑तो॒ ब्रह्म॑कृतिम॒विष्ठो यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ५ ॥ १२ ॥

॥ २९ ॥ १–५ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ २९ ॥ अ॒यं सोमं॑ इंद्र॒ तुभ्यं॑ सुन्व॒ आ तु प्र या॑हि हरिवस्तदो॒काः । पिबा॒ त्व१॒॑स्य सु॒षुत॑स्य॒ चारो॒र्ददो॒ मघा॑नि मघवन्नि॒यान॑ः ॥ १ ॥ ब्रह्म॑न्वीर॒ ब्रह्म॑कृतिं जुषा॒णोऽवा॑चीनो हरिभि॒र्या॑हि तू॒यं । अ॒स्मिन्नू षु सव॑ने मादयस्वोप॒ ब्रह्मा॑णि शृणव इ॒मा नः॑ ॥ २ ॥ का ते॑ अस्त्यरंकृतिः सू॒क्तैः क॒दा नू॒नं ते॑ मघवन्दाशेम । विश्वा॑ मती॒रा त॑नते त्वा॒याधा॑ म इंद्र शृणवो॒ हवे॒मा ॥ ३ ॥ उ॒तो घा॒ ते पु॑रु॒ष्या॒३॑इदा॑सन्येषां॒ पूर्वे॑षामशृणो॒र्ऋषी॑णां । अधा॒हं त्वा॑ मघ॒वञ्जोह॑वीमि॒ त्वं न॑ इंद्रासि॒ प्रम॑तिः पि॒तेव॑ ॥ ४ ॥ वो॒चेमे॑दिंद्रं॒ मघ॑वानमेनं म॒हो रा॒यो रा॑धसो॒ यद्दद॑न्नः । यो अर्च॑तो॒ ब्रह्म॑कृ॒तिम॒विष्ठो यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ५ ॥ १३ ॥

॥ ३० ॥ १–५ वसिष्ठः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ ३० ॥ आ नो॑ देव॒ शव॑सा याहि शुष्मिन्भवा॑ वृध इंद्र रा॒यो अ॒स्य । महे नृ॒म्णाय॑ नृमते सु॒वज्र॒ महि॑ क्षत्राय॒ पौंस्या॑य शूर ॥ १ ॥ हवं॑त उ त्वा हव्यं॑ विवा॒चि त॒नूषु॑ शू॒राः सूर्यं॑स्य सा॒तौ । त्वं विश्वे॑षु सेन्यो॒ जने॑षु॒ त्वं वृ॒त्राणि॑ रंधया सुहंतु ॥ २ ॥ अहा॒ यदिंद्र॑ सु॒दिना॑ व्यु॒च्छान्दधो॒ यत्के॒तुमु॑प॒मं स॒मत्सु॑ । न्य१॒॑ग्निः सीं॑दद॒सुरो॒ न होता॑ हुवा॒नो अत्रं॑ सुभगा॒य दे॒वान् ॥ ३ ॥ व॒यं ते॑ त॑ इंद्र॒ ये च॑ दे॒व॒ स्तवं॑त शूर॒ ददं॑तो म॒घानि॑ । यच्छा॑ सू॒रिभ्य॑ उप॒मं

चासः हि क्षितयः पवंते प्रति यत् चष्टे अनृतं अनेनाः अव द्रुहा वरुणः मायी नः सात्॥४॥ वोचेम इत् इंद्रं मघऽवानं एनं महः रायः राधसः यत् ददत् नः यः अर्चतः ब्रह्मऽकृतिं अविष्टः यूयं पात स्वस्तिऽभिः सदा नः ॥५॥१२॥

॥२९॥ अयं सोमः इंद्र तुभ्यं सुन्वे आ तु प्र याहि हरिऽवः तत्ऽओकाः पिब तु अस्य सुऽसुतस्य चारोः ददः मघानि मघऽवन् इयानः ॥१॥ ब्रह्मन् वीर ब्रह्मऽकृतिं जुषाणः अर्वाचीनः हरिऽभिः याहि तूयं अस्मिन् ऊं सु सवने मादयस्व उप ब्रह्माणि शृणवः इमा नः॥२॥ का ते अस्ति अरंऽकृतिः सुऽउक्तिः कदा नूनं ते मघऽवन् दाशेम विश्वाः मतीः आ ततने त्वाऽया अधं मे इंद्र शृणवः हवं इमा ॥३॥ उतो घ ते पुरुऽत्याः इत् आसन् येषां पूर्वेषां अशृणोः ऋषीणां अधं अहं त्वा मघऽवन् जोहवीमि त्वं नः इंद्र असि प्रऽमंतिः पिताऽइव॥४॥ वोचेम इत् इंद्रं मघऽवानं एनं महः रायः राधसः यत् ददत् नः यः अर्चतः ब्रह्मऽकृतिं अविष्टः यूयं पात स्वस्तिऽभिः सदा नः ॥५॥१३॥

॥३०॥ आ नः देव सवसा याहि शुष्मिन् भव वृधः इंद्र रायः अस्य महे नृम्णाय नृऽपते सुऽवज्र महि क्षत्राय पौंस्याय शूर ॥१॥ हवंते ऊं त्वा हव्यं विऽवाचि तनूषु शूराः सूर्यस्य सातौ त्वं विश्वेषु सेन्यः जनेषु त्वं वृत्राणि रंधय सुऽहंतु॥२॥ अहा यत् इंद्र सुऽदिना विऽउच्छान् दधः यत् केतुं उपऽमंसुमत्ऽसु नि अग्निः सीदत् असुरः न होता हुवानः अव सुऽभगाय देवान्॥३॥ वयं ते ते इंद्र ये च देव स्तवंत शूर ददतः मघानि यच्छ सूरिऽभ्यः उपऽमं

वरूथं स्वाभुवो जरणामश्नवंत ॥४॥ वोचेमेदिंद्रं मघवानमेनं महो रायो राधसो यद्ददन्नः । यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥५॥१४॥

॥ ३१ ॥ १–१२ वसिष्ठः ॥ इंद्रः ॥ १–९ गायत्री । १०–१२ त्रिष्टुप् ॥

॥३१॥ प्र वु इंद्राय मादनं हर्यश्वाय गायत । सखायः सोमपावे ॥१॥ शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः । चकृमा सत्यराधसे ॥२॥ त्वं न इंद्र वाजयुस्त्वं गव्युः शतक्रतो । त्वं हिरण्ययुर्वसो ॥३॥ वयमिंद्र त्वायवोऽभि प्र णोनुमो वृषन् । विद्धी त्वस्य नो वसो ॥४॥ मा नो निदे च वक्तवेऽर्यो रंधीरराव्णे । त्वे अपि क्रतुर्ममं ॥५॥ त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन् । त्वया प्रतिं ब्रुवे युजा ॥६॥१५॥ महाँ उतासि यस्य तेऽनु स्वधावरी सहः । मन्नातें इंद्र रोदसी ॥७॥ तं त्वा मरुत्वती परि भुवद्वाणी सयावरी । नष्टमाणा सह द्युभिः ॥८॥ ऊर्ध्वासस्त्वाग्निंदवो भुवन्दस्ममुप द्यवि । सं ते नमंत कृष्टयः ॥९॥ प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वं । विशः पूर्वीः प्र चरा चर्षणिप्राः ॥१०॥ उरुव्यचसे महिनें सुवृक्तिमिंद्राय ब्रह्म जनयंत विप्राः । तस्य व्रतानि न मिनंति धीराः ॥११॥ इंद्रं वाणीरनुत्तमन्युमेव सचा राजानं दधिरे सहध्यै । हर्यश्वाय बर्हया समापीन् ॥१२॥१६॥

॥ ३२ ॥ १–२५ २६[२]. २७ वसिष्ठः । २६[1] वसिष्ठः शाक्तिर्वो ॥ इंद्रः ॥ १ २ ४–२७ प्रागाथं । ३ द्विपदा ॥

॥३२॥ मो षु त्वा वाघतश्चनारे अस्मन्नि रीरमन् । आरात्ताच्चित्सधमादं न आ गहीह वा सन्नुप श्रुधि ॥१॥ इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते । इंद्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥२॥ रायस्कामो वज्रहस्तं सु-

वर्धूयं सुऽआभुवः जरणां अश्नुवंत ॥४॥ वोचेमं इत् इंद्रं मघ-ऽवानं एनं महः रायः राधसः यत् ददत् नः यः अर्चंतः ब्रह्मऽकृ-तिं अविष्टः यूयं पात स्वस्तिऽभिः सदा नः ॥५॥१४॥

॥३१॥ प्र वः इंद्राय मादनं हरिऽअश्वाय गायत सखायः सो-मऽपावे ॥१॥ गंसं इत् उक्थं सुऽदानवे उत द्युक्षं यथा नरः चकृम सत्यऽराधसे ॥२॥ त्वं नः इंद्र वाजऽयुः त्वं गव्युः शतऽक्रतो° त्वं हि-रण्यऽयुः वसो' ॥३॥ वयं इंद्र त्वाऽयवः अभि प्र नोनुमः वृषन् विद्धि तु अस्य नः वसो' ॥४॥ मा नः निदे च वक्तवे अर्यः रंधीः अराव्णे वे' अपि क्रतुः मम ॥५॥ त्वं वर्म असि सऽप्रथः पुरः-ऽयोधः च वृत्रऽहन् त्वया प्रति ब्रुवे युजा ॥६॥१५॥ महान् उत असि यस्य ते अनु स्वधाऽवरी° सहः मन्यते' इंद्र रोदसी' ॥७॥ तं त्वा मरुत्वती परि भुवत् वाणी सऽयावरी नद्यमाणा सह द्यु-ऽभिः ॥८॥ ऊर्ध्वासः त्वा अनु इंदवः भुवन् दुस्मं उप द्यविं सं ते नमंत कृष्टयः ॥९॥ प्र वः महे महिऽवृधे भरध्वं प्रऽचेतसे प्र सुऽम-तिं कृणुध्वं विशः पूर्वीः प्र चर चर्षणिऽप्राः ॥१०॥ उरुऽव्यचसे महिने सुऽवृक्तिं इंद्राय ब्रह्म जनयंत विप्राः तस्य व्रतानि न मि-नंति धीराः ॥११॥ इंद्रं वाणीः अनुत्तऽमन्युं एव सचा राजानं दधिरे सहध्यै हरिऽअश्वाय बर्हयः सं आपीन् ॥१२॥१६॥

॥३२॥ मो' सु त्वा वाघतः चन आरे अस्मत् नि रीरमन् आ-राच्चित् सधऽमादे नः आ गहि इह वा सन् उप श्रुधि ॥१॥ इमे हि ते ब्रह्मऽकृतः सुते सचा मधौ न मक्षः आसते इंद्रे कामं जरि-तारः वसुऽयवः रथे न पादे आ दधुः ॥२॥ रायःऽकामः वज्रऽहस्तं सु-

दक्षिणं पुत्रो न पितरं हुवे ॥३॥ इमं इंद्राय सुन्विरे सोमासो दध्याशिरः । तॉं आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥४॥ अवच्छुत्कर्णे ईयते वसूनां नू चिन्नो मघिपन्निरः । सद्यश्चिद्यः सहस्राणि शता ददन्नकिर्दित्सन्तमा मिनत् ॥५॥१७॥ स वीरो अप्रतिष्कुत इंद्रेण शूशुवे नृभिः । यस्ते गभीरा सवनानि वृत्रहन्त्सुनोत्या च धावति ॥६॥ भवा वरूथं मघवन्मघोनां यत्समजासि शर्धतः । वि त्वाहतस्य वेदनं भजेमह्या दूणाशो भरा गयं ॥७॥ सुनोता सोमपावने सोममिंद्राय वज्रिणे । पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः ॥८॥ मा स्तेधत सोमिनो दक्षता महे कृणुध्वं राय आतुजे । तरणिरिज्जयति क्षेति पुष्यति न देवासः कवत्नवे ॥९॥ नकिः सुदासो रथं पर्यास न रीरमत् । इंद्रो यस्याविता यस्य मरुतो गमत्स गोमति व्रजे ॥१०॥१८॥ गमद्वाजं वाजयन्निंद्र मर्त्यो यस्य त्वमविता भुवः । अस्माकं बोध्यविता रथानामस्माकं शूर नृणां ॥११॥ उदिन्नवस्य रिच्यतेऽंशो धनं न जिग्युषः । य इंद्रो हरिवान्न दभंति तं रिपो दक्षं दधाति सोमिनं ॥१२॥ मंचमखंव सुधितं सुपेशसं दधात यज्ञियेष्वा । पूर्वीश्चिन्न प्रसितयस्तरंति तं य इंद्रे कर्मणा भुवत् ॥१३॥ कस्तमिंद्र त्मावसुमा मर्त्यो दधर्षति । श्रद्धा इत्ते मघवन्पार्ये दिवि वाजी वाजं सिषासति ॥१४॥ मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु । तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ॥१५॥१९॥ तवेदिंद्रावमं वसु त्वं पुष्यसि मध्यमं । सत्रा विश्वस्य परमस्य राजसि नकिष्ट्वा गोषु वृण्वते ॥१६॥ त्वं विश्वस्य धनदा असि श्रुतो य ईं भवन्याजयः । तवायं विश्वः पुरु-

ऽदक्षिणं पुचः न पितरं हुवे ॥३॥ इमे इंद्राय सुन्विरे सोमासः दधिऽआशिरः तान् आ मदाय वज्रऽहस्त पीतये हरिऽभ्यां याहि ओकः आ ॥४॥ अर्वत् श्रुतऽकर्णः ईयते वसूनां नु चित् नः मघिऽपत् गिरः सद्यः चित् यः सहस्राणि शता ददत् नकिः दित्सन्तं आ मिनत् ॥५॥१७॥ सः वीरः अप्रतिऽस्कुतः इंद्रेण शूशुवे नृऽभिः यः ते गभीरा सवनानि वृत्रऽहन् सुनोति आ च धावति ॥६॥ भव वरूथं मघऽवन् मघोनां यत् संऽअजासि शर्धतः वि त्वाऽहतस्य वेदनं भजेमहि आ दुःऽनशः भर गयं ॥७॥ सुनोत सोमऽपावने सोमं इंद्राय वज्रिणे पचत पक्तीः अवसे कृणुध्वं इत् पृणन् इत् पृणते मयः ॥८॥ मा स्तेधत सोमिनः दक्षत महे कृणुध्वं राये आऽतुजे तरणिः इत् जयति क्षितिं पुष्यति न देवासः कवत्नवे ॥९॥ नकिः सुऽदासः रथं परि आस न रीरमत् इंद्रः यस्य अविता यस्य मरुतः गमत् सः गोऽमति व्रजे ॥१०॥१८॥ गमत् वाजं वाजयन् इंदुः मत्यः यस्य त्वं अविता भुवः अस्माकं बोधि अविता रथानां अस्माकं शूर नृणां ॥११॥ उत् इत् नु अस्य रिच्यते अंशः धनं न जिग्युषः यः इंद्रः हरिऽवान् न दभंति तं रिपः दक्षं दधाति सोमिनं ॥१२॥ मंचं अर्वंतं सुऽधितं सुऽपेशसं दधात यज्ञियेषु आ पूर्वीः चन प्रऽसितयः तरंति तं यः इंद्रे कर्मणा भुवत् ॥१३॥ कः तं इंदु त्वाऽवसु आ मर्त्यः दधर्षति श्रद्धा इत् ते मघऽवन् पार्ये दिवि वाजी वाजं सिसासति ॥१४॥ मघोनः स्म वृत्रऽहत्येषु चोदय ये ददति प्रिया वसु तव प्रऽनीती हरिऽअश्व सूरिऽभिः विश्वा तरेम दुःऽइता ॥१५॥१९॥ तव इत् इंदु अवमं वसु त्वं पुष्यसि मध्यमं सत्रा विश्वस्य परमस्य राजसि नकिः त्वा गोषु वृण्वते ॥१६॥ त्वं विश्वस्य धनऽदाः असि श्रुतः ये इं भवंति आजयः तव अयं विश्वः पुरु-

हूत पार्थिवोऽवस्युर्नाम भिक्षते ॥१७॥ यदिंद्र यावतस्त्वमेतावदहमीशीय। स्तोतारमिद्धिधिषेय रदावसो न पापत्वाय रासीय ॥१८॥ शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे। नहि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता चन ॥१९॥ तरणिरित्सिषासति वाजं पुरंध्या युजा। आ व इंद्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्वं ॥२०॥२०॥ न दुष्टुती मर्त्यो विंदते वसु न सेधंतं रयिर्नशत्। सुशक्तिरिन्मघवन्तुभ्यं मावते देष्णं यत्पार्ये दिवि ॥२१॥ अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिंद्र तस्थुषः ॥२२॥ न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते। अश्वायंतो मघवन्निंद्र वाजिनो गव्यंतस्त्वा हवामहे ॥२३॥ अभी षतस्तदा भरेंद्र ज्यायः कनीयसः। पुरूवसुर्हि मघवन्त्सनादसि भरेभरे च हव्यः ॥२४॥ परा णुदस्व मघवन्नमित्रान्त्सुवेदा नो वसू कृधि। अस्माकं बोध्यविता महाधने भवा वृधः सखीनां ॥२५॥ इंद्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा। शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥२६॥ मा नो अज्ञाता वृजना दुराध्योऽमा शिवासो अव क्रमुः। त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥२७॥२१॥

॥ ३३ ॥ १–१४ संस्तवो वसिष्ठस्य सपुत्रस्येंद्रेण सा संवादः ॥ १–९ वसिष्ठः। १०–१४ वसिष्ठपुत्राः ॥ १–९ वसिष्ठपुत्राः। १०–१४ वसिष्ठः ॥ त्रिष्टुप् ॥

॥३३॥ त्वित्यंचो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि हि प्रमंदुः। उत्तिष्ठन्वोचे परि बर्हिषो नृन्न मे दूरादवितवे वसिष्ठाः ॥१॥ दूरादिंद्रमनयन्ना सुतेन निरी वेशंतमति पांतमुग्रं। पाशद्युम्नस्य वायतस्य सोमात्सुतादिंद्रो अवृ-

ऽहूत पार्थिवः अवस्युः नाम भिक्षते ॥१७॥ यत् इंद्र यावंतः त्वं एतावंत् अहं ईशीय स्तोतारं इत् दिधिषेय रदऽवसो० न पापऽत्वाय रासीय ॥१८॥ शिक्षेयं इत् महऽयते दिवेऽदिवे रायः आ कुहचित्ऽविदे नहि त्वत् अन्यत् मघऽवन् नः आप्यं वस्यः अस्ति पिता चन ॥१९॥ तरणिः इत् सिसासति वाजं पुरंऽध्या युजा आ वः इंद्रं पुरुऽहूतं नमे गिरा नेमिं तष्टाऽइव सुऽद्वं ॥२०॥२०॥ न दुःऽस्तुती मर्त्यः विंदते वसु न सेधंतं रयिः नशत् सुऽशक्तिः इत् मघऽवन् तुभ्यं माऽवते देष्णं यत् पार्यं दिवि ॥२१॥ अभि त्वा शूर नोनुमः अदुग्धाःऽइव धेनवः ईशानं अस्य जगतः स्वःऽदृशं ईशानं इंद्र तस्थुषः ॥२२॥ न त्वाऽवान् अन्यः दिव्यः न पार्थिवः न जातः न जनिष्यते अश्वऽयंतः मघऽवन् इंद्र वाजिनः गव्यंतः त्वा हवामहे ॥२३॥ अभि सुतः नः आ भर इंद्र ज्यायः कनीयसः पुरुऽवसुः हि मघऽवन् सनात् असि भरेऽभरे च हव्यः ॥२४॥ परा नुदस्व मघऽवन् अमित्रान् सुऽवेदा नः वसु कृधि अस्माकं बोधि अविता महाऽधने भव वृधः सखीनां ॥२५॥ इंद्र क्रतुं नः आ भर पिता पुत्रेभ्यः यथा शिक्ष नः अस्मिन् पुरुऽहूत यामनि जीवाः ज्योतिः अशीमहि ॥२६॥ मा नः अज्ञाताः वृजनाः दुःऽआध्यः मा अशिवासः अव क्रमुः त्वया वयं प्रऽवतः शश्वतीः अपः अति शूर तरामसि ॥२७॥२१॥

॥३३॥ श्वित्यंचः मा दक्षिणतःऽकपर्दाः धियंऽजिन्वासः अभि हि प्रऽमंदुः उत्ऽतिष्ठन् वोचे परि बर्हिषः नॄन् न मे दूरात् अवितवे वसिष्ठाः ॥१॥ दूरात् इंद्रं अनयन् आ सुतेन तिरः वैशंतं अति पांतं उग्रं पाशऽद्युम्नस्य वायतस्य सोमात् सुतात् इंद्रः अवृ-

णीता वसिष्ठान् ॥२॥ एवेन्नु कं सिंधुमेभिस्ततारैवेन्नु कं भेदमेभिर्जघान। एवेन्नु कं दाशराज्ञे सुदासं प्रावदिंद्रो ब्रह्मणा वो वसिष्ठाः ॥३॥ जुष्टी नरो ब्रह्मणा वः पितॄणामक्षंमव्ययं न किलारिषाथ। यच्छक्वरीषु बृहता रवेणेंद्रे शुष्ममदधाता वसिष्ठाः ॥४॥ उद्यामिवेत्तृष्णजो नाथितासोऽदीधयुर्दाशराज्ञे वृतासः। वसिष्ठस्य स्तुवत इंद्रो अश्रोदुरुं तृत्सुभ्यो अकृणोदु लोकं ॥५॥२२॥ दंडा इवेन्नोअर्जनास आसन्परिच्छिन्ना भरता अभैकासः। अभवच्च पुरएता वसिष्ठ आदित्तृत्सूनां विशो अप्रथंत ॥६॥ चयः कृण्वंति भुवनेषु रेतस्तिस्रः प्रजा आर्या ज्योतिरग्राः। चयो घर्मास उषसं सचंते सर्वा इन्नाँ अनु विदुर्वसिष्ठाः ॥७॥ सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः। वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥८॥ त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि सं चरंति। यमेन ततं परिधिं वयंतोऽप्सरस उप सेदुर्वसिष्ठाः ॥९॥ विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा। तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्त्वा विश आजभार ॥१०॥२३॥ उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि जातः। द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वादंत ॥११॥ स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उत वा सदानः। यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः ॥१२॥ सत्रे ह जाताविषिता नमोभिः कुंभे रेतः सिषिचतुः समानं। ततो ह मान उदियाय मध्यात्ततो जातमृषिमाहुर्वसिष्ठं ॥१३॥ उक्थभृतं सामभृतं बिभर्ति यावाणं वि-

णीत् वसिष्ठान्॥२॥ एव इत् नु कं सिंधुं एभिः ततार एव इत् नु कं भेद् एभिः जघान् एव इत् नु कं दाश्ऽराज्ञे सुऽदासं प्र आवत् इंद्रः ब्रह्मणा वः वसिष्ठाः ॥३॥ जुष्टी नरः ब्रह्मणा वः पितॄणां अक्षीं अभ्यं न किल रिषाथ यत् शक्करीषु बृहता रवेण इंद्रे शुष्मं अदधात वसिष्ठाः ॥४॥ उत् द्यांऽइव इत् तृष्णऽजः नाधितासः अदीधयुः दाश्ऽराज्ञे वृतासः वसिष्ठस्य स्तुवतः इंद्रः अश्रोत् उरुं नृत्सुऽभ्यः अकृणोत् ऊं लोकं॥५॥२२॥ दंडाःऽइव इत् गोऽअजनासः आसन् परिऽछिन्नाः भरताः अर्भकासः अभवत् च पुरःऽएता वसिष्ठः आत् इत् तृत्सूनां विशः अप्रथंत॥६॥ चयः कृण्वंति भुवनेषु रेतः तिस्रः प्रऽजाः आर्याः ज्योतिःऽअग्राः चयः घर्मासः उपसं सचंते सर्वान् इत् तान् अनु विदुः वसिष्ठाः ॥७॥ सूर्यस्यऽइव वक्षथः ज्योतिः एषां समुद्रस्यऽइव महिमा गभीरः वातस्यऽइव प्रऽजवः न अन्येन स्तोमः वसिष्ठाः अनुऽएतवे वः ॥८॥ ते इत् निण्यं हृदयस्य प्रऽकेतैः सहस्रऽवल्शं अभि सं चरंति यमेन ततं परिऽधिं वयंतः अप्सरसः उप सेदुः वसिष्ठाः॥९॥ विऽद्युतः ज्योतिः परि संऽजिहानं मित्रावरुणा यत् अपश्यतां त्वा तत् ते जन्म उत एकं वसिष्ठ अगस्त्यः यत् त्वा विशः आऽजभार ॥१०॥२३॥ उत असि मैत्रावरुणः वसिष्ठ उर्वश्याः ब्रह्मन् मनसः अधि जातः द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वा अदुदंत ॥११॥ सः प्रऽकेतः उभयस्य प्रऽविद्वान् सहस्रऽदानः उत वा सऽदानः यमेन ततं परिऽधिं वयिष्यन् अप्सरसः परि जज्ञे वसिष्ठः॥१२॥ सत्रे ह जातौ इषिता नमःऽभिः कुंभे रेतः सिसिचतुः समानं ततः ह मानः उत् इयाय मध्यात् ततः जातं ऋषिं आहुः वसिष्ठं॥१३॥ उक्थ्यऽभूतं साम्नऽभूतं बिभर्ति यावाणं बि-

भत्र वदात्यग्ने। उपेनमाध्वं सुमनस्यमाना आ वो गच्छाति प्रतृदो वसिष्ठः ॥ १४॥ २४॥ २॥

॥ ३४ ॥ १–२५ वसिष्ठः ॥ १–१५. १८–२५ विश्वे देवाः । १६ अहिः । १७ अहिर्बुध्न्यः ॥ १–२१ द्विपदा । २२–२५ विष्टुप् ॥

॥३४॥ प्र शुक्रैतु देवी मनीषा अस्मत्सुतष्टो रथो न वाजी ॥१॥ विदुः पृथिव्या दिवो जनित्रं शृण्वन्त्यापो अध क्षरन्तीः ॥२॥ आपश्चिदस्मै पिन्वन्त पृथ्वीर्वृचेषु शूरा मंसन्त उग्राः ॥३॥ आ धूर्षस्मै दधाताश्वानिंद्रो न वज्री हिरण्यबाहुः ॥४॥ अभि प्र स्थाताहेव यज्ञं यातेव पत्मन्मना हिनोत ॥५॥ त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरं ॥६॥ उदस्य शुष्मान्भा-नुनीत विभर्ति भारं पृथिवी न भूमं ॥७॥ हूयामि देवाँ अया-तुरग्ने साधन्नृतेन धियै दधामि ॥८॥ अभि वो देवीं धियै दधिध्वं प्र वो देवत्रा वाचं कृणुध्वं ॥९॥ आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः ॥१०॥२५॥ राजा राष्ट्रानां पेशो नदीनामनुत्तमस्मै व्रतं विश्वायु ॥११॥ अचिष्टो अ-स्मान्विश्वासु विक्ष्वघुं कृणोत शंसं निनित्सोः ॥१२॥ द्येतु दि-द्युद्विषामशेवा युयोत विश्वग्यथस्तनूनां ॥१३॥ अवींन्नो अग्निर्ह-व्यान्नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः ॥१४॥ सजूर्देवेभि-रपां नपातं सखायं कृध्वं शिवो नो अस्तु ॥१५॥ अन्नामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु षीदन् ॥१६॥ मा नोऽहिर्बुध्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः ॥१७॥ उत नः एषु नृषु श्रवो धुः प्र राये यन्तु शर्धतो अर्यः ॥१८॥ तपति शत्रुं स्वर्ण भूमा महासेनासो अमेभिरेषां ॥१९॥ आ यद्वः पत्नीर्गि-मंत्यच्छा त्वष्टा सुपाणिर्दधातु वीरान् ॥२०॥२६॥ प्रति नः

भंत् प्र वदाति अयें उपं एनं आध्वं सुऽमन्स्यमानाः आ वः गच्छाति प्रऽनृदुः वसिष्ठः ॥१४॥२४॥२॥

॥३४॥ प्र शुक्रा एतु देवी मनीषा अस्मत् सुऽतष्टः रथः न वाजी ॥१॥ विदुः पृथिव्याः दिवः जनित्रं शृण्वंति आपः अधं क्षरंतीः ॥२॥ आपः चित् अस्मै पिन्वंत पृथ्वीः वृत्रेषु शूराः मंसंते उग्राः ॥३॥ आ धूःऽसु अस्मे दधात अश्वान् इंद्रः न वज्री हिरण्यऽबाहुः ॥४॥ अभि प्र स्यात् अहंऽइव यज्ञं यातःऽइव पत्मन् त्मना हिनोत ॥५॥ त्मना समत्ऽसु हिनोत यज्ञं दधात केतुं जनाय वीरं ॥६॥ उत अस्य शुष्मात् भानुः न आतं विभर्ति भारं पृथिवी न भूमं ॥७॥ हुवामि देवान् अयातुः अग्ने साधन् क्रतेन धियं दधामि ॥८॥ अभि वः देवीं धियं दधिध्वं प्र वः देवऽत्रा वाचं कृणुध्वं ॥९॥ आ चष्टे आसां पाथः नदीनां वरुणः उग्रः सहस्रंऽचक्षाः ॥१०॥२५॥ राजा राष्ट्रानां पेशः नदीनां अनुत्तं अस्मै क्षत्रं विश्वऽआयु ॥११॥ अविष्टो अस्मान् विश्वासु विक्षु अद्धा कृणोत शंसं निनित्सोः ॥१२॥ वि एतु दिद्युत् द्विषां अशेवा युयोत विष्वक् रपः तनूनां ॥१३॥ अवीत् नः अग्निः हव्यऽअत् नमःऽभिः प्रेष्ठः अस्मै अधायि स्तोमः ॥१४॥ सऽजूः देवेभिः अपां नपातं सखायं कृध्वं शिवः नः अस्तु ॥१५॥ अप्ऽजां उक्थैः अहिं गृणीषे बुध्ने नदीनां रजःऽसु सीदन् ॥१६॥ मा नः अहिः बुध्न्यः रिषे धात् मा यज्ञः अस्य स्रिधत् क्रतुऽयोः ॥१७॥ उत नः एषु नृषु श्रवः धुः प्र राये यंतु शर्धतः अर्यः ॥१८॥ तर्पति शर्धः स्वः न भूमं महाऽसेनासः अमेभिः एषां ॥१९॥ आ यत् नः पत्नीः गमंति अच्छ त्वष्टा सुऽपाणिः दधातु वीरान् ॥२०॥२६॥ प्रति नः

स्तोमं त्वष्टा जुषेत स्यादस्मे अरमतिर्वसूयुः ॥२१॥ ता नो रासन्नातिषाचो वसूनया रोदसी वरुणानी शृणोतु। वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः॥२२॥ तन्नो रायः पर्वतास्तन्न आपस्तद्रातिषाच ओषधीरुत द्यौः। वनस्पतिभिः पृथिवी सजोषा उभे रोदसी परि पासतो नः॥२३॥ अनु तद्द्यावी रोदसी जिहातामनु द्युक्षो वरुण इंद्रसखा। अनु विश्वे मरुतो ये सहासो रायः स्याम धरुणं धियध्यै॥२४॥ तन्न इंद्रो वरुणो मित्रो अग्निरापः ओषधीर्वनिनो जुषंत। शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः॥२५॥२७॥

॥ ३५ ॥ १–१५ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥३५॥ शं न इंद्राग्नी भवतामवोभिः शं न इंद्रावरुणा रातहव्या। शमिंद्रासोमा सुविताय शं योः शं न इंद्रापूषणा वाजसातौ॥१॥ शं नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु संतु रायः। शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु॥२॥ शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः। शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि संतु॥३॥ शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शं। शं नः सुकृतां सुकृतानि संतु शं न इषिरो अभि वातु वातः॥४॥ शं नो द्यावापृथिवी पूर्वहूती शमंतरिक्षं दृशये नो अस्तु। शं न ओषधीर्वनिनो भवंतु शं नो रजसस्पतिरस्तु जिष्णुः॥५॥२८॥ शं न इंद्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः। शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु॥६॥ शं नः सोमो भवतु

सोमं त्वष्टा जुषेत स्यात् अस्मे अरमतिः वसुऽयुः ॥२१॥ ता नः रासन् रातिऽसाचः वसूनि आ रोदसी वरुणानी शृणोतु वरूचीभिः सुऽशरणः नः अस्तु त्वष्टा सुऽदत्रः वि दधातु रायः ॥२२॥ तत् नः रायः पर्वताः तत् नः आपः तत् रातिऽसाचः ओषधीः उत द्यौः वनस्पतिऽभिः पृथिवी सुऽजोषाः उभे रोदसी परि पासतः नः ॥२३॥ अनु तत् उर्वी रोदसी जिहातां अनु द्युक्षः वरुणः इंद्रऽसखा अनु विश्वे मरुतः ये सहासः रायः स्याम धरुणं धियध्यै ॥२४॥ तत् नः इंद्रः वरुणः मित्रः अग्निः आपः ओषधीः वनिनः जुषंत शर्मन् स्याम मरुतां उपऽस्थे यूयं पात स्वस्तिऽभिः सदा नः ॥२५॥२७॥

॥३५॥ शं नः इंद्राग्नी भवतां अवःऽभिः शं नः इंद्रावरुणा रातऽहव्या शं इंद्रासोमा सुविताय शं योः शं नः इंद्रापूषणा वाजऽसातौ ॥१॥ शं नः भगः शं उ नः शंसः अस्तु शं नः पुरंऽधिः शं उ नः संतु रायः शं नः सत्यस्य सुऽयमस्य शंसः शं नः अर्यमा पुरुऽजातः अस्तु ॥२॥ शं नः धाता शं उ धर्ता नः अस्तु शं नः उरूची भवतु स्वधाभिः शं रोदसी बृहती शं नः अद्रिः शं नः देवानां सुऽहवानि संतु ॥३॥ शं नः अग्निः ज्योतिःऽअनीकः अस्तु शं नः मित्रावरुणौ अश्विना शं शं नः सुऽकृतां सुऽकृतानि संतु शं नः इषिरः अभि वातु वातः ॥४॥ शं नः द्यावापृथिवी पूर्वऽहूतौ शं अंतरिक्षं दृशये नः अस्तु शं नः ओषधीः वनिनः भवंतु शं नः रजसः पतिः अस्तु जिष्णुः ॥५॥२८॥ शं नः इंद्रः वसुऽभिः देवः अस्तु शं आदित्येभिः वरुणः सुऽशंसः शं नः रुद्रः रुद्रेभिः जलाषः शं नः त्वष्टा ग्नाभिः इह शृणोतु ॥६॥ शं नः सोमः भवतु

ब्रह्म शं नः शं नो यावाणः शमु संतु यज्ञाः। शं नः स्वरूणां मितयो भवंतु शं नः प्रस्वः शम्वस्तु वेदिः॥७॥ शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवंतु। शं नः पर्वता ध्रुवयो भवंतु शं नः सिंधवः शमु संत्वापः॥८॥ शं नो अदितिर्भवतु व्रतेभिः शं नो भवंतु मरुतः स्वर्काः। शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः॥९॥ शं नः देवः सविता त्रायमाणः शं नो भवंतूषसो विभातीः। शं नो पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः॥१०॥२९॥ शं नो देवा विश्वदेवा भवंतु शं सरस्वती सह धीभिरस्तु। शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः॥११॥ शं नः सत्यस्य पतयो भवंतु शं नो अर्वंतः शमु संतु गावः। शं न ऋभवः सुकृतः सुहस्ताः शं नो भवंतु पितरो हवेषु॥१२॥ शं नो अज एकपाद्देवो अस्तु शं नोऽहिर्बुध्न्यः शं समुद्रः। शं नो अपां नपात्पेरुरस्तु शं नः पृश्निर्भवतु देवगोपाः॥१३॥ आदित्या रुद्रा वसवो जुषंतेदं ब्रह्म क्रियमाणं नवीयः। शृण्वंतु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः॥१४॥ ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः। ते नो रासंतामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः॥१५॥३०॥३॥

॥ ३६ ॥ १–९ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥३६॥ प्र ब्रह्मैतु सदनादृतस्य वि रश्मिभिः ससृजे सूर्यो गाः। वि सानुना पृथिवी संस उर्वी पृथु प्रतीकमध्येधे अग्निः॥१॥ इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असुरा नवीयः। इनो वामन्यः पदवीरदब्धो जनं च मित्रो यतति ब्रुवाणः॥२॥

ब्रह्म शं नः शं नः यार्वाणः शं ऊं सन्तु यज्ञाः शं नः स्वरूणां मितयः भवन्तु शं नः प्रऽस्वः शं ऊं अस्तु वेदिः ॥७॥ शं नः सूर्यः उरुऽचक्षाः उत् एतु शं नः चतस्रः प्रऽदिशः भवन्तु शं नः पर्वताः ध्रुवयः भवन्तु शं नः सिंधवः शं ऊं सन्तु आपः ॥८॥ शं नः अदितिः भवतु व्रतेभिः शं नः भवन्तु मरुतः सुऽअर्काः शं नः विष्णुः शं ऊं पूषा नः अस्तु शं नः भवित्रं शं ऊं अस्तु वायुः ॥९॥ शं नः देवः सविता चार्यमाणः शं नः भवन्तु उषसः विऽभातीः शं नः पर्जन्यः भवतु प्रऽजाभ्यः शं नः क्षेत्रस्य पतिः अस्तु शंऽभुः ॥१०॥२९॥ शं नः देवाः विश्वऽदेवाः भवन्तु शं सरस्वती सह धीभिः अस्तु शं अभिऽसाचः शं ऊं रातिऽसाचः शं नः दिव्याः पार्थिवाः शं नः अप्याः ॥११॥ शं नः सत्यस्य पतयः भवन्तु शं नः अर्वन्तः शं ऊं सन्तु गावः शं नः ऋभवः सुऽकृतः सुऽहस्ताः शं नः भवन्तु पितरः हवेषु ॥१२॥ शं नः अजः एकऽपात् देवः अस्तु शं नः अहिः बुध्न्यः शं समुद्रः शं नः अपां नपात् पेरुः अस्तु शं नः पृश्निः भवतु देवऽगोपाः ॥१३॥ आदित्याः रुद्राः वसवः जुषन्त इदं ब्रह्म क्रियमाणं नवीयः शृण्वन्तु नः दिव्याः पार्थिवासः गोऽजाताः उत ये यज्ञियासः ॥१४॥ ये देवानां यज्ञियाः यज्ञियानां मनोः यजत्राः अमृताः ऋतज्ञाः ते नः रासन्तां उरुगायं अद्य यूयं पात स्वस्तिऽभिः सदा नः ॥१५॥३०॥३॥

॥३६॥ प्र ब्रह्म एतु सदनात् ऋतस्य वि रश्मिऽभिः ससृजे सूर्यः गाः वि सानुना पृथिवी सस्रे उर्वी पृथु प्रतीकं अधि आ ईध्ये अग्निः ॥१॥ इमां वां मित्रावरुणा सुऽवृक्तिं इयं न कृण्वे असुरा नवीयः इनः वां अन्यः पदऽवीः अदब्धः जनं च मित्रः यतऽ

ति ब्रुवाणः॥२॥ आ वार्तस्य ध्रजंतो रंत इत्या अपीपयंत धेनवो न सूदाः। मही दिवः सदने जायमानोऽचिक्रदद्वृषभः सस्मिन्नूधन्॥३॥ गिरा य एता युनजद्धरी त इंद्र प्रिया सुरथा शूर धायू। प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्यां॥४॥ यजैते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन्। वि पृक्षो वावधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठं॥५॥१॥ आ यत्साकं यशसो वावशानाः सरस्वती सप्तथी सिंधुमाता। याः सुष्वयंत सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः॥६॥ उत त्ये नो मरुतो मंदसाना धियं तोकं च वाजिनोऽवंतु। मा नः परि ख्यदक्षरा चरंत्यवीवृधन्युज्यं ते रयिं नः॥७॥ प्र वो महीमरमतिं कृणुध्वं प्र पूषणं विदथ्यं१न वीरं। भगं धियोऽवितारं नो अस्याः सातौ वाजं रातिषाचं पुरंधिं॥८॥ अच्छायं वो मरुतः श्लोक एत्वच्छा विष्णुं निपिक्तपामवोभिः। उत प्रजायै गृणते वयो धुर्यूयं पात स्वस्तिभिः सदा नः॥९॥२॥

॥ ३७ ॥ १-८ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥३७॥ आ वो वाहिष्ठो वहतु स्तवध्यै रथो वाजा ऋभुक्षणो अमृक्तः। अभि त्रिपृष्ठैः सवनेषु सोमैर्मदे सुशिप्रा महभिः पृणध्वं॥१॥ यूयं ह रत्नं मघवत्सु धत्थ स्वर्दृशं वृषभुक्षणो अमृक्तं। सं यज्ञेषु स्वधावंतः पिबध्वं वि नो राधांसि मतिभिर्दयध्वं॥२॥ उवोचिथ हि मघवन्देष्णं महो अर्भस्य वसुनो विभागे। उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या॥३॥ त्वमिंद्र स्वयशा ऋभुक्षा वाजो न साधुरस्तमेष्यृक्वा। वयं नु ते दाश्वांसः स्याम ब्रह्म कृण्वंतो हरिवो वसिष्ठाः॥४॥

ति ब्रुवाणः ॥२॥ आ वातस्य ध्रजतः रंते इत्याः अपीपयंत धेनवः न सूदाः महः दिवः सदने जायमानः अचिक्रदत् वृषभः सस्मिन् ऊधन् ॥३॥ गिरा यः एता युनजत् हरी ते इंद्र प्रिया सुऽरथा शूर धायू प्र यः मन्युं रिरिक्षतः मिनाति आ सुऽक्रतुं अर्यमणं ववृत्यां ॥४॥ यजंते अस्य सख्यं वयः च नमस्विनः स्वे क्षितस्य धामन् वि पृक्षः वावधे नृऽभिः स्तवानः इदं नमः रुद्राय प्रेष्ठं ॥५॥७॥ आ यत् साकं यशसः वावशानाः सरस्वती सप्तथी सिंधुऽमाताः याः सुस्वयंत सुऽदुघाः सुऽधाराः अभि स्वेन पयसा पीयानाः ॥६॥ उत त्ये नः मरुतः मंदसानाः धियं तोकं च वाजिनः अवंतु मा नः परि ख्यत् अक्षरा चरंती अवीवृधन् युज्यं ते रयिं नः ॥७॥ प्र वः महीं अरमतिं कृणुध्वं प्र पूषणं विदथ्यं न वीरं भगं धियः अवितारं नः अस्याः सातौ वाजं रातिऽसाचं पुरंधिं ॥८॥ अच्छं अयं वः मरुतः श्लोकः एतु अच्छं विष्णुं निऽसिक्तऽपां अवःऽभिः उत प्रऽजायै गृणते वयः धुः यूयं पात स्वस्तिऽभिः सदा नः ॥९॥२॥

॥ ३७ ॥ आ वः वाहिष्ठः वहतु स्तवध्यै रथः वाजाः ऋभुक्षणः अमृक्तः अभि त्रिऽपृष्ठैः सवनेषु सोमैः मदे सुऽशिप्राः महऽभिः पृणध्वं ॥१॥ यूयं हि रत्नं मघवत्ऽसु धत्थ स्वःऽदृशः ऋभुक्षणः अमृक्तं सं यज्ञेषु स्वधाऽवंतः पिबध्वं वि नः राधांसि मतिऽभिः दयध्वं ॥२॥ उवोचिथ हि मघऽवन् देष्णं महः अर्भस्य वसुनः विऽभागे उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या ॥३॥ त्वं इंद्र स्वऽयशाः ऋभुक्षाः वाजः न साधुः अस्तं एषि ऋक्वा वयं नु ते दाश्वांसः स्याम ब्रह्म कृण्वंतः हरिऽवः वसिष्ठाः ॥४॥

सनितासि प्रवतो दाशुषे चिद्याभिर्विवेषो हर्यश्व धीभिः। वव्न्मा नु ते युज्याभिरूती कदा न इंद्र राय आ दशस्येः ॥५॥३॥ वासयसीव वेधसस्त्वं नः कदा न इंद्र वचसो बुबोधः। अस्तं ता-त्या धिया रयिं सुवीरं पृक्षो नो अर्वा न्युहीत वाजी ॥६॥ अभि यं देवी निर्ऋतिश्चिदीशे नक्षंत इंद्रं शरदः सुपृक्षः। उप चिद्वं-धुरदृष्टिमेत्यस्वेशं यं कृणवंत मर्तोः ॥७॥ आ नो राधांसि सवितः स्तवध्या आ रायो यंतु पर्वतस्य रातौ। सदा नो दिव्यः पायुः सिषक्तु यूयं पात स्वस्तिभिः सदा नः ॥८॥४॥

॥ ३८ ॥ १–८ वसिष्ठः ॥ १–६ सविता । ६ सविता भगो वा । ७, ८ पायवः ॥ त्रिष्टुप् ॥

॥ ३८ ॥ उदु ष्य देवः सविता ययाम हिरण्ययीममतिं या-मशिश्रेत् । नूनं भगो हव्यो मानुषेभिर्वि यो रत्ना पुरू-वसुर्दधाति ॥१॥ उदु तिष्ठ सवितः श्रुध्य१स्य हिरण्यपाणे प्रभृतावृतस्य । व्यु१र्वीं पृथ्वीममतिं सृजान आ नृभ्यो मर्तो-भोजनं सुवानः ॥२॥ अपि ष्टुतः सविता देवो अस्तु यमा चि-द्विश्वे वसवो गृणंति । स नः स्तोमान्नमस्य१न्यनो धाद्विश्वेभिः पातु पायुभिर्नि सूरीन् ॥३॥ अभि यं देव्यदितिर्गृणाति सवं देवस्य सवितुर्जुषाणा । अभि सम्राजो वरुणो गृणंत्यभि मित्रासो अर्यमा सजोषाः ॥४॥ अभि ये मिथो वनुषः सपंते रातिं दिवो रातिषाचः पृथिव्याः । अहिर्बुध्न्य उत नः शृणोतु वरूत्र्येकधेनुभिर्नि पातु ॥५॥ अनु तन्नो जास्पतिर्मंसीष्ट रत्नं देवस्य सवितुरियानः। भगमुग्रोऽवसे जोहवीति भगमनुग्रो अध याति रत्नं ॥६॥ शं नो भवंतु वाजिनो हवेषु देवता-ता मितद्रवः स्वर्काः। जंभयंतोऽहिं वृकं रक्षांसि सनेम्यस्म-

सनिंता असि प्रऽवतः दाशुषे चित् यामिः विवेषः हरिऽअश्व धीभिः ववन्म नुते युज्याभिः ऊती कदा नः इंद्र रायः आ दशस्येः ॥५॥३॥ वासयंसिऽइव वेधसः त्वं नः कदा नः इंद्र वचसः चुचोधः अस्तं तात्या धिया रयिं सुऽवीरं पृक्षः नः अर्वा नि उहीत वाजी ॥६॥ अभि यं देवी निःऽऋतिः चित् ईशे नक्षंते इंद्रं शरदः सुऽपृक्षः उप चिऽबंधुः जरत्ऽअष्टिं एति अस्वंऽवेशं यं कृणवंत मर्तीः ॥७॥ आ नः राधांसि सवितः स्तवध्यै आ रायः यंतु पर्वतस्य रातौ सदा नः दिव्यः पायुः सिसक्तु यूयं पात स्वस्तिऽभिः सदा नः ॥८॥४॥

॥३८॥ उत ऊं स्यः देवः सविता ययाम् हिरण्ययीं अमतिं यां अशिश्रेत् नूनं भगः हव्यः मानुषेभिः वि यः रत्ना पुरुऽवसुः दधाति ॥१॥ उत ऊं तिष्ठ सवितः शृधि अस्य हिरण्यऽपाणे प्रऽभृतौ ऋतस्य विऽउर्वीं पृथ्वीं अमतिं सृजानः आ नृऽभ्यः मर्तऽभोजनं सुवानः ॥२॥ अपि स्तुतः सविता देवः अस्तु यं आ चित् विश्वे वसवः गृणंति सः नः स्तोमान् नमस्यः चनः धात् विश्वेभिः पातु पायुऽभिः नि सूरीन् ॥३॥ अभि यं देवी अदितिः गृणाति सवं देवस्य सवितुः जुषाणा अभि संऽराजः वरुणः गृणंति अभि मित्रासः अर्यमा सऽजोषाः ॥४॥ अभि ये मित्यः वनुषः सपंते रातिं दिवः रातिऽसाचः पृथिव्याः अहिः बुध्नः उत नः शृणोतु वरूची एकधेनुऽभिः नि पातु ॥५॥ अनु तत् नः जाःपतिः मंसीष्ट रत्नं देवस्य सवितुः इयानः भगं उग्रः अवसे जोहवीति भगं अनुग्रः अध याति रत्नं ॥६॥ शं नः भवंतु वाजिनः हवेषु देवऽताता मितऽद्रवः सुऽअर्काः जंभयंतः अहिं वृकं रक्षांसि सनेमि अस्मत्

द्युयवन्नमीवाः ॥७॥ वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥८॥५॥

॥ ३९ ॥ १–७ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥३९॥ ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेत्प्रतीची जूर्णिर्देवतातिमेति। भेजाते अद्री रथ्येव पंथामृतं होता न इषितो यजाति ॥१॥ प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते । विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥२॥ ज्मया अत्र वसवो रंत देवा उरावंतरिक्षे मर्जयंत शुभ्राः। अर्वाक्पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य ॥३॥ ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे अभि संति देवाः। ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरंधिं ॥४॥ आ ग्ने गिरो दिव आ पृथिव्या मित्रं वह वरुणमिंद्रमग्निं। आर्यमणमदितिं विष्णुमेषां सरस्वती मरुतो मादयंतां ॥५॥ रेरे हव्यं मतिभिर्यज्ञियानां नक्षत्कामं मर्त्यानामसिन्वन्। धाता रयिमविदस्यं संदासां संक्षीमहि युज्येभिर्नु देवैः ॥६॥ नू रोदसी अभिष्टुते वसिष्ठऋतावानो वरुणो मित्रो अग्निः। यच्छंतु चंद्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥७॥६॥

॥ ४० ॥ १–७ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥४०॥ ओ श्रुष्टिर्विद्थ्याऽ३समेतु प्रति स्तोमं दधीमहि तुराणां। यद्द्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे ॥१॥ मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिंद्रो अर्यमा ददातु। दितिर्दक्षं दिव्यं पस्त्यानां वायुश्च यच्छियुवते भगश्च

युयवन् अमीवाः ॥७॥ वाजेऽवाजे अवत वाजिनः नः धनेषु विप्राः अमृताः ऋतज्ञाः अस्य मध्वः पिबत मादयध्वं तृप्ताः यात पथिऽभिः देवऽयानैः ॥८॥५॥

॥३९॥ ऊर्ध्वः अग्निः सुऽमतिं वस्वः अश्रेत् प्रतीची जूर्णिः देवऽहूतिं एति भेजाते अद्री रथ्याऽइव पंथां ऋतं होता नः इषितः यजाति ॥१॥ प्र वावृजे सुऽप्रयाः बर्हिः एषां आ विश्पतीऽइव बीरिट इयाते विशं अक्तोः उपसः पूर्वऽहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥२॥ जन्मयाः अजरं वसवः रंत देवाः उरौ अंतरिक्षे मर्जयंत शुभ्राः अर्वाक् पथः उरुऽज्रयः कृणुध्वं श्रोतं दूतस्य जग्मुषः नः अस्य ॥३॥ ते हि यज्ञेषु यज्ञियासः ऊमाः सधऽस्थं विश्वे अभि संति देवाः तान् अध्वरे उशतः यक्षि अग्ने त्रुष्टी भगं नासत्या पुरंऽधिं ॥४॥ आ अग्ने गिरः दिवः आ पृथिव्याः मित्रं वह वरुणं इंद्रं अग्निं आ अर्यमणं अदितिं विष्णुं एषां सरस्वती मरुतः मादयंतां ॥५॥ रेरे हव्यं मतिऽभिः यज्ञियानां नक्षत् कामं मर्त्यानां असिन्वन् धातं रयिं अविऽदस्यं सदाऽसां सक्षीमहि युज्येभिः नु देवैः ॥६॥ नु रोदसी अभिऽस्तुते० वसिष्ठैः ऋतऽवानः वरुणः मित्रः अग्निः यच्छंतु चंद्राः उपऽमं नः अर्कं यूयं पात स्वस्तिऽभिः सदा नः ॥७॥६॥

॥४०॥ ओ त्रुष्टिः विदथ्या सं एतु मतिं स्तोमं दधीमहि तुराणां यत् अद्य देवः सविता सुवाति स्यामं अस्य रत्निनः विऽभागे ॥१॥ मित्रः तत् नः वरुणः रोदसी च द्युऽभक्तं इंद्रः अर्यमा ददातु दितेः तु देवी अदितिः रेवणः वायुः च यत् निऽयुवैते० भगः च

॥२॥ सेदुग्रो अस्तु मरुतः स शुष्मी यं मर्त्यं पृषदश्वा अवाथ। उतेमग्निः सरस्वती जुनंति न तस्य रायः पर्येतास्ति ॥३॥ अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः। सुहवा देव्यदितिरनर्वा ते नो अंहो अति पर्षन्नरिष्टान् ॥४॥ अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः। विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ॥५॥ मात्र पूषन्नाघृणे इरस्यो वरूत्री यद्गातिषाचश्च रासन्। मयोभुवो नो अर्वंतो नि पांतु वृष्टिं परिज्मा वातो ददातु ॥६॥ नू रोदसी अभिष्टुते वसिष्टैर्ऋतावानो वरुणो मित्रो अग्निः। यच्छंतु चंद्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥७॥७॥

॥ ४१ ॥ १–७ वसिष्ठः ॥ १ लिंगोक्तदेवताः। २–६ भगः। ७ उषाः ॥ १ जगती। २–७ त्रिष्टुप् ॥

॥४१॥ प्रातरग्निं प्रातरिंद्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना। प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥१॥ प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता। आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥२॥ भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः। भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवंतः स्याम ॥३॥ उतेदानीं भगवंतः स्यामोत प्रपित्व उत मध्ये अह्नां। उतोदिता मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम ॥४॥ भग एव भगवाँ अस्तु देवास्तेन वयं भगवंतः स्याम। तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह ॥५॥ समध्वरायोषसो नमंत दधिक्रावेव शुचये पदाय। अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन

॥२॥ सः इत् उग्रः अस्तु मरुतः सः शुष्मी यं मर्त्यं पृषत्ऽअश्वाः अवाथ उत द्रुः अग्निः सरस्वती जुनंति न तस्य रायः परिऽएता अस्ति॥३॥ अयं हि नेता वरुणः ऋतस्य मित्रः राजानः अर्यमा अपःधुः॰ सुऽहवा देवी अदितिः अनर्वा ते नः अंहः अति पर्षन् अरिष्टान्॥४॥ अस्य देवस्य मीळ्हुषः वयाः विष्णोः एषस्य प्रऽभृथे हविःऽभिः विदे हि रुद्रः रुद्रियं महिऽत्वं यासिष्टं वर्तिः अश्विनौ इरांऽवत्॥५॥ मा अर्चं पूषन् आऽघृणे द्रुस्यः वरूची यत् रातिऽसाचः च रासन् मयःऽभुवः नः अवंतः नि पांतु वृष्टिं परिऽज्मा वातः ददातु॥६॥ नु रोदसी॰ अभिऽस्तुते॰ वसिष्ठैः ऋतऽवानः वरुणः मित्रः अग्निः यच्छंतु चंद्राः उपऽमं नः अर्के यूयं पात स्वस्तिऽभिः सदा नः॥७॥७॥

॥४१॥ प्रातः अग्निं प्रातः इंद्रं हुवामहे प्रातः मित्रावरुणा प्रातः अश्विना प्रातः भगं पूषणं ब्रह्मणः पतिं प्रातः॰ सोमं उत रुद्रं हुवेम॥१॥ प्रातःऽजितं भगं उग्रं हुवेम वयं पुत्रं अदितेः यः विऽधर्ता आध्रः चित् यं मन्यमानः तुरः चित् राजा चित् यं भगं भक्षिः इति आहं॥२॥ भगं प्रऽनेतः॰ भगं सत्यऽराधः भगं इमां धियं उत अव ददत् नः भगं प्र नः जनय गोभिः अश्वैः भगं प्र नृऽभिः नृऽवंतः स्याम॥३॥ उत इदानीं भगंऽवंतः स्याम उत प्रऽपित्वे उत मध्ये अह्नां उत उत्ऽइता मघऽवन् सूर्यस्य वयं देवानां सुऽमतौ स्याम॥४॥ भगः एव भगंऽवान् अस्तु देवाः तेन वयं भगंऽवंतः स्याम तं त्वा भग सर्वेः इत् जोहूयीति सः नः भग पुरःऽएता भव इह॥५॥ सं अध्वराय उपसः नमंत दधिक्रावाऽइव शुचये पदाय अर्वाचीनं वसुऽविदं भगं नः रथंऽइव अश्वाः वाजिनः

आ वहंतु ॥ ६ ॥ अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छंतु भद्राः । घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥ ८ ॥

॥ ४२ ॥ १–६ वसिष्ठः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥ ४२ ॥ प्र ब्रह्माणो अंगिरसो नक्षंत प्र क्रंदनुर्नभन्यस्य वेतु । प्र धेनव उदप्रुतो नवंत युज्यातामद्री अध्वरस्य पेशः ॥ १ ॥ सुगार्हपत्यः समिधानो अग्ने सनंवित्तो अश्वां युक्ष्वा सुते हरितो रोहितश्च । ये वा सद्मन्रुषा वीरवाहो हुवे देवानां जनिमानि सत्तः ॥ २ ॥ समु वो यज्ञं महयन्नमोभिः प्र होता मंद्रो रिरिचे उपाके । यजस्व सु पुरुवणेव देवाना यज्ञियामरमतिं ववृत्याः ॥ ३ ॥ यदा वीरस्य रेवतो दुरोणे स्योनशीरतिथिरा चिकेतत् । सुप्रीतो अग्निः सुधितो दमे आ स विशे दाति वार्यमिषत्यै ॥ ४ ॥ इमं नो अग्ने अध्वरं जुषस्व मरुत्स्विंद्रे यशसं कृधी नः । आ नक्तां बर्हिः सदतामुषासोषंता मित्रावरुणा यजेह ॥ ५ ॥ एवाग्निं सहस्यं वसिष्ठो रायस्कामो ऋध्यत्यस्य स्तौत । इषं रयिं पप्रथद्वाजमस्मे यूयं पात स्वस्ति-

आ वहंतु ॥६॥ अश्वऽवतीः गोऽमतीः नः उषसः वीरऽवतीः सदं उच्छंतु भद्राः घृतं दुहानाः विश्वतः प्रऽपीताः यूयं पात स्वस्तिऽभिः सदा नः ॥७॥८॥

॥४२॥ प्र ब्रह्माणः अंगिरसः नक्षंत प्र क्रंदनुः नभन्यस्य वेतु प्र धेनवः उदऽप्रुतः नवंत युज्यातां अद्री अध्वरस्य पेशः ॥१॥ सुऽगः ते अग्ने सनऽवित्तः अर्वा युंक्ष्व सूते हरितः रोहितः च ये वा सन्नन् अरुषाः वीरऽवाहः हुवे देवानां जनिमानि सत्तः ॥२॥ सं ऊं वः यज्ञं महयन् नमःऽभिः प्र होता मंद्रः रिरिचे उपाके यजस्व सु पुरुऽअनीक देवान् आ यज्ञियां अरमतिं ववृत्याः ॥३॥ यदा वीरस्य रेवतः दुरोणे स्योनऽशीः अतिथिः आऽचिकेतत् सुऽप्रीतः अग्निः सुऽधितः दमे आ सः विशे दाति वार्यं इर्यत्यै ॥४॥ इमं नः अग्ने अध्वरं जुषस्व मरुतऽसु इंद्रे यशसं कृधि नः आ नक्ता बर्हिः सदतां उषसा उशंता मित्रावरुणा यज इह ॥५॥ एव अग्निं सहस्यं वसिष्ठः रायःऽकामः विश्वऽप्न्यस्य स्तौत् इषं रयिं पप्रथत् वाजं अस्मे यूयं पात स्वस्तिऽभिः सदा नः ॥६॥९॥

॥४३॥ प्र वः यज्ञेषु देवऽयंतः अर्चन् द्यावा नमःऽभिः पृथिवी इषध्यै येषां ब्रह्माणि असमानि विप्राः विश्वक् विऽयंति वनिनः न शाखाः ॥१॥ प्र यज्ञः एतु होतृऽमन्नः न सप्तिः उत् यच्छध्वं सऽमनसः घृताचीः स्तृणीत बर्हिः अध्वराय साधु ऊर्ध्वा शोचींषि देवऽयूनि अस्थुः ॥२॥ आ पुत्रासः न मातरं विऽभृत्राः सानौ देवासः बर्हिषः सदंतु आ विश्वाचीं विदथ्यां अनक्तु अग्ने मा नः देवऽतातौ मृधः कः ॥३॥ ते सीषपंत जोषं आ यजत्राः ऋतस्य

धारां॑ः सु॒दुघा॒ दुहा॑नाः। ज्येष्ठं॑ वो अ॒द्य मह॒ आ व॑सू॒नामा गं॑तन॒ सम॑नसो॒ यति॒ ष्ठ ॥ ४॥ ए॒वा नो॑ अग्ने वि॒त्त्वा दं॑शस्य त्वया॑ व॒यं सं॑हसाव॒न्नास्का॑ः। रा॒या यु॒जा सं॑धमादो॒ अरि॑ष्टा यू॒यं पा॑त स्व॒स्ति॒भि॒ः सदा॑ नः ॥ ५॥ १०॥

॥ ४३॥ १–५ वसिष्ठः॥ १ लिंगोक्तदेवताः। २–५ दधिक्राः॥ १ जगती। २–५ त्रिष्टुप्॥

॥४४॥ दधि॒क्रां वः॑ प्रथ॒ममश्वि॑नोषस॒मग्निं स॑मि॒द्धं भग॑मू॒तये॑ हुवे। इंद्रं॒ विष्णुं॑ पू॒षणं॒ ब्रह्म॑णस्पति॒मादि॒त्यान्द्यावा॑पृथि॒वी अ॒पः स्वः॑॥ १॥ दधि॒क्रामु॒ नम॑सा बो॒धय॑न्त उदी॒राण॑ा यज्ञमु॒पप्र॑यंतः। इळां॑ दे॒वीं ब॒र्हिषि॑ सादयंतो॒ऽश्विना॒ विप्रा॑ सुहवा॑ हुवेम ॥ २॥ दधि॒क्रावा॑णं बुबुधा॒नो अ॒ग्निमुप॑ ब्रुव उ॒षस॑ सू॒र्यं॑ गां। ब्रह्म॑ मँ॒श्वतो॑र्वरु॒णस्य॑ ब॒भ्रुं ते विश्वा॒स्मद्दुरि॑ता यावयंतु ॥ ३॥ दधि॒क्रावा॑ प्रथ॒मो वा॒ज्यर्वाग्रे॒ रथा॑नां भवति प्रजा॒नन्। सं॑विदा॒न उ॒षसा॒ सूर्ये॑णादि॒त्येभि॒र्वसु॑भि॒रंगि॑रोभि॒ः ॥ ४॥ आ नो॑ दधि॒क्राः प॒थ्या॑मनक्तृ॒तस्य॒ पंथा॒मन्वे॑तवा उ। शृ॒णोतु॑ नो॒ दैव्यं॒ शर्धो॑ अ॒ग्निः शृ॒ण्वंतु॒ विश्वे॑ महि॒षा अ॑मू॒राः ॥ ५॥ ११॥

॥ ४५॥ १–४ वसिष्ठः॥ सविता॥ त्रिष्टुप्॥

॥४५॥ आ दे॒वो या॑तु सवि॒ता सु॒रत्नो॑ऽन्तरिक्ष॒प्रा यह॑मा॒नो अश्वैः॑। हस्ते॒ दधा॑नो॒ नर्या॑ पुरू॒णि नि॒वेश॑यंश्च॒ प्रसु॑वञ्च॒ भूम॑ ॥ १॥ उद॑स्य बा॒हू शि॑थि॒रा बृ॒हंता॑ हिर॒ण्यया॑ दि॒वो अंता॑॑ अनष्टां। नूनं॑ सो अ॑स्य महि॒मा प॑नि॒ष्ट सूर॑श्चिदस्मा॒ अनु॑ दादपस्यां ॥ २॥ स घा॑ नो॒ देवः॑ सवि॒ता सहा॑वा सा॒चिय॑द्ह॒सुं॑पति॒र्वसू॑नि। वि॒श्रय॑माणो॒ अम॑तिमुरू॒चीं म॑र्तभो॒जन॑मध॑ रासते नः ॥ ३॥ इ॒मा गिरः॑ सवि॒तारं॒ सुजि॑ह्वं पू॒र्णगं॑भस्तिमी॒-

धारां सुऽदुघां दुहानाः ज्येष्ठं वः अद्य महः आ वसूनां आ गंतन सऽमनसः यतिं स्थ ॥४॥ एव नः अग्ने विक्षु आ दृणस्य त्वया वयं सहसाऽवन् आस्क्राः राया युजा सधऽमादः अरिष्टाः यूयं पात स्वस्तिऽभिः सदा नः ॥५॥१०॥

॥४४॥ दधिऽक्रां वः प्रथमं अश्विना उषसं अग्निं समिधं भगं ऊतये हुवे इंद्रं विष्णुं पूषणं ब्रह्मणः पतिं आदित्यान् द्यावापृथिवी अपः स्वः० ॥१॥ दधिऽक्रां ऊं नमसा बोधयंतः उत्ऽईराणाः यज्ञं उपऽप्रयंतः इळां देवीं बर्हिषि सादयंतः अश्विना विप्रा सुऽहवा हुवेम ॥२॥ दधिऽक्रावाणं वुवुधानः अग्निं उप ब्रुवे उषसं सूर्यं गां यज्ञं मंथतोः वरुणस्य चभ्रु ते विश्वा अस्मत् दुःऽइता यवयंतु ॥३॥ दधिऽक्रावा प्रथमः वाजी अर्वा अग्निं रथानां भवति प्रऽजानन् संऽविदानः उषसा सूर्येण आदित्येभिः वसुऽभिः अंगिरःऽभिः ॥४॥ आ नः दधिऽक्राः पथ्यां अनक्तु ऋतस्य पंथां अनुऽएतवे ऊं शृणोतु नः दैव्यं शर्धः अग्निः शृणंतु विश्वे महिषाः अमूराः ॥५॥११॥

॥४५॥ आ देवः यातु सविता सुऽरत्नः अंतरिक्षऽप्राः वहमानः अश्वैः हस्ते दधानः नर्या पुरूणि निऽवेशयन् च प्रऽसुवन् च भूम ॥१॥ उत अस्य बाहू शिथिरा बृहंता हिरण्यया दिवः अंतान् अनटां नूनं सः अस्य महिमा पनिष्ट सूरः चित् अस्मै अनु दात् अपस्या ॥२॥ सः घ नः देवः सविता सहऽवा आ साविषत् वसुऽपतिः वसूनि विऽश्रयमाणः अमतिं उरूचीं मर्तऽभोजनं अध रासते नः ॥३॥ इमाः गिरः सवितारं सुऽजिह्वं पूर्णऽगभस्तिं

ऊते सुपाणिं। चित्रं वयो बृहदस्मे दधातु यूयं पात स्वस्तिभिः सदा नः ॥४॥१२॥

॥ ४६ ॥ १–४ वसिष्ठः ॥ रुद्रः ॥ १–३ जगती । ४ त्रिष्टुप् ॥

॥४६॥ इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधावे। अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः॥१॥ स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति। अवन्नवंतीरुप नो दुरश्चरानमीवो रुद्र जासु नो भव॥२॥ या ते द्युदवसृष्टा दिवस्परि क्षया चरति परि सा वृणक्तु नः। सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः॥३॥ मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य। आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः॥४॥१३॥

॥ ४७ ॥ १–४ वसिष्ठः ॥ आपः ॥ त्रिष्टुप् ॥

॥४७॥ आपो यं वः प्रथमं देवयंत इंद्रपानमूर्मिमकृण्वतेळः। तं वो वयं शुचिमरिप्रमद्य घृतप्रुषं मधुमंतं वनेम ॥१॥ तमूर्मिमापो मधुमत्तमं वोऽपां नपादवत्वाशुहेमा। यस्मिन्निंद्रो वसुभिर्मादयाते तमश्याम देवयंतो वो अद्य ॥२॥ शुतपविचाः स्वधया मदंतीर्देवीर्देवानामपि यंति पाथः। ता इंद्रस्य न मिनंति व्रतानि सिंधुभ्यो हव्यं घृतवज्जुहोत ॥३॥ याः सूर्यो रश्मिभिराततान याभ्य इंद्रो अरदद्गातुमूर्मिं। ते सिंधवो वरिवो धातना नो यूयं पात स्वस्तिभिः सदा नः ॥४॥१४॥

॥ ४८ ॥ १–४ वसिष्ठः ॥ १–३ ऋभवः । ४ ऋभवो विष्ण इंद्रा या ॥ त्रिष्टुप् ॥

॥४८॥ ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः

ईळते सुऽपाणिं चित्रं वयः बृहत् अस्मे दधातु यूयं पात स्वस्तिऽभिः सदा नः॥४॥१२॥

॥४६॥ इमाः रुद्राय स्थिरऽधन्वने गिरः क्षिप्रऽइषवे देवाय स्वधाऽवे अयाळ्हाय सहमानाय वेधसे तिग्मऽआयुधाय भरत शृणोतु नः॥१॥ सः हि क्षयेण क्षम्यस्य जन्मनः साऽराज्येन दिव्यस्य चेतति अवन् अवंतीः उप नः दुरः चर अनमीवः रुद्र जासु नः भव॥२॥ या ते दिद्युत् अवऽसृष्टा दिवः परि क्षमया चरति परि सा वृणक्तु नः सहस्रं ते सुऽअपिवात भेषजा मा नः तोकेषु तनयेषु रिरिषः॥३॥ मा नः वधीः रुद्र मा परा दाः मा ते भूम प्रऽसितौ हीळितस्य आ नः भज बर्हिषि जीवऽशंसे यूयं पात स्वस्तिऽभिः सदा नः॥४॥१३॥

॥४७॥ आपः यं वः प्रथमं देवऽयंतः इंद्रऽपानं ऊर्मिं अकृण्वत इळः तं वः वयं शुचिं अरिप्रं अद्य घृतऽप्रुषं मधुऽमंतं वनेम॥१॥ तं ऊर्मिं आपः मधुमत्ऽतमं वः अपां नपात् अवतु आशुऽहेमा यस्मिन् इंद्रः वसुऽभिः मादयाते तं अश्याम देवऽयंतः वः अद्य॥२॥ शतऽपवित्राः स्वधया मदंतीः देवीः देवानां अपि यंति पाथः ताः इंद्रस्य न मिनंति व्रतानि सिंधुऽभ्यः हव्यं घृतऽवत् जुहोत॥३॥ याः सूर्यः रश्मिऽभिः आऽततान याभ्यः इंद्रः अरदत् गातुं ऊर्मिं ते सिंधवः वरिवः धातन नः यूयं पात स्वस्तिऽभिः सदा नः॥४॥१४॥

॥४८॥ ऋभुक्षणः वाजाः मादयध्वं अस्मे नरः मघऽवानः

सुतस्य। आ वो ऽवाचः ऋतवो न यातां विभ्वो रथं नर्यं वर्तयंतु ॥१॥ ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि। वाजो अस्माँ अवतु वाजसातावविंद्रेण युजा तरुषेम वृत्रं॥२॥ ते चिद्धि पूर्वीरभि संति शासा विश्वाँ अर्य उपरताति वन्वन्। इंद्रो विभ्वाँ ऋभुक्षा वाजो अर्यः शवोभिर्यत्या कृणवन्वि नृम्णं॥३॥ नू देवासो वरिवः कर्तना नो भूत नो विश्वेऽवसे सजोषाः। समस्मे इषं वसवो ददीरन्यूयं पात स्वस्तिभिः सदा नः॥४॥१५॥

॥ ४९ ॥ १–४ वसिष्ठः ॥ आपः ॥ त्रिष्टुप् ॥

॥४९॥ समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यंत्यनिविशमानाः। इंद्रो या वज्री वृषभो ररादता आपो देवीरिह मामवंतु ॥१॥ या आपो दिव्या उत वा स्रवंति खनित्रिमा उत वा याः स्वयंजाः। समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवंतु॥२॥ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानां। मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवंतु ॥३॥ यासु राजा वरुणो यासु सोमो विश्वे देवा यासूर्जं मदंति। वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह मामवंतु ॥४॥१६॥

॥ ५० ॥ १–३ वसिष्ठः ॥ १ मित्रावरुणौ। २ अग्निः। ३ विश्वे देवाः। ४ नद्यः ॥ १–३ जगती। ४ अतिजगती शक्वरी वा ॥

॥५०॥ आ मा मित्रावरुणेह रक्षतं कुलायमद्विश्वयन्मा न आ गन्। अजुष्टाहं दुष्टरीकं तिरो दधे मा मां पद्येन रप्सा विदत्सरुः ॥१॥ यद्विजामन्परुषि वर्दनं भुवदग्नीवंती परि कुल्फौ च देहत्। अग्निष्टच्छोचन्नप बाधतामितो मा मां पद्येन रप्सा विदत्सरुः॥२॥ यच्छ्लोणौ भवति यन्नु-

सुतस्य आ वः अर्वाचः ऋतवः नयातां विऽभ्वः रथं नयं वर्तयंतु ॥१॥ ऋभुः ऋभुऽभिः अभि वः स्याम विऽभ्वः विभुऽभिः शर्वसा शर्वांसि वाजः अस्मान् अवतु वाजऽसातौ इंद्रेण युजा तरुषेम वृत्रं॥२॥ ते चित् हि पूर्वीः अभि संति शासा विश्वान् अर्यः उपरऽतांति वन्वन् इंद्रः विऽभ्वा ऋभुक्षाः वाजः अर्यः शचोः मिथत्या कृणवन् वि नृम्णं॥३॥ नु देवासः वरिवः कर्तन नः भूत नः विश्वे अर्वसे सऽजोषाः सं अस्मे इषं वसवः दृदीरन् यूयं पात स्वस्तिऽभिः सदा नः॥४॥१५॥

॥४९॥ समुद्रऽज्येष्ठाः सलिलस्य मध्यात् पुनानाः यंति अनिंऽविशमानाः इंद्रः याः वज्री वृषभः ररादं ताः आपः देवीः इह मां अवंतु॥१॥ याः आपः दिव्याः उत वा स्रवंति खनित्रिमाः उत वा याः स्वयंऽजाः समुद्रऽअर्थाः याः शुचयः पावकाः ताः आपः देवीः इह मां अवंतु॥२॥ यासौ राजा वरुणः याति मध्ये सत्यानृते अवऽपश्यन् जनानां मधुश्चुतः शुचयः याः पावकाः ताः आपः देवीः इह मां अवंतु॥३॥ यासु राजा वरुणः यासु सोमः विश्वे देवाः यासु ऊर्जं मदंति वैश्वानरः यासु अग्निः प्रऽविष्टः ताः आपः देवीः इह मां अवंतु॥४॥१६॥

॥५०॥ आ मां मित्रावरुणा इह रक्षतं कुलाययंत् विऽश्वयंत् मा नः आ गन् अजकाऽवं दुःऽदृशीकं तिरः दधे मा मां पद्येन रपसा विदत् त्सरुः॥१॥ यत् विऽजामंन् परुषि वंदनं भुवंत् अष्ठीवंतौ परि कुल्फौ च देहत् अग्निः तत् शोचन् अप बाधतां इतः मा मां पद्येन रपसा विदत् त्सरुः॥२॥ यत् शल्मलौ भवंति यत्

दीषु यदोषधीभ्यः परि जायते विषं। विश्वे देवा निरितस्तत्सुवंतु मा मां पद्येन रपसा विदज्जरूः ॥३॥ याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः। ता अस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवंतु सर्वा नद्यो अशिमिदा भवंतु ॥४॥१७॥

॥ ५१ ॥ १–३ वसिष्ठः ॥ आदित्याः ॥ त्रिष्टुप् ॥

॥५१॥ आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शंतमेन। अनागास्त्वे अदितित्वे तुरासं इमं यज्ञं दधतु श्रोषमाणाः ॥१॥ आदित्यासो अदितिमादयंतां मित्रो अर्यमा वरुणो रजिष्ठाः। अस्माकं संतु भुवनस्य गोपाः पिबंतु सोममवसे नो अद्य ॥२॥ आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्वं ऋभवश्च विश्वे। इंद्रो अग्निरश्विना तुष्टुवाना यूयं पात स्वस्तिभिः सदा नः ॥३॥१८॥

॥ ५२ ॥ १–३ वसिष्ठः ॥ आदित्याः ॥ त्रिष्टुप् ॥

॥५२॥ आदित्यासो अदितयः स्याम पूर्देवत्रा वसवो मर्त्यत्रा। सनेम मित्रावरुणा सनंतो भवेम द्यावापृथिवी भवंतः ॥१॥ मित्रस्तन्नो वरुणो मामहंत शर्म तोकाय तनयाय गोपाः। मा वो भुजेमान्यजातमेनो मा तत्कर्म वसवो यच्चयध्वे ॥२॥ तुरण्यवोऽङ्गिरसो नक्षंत रत्नं देवस्य सवितुरियानाः। पिता च तन्नो महान्यजत्रो विश्वे देवाः समनसो जुषंत ॥३॥१९॥

॥ ५३ ॥ १–३ वसिष्ठः ॥ द्यावापृथिव्यौ ॥ त्रिष्टुप् ॥

॥५३॥ प्र द्यावा यज्ञैः पृथिवी नमोभिः स्वाधं ईळे बृहती यजत्रे। ते चिद्धि पूर्वे कवयो गृणंतः पुरो मही दधिरे

नदीषु यत् ओषधीभ्यः परि जायते विषं विश्वे देवाः निः इतः तत् सुवंतु मा मां पद्येन रपसा विदत् सरुः ॥३॥ याः प्रऽवतः निऽवतः उतऽवतः उदन्ऽवतीः अनुदकाः च याः ताः अस्मभ्यं पयसा पिन्वमानाः शिवाः देवीः अशिपदाः भवंतु सर्वाः नद्यः अशिमिदाः भवंतु ॥४॥१७॥

॥५१॥ आदित्यानां अवसा नूतनेन सक्षीमहि शर्मणा शंऽतमेन अनागाःऽत्वे अदितिऽत्वे तुरासः इमं यज्ञं दधतु श्रोषमाणाः ॥१॥ आदित्यासः अदितिः मादयंतां मित्रः अर्यमा वरुणः रजिष्ठाः अस्माकं संतु भुवनस्य गोपाः पिबंतु सोमं अवसे नः अद्य ॥२॥ आदित्याः विश्वे मरुतः च विश्वे देवाः च विश्वे ऋभवः च विश्वे इंद्रः अग्निः अश्विना तुस्तुवानाः यूयं पात स्वस्तिऽभिः सदा नः ॥३॥१८॥

॥५२॥ आदित्यासः अदितयः स्याम पूः देवऽत्रा वसवः मर्त्यऽत्रा सनेम मित्रावरुणा सनंतः भवेम द्यावापृथिवी भवंतः ॥१॥ मित्रः तत् नः वरुणः ममहंत शर्म तोकाय तनयाय गोपाः मा वः भुजेम अन्यऽजातं एनः मा तत् कर्म वसवः यत् चयध्वे ॥२॥ तुरण्यवः अंगिरसः नक्षंत रत्नं देवस्य सवितुः इयानाः पिता च तत् नः महान् यजंचः विश्वे देवाः सऽमनसः जुषंत ॥३॥१९॥

॥५३॥ प्र द्यावा यज्ञैः पृथिवी नमःऽभिः सऽबाधः ईळे बृहती यजंचे ते चित् हि पूर्वे कवयः गृणंतः पुरः महीं दधिरे

देवपुत्रे ॥१॥ प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुध्वं सदने ऋतस्य। आ नो द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथं ॥२॥ उतो हि वां रत्नधेयानि संति पुरूणि द्यावापृथिवी सुदासे। अस्मे धत्तं यदसदस्कृधोयु यूयं पात स्वस्तिभिः सदा नः ॥३॥२०॥

॥ ५४ ॥ १–३ वसिष्ठः ॥ वास्तोष्पतिः ॥ त्रिष्टुप् ॥

॥५४॥ वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥१॥ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिंदो। अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥२॥ वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या। पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥३॥२१॥

॥ ५५ ॥ १–८ वसिष्ठः ॥ १ वास्तोष्पतिः । २–८ इंद्रः ॥ १ गायत्री । २–४ उपरिष्टाद्बृहती । ५–८ अनुष्टुप् ॥

॥५५॥ अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्। सखा सुशेव एधि नः ॥१॥ यदर्जुन सारमेय दतः पिशंग यच्छसे। वीव भ्राजंत ऋष्टय उप स्रक्वेषु वप्सतो नि षु स्वप ॥२॥ स्तेनं राय सारमेय तस्करं वा पुनःसर। स्तोतृनिंद्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥३॥ त्वं सूकरस्य दर्दृहि तवं दर्दर्तु सूकरः। स्तोतृनिंद्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥४॥ सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः। ससंतु सर्वे ज्ञातयः सस्वयमभितो जनः ॥५॥ य आस्ते यश्च चरति यश्च पश्यति नो जनः। तेषां सं हंम्मो अक्षाणि यथेदं हर्म्यं तथा ॥६॥ सहस्रशृंगो वृषभो यः समुद्रादुदाचरत्।

देवऽपुंचे० ॥१॥ प्र पूर्वऽजे० पितरा नव्यसीभिः गीःऽभिः कृणुध्वं सदने ऋतस्य आ नः द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथं ॥२॥ उतो हि वां रत्नऽधेयानि संति पुरूणि द्यावापृथिवी सुऽदासे अस्मे धत्तं यत् असत् अस्कृधोयु यूयं पात स्वस्तिऽभिः सदा नः ॥३॥२०॥

॥५४॥ वास्तोः पते प्रति जानीहि अस्मान् सुऽआवेशः अनमीवः भव नः यत् त्वा ईमहे प्रति तत् नः जुषस्व शं नः भव द्विऽपदे शं चतुःऽपदे ॥१॥ वास्तोः पते प्रऽतरणः नः एधि गयऽस्फानः गोभिः अश्वेभिः इंदो अजरासः ते सख्ये स्याम पिताऽइव पुचान् प्रति नः जुषस्व ॥२॥ वास्तोः पते शग्मया संऽसदा ते सक्षीमहि रण्वया गातुऽमत्या पाहि क्षेमे उत योगे वरं नः यूयं पात स्वस्तिऽभिः सदा नः ॥३॥२१॥

॥५५॥ अमीवऽहा वास्तोः पते विश्वा रूपाणि आऽविशन् सखा सुऽशेवः एधि नः ॥१॥ यत् अर्जुन सारमेय दतः पिशंग यच्छसे विऽइव भाजंते ऋष्टयः उप स्रक्वेषु वष्सतः नि सु स्वप ॥२॥ स्तेनं राय सारमेय तस्करं वा पुनःऽसर स्तोतॄन् इंद्रस्य रायसि किं अस्मान् दुच्छुनऽयसे नि सु स्वप ॥३॥ त्वं कुरस्य दुर्हिहि तवं दुर्दर्तु सूकरः स्तोतॄन् इंद्रस्य रायसि किं अस्मान् दुच्छुनऽयसे नि सु स्वप ॥४॥ सस्तु माता सस्तु पिता सस्तु श्वा वृश्निः विश्पतिः ससंतु सर्वे ज्ञातयः सस्तु अयं अभितः जनः ॥५॥ यः आस्ते यः चरति यः च पश्यति नः जनः तेषां संहन्मः अक्षाणि यथा इदं हर्म्यं तथा ॥६॥ सहस्रऽशृंगः वृषभः यः [illegible] उत्ऽआरत

तेना सहस्रेणा वयं नि जनान्स्वापयामसि ॥ ७ ॥ प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः । स्त्रियो याः पुण्यगंधास्ताः सर्वाः स्वापयामसि ॥ ८ ॥ २२ ॥ ३ ॥

॥ ५६ ॥ १–२५ वसिष्ठः ॥ मरुतः ॥ १–११ द्विपदा । १२–२५ त्रिष्टुप् ॥

॥ ५६ ॥ क ईं व्यक्ता नरः सनीळा रुद्रस्य मर्या अधा स्वश्वाः ॥ १ ॥ नकिर्येषां जनूंषि वेद ते अंग विद्रे मिथो जनित्वं ॥ २ ॥ अभि स्वपूभिर्मिथो वपंत वातस्वनसः श्येना अस्पृध्रन् ॥ ३ ॥ एतानि धीरो निण्या चिकेत पृश्निर्यदूधो मही जभार ॥ ४ ॥ सा विट् सुवीरा मरुद्भिरस्तु सनात्सहंती पुष्यंती नृम्णं ॥ ५ ॥ यामं येष्ठाः शुभा शोभिष्ठाः श्रिया संमिश्ला ओजोभिरुग्राः ॥ ६ ॥ उग्रं व ओजः स्थिरा शवांस्यधा मरुद्भिर्गणस्तुविष्मान् ॥ ७ ॥ शुभो वः शुष्मः क्रुधमी मनांसि धुनिर्मुनिरिव शर्धस्य धृष्णोः ॥ ८ ॥ सनेम्यस्मद्युयोत द्विषं मा वो दुर्मतिरिह प्रणंङ्नः ॥ ९ ॥ प्रिया वो नाम हुवे तुराणामा यत्तृपन्मरुतो वावशानाः ॥ १० ॥ २३ ॥ स्वायुधास इष्मिणः सुनिष्का उत स्वयं तन्वः शुंभमानाः ॥ ११ ॥ शुचीं वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः । ऋतेन सत्यमृतसाप आयञ्छुचिजन्मानः शुचयः पावकाः ॥ १२ ॥ अंसेष्वा मरुतः खादयो वो वक्षःसु रुक्मा उपशिश्रियाणाः । वि विद्युतो न वृष्टिभी रुचाना अनु स्वधामायुधैर्यच्छमानाः ॥ १३ ॥ प्र वुभ्रयो व ईरते महांसि प्र नामानि प्रयज्यवस्तिरध्वं । सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वं ॥ १४ ॥ यदि स्तुतस्य मरुतो अधीथेत्था विप्रस्य वाजिनो हवीमन् । मक्षू रायः सुवीर्यस्य दात नू चिद्यमन्य आदभद्-

तेन सहस्रेण वयं नि जनान् स्वापयामसि ॥७॥ प्रोष्ठेऽशयाः वह्येऽशयाः नारीः याः तल्पेऽशीवरीः स्त्रियः याः पुण्यगंधाः ताः सर्वाः स्वापयामसि ॥८॥२२॥३॥

॥५६॥ के इं विऽअक्ताः नरः सऽनीळाः रुद्रस्य मर्याः अध सुऽअश्वाः ॥१॥ नकिः हि एषां जनूंषि वेद ते अंग विद्रे मिथः जनित्वं ॥२॥ अभि स्वऽपूभिः मिथः वपंत वातेऽस्वनसः श्येनाः अस्पृध्रन् ॥३॥ एतानि धीरः निण्या चिकेत पृश्निः यत् ऊधः महीं जभार ॥४॥ सा विट् सुऽवीरा मरुत्ऽभिः अस्तु सनात् सहंती पुष्यंती नृम्णं ॥५॥ यामं येष्ठाः शुभा शोभिष्ठाः श्रिया संऽमिष्ठाः ओजःऽभिः उग्राः ॥६॥ उग्रं वः ओजः स्थिरा शवांसि अध मरुत्ऽभिः गणः तुविष्मान् ॥७॥ शुभ्रः वः शुष्मः क्रुधमी मनांसि धुनिः मुनिःऽइव शर्धस्य धृष्णोः ॥८॥ सनेमि अस्मत् युयोत द्विषं मा वः दुःऽमतिः इह प्रणक् नः ॥९॥ प्रिया वः नाम हुवे तुराणां आ यत् तृपत् मरुतः वावशानाः ॥१०॥२३॥ सुऽआयुधासः दुष्मिणः सुऽनिष्काः उत स्वयं तन्वः शुंभमानाः ॥११॥ शुचीं वः हव्या मरुतः शुचीनां शुचिं हिनोमि अध्वरं शुचिऽभ्यः ऋतेन सत्यं ऋतऽसापः आयन् शुचिऽजन्मानः शुचयः पावकाः ॥१२॥ अंसेषु आ मरुतः खादयः वः वक्षःऽसु रुक्माः उपऽशिश्रियाणाः वि विऽद्युतः न वृष्टिऽभिः रुचानाः अनु स्वधां आयुधैः यच्छमानाः ॥१३॥ प्र वः भ्रियंते महांसि प्र नामानि मरुतः जुषध्वं ॥१४॥ यदिं स्तुतस्य मरुतः अधिऽइथ इत्था विप्रस्य वाजिनः हवींमन् मधु रायः सुऽवीर्यस्य दात नु चित् यं अन्यः आऽदभत्

रांवा ॥१५॥२४॥ अत्यासो न ये मरुतः स्वंचो यक्षदृशो न शुभयंत मर्याः। ते ह्मर्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीळिनः पयोधाः ॥१६॥ दृशस्यंतो नो मरुतो मृळंतु वरिवस्यंतो रोदसी सुमेकें। आरे गोहा नृहा वधो वो अस्तु सुम्नेभिरस्मे वसवो नमध्वं ॥१७॥ आ वो होता जोहवीति सत्तः सुचार्चीं रातिं मरुतो गृणानः। य ईवतो वृषणो अस्ति गोपाः सो अद्वयावी हवते व उक्थैः ॥१८॥ इमे तुरं मरुतो रामयंतीमे सहुः सहस आ नमंति। इमे शंसं वनुष्यतो नि पांति गुरु द्वेषो अरंरुषे दधंति ॥१९॥ इमे रधं चिन्मरुतो जुनंति भृमिं चिद्यथा वसवो जुषंत। अप वाधध्वं वृषणस्तमांसि धत्त विश्वं तनयं तोकमस्मे ॥२०॥२५॥ मा वो दात्रान्मरुतो निरराम मा पश्चाद्घ्म रथ्यो विभागे। आ नः स्पार्हे भजतना वसव्ये यदीं सुजातं वृषणो वो अस्ति ॥२१॥ सं यद्यनंत मन्युभिर्जनासः शूरा यह्वीष्वोषधीषु विक्षु। अध स्मा नो मरुतो रुद्रियासस्त्रातारो भूत पृतनास्वर्यैः ॥२२॥ भूरिं चक्र मरुतः पित्र्याण्युक्थानि या वः शस्यंते पुरा चित्। मरुद्भिरुग्रः पृतनासु साळ्हा मरुद्भिरित्सनिता वाजमर्वा ॥२३॥ अस्मे वीरो मरुतः शुष्म्यस्तु जनानां यो असुरो विधर्ता। अपो येन सुक्षितये तरेम धु स्वमोकों अभि वः स्याम ॥२४॥ तन्न इंद्रो वरुणो मित्रो अग्निरापः ओषधीर्वनिनो जुषंत। शर्मन्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥२५॥२६॥

॥ ५७ ॥ १–७ वसिष्ठः ॥ मरुतः ॥ त्रिष्टुप् ॥

॥५७॥ मध्वो वो नाम मारुतं यजत्राः प्र यज्ञेषु शवसा मदंति। ये रेजयंति रोदसी चिदुर्वी पिन्वंत्युत्सं यदयासुरुग्राः

अरावा॥१५॥२४॥ अत्यासः न ये मरुतः सुऽअंचः यक्षऽइशः न शुभयंत मयीः ते ह्म्येऽस्थाः शिशवः न शुभ्राः वत्सासः न प्रऽक्रीळिनः पयःऽधाः॥१६॥ दृगस्यंतः नः मरुतः मृळंतु वरिवस्यंतः रोदसी सुऽमेके॰ आरे गोऽहा नृऽहा वधः वः अस्तु सुम्नेभिः अस्मे वसवः नमध्वं॥१७॥ आ वः होता जोहवीति सत्तः सचाचीं रातिं मरुतः गृणानः यः ईवंतः वृषणः अस्ति गोपाः सः अद्वयावी हवते वः उक्थैः॥१८॥ इमे तुरं मरुतः रमयंति इमे सहः सहसः आ नमंति इमे शंसं वनुष्यतः नि पांति गुरु द्वेषः अरंरुषे दधंति॥१९॥ इमे रुद्रं चित् मरुतः जुनंति भूमिं चित् यथा वसवः जुषंत अप बाधध्वं वृषणः तमांसि धत्त विश्वं तनयं तोकं अस्मे॥२०॥२५॥ मा वः दात्रात् मरुतः निः अरात मा पश्चात् दघ्म रथ्यः विऽभागे आ नः स्पार्हे भजतन वसव्ये यत् ईं सुऽजातं वृषणः वः अस्ति॥२१॥ सं यत् हनंत मन्युऽभिः जनासः शूराः यह्वीषु ओषधीषु विक्षु अध स्म नः मरुतः रुद्रियासः चातारः भूत पृतनासु अर्यः॥२२॥ भूरि चक्र मरुतः पित्र्याणि उक्थानि या वः शस्यंते पुरा चित् मरुत्ऽभिः उग्रः पृतनासु साळ्हा मरुत्ऽभिः इत् सनिता वाजं अर्वा॥२३॥ अस्मे वीरः मरुतः शुष्मी अस्तु जनानां यः असुरः विऽधर्ता अपः येन सुऽक्षितये तरेम अध स्वं ओकः अभि वः स्याम॥२४॥ तत् नः इंद्रः वरुणः मित्रः अग्निः आपः ओषधीः वनिनः जुषंत शर्मन् स्याम मरुतां उपऽस्थे यूयं पात स्वस्तिऽभिः सदा नः॥२५॥२६॥

॥५७॥ मध्वः वः नाम मारुतं यजध्वं प्र यज्ञेषु शवसा मदंति ये रेजयंति रोदसी चित् उर्वी पिन्वंति उत्सं यत् अयासुः उग्राः

॥१॥ निचेतारो हि मरुतो गृणंतं प्रणेतारो यजमानस्य मन्म। अस्माकमद्य विदथेषु बर्हिरा वीतये सदत पिप्रियाणाः ॥२॥ नैतावदन्ये मरुतो यथेमे भ्राजंते रुक्मैरायुधैस्तनूभिः। आ रोदसी विश्वपिशः पिशाना संमानमंज्यंजते शुभे कं ॥३॥ ऋधक्सा वो मरुतो दिद्युदस्तु यद्व आगः पुरुषता करांम। मा वस्तस्यामपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्टा ॥४॥ कृते चिदत्रं मरुतो रणंतानवद्यासः शुचयः पावकाः। प्र णोऽवत सुमतिभिर्यजत्राः प्र वाजैभिस्तिरत पुथसे नः ॥५॥ उत स्तुतासो मरुतो व्यंतु विश्वेभिर्नामभिर्नरो हवींषि। ददात नो अमृतस्य प्रजायै जिगृत रायः सूनृता मघानि ॥६॥ आ स्तुतासो मरुतो विश्व ऊती अच्छा सूरीन्त्सर्वताता जिगात। ये नस्तमना शतिनो वर्धयंति यूयं पात स्वस्तिभिः सदा नः ॥७॥२७॥

॥ ५८ ॥ १–६ पवित्रः ॥ मरुतः ॥ त्रिष्टुप् ॥

॥५८॥ प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुविष्मान्। उत क्षोदंति रोदसी महित्वा नक्षंते नाकं निर्ऋतेरवंशात् ॥१॥ जनूष्यंधो मरुतस्त्वेष्येण भीमासस्तुविमन्यवोऽयासः। प्र ये महोभिरोजसोत संति विश्वो वो यामन्भयते स्वर्दृक् ॥२॥ बृहद्वयो मघवद्भ्यो दधात जुजोषन्निन्मरुतः सुष्टुतिं नः। गतो नाध्वा वि तिरांति जंतुं प्र णः स्पार्हाभिरूतिभिस्तिरेत ॥३॥ युष्मोतो विप्रो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्री। युष्मोतः सम्राळुत हंति वृत्रं प्र तद्वो अस्तु धूतयो देष्णं ॥४॥ तॉं आ रुद्रस्य मीळ्हुषो विवासे कुविच्छंसंते मरुतः पुनर्नः। यत्सस्वतो जिहीळिरे

॥१॥ निऽचेतारः हि मरुतः गृणंतं प्रऽनेतारः यजमानस्य मन्म अस्माकं अद्य विदथेषु बर्हिः आ वीतये सदत पिप्रियाणाः॥२॥ न एतावत् अन्ये मरुतः यथा ऽमे भ्राजंते रुक्मैः आयुधैः तनूभिः आ रोदसी विश्वऽपिशः पिशानाः समानं अंजि अंजते शुभे कं ॥३॥ ऋधक् सा वः मरुतः दिद्युत् अस्तु यत् वः आगः पुरुषता करांम मा वः तस्यां अपि भूम यजत्राः अस्मे वः अस्तु सुऽमतिः चनिष्ठा ॥४॥ कृते चित् अत्र मरुतः रणंत अनवद्यासः शुचयः पावकाः प्र नः अवत सुमतिऽभिः यजत्राः प्र वाजेभिः तिरत पुष्यसे नः॥५॥ उत स्तुतासः मरुतः व्यंतु विश्वेभिः नामऽभिः नरः हवींषि ददत नः अमृतस्य प्रऽजायै जिगृत रायः सूनृता मघानि॥६॥ आ स्तुतासः मरुतः विश्वे ऊती अच्छ सूरीन् सर्वऽतातां जिगात ये नः त्मना शतिनः वर्धयंति यूयं पात स्वस्तिऽभिः सदा नः ॥७॥२७॥

॥ ५८ ॥ प्र साकंऽउक्षे अर्चत गणाय यः दैव्यस्य धाम्नः तुविऽष्मान् उत क्षोदंति रोदसी महिऽत्वा नक्षंते नाकं निःऽऋतेः अवंशात्॥१॥ जनूः चित् वः मरुतः त्वेषेण भीमासः तुविऽमन्यवः अयासः प्र ये महःऽभिः ओजसा उत संति विश्वः वः यामन् भयते स्वः ऽदृक्॥२॥ बृहत् वयः मघवत्ऽभ्यः दधात जुजोषन् इत् मरुतः सुऽस्तुतिं नः गतः न अध्वा वि तिराति जंतुं प्र नः स्पार्हाभिः ऊतिऽभिः तिरत ॥३॥ युष्माऽऊंतः विप्रः मरुतः शतस्वी युष्माऽऊंतः अर्वा सहुरिः सहस्री युष्माऽऊंतः संऽराट् उत हंति वृचं प्र तत् वः अस्तु धूतयः देष्णं॥४॥ तान् आ रुद्रस्य मीळ्हुषः विवासे कुवित् नंसंते मरुतः पुनः नः यत् सस्वर्तो जिहीळिरे

यदाविरव तदेनं ईमहे तुराणां ॥५॥ प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषंत । आराच्चिद्वेषो वृषणो युयोत यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥ २८ ॥

॥ ५९ ॥ १–१२ वसिष्ठः ॥ १–११ मरुतः । १२ रुद्रः ॥ १. ३. ५ बृहती । २. ४. ६ सतोबृहती । ७. ८ त्रिष्टुप् । ९–११ गायत्री । १२ अनुष्टुप् ॥

॥ ५९ ॥ यं चार्यध्व इदमिदं देवासो यं च नयथ । तस्मा अग्ने वरुण मित्रार्यमन्मरुतः शर्म यच्छत ॥१॥ युष्माकं देवा अवसाहनि प्रिय इजानस्तरति द्विषः । प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ॥२॥ नहि वश्चरमं चन वसिष्ठः परिमंसते । अस्माकमद्य मरुतः सुते सचा विश्वे पिबत कामिनः ॥३॥ नहि व ऊतिः पृतनासु मर्धति यस्मा अरांध्वं नरः । अभि व आवर्त्सुमतिर्नवीयसी नूयं यात पिपीषवः ॥४॥ ओ षु धृष्णिरा धसो यातनांधांसि पीतये । इमा वो हव्या मरुतो रेरिहा कं मो षु न्यन्य गंतन ॥५॥ आ च नो बर्हिः सदतावितां च नः स्याहाणि दातवे वसु । असेधंतो मरुतः सोम्ये मधौ स्वाहेह मादयाध्वै ॥६॥ २९ ॥ सुस्वधिङि तन्वः शुंभमाना आ हंसासो नीलपृष्ठा अपप्तन् । विश्वं शर्धो अभितो मा नि षेद् नरो न रथाः सवने मदंतः ॥७॥ यो नो मरुतो अभि दुर्हणायुस्तिरश्चित्तानि वसवो जिघांसति । द्रुहः पाशान्प्रति स मुंचीष्ट तमिष्टेन हन्मना हंतना तं ॥८॥ सांतपना इदं हविर्मरुतस्तज्जुषध्वं । युष्माकोती रिशादसः ॥९॥ गृहमेधास आ गत मरुतो मापभूतन । युष्माकोती सुदानवः ॥१०॥ इहेह वः स्वतवसः कवयः सूर्यत्वचः । यज्ञं मरुत आ वृणे ॥११॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं । उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥१२॥ ३०॥ ४॥

यत् आविः अवं तत् एनः ईमहे तुराणाम् ॥५॥ प्र सा वाचि सुऽस्तुतिः मघोनाम् इदं सुऽउक्तं मरुतः जुषंत आरात् चित् द्वेषः वृषणः युयोत यूयं पात स्वस्तिऽभिः सदा नः ॥६॥२८॥

॥५९॥ यं चार्यध्वे इदंऽइदं देवासः यं च नयथ तस्मै अग्ने वरुण मित्र अर्यमन् मरुतः शर्म यच्छत ॥१॥ युष्माकंदेवाः अवसा अहंनि प्रिये ईजानः तरति द्विषः प्रसः क्षयं तिरते वि महीः इषः यः वः वराय दाशति ॥२॥ नहि वः चरमं चन वसिष्ठः परिऽमंसते अस्माकं अद्य मरुतः सुते सचा विश्वे पिबत कामिनः ॥३॥ नहि वः ऊतिः पृतनासु मर्धति यस्मै अरांध्वं नरः अभि वः आ अवर्त सुऽमतिः नवीयसी तूयं यात पिपीषवः ॥४॥ ओ सु घृष्विऽराधसः यातन अंधांसि पीतये इमा वः हव्या मरुतः रेरहि कं मो सु अन्यत्र गंतन ॥५॥ आ च नः बर्हिः सदत अवित च नः स्याहाणि दातवे वसु असेधंतः मरुतः सोम्ये मधौ स्वाहा दृह मादयाध्वै ॥६॥२९॥ सस्वः चित् हि तन्वः शुंभमानाः आ हंसासः नीलऽपृष्ठाः अपप्रन् विश्वं शर्धः अभितः मा नि सेदुः नरः न रथ्याः सर्वने मदंतः ॥७॥ यः नः मरुतः अभि दुःऽहणायुः तिरः चित्तानि वसवः जिघांसति दृहः पाशान् प्रति सः मुचीष्ट तपिष्ठेन हन्मना हंतन तं ॥८॥ सांऽतपनाः इदं हविः मरुतः तत् जुजुष्टन युष्माकं ऊती रिणादसः ॥९॥ गृहंऽमेधासः आ गत मरुतः मा अप भूतन युष्माकं ऊती सुऽदानवः ॥१०॥ इहऽइह वः स्वऽतवसः कवयः सूयंऽतवचः यज्ञं मरुतः आ वृणे ॥११॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥१२॥३०॥४॥

॥ ६० ॥ १–१२ वसिष्ठः ॥ १ सूर्यः । २–१२ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥ ६० ॥ यद॒द्य सूर्य॒ ब्रवो॒ऽनागा॒ उद्यन्मि॒त्राय॒ वरु॑णाय स॒त्यं। व॒यं दे॑व॒त्रादि॑ते स्याम॒ तव॑ प्रि॒यासो॑ अर्यमन्गृ॒णंतः॑ ॥ १ ॥ ए॒ष स्य मि॑त्रावरुणा नृ॒चक्षा॒ उभे उदे॑ति॒ सूर्यो॑ अ॒भि ज्मन्। विश्व॑स्य स्था॒तुर्ज॑गतश्च गो॒पा ऋ॒जु मर्ते॑षु वृजि॒ना च॒ पश्य॑न् ॥ २ ॥ अयु॑क्त स॒प्त हरि॑तः स॒धस्था॒द्या द्यु॒भिर्वह॑ति॒ सूर्यं॑ घृ॒ताचीः॑। धा॒मानि॑ मित्रावरुणा यु॒वाकुः॑ सं यो यू॒थेव॑ ज॒निमा॑नि॒ चष्टे॑ ॥ ३ ॥ उद्यौ पृ॒क्षासो॒ मधु॑मंतो अस्थुरा॒ सूर्यं॑ रुरुहच्छु॒क्रमर्णः॑। यस्मा॑ आदि॒त्या अध्व॑नो॒ रदं॑ति मि॒त्रो अ॑र्य॒मा वरु॑णः स॒जोषाः॑ ॥ ४ ॥ इ॒मे चे॒तारो॒ अनृ॑तस्य॒ भूरे॑र्मि॒त्रो अ॑र्य॒मा वरु॑णो॒ हि संति॑। इ॒म ऋ॒तस्य॑ वावृधु॒र्दुरो॑णे शु॒ग्मासः॑ पु॒त्रा अदि॑तेरदब्धाः ॥ ५ ॥ इ॒मे मि॒त्रो वरु॑णो दू॒ळभा॑सो॒ऽचेत॑सं चिच्चितयंति॒ दक्षैः॑। अपि॒ क्रतुं॑ सु॒चेत॑सं॒ वत॑ंतस्ति॒रश्चि॒द्दंहैः॑ सु॒पथा॑ नयंति ॥ ६ ॥ १ ॥ इ॒मे दि॒वो नि॑मिषा पृथि॒व्याश्चि॑कि॒त्वांसो॒ अचे॑तसं नयंति। प्र॒व्राजे॑ चिन्न॒द्यो॑ गा॒धम॑स्ति पा॒रं नो॑ अस्य विष्पि॒तस्य॑ पर्षन् ॥ ७ ॥ यन्नो॑पाव॒ददि॑तिः शर्म॑ भ॒द्रं मि॒त्रो यच्छं॑ति॒ वरु॑णः सु॒दासे॑। त॒स्मिन्ना तो॒कं तन॑यं दधा॒ना मा कर्म॑ देव॒हेळ॑नं तुरासः ॥ ८ ॥ अव॒ वेदिं॑ होत्रा॒भिर्य॑जेत॒ रिपः॑ काश्चिद्वरुण॒ध्रुतः॒ सः। परि॒ द्वेषो॑भिर्य॒मा वृ॑णक्तूरुं सु॒दासे॑ वृ॒षणा॒ उ लो॒कं ॥ ९ ॥ स॒स्वश्चि॒दत्र॑ स॒मृति॑स्त्वे॒षयो॑रपी॒च्येन॒ सह॑सा॒ सहं॑ते। यु॒ष्मद्भि॑या वृ॒षणो॒ रेज॑माना॒ दक्ष॑स्य चिन्महि॒ना मृ॑ळता नः ॥ १० ॥ यो ब्रह्म॑णे सुम॒तिमा॒यजा॑ते॒ वाज॑स्य सा॒तौ प॑र॒मस्य॑ रा॒यः। सीष॑ंत म॒न्युं म॒घवा॑नो॒ अर्य॑ उरु॒ क्षया॑य चक्रिरे सु॒धातु॑ ॥ ११ ॥ इ॒यं दे॑व पु॒रोहि॑तिर्यु॒वभ्यां॑ य॒ज्ञेषु॑ मित्रावरुणावकारि।

॥६०॥ यत् अद्य सूर्य व्रवः अनागाः उत् उ अयन् मित्राय वरुणाय सत्यं वयं देवऽचा अदितेः स्याम तव प्रियासः अर्यमन् गृणंतः॥१॥ एषः स्यः मित्रावरुणा नृऽचक्षाः उभे उत् एति सूर्यः अभि ज्मन् विश्वस्य स्थातुः जगतः च गोपाः ऋजु मर्तेषु वृजिना च पश्यन्॥२॥ अयुक्त सप्त हरितः सधऽस्थात् याः द्यां वहंति सूर्यं घृताचीः धामानि मित्रावरुणा युवाकुः सं यः यूथाऽइव जनिमानि चष्टे॥३॥ उत् वां पृक्षासः मधुऽमंतः अस्थुः आ सूर्यः अरुहत् शुक्रं अर्णः यस्मै आदित्याः अध्वनः रदंति मित्रः अर्यमा वरुणः सुऽजोषाः॥४॥ इमे चेतारः अनृतस्य भूरेः मित्रः अर्यमा वरुणः हि संति इमे ऋतस्य ववृधुः दुरोणे शग्मासः पुत्राः अदितेः अदब्धाः॥५॥ इमे मित्रः वरुणः दुःऽदभासः अचेतसं चित् चित्तयंति दक्षैः अपि क्रतुं सुऽचेतसं वतंतः तिरः चित् अंहः सुऽपथा नयंति॥६॥१॥ इमे दिवः अनिंऽमिषा पृथिव्याः चिकित्वांसः अचेतसं नयंति प्रऽवाजे चित् नद्यः गाधं अस्ति पारं नः अस्य विप्पितस्य पर्षन्॥७॥ यत् गोपावत् अदितिः शर्म भद्रं मित्रः यच्छंति वरुणः सुऽदासे तस्मिन् आ तोकं तनयं दधानाः मा कर्म देवऽहेळनं तुरासः॥८॥ अव वेदिं होत्राभिः यजेत रिपः काः चित् वरुणऽधृतः सः परि द्वेषःऽभिः अर्यमा वृणक्तु उरुं सुऽदासे वृषणौ उ लोकं॥९॥ सुऽअवः चित् हि संऽकृतिः त्वेषी एषां अपीच्येन सहसा सहंते युष्मत् भिया वृषणः रेजमानाः दक्षस्य चित् महिना मृळत नः॥१०॥ यः ब्रह्मणे सुऽमतिं आऽयजाते वाजस्य सातौ परमस्य रायः सः ईक्षंत मन्युं मघऽवानः अर्यः उरु क्षयाय चक्रिरे सुऽधातु॥११॥ इयं देवा पुरःऽहितिः युवऽभ्यां यज्ञेषु मित्रावरुणौ अकारि

विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥१२॥२॥

॥ ६१ ॥ १–७ वसिष्ठः ॥ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥६१॥ उद्वां चक्षुर्वरुण सुप्रतीकं देवयोरेति सूर्यस्तत॰न्वान्। अभि यो विश्वा भुवनानि चष्टे स मन्युं मर्त्येष्वा चिकेत ॥१॥ प्र वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति। यस्य ब्रह्माणि सुक्रतू अवाथ आ यत्कृत्वा न शरदः पृणैथे ॥२॥ प्रो-रोर्मित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद्बृहतः सुदानू। स्पशो दधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणा ॥३॥ शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बह्वे महित्वा। अयन्मासा अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते ॥४॥ अमूरा विश्वा वृषणाविमा वां न यासु चित्रं ददृशे न यक्षं। दृहः सचन्ते अनृता जनानां न वां निण्यान्यचितें अभूवन् ॥५॥ समु वां यज्ञं महयं नमोभिर्हुवे वां मित्रावरुणा सुवाधः। प्र वां मन्मान्यृचसे नवानि कृतानि ब्रह्म जुजुषन्निमानि ॥६॥ इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि। विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥७॥३॥

॥ ६२ ॥ १–६ वसिष्ठः ॥ १–३ सूर्यः । ४–६ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥६२॥ उत्सूर्यो बृहदुचीर्यश्रेत्पुरु विश्वा जनिम मानुषाणां। समो दिवा ददृशे रोचमानः क्रत्वा कृतः सुकृतः कर्तृभिर्भूत् ॥१॥ स सूर्य प्रति पुरो न उद्या एभिः स्तोमेभिरेतशे-भिरेवैः। प्र नो मित्राय वरुणाय वोचोऽनागसो अर्यम्णे अग्नये च ॥२॥ वि नः सहस्रं शुरुधो रदन्वृताचानो वरुणो मित्रो

विश्वानि दुःऽगा पिपृतं तिरः नः यूयं पात स्वस्तिऽभिः सदा नः ॥ १२ ॥ २ ॥

॥ ६१ ॥ उत् वां चक्षुः वरुण सुऽप्रतीकं देवयोः एति सूर्यः तन्वान् अभि यः विश्वा भुवनानि चष्टे सः मन्युं मर्त्येषु आ चिकेत ॥ १ ॥ प्र वां सः मित्रावरुणौ ऋतऽवा विप्रः मन्मानि दीर्घऽश्रुत् इयर्ति यस्य ब्रह्माणि सुऽक्रतू० अवाथः आ यत् क्रत्वा न शरदः पृणैथे ॥ २ ॥ प्र उरोः मित्रावरुणा पृथिव्याः प्र दिवः ऋष्वात् बृहतः सुऽदानू० स्यर्शः दधाथे ओषधीषु विक्षु ऋधक् यतः अनिऽमिषं रक्षमाणा ॥ ३ ॥ शंसं मित्रस्य वरुणस्य धाम शुष्मः रोदसी वर्धथे महिऽत्वा अयन् मासः अयज्वनां अवीराः प्र यज्ञऽमन्मा वृजनैः तिराते ॥ ४ ॥ अमूरा विश्वा वृषणौ इमाः वां न यासु चित्रं ददृशे न यक्षं दुहः सचन्ते अनृता जनानां न वां निण्यानि अचितै अभूवन् ॥ ५ ॥ सं ऊं वां यज्ञं महयं नमःऽभिः हुवे वां मित्रावरुणा सुऽवार्धः प्र वां मन्मानि ऋचसे नवानि कृतानि ब्रह्म जुजुषन् इमानि ॥ ६ ॥ इयं देवा पुरःऽहितिः युवऽभ्यां यज्ञेषु मित्रावरुणौ अकारि विश्वानि दुःऽगा पिपृतं तिरः नः यूयं पात स्वस्तिऽभिः सदा नः ॥ ७ ॥ ३ ॥

॥ ६२ ॥ उत् सूर्यः बृहत् अर्चीषि अश्रेत् पुरु विश्वा जनिमा मानुषाणां समः दिवा ददृशे रोचमानः क्रत्वा कृतः सुऽकृतः कर्तृऽभिः भूत् ॥ १ ॥ सः सूर्य प्रति पुरः नः उत् गाः एभिः स्तोमेभिः एतशेभिः एवैः प्र नः मित्राय वरुणाय वोचः अनागसः अर्यम्णे अग्नये च ॥ २ ॥ वि नः सहस्रं शुरुधः ददातु ऋतऽवानः वरुणः मित्रः

अग्निः। यच्छंतु चंद्रा उपमं नो अर्कमा नः कामं पूपुरंतु स्तवानाः ॥३॥ द्यावाभूमी अदिते चासीथां नो ये वां जज्ञुः सुजनिमान ऋष्वे। मा हेळे भूम वरुणस्य वायोर्मा मित्रस्य प्रियतमस्य नृणां॥४॥ प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन। आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा॥५॥ नू मित्रो वरुणो अर्यमा नस्मनें तोकाय वरिवो दधंतु। सुगा नो विश्वा सुपथानि संतु यूयं पात स्वस्तिभिः सदा नः ॥६॥४॥

॥ ६३ ॥ १–६ वसिष्ठः ॥ १–५ सूर्यः । ५, ६ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥६३॥ उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणां। चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेव यः समविव्यक्तमांसि॥१॥ उद्वेति प्रसवीता जनानां महान्केतुरर्णवः सूर्यस्य। समानं चक्रं पर्यावृवृत्सन्यदेतशो वहंति धूर्षु युक्तः॥२॥ विभ्राजमान उपसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः। एष मे देवः सविता चचंछंद यः समानं न प्रमिनाति धामं॥३॥ दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः। नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि ॥४॥ यन्मा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः। प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः ॥५॥ नू मित्रो वरुणो अर्यमा नस्मनें तोकाय वरिवो दधंतु। सुगा नो विश्वा सुपथानि संतु यूयं पात स्वस्तिभिः सदा नः ॥६॥५॥

॥ ६४ ॥ १–५ वसिष्ठः ॥ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥६४॥ दिवि क्षयंता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो

अग्निः यच्छंतु चंद्राः उप ऽमं नः अर्कं आ नः कामं पूपुरंतु स्तवानाः॥३॥ द्यावाभूमी अदिते त्रासीथां नः ये वां जज्ञुः सुऽजनिमानः ऋभ्वे मा हेळे भूम वरुणस्य वायोः मा मित्रस्य प्रियऽतमस्य नृणां॥४॥ प्र वाहवा सिसृतं जीवसे नः आ नः गव्यूतिं उक्षतं घृतेन आ नः जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवा इमा॥५॥ नु मित्रः वरुणः अर्यमा नः त्मने तोकाय वरिवः दधंतु सुऽगा नः विश्वा सुऽपथानि संतु यूयं पात स्वस्तिऽभिः सदा नः॥६॥४॥

॥६३॥ उत् ऊं एति सुऽभगः विश्वऽचक्षाः साधारणः सूर्यः मानुषाणां चक्षुः मित्रस्य वरुणस्य देवः चर्मेऽइव यः संऽअविव्यक्तमांसि॥१॥ उत् ऊं एति प्रऽसविता जनानां महान् केतुः अर्णवः सूर्यस्य समानं चक्रं परिऽआविवृत्सन् यत् एतशः वहंति धूःऽसु युक्तः॥२॥ विऽभ्राजमानः उषसां उपऽस्थात् रेभैः उत् एति अनुऽमद्यमानः एषः मे देवः सविता चच्छंद् यः समानं न प्रऽमिनाति धाम॥३॥ दिवः रुक्मः उरुऽचक्षाः उत् एति दूरेऽअर्थः तरणिः भ्राजमानः नूनं जनाः सूर्येण प्रऽसूताः अयन् अर्थानि कृणवन् अपांसि॥४॥ यत् चक्रुः अमृताः गातुं अस्मै श्येनः न दीयन् अनु एति पाथः प्रति वां सूरे उत्ऽइते विधेम नमःऽभिः मित्रावरुणा उत हव्यैः॥५॥ नु मित्रः वरुणः अर्यमा नः त्मने तोकाय वरिवः दधंतु सुऽगा नः विश्वा सुऽपथानि संतु यूयं पात स्वस्तिऽभिः सदा नः॥६॥५॥

॥६४॥ दिवि क्षयंता रजसः पृथिव्यां प्र वां घृतस्य निःऽनिजः

ददीरन्। हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त ॥१॥ आ राजाना महऋतस्य गोपा सिंधुपती क्षत्रिया यातमर्वाक्। इळां नो मित्रावरुणोत वृष्टिमवं दिव इन्वतं जीरदानू ॥२॥ मित्रस्तन्नो वरुणो देवो अर्यः प्र साधिष्टेभिः पथिभिर्नयंतु। अवद्यथा न आदरिः सुदासं इषा मदेम सह देवगोपाः ॥३॥ यो वां गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद्धारयच्च। उक्षेथां मित्रावरुणा घृतेन ता राजाना सुक्षितीस्तर्पयेथां ॥४॥ एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि। अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥५॥ ६॥

॥ ६५ ॥ १–५ वसिष्ठः ॥ मित्रावरुणौ ॥ त्रिष्टुप् ॥

॥ ६५ ॥ प्रति वां सूर उदिते सूक्तैर्मित्रं हुवे वरुणं पूतदक्षं। ययोरसुर्यमक्षितं ज्येष्ठं विश्वस्य यामन्नाचिता जिगन्तु ॥१॥ ता हि देवानामसुरा तावर्या ता नः क्षितीः कीरतमूर्जयंतीः। अश्याम मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्नहा च ॥२॥ ता भूरिपाशावनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय। ऋतस्य मित्रावरुणा पथा वामपो न नावा दुरिता तरेम ॥३॥ आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतमिळाभिः। प्रति वामत्र वरमा जनाय पृणीतमुद्नो दिव्यस्य चारोः ॥४॥ एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि। अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥५॥ ७॥

॥ ६६ ॥ १–१९ वसिष्ठः ॥ १–३ १७–१९ मित्रावरुणौ। ४–१३ आदित्याः। १४–१६ सूर्यः ॥ १–९. १७–१९ गायत्री। १०. १२. १४ बृहती। ११. १३ १५ सतोबृहती। १६ पुरउष्णिक् ॥

॥ ६६ ॥ प्र मित्रयोर्वरुणयोः स्तोमो न एतु शूष्यः। नमस्वा-

दुदीरन् हुव्यं नः मित्रः अर्यमा सुऽजातः राजा सुऽक्षत्रः वरुणः जुषंत॥१॥ आ राजाना महः ऋतस्य गोपा सिंधुऽपती० क्षत्रिया यातं अर्वाक् इळां नः मित्रावरुणा उत वृष्टिं अव दिवः इन्वतं जीरुऽदानू०॥२॥ मित्रः तन् नः वरुणः देवः अर्यः प्र साधिष्टेभिः पथिऽभिः नयंतु ब्रवत् यथा नः आत् अरिः सुऽदासे इषा मदेम सह देवऽगोपाः॥३॥ यः वां गतैं मनसा तक्षत् एतं ऊर्ध्वा धीतिं कृणवत् धारयत् च उक्थ्या मित्रावरुणा घृतेन ता राजाना सुऽक्षितीः तर्पयेथां॥४॥ एषः स्तोमः वरुण मित्र तुभ्यं सोमः शुक्रः न वायवे अयामि अविष्टं धियः जिगृतं पुरंऽधीः यूयं पात स्वस्तिऽभिः सदा नः॥५॥६॥

॥६५॥ प्रति वां सूरे उत्ऽइते सुऽउक्तैः मित्रं हुवे वरुणं पूतऽदक्षं ययोः असुर्यं अक्षितं ज्येष्ठं विश्वस्य यामन् आऽचितां जिगत्नु॥१॥ ता हि देवानां असुरा तौ अर्या ता नः क्षितीः कृतं ऊर्जयंतीः अश्याम मित्रावरुणा वयं वां द्यावा च यत्रं पीपयन् अहा च॥२॥ ता भूरिऽपाशौ अनृतस्य सेतूं दुःऽअत्येतूं० रिपवें मर्त्याय ऋतस्य मित्रावरुणा पथा वां अपः न नावा दुःऽइता तरेम॥३॥ आ नः मित्रावरुणा हव्यऽजुंष्टिं घृतैः गव्यूतिं उक्षतं इळाभिः प्रति वां अत्रं वरं आ जनाय पृणीतं उद्नः दिव्यस्य चारोः॥४॥ एषः स्तोमः वरुण मित्र तुभ्यं सोमः शुक्रः न वायवे अयामि अविष्टं धियः जिगृतं पुरंऽधीः यूयं पात स्वस्तिऽभिः सदा नः॥५॥७॥

॥६६॥ प्र मित्रयोः वरुणयोः स्तोमः नः एतु शूष्यः नमस्वान्

न्तुविजातयोः ॥१॥ या धारयंत देवाः सुदक्षा दक्षपितरा। असुर्याय प्रमंहसा ॥२॥ ता नः स्तिपा तनूपा वरूण जरितृणां। मित्र साधयतं धियः ॥३॥ यद्य सूर उदितेऽनागा मित्रो अर्यमा। सुवाति सविता भगः ॥४॥ सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः। ये नो अंहोऽतिपिप्रति ॥५॥८॥ उत स्वराजो अदितिरदब्धस्य व्रतस्य ये। महो राजान ईशते ॥६॥ प्रति वां सूर उदिते मित्रं गृणीषे वरूणं। अर्यमणं रिशादसं ॥७॥ राया हिरण्यया मतिरियमवृकाय शवसे। इयं विप्रा मेधसातये ॥८॥ ते स्याम देव वरूण ते मित्र सूरिभिः सह। इषं स्वश्च धीमहि ॥९॥ बहवः सूरचक्षसोऽग्निजिह्वा ऋतावृधः। वीणि ये येमुर्विदथानि धीतिभिर्विश्वानि परिभूतिभिः ॥१०॥९॥ वि ये दधुः शरदं मासमादहर्यज्ञमक्तुं चाहभिः। अनाप्यं वरूणो मित्रो अर्यमा क्षत्रं राजान आशत ॥११॥ तद्वो अद्य मनामहे सूक्तैः सूर उदिते। यदोहते वरूणो मित्रो अर्यमा यूयमृतस्य रथ्यः ॥१२॥ ऋतावान ऋतजाता ऋतावृधो घोरासो अनृतद्विषः। तेषां वः सुम्ने सुच्छर्दिष्टमे नरः स्याम ये च सूरयः ॥१३॥ उदु त्यद्दर्शतं वपुर्दिव एति प्रतिह्वरे। यदीमाप्नुर्बृहंति देव एतशो विश्वस्मै चक्षसे अरैः ॥१४॥ शीर्ष्णःशीर्ष्णो जगतस्त्स्थुषस्पतिं समया विश्वमा रजः। सप्त स्वसारः सुविताय सूर्यं वहंति हरितो रथे ॥१५॥१०॥ तच्चक्षुर्देवहितं पुरुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं ॥१६॥ काव्येभिरदाभ्या यातं वरुण द्युमत्। मित्रश्च सोमपीतये ॥१७॥ दिवो धामभिर्वरुण मित्रश्चा यातमद्रुहा। पिबतं सोममातुजा ॥१८॥ आ यातं

तुविऽजातयोः ॥१॥ या धारयंत देवाः सुऽदक्षा दक्षंऽपितरा
असुर्याय प्रऽमंहसा॥२॥ ता नः स्तिऽपा तनूऽपा वरुण जरित्रू-
णां मित्र साधयंतं धियः॥३॥ यत् अद्य सूरे उत्ऽइते अनागाः
मित्रः अर्यमा सुवाति सविता भगः॥४॥ सुप्रऽअवीः अस्तु सः
क्षयः प्र नु यामन् सुऽदानवः ये नः अंहः अतिऽपिप्रति॥५॥८॥
उत स्वऽराजः अदितिः अदब्धस्य व्रतस्य ये महः राजानः ईशते
॥६॥ प्रति वां सूरे उत्ऽइते मित्रं गृणीषे वरुणं अर्यमणं रिशादसं
॥७॥ राया हिरण्यऽया मतिः इयं अवृकाय शवसे इयं विप्रा मे-
धऽसातये॥८॥ ते स्याम देव वरुण ते मित्र सूरिऽभिः सह इषं
स्वः॰ च धीमहि॥९॥ वहवः सूरेऽचक्षसः अग्निऽजिह्वाः ऋत-
ऽवृधः चीर्णिं ये येमुः विदथानि धीतिऽभिः विश्वानि परिभूति-
ऽभिः॥१०॥९॥ वि ये दधुः शरदे मासं आत् अहः यज्ञं अक्तुं च आत्
ऋचं अनाप्यं वरुणः मित्रः अर्यमा क्षत्रं राजानः आशत॥११॥
तत् यः अद्य मनामहे सुऽउक्तिः सूरे उत्ऽइते यत् ओहते वरुणः
मित्रः अर्यमा यूयं ऋतस्य रथ्यः॥१२॥ ऋतऽवानः ऋतऽजाताः
ऋतऽवृधः घोरासः अनृतऽद्विषः तेषां वः सुम्ने सुच्छर्दिःऽतमे
नरः स्याम ये च सूरयः॥१३॥ उत ऊं त्यत् दुर्शतं वपुः दिवः एति
प्रतिऽहरे यत् ईं आप्नुः वहंति देवः एतशः विश्वस्मै चक्षसे अरं
॥१४॥ शीर्ष्णःऽशीर्ष्णः जगतः नस्पतेः पतिं समया विश्वं आ
रजः सप्त स्वसारः सुविताय सूर्यं वहंति हरितः रथे॥१५॥१०॥
तत् चक्षुः देवऽहितं शुक्रं उत्ऽचरत् पश्येम शरदः शतं जीवेम
शरदः शतं॥१६॥ काव्येभिः अदाभ्या आ यातं वरुण द्युऽमत्
मित्रः च सोमंऽपीतये॥१७॥ दिवः धामंऽभिः वरुण मित्रः
च आ यातं अदुहा पिबतं सोमं आऽतुजी॰ ॥१८॥ आ यातं

मित्रावरुणा जुषाणावाहुतिं नरा । पातं सोममृतावृधा ॥१९॥११॥

॥ ६७ ॥ १–१० वसिष्ठः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥६७॥ प्रति वां रथं नृपती जरध्यै हुविष्मता मनसा यज्ञियेन । यो वां दूतो न धिष्ण्यावजीगरच्छा सूनुर्न पितरा विवक्मि ॥१॥ अशोच्यग्निः समिधानो अस्मे उषो अदृश्रन्तमसश्चिदंताः । अचेति केतुरुषसः पुरस्ताच्छ्रुये दिवो दुहितुर्जायमानः ॥२॥ अभि वां नूनमश्विना सुहोता स्तोमैः सिषक्ति नासत्या विवक्वान् । पूर्वीभिर्यातं पथ्याभिरर्वाक्स्वर्विदा वसुमता रथेन ॥३॥ अवोर्वां नूनमश्विना युवाकुर्हुवे यद्वां सुते माध्वी वसूयुः । आ वां वहंतु स्थविरासो अश्वाः पिबाथो अस्मे सुपुता मधूनि ॥४॥ प्राचीमु देवाश्विना धियं मेऽमृध्रां सातये कृतं वसूयुं । विश्वा अविष्टं वाज आ पुरंधीस्ता नः शक्तं शचीपती शचीभिः ॥५॥१२॥ अविष्टं धीष्वश्विना न आसु प्रजावद्रेतो अह्रयं नो अस्तु । आ वां तोके तनये तूतुजानाः सुरत्नासो देववीतिं गमेम ॥६॥ एष स्य वां पूर्वगत्वेव सख्ये निधिर्हितो माध्वी रातो अस्मे । अहेळता मनसा यातमर्वागध्वर्यंता हव्यं मानुषीषु विक्षु ॥७॥ एकस्मिन्योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात् । न वायंति सुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहंति ॥८॥ अस्रेधता मघवद्भ्यो हि भूतं ये राया मंघदेयं जुनंति । प्र ये वंधुं सूनृताभिस्तिरंते गव्या पृंचंतो अश्व्या मघानि ॥९॥ नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत् । धत्तं रत्नानि जरतं च सूरीन्यूयं पात स्वस्तिभिः सदा नः ॥१०॥१३॥

मित्रावरुणा जुषाणो आऽहुतिं नरा पातं सोमं ऋतऽवृधा ॥१९॥११॥

॥६७॥ प्रति वां रथं नृऽपती॰ जरध्यै हविष्मता मनसा यज्ञियेन यः वां दूतः न धिष्ण्यौ अजीगः अच्छ सूनुः न पितरा विवक्मि॥१॥ अग्नेःचित् अग्निः संऽइधानः अस्मे उषौ अहथ्यन् तमसः चित् अंताः अचेति केतुः उपसः पुरस्तात् थ्रिये दिवः दुहितुः जायमानः॥२॥ अभि वां नूनं अश्विना सुऽहोता स्तोमैः सिसक्ति नासत्या विवक्वान् पूर्वीभिः यातं पथ्याभिः अर्वाक् स्वःऽविदा वसुऽमता रथेन॥३॥ अवोः वां नूनं अश्विना युवाकुः हुवे यत् वां सुते माध्वी वसुऽयुः आ वां वहंतु स्थविरासः अश्वाः पिबाथः अस्मे सुऽसुता मधूनि॥४॥ प्राचीं ऊं देवा अश्विना धियं मे अमृध्रां सातये कृतं वसुऽयुं विष्वाः अविष्टं वाजे आ पुरंऽधीः ता नः शक्तं शचीऽपती॰ शचीभिः॥५॥१२॥ अविष्टं धीषु अश्विना नः आसु प्रजाऽवत् रतः अहूयं नः अस्तु आ वां तोके तनये तूतुजानाः सुऽरत्नासः देवऽवीतिं गमेम॥६॥ एषः स्यः वां पूर्वगत्वाऽइव सख्ये निऽधिः हितः माध्वी रातः अस्मे अहेळता मनसा आ यातं अर्वाक् अध्वंता हव्यं मानुषीषु विक्षु॥७॥ एकस्मिन् योगे भुरणा समाने परि वां सप्त सवतः रथः गात् न वायंति सुऽभवः देवऽयुक्ताः ये वां धूःऽसु तरणयः वहंति॥८॥ असश्चता मघवत्ऽभ्यः हि भूतं ये राया मघऽदेयै जुनंति प्र ये वेधुं सूनृताभिः तिरंते गव्या पृंचंतः अश्व्या मघानि॥९॥ नु मे हवं आ शृणुतं युवाना यासिष्ट वर्तिः अश्विनौ इराऽवत् धत्तं रत्नानि जरतं च सूरीन् यूयं पात स्वस्तिऽभिः सदा नः॥१०॥१३॥

॥ ६८ ॥ १–९ वसिष्ठः ॥ अश्विनौ ॥ १–७ विराट् । ८ ९ त्रिष्टुप् ॥

॥ ६८ ॥ आ शुभ्रा यातमश्विना स्वश्वा गिरो दस्रा जुजुषाणा युवाकोः । हव्यानि च प्रतिभृता वीतं नः ॥ १ ॥ प्र वामंधांसि मद्यान्यस्थुरर्वं गंतं हविषो वीतये मे । तिरो अर्यो हवनानि श्रुतं नः ॥ २ ॥ प्र वां रथो मनोजवा इयर्ति तिरो रजांस्यश्विना शतोतिः । अस्मभ्यं सूर्यावसू इयानः ॥ ३ ॥ अयं ह यद्वां देवया उ अद्रिरूध्वो विवक्ति सोमसुद्युवभ्यां । आ वल्गू विप्रो ववृतीत हव्यैः ॥ ४ ॥ चित्रं ह यद्वां भोजनं न्वस्ति न्यर्वये महिषंतं युयोतं । यो वामोमानं दधते प्रियः सन् ॥ ५ ॥ १४ ॥ उत त्यद्वां जुरते अश्विना भूम्यर्वानाय प्रतीत्यं हविर्दे । अधि यद्वर्पं इतऊति धत्थः ॥ ६ ॥ उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे । निरीं पर्षदरावा यो युवाकुः ॥ ७ ॥ वृकाय चिज्जसमानाय शक्तमुत श्रुतं शयवे हूयमाना । यावघ्यामपिन्वतमपो न स्तर्यं चिच्छक्रंश्विना शचीभिः ॥ ८ ॥ एष स्य कारुर्जरते सूक्तैरयं बुधान उषसां सुमन्मा । इषा तं वर्धदघ्या पयोभिर्यूयं पात स्वस्तिभिः सदा नः ॥ ९ ॥ १५ ॥

॥ ६९ ॥ १–८ वसिष्ठ ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥ ६९ ॥ आ वां रथो रोदसी वद्यधानो हिरण्ययो वृषभिर्यात्वश्वैः । घृतवर्तनिः पविभी रुचान इषां वोळ्हा नृपतिर्वाजिनीवान् ॥ १ ॥ स पप्रथानो अभि पंच भूमा चिवंधुरो मनसा यातु युक्तः । विशो येन गच्छथो देवयंतीः कुत्रा चिद्यामंमश्विना दधाना ॥ २ ॥ स्वश्वा यशसा यातमर्वाग्दस्रा निधिं मधुमंतं पिबाथः । वि वां रथो वध्वाऽयादमानोऽन्तान्दिवो बाधते वर्तनिभ्यां ॥ ३ ॥ युवोः श्रियं परि

॥६८॥ आ शुभ्रा यातं अश्विना सुऽअश्वा गिरः दस्रा जुजुषाणा युवाकोः हव्यानि च प्रतिऽभृता वीतं नः॥१॥ प्र वां अंधांसि मद्यानि अस्थुः अरं गंतं हविषः वीतये मे तिरः अर्यः हवनानि श्रुतं नः॥२॥ प्र वां रथः मनःऽजवाः इयर्ति तिरः रजांसि अश्विना शतऽऊतिः अस्मभ्यं सूर्यावसू इयानः॥३॥ अयं ह यत् वां देवऽयाः ऊं अद्रिः ऊर्ध्वः विवक्ति सोमऽसुत् युवऽभ्यां आ वल्गू विप्रः ववृतीत हव्यैः॥४॥ चित्रं ह यत् वां भोजनं नु अस्ति नि अर्चये महिघ्नं युयोतं यः वां ओमानं दधते प्रियः सन्॥५॥१४॥ उत त्यत् वां जुरते अश्विना भूत् च्यवानाय प्रतीत्यं हविःऽदे अधि यत् वपः इतःऽऊति धत्थः॥६॥ उत त्यं भुज्युं अश्विना सखायः मध्ये जहुःदुःऽएवासःसमुद्रे निःईं पर्षत् अरावा यः युवाकुः॥७॥ वृकाय चित् जसमानाय शक्तं उत श्रुतं शयवे हूयमाना यौ अभ्यां अर्पिन्वतं अपः न स्तर्यै चित् शक्ती अश्विना शचीभिः॥८॥ एषः स्यः कारुः जरते सुऽउक्थैः अयं वृधानः उषसां सुऽमन्मा इषा तं वर्धत् अह्रया पयःऽभिः यूयं पात स्वस्तिऽभिः सदा नः॥९॥१५॥

॥६९॥ आ वां रथः रोदसी वह्निधानः हिरण्ययः वृषऽभिः यातु अश्वैः घृतऽवर्तनिः पविऽभिः रुचानः इषां वोळ्हा नृऽपतिः वाजिनीऽवान्॥१॥ सः पप्रथानः अभि पंच भूम चित्रऽवंधुरः मनसा आ यातु युक्तः विशः येन गच्छथः देवऽयंतीः कुत्र चित् यामे अश्विना दधाना॥२॥ सुऽअश्वा यशसा आ यातं अर्वाक् दस्रा निऽधिं मधुऽमंतं पिबाथः वि वां रथः वध्वा यादमानः अंतान् दिवः बाधते वर्तनिऽभ्यां॥३॥ युवोः श्रियं परि

योषावृणीत सूरो दुहिता परितक्म्यायां। यद्देवयंतमवथः शचीभिः परि घ्रंसमोमनां वां वयो गात्॥४॥ यो ह स्य वां रथिरा वस्त उस्रा रथो युजानः परियाति वर्तिः। तेन नः शं योरुपसो व्युष्टौ न्यश्विना वहतं यज्ञे अस्मिन्॥५॥ नरा गौरेव विद्युतं तृषाणास्माकमद्य सवनोप यातं। पुरुत्रा हि वां मतिभिर्हवंते मा वामन्ये नि यमन्देवयंतः॥६॥ युवं भुज्युमवविद्धं समुद्र उदूहथुरर्णसो असिंधानैः। पतत्रिभिरश्वमेरव्यथिभिर्दंसनाभिरश्विना पारयंता॥७॥ नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत्। धत्तं रत्नानि जरतं च सूरीन्युवं पात स्वस्तिभिः सदा नः॥८॥१६॥

॥ ७० ॥ १–७ वसिष्ठः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥ ७० ॥ आ विश्ववाराश्विना गतं नः प्र तत्स्थानमवाचि वां पृथिव्यां। अश्वो न वाजी शुनपृष्ठो अस्यादा यत्सेदथुर्ध्रुवसे न योनिं॥१॥ सिषक्ति सा वां सुमतिश्वनिष्टार्तापि घर्मो मनुषो दुरोणे। यो वां समुद्रान्सरितः पिपर्त्यतंग्वा चिन्न सुयुजा युजानः॥२॥ यानि स्थानान्यश्विना दधाथे दिवो यद्वीधोपधीषु विक्षु। नि पर्वतस्य मूर्धनि सदंतेपं जनाय दाशुषे वहंता॥३॥ चनिष्टं देवा ओषधीष्वप्सु यद्योग्या अश्नवैथे ऋषीणां। पुरूणि रत्ना दधती न्यस्मे अनु पूर्वाणि चक्रथुर्युगानि॥४॥ शुश्रुवांसा चिदश्विना पुरूण्यभि ब्रह्मांणि चक्षाथे ऋषीणां। प्रति प्र यातं वरमा जनायास्मे वामस्तु सुमतिश्वनिष्टा॥५॥ यो वां यज्ञो नासत्या हविष्मान्कृतब्रह्मा समयाँ अभवति। उप प्र यातं वरमा

योषा अवृणीत सूरेः दुहिता परिऽतक्म्यायां यत् देवऽयंतं अवंथः शचीभिः परि घ्रंसं ओमनां वां वयः गात् ॥४॥ यः ह स्यः वां रथिरा वस्ते उषाः रथंः युजानः परिऽयाति वर्तिः तेन नः शं योः उषसः विऽउष्टौ नि अश्विना वहतं यज्ञे अस्मिन् ॥५॥ नरा गौराऽइव विऽद्युतं तृषाणा अस्माकं अद्य सवना उप यातं पुरुऽचा हि वां मतिभिः हवंते मा वां अन्ये नि यमन् देवऽयंतः ॥६॥ युवं भुज्युं अवंऽविद्धं समुद्रे उत् ऊहथुः अर्णसः असिंधानैः पतत्रिऽभिः अश्वमैः अव्यथिऽभिः दंसनाभिः अश्विना पारयंता ॥७॥ नु मे हवं आ शृणुतं युवाना यासिष्टं वर्तिः अश्विनौ इराऽवत् धत्तं रत्नानि जरतं च सूरीन् यूयं पात स्वस्तिऽभिः सदा नः ॥८॥१६॥

॥७०॥ आ विष्ऽवारा अश्विना गतं नः प्र तत् स्थानं अवाचि वां पृथिव्यां अश्वः न वाजी शुनऽपृष्टः अस्थात् आ यत् सेदथुः ध्रुवसे न योनिं ॥१॥ सिसक्ति सा वां सुऽमतिः चनिष्ठा अतापि घर्मः मनुषः दुरोणे यः वां समुद्रान् सरितः पिपर्ति एतऽग्वा चित् न सुऽयुजा युजानः ॥२॥ यानिं स्थानानि अश्विना दधाथे दिवः यह्वीषु ओषधीषु विक्षु नि पर्वतस्य मूर्धनि सदंता इषं जनाय दाशुषे वहंता ॥३॥ चनिष्टं देवौ ओषधीषु अप्ऽसु यत् योग्याः अश्नवैथे ऋषीणां पुरूणि रत्ना दधती नि अस्मे अनु पूर्वाणि चक्ल्पुः युगानि ॥४॥ शुश्रुऽवांसा चित् अश्विना पुरूणि अभि ब्रह्माणि चक्षाथे ऋषीणां प्रतिं प्र यातं वरं आ जनाय अस्मे वां अस्तु सुऽमतिः चनिष्ठा ॥५॥ यः वां यज्ञः नासत्या हविष्मान् कृतऽब्रह्मा सऽमर्यः भवति उप प्र यातं वरं आ

वसिष्ठमिमा ब्रह्माण्यृच्यंते युवभ्यां॥६॥ इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथां। इमा ब्रह्माणि युवयून्यग्मन्यूयं पात स्वस्तिभिः सदा नः ॥७॥१७॥४॥

॥ ७१ ॥ १–६ वसिष्ठः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥७१॥ अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीररुषाय पंथां। अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद्युयोतं ॥१॥ उपायातं दाशुषे मर्त्याय रथेन वाममश्विना वहंता। युयुतमस्मदनिराममीवां दिवा नक्तं माध्वी चासीथां नः॥२॥ आ वां रथमवमस्यां व्युष्टौ सुम्नायवो वृषणो वर्तयंतु। स्यूमगभस्तिमृतयुग्भिरश्विराश्विना वसुमंतं वहेथां ॥३॥ यो वां रथो नृपती असत्सो ळ्हा विबंधुरो वसुमाँ उस्रयामा। आ नं एना नासत्योप यातमभि यद्वां विश्वप्स्यो जिगाति॥४॥ युवं च्यवानं जरसो ऽमुमुक्तं नि पेदवं ऊहथुरा शुमन्वं। निरंहसस्तमसः स्पर्तमचिं नि जाहुषं शिंग्युरे धातमंतः॥५॥ इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथां। इमा ब्रह्माणि युवयून्यग्मन्यूयं पात स्वस्तिभिः सदा नः ॥६॥१८॥

॥ ७२ ॥ १–५ वसिष्ठ ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥७२॥ आ गोमता नासत्या रथेनाश्वावता पुरुभुजेषणं यातं। अभि वां विश्वा नियुतः सचंते स्पार्हया श्रिया तन्वा शुभाना ॥१॥ आ नो देवेभिरुप यातमर्वाक्सजोषसा नासत्या रथेन। युवोर्हि नः सख्या पित्र्याणि समानो बंधुरुत तस्य वित्तं ॥२॥ उदु स्तोमासो अश्विनोरवुध्रञ्जामि ब्रह्माण्युपसश्च देवीः। आविवासन्नोदसी धिष्ण्येमे अच्छा विप्रो

वसिष्ठं इमा ब्रह्माणि ऋच्यंते युवऽभ्यां ॥६॥ इयं मनीषा इयं अश्विना गीः इमां सुऽवृक्तिं वृषणा जुषेथां इमा ब्रह्माणि युवऽयूनिं अग्मन् यूयं पात स्वस्तिऽभिः सदा नः॥७॥१७॥४॥

॥७१॥ अपं स्वसुंः उषसंः नक्जिहीते रिणक्ति कृष्णीः अरुषाय पंथां अश्वंऽमघा गोऽमंघा वां हुवेम दिवा नक्तं शरुं अस्मत् युयोतं ॥१॥ उपऽआयातं दाशुषे मर्त्याय रथेंन वामं अश्विना वहंता युयुतं अस्मत् अनिरां अमीवां दिवा नक्तं माध्वीः चासीथां नः॥२॥ आ वां रथं अवमस्यां विऽउष्टौ सुम्नऽयवः वृषणः वर्तयंतु स्यूमंऽगभस्तिं ऋतयुक्ऽभिः अश्वैः आ अश्विना वसुंऽमंतं वहेथां॥३॥ यः वां रथंः नृऽपतीं अस्ति वोळ्हा चिऽवंधुरः वसुंऽमान् उस्रऽयामा आ नः एना नासत्या उपं यातं अभि यत् वां विश्वऽप्न्यंः जिगांति॥४॥ युवं च्यवानं जरसंः अमुमुक्तं नि पेदवें ऊहथुः आशुं अश्वं निः अंहसः तमसः स्पर्तं अचिंं नि जाहुषं शिथिरे धातं अंतः॥५॥ इयं मनीषा इयं अश्विना गीः इमां सुऽवृक्तिं वृषणा जुषेथां इमा ब्रह्माणि युवऽयूनिं अग्मन् यूयं पात स्वस्तिऽभिः सदा नः॥६॥१८॥

॥७२॥ आ गोऽमंता नासत्या रथेंन अश्वंऽवता पुरुऽचंद्रेण यातं अभि वां विश्वाः निऽयुतंः सचंते स्वाहेयां श्रिया तन्वा शुभाना॥१॥ आ नः देवेभिः उपं यातं अर्वाक् सऽजोषंसा नासत्या रथेंन युवोः हि नः सख्या पित्र्याणि समानः बंधुः उत तस्यं विद्धं॥२॥ उत् ऊं स्तोमासः अश्विनोंः अवुधन् जामि ब्रह्माणि उषसंः च देवीः आऽविवासन् रोदसी धिष्ण्यें इमे अच्छं विं

नासत्या विवक्ति ॥३॥ वि चेदुच्छन्त्यश्विना उषासः प्र वां ब्रह्माणि कारवो भरन्ते। ऊर्ध्वं भानुं सविता देवो अश्रेबृहद्वयः समिधा जरन्ते ॥४॥ आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात्। आ विश्वतः पांचजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥५॥१९॥

॥ ७३ ॥ १–५ वसिष्ठः ॥ अश्विनौ ॥ त्रिष्टुप् ॥

॥७३॥ अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयंतो दधानाः। पुरुदंसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः ॥१॥ न्युं प्रियो मनुषः सादि होता नासत्या यो यजते वंदते च। अश्नीतं मध्वो अश्विना उपाक आ वां वोचे विदथेषु प्रयस्वान् ॥२॥ अहेम यज्ञं पथामुराणा द्रुमां सुवृक्तिं वृषणा जुषेथां। श्रुष्टीवेव प्रेषितो वामवोधि प्रति स्तोमैर्जरमाणो वसिष्ठः ॥३॥ उप त्या वहतो विशं नो रक्षोहणा संभृता वीळुपाणी। समंधांस्यग्मत मत्सराणि मा नो मर्धिष्टमा गंतं शिवेन ॥४॥ आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात्। आ विश्वतः पांचजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥५॥२०॥

॥ ७४ ॥ १–६ वसिष्ठः ॥ अश्विनौ ॥ १, ३, ५ बृहती । २, ४, ६ भुरिग्बृहती ॥

॥७४॥ द्रुमा उ वां दिविष्टय उक्षा हवंते अश्विना। अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः ॥१॥ युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते। अवोमथं समनसा नि यच्छतं पिबतं सोम्यं मधु ॥२॥ आ यातमुप भूषतं मध्वः पिबतमश्विना। दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गंतं ॥३॥ अश्वासो ये वामुप दाशुषो गृहं युवां दीयंति विभ्रतः। मक्षू-

नासत्या विवक्ति॥३॥ वि च इत् उच्छंति अश्विनौ उषसः प्र वां ब्रह्माणि कारवः भरंते ऊर्ध्वं भानुं सविता देवः अश्रेत् बृहत् अग्नयः संऽइधा जरंते॥४॥ आ पश्चातात् नासत्या आ पुरस्तात् आ अश्विना यातं अधरात् उदक्तात् आ विश्वतः पांचऽजन्येन राया यूयं पात स्वस्तिऽभिः सदा नः॥५॥१९॥

॥७३॥ अतारिष्म तमसः पारं अस्य प्रति स्तोमं देवऽयंतः दधानाः पुरुऽदंसा पुरुऽतमा पुराऽजा अमर्त्या हवते अश्विना गीः॥१॥ नि ऊं प्रियः मनुषः सादि होता नासत्या यः यजते वंदते च अग्नीतं मध्वः अश्विनौ उपाके आ वां वोचे विदथेषु प्रयस्वान्॥२॥ अहेम यज्ञं पथां उराणाः इमां सुऽवृक्तिं वृषणा जुषेथां श्रुष्टीवाऽइव प्रऽईषितः वां अवोधि प्रति स्तोमैः जरमाणः वसिष्ठः॥३॥ उप त्या वहनी गमतः विशं नः रण्याऽहना संऽभृता वीळुऽपाणी॰ सं अंधांसि अग्मत मत्सराणि मा नः मर्धिष्टं आ गतं शिवेन॥४॥ आ पश्चातात् नासत्या आ पुरस्तात् आ अश्विना यातं अधरात् उदक्तात् आ विश्वतः पांचऽजन्येन राया यूयं पात स्वस्तिऽभिः सदा नः॥५॥२०॥

॥७४॥ इमाः ऊं वां दिविष्टयः उस्रा हवंते अश्विना अयं वां अह्वे अवसे शचीऽवसू॰ विशंऽविशं हि गच्छथः॥१॥ युवं चित्रं ददथुः भोजनं नरा चोदेथां सूनृताऽवते अर्वाक् रथं सऽमनसा नि यच्छतं पिबतं सोम्यं मधु॥२॥ आ यातं उप भूषतं मध्वः पिबतं अश्विना दुग्धं पयः वृषणा जेन्यावसू मा नः मर्धिष्टं आ गतं॥३॥ अश्वासः ये वां उप दाशुषः गृहं युवां दीयंति विभ्रतः मधु-

युभिर्नरा हयेभिरश्विना देवा यातमस्मयू ॥४॥ अधा ह यंतो अश्विना पृक्षः सचंत सूर्यः । ता यंसतो मघवद्भ्यो ध्रुवं यशंस्फुर्दिरस्मभ्यं नासत्या ॥५॥ प्र ये ययुरवृकासो रथा इव नृपातारो जनानां । उत स्वेन शवसा शूशुवुर्नर उत क्षियंति सुक्षितिं ॥६॥२१॥

॥ ७५ ॥ १–८ वसिष्ठः ॥ उषाः ॥ त्रिष्टुप् ॥

॥७५॥ द्युभा अंवो दिविजा ऋतेनाविष्कृणवाना महिमानमागात् । अप द्वहस्तमा वरजुष्टमंगिरस्तमा पथ्या अजीगः ॥१॥ महे नो अद्य सुवितायं बोध्युषो महे सौभगाय प्र यंधि । चित्रं रयिं यशसं धेह्यस्मे देवि मर्तेषु मानुषि श्रवस्युं ॥२॥ एते त्ये भानवो दर्शतायाश्चिचा उषसो अमृतास आगुः । जनयंतो दैव्यानि व्रतान्यापृणंतो अंतरिक्षा व्यस्युः ॥३॥ एषा स्या युंजाना परांकात्पंच क्षितीः परि सद्यो जिगाति । अभिपश्यंती वयुना जनानां दिवो दुहिता भुवनस्य पत्नी ॥४॥ वाजिनीवती सूर्यस्य योषा चित्रामघा राय ईशे वसूनां । ऋषिष्टुता जरयंती मघोन्युषा उच्छति वह्निभिर्गृणाना ॥५॥ प्रति द्युतानामरुषासो अश्वाश्चिचा अदृश्रन्नुषसं वहंतः । यांति शुभ्रा विश्वपिशो रथेन दधाति रत्नं विधते जनाय ॥६॥ सत्या सत्येभिर्महती महद्भिर्देवी देवेभिर्यजता यजत्रैः । रुजद्दृळ्हानि दर्दुषियाणां प्रति गाव उषसं वावशंत ॥७॥ नू नो गोमद्वीरवद्धेहि रत्नमुषो अश्वावत्पुरुभोजो अस्मे । मा नो वहिः पुरुषता निदे कर्ये यं पात स्वस्तिभिः सदा नः ॥८॥२२॥

युऽभिः नरा हयेभिः अश्विना आ देवा यातं अस्मऽयू० ॥४॥ अधा ह यंतः अश्विना पृक्षः सचंत सूरयः ता यंसतः मघवत्ऽभ्यः ध्रुवं यशः छर्दिः अस्मभ्यं नासत्या ॥५॥ प्र ये ययुः अवृकासः रथाःऽइव नृऽपातारः जनानां उत स्वेन शवसा शूशुवुः नरः उत क्षियंति सुऽक्षितिं ॥६॥२१॥

॥७५॥ वि उषाः आवः दिविऽजाः ऋतेन आविःऽकृण्वाना महिमानं आ अगात् अप दुहः तमः आवः अजुष्टं अंगिरःऽतमा पथ्याः अजीगः ॥१॥ महे नः अद्य सुविताय बोधि उषः महे सौभगाय प्र यंधि चित्रं रयिं यशसं धेहि अस्मे देवि मर्तेषु मानुषि श्रवस्युं ॥२॥ एते त्ये भानवः दर्शतायाः चित्राः उषसः अमृतासः आ अगुः जनयंतः दैव्यानि व्रतानि आऽपृणंतः अंतरिक्षा वि अस्थुः ॥३॥ एषा स्या युजाना पराकात् पंच क्षितीः परि सद्यः जिगाति अभिऽपश्यंती वयुना जनानां दिवः दुहिता भुवनस्य पत्नी ॥४॥ वाजिनीऽवती सूर्यस्य योषा चित्रऽमघा रायः ईशे वसूनां ऋषिंऽस्तुता जरयंती मघोनी उषाः उच्छति वह्निऽभिः गृणाना ॥५॥ प्रति द्युतानां अरुषासः अश्वाः चित्राः अदृश्रन् उषसं वहंतः याति शुभ्रा विश्वऽपिशा रथेन दधाति रत्नं विधते जनाय ॥६॥ सत्या सत्येभिः महती महत्ऽभिः देवी देवेभिः यजता यजत्रैः रुजत् दृळ्हानि ददत् उस्रियाणां प्रति गावः उषसं वावशंत ॥७॥ नु नः गोऽमत् वीरऽवत् धेहि रत्नं उषः अश्वऽवत् पुरुऽभोजः अस्मे मा नः बर्हिः पुरुषता निदे कः यूयं पात स्वस्तिऽभिः सदा नः ॥८॥२२॥

॥ ७६ ॥ १–७ वसिष्ठः ॥ उषाः ॥ त्रिष्टुप् ॥

॥७६॥ उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत्। ऋत्वा देवानामजनिष्ट चक्षुरा विरकर्भुवनं विश्वमुषाः ॥१॥ प्र मे पन्था देवयानो अदृश्रन्नमर्धतो वसुभिरिष्कृतासः। अभूदु केतुरुषसः पुरस्तान्मती व्यागादधि हर्म्येभ्यः ॥२॥ तानीदहानि बहुलान्यास्न्या प्राचीनमुदिता सूर्यस्य। यतः परि जार इवाचरन्त्युषो दहस्रे न पुनर्यतीव ॥३॥ न इहेवानो मधुमाद् आसन्नृतावानः कवयः पूर्व्यासः। गूळ्हं ज्योतिः पितरो अन्वविन्दन्त्सत्यमंचा अजनयन्नुषासं ॥४॥ समान ऊर्वे अधि संगतासः सं जानते न यतंते मिथस्ते। ते देवानां न मिनंति व्रतान्यमर्धतो वसुभिर्यादमानाः ॥५॥ प्रति त्वा स्तोमैरीळते वसिष्ठा उषर्बुधः सुभगे तुष्टुवांसः। गवां नेत्री वाजपत्नी न उच्चोषः सुजाते प्रथमा जरस्व ॥६॥ एषा नेत्री राधसः सूनृतानामुषा उच्छंती रिभ्यते वसिष्ठैः। दीर्घश्रुतं रयिमस्मे दधाना यूयं पात स्वस्तिभिः सदा नः ॥७॥२३॥

॥ ७७ ॥ १–६ वसिष्ठः ॥ उषाः ॥ त्रिष्टुप् ॥

॥७७॥ उषो रुरुचे युवतिर्न योषा विश्वं जीवं प्रसुवंती चरायै। अभूदग्निः समिधे मानुषाणामकर्ज्योतिर्बाधमाना तमांसि ॥१॥ विश्वं प्रतीची सप्रथा उदस्थाद्दृशद्वासो विभ्रती शुक्रमश्वित्। हिरण्यवर्णा सुदृशीकसंदृग्गवां माता नेव्यहामरोचि ॥२॥ देवानां चक्षुः सुभगा वहंती श्वेतं नयंती सुदृशीकमश्वं। उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनु प्रभूता ॥३॥ अंतिवामा दूरे अमित्रमुच्छोषो गव्यूतिमभयं कृधी नः। यावय द्वेष आ भरा वसूनि चो-

॥७६॥ उत् ऊं ज्योतिः अमृतं विश्वऽजन्यं विश्वानरः सविता देवः अश्रेत् कर्त्वा देवानां अजनिष्ट चक्षुः आविः अकः भुवनं विश्वं उषाः॥१॥ प्र मे पंथाः देवऽयानाः अहृथ्रन् अमर्धतः वसुऽभिः इष्कृतासः अभूत् ऊं केतुः उषसः पुरस्तात् प्रतीची आ अगात् अधि हर्म्येभ्यः ॥२॥ तानि इत् अहानि बहुलानि आसन् या प्राचीनं उदितः एता सूर्यस्य यतः परि जारःऽइव आऽचरंती उषः दृहस्रे न पुनः यतीऽइव॥३॥ ते इत् देवानां सधऽमादः आसन् ऋतऽवानः कवयः पूर्व्यासः गूळ्हं ज्योतिः पितरः अनु अविंदन् सत्यऽमंचाः अजनयन् उषसं ॥४॥ समाने ऊर्वे अधि संऽगतासः सं जानते न यतंते मिथः ते ते देवानां न मिनंति व्रतानि अमर्धतः वसुऽभिः यादमानाः॥५॥ प्रति त्वा स्तोमैः ईळते वसिष्ठाः उषःऽबुधः सुऽभगे तुस्तुऽवांसः गवां नेत्री वाजऽपत्नी नः उच्छ उषः सुऽजाते प्रथमा जरस्व ॥६॥ एषा नेत्री राधसः सूनृतानां उषाः उच्छंती रिभ्यते वसिष्ठैः दीर्घऽश्रुतं रयिं अस्मे दधाना यूयं पात स्वस्तिऽभिः सदा नः॥७॥२३॥

॥७७॥ उषोः रुरुचे युवतिः न योषा विश्वं जीवं प्रऽसुवंती चरायै अभूत् अग्निः संऽइधे मानुषाणां अकः ज्योतिः बाधमाना तमांसि॥१॥ विश्वं प्रतीची सऽप्रथाः उत् अस्थात् रुशत् वासः विभ्रती शुक्रं अश्वित् हिरण्यऽवर्णा सुदृशीकऽसंदृक् गवां माता नेत्री अहां अरोचि ॥२॥ देवानां चक्षुः सुऽभगा वहंती श्वेतं नयंती सुऽदृशीकं अश्वं उषाः अदर्शि रश्मिऽभिः विऽअक्ता चित्रऽमघा विश्वं अनु प्रऽभूता॥३॥ अंतिऽवामा दूरे अमित्रं उच्छ उर्वीं गव्यूतिं अभयं कृधि नः यवयं द्वेषः आ भर वसूनि चो-

दयु राधो गृणते मघोनि ॥४॥ अस्मे श्रेष्ठाभिर्भानुभिर्वि भाह्युषो देवि प्रतिरंती न आयुः। इषं च नो दधती विश्ववारे गोमदश्वावदुर्थवच्च राधः॥५॥ यां त्वा दिवो दुहितर्वर्धयंत्युषः सुजाते मतिभिर्विसिष्ठाः। सास्मासु धा रयिमूर्वं बृहंतं यूयं पात स्वस्तिभिः सदा नः ॥६॥२४॥

॥ ७८ ॥ १–५ वसिष्ठः ॥ उषाः ॥ त्रिष्टुप् ॥

॥७८॥ प्रति केतवः प्रथमा अदृश्रन्नूर्ध्वा अस्या अंजयो वि श्रयंते। उषो अर्वाचा बृहता रथेन ज्योतिष्मता वाममस्मभ्यं वक्षि ॥१॥ प्रति षीमग्निर्जरते समिद्धः प्रति विप्रासो मतिभिर्गृणंतः। उषा याति ज्योतिषा बाधमाना विश्वा तमांसि दुरितापं देवी ॥२॥ एता उ त्याः प्रत्यदृश्रन्पुरस्ताज्ज्योतिर्यच्छंतीरुषसो विभातीः। अजीजनन्त्सूर्यं यज्ञमग्निमपाचीनं तमो अगादजुष्टं ॥३॥ अचेति दिवो दुहिता मघोनी विश्वे पश्यंत्युषसं विभातीं। आस्थाद्रथं स्वधया युज्यमानमा यमश्वासः सुयुजो वहंति॥४॥ प्रति त्वाद्य सुमनसो बुधंतास्माकासो मघवानो वयं च। तिल्विलायध्वमुषसो विभातीर्यूयं पात स्वस्तिभिः सदा नः ॥५॥२५॥

॥ ७९ ॥ १–५ वसिष्ठः ॥ उषा. ॥ त्रिष्टुप् ॥

॥७९॥ व्युषा आवः पथ्या३ जनानां पंच क्षितीर्मानुषीर्बोधयंती। सुसंदृग्भिरुषभिर्भानुमश्रेद्वि सूर्यो रोदसी चष्टसावः ॥१॥ व्यंजते दिवो अंतेष्वक्तून्विशो न युक्ता उषसो यतंते। सं ते गावस्तम आ वर्तयंति ज्योतिर्यच्छंति सवितेव बाहू ॥२॥ अभूदुषा इंद्रतमा मघोन्यजीजनत्सुविताय श्रवांसि। वि दिवो देवी दुहिता दधात्यंगि-

दर्यराधः गृणते मघोनि॥४॥ अस्मे॑ श्रेष्ठेभिः भानुऽभिः विभा-हि उषः देवि प्रऽतिरंती नः आयुः इषं च नः दधती विश्वऽवारे गोऽमत् अश्वऽवत् रथ्ऽवत् च राधः॥५॥ यां त्वा दिवः दुहितः वर्धयंति उषः सुऽजाते मतिऽभिः वसिष्ठाः सा अस्मासु धाः रयिं चित्रं बृहंतं यूयं पात स्वस्तिऽभिः सदा नः॥६॥२४॥

॥७८॥ प्रति केतवः प्रथमाः अदृश्रन् ऊर्ध्वाः अस्याः अंजयः वि श्रयंते उषः अर्वाचा बृहता रथेन ज्योतिष्मता वामं अस्मभ्यं वष्टि॥१॥ प्रति सीं अग्निः जरते संऽइद्धः प्रति विप्रासः मतिऽभिः गृणंतः उषाः याति ज्योतिषा वार्धमाना विश्वा तमांसि दुःऽइता अप देवी॥२॥ एताः ऊं त्याः प्रति अदृश्रन् पुरस्तात् ज्योतिः यच्छंतीः उषसः विऽभातीः अजीजनन् सूर्यं यज्ञं अग्निं अपाचीनं तमः अगात् अजुष्टं॥३॥ अचेति दिवः दुहिता मघोनी विश्वे पश्यंति उषसं विऽभातीं आ अस्थात् रथं स्वधया युज्यमानं आ यं अश्वासः सुऽयुजः वहंति॥४॥ प्रति त्वा अद्य सुऽमनसः बुधंत अस्माकासः मघऽवानः वयं च तिस्विलायध्वं उषसः विऽभातीः यूयं पात स्वस्तिऽभिः सदा नः॥५॥२५॥

॥७९॥ वि उषाः आवः पथ्या जनानां पंच क्षितीः मानुषीः बोधयंती सुसंदृक्ऽभिः उक्षऽभिः भानुं अश्रेत् वि सूर्यः रोदसी चक्षसा आवः॥१॥ वि अंजते दिवः अंतेषु अक्तून् विशः न युक्ताः उषसः यतंते सं ते गावः तमः आ वर्तयंति ज्योतिः यच्छंति सविताऽइव बाहू॥२॥ अभूत् उषाः इंद्रेऽतमा मघोनी अजीजनत् सुविताय श्रवांसि वि दिवः देवी दुहिता दधाति अंगि-

रत्तमा सुकृते वसूनि ॥३॥ तावदुषो राधो अस्मभ्यं रास्व यावत्स्तोतृभ्यो अरदो गृणाना। यां त्वा जज्ञुर्वृषभस्या रवेण वि हव्हस्य दुरो अर्दरौर्णोः ॥४॥ देवंदेवं राधसे चोदयंत्यस्मद्र्यक्सूनृता ईरयंती। व्युच्छंती नः सनये धियो धा यूयं पात स्वस्तिभिः सदा नः ॥५॥२६॥

॥ ८० ॥ १–३ वसिष्ठः ॥ उषाः ॥ त्रिष्टुप् ॥

॥८०॥ प्रति स्तोमेभिरुषसं वसिष्ठा गीर्भिर्विप्रासः प्रथमा अबुध्रन्। विवर्तयंती रजसी समंते आविष्कृण्वती भुवनानि विश्वा ॥१॥ एषा स्या नव्यमायुर्दधाना गूढ्वी तमो ज्योतिषोषा अवोधि। अयं एति युवतिरह्रयाणा प्राचिकितत्सूर्यं यज्ञमग्निं ॥२॥ अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छंतु भद्राः। घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥३॥२७॥५॥

॥ ८१ ॥ १–६ वसिष्ठः ॥ उषाः ॥ १ ३ ५ बृहती। २ ४. ६ सतोबृहती ॥

॥८१॥ प्रत्यु अदर्श्यायत्युच्छंती दुहिता दिवः। अपो महि व्ययति चक्षसे तमो ज्योतिष्कृणोति सूनरी ॥१॥ उदुस्रियाः सृजते सूर्यः सचाँ उद्यन्नक्षत्रमर्चिवत्। तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि ॥२॥ प्रति त्वा दुहितर्दिव उषो जीरा अभुत्स्महि। या वहसि पुरुस्पाहं वनन्वति रत्नं न दाशुषे मयः ॥३॥ उच्छंती या कृणोषि मंहना महि प्रख्ये देवि स्वर्दृशे। तस्यास्ते रत्नभाजं ईमहे वयं स्याम मातुने सूनवः ॥४॥ तच्चित्रं राध आ भरोषो यद्दीर्घश्रुत्तमं। यत्ते दिवो दुहितर्मर्तभोजनं तद्रास्व सुनर्जामहे ॥५॥ प्रवः सूरिभ्यो अमृतं वसुत्वनं वाजाँ अ-

रःऽतमा सुऽकृते वसूनि ॥३॥ तावत् उषः राधः अस्मभ्यं रास्व यावत् स्तोतृऽभ्यः अरदः गृणाना यां त्वा जज्ञुः वृषभस्य रवेण वि दृळ्हस्य दुरः अद्रेः और्णोः ॥४॥ देवंऽदेवं राधसे चोदयंती अस्मद्र्यक् सूनृताः ईरयंती विऽउच्छंती नः सनये धियः धाः यूयं पात स्वस्तिऽभिः सदा नः ॥५॥२६॥

॥८०॥ प्रति स्तोमेभिः उषसं वसिष्ठाः गीःऽभिः विप्रासः प्रथमाः अबुध्रन् विऽवर्तयंतीं रजसी संऽअंते° आविःऽकृण्वतीं भुवनानि विश्वा ॥१॥ एषा स्या नव्यं आयुः दधाना गूढ्वी तमः ज्योतिषा उषाः अबोधि अग्रे एति युवतिः अह्नयाणा प्र अचिकितत् सूर्ये यज्ञं अग्निं ॥२॥ अश्वंऽवतीः गोऽमतीः नः उषसः वीरऽवतीः सदं उच्छंतु भद्राः घृतं दुहानाः विश्वतः प्रऽपीताः यूयं पात स्वस्तिऽभिः सदा नः ॥३॥२७॥५॥

॥८१॥ प्रति ऊं अदर्शि आऽयती उच्छंती दुहिता दिवः अपो महि व्ययति चक्षसे तमः ज्योतिः कृणोति सूनरी ॥१॥ उत् उस्रियाः सृजते सूर्यः सचा उत्ऽयन् नक्षत्रं अर्चिऽवत् तवं इत् उषः विऽउषि सूर्यस्य च सं भक्तेन गमेमहि ॥२॥ प्रति त्वा दुहितः दिवः उषः जीराः अभुत्स्महि या वहसि पुरुऽस्पार्हं वनन्ऽवति रत्नं न दाशुषे मयः ॥३॥ उच्छंती या कृणोषि संहना महि प्रऽख्ये देवि स्वः दृशे तस्याः ते रत्नऽभाजः ईमहे वयं स्याम मातुः न सूनवः ॥४॥ तत् चित्रं राधः आ भर उषः यत् दीर्घश्रुत्ऽतमं यत् ते दिवः दुहितः मर्तऽभोजनं तत् रास्व भुनजामहे ॥५॥ अवः सूरिऽभ्यः अमृतं वसुऽत्वनं वाजान् अ-

स्मभ्यं गोमंतः । चोदयित्री मघोनः सूनृतावत्युषा उच्छदप स्रिधः ॥ ६ ॥ १ ॥

॥ ८२ ॥ १–१० वसिष्ठः ॥ इंद्रावरुणौ ॥ जगती ॥

॥ ८२ ॥ इंद्रावरुणा युवमध्वरायं नो विशे जनाय महि शर्म यच्छतं । दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः ॥ १ ॥ सम्राळुग्रः स्वराळुग्र उच्यते वां महांता विंद्रावरुणा मन्हावसू । विश्वे देवासः परमे व्योमनि सं वामोजो वृषणा सं बलं दधुः ॥ २ ॥ अन्वपां खान्यतृतमोजसा सूर्यमैरयतं दिवि प्रभुं । इंद्रावरुणा मदे अस्य मायिनोऽपिन्वतमपितः पिन्वतं धियः ॥ ३ ॥ युवामिद्धुत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः । ईशाना वस्व उभयस्य कारव इंद्रावरुणा सुहवा हवामहे ॥ ४ ॥ इंद्रावरुणा यदिमानि चक्रथुर्विश्वा जातानि भुवनस्य मज्मना । क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते ॥ ५ ॥ २ ॥ महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत्स्वं । अजामिमन्यः श्रथयंतमातिरद्वेभिरन्यः प्र वृणोति भूयसः ॥ ६ ॥ न तमंहो न दुरितानि मर्त्यमिंद्रावरुणा न तपः कुतश्चन । यस्य देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते परिष्कृतिः ॥ ७ ॥ अर्वाङ्गरा दिव्येनावसा गतं शृणुतं हवं यदिमे जुजोषथः । युवोर्हि सख्यमुत वा यदाप्यं माडीकमिंद्रावरुणा नि यच्छतं ॥ ८ ॥ अस्माकमिंद्रावरुणा भरेभरे पुरोयोधा भवतं कृष्टयोजसा । यद्वां हवंत उभये अधि स्पृधि नरस्तोकस्य तनयस्य सातिषु ॥ ९ ॥ अस्मे इंद्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छंतु महि शर्म सप्रथः । अवभ्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥ १० ॥ ३ ॥

स्मभ्यं गोऽमंतः चोदयित्री मघोनः सूनृताऽवती उषाः उच्छत् अप स्रिधः ॥ ६ ॥ १ ॥

॥ ८२ ॥ इंद्रावरुणा युवं अध्वराय नः विशे जनाय महि शर्म यच्छतं दीर्घऽप्रयज्युं अतिं यः वनुष्यतिं वयं जयेम पृतनासु दुःऽध्यः ॥ १ ॥ संऽराट् अन्यः स्वऽराट् अन्यः उच्यते वां महांतौ इंद्रावरुणा महाऽवसू० विश्वे देवासः परमे विऽओमनि सं वां ओजः वृषणा सं बलं दधुः ॥ २ ॥ अनु अपां खानिं अतृंतं ओजसा आ सूर्यं एरयतं दिवि प्रऽभुं इंद्रावरुणा मदे अस्य मायिनः अपिन्वतं अपितः पिन्वतं धियः ॥ ३ ॥ युवां इत् युतऽसु पृतनासु वह्नयः युवां क्षेमस्य प्रऽसवे मितऽज्ञवः ईशाना वस्वः उभयस्य कारवः इंद्रावरुणा सुऽहवा हुवामहे ॥ ४ ॥ इंद्रावरुणा यत् इमानि चक्रथुः विश्वा जातानि भुवनस्य मज्मना क्षेमेण मित्रः वरुणं दुवस्यति मरुत्ऽभिः उग्रः शुभे अन्यः ईयते ॥ ५ ॥ २ ॥ महे शुल्काय वरुणस्य नु त्विषे ओजः मिमाते धुवं अस्य यत् स्वं अजामिं अन्यः अथर्यंतं आ अतिरत् दभ्रेभिः अन्यः प्र वृणोति भूयसः ॥ ६ ॥ न तं अंहः न दुःऽइतानि मर्त्यं इंद्रावरुणा न तपः कुतः चन यस्य देवा गच्छथः वीथः अध्वरं न तं मर्तस्य नशते परिऽह्रुतिः ॥ ७ ॥ अर्वाक् नरा दैव्येन अवसा आ गतं शृणुतं हवं यदि मे जुजोषथः युवोः हि सख्यं उत वा यत् आप्यं माडीकं इंद्रावरुणा नि यच्छतं ॥ ८ ॥ अस्माकं इंद्रावरुणा भरेऽभरे पुरःऽयोधा भवतं कृष्टिऽओजसा यत् वां हवंते उभये अध स्पृधि नरः तोकस्य तनयस्य सातिषु ॥ ९ ॥ अस्मे इंद्रः वरुणः मित्रः अर्यमा द्युम्नं यच्छंतु महि शर्म सऽप्रथः अवभ्रं ज्योतिः अदितेः ऋतऽवृधः देवस्य श्लोकं सवितुः मनामहे ॥ १० ॥ ३ ॥

॥ ८३ ॥ १–१० वसिष्ठः ॥ इंद्रावरुणौ ॥ जगती ॥

॥८३॥ युवां नरा पश्यमानास आप्यं प्राचा गव्यंतः पृथुपर्शवो ययुः। दासा च वृचा हतमार्याणि च सुदासमिंद्रावरुणावसावतं॥१॥ यचा नरः समयंते कृतध्वजो यस्मिन्नाजा भवंति किं चन प्रियं। यचा भयंते भुवना स्वर्दृशस्तचा न इंद्रावरुणाधि वोचतं॥२॥ सं भूम्या अंतां ध्वसिरा अदृष्टतेंद्रावरुणा दिवि षीप आरुहत्। अस्युर्जनानामुप मामरातयोऽवागवंसा हवनश्रुता गतं॥३॥ इंद्रावरुणा वधनाभिरप्रति भेदं वन्वंता प्र सुदासमावतं। ब्रह्माणयेषां शृणुतं हवीमनि सत्या नृत्सूनामभवत्पुरोहितिः॥४॥ इंद्रावरुणावभ्या तपंति माघान्यर्यो वनुषामरातयः। युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पायें दिवि॥५॥४॥ युवां हवंत उभयास आजिषिंद्रं च वस्वो वरुणं च सातये। यच राजभिर्दशभिर्निबाधितं प्र सुदासमावतं नृत्तुभिः सह॥६॥ दश राजानः समिता अयज्यवः सुदासमिंद्रावरुणा न युयुधुः। सत्या नृणामंह्रसदामुपस्तुतिर्देवा एषामभवन्देवहूतिषु॥७॥ दाशराज्ञे परियत्ताय विष्टतः सुदास इंद्रावरुणावशिक्षतं। शित्यंचो यच नमसा कपर्दिनो धिया धीवंतो असपंत नृत्तवः॥८॥ वृचाण्यन्यः समिथेषु जिग्यते व्रतान्यन्यो असुरक्षते सदा। हवामहे वां वृषणा सुवृक्तिभिरस्मे इंद्रावरुणा शर्म यच्छतं॥९॥ अस्मे इंद्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छंतु महि शर्म सप्रथः। अवभ्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे॥१०॥५॥

॥ ८४ ॥ १–५ वसिष्ठः ॥ इंद्रावरुणौ ॥ त्रिष्टुप् ॥

॥८४॥ आ वां राजानावध्वरे ववृत्यां हव्येभिरिंद्रावरुणा

॥ ८३ ॥ युवां नरा पश्यमानासः आप्यं प्राचा गव्यंतः पृथुऽपशवः ययुः दासा च वृचा हतं आर्याणि च सुऽदासं इंद्रावरुणा अवंसा अवतं ॥ १ ॥ यच्च नरः संऽअयंते कृतऽध्वजः यस्मिन् आजा भवंति किं चन प्रियं यच्च भयंते भुवना स्वःऽदृशः तच्च नः इंद्रावरुणा अधि वोचतं ॥ २ ॥ संभूम्याः अंतात्ऽध्वसिराः अहृक्षत इंद्रावरुणा दिवि घोषः आ अरुहत् अस्युः जनानां उप मां अरातयः अर्वाक् अवसा हुवतऽश्रुता आ गतं ॥ ३ ॥ इंद्रावरुणा वधनाभिः अप्रति भेदं वन्यंता प्र सुऽदासं आवतं ब्रह्माणि एषां शृणुतं हवीमनि सत्या नृत्सूनां अभवत् पुरःऽहितिः ॥ ४ ॥ इंद्रावरुणौ अभि आ तपंति मा अघानि अर्यः वनुषां अरातयः युवं हि वस्वः उभयस्य राजथः अध स्म नः अवतं पायै दिवि ॥ ५ ॥ ४ ॥ युवां हुवंते उभयासः आजिषु इंद्रं च वस्वः वरुणं च सातये यच्च राजऽभिः दृगऽभिः निऽबाधितं प्र सुऽदासं आवतं तृत्सुऽभिः सह ॥ ६ ॥ दश राजानः संऽइताः अयज्यवः सुऽदासं इंद्रावरुणा न युयुधुः सत्या नृणां अग्नऽसदां उपऽस्तुतिः देवाः एषां अभवन् देवऽहूतिषु ॥ ७ ॥ दाशऽराज्ञे परिऽयत्ताय विश्वतः सुऽदासे इंद्रावरुणौ अशिक्षतं श्वित्यंचः यच्च नमसा कपर्दिनः धिया धीऽवंतः असपंत तृत्सवः ॥ ८ ॥ वृचाणि अन्यः संऽइयेषु जिघ्नते व्रतानि अन्यः अभिरक्षते सदा हवामहे वां वृषणा सुवृक्तिऽभिः अस्मे इंद्रावरुणा शर्म यच्छतं ॥ ९ ॥ अस्मे इंद्रः वरुणः मित्रः अर्यमा द्युम्नं यच्छंतु महि शर्म सऽप्रथः अवभ्रं ज्योतिः अदितेः चातऽवृधः देवस्य श्लोकं सवितुः मनामहे ॥ १० ॥ ५ ॥

॥ ८४ ॥ आ वां राजानौ अध्वरे ववृत्यां हव्येभिः इंद्रावरुणा

नमः॑ऽभिः प्र वां॑ घृताचीं॑ बाह्वोः॑ दधा॑ना परि॑ त्मना॑ विषु॑ऽरूपा॑ जिगा॑ति॥ १॥ युवोः॑ रा॒ष्ट्रं बृ॒हत् इ॒न्व॒ति॒ द्यौः यौ से॒तृऽभिः॑ अ॒र॒ज्जु॒ऽभिः॑ सि॒नी॒थः॑ परि॑ नः॑ हेळ॑ः वरु॑णस्य वृ॒ज्याः॑ उरु॑ नः॑ इंद्रः॑ कृ॒णु॒व॒त् ऊं॑ लो॒कं॥ २॥ कृ॒तं नः॑ य॒ज्ञं वि॒दथे॑षु चारु॑ कृ॒तं ब्रह्मा॑णि सू॒रिषु॑ प्रऽशस्ता॒ उपो॑ र॒यिः॑ दे॒वऽजू॑तः नः॑ एतु॒ प्र नः॑ स्पा॒र्हा॒भिः॑ ऊ॒तिऽभिः॑ ति॒रे॒तं॥ ३॥ अ॒स्मे इंद्रा॑वरु॒णा॒ वि॒श्वऽवा॑रं र॒यिं ध॒त्तं॑ वसु॑ऽमंतं पु॒रु॒ऽक्षुं॑ प्र यः॑ आ॒दि॒त्यः॑ अनृ॑ता मि॒नाति॑ अमि॑ता॒ भूरेः॑ दयते॑ वसू॑नि॥ ४॥ इ॒मं इंद्रं॑ वरु॑णं अ॒ष्ट॒ मे॒ गीः॑ प्र आ॒व॒त् तो॒के तन॑ये तूतुजा॒ना सु॒ऽर॒त्नासः॑ दे॒वऽवी॑तिं गमेम॒ यूयं पा॒त॒ स्व॒स्ति॒ऽभिः॑ सदा॑ नः॑ ॥ ५॥ ६॥

॥ ८५॥ पु॒नी॒षे वां॑ अरु॒क्षसं॑ मनी॒षां सोमं॑ इंद्रा॑य वरु॑णाय जु॒ह्व॑त् घृत॑ऽप्रतीकां उ॒पसं॑ न दे॒वीं ता नः॑ यामं॑न् उरु॒ष्य॒तां॑ अभी॑के॥ १॥ स्पर्ध॑ते वै ऊं॑ दे॒वऽहू॑ये अ॒र्चं येषु॑ ध्व॒जेषु॑ दि॒द्यवः॑ पत॑न्ति यु॒वं तान् इंद्रा॑वरु॒णौ॑ अमि॒त्रान् हतं॑ परा॑चः॑ शर्वा॑ वि॒षू॒चः॑॥ २॥ आ॒पः॑ चित् हि स्व॒ऽय॒शसः॑ सदः॑ऽसु दे॒वीः इंद्रं॑ वरु॑णं दे॒वता॑ धुः॑ कृ॒ष्टीः॑ अ॒न्यः॑ धा॒र्य॒ति॒ प्रऽवि॑क्ताः वृ॒चा॒णि॑ अ॒न्यः॑ अ॒प्र॒तीनि॑ हंति॑॥ ३॥ सः सु॒ऽक्रतुः॑ ऋ॒तऽचित् अ॒स्तु॒ होता॑ यः आ॒दि॒त्या॒ शर्व॑सा वां॑ नम॑स्वान् आ॒ऽव॒वर्त॑त् अ॒र्वसे॑ वां ह॒विष्मा॑न् असत् इत् सः सु॒वि॒ताय॑ प्रय॑स्वान्॥ ४॥ इ॒मं इंद्रं॑ वरु॑णं अ॒ष्ट॒ मे॒ गीः॑ प्र आ॒व॒त् तो॒के तन॑ये तूतुजा॒ना सु॒ऽर॒त्नासः॑ दे॒वऽवी॑तिं गमेम॒ यूयं पा॒त॒ स्व॒स्ति॒ऽभिः॑ सदा॑ नः॑ ॥ ५॥ ७॥

॥ ८६॥ धीरा॑ त॒ अ॒स्य॒ महि॑ना॒ ज॒नू॒ंषि॑ वि॒ य॒ः त॒स्तंभ॑ रोद॒सी॑'

चिदुर्वीं। प्र नाकंमृष्वं नुंनुदे बृहंतं द्विता नक्षंचं प्रथंच्च भूमं॥१॥ उत स्वया तन्वा३ऽसं वदे तत्कदा न्व१तवंरुणे भुवानि। किं मे हव्यमहंणानो जुषेत कदा मृळीकं सुमना अभि ख्यं॥२॥ पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छं। समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते॥३॥ किमाग आस वरुण ज्येष्ठं यत्स्तोतारं जिघांससि सखायं। प्र तन्मे वोचो दूळभ स्वधावोऽवं त्वानेना नमसा तुर इयां॥४॥ अवं दुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः। अव राजन्पशुकृतं न तायुं सृजा वत्सं न दामो वसिष्ठं॥५॥ न स स्वो दक्षो वरुण धृतिः सा सुरा मन्युर्विभीदको अचित्तिः। अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता॥६॥ अरे दासो न मीळ्हुषे करण्यहं देवाय भूर्णयेऽनागाः। अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति॥७॥ अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु। शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः॥८॥८॥

॥ ८७ ॥ १–७ वसिष्ठः ॥ वरुणः ॥ त्रिष्टुप् ॥

॥८७॥ रदंत्पथो वरुणः सूर्याय प्रार्णांसि समुद्रियां नदीनां। सर्गो न सृष्टो अवंतीरनायञ्जकार महीरवनीरहंभ्यः॥१॥ आत्मा ते वातो रज आ नवीनोत्पशुर्न भूर्णिर्यवसे सस्वान्। अंतर्महो वरुण दीद्यानो विश्वा ते धाम वरुण प्रियाणि॥२॥ परि स्पशो वरुणस्य स्मदिष्टा उभे पश्यंति रोदसी सुमेके। ऋतावानः कवयो यज्ञधीराः प्रचेतसो य उपमंत्रमूवं॥३॥ उवाच मे वरुणो मेधिराय त्रिः सप्त नामाघ्न्या

चित् उर्वीं प्र नाकं चृष्वं नुनुदे बृहंतं द्विता नक्षंतं पप्रथंत् च भूमं ॥१॥ उत स्वयां तन्वां सं वदे तत् कदा नु अंतः वरुणे भुवानि किं मे हव्यं अहृणानः जुषेत कदा मृळीकं सुऽमनाः अभि ख्यं ॥२॥ पृच्छे तत् एनः वरुण दिदृक्षु उपो एमि चिकितुषः विऽपृच्छं सुमानं इत् मे कवयः चित् आहुः अयं हु तुभ्यं वरुणः हृणीते ॥३॥ किं आगः आस वरुण ज्येष्ठं यत् स्तोतारं जिघांससि सखायं प्र तत् मे वोचः दुःऽदभ स्वधाऽवः अव त्वा अनेनाः नमसा तुरः दयां ॥४॥ अव दुधानिं पित्र्यां सृज नः अव या वयं चकृम तनूभिः अव राजन् पशुऽतृपं न तायुं सृज वत्सं न दाम्नः वसिष्ठं ॥५॥ नसः स्वः दक्षः वरुण धृतिः सा सुरा मन्युः विऽभीदकः अचित्तिः अस्ति ज्यायान् कनीयसः उपऽअरे स्वप्नः चन इत् अनृतस्य प्रऽयोता ॥६॥ अरे दासः न मीळ्हुषे कराणि अहं देवाय भूर्णये अनागाः अचेतयत् अचितः देवः अर्यः गृत्सं राये कविऽतरः जुनाति ॥७॥ अयं सु तुभ्यं वरुण स्वधाऽवः हृदि स्तोमः उपऽश्रितः चित् अस्तु शं नः क्षेमे श जं योगे नः अस्तु यूयं पात स्वस्तिऽभिः सदा नः ॥८॥८॥

॥८७॥ रदत् पथः वरुणः सूर्याय प्र अर्णांसि समुद्रियां नदीनां सर्गः न सृष्टः अवंतीः चृतऽयन् चकार महीः अवनीः अहंऽभ्यः ॥१॥ आत्मा ते वातः रजः आ नवीनोत् पशुः न भूर्णिः यवसे ससऽवान् अंतः महीं बृहतीं रोदसीं दमे विश्वा ते धाम वरुण प्रियाणि ॥२॥ परि स्पशः वरुणस्य स्मत्ऽइष्टाः उभे पश्यंति रोदसी सुऽमेकैः चृतऽवानः कवयः यज्ञऽधीराः प्रऽचेतसः ये जुषयंत मन्म ॥३॥ उवाच मे वरुणः मेधिराय त्रिः सप्त नाम अघ्न्या

बिभर्ति। विद्वान्पदस्य गुह्या न वोचद्युगाय विप्र उपराय शिक्षन्॥४॥ तिस्रो द्यावो निहिता अंतरस्मिन्तिस्रो भूमीरुपराः षड्विधानाः। गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेंखं हिरण्ययं शुभे कं॥५॥ अव सिंधुं वरुणो द्यौरिव स्याद्वृसो न श्वेतो मृगस्तुविष्मान्। गंभीरशंसो रजसो विमानः सुपारक्षत्रः सतो अस्य राजा॥६॥ यो मृळयाति चक्रुषे चिदागो वयं स्याम वरुणे अनागाः। अनु व्रतान्यदितेरुधंतो यूयं पात स्वस्तिभिः सदा नः॥७॥९॥

॥ ८८ ॥ १–७ वसिष्ठः ॥ वरुणः ॥ विराट् ॥

॥८८॥ प्र शुंध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषेंभरस्व। य ईंमवीचं करते यजत्रं सहस्रामघं वृषणं बृहंतं॥१॥ अधा न्वस्य संदृशं जगन्वानग्नेरनीकं वरुणस्य मंसि। स्वर्यदश्मन्नधिपा उ अंधोऽभि मा वपुर्दृशये निनीयात्॥२॥ आ यदुहावं वरुणश्च नावं प्र यत्समुद्रमीरयाव मध्यं। अधि यदपां स्नुभिश्चरावं प्र प्रेंख ईंखयावहै शुभे कं॥३॥ वसिष्ठं ह वरुणो नाव्याधाद्ऋषिं चकार स्वपा महोभिः। स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्नादुषासः॥४॥ कदित्यानि नो सख्या बभूवुः सचावहे यदवृकं पुरा चित्। वृहंतं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते॥५॥ य आपिर्नित्यो वरुण प्रियः सन्त्वामागांसि कृणवत्सखा ते। मा त एनस्वंतो यक्षिन्भुजेम यंधि पमा विप्रः स्तुवते वरूथं॥६॥ ध्रुवासु त्वासु क्षितिषु क्षियंतो वयत्स्मत्पाशं वरुणो मुमोचत्। अवो वन्वाना अदितेरुपस्याद्यूयं पात स्वस्तिभिः सदा नः॥७॥१०॥

विभर्ति विद्वान् पदस्य गुह्या न वोचत् युगाय विप्रः उपराय शिक्षन् ॥४॥ तिस्रः द्यावः निऽहिताः अंतः अस्मिन् तिस्रः भूमीः उपराः षट्ऽविधानाः गृत्सः राजा वरुणः चक्रे एतं दिवि प्रऽईखं हिरण्ययं शुभे कं ॥५॥ अवं सिंधुं वरुणः द्यौःऽइव स्यात् द्रप्सः न श्वेतः मृगः तुविष्मान् गंभीरऽशंसः रजसः विऽमानः सुपारऽद्मा चः सतः अस्य राजा ॥६॥ यः मृळयाति चक्रुषे चित् आगः वयं स्याम वरुणे अनागाः अनु व्रतानि अदितेः ऋधंतः यूयं पात स्वस्तिऽभिः सदा नः ॥७॥९॥

॥८८॥ प्र शुंध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व यः ईं अर्वाचं करते यजत्रं सहस्रऽमघं वृषणं बृहंतं ॥१॥ अध नु अस्य संऽदृशं जगन्वान् अग्नेः अनीकं वरुणस्य मंसि स्वः यत् अर्यमन् अधिऽपाः ऊं अंधः अभि मा वपुः दृशये निनीयात् ॥२॥ आ यत् रुहावं वरुणः च नावं प्र यत् समुद्रं ईरयावं मध्यं अधि यत् अपां स्नुऽभिः चरावं प्र प्रऽईखे ईखयावहै शुभे कं ॥३॥ वसिष्ठं ह वरुणः नावि आ अधात् ऋषिं चकार सुऽअपाः महः-ऽभिः स्तोतारं विप्रः सुदिनऽत्वे अह्नां यात् नु द्यावः ततनन् यात् उषसः ॥४॥ क्व त्यानि नौ सख्या बभूवुः सचावहे यत् अवृकं पुरा चित् बृहंतं मानं वरुण स्वधाऽवः सहस्रऽद्वारं जगम गृहं ते ॥५॥ यः आपिः नित्यः वरुण प्रियः सन् त्वां आगांसि कृणवत् सखा ते मा ते एनंसवंतः यक्षिन् भुजेम यंधि स्म विप्रः स्तुवते वरूथं ॥६॥ ध्रुवासु त्वा आसु क्षितिषु क्षियंतं वि असमत् पाशं वरुणः मुमोचत् अवः वन्वानाः अदितेः उपऽस्यात् यूयं पात स्वस्तिऽभिः सदा नः ॥७॥१०॥

॥ ८९ ॥ १–५ वसिष्ठः ॥ वरुणः ॥ १–४ गायत्री । ५ जगती ॥

॥८९॥ मो षु वरुण मृन्मयं गृहं राजन्नहं गमं। मृळा सुक्षत्र मृळय ॥१॥ यदेमि प्रस्फुरन्निव दृतिर्न ध्मातो अद्रिवः। मृळा सुक्षत्र मृळय ॥२॥ क्वं: समह दीनता प्रतीपं जगमा शुचे। मृळा सुक्षत्र मृळय ॥३॥ अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारं। मृळा सुक्षत्र मृळय ॥४॥ यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्या३श्चरामसि। अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥५॥ ११॥ ५॥

॥ ९० ॥ १–७ वसिष्ठः ॥ १–४ वायुः । ५–७ इंद्रवायू ॥ त्रिष्टुप् ॥

॥९०॥ प्र वीर्या शुचयो दद्रिरे वामध्वर्युभिर्मधुमंतः सुतासः। वह वायो नियुतो याह्यच्छा पिबा सुतस्यांधसो मदाय ॥१॥ ईशानाय प्रहुतिं यस्त आनट् शुचिं सोमं शुचिपास्तुभ्यं वायो। कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते वाज्यस्य ॥२॥ राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवं। अधं वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके ॥३॥ उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः। गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः ससुरापः ॥४॥ ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहंति। इंद्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचंते ॥५॥ ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः। इंद्रवायू सूरयो विश्वमायुरर्वद्भिर्वीरैः पृतनासु सह्युः ॥६॥ अर्वंतो न श्रवसो भिक्षमाणा इंद्रवायू सुष्टुतिभिर्वसिष्ठाः। वाजयंतः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥७॥ १२॥

॥८९॥ मो॑ सु व॒रु॒ण मृ॒त्ऽमयं॑ गृ॒हं रा॒जन् अ॒हं ग॒मं मृ॒ळ सु॒ऽक्ष॒त्र मृ॒ळय॑ ॥१॥ यत् एमि॑ प्रस्फु॒रन्ऽइ॑व द॒तिः न ध्मा॒तः अ॒द्रिऽइ॑वः मृ॒ळ सु॒ऽक्ष॒त्र मृ॒ळय॑ ॥२॥ ऋ॒तं॑ः स॒म्ऽह॒ दी॒नता॑ प्र॒ति॒ऽई॒पं ज॒गम् शुचे॒ मृ॒ळ सु॒ऽक्ष॒त्र मृ॒ळय॑ ॥३॥ अ॒पां मध्ये॑ त॒स्थि॒ऽवांसं॑ तृ॒ष्णा अ॑विदत् ज॒रि॒तार॑ं मृ॒ळ सु॒ऽक्ष॒त्र मृ॒ळय॑ ॥४॥ यत् किं च॒ इ॒दं व॒रु॒ण॒ दैव्ये॑ जने॑ अ॒भि॒ऽद्रोहं॑ मनु॒ष्याः॑ चरा॑मसि अ॒चि॒त्ती यत् तव॑ धर्मं॑ युयो॒पि॒म मा नः॒ तस्मा॑त् एनसः देव रिरिषः ॥५॥११॥५॥

॥९०॥ प्र वी॒र॒ऽया शुच॑यः द॒दि॒रे॒ वां॒ अ॒ध्व॒र्यु॒ऽभिः॑ मधु॒ऽम॑ंतः सु॒ताः॑सः वह॑ वा॒यो॒ नि॒ऽयुतः॑ या॒हि॒ अच्छ॑ पिब॑ सु॒तस्य॑ अं॒धसः॑ मदा॑य ॥१॥ ई॒शा॒नाय॑ प्रऽहु॒तिं॑ यः ते॒ आन॑ट् शुचिं॑ सोमं॑ शुचि॒ऽपाः॑ तुभ्यं॑ वा॒यो॒ कृ॒णो॒षि॒ तं मर्त्ये॑षु प्र॒ऽशस्त॑ं जा॒तः॒ऽजा॑तः जायते वा॒जी अ॑स्य ॥२॥ रा॒ये नु यं॑ जज्ञतुः॑ रोद॑सी॒ इ॒मे॒ रा॒ये दे॒वी धि॒षणा॑ धाति॒ देव॑ं अध॑ वा॒युं नि॒ऽयुतः॑ सश्चत॒ स्वाः॒ उ॒त श्वे॒तं व॒सु॒ऽधिति॑ं नि॒ऽरे॒के ॥३॥ उ॒च्छन् उ॒षसः॑ सु॒ऽदि॒नाः॑ अ॒रि॒प्राः॑ उरु॑ ज्योतिः॑ वि॒वि॒दुः॑ दी॒ध्या॑नाः॑ गव्यं॑ चित् ऊ॒र्वं उ॒शिजः॑ वि॑ वव्रुः॑ तेषा॑ं अनु॑ प्र॒ऽदि॒वः॑ स॒सु॒ः॑ आपः॑ ॥४॥ ते स॒त्येन॑ मनसा दी॒ध्या॑नाः॑ स्वेन॑ यु॒क्ता॑सः॑ क्रतु॑ना वहंति॒ इंद्र॑वायू॒ वी॒र॒ऽवाहं॑ रथं॑ वां॒ ई॒शा॒न॒यो॒ः॑ अ॒भि॒ऽपृ॒क्ः॑ स॒चं॒ते॒ ॥५॥ ई॒शा॒नासः॑ ये दधते॑ स्वः॑ नः॒ गोभिः॑ अश्वे॑भिः॑ वसु॑ऽभिः॑ हिर॑ण्यैः॑ इंद्र॑वायू॒ सूर्यः॑ विश्वं॑ आयुः॑ अव॑त॒ऽभिः॑ वी॒रैः॑ पृत॑नासु सह्युः॑ ॥६॥ अव॑तः॑ न श्रव॑सः भिक्ष॑माणाः॑ इंद्र॒वा॒यू॒ सु॒स्तु॒ति॒ऽभिः॑ वसि॑ष्ठाः॑ वा॒ज॒ऽय॑ंतः॑ सु अव॑से हुवेम॒ यूयं॑ पात॒ स्व॒स्ति॒ऽभिः॑ सदा॑ नः॒ ॥७॥१२॥

॥ ९१ ॥ १–७ वसिष्ठः ॥ १, ३ वायुः । २, ४–७ इंद्रवायू ॥ त्रिष्टुप् ॥

॥ ९१ ॥ कुविदंग नमंसा ये वृधासः पुरा देवा अनवद्यास आसन्। ते वायवे मनवे वाधितायावांसयन्नुपसं सूर्येण ॥ १ ॥ उशंता दूता न दभाय गोपा मासश्च पाथः शरदश्च पूर्वीः। इंद्रवायू सुष्टुतिर्वामियाना मांडीकमीट्टे सुवितं च नव्यं ॥ २ ॥ पीवोअन्ना-नयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः। ते वायवे समनसो वि तंस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥ ३ ॥ यावत्तरस्तन्वो३ यावदोजो यावन्नरश्चक्षसा दीध्यानाः। शुचिं सोमं शुचिपा पातमस्मे इंद्रवायू सदंतं बर्हिरेदं ॥ ४ ॥ नियुवाना नियुतः स्पार्हवीरा इंद्रवायू सरथं यातमर्वाक्। इदं हि वां प्रभृतं मध्वो अग्रमधा प्रीणाना वि मुमुक्तमस्मे ॥ ५ ॥ या वां शतं नियुतो याः सहस्रमिंद्रवायू विश्ववाराः सचंते। आभिर्यातं सुविदत्राभिरर्वाक्पातं नरा प्रतिभृतस्य मध्वः ॥ ६ ॥ अर्वंतो न श्रवसो भिक्षमाणा इंद्रवायू सुष्टुतिभिर्वसिष्ठाः। वाजयंतः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥ १३ ॥

॥ ९२ ॥ १–५ वसिष्ठः ॥ १, ३–५ वायुः । २ इंद्रवायू ॥ त्रिष्टुप् ॥

॥ ९२ ॥ आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार। उपो ते अंधो मद्यमयामि यस्य देव दधिषे पूर्वपेयं ॥ १ ॥ *प्र सोता जोरो अध्वरेष्वस्थात्सोममिंद्राय वायवे पिबध्यै।* प्र यद्वां मध्वो अग्रियं भरंत्यध्वर्यवो देवयंतः शचीभिः ॥ २ ॥ प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे। नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥ ३ ॥ ये वायव इंद्रमादनास आदेवासो नितोशनासो अग्नेः। मंतो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमि-

॥९१॥ कुवित् अंग नमसा ये वृधासः पुरा देवाः अनवद्यासः आसन् ते वायवे मनवे बाधिताय अवासयन् उषसं सूर्येण ॥१॥ उशंता दूता न दभाय गोपा मासः च पाथः शरदः च पूर्वीः इंद्रवायू सुऽस्तुतिः वां इयाना माडींकं ईट्टे सुवितं च नव्यं ॥२॥ पीवःऽअन्नान् रयिऽवृधः सुऽमेधाः श्वेतः सिसक्ति निऽयुतां अभिऽश्रीः ते वायवे सऽमनसः वि तस्थुः विश्वा इत् नरः सुऽअपत्यानि चक्रुः ॥३॥ यावत् तरः तन्वः यावत् ओजः यावत् नरः चक्षसा दीध्यानाः शुचिं सोमं शुचिऽपा पातं अस्मे इंद्रवायू सदंतं बर्हिः आ इदं ॥४॥ निऽयुवाना निऽयुतः स्याहेऽवीराः इंद्रवायू सऽरथं यातं अर्वाक् इदं हि वां प्रऽभृतं मध्वः अग्रं अर्थं प्रीणाना वि मुमुक्तं अस्मे ॥५॥ याः वां शतं निऽयुतः याः सहस्रं इंद्रवायू विश्वऽवाराः सचंते आ आभिः यातं सुऽविदत्राभिः अर्वाक् पातं नरा प्रतिऽभृतस्य मध्वः ॥६॥ अर्वंतः न श्रवसः भिक्षमाणाः इंद्रवायू सुस्तुतिऽभिः वसिष्ठाः वाजऽयंतः सु अवसे हुवेम यूयं पात स्वस्तिऽभिः सदा नः ॥७॥१३॥

॥९२॥ आ वायो भूष शुचिऽपाः उप नः सहस्रं ते निऽयुतः विश्वऽवार उपो ते अंधः मद्यं अयामि यस्य देव दधिषे पूर्वऽपेयं ॥१॥ प्र सोता जीरः अध्वरेषु अस्थात् सोमं इंद्राय वायवे पिबध्यै प्र यत् वां मध्वः अग्रियं भरंति अध्वर्यवः देवऽयंतः शचीभिः ॥२॥ प्र याभिः यासि दाश्वांसं अच्छ नियुत्ऽभिः वायो इष्टये दुरोणे नि नः रयिं सुऽभोजसं युवस्व नि वीरं गव्यं अश्व्यं च राधः ॥३॥ ये वायवे इंद्रऽमादनासः आऽदेवासः निऽतोशनासः अर्यः मंतः वृचाणि सूरिऽभिः स्याम ससवांसः युधा नृऽभिः अमि-

वान् ॥४॥ आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञं। वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥५॥१४॥

॥ ९३ ॥ १–८ वसिष्ठः ॥ इंद्राग्नी ॥ त्रिष्टुप् ॥

॥९३॥ शुचिं नु स्तोमं नवजातमद्येंद्राग्नी वृत्रहणा जुषेथां। उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥१॥ ता मन्मसी शवसाना हि भूतं सांकृवृधा शवसा शूशुवांसा। क्षयंतो रायो यवसस्य भूरेः पृक्षं वाजस्य स्थविरस्य घृष्वेः ॥२॥ उपो हु यद्विदथे वाजिनो गुधीभिर्विप्राः प्रमतिमिच्छमानाः। अवैतो न काष्ठां नक्षमाणा इंद्राग्नी जोहुवतो नरस्ते ॥३॥ गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजं। इंद्राग्नी वृत्रहणा सुवज्रा प्र नो नयेंभिस्तिरतं देष्णैः ॥४॥ सं यन्महीमिंधती स्पर्धमाने तनूरुचा शूरसाता यतेते। अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन ॥५॥१५॥ इमामु षु सोमसुतिमुप न एंद्राग्नी सौमनसाय यातं। नू चिद्धि परिमुम्नायें अस्माना वां शंस्यद्भिर्ववृतीय वाजैः ॥६॥ सो अंग्न एना नमसा समिद्धोऽच्छा मित्रं वरुणमिंद्रं वोचेः। यत्सीमागंश्चकृमा तत्सु मृळ्ह तदर्यमादितिः शिश्रयंतु ॥७॥ एना अंग्न आशुषाणास इष्टीर्युवोः सचाभ्यश्याम वाजान्। मेंद्रो नो विष्णुर्मरुतः परि ख्यन्युयं पात स्वस्तिभिः सदा नः ॥८॥१६॥

॥ ९४ ॥ १–१२ वसिष्ठः ॥ इंद्राग्नी ॥ १–११ गायत्री । १२ अनुष्टुप् ॥

॥९४॥ इयं वामस्य मन्मन इंद्राग्नी पूर्व्यस्तुतिः। अभाद्वृष्टिरिवाजनि ॥१॥ शृणुतं अरित्रहवमिंद्राग्नी वनतं गिरः।

चान्॥४॥ आ नः नियुत्ऽभिः शतिनीभिः अध्वरं सहस्रिणीभिः उप याहि यज्ञं वायो अस्मिन् सवने मादयस्व यूयं पात स्वस्तिऽभिः सदा नः॥५॥१४॥

॥९३॥ शुचिं नु स्तोमं नवंऽजातं अद्य इंद्राग्नी वृचऽहुना जुषेथां उभा हि वां सुऽहवा जोहवीमि ता वाजं सद्यः उशते धेष्ठा॥१॥ ता सानसी यवसानां हि भूतं सा कंऽवृधा शवसा शूशुऽवांसा क्षयंतौ रायः यवसस्य भूरेः पृक्षं वाजस्य स्थविरस्य घृष्वेः॥२॥ उपो हु यत् विदथे वाजिनः गुः धीभिः विप्राः प्रऽमतिं इच्छमानाः अवंतः न काष्ठा नक्षमाणाः इंद्राग्नी जोहुवतः नरः ते॥३॥ गीःऽभिः विप्रः प्रऽमतिं इच्छमानः इष्टे रयिं यशसं पूर्वंऽभाजं इंद्राग्नी वृचऽहुना सुऽवज्रा प्र नः नव्येभिः तिरतं देष्णैः॥४॥ सं यत् मही मिथती स्पर्धमाने तनूऽरुचा शूरंऽसाता यतेते अदेवऽयुं विदथे देवयुऽभिः सचा हुतं सोमऽसुतं जनेन॥५॥१५॥ इमां ऊं सु सोमऽसुतिं उप नः आ इंद्राग्नी सोमनसाय यातं नु चित् हि परिऽमन्नाथे० अस्मान् आ वां शश्वंतऽभिः ववृतीय वाजैः॥६॥ सः अग्ने एना नमसा संऽइद्धः अच्छ मित्रं वरुणं इंद्रं वोचेः यत् सीं आगः चकृम तत् सु मृळ तत् अर्यमा अदितिः शिश्रथंतु॥७॥ एताः अग्ने आशुपाणासः इष्टीः युवोः सचा अभि अश्याम वाजान् मा इंद्रः नः विष्णुः मरुतः परि ख्यन् यूयं पात स्वस्तिऽभिः सदा नः॥८॥१६॥

॥९४॥ इयं वां अस्य मन्मनः इंद्राग्नी पूर्व्यऽस्तुतिः अभात् वृष्टिःऽइव अजनि॥१॥ शृणुतं जरितुः हवं इंद्राग्नी वनतं गिरः

ईशाना पिप्यतं धियः॥२॥ मा पापत्वाय नो नरेंद्राग्नी माभिशस्तये। मा नो रीरधतं निदे॥३॥ इंद्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे। धिया धेना अवस्यवः॥४॥ ता हि शश्वंत ईळत इत्था विप्रास ऊतये। सबाधो वाजसातये॥५॥ ता वां गीर्भिर्विपन्यवः प्रयस्वंतो हवामहे। मेधसाता सनिष्यवः॥६॥१७॥ इंद्राग्नी अवसा गंतमस्मभ्यं चर्षणीसहा। मा नो दुःशंस ईशत॥७॥ मा कस्य नो अरंरुषो धूर्तिः प्रणङ्मर्त्यस्य। इंद्राग्नी शर्म यच्छतं॥८॥ गोमद्धिरण्यवद्वसु यज्ञामश्वावदीमहे। इंद्राग्नी तद्वनेमहि॥९॥ यत्सोम आ सुते नरं इंद्राग्नी अजोहवुः। सप्तीवंता सपर्यवः॥१०॥ उक्थेभिर्वृचहंतमा या मंदाना चिदा गिरा। आंगूषैराविवासतः॥११॥ ताविद्दुःशंसं मर्त्यं दुर्विदांसं रक्षस्विनं। आभोगं हन्मना हतमुदधिं हन्मना हतं॥१२॥१८॥

॥९५॥ १–६ घमिष्ठः ॥ १, २, ४–६ सरस्वती। ३ सरस्वान् ॥ त्रिष्टुप् ॥

॥९५॥ प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः। प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिंधुरन्याः॥१॥ एकाचेतत्सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात्। रायश्चेतंती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय॥२॥ स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञियासु। स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत॥३॥ उत स्या नः सरस्वती जुषाणोप श्रवत्सुभगा यज्ञे अस्मिन्। मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः॥४॥ इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व। तव शर्मन्प्रियतमे दधाना उप स्येयाम

ईशाना पिप्यतं धियः॥२॥ मा पापत्वाय नो नरेन्द्राग्नी मा अभिशस्तये मा नो रीरधतं निदे॥३॥ इन्द्रे अग्ना नमो बृहत् सुवृक्तिं आ ईरयामहे धिया धेनोः अवस्यवः॥४॥ ता हि शश्वंतः ईळते हव्या विप्रासः ऊतये सबाधः वाजसातये॥५॥ ता वां गीःभिः विपन्यवः प्रयस्वंतः हवामहे मेधसाता सनिष्यवः॥६॥१७॥ इन्द्राग्नी अवसा आ गतं अस्मभ्यं चर्षणिसहा मा नः दुःशंसः ईशत॥७॥ मा कस्य नः अरंरुषः धूर्तिः प्रणक् मर्त्यस्य इन्द्राग्नी शर्म यच्छतं॥८॥ गोमत् हिरण्यवत् वसु यत् वां अश्वावत् ईमहे इन्द्राग्नी तत् वनेमहि॥९॥ यत् सोमे आ सुते नरः इन्द्राग्नी अजोहवुः सप्तिमंता सपर्यवः॥१०॥ उक्थेभिः वृचहन्तमा या मंदाना चित् आ गिरा आंगूषैः आविवासतः॥११॥ तौ इत् दुःशंसे मर्त्ये दुःविद्वांसं रक्षस्विनं आभोगं हन्मना हतं उदधिं हन्मना हतं॥१२॥१८॥

॥९५॥ प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणं आयसी पूः प्रबाबधाना रथ्या इव याति विश्वाः अपः महिना सिंधुः अन्याः॥१॥ एका अचेतत् सरस्वती नदीनां शुचिः यती गिरिभ्यः आ समुद्रात् रायः चेतंती भुवनस्य भूरेः घृतं पयः दुदुहे नाहुषाय॥२॥ सः चवृधे नर्यः योषणासु वृषा शिशुः वृषभः यज्ञियासु सः वाजिनं मघवत्भ्यः दधाति वि सातये तन्वं ममृजीत॥३॥ उत स्या नः सरस्वती जुषाणा उप श्रवत् सुभगा यज्ञे अस्मिन् मितज्ञुभिः नमस्यैः इयाना राया युजा चित् उत्तरा सखिभ्यः॥४॥ इमा जुह्वानाः युष्मत् आ नमोभिः प्रति स्तोमं सरस्वति जुषस्व नव शर्मन् प्रियतमे दधानाः उप स्येयाम

शरणं न वृक्षं॥५॥ अयमु ते सरस्वति वसिष्ठो द्वारावृतस्य सुभगे व्यावः। वर्धा शुभ्रे स्तुवते रासि वाजान्यूयं पात स्वस्तिभिः सदा नः॥६॥१९॥

॥ ९६ ॥ १–६ वसिष्ठः ॥ १–३ सरस्वती । ४–६ सरस्वान् ॥ १ बृहती । २ सतोबृहती । ३ प्रस्तारपंक्तिः । ४–६ गायत्री ॥

॥९६॥ बृहदु गायिषे वचोऽसुर्या नदीनाँ। सरस्वतीमिन्महया सुवृक्तिभिः स्तोमैर्वसिष्ठ रोदसी॥१॥ उभे यत्ते महिना शुभे अंधसी अधिक्षियंति पूरवः। सा नो बोध्यवित्री मरुत्सखा चोद राधो मघोनाँ॥२॥ भद्रमिद्भद्रा कृणवत्सरस्वत्यकवारी चेतति वाजिनीवती। गृणाना जमदग्निवत्स्तुवाना च वसिष्ठवत्॥३॥ जनीयंतो न्वग्रवः पुचीयंतः सुदानवः। सरस्वंतं हवामहे॥४॥ ये ते सरस्व ऊर्मयो मधुमंतो घृतश्चुतः। तेभिर्नोऽविता भव॥५॥ पीपिवांसं सरस्वतः स्तनं यो विश्वदर्शतः। भक्षीमहि प्रजामिषं॥६॥२०॥

॥ ९७ ॥ १–१० वसिष्ठः ॥ १ इंद्रः । २, ४–८ बृहस्पतिः । ३ ९ इंद्राबृहस्पती । १० इंद्राबृहस्पती ॥ त्रिष्टुप् ॥

॥९७॥ यज्ञे दिवो नृषदने पृथिव्या नरो यच्च देवयवो मदंति। इंद्राय यच्च सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च॥१॥ आ देव्या वृणीमहेऽवाँसि बृहस्पतिर्नो मह आ सखायः। यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव॥२॥ तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे। इंद्रं क्षोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा॥३॥ स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्ति। कामो रायः सुवीर्यस्य तं दात्पर्षन्नो अतिं सश्चतो अरिष्टान्॥४॥ तमा नो अर्कममृताय जुष्टमिमे धासुरमृता-

शरणं न वृक्षं॥५॥ अयं ऊं ते सरस्वति वसिष्ठः द्वारौ ऋतस्य सुऽभगे वि आवः० वर्धं शुभ्रे स्तुवते रासि वाजान् यूयं पात स्वस्तिऽभिः सदा नः॥६॥१९॥

॥९६॥ बृहत् ऊं गायिषे वचः असुर्यां नदीनां सरस्वतीं इत् महय सुवृक्तिऽभिः स्तोमैः वसिष्ठ रोदसी॥१॥ उभे यत्ते महिना शुभ्रे अंधसी अधिऽक्षियंति पूरवः सा नः बोधि अवित्री मरुत्ऽसखा चोद राधः मघोनां॥२॥ भद्रं इत् भद्रा कृणवत् सरस्वती अकवऽअरी चेतति वाजिनीऽवती गृणाना जमदग्निऽवत् स्तुवाना च वसिष्ठऽवत्॥३॥ जनिऽयंतः नु अग्नयः पुचिऽयंतः सुऽदानवः सरस्वंतं हवामहे॥४॥ ये ते सरस्वः ऊर्मयः मधुऽमंतः घृतऽश्चुतः तेभिः नः अविता भव॥५॥ पीपिऽवांसं सरस्वतः स्तनं यः विश्वऽदर्शतः भक्षीमहि प्रऽजां इषं॥६॥२०॥

॥९७॥ यज्ञे दिवः नृऽसदने पृथिव्याः नरः यत्र देवऽयवः मदंति इंद्राय यत्र सवनानि सुन्वे गमत् मदाय प्रथमं वयः च॥१॥ आ दैव्या वृणीमहे अवांसि बृहस्पतिः नः मह्ये आ सखायः यथा भवेम मीळ्हुषे अनागाः यः नः दाता पराऽवतः पिताऽइव॥२॥ तं ऊं ज्येष्ठं नमसा हविःऽभिः सुऽशेवं ब्रह्मणः पतिं गृणीषे इंद्रं श्लोकः महि दैव्यः सिसक्तु यः ब्रह्मणः देवऽकृतस्य राजा॥३॥ सः आ नः योनिं सदतु प्रेष्ठः बृहस्पतिः विश्वऽवारः यः अस्ति कामः रायः सुऽवीर्यस्य तं दात् पर्षत् नः अति सुष्टतः अरिष्टान्॥४॥ तं आ नः अर्के अमृताय जुष्टं द्रुमे धासुः अमृतां-

सः पुराजाः। शुचिक्रंदं यजतं पस्त्यानां बृहस्पतिमनुवाणं हुवेम ॥५॥२१॥ तं शुभ्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहंन्ति। सहस्रविद्यस्य नीलवत्सधस्थं नभो न रूपमरुषं वसानाः॥६॥ स हि शुचिः शुतपत्रः स शुंध्युर्हिरण्यवाशीरिषिरः स्वर्षाः। बृहस्पतिः स स्वावेश ऋभ्वः पुरू सखिभ्य आसुतिं करिष्ठः ॥७॥ देवी देवस्य रोदसी जनित्री बृहस्पतिं वावृधतुर्महित्वा। दक्षाय्याय दक्षता सखायः करद्ब्रह्मणे सुतरा सुगाधा॥८॥ इयं वां ब्रह्मणस्पते सुवृक्तिर्ब्रह्मेंद्राय वज्रिणे अकारि। अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः ॥९॥ बृहस्पते युवमिंद्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य। धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥१०॥२२॥

॥ ९८ ॥ १–७ वसिष्ठः ॥ १–६ इंद्रः। ७ इंद्राबृहस्पती ॥ त्रिष्टुप् ॥

॥ ९८ ॥ अध्वर्यवोऽरुणं दुग्धमंशुं जुहोतन वृषभाय क्षितीनां। गौराद्वेदीयाँ अवपानमिंद्रो विश्वाहेहाति सुतसोममिच्छन् ॥१॥ यद्धविषे प्रदिवि चार्वन्नं दिवेदिवे पीतिमिदस्य वक्षि। उत ह्रदोत मनसा जुषाण उशन्निंद्र प्रस्थितान्पाहि सोमान् ॥२॥ जज्ञानः सोमं सहसे पपाथ प्र तें माता महिमानमुवाच। एंद्र पप्राथोर्वंतरिक्षं युधा देवेभ्यो वरिवश्चकर्थ ॥३॥ यद्योधयो महतो मन्यमानान्त्साक्ष्माम् तान्बाहुभिः शाशदानान्। यद्वा नृभिर्वृत इंद्राभियुध्यास्तं त्वयाजिं सौश्रवसं जयेम ॥४॥ प्रेंद्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार। यदेददेवीरसहिष्ट मायाऽथाभवत्केवलः सोमो अस्य ॥५॥ तवेदं विश्वम्-

सः पुरा ऽजाः शुचिं ऽक्रंदं यजतं पस्त्यानां बृहस्पतिं अनर्वाणं हुवेम ॥५॥२१॥ तं गीर्भासः अरुषासः अश्वाः बृहस्पतिं सहऽवाहः वहंति सहः चित् यस्य नीलं ऽवत् सधऽस्थं नभः न रूपं अरुषं वसानाः ॥६॥ सः हि शुचिः शतऽपंचः सः शुंध्युः हिरण्यऽवाशीः द्युपिरः स्वःऽसाः बृहस्पतिः सः सुऽआवेशः ऋभ्वः पुरु सखिंऽभ्यः आऽसुतिं करिष्टः ॥७॥ देवी' देवस्य रोदसी' जनित्री' बृहस्पतिं ववृधतुः महिऽत्वा दक्षाय्याय दक्षत सखायः करत् ब्रह्मणे सुऽतरा सुऽगाधा ॥८॥ इयं वां ब्रह्मणः पते सुऽवृक्तिः ब्रह्म इंद्राय वज्रिणे अकारि अविष्टं धियः जिगृतं पुरंऽधीः जजस्तं अर्यः वनुषां अरातीः ॥९॥ बृहस्पते युवं इंद्रः च वस्वः दिव्यस्य ईशाने' उत पार्थिवस्य धत्तं रयिं स्तुवते कीरये चित् यूयं पात स्वस्तिऽभिः सदा नः ॥१०॥२२॥

॥९८॥ अध्वर्यवः अरुणं दुग्धं अंशुं जुहोतन वृषभाय क्षितीनां गौरात् वेदीयान् अवऽपानं इंद्रः विश्वाहा इत् याति सुतऽसोमं इच्छन् ॥१॥ यत् दधिषे प्रऽदिवि चारु अन्नं दिवेऽदिवे पीतिं इत् अस्य वक्षि उत हृदा उत मनसा जुषाणः उशन् इंद्र प्रऽस्थितान् पाहि सोमान् ॥२॥ जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानं उवाच आ इंद्र पप्रथ उरु अंतरिक्षं युधा देवेभ्यः वरिवः चकर्थ ॥३॥ यत् योधयाः महतः मन्यमानान् साक्षाम तान् बाहुऽभिः शाशदानान् यत् वा नृऽभिः वृतः इंद्र अभिऽयुध्याः तं त्वया आजिं सोत्वऽवसं जयेम ॥४॥ प्र इंद्रस्य वोचं प्रथमा कृतानि प्र नूतना मघऽवा या चकार यदा इत् अदेवीः असहिष्ट मायाः अथ अभवत् केवलः सोमः अस्य ॥५॥ तव इदं विश्वं अ-

भितः पशुव्यं१ यत्मघ्र्यसि चक्षसा सूर्यस्य। गवामसि गोपतिरेक इंद्र भक्षीमहि ते प्रयतस्य वस्वः॥६॥ बृहस्पते युवमिंद्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य। धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः॥७॥२३॥

॥ ९९ ॥ १–७ वसिष्ठः ॥ १–३ ७ विष्णुः । ४–६ इंद्राविष्णू ॥ त्रिष्टुप् ॥

॥९९॥ परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवंति। उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से॥१॥ न ते विष्णो जायमानो न जातो देव महिम्नः परमंतमाप। उदस्तभ्ना नाकमृषं बृहंतं दाधर्थ प्राचीं ककुभं पृथिव्याः॥२॥ इरावती धेनुमती हि भूतं सूयवसिनी मनवे दशस्या। व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः॥३॥ उरुं यज्ञाय चक्रथुरु लोकं जनयंता सूर्यमुषासमग्निं। दासस्य चिद्वृषशिप्रस्य मायाजग्रभुनरा पृतनाज्येषु॥४॥ इंद्राविष्णू दंहिताः शंबरस्य नव पुरो नवतिं च श्नथिष्टं। शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान्॥५॥ इयं मनीषा बृहती बृहंतोरुक्रमा नवसा वर्धयंती। रेरे वां स्तोमं विदथेषु विष्णो पिन्वंतमिषो वृजनेषिंद्र॥६॥ वषट्ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यं। वर्धंतु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः॥७॥२४॥

॥ १०० ॥ १–७ वसिष्ठः ॥ विष्णुः ॥ त्रिष्टुप् ॥

॥१००॥ नू मर्ता दयते सनिष्यन्यो विष्णव उरुगायाय दाशत्। प्र यः सचाचा मनसा यजात एतावंतं नर्यमाविवासात्॥१॥ त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामेवयावो

भितः पशव्यं यत् पश्यसि चक्षसा सूर्यस्य गवां असि गोऽपतिः एकः इंद्र भक्षीमहि ते प्रऽयतस्य वस्वः॥६॥ बृहस्पते युवं इंद्रः च वस्वः दिव्यस्य ईशाथे उत पार्थिवस्य धत्तं रयिं स्तुवते कीरये चित् यूयं पात स्वस्तिऽभिः सदा नः॥७॥२३॥

॥९९॥ परः मात्रया तन्वा वृधानः न ते महिऽत्वं अनु अश्नुवंति उभे इति ते विद्म रजसी इति पृथिव्याः विष्णो इति देव त्वं परमस्य वित्से॥१॥ न ते विष्णो इति जायमानः न जातः देव महिम्नः परं अंतं आप उत् अस्तभ्नाः नाकं ऋष्वं बृहंतं दाधर्थ प्राचीं ककुभं पृथिव्याः॥२॥ इराऽवती धेनुऽमती हि भूतं सुऽयवसिनी मनुषे दशस्या वि अस्तभ्नाः रोदसी इति विष्णो इति एते इति दाधर्थ पृथिवीं अभितः मयूखैः॥३॥ उरुं यज्ञाय चक्रथुः उ लोकं जनयंता सूर्यं उषसं अग्निं दासस्य चित् वृषऽशिप्रस्य मायाः जघ्नथुः नरा पृतनाऽजेषु॥४॥ इंद्राविष्णू इति दृंहिताः शंबरस्य नव पुरः नवतिं च श्नथिष्टं शतं वर्चिनः सहस्रं च साकं हथः अप्रति असुरस्य वीरान्॥५॥ इयं मनीषा बृहती बृहंता उरुऽक्रमा तवसा वर्धयंती रेवां स्तोमं विदथेषु विष्णो इति पिन्वंतं इषः वृजनेषु इंद्र॥६॥ वषट् ते विष्णो इति आसः आ कृणोमि तत् मे जुषस्व शिपिऽविष्ट हव्यं वर्धंतु त्वा सुऽस्तुतयः गिरः मे यूयं पात स्वस्तिऽभिः सदा नः॥७॥२४॥

॥१००॥ नु मर्तः दयते सनिष्यन् यः विष्णवे उरुऽगायाय दाशत् प्र यः सचा मनसा यजाते एतावंतं नर्यं आऽविवासात्॥१॥ त्वं विष्णो इति सुऽमतिं विषऽजन्यां अप्रऽयुतां एवऽयावन्

मतिं दाः। पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चन्द्रस्य रायः ॥२॥ त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा। प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नाम ॥३॥ वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन्। ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार ॥४॥ प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान्। तं त्वा गृणामि तवसमतव्यान्क्षयंतमस्य रजसः पराके ॥५॥ किमित्ते विष्णो परिचक्ष्यं भूत्प्र यद्ववक्षे शिपिविष्टो अस्मि। मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ॥६॥ वषट्ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यं। वर्धंतु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥७॥ २५ ॥ ६ ॥

॥ १०१ ॥ १–६ वसिष्ठः कुमारो वाग्नेयः ॥ पर्जन्यः ॥ त्रिष्टुप् ॥

॥ १०१ ॥ तिस्रो वाचः प्र वद ज्योतिरग्रा या एतद्दुहे मधुदोघमूधः। स वत्सं कृण्वन्गर्भमोषधीनां सद्यो जातो वृषभो रोरवीति ॥१॥ यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे। स त्रिधातु शरणं शर्म यंसत्त्रिवरूथं ज्योतिः स्वभिष्टयस्मे ॥२॥ स्तरीरु त्वद्वयति सूत उ त्वद्यथावशं तन्वं चक्र एषः। पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः ॥३॥ यस्मिन्विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा ससुरार्पः। चयः कीरास उपसेचनासो मध्वः श्चोतंत्यभितो विरप्शं ॥४॥ इदं वचः पर्जन्याय स्वराजे हृदो अस्त्वंतरं तज्जुजोषत्। मयोभुवो वृष्टयः संत्वस्मे सुपिप्पला ओषधीर्द्यौरीपाः ॥५॥ स रेतोधा वृषभः शश्व-

मतिं दाः पचेः यथा नः सुवितस्य भूरेः अश्वऽवतः पुरुऽचंद्रस्य रायः ॥२॥ चिः देवः पृथिवीं एषः एतां वि चक्रमे शतऽअर्चसं महिऽत्वा प्र विष्णुः अस्तु तवसः तवीयान् त्वेषं हि अस्य स्थविरस्य नामं ॥३॥ वि चक्रमे पृथिवीं एषः एतां क्षेत्राय विष्णुः मनुषे दशस्यन् ध्रुवासः अस्य कीरयः जनासः उरुऽक्षितिं सुऽजनिमा चकार ॥४॥ प्र तत् ते अद्य शिपिऽविष्ट नामं अर्यः गंसामि वयुनानि विद्वान् तं त्वा गृणामि तवसं अतव्यान् क्षयंतं अस्य रजसः पराके ॥५॥ किं इत् ते विष्णो परिऽचक्ष्यं भूत् प्र यत् ववक्षे शिपिऽविष्टः अस्मि मा वर्पः अस्मत् अप गूहः एतत् यत् अन्यऽरूपः समऽइये बभूथ ॥६॥ वर्षत् ते विष्णो आसः आ कृणोमि तत् मे जुषस्व शिपिऽविष्ट हव्यं वर्धंतु त्वा सुऽस्तुतयः गिरः मे यूयं पात स्वस्तिऽभिः सदा नः ॥७॥२५॥६॥

॥ १०१ ॥ तिस्रः वाचः प्र वद ज्योतिःऽअग्राः याः एतत् दुहे मधुऽदोघं ऊधः सः वत्सं कृण्वन् गर्भं ओषधीनां सद्यः जातः वृषभः रोरवीति ॥१॥ यः वर्धनः ओषधीनां यः अपां यः विश्वस्य जगतः देवः ईशे सः चिऽधातु शरणं शर्म यंसत् चिऽवतु ज्योतिः सुऽअभिष्टि अस्मे ॥२॥ स्तरीः ऊं त्वत् भवति सूते ऊं त्वत् यथा ऽवशं तन्वं चक्रे एषः पितुः पयः प्रति गृभ्णति माता तेन पित वर्धते तेन पुचः ॥३॥ यस्मिन् विश्वानि भुवनानि तस्थुः तिस्र द्यावः चेधा ससुः आपः चयः कोशासः उपऽसेचनासः मध्व श्चोतंति अभितः विऽरप्शं ॥४॥ इदं वचः पर्जन्याय स्वऽराजे हृद अस्तु अंतरं तत् जुजोषत् मयःऽभुवः वृष्टयः संतु अस्मे सुऽपिप्पलाः ओषधीः देवऽगोपाः ॥५॥ सः रेतःऽधाः वृषभः शश्व

तीनां तस्मिन्नात्मा जगतस्तस्थुषश्च। तन्मे ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः ॥६॥१॥

॥ १०२ ॥ १–३ वसिष्ठः कुमारो यामायनः ॥ पर्जन्यः ॥ गायत्री । २ पादनिचृत् ॥

॥१०२॥ पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे। स नो यवसमिच्छतु ॥१॥ यो गर्भमोषधीनां गवां कृणोत्यर्वतां। पर्जन्यः पुरुषीणाँ ॥२॥ तस्मा इदास्ये हविर्जुहोता मधुमत्तमं। इळां नः संयतं करत् ॥३॥२॥

॥ १०३ ॥ १–१० वसिष्ठः ॥ मंडूकाः ॥ १ अनुष्टुप् । २–१० त्रिष्टुप् ॥

॥ १०३ ॥ संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः। वाचं पर्जन्यजिन्विता प्र मंडूका अवादिषुः ॥१॥ दिव्या आपो अभि यदेनमायन्नृतिं न शुष्कं सरसी शयानं। गवामह न मायुर्वत्सिनीनां मंडूकानां वग्नुरत्रा समेति ॥२॥ यदीमेनाँ उशतो अभ्यवर्षीत्तृषावतः प्रावृषागतायां। अक्खलीकृत्या पितरं न पुत्रो अन्यो अन्यमुप वदंतमेति ॥३॥ अन्यो अन्यमनु गृभ्णात्येनोरपां प्रसर्गे यदमंदिषातां। मंडूको यदभिवृष्टः कनिष्क्रन्पृश्निः संपृक्त हरितेन वाचं ॥४॥ यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः। सर्वं तदेषां समृधेव पर्व यत्सुवाचो वदथनाध्यप्सु ॥५॥३॥ गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषां। समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदंतः ॥६॥ ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदंतः। संवत्सरस्य तदहः परि ष्ठ यन्मंडूकाः प्रावृषीणं बभूव ॥७॥ ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वंतः परिवत्सरीणं। अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवंति गुह्या न के

तीनां तस्मिन् आत्मा जगंतः तस्थुषः च तत् मा ऋतं पातु शत-ऽशारदाय यूयं पात स्वस्तिऽभिः सदा नः ॥६॥१॥

॥१०२॥ पर्जन्याय प्र गायत दिवः पुत्राय मीळ्हुषे सः नः यवसं इच्छतु ॥१॥ यः गर्भं ओषधीनां गवां कृणोति अर्वतां पर्जन्यः पुरुपीणां ॥२॥ तस्मै इत् आस्ये हविः जुहोत मधुमत्ऽतमं इळां नः संऽयतं करत् ॥३॥२॥

॥१०३॥ संवत्सरं शशयानाः ब्राह्मणाः व्रतऽचारिणः वाचं पर्जन्यऽजिन्वितां प्र मंडूकाः अवादिषुः ॥१॥ दिव्याः आपः अभि यत् एनं आयन् हतिं न शुष्कं सरसी शयानं गवां अहं न मायुः वत्सिनीनां मंडूकानां वग्नुः अत्रं सं एति ॥२॥ यत् ईं एनान् उशतः अभि अवर्षीत् तृष्याऽवंतः प्रावृषि आऽगतायां अखलीकृत्य पितरं न पुत्रः अन्यः अन्यं उप वदंतं एति ॥३॥ अन्यः अन्यं अनु गृभ्णाति एनोः अपां प्रऽसर्गे यत् अमंदिषातां मंडूकः यत् अभिऽवृष्टः कनिक्रन् पृश्निः संऽपृक्ति हरितेन वाचं ॥४॥ यत् एषां अन्यः अन्यस्य वाचं शाक्तस्यऽइव वदंति शिक्षमाणः सर्वं तत् एषां समृधाऽइव पर्व यत् सुऽवाचः वदथन अधि अप्ऽसु ॥५॥३॥ गोऽमायुः एकः अजऽमायुः एकः पृश्निः एकः हरितः एकः एषां समानं नामं बिभ्रतः विऽरूपाः पुरुऽचा वाचं पिपिशुः वदंतः ॥६॥ ब्राह्मणासः अतिऽरात्रे न सोमे सरः न पूर्णं अभितः वदंतः संवत्सरस्य तत् अहः परि ष्य यत् मंडूकाः प्रावृषीणं बभूव ॥७॥ ब्राह्मणासः सोमिनः वाचं अक्रत ब्रह्म कृण्वंतः परिऽवत्सरीणं अध्वर्यवः घर्मिणः सिस्विदानाः आविः भवंति गुह्याः न के

चित् ॥८॥ देवहितिं जुगुपुर्द्वादशस्यं चतुं नरो न प्र मिनंत्येते। संवत्सरे प्रावृषागंतायां तप्ता घर्मा आप्नुवंते विसर्गं ॥९॥ गोमायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसूनि। गवां मंडूका ददतः शतानि सहस्रसावे प्र तिरंत आयुः ॥१०॥४॥

॥ १०४ ॥ १–२५ वसिष्ठः ॥ १–९. १५. २५ इंद्रासोमौ रक्षोहणौ । ६. १६. १९–२२. २४ इंद्रः । ९. १२. १३ सोमः । १०. १४ अग्निः । ११ देवाः । १७ ग्रावाणः । १८ मरुतः । २३[1] वसिष्ठः । २३[2] पृथिव्यंतरिक्षे ॥ १–६. १८. २१. २३ जगती । ७ विष्टुब्गर्भा जगती वा । ८–१७. १९. २०. २२ २४ त्रिष्टुप् । २५ अनुष्टुप् ॥

॥१०४॥ इंद्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः। परा शृणीतमचितो न्योषतं हतं नुदेथां नि शिशीतमत्रिणः ॥१॥ इंद्रासोमा समघशंसमभ्यघं तपुर्यंयस्तु चरुरग्निवाँ इव। ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने ॥२॥ इंद्रासोमा दुष्कृतो वज्र आंतरनारंभणे तमसि प्र विध्यतं। यथा नातः पुनरेकश्चनोदयत्तद्वामस्तु सहसे मन्युमच्छवः ॥३॥ इंद्रासोमा वर्तयंतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणं। उतंक्षतं स्वर्यं पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥४॥ इंद्रासोमा वर्तयंतं दिवस्पर्यग्निं तप्तेभिर्युवमश्महन्मभिः। तपुर्वधेभिरजरेभिरत्रिणो नि पर्शाने विध्यतं यंतु निस्वरं ॥५॥५॥ इंद्रासोमा परि वां भूतु विश्वतं इयं मतिः कक्ष्याश्वेव वाजिनो। यां वां होत्रां परिहिनोमि मेधयेमा ब्रह्माणि नृपतीव जिन्वतं ॥६॥ प्रति स्मरेथां तुजयद्भिरेवैर्हतं दुहो रक्षसो भंगुरावतः। इंद्रासोमा दुष्कृते मा सुगं भूद्यो नः कदा चिदभिदासति द्रुहा ॥७॥ यो मा पाकेन मनसा चरंतमभिचष्टे अनृतेभिर्वचोभिः। आर्प इव काशिना संगृभीता असन्नस्वास्तं इंद्र वक्ता ॥८॥ ये पाकशंसं विहरंत एवैर्ये वा भद्रं दूषयंति

चित्॥८॥ देवऽहिंतिं जुगुपुः द्वादशस्य ऋतुं नरः न प्र मिनंति एते संवत्सरे प्रावृषि आऽगतायां तप्ताः घर्माः अश्नुवते विऽसर्गे॥९॥ गोऽमायुः अदात् अजऽमायुः अदात् पृश्निः अदात् हरितः नः वसूनि गवां मंडूकाः ददतः शतानि सहस्रऽसावे प्र तिरंते आयुः॥१०॥४॥

॥१०४॥ इंद्रासोमा तपंतं रक्षः उब्जतं नि अर्पयतं वृषणा तमः ऽवृधः परा शृणीतं अचितः नि ओषतं हतं नुदेथां नि शिशीतं अविषेः॥१॥ इंद्रासोमा सं अघऽशंसं अभि अघं तपुः ययस्तु चरुः अग्निवान्ऽइव ब्रह्मऽद्विषे क्रव्यऽअदे घोरऽचक्षसे द्वेषः धत्तं अनुवायं किमीदिने॥२॥ इंद्रासोमा दुःऽकृतः वव्रे अंतः अनारंभणे तमसि प्र विध्यतं यथा न अतः पुनः एकः चन उत्ऽअयत् तत् वां अस्तु सहसे मन्युऽमत् शवः॥३॥ इंद्रासोमा वर्तयंतं दिवः वधं सं पृथिव्याः अघऽशंसाय तर्हणं उत् तक्षतं स्वर्यं पर्वतेभ्यः येन रक्षः ववृधानं निऽजूर्वथः॥४॥ इंद्रासोमा वर्तयंतं दिवः परि अग्निऽतप्तेभिः युवं अश्मऽहन्मऽभिः तपुःऽवधेभिः अजरेभिः अविषेः नि पर्शाने विध्यतं यंतु निऽस्वरं॥५॥५॥ इंद्रासोमा परि वां भूतु विश्वतः दृयं मतिः कक्ष्या अश्वाऽइव वाजिना यां वां होचा परिऽहिनोमि मेधया इमा ब्रह्माणि नृपतीऽइव जिन्वतं॥६॥ प्रति स्मरेथां तुजयंतऽभिः एवैः हतं दुहः रक्षसः भंगुरऽवंतः इंद्रासोमा दुःऽकृते मा सुऽगं भूत यः नः कदा चित् अभिऽदासति दुहा॥७॥ यः मा पाकेन मनसा चरंतं अभिऽचष्टे अनृतेभिः वचःऽभिः आपःऽइव कासिना संऽगृभीताः असन् अस्तु असतः इंदु वक्ता॥८॥ ये पाकऽशंसं विऽहरंते एवैः ये वा भद्रं दूषयंति

स्वधाभिः। अर्हये वा-तान्प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे ॥९॥ यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस्तनूनाम्। रिपुः स्तेनः स्तेयकृद्भ्यमेतु नि षहीयतां तन्वा३तनां च ॥१०॥६॥ परः सो अस्तु तन्वा३तनां च तिस्रः पृथिवीरधो अस्तु विश्वाः। प्रति श्रुथतु यशो अस्य देवा यो नो दिवा दिप्सति यश्च नक्तम् ॥११॥ सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते। तयोर्यत्सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासत् ॥१२॥ न वा उ सोमो वृजिनं हिनोति न क्षत्रियं मिथुया धारयन्तं। हन्ति रक्षो हन्त्यासद्वदन्तमुभाविन्द्रस्य प्रसितौ शयाते ॥१३॥ यदि वाहमनृतदेव आस मोघं वा देवाँ अप्यूहे अग्ने। किमस्मभ्यं जातवेदो हृणीषे द्रोघवाचस्ते निर्ऋथं सचन्ताम् ॥१४॥ अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्तपति पूरुषस्य। अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह ॥१५॥७॥ यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह। इन्द्रस्तं हन्तु महता वधेन विश्वस्य जन्तोरधमस्पदीष्ट ॥१६॥ प्र या जिगाति खर्गलेव नक्तमप दुहा तन्वं गूहमाना। वधाँ अनन्ताँ अव सा पदीष्ट यावाणो अन्तु रक्षस उपब्दिः ॥१७॥ वि तिष्ठध्वं मरुतो विक्षु च्छन्ता गृभायत रक्षसः सं पिनष्टन। वयो ये भूत्वी पतयन्ति नक्तभिर्ये वा रिपो दधिरे देवे अध्वरे ॥१८॥ प्र वर्तय दिवो अश्मानमिन्द्र सोमशितं मा मा शिशाधि। प्राक्तादपाक्तादधरादुदक्तादभि जहि रक्षसः आपः ॥१९॥ एत उ त्ये पतयन्ति श्ववातव इन्द्रं दिप्सन्ति ॥८॥ ये शुभ्यं। शिशीते शुक्रः पिशुनेभ्यो वधं नूनं

स्वधाभिः अहये वा तान् प्रऽददातु सोमः आ वा दधातु निःऽऋतेः उपऽस्थे ॥९॥ यः नः रसं दिप्सति पित्वः अग्ने यः अश्वानां यः गवां यः तनूनां रिपुः स्तेनः स्तेयऽकृत् द्रुमं एतु नि सः हीयतां तन्वा तनाच ॥१०॥६॥ परः सः अस्तु तन्वा तनाच तिस्रः पृथिवीः अधः अस्तु विष्वाः प्रति शुष्यतु यशः अस्य देवाः यः नः दिवा दिप्सति यः च नक्तं ॥११॥ सुऽविज्ञानं चिकितुषे जनाय सत् च असत् च वचसी पस्पृधाते तयोः यत् सत्यं यतरत् ऋजीयः तत् इत् सोमः अवति हंति असत् ॥१२॥ न वै ऊं सोमः वृजिनं हिनोति न क्षत्रियं मिथुया धारयंतं हंति रक्षः हंति असत् वदंतं उभौ इंद्रस्य प्रऽसितौ शयाते ॥१३॥ यदि वा अहं अनृतऽदेवः आस सोमे वा देवान् अपिऽजुहे अग्ने किं अस्मभ्यं जातऽवेदः हृणीषे द्रोघऽवाचः ते निःऽऋथं सचंतां ॥१४॥ अद्य मुरीय यदि यातुऽधानः अस्मि यदि वा आयुः ततपं पुरुषस्य अधः सः वीरैः दशभिः वि यूयाः यः मा मोघं यातुऽधान इति आह ॥१५॥७॥ यः मा अमा यातुऽधान इति आह यः वा रक्षाः शुचिः अस्मि इति आह इंद्रः तं हंतु महता वधेन विश्वस्य जंतोः अधमः पदीष्ट ॥१६॥ प्र या जिगाति खर्गलाऽइव नक्तं अप दुहा तन्वं गूहमाना वव्रान् अनंतान् अव सा पदीष्ट यावाणः मंतु रक्षसः उपऽच्छैः ॥१७॥ वि तिष्ठध्वं मरुतः विक्षु इच्छत गृभायतं रक्षसः सं पिनष्टन वयः ये भूत्वी पतयंति नक्तऽभिः ये वा रिपः दधिरे देवे अध्वरे ॥१८॥ प्र वर्तय दिवः अश्मानं इंदु सोमऽशितं मघऽवन् सं शिशाधि प्राक्तात् अपाक्तात् अधरात् उदक्तात् अभि जहि रक्षसः पर्वतेन ॥१९॥ एते ऊं त्ये पतयंति श्वऽयातवः इंद्रं दिप्संति दिप्सवः अदाभ्यं शिशीते शुक्रः पिशुनेभ्यः वधं नूनं

सृजद्दशनिं यातुमद्भ्यः ॥२०॥८॥ इंद्रो यातूनामभवत्पराशरो हविर्मथीनामभ्या३ विवासतां। अभीदु शक्रः पर्स्पुर्यथा वनं पाचैव भिंदन्त्सत एंति रक्षसः॥२१॥ उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुं। सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इंद्र॥२२॥ मा नो रक्षो अभि नंड्मातुमावतामपोच्छतु मिथुना या किमीदिना। पृथिवी नः पार्थिवात्पात्वंहसो ऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥२३॥ इंद्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शार्शदानां। विमीवासो मूरदेवा ऋदंतु मा ते दृशन्त्सूर्यमुच्चरंतं॥२४॥ प्रति चक्ष्व वि चक्ष्वेंद्रश्च सोम जागृतं। रक्षोभ्यो वधमस्यतमशनिं यातुमद्भ्यः ॥२५॥९॥६॥७॥

॥ इति सप्तमं मंडलं समाप्तं ॥

॥१॥ १.२ प्रगाथो घौरः काण्वो वा। ३–२९ मेधातिथिर्मेध्यातिथी काण्वौ। ३०–३३ जासंगः प्रायोगिः। ३४ शश्वत्यांगिरस्यासंगस्य पत्नी ॥ १–२९ इंद्रः। ३०–३३ जासंगस्य दानस्तुतिः। ३४ जासंगः॥ १.३.५–३२ बृहती। २.४ सतोबृहती। ३३.३४ त्रिष्टुप्॥

॥१॥ मा चिंदन्यद्वि शंसत सखायो मा रिषण्यत। इंद्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥१॥ अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहं। विद्वेषणं संवननोभयंकरं मंहिष्ठमुभयाविनं ॥२॥ यच्चिद्धि त्वा जना इमे नाना हवंत ऊतये। अस्माकं ब्रह्मेदमिंद्र भूतु ते ऽहा विश्वा च वर्धनं ॥३॥ वि तर्तूर्येते मघवन्विपश्चितो ऽर्यो विपो जनानां। उप क्रमस्व पुरुरूपमा भर वाजं नेदिष्ठमूतये॥४॥ मुहे चन त्वामद्रिवः परा शुल्काय देयां। न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥५॥१०॥ वस्यॉं इंद्रासि मे पितुरुत भ्रातुरभुंजतः। माता च मे छदयथः समा वसो वसुत्वनाय रा-

सृजत् अशनिं यातुमत्ऽभ्यः ॥२०॥८॥ इंद्रः यातूनां अभवत् पराऽशुरः हविःऽमथीनां अभि आऽविवासतां अभि इत् ऊं शुक्रः पुरुषुः यथा वनं पाचाऽइव भिंदन् सतः एति रक्षसः॥२१॥ उलूकऽयातुं शुशुलूकऽयातुं जहि श्वऽयातुं उत कोकऽयातुं सुपर्णऽयातुं उत गृध्रऽयातुं दृषदाऽइव प्र मृण रक्षः इंद्र॥२२॥ मा नः रक्षः अभि नट् यातुऽमावतां अपं उच्छतु मिथुना या किमीदिना पृथिवी नः पार्थिवात् पातु अंहसः अंतरिक्षं दिव्यात् पातु अस्मान्॥२३॥ इंद्र जहि पुमांसं यातुऽधानं उत स्त्रियं मायया शार्शदानां विऽयीवासः मूरऽदेवाः चृदंतु मा ते हरसन् सूर्यं उत्ऽचरंतं॥२४॥ प्रतिं चक्ष्व वि चक्ष्व इंद्रः च सोम जागृतं रक्षःऽभ्यः चधं अस्यतं अशनिं यातुमत्ऽभ्यः॥२५॥९॥६॥७॥

॥ इति सप्तमं मंडलं समाप्तं ॥

॥१॥ मा चित् अन्यत् वि शंसत सखायः मा रिषण्यत इंद्रं इत् स्तोत वृषणं सचा सुते मुहुः उक्था च शंसत॥१॥ अवऽक्रक्षिणं वृषभं यथा अजुरं गां न चर्षणिऽसहं विऽद्वेषणं संऽवनना उभयंऽकरं महिष्ठं उभयाविनं॥२॥ यत् चित् हि त्वा जनाः इमे नाना हवंते ऊतये अस्माकं ब्रह्म इदं इंद्र भूतु ते अहा विश्वा च वर्धनं॥३॥ वि तर्तूर्यंते मघऽवन् विपःऽचितः अर्यः विपः जनानां उपं क्रमस्व पुरुऽरूपं आ भर वाजं नेदिष्ठं ऊतये॥४॥ महे चन त्वां अद्रिऽवः परा शुल्काय देयां न सहस्राय न अयुताय वाजिऽवः न शताय शतऽमघ॥५॥१०॥ वस्यान् इंद्र असि मे पितुः उत भ्रातुः अभुंजतः माता च मे छदयथः समा वसोः वसुऽत्वनाय रा-

धंसे ॥ ६ ॥ क्रियथ् क्रेदंसि पुरुचा चिद्धि ते मनः । अलंर्षि युध्म खजकृत्पुरंदर प्र गायचा अंगासिषुः ॥ ७ ॥ प्रास्मै गायत्रमर्चत वावातुर्यः पुरंदरः । याभिः काखस्योपं बर्हिरासदं यासद्वज्री भिनत्पुरः ॥ ८ ॥ ये ते संति दशग्विनः शतिनो ये सहस्रिणः । अश्वासो ये ते वृषणो रघुद्रुवस्तेभिर्नस्तूयमा गंहि ॥ ९ ॥ आ त्वद्य सबर्दुघां हुवे गायत्रवेपसं । इंद्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतं ॥ १० ॥ ११ ॥ यद्वदत्सूर एतशं वंकू वातस्य पर्णिना । वहत्कुत्समार्जुनेयं शतक्रतुस्तरद्गंधर्वमस्तृतं ॥ ११ ॥ य ऋते चिदभिश्रियः पुरा जत्रुभ्य आतृदः । संधाता संधिं मघवा पुरूवसुरिष्कर्ता विहुतं पुनः ॥ १२ ॥ मा भूम निष्ट्या इवेंद्र त्वदरणा इव । वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥ १३ ॥ अमंन्महीदनाशवोऽनुग्मासश्च वृत्रहन् । सकृत्सु ते महता शूर राधसानु स्तोमं मुदीमहि ॥ १४ ॥ यदि स्तोमं मम श्रवदस्माकमिंदुमिंदवः । तिरः पविंव ससृवांस आशवो मंदंतु तुग्मावृधः ॥ १५ ॥ १२ ॥ आ त्वद्य सधस्तुतिं वावातुः सख्युरा गंहि । उपस्तुतिर्मघोनां प्र त्वावत्वधा ते वश्मि सुष्टुतिं ॥ १६ ॥ सोता हि सोममद्रिभिरेमेनमप्सु धावत । गव्या वस्त्रेव वासयंत इन्दवो निर्धुक्षन्वक्षणाभ्यः ॥ १७ ॥ अध् अपो अधं वा दिवो बृहतो रोचनादधि । अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥ १८ ॥ इंद्राय सु मदिन्तमं सोमं सोता वरेण्यं । शक्रो यथा पीपयद्विश्वया धिया हिन्वानं न वाजयुं ॥ १९ ॥ मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा । भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥ २० ॥ १३ ॥ मदेने-

र्धसे॥६॥ कं इ॒यथ॒ कं इ॑त् अ॒सि पु॒रु॒ऽचा॑ चि॒त् हि ते॒ मनः॑ अत॑ऽपि युध्म॒ खज॑ऽकृत् पु॒रं॒ऽद॒र् प्र गा॑यत्राः अगा॑सिषुः॥७॥ प्र अ॒स्मै॒ गा॒यत्रं॑ अर्चत॒ व॒वा॒तुः॒ यः पु॒रं॒ऽद॒रः॒ याभिः॑ काण्व॒स्य॑ उप॑ ब॒र्हिः॒ आ॒ऽअस॑दं॒ यास॑त् व॒ज्री॒ भि॒नत् पुरः॑॥८॥ येते॒ सं॒ति॒ दृ॒ग॒ऽग्विनः॑ शु॒ति॒ऽनः॒ ये सु॒ऽहस्त्रि॑णः॒ अश्वा॑सः॒ येते॒ वृ॒ष॒ण॒ः र॒घु॒ऽद्रु॒वः॒ तेभिः॑ नः॒ तूय॑ं॒ आ ग॒हि॒॥९॥ आ तु अ॒द्य स॒व॒ः॒ऽदु॒घा॑ हु॒वे गा॒यत्र॑ऽवेपसं इंद्रं॒ धे॒नुं सु॒ऽदु॒घा॑ अ॒न्यां इषं॑ उ॒रु॒ऽधारां॒ अ॒र॒ं॒ऽकृ॒तं॑॥१०॥११॥ यत् तु॒दत् सू॒रः॒ एत॑शं॒ वं॒कू॑ वा॒तस्य॑ प॒र्णिना॑ वह॑न् कुत्से॑ आ॒र्जु॒नेय॑ं श॒त॒ऽक्र॒तुः॒ त्स॒रं॒त् ग॒न्ध॒र्वं॑ अस्तृ॑तं॥११॥ यः च॒कृते॑ चि॒त् अ॒भि॒ऽश्रिषः॑ पु॒रा ज॒चु॒ऽभ्यः॑ आ॒ऽनृदः॑ संऽधा॑ता सं॒ऽधिं म॒घऽवा॑ पु॒रु॒ऽवसुः॑ इ॒ष्कर्तं॑ वि॒ऽहु॒तं पु॒नः॑॥१२॥ माभूम॑ निष्ट्याः॑ऽइव इंद्र॒ त्वत् अ॑रणाः॑ऽइव व॒नानि॑ न प्र॒ऽज॒हि॒तानि॑ अद्रिऽवः॒ दुरो॑षासः॒ अ॒म॒न्म॒हि॒॥१३॥ अ॒म॒न्म॒हि॒ इत् अ॒नाश॑वः॒ अ॒नु॒ऽयासः॑ च॒ वृ॒च॒ऽहन् स॒कृत् सु ते॒ म॒हि॒ना॒ पू॒र्॒ऽराध॑सा अनु॑ स्तो॒मं॑ मुदीमहि॥१४॥ यदि॑ स्तो॒मं॑ मम॑ श्रव॑त् अ॒स्माकं॑ इंद्रं॒ इंद॑वः॒ तिरः॑ प॒विं॑ स॒सृ॒ऽवांसः॑ आ॒शव॑ः॒ मंदं॑तु तुग्र्य॒ऽवृधः॑॥१५॥१२॥ आ तु अ॒द्य स॒ध॒ऽस्तु॒तिं॑ व॒वा॒तुः॒ सख्युः॑ आ ग॒हि॒ उप॑ऽस्तुतिः म॒घोनां॑ प्र त्वा॒ अ॒व॒तु॒ अ॒ध॒ ते॒ व॒ग्मि॒ सु॒ऽस्तु॒तिं॑॥१६॥ सोत॑ हि सोमं॑ अद्रिऽभिः॒ आ ई॒ एनं॑ अप्ऽसु धा॒व॒त॒ गव्या॑ वस्त्रा॑ऽइव वासयं॑तः इत् नरः॑ निः धु॒क्षा॒न् व॒क्षणा॑भ्यः॥१७॥ अ॒ध॒ ज्मः अ॒ध॒ वा॒ दि॒वः बृ॒ह॒तः रो॒च॒नात् अधि॑ अ॒या व॒र्ध॒स्व॒ त॒न्वा॑ गि॒रा मम॑ आ जा॒ता सु॒ऽक्र॒तो॒ इति॑ पूण॒॥१८॥ इंद्रा॑य सु म॒दि॒न्ऽत॒मं सोमं॑ सोत॒ वरे॑ण्यं श॒क्रः एनं॑ पीपयत् विश्व॑या धि॒या हि॒न्वा॒नं न वा॒ज॒ऽयुं॑॥१९॥ मा त्वा॒ सोम॑स्य गल्द॒या सदा॑ याचन् अ॒हं गि॒रा भूर्णिं॑ मृ॒गं न सव॑नेषु चुक्रुधं॑ कः ईशा॑नं न याचिषत्॥२०॥१३॥ मदं॑न

धंसे ॥ ६ ॥ क्रेयष् क्रेदंसि पुरुचा चिद्धि ते मनः । अलर्षि युध्म खजकृत्पुरंदर् प्र गायचा अंगासिषुः ॥ ७ ॥ प्रास्मै गायचमर्चत वावातुर्यः पुरंदरः । याभिः काण्वस्योमं वर्हिरासदं यासद्वज्री भिनत्पुरः ॥ ८ ॥ ये ते संति दशग्विनः शतिनो ये सहस्रिणः । अश्वासो ये ते वृषणो रघुद्रुवस्तेभिर्नस्तूयमा गहि ॥ ९ ॥ आ त्वद्य सबर्दुघां हुवे गायचवेपसं । इंद्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतं ॥ १० ॥ ११ ॥ यत्तुदत्सूर एतशं वंकू वातस्य पर्णिना । वहत्कुत्समार्जुनेयं शतक्रतुस्त्सरन्नंधर्वमस्तृतं ॥ ११ ॥ य ऋते चिदभिश्रियः पुरा जत्रुभ्य आतृदः । संधाता संधिं मघवा पुरूवसुरिष्कर्ता विहुतं पुनः ॥ १२ ॥ मा भूम निष्ट्या इवेंद्र त्वदरणा इव । वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥ १३ ॥ अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन् । सकृत्सु ते महता शूर राधसानु स्तोमं मुदीमहि ॥ १४ ॥ यदि स्तोमं मम श्रवदस्माकमिंद्रमिंदवः । तिरः पविचं ससृवांस आशवो मंदंतु तुग्र्यावृधः ॥ १५ ॥ १२ ॥ आ त्वद्य सधस्तुतिं वावातुः सख्युरा गहि । उपस्तुतिर्मघोनां प्र त्वावत्वधा ते वश्मि सुष्टुतिं ॥ १६ ॥ सोता हि सोममद्रिभिरेमेनमप्सु धावत । गव्या वस्त्रेव वासयंत इन्नरो निर्धुक्षन्नूक्षणोभ्यः ॥ १७ ॥ अध ज्मो अध वा दिवो बृहतो रोचनादधि । अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥ १८ ॥ इंद्राय सु मदिन्तमं सोमं सोता वरेण्यं । शक्र एणं पीपयद्विश्वया धिया हिन्वानं न वाजयुं ॥ १९ ॥ मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा । भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥ २० ॥ १३ ॥ मदेने-

धंसे॥६॥ क्रं इयथ क्रं इत् असि पुरुऽचा चित् हि ते मनः अलंऽपि युध्म खजऽकृत् पुरंऽदर प्र गायचाः अगासिषुः॥७॥ प्र अस्मै गायचं अर्चत वचातुः यः पुरंऽदरः याभिः काखस्य उप वर्हिः आऽसदं यासंत् वज्री भिनत् पुरः॥८॥ येते संति दृगऽग्विनः शुतिनः येसहुस्रिणः अश्वासः येते वृषणः रघुऽद्रुवः तेभिः नः तूयं आ गहि॥९॥ आ तु अद्य सवःऽदुघां हुवे गायचऽवेपसं इंद्रं धेनुं सुऽदुघां अन्यां इषं उरुऽधारां अरंऽकृतं॥१०॥११॥ यत् तुदत् सूरः एतशं वंकू वातस्य पर्णिनां वहंत् कुत्सं आर्जुनेयं शतऽक्रतुः त्सरंत् गंधर्वं अस्तृतं॥११॥ यः ऋते चित् अभिऽश्रियः पुरा जचुऽभ्यः आऽनृदः संऽधाता संऽधिं मघऽवा पुरुऽवसुः इष्कर्ता विऽहुतं पुनः॥१२॥ माभूम निष्टाःऽइव इंद्र त्वत् अरणाःऽइव वनानि न प्रऽजहितानि अद्रिऽवः दुरोषासः अमन्महि॥१३॥ अमंन्महि इत् अनाशवः अनुयासः च वृचऽहन् सकृत् सु ते महता शूर राधसा अनु स्तोमं मुदीमहि॥१४॥ यदिं स्तोमं ममं श्रवंत् अस्माकं इंद्रं इंदवः तिरः पविचं ससृऽवांसः आशवः मंदंतु तुग्यऽवृधः॥१५॥१२॥ आ तु अद्य सधऽस्तुतिं ववातुः सख्युः आ गहि उपंऽस्तुतिः मघोनां प्र त्वा अवतु अर्धं ते वश्मि सुऽस्तुतिं॥१६॥ सोतं हि सोमं अद्रिंऽभिः आ ईं एनं अप्ऽसु धावत गव्या वस्त्राऽइव वासयंतः इत् नरः निः धुक्षन् वक्षणाभ्यः॥१७॥ अर्धं जमः अर्धं वा दिवः बृहतः रोचनात् अधि अया वर्धस्व तन्वा गिरा ममं आ जाता सुऽक्रतो॰ पृण॥१८॥ इंद्राय सु मदिन्ऽतमं सोमं सोत वरेण्यं शक्रः एनं पीपयत् विश्वया धिया हिन्वानं न वाजऽयुं॥१९॥ मा त्वा सोमस्य गल्दया सदा याचन् अहं गिरा भूर्णिं मृगं न सवनेषु चुकुधं कः ईशानं न याचिषत्॥२०॥१३॥ मदेन

पितं मदंमुग्रमुग्रेण शवंसा। विश्वेषां तरुतारं मदच्युतं मदे हि ष्मा ददाति नः॥२१॥ शेवांरे वार्यां पुरु देवो मर्ताय दाशुषे। स सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः॥२२॥ एंद्र याहि मत्स्वं चित्रेणं देव राधसा। सरो न प्रास्युदरं सपीतिभिरा सोमेभिरुरु स्फिरं॥२३॥ आ त्वां सहस्रमा शतं युक्ता रथे हिरण्यये। ब्रह्मयुजो हरय इंद्र केशिनो वहंतु सोमपीतये॥२४॥ आ त्वा रथे हिरण्यये हरी मयूरशेप्या। शितिपृष्ठा वहतां मध्वो अंधसो विवक्षणस्य पीतये॥२५॥१४॥ पिवा त्वस्य गिर्वणः सुतस्य पूर्वपा इव। परिष्कृतस्य रसिन इयमासुतिश्चारुमदाय पत्यते॥२६॥ य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः। गमत्स शिप्री न स योषदा गमद्धवं न परि वर्जति॥२७॥ त्वं पुरं चरिष्णुं वधैः शुष्णस्य सं पिणक्। त्वं भा अनु चरो अध द्विता यदिंद्र हव्यो भुवः॥२८॥ मम त्वा सूर उदिते मम मध्यंदिने दिवः। मम प्रपित्वे अपिशर्वरे वसवा स्तोमासो अवृत्सत॥२९॥ स्तुहि स्तुहीदेते घा ते मंहिष्ठासो मघोनां। निंदितार्ष्वः प्रपथी परमज्या मघस्य मेध्यातिये॥३०॥१५॥ आ यदश्वान्वनंन्वतः श्रद्धयाहं रथे रुहं। उत वामस्य वसुनश्चिकेतति यो अस्ति याद्वः पशुः॥३१॥ य ऋज्रा मर्त्यं मामहे सह त्वचा हिरण्यया। एष विश्वान्यभ्यस्तु सौभगा संगस्य स्वनद्रथः॥३२॥ अध श्रायोगिरंति दासदन्यानासंगो अग्ने दशभिः सहस्रैः। अधोक्षणो दश मह्यं रुशंतो नळा इव सरसो निरतिष्ठन्॥३३॥ अन्वस्य स्थूरं ददृशे पुरस्तादनस्य ऊरुरवरंवमाणः। शश्वंती नारीभिचक्ष्याह सुभद्रमस्य भोजनं बिभर्ति॥३४॥१६॥

इषितं मदं उग्रं उग्रेण शवसा विश्वेषां तरुतारं मदच्युतं मदे हि स्म ददाति नः॥२१॥ शेवरि वार्या पुरु देवः मर्ताय दाशुषे सः सुन्वते च स्तुवते च रासते विश्वऽगूर्तः अरिऽस्तुतः॥२२॥ आ इंद्र याहि मत्स्वं चित्रेण देव राधसा सरः न प्रासि उदरं सपीतिऽभिः आ सोमेभिः उरु स्फिरं॥२३॥ आ त्वा सहस्रं आ शतं युक्ताः रथे हिरण्यये वहऽयुजः हरयः इंद्र केशिनः वहंतु सोमऽपीतये॥२४॥ आ त्वा रथे हिरण्यये हरी मयूरऽशेप्या शितिऽपृष्ठा वहतां मध्वः अंधसः विवक्षणस्य पीतये॥२५॥१४॥ पिब तु अस्य गिर्वणः सुतस्य पूर्वपाःऽइव परिऽकृतस्य रसिनः इयं आऽसुतिः चारुः मदाय पत्यते॥२६॥ यः एकः अस्ति दंसना महान् उयः अभि व्रतैः गमंत् सः शिप्री नः सः योषत् आ गमत् हवं न परिवर्जति॥२७॥ त्वं पुरं चरिष्णुं वधैः शुष्णस्य सं पिणक् त्वं भाः अनु चरः अध द्विता यत् इंद्र हव्यः भुवः॥२८॥ मम त्वा सूरे उत ऽइते मम मध्यंदिने दिवः मम प्रऽपित्वे अपिऽशर्वरे वसो आ स्तोमासः अवृत्सत॥२९॥ स्तुहि स्तुहि इत् एते घ ते मंहिष्ठासः मघोनां निंदितऽअश्वः प्रऽपथी परमऽज्याः मघस्य मेध्यऽअतिथे॥३०॥१५॥ आ यत् अश्वान् वनंन्ऽवतः श्रद्धया अहं रथे रुहं उत वामस्य वसुनः चिकेतति यः अस्ति याद्वः पशुः॥३१॥ यः चर्जा मह्यं ममहे सह त्वचा हिरण्यया एपः विश्वानि अभि अस्तु सौभगा आऽसंगस्य स्वनत्ऽरथः॥३२॥ अध श्रायोगिः अतिं दासत् अन्यान् आऽसंगः अग्रे दशऽभिः सहस्रैः अध उक्षणः दश मह्यं रुशंतः नळाःऽइव सरसः निः अतिष्ठन्॥३३॥ अनु अस्य स्थूरं दृहशे पुरस्तात् अनस्थाः ऊरुः अवऽरंबमाणः शश्वती नारी अभिऽचक्ष्य आह सुऽभद्रं अर्य भोजनं विभ्वि॥३४॥१६॥

॥ २ ॥ १–४० मेधातिथिः काण्वः प्रियमेधश्चाङ्गिरसः । ४१. ४२ मेधातिथिः ॥ १–४० इंद्रः । ४१. ४२ विभिंदोर्दानस्तुतिः ॥ १–२१. २९–४२ गायत्री । २८ अनुष्टुप् ॥

॥२॥ इदं वसो सुतमंधः पिबा सुपूर्णमुदरं । अनाभयिन्नरिमा तें ॥१॥ नृभिर्धूतः सुतो अश्नैरव्यो वारैः परिपूतः । अश्वो न निक्तो नदीषु ॥२॥ तं ते यवं यथा गोभिः स्वादुमंकर्म श्रीणंतः । इंद्र त्वास्मिन्त्सधमादे ॥३॥ इंद्र इत्सोमपा एक इंद्रः सुतपा विश्वायुः । अंतर्देवान्मर्त्यांश्च ॥४॥ न यं शुक्रो न दुराणीनं तृपा उरुव्यचसं । अपस्पृधंते सुहार्दं ॥५॥१७॥ गोभिर्यदीमन्ये अस्मन्मृगं न व्रा मृगयंते । अभित्सरंति धेनुभिः ॥६॥ चय इंद्रस्य सोमाः सुतासः संतु देवस्य । स्वे क्षये सुतपावंभिः ॥७॥ चयः कोशासः श्चोतंति तिस्रश्चम्वः सुपूर्णाः । समाने अधि भासंन् ॥८॥ शुचिरसि पुरुनिष्टाः क्षीरं मंध्यत आशीतंः । दुग्धा मंदिष्टः पूरस्य ॥९॥ इमे त इंद्र सोमास्त्वा अस्मे सुतासः । शुक्रा आशिरं याचंते ॥१०॥१८॥ ताँ आशिरं पुरोळाशमिंद्रेमं सोमं श्रीणीहि । रेवंतं हि त्वा शृणोमि ॥११॥ हत्सु पीतासो युध्यंते दुर्मदासो न सुरायां । ऊधर्न नग्ना जरंते ॥१२॥ रेवाँ इद्रेवतः स्तोता स्यात्त्वावतो मघोनः । प्रेदु हरिवः श्रुतस्य ॥१३॥ उक्थं चन शस्यमानमगोरारिरा चिकेत । न गायत्रं गीयमानं ॥१४॥ मा नं इंद्र पीयत्नवे मा शर्धते परा दाः । शिक्षा शचीवः शचीभिः ॥१५॥१९॥ वयमु त्वा तदिदर्था इंद्र त्वायंतः सखायः । कण्वा उक्थेभिर्जरंते ॥१६॥ न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ । तवेदु स्तोमं चिकेत ॥१७॥ इच्छंति देवाः सुन्वंतं न स्वप्नाय स्पृहयंति । यंति प्रमादमतंद्राः ॥१८॥ ओ षु प्र याहि वाजेभिर्मा हृणीया अभ्यस्मान् । महाँ इव युवजानिः ॥१९॥ मो षु त्वा वाघतश्चनारे अस्मत् । आ-

॥२॥ इदं वसो सुतं अंधः पिब सुऽपूर्णं उदरं अनाभयिन् रिम ते ॥१॥ नृऽभिः धूतः सुतः अश्वैः अव्यः वारैः परिऽपूतः अद्भिः न निक्तः नदीषु ॥२॥ तं ते यवं यथा गोभिः स्वादुं अकर्म श्रीणंतः इंद्र त्वा अस्मिन् सधऽमादे ॥३॥ इंद्रः इत् सोमऽपाः एकः इंद्रः सुतऽपाः विष्वऽआयुः अंतः देवान् मर्त्यान् च ॥४॥ न यं शुक्रः न दुःऽआशीः न नृम्राः उरुऽव्यचसं अपऽस्पृणंते सुऽहार्दं ॥५॥१७॥ गोभिः यत् ईं अन्ये अस्मत् मृगं न व्राः मृगयंते अभिऽअसरंति धेनुऽभिः ॥६॥ चयः इंद्रस्य सोमाः सुतासः संतु देवस्य स्वे क्षये सुतऽपावनः ॥७॥ चयः कोशासः श्रोतंति तिस्रः चम्वः सुऽपूर्णाः समाने अधि भामन् ॥८॥ शुचिः असि पुरुनिःऽस्थाः धीरैः मध्यतः आऽशीतः दभ्रा मंदिष्ठः शूरस्य ॥९॥ इमे ते इंद्र सोमाः तीव्राः अस्मे सुतासः शुक्राः आऽशिरं याचंते ॥१०॥१८॥ तान् आऽशिरं पुरोळाशं इंद्र इमं सोमं श्रीणीहि रेवंतं हि त्वा शृणोमि ॥११॥ हन्ऽसु पीतासः युध्यंते दुःऽमदासः न सुरायां ऊधः न नग्नाः जरंते ॥१२॥ रेवान् इत् रेवतः स्तोता स्यात् त्वाऽवंतः मघोनः प्र इत् ऊं हरिऽवः श्रुतस्य ॥१३॥ उक्थं चन शस्यमानं अगोः अरिः आ चिकेत न गायत्रं गीयमानं ॥१४॥ मा नः इंद्र पीयत्नवे मा शर्धते परा दाः शिष्ठा शचीऽवः शचीभिः ॥१५॥१९॥ वयं ऊं त्वा तदित्ऽअर्थाः इंद्र त्वाऽयंतः सखायः कण्वाः उक्थेभिः जरंते ॥१६॥ न घ ईं अन्यत् आ पपन वज्रिन् अपसः नविष्टौ तव इत् ऊं स्तोमं चिकेत ॥१७॥ इच्छंति देवाः सुन्वंतं न स्वप्नाय स्पृहयंति यंति प्रऽमादं अतंद्राः ॥१८॥ ओ सु प्र याहि वाजेभिः मा हृणीयाः अभि अस्मान् महान्ऽइव युवऽजानिः ॥१९॥ मो सु अद्य दुःऽहनावान् सायं करत् आरे अस्मत् अ-

श्रीर इंव जामाता ॥२०॥२०॥ विद्मा ह्यस्य वीरस्य भूरिदा-वरीं सुमतिं। चिपु जातस्य मनाँसि ॥२१॥ आ तू पिंच कण्वमंतं न घा विद्म शवसानात्। यश्चर्तरं शतमूतेः॥२२॥ ज्येष्ठेन सोत-रिंद्राय सोमं वीराय शक्राय। भरा पिबन्नर्याय॥२३॥ यो वेदिष्टो अध्यध्वन्यश्वावंतं जरितृभ्यः। वाजं स्तोतृभ्यो गोमंतं ॥२४॥ पन्यंपन्यमित्सोतार आ धावत मद्याय। सोमं वीराय शूरांय ॥२५॥२१॥ मातां वृत्रहा सुतंमा घा गमन्नारे अस्मत्। नि यंमते शतमूतिः ॥२६॥ एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायं। गीर्भिः श्रुतं गिर्वणसं ॥२७॥ स्वादवः सोमा आ यांहि श्रीताः सोमा आ यांहि। शिप्रिन्नृपींवः शचींवो नाय-मच्छा सधमादं ॥२८॥ स्तुतश्च यास्वा वर्धंति महे राधंसे नृम्णायं। इंद्र कारिणं वृधंतः॥२९॥ गिरश्च यास्ते गिर्वाह उक्था च तुभ्यं तानिं। सचा दधिरे शवाँसि ॥३०॥२२॥ एवेदेष तुंवि-कूमिर्वाजाँ एको वज्रहस्तः। सनादमृक्तो दयते ॥३१॥ हंता वृत्रं दक्षिणेनेंद्रः पुरू पुरुहूतः। महान्महीभिः शचींभिः ॥३२॥ य-स्मिन्विश्वाश्चर्षणयं उत च्यौत्ना जयाँसि च। अनु धेन्मंदी मघोनः ॥३३॥ एष एतानिं चकारेंद्रो विश्वा योऽतिं शृण्वे। वाजदावा मघोनाँ ॥३४॥ प्रभर्ता रथं गव्यंतमपाकाच्चिद्यम-वंति। इन्नो वसु स हि वोळ्हा ॥३५॥२३॥ सनिता विप्रो अवैद्विहंता वृत्रं नृभिः शूरः। सत्योऽविता विधंते ॥३६॥ यजंध्वेनं प्रियमेधा इंद्रं सचाचा मनसा। यो भूत्सोमैः सत्यमद्वा ॥३७॥ गाथश्रवसं सत्पतिं श्रवस्कामं पुरुत्मानं। कण्वासो गात वाजिनं ॥३८॥ य चर्षते चिन्नास्पदेभ्यो दात्सखा नृभ्यः शचींवान्। ये अस्मिन्कामंमशिश्रयन् ॥३९॥ इत्था

श्रीरःऽइव जामाता॥२०॥२०॥ विद्म हि अस्य वीरस्य भूरिऽदावरी सुऽमतिं चिपु जातस्य मनांसि॥२१॥ आ तु सिंच कण्वऽमंतं न घ विद्म शवसानात् यशःऽतरं शतंऽऊतेः॥२२॥ ज्येष्ठेन सोतुः इंद्राय सोमं वीराय शक्राय भरं पिबत् नर्याय॥२३॥ यः वेदिष्ठः अव्यथिपुं अश्वऽवंतं जरितृऽभ्यः वाजं स्तोतृऽभ्यः गोऽमंतं॥२४॥ पन्यंऽपन्यं इत् सोतारः आ धावत मद्याय सोमं वीराय शूराय॥२५॥२१॥ पाता वृत्रऽहा सुतं आ घ गमत् न आरे अस्मत् नि यमते शतंऽऊतिः॥२६॥ आ इह हरी ब्रह्मऽयुजा शग्मा वक्षतः सखायं गीःऽभिः श्रुतं गिर्वणसं॥२७॥ स्वादवः सोमाः आ याहि श्रीताः सोमाः आ याहि शिप्रिन् ऋषिंऽवः शचींऽवः न अयं अच्छं सधऽमादं॥२८॥ स्तुतः च याः त्वा वर्धंति महे राधसे नृम्णाय इंद्र कारिणं वृधंतः॥२९॥ गिरः च याः ते गिर्वाहः उक्था च तुभ्यं तानि सचा दधिरे शवांसि॥३०॥२२॥ एव इत् एषः तुविऽकूर्मिः वाजान् एकः वज्रंऽहस्तः सनात् अमृक्तः दयते॥३१॥ हंता वृत्रं दक्षिणेन इंद्रः पुरु पुरुऽहूतः महान् महीभिः शचीभिः॥३२॥ यस्मिन् विश्वाः चर्षणयः उत च्यौत्ना जयांसि च अनु घ इत् मंदी मघोनः॥३३॥ एषः एतानि चकार इंद्रः विश्वा यः अति शृण्वे वाजऽदावा मघोनां॥३४॥ प्रऽभर्ता रथं गव्यंतं अपाकात् चित् यं नयंति इनः वसु सः हि वोळ्हा॥३५॥२३॥ सनिता विप्रः अवंतऽभिः हंता वृत्रं नृऽभिः शूरः सत्यः अविता विधंतं॥३६॥ यजध्वं एनं प्रियऽमेधाः इंद्रं सचाचा मनसा यः भूत् सोमैः सत्यऽमंद्वा॥३७॥ गाथऽश्रवसं सत्ऽपतिं श्रवःऽकामं पुरुऽत्मानं कण्वासः गात वाजिनं॥३८॥ यः ऋते चित् गाः मदेभ्यः दात् सखा नृऽभ्यः शचींऽवान् ये अस्मिन् कामं अश्रियन्॥३९॥ इत्था

श्रीर् इव जामाता ॥ २० ॥ २० ॥ विश्वा ह्यस्य वीर्यं भूरिदावरी सुमतिं। चिषु जातस्य मनांसि ॥ २१ ॥ आ तू पिंच कण्वमंतं न घा विन्द शवसानात्। यश्चर्तरं शतमूतेः ॥ २२ ॥ ज्येष्ठेन सोतरिंद्राय सोमं वीराय शक्राय। भरा पिबन्नर्याय ॥ २३ ॥ यो वेदिष्टो अव्यथिष्वश्वावंतं जरितृभ्यः। वाजं स्तोतृभ्यो गोमंतं ॥ २४ ॥ पन्यंपन्यमित्सोतार आ धावत मद्याय। सोमं वीराय शूराय ॥ २५ ॥ २१ ॥ पाता वृत्रहा सुतमा घा गमन्नारे अस्मत्। नि यंमते शतमूतिः ॥ २६ ॥ एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायं। गीभिः श्रुतं गिर्वणसं ॥ २७ ॥ स्वादवः सोमा आ याहि श्रीताः सोमा आ याहि। गिम्रिन्नृपींवः शचीवो नायमच्छा सधमादं ॥ २८ ॥ स्तुतश्च यास्वा वर्धति महे राधसे नृम्णाय। इंद्र कारिणं वृधंतः ॥ २९ ॥ गिरश्च यास्ते गिर्वाह उक्था च तुभ्यं तानि। सत्रा दधिरे शवांसि ॥ ३० ॥ २२ ॥ एवेदेष तुविकूमिर्वाजाँ एको वज्रहस्तः। सनादमृक्तो दयते ॥ ३१ ॥ हंता वृत्रं दक्षिणेनेंद्रः पुरू पुरुहूतः। महान्महीभिः शचीभिः ॥ ३२ ॥ यस्मिन्विश्वाश्वर्पणय उत क्षोणा जयांसि च। अनु घेन्मंदी मघोनः ॥ ३३ ॥ एष एतानि चकारेंद्रो विश्वा योऽति शृण्वे। वाजदावा मघोनां ॥ ३४ ॥ प्रभर्ता रथं गव्यंतमपाकाच्चिद्यमयंति। दूनो वसु स हि षोळ्हा ॥ ३५ ॥ २३ ॥ सनिता विप्रो अर्वद्भिर्हंता वृत्रं नृभिः शूरः। मत्वोऽवित्ता विधंतं ॥ ३६ ॥ यज्ञंयज्ञं प्रियमेधा इंदुं सचाचा मनसा। यो भूत्सोमैः सत्यमंद्वा ॥ ३७ ॥ गाधश्चवसं सत्पतिं श्रवस्कामं पुरुष्टमानं। कण्वासो गात वाजिनं ॥ ३८ ॥ य ऋते चिन्नाम्यदेभ्यो दाममा नृभ्यः शचीवान्। ये अस्मिन्कामंमश्रियन् ॥ ३९ ॥ इत्या

श्रीरः३इव जामाता॥२०॥२०॥ विद्म हि अस्य वीरस्य भूरि३दा-वरी सु३मतिं चिपु जातस्य मनाँसि॥२१॥ आ तु सिंच कण्व३मंतं न घ विद्म शवसानात् यशः३तरं शतं३ऊतेः॥२२॥ ज्येष्ठेन सोतुः इंद्राय सोमं वीराय शक्राय भरं पिबत् नर्याय॥२३॥ यः वेदिष्ठः अव्यथिपुं अश्व३वंतं जरितृ३भ्यः वाजं स्तोतृ३भ्यः गो३मंतं॥२४॥ पन्यं३मन्यं इत् सोतारः आ धावत मद्याय सोमं वीराय शूराय ॥२५॥२१॥ माता वृच३हा सुतं आ घ गमत् न आरे अस्मत् नि यमते शतं३ऊतिः॥२६॥ आ इह हरी ब्रह्म३युजा शग्मा वक्षतुः सखायं गीः३भिः श्रुतं गिर्वणसं॥२७॥ स्वादवः सोमाः आ याहि श्रीताः सोमाः आ याहि शिप्रिन् ऋषिं३वः शचीं३वः न अयं अच्छ सध३मादं॥२८॥ स्तुतः च याः त्वा वर्धंति महे राधसे नृम्णाय इंद्र कारिणं वृधंतः॥२९॥ गिरः च याः ते गिर्वाहः उक्था च तुभ्यं तानिं सचा दधिरे शवाँसि॥३०॥२२॥ एव इत् एषः तुविं३कूर्मिः वाजान् एकः वज्र३हस्तः सनात् अमृक्तः दयते॥३१॥ हंता वृचं दक्षिणेन इंद्रः पुरु पुरु३हूतः महान् महीभिः शचीभिः॥३२॥ यस्मिन् विश्वाः चर्षणयः उत च्यौत्ना जयाँसि च अनु घ इत् मंदी मघोनः॥३३॥ एषः एतानिं चकार इंद्रः विश्वा यः अतिं शृण्वे वाज३दावा मघोनां॥३४॥ प्रभर्ता रथं गव्यंतं अपाकात् चित् यं अवंति इनः वसुं सः हि वोळ्हा॥३५॥२३॥ सनिता विप्रः अवंत३भिः हंता वृचं नृ३भिः शूरः सत्यः अविता विधंतं॥३६॥ यजध्व एनं प्रिय३मेधाः इंद्रं सचाचा मनसा यः भूत् सोमैः सत्य-३मंद्वा॥३७॥ गाथ३श्रवसं सत्३पतिं श्रवः३कामं पुरु३त्मानं कण्वासः गात वाजिनं॥३८॥ यः क्षिते चित् गाः पदेभ्यः दात् सतः नृ३भ्यः शचीं३वान् ये अस्मिन् कामं अश्रियन्॥३९॥ इत्था

धीवंतमद्रिवः काण्वं मेध्यातिथिं। मेषो भूतोऽभि यन्नयः॥४०॥ शिक्षा विभिंदो अस्मै चत्वार्ययुता ददत्। अष्टा परः सहस्रा॥४१॥ उत सु त्ये पयोवृधा माकी रणस्य नप्त्या। जनित्वनाय मामहे॥४२॥२४॥

॥ ३ ॥ १–२४ मेध्यातिथिः काण्वः ॥ १–२० इंद्रः । २१–२४ पाकस्थाम्नः कौरयाणस्य दानस्तुतिः ॥ १–२० प्रागाथं । २१ अनुष्टुप् । २२. २३ गायत्री । २४ बृहती ॥

॥३॥ पिबा सुतस्य रसिनो मत्स्वा न इंद्र गोमतः। आपिर्नो बोधि सधमाद्यो वृधे ऽस्माँ अवंतु ते धियः॥१॥ भूयामं ते सुमतौ वाजिनो वयं मा नः स्तरभिमातये। अस्मान्चित्राभिरवताद्भिष्टिभिरा नः सुम्नेषु यामय॥२॥ इमा उ त्वा पुरूवसो गिरो वर्धंतु या मम। पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत॥३॥ अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे। सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये॥४॥ इंद्रमिद्देवतातय इंद्रं प्रयत्यध्वरे। इंद्रं समीके वनिनो हवामह इंद्रं धनस्य सातये॥५॥२५॥ इंद्रो महा रोदसी पप्रथच्छव इंद्रः सूर्यमरोचयत्। इंद्रं ह विश्वा भुवनानि येमिरे इंद्रे सुवानास इंदवः॥६॥ अभि त्वा पूर्वपीतय इंद्र स्तोमेभिरायवः। समीचीनास ऋभवः समस्वरन्रुद्रा गृणंत पूर्व्यं॥७॥ अस्येदिंद्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि। अद्या तमस्य महिमानमायवोऽनुं ष्टुवंति पूर्वथा॥८॥ तत्त्वा यामि सुवीर्यं तद्ब्रह्म पूर्वचित्तये। येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ॥९॥ येना समुद्रमसृजो महीरपस्तदिंद्र वृष्णि ते शवः। सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे॥१०॥२६॥ शग्धी न इंद्र यत्त्वा रयिं यामि सुवीर्यं। शग्धि वाजाय प्रथमं सिषासते शग्धि स्तोमाय पूर्व्यं॥११॥ शग्धी

धीऽवँतं अद्रिऽवः काण्वं मेध्यऽअतिथिं मेधः भूतः अभि यन् अयः॥४०॥ शिक्षा विऽभिंदो० अस्मै चत्वारिं अयुता दर्दत् अष्ट परः सहस्रा॥४१॥ उत सु त्ये' पयःऽवृधा माकी' रणस्य नश्या जनिऽत्वनाय ममहे॥४२॥२४॥

॥३॥ पिबं सुतस्य रसिनः मत्स्वं नः इंद्र गोऽमंतः आपिः नः बोधि सधऽमाद्यः वृधे अस्मान् अवंतु ते धियः॥१॥ भूयामं ते सुऽमतौ वाजिनः वयं मा नः स्तः अभिऽमातये अस्मान् चित्राभिः अवताद् अभिष्टिऽभिः आ नः सुम्नेषु यमय॥२॥ इमाः ऊं' त्वा पुरुऽवसो० गिरः वर्धंतु याः मम पावकऽवर्णाः शुचयः विपःऽचितः अभि स्तोमैः अनूषत॥३॥ अयं सहस्रं ऋषिऽभिः सहःऽकृतः समुद्रःऽइव पप्रथे सत्यः सः अस्य महिमा गृणे शवः यज्ञेषु विप्रऽराज्ये॥४॥ इंद्रं इत् देवऽतातये इंद्रं प्रऽयति अध्वरे इंद्रं संऽईके वनिनः हवामहे इंद्रं धनस्य सातये॥५॥२५॥ इंद्रः महा रोदसी' पप्रथत् शवः इंद्रः सूर्यं अरोचयत् इंद्रं ह विश्वा भुवनानि येमिरे इंद्रे सुवानासः इंदवः॥६॥ अभि त्वा पूर्वऽपीतये इंद्र स्तोमेभिः आयवः संऽईचीनासः ऋभवः सं अस्वरन् रुद्राः गृणंत पूर्व्यं॥७॥ अस्य इत् इंद्रः ववृधे वृष्णयं शवः मदे सुतस्य विष्णवि अद्या तं अस्य महिमानं आयवः अनु स्तुवंति पूर्वऽथा॥८॥ तत् त्वा यामि सुऽवीर्यं तत् ब्रह्म पूर्वऽचित्तये येन यतिऽभ्यः भृगवे धनं हिते येन प्रस्कण्वं आविथ॥९॥ येन समुद्रं असृजः महीः अपः तत् इंद्र वृष्णि ते शवः सद्यः सः अस्य महिमा न संऽनशे यं क्षोणीः अनुऽचक्रदे॥१०॥२६॥ शुष्मिन् नः इंद्र यत् त्वा रयिं यामि सुऽवीर्यं शुष्मिन् वाजाय प्रथमं सिसासते शुष्मिन् स्तोमाय पूर्व्य॥११॥ शुष्मि

नो अस्य यज्ञं पौरमाविथ धियं इंद्र सिषासतः। शृधि यथा रुशमं श्यावकं कृपमिंद्र प्रावः स्वर्णरं ॥१२॥ कण्वो अतसीनां तुरो गृणीत मर्त्यः। नही त्वस्य महिमानमिंद्रियं स्वर्गृणंत आनशुः ॥१३॥ कदु स्तुवंत ऋतयंत देवत ऋषिः को विप्र ओहते। कदा हवं मघवन्निंद्र सुन्वतः कदु स्तुवत आ गमः ॥१४॥ उदु त्ये मधुमत्तमा गिरः स्तोमास ईरते। सचाजितो धनसा अक्षितोतयो वाजयंतो रथा इव ॥१५॥२७॥ कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमानशुः। इंद्रं स्तोमेभिर्महयंत आयवः प्रियमेधासो अस्वरन् ॥१६॥ युक्ष्वा हि वृत्रहंतम हरी इंद्र परावतः। अर्वाचीनो मघवन्सोमपीतय उग्र ऋष्वेभिरा गहि ॥१७॥ इमे हि ते कारवो वावशुर्धिया विप्रासो मेधसातये। स त्वं नो मघवन्निंद्र गिर्वणो वेनो न शृणुधी हवं ॥१८॥ निरिंद्र बृहतीभ्यो वृत्रं धनुंभ्यो अस्फुरः। निरर्बुदस्य मृगयस्य मायिनो निः पर्वतस्य गा आजः ॥१९॥ निरग्नयो रुरुचुर्निरु सूर्यो निः सोम इंद्रियो रसः। निरंतरिक्षादधमो महामहिं कृषे तदिंद्र पौंस्यं ॥२०॥२८॥ यं मे दुरिंद्रो मरुतः पाकस्थामा कौरयाणः। विश्वेषां त्मना शोभिष्ठमुपेव दिवि धावमानं ॥२१॥ रोहितं मे पाकस्थामा सुधुरं कक्ष्यप्रां। अदाद्रायो विबोधनं ॥२२॥ यस्मा अन्ये दश प्रति धुरं वहंति वह्नयः। अस्तुं वयो न तुग्र्यं ॥२३॥ आत्मा पितुस्तनूर्वासं ओजोदा अभ्यंजनं। तुरीयमिद्रोहितस्य पाकस्थामानं भोजं दातारमब्रवं ॥२४॥२९॥

॥ ४ ॥ १–२१ देवातिथिः काण्वः ॥ १–१४ इंद्रः। १५–१८ इंद्रः पूषा वा। १९–२१ कुरुंगस्य दानस्तुतिः ॥ १–२० प्रागाथं। २१ पुरउष्णिक् ॥

॥ ४ ॥ यदिंद्र प्रागपागुदङ् न्यग्वा हूयसे नृभिः। सिमा

नः अस्य यत् ह पौरं आविंथ धियः इंद्र सिसासतः शग्धि यथा रुशमं श्यावकं कृपं इंद्र प्र आवः स्वः ऽनरं ॥१२॥ कत् नव्यः ऋतसीनां तुरः गृणीत मर्त्यः नहि नु अस्य महिमानं इंद्रियं स्वः गृणंतः आनशुः ॥१३॥ कत् ऊं स्तुवंतः ऋत ऽयंत देवता ऋषिः कः विप्रः ओहते कदा हवं मघऽवन् इंद्र सुन्वतः कत् ऊं स्तुवतः आ गमः ॥१४॥ उत् ऊं त्ये मधुमत्ऽतमाः गिरः स्तोमासः ईरते सचा ऽजिताः धनऽसाः अक्षितऽऊतयः वाजऽयंतः रथाःऽइव ॥१५॥२७॥ कण्वाःऽइव भृगवः सूर्याःऽइव विश्वं इत् धीतं आनशुः इंद्रं स्तोमेभिः महयंतः आयवः प्रियऽमेधासः अस्वरन् ॥१६॥ युक्ष्व हि वृत्रहन्ऽतम हरी इंद्र पराऽवतः अर्वाचीनः मघऽवन् सोमऽपीतये उप ऋक्वेभिः आ गहि ॥१७॥ इमे हि ते कारवः वावशुः धिया विप्रासः मेधऽसातये सः त्वं नः मघऽवन् इंद्र गिर्वणः वेनः न शृणुधि हवं ॥१८॥ निः इंद्र बृहतीभ्यः वृत्रं धनुऽभ्यः अस्फुरः निः अर्बुदस्य मृगयस्य मायिनः निः पर्वतस्य गाः आजः ॥१९॥ निः अग्नयः रुरुचुः निः ऊं सूर्यः निः सोमः इंद्रियः रसः निः अंतरिक्षात् अधमः महां अहिं कृपे तत् इंद्र पौंस्यं ॥२०॥२८॥ यं मे दुः इंद्रः मरुतः पाकऽस्यामा कौरयाणः विश्वेषां त्मना शोभिष्ठं उपऽइव दिवि धावमानं ॥२१॥ रोहितं मे पाकऽस्यामा सुऽधुरं कक्ष्यऽप्रां अदात् रायः विऽबोधनं ॥२२॥ यस्मिं अन्ये दश प्रतिं धुरं वहंति वह्नयः अस्तं वयः न तुग्र्यं ॥२३॥ आत्मा पितुः तनूः वासः ओजः ऽदाः अभिऽअंजनं तुरीयं इत् रोहितस्य पाकऽस्यामानं भोजं दातारं अब्रवं ॥२४॥२९॥

॥४॥ यत् इंद्र प्राक् अपाक् उदक् न्यक् वा हूयसे नृऽभिः सिमं

पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥१॥ यद्वा रुमे रुशमे श्यावके कृप इंद्र मादयसे सचा। कण्वासस्त्वा ब्रह्मभिः स्तोमवाहस इंद्रा यच्छंत्या गहि ॥२॥ यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणं। आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥३॥ मंदंतु त्वा मघवन्निंद्रेंदवो राधो-देयाय सुन्वते। आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तर्धिषे सहः ॥४॥ प्र चक्रे सहसा सहो बभंज मन्युमोजसा। विश्वे त इंद्र पृतनायवो यहो नि वृक्षा इव येमिरे ॥५॥३०॥ सहसेणेव सचते यवीयुधा यस्त आनळुपस्तुतिं। पुत्रं प्रावर्गे कृणुते सुवीर्यं दाश्नोति नमउक्तिभिः ॥६॥ मा भेम मा श्रमिष्मोयस्य सख्ये तव। महते वृणो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुं ॥७॥ सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति। मध्वा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥८॥ अश्वी रथी सुरूप इन्नोमाँ इदिंद्र ते सखा। श्वात्रभाजा वयसा सचते सदा चंद्रो याति सभामुप ॥९॥ ऋश्यो न तृष्यन्नवपानमा गहि पिबा सोमं वशाँ अनु। निमेघमानो मघवन्दिवेदिव ओजिष्ठं दधिषे सहः ॥१०॥३१॥ अध्वर्यो द्रावया त्वं सोममिंद्रः पिपासति। उप नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥११॥ स्वयं चित्स मन्यते दाशुरिर्जनो यदा सोमस्य तृंपसि। इदं ते अन्नं युज्यं समुक्षितं तस्येहि प्र द्रवा पिब ॥१२॥ रयेष्ठाया-ध्वर्यवः सोममिंद्राय सोतन। अधि ब्रध्नस्याद्रयो वि चक्षते सुन्वंतो दाश्वध्वरं ॥१३॥ उप ब्रध्नं वावाता वृषणा हरी इंद्रमपसु वक्षतः। अर्वाचं त्वा सप्तयोऽध्वरश्रियो वहंतु सवनेदुप ॥१४॥ प्र पूषणं वृणीमहे युज्याय पुरुवसुं। स शक्र शिक्ष

पुरु नृऽसूतः असि आनवे असि प्रऽशर्ध तुर्वशे ॥१॥ यत् वा रुमे रुशमे श्यावके कृपे इंद्र मादयसे सचा कण्वासः त्वा ब्रह्मऽभिः स्तोमऽवाहसः इंद्र आ यच्छंति आ गहि ॥२॥ यथा गौरः अपा कृतं तृष्यन् एति अवं इरिणं आऽपित्वे नः प्रऽपित्वे तूयं आ गहि कण्वेषु सु सचा पिब ॥३॥ मंदंतु त्वा मघऽवन् इंद्र इंदवः राधःऽदेयाय सुन्वते आऽमुष्य सोमं अपिवः चमू सुतं ज्येष्ठं तत् दधिषे सहः ॥४॥ प्र चक्रे सहसा सहः वभंज मन्युं ओजसा विश्वे ते इंद्र पृतनाऽयवः यहो नि वृक्षाःऽईव येमिरे ॥५॥३०॥ सहस्रेणऽइव सचते यविऽयुधा यः ते आनंद उपऽस्तुतिं पुत्रं प्रावर्गं कृणुते सुऽवीर्यं दाश्नोति नमऽउक्तिऽभिः ॥६॥ मा भेम मा श्रमिष्म उपस्थे तव महत् ते वृष्णः अभिऽचक्ष्यं कृतं पश्येम तुर्वशे यदौ ॥७॥ सव्यां अनु स्फिग्यं ववसे वृषा न दानः अस्य रोषति मध्या संऽपृक्षाः सारथेण धेनवः तूयं आ इहि द्रवं पिब ॥८॥ अश्वी रथी सुऽरूपः इत् गोऽमान् इत् इंद्र ते सखा श्वात्रऽभाजा वयसा सचते सदा चंद्रः याति सभां उप ॥९॥ ऋश्यः न तृष्यन् अवऽपानं आ गहि पिब सोमं वशान् अनु निऽमेघमानः मघऽवन् दिवेऽदिवे ओजिष्ठं दधिषे सहः ॥१०॥३१॥ अध्वर्यो द्रवया त्वं सोमं इंद्रः पिपासति उप नूनं युयुजे वृषणा हरी आ च जगाम वृत्रऽहा ॥११॥ स्वयं चित् सः मन्यते दाशुरिः जनः यत् सोमस्य तृंपसि इदं ते अन्नं युज्यं संऽउक्षितं तस्य आ इहि प्र द्रव पिब ॥१२॥ रथेऽस्थाय अध्वर्यवः सोमं इंद्राय सोतन अधि ब्रध्नस्य अद्रयः वि चक्षते सुन्वंतः दाशुषऽअध्वरं ॥१३॥ उप ब्रह्मा ववाता वृषणा हरी इंद्रं अपऽसु वक्षतः अर्वाचं त्वा सप्तयः अध्वरऽश्रियः वहंतु सवना इत् उप ॥१४॥ प्र पूषणं वृणीमहे युज्याय पुरुऽवसुं सः शक्र शिक्ष

पुरुहूत नो धिया तुजे राये विमोचन॥१५॥३२॥ सं नः शिशीहि भुरिजोरिव क्षुरं रास्व रायो विमोचन। त्वे तन्नः सुवेदमुस्रियं वसु यं त्वं हिनोषि मर्त्यं॥१६॥ वेमि त्वा पूषञ्जुजसे वेमि स्तोतव आघृणे। न तस्य वेम्यरणं हि तद्वसो स्तुषे पजाय साम्ने॥१७॥ परा गावो यवसं कच्चिदाघृणे नित्यं रेक्णो अमर्त्य। अस्माकं पूषन्नविता शिवो भव मंहिष्ठो वाजसातये॥१८॥ स्यूरं राधः शताश्वं कुरुंगस्य दिविष्टिषु। राज्ञस्त्वेषस्य सुभगस्य रातिषु तुर्वशेष्वमन्महि॥१९॥ धीभिः सातानि काण्वस्य वाजिनः प्रियमेधैरभिद्युभिः। षष्टिं सहस्रानु निर्मजामजे नियूथानि गवामृषिः॥२०॥ वृष्णश्चिन्मे अभिपित्वे अरारणुः। गां भजंत मेहनाश्वं भजंत मेहना॥२१॥३३॥७॥

॥५॥ १–३९ ब्रह्मातिथिः काण्वः॥ १–३७ अश्विनौ। ३८–३९ वैद्यस्य कशोदीनस्तुतिः॥ १–३६ गायत्री। ३७, ३८ बृहती। ३९ अनुष्टुप्॥

॥५॥ दूरादिहेव यत्सत्यरुणप्सुरशिश्वितत्। वि भानुं विश्वधातनत्॥१॥ नूनद्दसा मनोयुजा रथेन पृथुपाजसा। सचेथे अश्विनोषसं॥२॥ युवाभ्यां वाजिनीवसू प्रति स्तोमा अदक्षत। वाचं दूतो यथोहिषे॥३॥ पुरुप्रिया ण ऊतये पुरुमंद्रा पुरूवसू। स्तुषे कण्वासो अश्विना॥४॥ मंहिष्ठा वाजसातमेषयंता शुभस्पती। गंतारा दाशुषो गृहं॥५॥१॥ ता सुदेवाय दाशुषे सुमेधामवितारिणीं। घृतैर्गव्यूतिमुक्षतं॥६॥ आ नः स्तोममुप द्रवत्यं श्येनेभिरा शुभिः। यातमश्वेभिरश्विना॥७॥ येभिस्तिस्रः परावतो दिवो विश्वानि रोचना। चीरक्नून्परिदीयथः॥८॥ उत नो गोमतीरिषं उत सातीरहर्विदा। वि पथः सातये सितं॥९॥

पुरुऽहूत नः धिया तुजे राये विऽमोचन ॥१५॥३२॥ सं नः शिशीहि भुरिजोःऽइव क्षुरं रास्व रायः विऽमोचन त्वे तत् नः सुऽवेदं उक्षियं वसु यं त्वं हिनोषि मर्त्यं ॥१६॥ वेमिऽत्वा पूषन् ऋंजसे वेमि स्तोतवे आघृणे न तस्य वेमि अरणं हि तत् वसो स्तुषे पजाय साम्ने ॥१७॥ परा गावः यवसं कत् चित् आघृणे नित्यं रेक्णः अमर्त्य अस्माकं पूषन् अविता शिवः भव मंहिष्ठः वाजऽसातये ॥१८॥ स्थूरं राधः शतऽअश्वं कुरुंगस्य दिविऽइषु राज्ञः त्वेषस्य सुऽभगस्य रातिषु तुर्वशेषु अमन्महि ॥१९॥ धीभिः सातानि काखस्य वाजिनः प्रियऽमेधैः अभिद्युऽभिः परिषिं सहस्रा अनु निःऽअजां अजे निः यूथानि गवां ऋषिः ॥२०॥ वृक्षाः चित् मे अभिऽपित्वे अररणुः गां भजंत मेहना अश्वं भजंत मेहना ॥२१॥३३॥७॥

॥५॥ दूरात् इहऽइव यत् सती अरुणऽप्सुः अशिश्वितत् वि भानुं विश्वधा अतनत् ॥१॥ नृऽवत् दस्रा मनःऽयुजा रथेन पृथुऽपाजसा सचेथे अश्विना उपसं ॥२॥ युवाभ्यां वाजिनीऽवसू प्रति स्तोमाः अदृक्षत वाचं दूतः यथा अहिषे ॥३॥ पुरुऽप्रिया नः ऊतये पुरुऽमंद्रा पुरुऽवसू स्तुषे कक्षासः अश्विना ॥४॥ मंहिष्ठा वाजऽसातमा इषयंता शुभः पती गंतारा दाशुषः गृहं ॥५॥१॥ ता सुऽदेवाय दाशुषे सुऽमेधां अविंऽतारिणीं घृतैः गव्यूतिं उक्षतं ॥६॥ आ नः स्तोमं उप द्रवत् नूयं श्येनेभिः आशुऽभिः यातं अश्वेभिः अश्विना ॥७॥ येभिः तिस्रः पराऽवतः दिवः विश्वानि रोचना चीन् अक्तून् परिऽदीयथः ॥८॥ उत नः गोऽमतीः इषः उत सातीः अहःऽविदा वि पथः सातये सितं ॥९॥

आ नो गोमंतमश्विना सुवीरं सूरयं रयिं। वोळ्हमश्वावतीरिषः ॥१०॥२॥ वावृधाना शुभस्पती दस्रा हिरण्यवर्तनी। पिबतं सोम्यं मधु ॥११॥ अस्मभ्यं वाजिनीवसू मघवद्भ्यश्च सप्रथः। छर्दिर्यंतमदाभ्यं ॥१२॥ नि यु ब्रह्म जनानां याविष्टं तूयमा गतं। मो षु न्यन्याँ उपारतं ॥१३॥ अस्य पिबतमश्विना युवं मदस्य चारुणः। मध्वो रातस्य धिष्ण्या ॥१४॥ अस्मे आ वहतं रयिं शतवंतं सहस्रिणं। पुरुक्षुं विश्वधायसं ॥१५॥३॥ पुरुत्रा चिद्धि वां नरा विह्वयंते मनीषिणः। वाघद्भिरश्विना गतं ॥१६॥ जनासो वृक्तबर्हिषो हविष्मंतो अरंकृतः। युवां हवंते अश्विना ॥१७॥ अस्माकमद्य वामयं स्तोमो वाहिष्ठो अंतमः। युवाभ्यां भूत्वश्विना ॥१८॥ यो ह वां मधुनो हितिराहितो रथचर्यणे। ततः पिबतमश्विना ॥१९॥ तेन नो वाजिनीवसू पश्वे तोकाय शं गवे। वहंतं पीवरीरिषः ॥२०॥४॥ उत नो दिव्या इषः उत सिंधूरहर्विदा। अप द्वारेव वर्षयः ॥२१॥ कदा वां तौग्र्यो विधत्समुद्रे जहितो नरा। यद्वां रथो विभिष्पतात् ॥२२॥ युवं कण्वाय नासत्यापिरिप्राय हर्म्ये। शश्वदूतीरदंशस्यथः ॥२३॥ ताभिरा यातमूतिभिर्नव्यसीभिः सुशस्तिभिः। यद्वां वृषण्वसू हुवे ॥२४॥ यथा चित्कण्वमावंतं प्रियमेधमुपस्तुतं। अत्रिं गिंजारमश्विना ॥२५॥५॥ यथोत कृत्व्ये धनेऽंशुं गोषुगस्त्यं। यथा वाजेषु सोभरिं ॥२६॥ एतावद्यां वृषण्वसू अतो वा भूयो अश्विना। गृणंतः सुम्नमीमहे ॥२७॥ रथं हिरण्यवंधुरं हिरण्याभीशुमश्विना। आ हि स्थाथो दिविस्पृशं ॥२८॥ हिरण्ययी वां रभिरीषा अधो हिरण्ययः। उभा चक्रा हिरण्यया ॥२९॥ तेन नो वाजिनी-

आ नः गोऽमंतं अश्विना सुऽवीरं सुऽरथं रयिं वोळ्हं अश्वऽवतीः इषः ॥१०॥२॥ ववृधाना शुभः पती दस्रा हिरण्यऽवर्तनी० पिबंतं सोम्यं मधु ॥११॥ अस्मभ्यं वाजिनीऽवसू० मघवत्ऽभ्यः च सऽप्रथः छर्दिः यंतं अदाभ्यं ॥१२॥ नि सु ब्रह्म जनानां या अविष्टं तूयं आ गतं मो सु अन्यान् उप अरतं ॥१३॥ अस्य पिबतं अश्विना युवं मदस्य चारुणः मध्वः रातस्य धिष्ण्या ॥१४॥ अस्मे आ वहतं रयिं शतऽवंतं सहस्रिणं पुरुऽक्षुं विश्वऽधायसं ॥१५॥३॥ पुरुऽचा चित् हि वां नरा विऽह्वयंते मनीषिणः वाघत्ऽभिः अश्विना आ गतं ॥१६॥ जनासः वृक्तऽबर्हिषः हविष्मंतः अरंऽकृतः युवां हवंते अश्विना ॥१७॥ अस्माकं अद्य वां अयं स्तोमः वाहिष्ठः अंतमः युवाभ्यां भूतु अश्विना ॥१८॥ यः हवां मधुनः दृतिः आऽहितः रथऽचर्षणे ततः पिबतं अश्विना ॥१९॥ तेन नः वाजिनीऽवसू० पश्वे तोकाय शं गवे वहतं पीवरीः इषः ॥२०॥४॥ उत नः दिव्याः इषः उत सिंधून् अहःऽविदा अप द्वारांऽइव वर्षथः ॥२१॥ कदा वां तौग्र्यः विधत् समुद्रे जहितः नरा यत् वां रथः विऽभिः पतात् ॥२२॥ युवं कण्वाय नासत्या अपिंऽरिप्राय हर्म्ये अश्वत् उक्तीः दशस्यथः ॥२३॥ ताभिः आ यातं ऊतिऽभिः नव्यसीभिः सुशस्तिऽभिः यत् वां वृषण्ऽवसू० हुवे ॥२४॥ यथा चित् कण्वे आवंतं प्रियऽमेधं उपऽस्तुतं अत्रिं शिंजारं अश्विना ॥२५॥५॥ यथा उत कृत्व्ये धने अंप्सु गोषु अगस्त्ये यथा वाजेषु सोभरिं ॥२६॥ एतावंत् वां वृषण्ऽवसू० अतः वा भूयः अश्विना गृणंतः सुम्नं ईमहे ॥२७॥ रथं हिरण्यऽवंधुरं हिरण्यऽअभीषुं अश्विना आ हि स्थाथः दिविऽस्पृशं ॥२८॥ हिरण्ययी वां रभिः इषा अष्टः हिरण्ययः उभा चक्रा हिरण्यया ॥२९॥ तेन नः वाजिनी-

वसू परावतश्चिदा गतं। उपेमां सुष्टुतिं मम ॥३०॥६॥ आ वंहेथे परावतात्सूर्यस्यावश्चिना। इषो दासीरमर्त्या ॥३१॥ आ नो द्युम्नैरा श्रवोभिरा रायो यातमश्विना। पुरुश्चंद्रा नासत्या ॥३२॥ एह वां प्रुषितप्सवो वयो वहंतु पर्णिनः। अच्छा स्वध्वरं जनं ॥३३॥ रथं वामनुगायसं य इषा वर्तते सह। न चक्रमभि बाधते ॥३४॥ हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः। धीजवना नासत्या ॥३५॥७॥ युवं मृगं जागृवांसं स्वदथो वा वृषण्वसू। ता नः पृक्तमिषा रयिं ॥३६॥ ता मे अश्विना सनीनां विद्यातं नवानां। यथा चिच्छैद्यः कृणुः शतमुष्ट्रानां ददत्सहस्रा दश गोनां ॥३७॥ यो मे हिरण्यसंदृशो दश राज्ञो अमंहत। अधस्पदा इच्छैद्यस्य कृष्टयश्चर्मम्ना अभितो जनाः ॥३८॥ माकिरेना पथा गाद्येनेमे यंति चेदयः। अन्यो नेत्सूरिरोहते भूरिदावत्तरो जनः ॥३९॥८॥१॥

॥ ६ ॥ १–३८ वत्सः काण्वः ॥ १–३५ इंद्रः । ३६–३८ तिरिंदिरस्य पारशव्यस्य दानस्तुतिः ॥ गायत्री ॥

॥६॥ महाँ इंद्रो य ओजसा पर्जन्यो वृष्टिमाँ इव। स्तोमैर्वत्सस्य वावृधे ॥१॥ प्रजामृतस्य पिप्रतः प्र यन्धरंत वह्नयः। विप्रा ऋतस्य वाहसा ॥२॥ कण्वा इंद्रं यदक्रत स्तोमैर्यज्ञस्य साधनं। जामि ब्रुवत आयुधं ॥३॥ ससस्य मन्यवे विशो विश्वा नमंत कृष्टयः। समुद्रायेव सिंधवः ॥४॥ ओजस्तदस्य तित्विष उभे यत्समवर्तयत्। इंद्रश्चर्मेव रोदसी ॥५॥९॥ वि चिद्वृत्रस्य दोधतो वज्रेण शतपर्वणा। शिरो बिभेद वृष्णिना ॥६॥ इमा अभि प्र णोनुमो विपामग्रेषु धीतयः। अग्नेः शोचिर्न दिद्युतः ॥७॥ गुहा सतीरुप त्मना प्र यच्छोचंत धीतयः। कण्वा ऋतस्य धारया ॥८॥ प्र तमिंद्र नशीमहि रयिं गोमंतमश्विनं। प्र ब्रह्म पूर्व-

ऽवसू पराऽवतः चित् आ गतं उप इमां सुऽस्तुतिं मम॥३०॥६॥ आ वहेथे परावात् पूर्वीः अश्वंतीः अश्विना इयं दासीः अमर्त्या ॥३१॥ आ नः द्युभिः आ अथर्वःऽभिः आ राया यातं अश्विना पुरुऽचंद्रा नासत्या॥३२॥ आ इह वां प्रुषितऽप्सवः वयः वहंतु पर्णिनः अच्छ सुऽअध्वरं जनं॥३३॥ रथं वां अनुऽगायसं यः इषा वर्तते सह न चक्रं अभि वाधते॥३४॥ हिरण्ययेन रथेन दूवत्पाणिऽभिः अश्विः धीऽजवना नासत्या॥३५॥७॥ युवं भृगुं जागृऽवांसं स्वर्दृशः वा वृषण्ऽवसू॰ ता नः यंतं इषा रयिं॥३६॥ ता मे अश्विना सनीनां विद्यातं नवानां यथा चित् चैद्यः कृणुः शतं उष्ट्रानां ददत् सहस्रा दश गोनां॥३७॥ यः मे हिरण्यऽसंदृशः दश राज्ञः अमंहत अधःऽपदाः इत् चैद्यस्य कृष्टयः चर्मंऽन्नाः अभितः जनाः॥३८॥ माकिः एना पथा गात् येन इमे यंति चेदयः अन्यः न इत् सूरिः ओहते भूरिदावत्ऽतरः जनः॥३९॥८॥१॥

॥६॥ महान् इंद्रः यः ओजसा पर्जन्यः वृष्टिमान्ऽइव स्तोमैः वत्सस्य ववृधे॥१॥ प्रऽजां ऋतस्य पिप्रतः प्र यत् भरंत वह्नयः विप्राः ऋतस्य वाहसा॥२॥ कण्वाः इंद्रं यत् अक्रत स्तोमैः यज्ञस्य साधनं जामि ब्रुवते आयुधं॥३॥ सं अस्य मन्यवे विशः विश्वाः नमंत कृष्टयः समुद्रायऽइव सिंधवः॥४॥ ओजः तत् अस्य तित्विषे उभे यत् समऽअवर्तयत् इंद्रः चर्मंऽइव रोदसी॥५॥९॥ वि चित् वृचस्य दोधतः वज्रेण शतऽपर्वणा शिरः विभेद वृष्णिना॥६॥ इमाः अभि प्र नोनुमः विपां अयेषु धीतयः अग्नेः शोचिः न दिद्युतः ॥७॥ गुहा सतीः उप त्मना प्र यत् शोचंत धीतयः कण्वाः ऋतस्य धारया॥८॥ प्र तं इंद्र नशीमहि रयिं गोऽमंतं अश्विनं प्र ब्रह्म पूर्व-

चिन्नये ॥९॥ अहमिद्धि पितुष्परि मेधामृतस्य जग्रभं। अहं सूर्य इवाजनि ॥१०॥१०॥ अहं भुवेन मन्मना गिरः शुंभामि कण्ववत्। येनेंद्रः शुष्ममिद्धुवे ॥११॥ ये त्वामिंद्र न तुष्टुवुर्ऋषयो ये च तुष्टुवुः। ममेदुग्धस्व सुष्टुतः ॥१२॥ यदस्य मन्युरध्वनीद्वि वृत्रं पर्वशो रुजन्। अपः समुद्रमैरयत् ॥१३॥ नि शुष्णं इंद्र धर्णसिं वज्रं जघंथ दस्यवि। वृषा ह्युग्र शृण्विषे ॥१४॥ न द्यावं इंद्रमोजसा नांतरिक्षाणि वज्रिणं। न विव्यचंत भूमयः ॥१५॥११॥ यस्त इंद्र महीरपः स्तभूयमान आशयत्। नि तं पद्यासु शिश्नथः ॥१६॥ य इमे रोदसी मही समीची समजंयन्मीत्। तमोभिरिंद्र तं गुहः ॥१७॥ य इंद्र यतयस्त्वा भृगवो ये च तुष्टुवुः। ममेदुग्य शृधी हवं ॥१८॥ इमास्तं इंद्र पृश्नयो घृतं दुहत आशिरं। एनामृतस्य पिप्युषीः ॥१९॥ या इंद्र प्रस्वस्त्वासा गर्भमचक्रिरन्। परि धर्मेव सूर्यं ॥२०॥१२॥ त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः। त्वां सुतास इंदवः ॥२१॥ तवेदिंद्र प्रणीतिषूत प्रशस्तिरद्रिवः। यज्ञो विततसार्य्यः ॥२२॥ आ नं इंद्र महीमिषं पुरं न दर्षि गोमतीं। उत प्रजां सुवीर्यं ॥२३॥ उत त्यदाश्वश्व्यं यदिंद्र नाहुषीष्वा। अग्ने विष्टु प्रदीदयत् ॥२४॥ अभि व्रजं न तत्निषे सूर उपाकचक्षसं। यदिंद्र मृळयासि नः ॥२५॥१३॥ यदंग तविषीयस इंद्र प्रराजसि क्षितीः। महाँ अपार ओजसा ॥२६॥ तं त्वा हविष्मतीर्विश उप ब्रुवत ऊतये। उरुञ्जयसमिंदुभिः ॥२७॥ उपह्वरे गिरीणां संगथे च नदीनां। धिया विप्रो अजायत ॥२८॥ अतः समुद्रमुद्वतश्चिकित्वाँ अव पश्यति। यतो विपान एजति ॥२९॥ आदित्पन्नस्य रेतसो ज्योतिष्पश्यंति वासरं। परो

ऽचित्तये ॥९॥ अहं इत् हि पितुः परि मेधां ऋतस्य जग्रभ अहं सूर्यःऽइव अजनि ॥१०॥१०॥ अहं प्रत्नेन मन्मना गिरः शुंभामि कण्वऽवत् येन इंद्रः शुष्मं इत् दधे ॥११॥ ये त्वां इंद्र न तुस्तुवुः ऋषयः ये च तुस्तुवुः मम इत् वर्धस्व सुऽस्तुतः ॥१२॥ यत् अस्य मन्युः अध्वनीत् वि वृत्रं पर्वऽअः रुजन् अपः समुद्रं ऐरयत् ॥१३॥ नि शुष्णं इंद्र धर्णसिं वज्रं जघंथ दस्यवि वृधा हि उग्र शृण्विषे ॥१४॥ न द्यावः इंद्र ओजसा न अंतरिक्षाणि वज्रिणं न विव्यचंत भूमयः ॥१५॥११॥ यः ते इंद्र महीः अपः स्तभुऽयमानः आ अरंयत् नि तं पद्यासु शिश्नथः ॥१६॥ यः इमे रोदसी महीं संऽईची० संऽअजयभीत् तमंऽभिः इंद्र तं गुहः ॥१७॥ ये इंद्र यतयः त्वा भृगवः ये च तुस्तुवुः मम इत् उप श्रुधि हवं ॥१८॥ इमाः ते इंद्र पृश्नयः घृतं दुहते आऽशिरं एनां ऋतस्य पिप्युषीः ॥१९॥ याः इंद्र प्रऽस्वः त्वा आसा गर्भं अचक्रिरन् परि धर्मंऽइव सूर्यं ॥२०॥१२॥ त्वां इत् शवसः पते कण्वाः उक्थेन वावृधुः त्वां सुतासः इंदवः ॥२१॥ तवं इत् इंद्र प्रऽनीतिषु उत प्रऽशस्तिः अद्रिऽवः यज्ञः वितंतसाय्यः ॥२२॥ आ नः इंद्र महीं इषं पुरं न दर्षि गोऽमतीं उत प्रऽजां सुऽवीर्यं ॥२३॥ उत त्यत् आशुऽअश्वं यत् इंद्र नाहुषीषु आ अयं विक्षु प्रऽदीदयत् ॥२४॥ अभि व्रजं न तत्निषे सूरः उपाकऽचक्षसं यत् इंद्र मृळयासि नः ॥२५॥१३॥ यत् अंग तविषीऽयसे इंद्र प्रऽराजसि क्षितीः महान् अपारः ओजसा ॥२६॥ तं त्वा हविष्मंतीः विशः उप ब्रुवते ऊतये उरुऽज्रयसं इंदुऽभिः ॥२७॥ उपऽह्वरे गिरीणां संऽगथे च नदीनां धिया विप्रः अजायत ॥२८॥ अतः समुद्रं उतऽअर्तः चिकित्वान् अव पश्यति यतः विपानः एजति ॥२९॥ आत् इत् प्रत्नस्य रेतसः ज्योतिः पश्यंति वासरं परः

यदिध्यते दिवा ॥३०॥१४॥ कण्वास इंद्र ते मतिं विप्रे वर्धंति पौंस्यैं। उतो शविष्ठ वृष्ण्यैं ॥३१॥ द्रुमां म इंद्र सुष्टुतिं जुषस्व प्र सु मामंव। उत प्र बंधया मतिं ॥३२॥ उत ब्रह्मण्या वयं तुभ्यैं प्रवृज्ञ वज्रिवः। विप्रां अतक्ष्म जीवसे ॥३३॥ अभि कण्वां अनूषतापो न प्रवतां यतीः। इंद्रं वनन्वती मतिः ॥३४॥ इंद्रंमुक्थानिं वावृधुः समुद्रमिंव सिंधवः। अनुत्तमन्युमजरैं ॥३५॥१५॥ आ नों याहि परावतो हरिभ्यां हर्यताभ्यां। द्रुमिंद्र सुतं पिंब ॥३६॥ त्वामिद्वृचहंतम जनांसो वृक्तबर्हिषः। हवंते वाजसातये ॥३७॥ अनु त्वा रोदंसी उभे चक्रं न वर्त्येतशं। अनु सुवानास इंदवः ॥३८॥ मंदस्वा सु स्वर्णर उतेंद्र शर्यणावति। मत्स्वा विवस्वतो मती ॥३९॥ वावृधान उप द्यवि वृषा वज्र्यरोरवीत्। वृत्रहा सोमपातमः ॥४०॥१६॥ ऋषिर्हि पूर्वजा अस्येक ईशान ओजसा। इंद्रं चोष्कूयसे वसु ॥४१॥ अस्माकैं त्वा सुताँ उप वीतपृष्ठा अभि प्रयः। शतं वहंतु हरयः ॥४२॥ द्रुमां सु पूर्व्यो धियं मधोर्घृतस्य पिप्युषीं। कण्वा उक्थेन वावृधुः ॥४३॥ इंद्रमिद्विमहीनां मेधे वृणीत मर्त्यः। इंद्रं सनिष्युरूतये ॥४४॥ अर्वाचैं त्वा पुरुष्टुत प्रियमेधस्तुता हरी। सोमपेयाय वक्षतः ॥४५॥ शतमहं तिरिंदिरे सहस्रं पर्शावा ददे। राधांसि याद्वानां ॥४६॥ चीणिं शतान्यर्वतां सहस्रा दश गोनां। दुष्पज्जाय साम्ने ॥४७॥ उदानट्कुहो दिवमुष्ट्रांञ्चतुर्युजो ददत्। श्रवसा याद्वं जनैं ॥४८॥१७॥

॥ ७ ॥ १–३६ पुनर्वत्सः काण्वः ॥ मरुतः ॥ गायत्री ॥

॥७॥ प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत्। वि पर्वतेषु राजथ ॥१॥ यदंग तविषीयवो यामं शुभ्रा अचिध्वं। नि पर्वं-

यत् इध्यते दिवा ॥३०॥१४॥ कण्वासः इंद्र ते मतिं विप्रे वर्धन्ति पौंस्यै उतो शविष्ठ वृष्ण्यै ॥३१॥ इमां मे इंद्र सुऽस्तुतिं जुषस्व प्रसु मां अव उत प्र वर्धय मतिं ॥३२॥ उत ब्रह्मण्या वयं तुभ्यं प्रऽवृद्ध वज्रिऽवः विप्राः अतक्ष्म जीवसे ॥३३॥ अभि कण्वाः अनूषत आर्षः न प्रऽवता यतीः इंद्रं वनन्ऽवती मतिः ॥३४॥ इंद्रं उक्थानि वावृधुः समुद्रंऽइव सिंधवः अनुत्तऽमन्युं अजरं ॥३५॥१५॥ आ नः याहि पराऽवतः हरिऽभ्यां हर्यताभ्यां इमं इंद्र सुतं पिब ॥३६॥ त्वां इत् वृत्रहन्ऽतम जनासः वृक्तऽबर्हिषः हवंते वाजंऽसातये ॥३७॥ अनु त्वा रोदसी उभे चक्रंन वर्तिं एतशं अनु सुवानासः इंदवः ॥३८॥ मंदस्व सु स्वःऽनरे उत इंद्र शर्यणाऽवति मत्स्व विवस्वतः मती ॥३९॥ ववृधानः उप द्यविं वृषा वज्री अरोरवीत् वृत्रऽहा सोमऽपातमः ॥४०॥१६॥ ऋषिः हि पूर्वेऽजाः असि एकः ईशानः ओजसा इंद्र चोष्कूयसे वसु ॥४१॥ अस्माकं त्वा सुतान् उप वीतऽपृष्ठाः अभि प्रयः शतं वहंतु हरयः ॥४२॥ इमां सु पूर्व्यां धियं मधोः घृतस्य पिप्युषीं कण्वाः उक्थेन ववृधुः ॥४३॥ इंद्रं इत् विऽमहीनां मेधे वृणीत मर्त्यः इंद्रं सनिष्युः ऊतये ॥४४॥ अर्वाचं त्वा पुरुऽस्तुत प्रियमेधऽस्तुता हरी सोमऽपेयाय वक्षतः ॥४५॥ शतं अहं तिरिंदिरे सहस्रं पर्शौ आ ददे राधांसि याद्वानां ॥४६॥ चीणिं शतानि अर्वतां सहस्रा दश गोनां ददुः पज्रायसाम्ने ॥४७॥ उत आनट् ककुहः दिवं उष्ट्रान् चतुःऽयुजः ददत् श्रवसा याद्वं जनं ॥४८॥१७॥

॥७॥ प्र यत् वः चिऽस्तुभं इषं मरुतः विप्रः अक्षरत् वि पर्वतेषु राजथ ॥१॥ यत् अंग तविषीऽयवः यामं शुभ्राः अचिध्वं नि पर्वं-

ता अहासत ॥ २॥ उदीरयंत वायुभिर्वाश्रासः पृश्निमातरः। धुक्षंत पिप्युषीमिषं॥३॥ वपंति मरुतो मिहं प्र वेपयंति पर्वतान्। यद्यामं यांति वायुभिः॥४॥ नि यद्यामाय वो गिरिर्नि सिंधवो विधर्मणे। महे शुष्माय येमिरे॥५॥१८॥ युष्माँ उ नक्तमूतये युष्मान्दिवा हवामहे। युष्मान्प्रयत्यध्वरे॥६॥ उदु त्ये अरुणप्सवश्चिचा यामेभिरीरते। वाश्रा अधि ष्णुना दिवः॥७॥ सृजंति रश्मिमोजसा पंथां सूर्याय यातवे। ते भानुभिर्वि तस्थिरे॥८॥ इमां मे मरुतो गिरमिमं स्तोममभुक्षणः। इमं मे वनता हवं॥९॥ चीणि सरांसि पृश्नयो दुदुह्रे वजिणे मधु। उत्सं कवंधमुद्रिणं॥१०॥१९॥ मरुतो यद्ध वो दिवः सुम्नायंतो हवामहे। आ तू न उप गंतन॥११॥ यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे। उत प्रचेतसो मदे॥१२॥ आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसं। इयर्ता मरुतो दिवः॥१३॥ अधींव यन्निरीणां यामं शुभ्रा अचिध्वं। सुवानैमदध्व इंदुभिः॥१४॥ एतावंतश्चिदेषां सुम्नं भिक्षेत मर्त्यः। अदाभ्यस्य मन्मभिः॥१५॥२०॥ ये तृप्ता इव रोदसी धमंत्यनु वृष्टिभिः। उत्सं दुहंतो अक्षितं॥१६॥ उदु स्वानेभिरीरत उद्रथैरुदु वायुभिः। उत्स्तोमैः पृश्निमातरः॥१७॥ येनाव तुर्वशं यदुं येन कण्वं धनस्पृतं। राये सु तस्य धीमहि॥१८॥ इमा उ वः सुदानवो घृतं न पिप्युषीरिषः। वर्धान्काण्वस्य मन्मभिः॥१९॥ क्व नूनं सुदानवो मदंता वृक्तबर्हिषः। ब्रह्मा को वः सपर्यति॥२०॥२१॥ नहि ष्म यद्ध वः पुरा स्तोमेभिर्वृक्तबर्हिषः। शर्धाँ ऋतस्य जिन्वथ॥२१॥ समु त्ये महतीरपः सं क्षोणी समु सूर्यं। सं वज्रं पर्वशो दधुः॥२२॥ वि वृचं पर्वशो ययुर्वि पर्वं-

ताः अहासत॥२॥ उत् ईरयंत वायुऽभिः वाश्रासः पृश्निऽमातरः धुक्षंत पिप्युषीं इषं॥३॥ वपंति मरुतः मिहं प्र वेपयंति पर्वतान् यत् यामं यांति वायुऽभिः॥४॥ नि यत् यामाय वः गिरिः नि सिंधवः विऽधर्मणे महे शुष्माय येमिरे॥५॥१८॥ युष्मान् ऊं नक्तं ऊतये युष्मान् दिवा हवामहे युष्मान् प्रऽयति अध्वरे॥६॥ उत् ऊं त्ये अरुणऽप्सवः चित्राः यामेभिः ईरते वाश्राः अधि स्नुभिः दिवः॥७॥ सृजंति रश्मिं ओजसा पंथां सूर्याय यातवे ते भानुऽभिः वि तस्थिरे॥८॥ इमां मे मरुतः गिरं इमं स्तोमं ऋभुक्षणः इमं मे वनत हवं॥९॥ चीणि सरांसि पृश्नयः दुदुह्रे वज्रिणे मधु उत्सं कवंधं उद्रिणं॥१०॥१९॥ मरुतः यत् ह वः दिवः सुम्नऽयंतः हवामहे आ तु नः उप गंतन॥११॥ यूयं हि स्थ सुऽदानवः रुद्राः ऋभुक्षणः दमे उत प्रऽचेतसः मदे॥१२॥ आ नः रयिं मदऽच्युतं पुरुऽक्षुं विश्वऽधायसं इयर्त मरुतः दिवः॥१३॥ अधिऽइव यत् गिरीणां यामं शुभ्राः अचिध्वं सुवानैः मंदध्वे इंदुऽभिः॥१४॥ एतावंतः चित् एषां सुम्नं भिक्षेत मर्त्यः अदाभ्यस्य मन्मऽभिः॥१५॥२०॥ ये दृप्साःऽइव रोदसी धमंति अनु वृष्टिऽभिः उत्सं दुहंतः अक्षितं॥१६॥ उत् ऊं स्वानेभिः ईरते उत् रथैः उत् ऊं वायुऽभिः उत् स्तोमैः पृश्निऽमातरः॥१७॥ येन आव तुर्वशं यदुं येन कण्वं धनऽस्पृतं राये सु तस्यं धीमहि॥१८॥ इमाः ऊं वः सुऽदानवः घृतं न पिप्युषीः इषः वर्धान् काण्वस्य मन्मऽभिः॥१९॥ क्व नूनं सुऽदानवः मदेय वृक्तऽबर्हिषः ब्रह्मा कः वः सपर्यति॥२०॥२१॥ नहि स्म यत् ह वः पुरा स्तोमेभिः वृक्तऽबर्हिषः शर्धान् घृतस्य जिन्वथ॥२१॥ सं ऊं त्ये महतीः अपः सं क्षोणी सं ऊं सूर्यं सं वज्रं पर्वऽशः दधुः॥२२॥ वि वृत्रं पर्वऽशः ययुः वि पर्वं-

ताँ अराजिनः। चक्राणा वृष्णि पौंस्यं ॥२३॥ अनु चितस्य युध्यतः पुष्पमावन्नुत क्रतुं। अन्विंद्रं वृत्रतूर्ये ॥२४॥ विद्युद्धस्ता अभिद्यवः शिप्राः शीर्षन्हिरण्ययीः। शुभा व्यंजत श्रिये॥२५॥२२॥ उशना यत्परावतं उक्षणो रंघ्रमयातन। द्यौने चक्रदद्भिया॥२६॥ आ नो मखस्य दावने ऽश्वैर्हिरण्यपाणिभिः। देवांस उप गंतन ॥२७॥ यदेषां पृषती रथे प्रष्टिर्वहंति रोहितः। यांति शुभा रिणन्नपः॥२८॥ सुपोमे शर्यणावत्याजीकि पस्त्यावति। ययुर्नित्यक्रया नरः ॥२९॥ कदा गच्छाथ मरुत इत्था विप्रं हवमानं। माडीकिभिर्नाधमानं ॥३०॥२३॥ कद्ध नूनं कधप्रियो यदिंद्रमजोहातन। को वः सखित्व ओहते ॥३१॥ सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः। स्तुपे हिरण्यवाशीभिः ॥३२॥ आ षु वृष्णः प्रयज्यूना नर्यसे सुवितायं। वावृत्यां चिचवांजान् ॥३३॥ गिरयश्चिन्नि जिहते पशीनासो मर्यमानाः। पर्वताश्चिन्नि येमिरे ॥३४॥ आक्षण्यावानो वहंत्यंतरिक्षेण पतंतः। धातारः स्तुवते वयः ॥३५॥ अग्निर्हि जानिं पूर्व्यश्छंदो न सूरो अर्चिषा। ते भानुभिर्वि तस्थिरे ॥३६॥२४॥

॥ ८ ॥ १–३२ सार्धस्यः काण्वः ॥ अश्विनौ ॥ अनुष्टुप् ॥

॥ ८ ॥ आ नो विश्वाभिरूतिभिरश्विना गच्छतं युवं। दस्रा हिरण्यवर्तनी पिबंतं सोम्यं मधु ॥१॥ आ नूनं यातमश्विना रथेन सूर्यत्वचा। भुजी हिरण्ययेशसा कवी गंभीरचेतसा ॥२॥ आ यातं नहुषस्पर्यंतरिक्षात्सुवृक्तिभिः। पिबाथो अश्विना मधु कण्वानां सवने सुतं ॥३॥ आ नो यातं दिवस्पर्यंतरिक्षादधप्रिया। पुरुः कण्वस्य यामिह सुपावं सोम्यं

तान् अराजिनः चक्राणाः वृष्णि पौंस्यं ॥२३॥ अनु चितस्य युध्यतः शुष्मं आवन् उत क्रतुं अनु इंद्रं वृत्र ऽनूर्यं॥२४॥ विद्युत्ऽहस्ताः अभि ऽद्यवः शिप्राः शीर्षन् हिरण्ययीः शुभाः वि अंजत श्रिये॥२५॥२२॥ उशना यत् पराऽवतः उक्षणः रंधं अयातन द्यौः न चक्रदत् भिया॥२६॥ आ नः मखस्य दावने अश्वैः हिरण्यपाणिऽभिः देवासः उप गंतन ॥२७॥ यत् एषां पृषतीः रथे प्रष्टिः वहंति रोहितः यांति शुभ्राः रिणन् अपः ॥२८॥ सु ऽसोमे शर्यणाऽवति आजीके पस्त्यऽवति ययुः निऽचक्रया नरः ॥२९॥ कदा गच्छाथ मरुतः इत्था विप्रं हवमानं माडीकेभिः नाधमानं ॥३०॥२३॥ कत् ह नूनं कधऽप्रियः यत् इंद्रं अजहातन कः वः सखिऽत्वे ओहते॥३१॥ सहो सु नः वज्रंऽहस्तैः कण्वासः अग्निं मरुत्ऽभिः स्तुपे हिरण्यऽवाशीभिः॥३२॥ ओ सु वृष्णः प्रऽयज्यून् आ नध्यंसे सुवितायं वबृत्यां चिचऽवांजान्॥३३॥ गिरयः चित् नि जिहते पर्शानासः मन्यमानाः पर्वताः चित् नि येमिरे॥३४॥ आ अक्षण्ऽयावानः वहंति अंतरिक्षेण पतंतः धातारः स्तुवते वयः॥३५॥ अग्निः हि जनिं पूर्व्यः छंदः न सूरः अर्चिषा ते भानुऽभिः वि तस्थिरे॥३६॥२४॥

॥८॥ आ नः विश्वाभिः ऊतिऽभिः अश्विना गच्छतं युवं दस्रा हिरण्यऽवर्तनी पिबतं सोम्यं मधु॥१॥ आ नूनं यातं अश्विना रथेन सूर्यऽत्वचा भुजी हिरण्यऽपेशसा कवी गंभीरऽचेतसा ॥२॥ आ यातं नर्हुषः परि आ अंतरिक्षात् सुवृक्तिऽभिः पिबाथः अश्विना मधु कण्वानां सवने सुतं ॥३॥ आ नः यातं दिवः परि आ अंतरिक्षात् अधऽप्रिया पुचः कण्वस्य वां इह सुसाव सोम्यं

मधु ॥ ४ ॥ आ नो यातमुपश्रुत्यश्विना सोमपीतये । स्वाहा स्तोमस्य वर्धना प्र कवी धीतिभिर्नरा ॥ ५ ॥ २५ ॥ यच्चिद्धि वां पुर ऋषयो जुहूरेऽवसे नरा । आ यातमश्विना गत-मुपेमां सुष्टुतिं मम ॥ ६ ॥ दिवश्चिद्रोचनादध्या नो गंतं स्वर्विदा । धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता ॥ ७ ॥ किमन्ये कर्यीसतेऽस्मत्स्तोमेभिरश्विना । पुत्रः कण्वस्य वा-मृषिर्गीर्भिर्वत्सो अवीवृधत् ॥ ८ ॥ आ वां विप्र इहावसे-ऽहूत्स्तोमेभिरश्विना । अरिप्रा वुचहंतमा ता नो भूतं म-योभुवा ॥ ९ ॥ आ यद्वां योषणा रथमतिष्ठद्वाजिनीवसू । विश्वान्यश्विना युवं प्र धीतान्यगच्छतं ॥ १० ॥ २६ ॥ अतः सहस्रनिर्णिजा रथेना यातमश्विना । वत्सो वां मधुमद्व-चोऽशंसीत्काव्यः कविः ॥ ११ ॥ पुरुमंद्रा पुरूवसू मनोतरा रयीणां । स्तोमं मे अश्विनाविमममि वहीं अनूषतां ॥ १२ ॥ आ नो विश्वान्यश्विना धत्तं राधांस्यह्रया । कृतं न ऋत्वियावतो मा नो रीरधतं निदे ॥ १३ ॥ यद्वासत्या परावति यद्वा स्थो अध्यंबरे । अतः सहस्रनिर्णिजा रथेना यातमश्विना ॥ १४ ॥ यो वां नासत्यावृषिर्गीर्भिर्वत्सो अवीवृधत् । तस्मै सहस्रनिर्णिजमिषं धत्तं घृतश्चुतं ॥ १५ ॥ २७ ॥ प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवं । यो वां सुम्नाय तुष्टवद्यसूयाद्दा-नुनस्पती ॥ १६ ॥ आ नो गंतं रिशादसेमं स्तोमं पुरुभुजा । कृतं नः सुश्रियो नरेमा दंतमभिष्टये ॥ १७ ॥ आ वां विश्वा-भिरूतिभिः प्रियमेधा अहूषत । राजंतावध्वराणामश्विना यामहूतिषु ॥ १८ ॥ आ नो गंतं मयोभुवाश्विना शंभुवा युवं । यो वां विमन्यू धीतिभिर्गीर्भिर्वत्सो अवीवृधत् ॥ १९ ॥ याभिः

मधु॥४॥ आ नः यातं उपऽश्रुति अश्विना सोमऽपीतये स्वाहा स्तोमस्य वर्धना प्र कवी धीतिऽभिः नरा॥५॥२५॥ यत् चित् हि वां पुरा ऋषयः जुहूरे अवसे नरा आ यातं अश्विना आ गतं उप इमां सु ऽस्तुतिं मम॥६॥ दिवः चित् रोचनात् अधि आ नः गंतं स्वःऽविदा धीभिः वत्सऽप्रचेतसा स्तोमेभिः हवनऽश्रुता॥७॥ किं अन्ये परि आसते अस्मत् स्तोमेभिः अश्विना पुत्रः कण्वस्य वां ऋषिः गीःऽभिः वत्सः अवीवृधत्॥८॥ आ वां विप्रः इह अवसे अहंत स्तोमेभिः अश्विना अरिप्रा वृचंहन्ऽतमा ता नः भूतं मयःऽभुवा॥९॥ आ यत् वां योयणा रथं अतिष्ठत् वाजिनीऽवसू॰ विश्वानि अश्विना युवं प्र धीतानि अगच्छतं॥१०॥२६॥ अतः सहस्रंऽनिर्निजा रथेन आ यातं अश्विना वत्सः वां मधुऽमत् वचः अशंसीत् काव्यः कविः॥११॥ पुरुऽमंद्रा पुरुऽवसू॰ मनोतरा रयीणां स्तोमं मे अश्विनौ इमं अभि वहीं अनूषातां॥१२॥ आ नः विश्वानि अश्विना धत्तं राधांसि अह्रया कृतं नः ऋतियंऽवतः मा नः रीरधतं निदे॥१३॥ यत् नासत्या पराऽवति यत् वा स्थः अधि अंबरे अतः सहस्रंऽनिर्निजा रथेन आ यातं अश्विना॥१४॥ यः वां नासत्यौ ऋषिः गीःऽभिः वत्सः अवीवृधत् तस्मै सहस्रंऽनिर्निजं इषं धत्तं घृतऽश्चुतं॥१५॥२७॥ प्र अस्मै ऊर्जं घृतऽश्चुतं अश्विना यच्छतं युवं यः वां सुम्नाय तुस्तवंत् वसुऽयात् दानुनः पतीं॥१६॥ आ नः गंतं रिशादसा इमं स्तोमं पुरुऽभुजा कृतं नः सुऽश्रियः नरा इमा दातं अभिष्टये॥१७॥ आ वां विश्वाभिः ऊतिऽभिः प्रियऽमेधाः अहूषत राजंतौ अध्वराणां अश्विना यामंऽहूतिषु॥१८॥ आ नः गंतं मयःऽभुवा अश्विना शंऽभुवा युवं यः वां विपन्यूं धीतिऽभिः गीःऽभिः वत्सः अवीवृधत्॥१९॥ याभिः

कण्वं मेधातिथिं याभिर्वेशं दशव्रजं। याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा ॥२०॥२८॥ याभिर्नरा चसदस्युमावतं कृत्व्ये धने। ताभिः सु ऊ१स्माँ अश्विना प्रावतं वाजसातये ॥२१॥ प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्वश्विना। पुरुत्रा वृत्रहंतमा ता नो भूतं पुरुस्पृहा ॥२२॥ त्रीणि पदान्यश्विनोरविः सांति गुहा परः। कवी ऋतस्य पत्मभिर्वाग्जीवेभ्यस्परि ॥२३॥२९॥

॥९॥ १–२१ शशकर्णः काण्वः ॥ अश्विनौ ॥ १ ४. ६. १४. १५ बृहती। २. ३. २०. २१ गायत्री। ५ ककुप्। ७–९. १३. १६–१९ अनुष्टुप्। १० त्रिष्टुप्। ११ विराट्। १२ जगती ॥

॥९॥ आ नूनमश्विना युवं वत्सस्य गंतमवसे। प्रास्मै यच्छतमवृकं पृथु छर्दिर्युयुतं या अरातयः ॥१॥ यदंतरिक्षे यद्दिवि यत्पंच मानुषाँ अनु। नृम्णं तद्धत्तमश्विना ॥२॥ ये वां दंसाँस्यश्विना विप्रासः परिमामृशुः। एवेत्काण्वस्य बोधतं ॥३॥ अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते। अयं सोमो मधुमान्वाजिनीवसू येन वृत्रं चिकेतथः ॥४॥ यदप्सु यद्वनस्पतौ यदोषधीषु पुरुदंससा कृतं। तेनं माविष्टमश्विना ॥५॥३०॥ यन्नासत्या भुरण्यथो यद्वा देव भिषज्यथः। अयं वां वत्सो मतिभिर्न विंधते हविष्मंतं हि गच्छथः ॥६॥ आ नूनमश्विनोर्ऋषिः स्तोमं चिकेत वामया। आ सोमं मधुमत्तमं घर्मं सिंचादथर्वणि ॥७॥ आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना। आ वां स्तोमा इमे मम नभो न चुंच्यवीरत ॥८॥ यद्य वां नासत्योक्थैरांचुच्युवीमहि। यद्वा वाणीभिरश्विनेवेत्काण्वस्य बोधतं ॥९॥ यद्वां कक्षीवाँ उत यद्वंश्व ऋषिर्यद्वां दीर्घतमा जुहाव। पृथी यद्वां वैन्यः सादनेष्वेदतो अश्विना चेत-

कण्वे मेधेऽअतिथिं याभिः वशं दशेऽव्रजं याभिः गोऽशर्ये आवतं ताभिः नः अवतं नरा ॥२०॥२८॥ याभिः नरा चसदस्युं आवतं कृत्व्ये धने ताभिः सु अस्मान् अश्विना प्र अवतं वाजेऽसातये ॥२१॥ प्र वां स्तोमाः सुऽवृक्तयः गिरः वर्धंतु अश्विना पुरुऽचा वृषंहन्ऽतमा ता नः भूतं पुरुऽस्पृहा ॥२२॥ चीणि पदानि अश्विनोः आविः संति गुहा परः कवी चृतस्य पत्मऽभिः अर्वाक् जीवेभ्यः परि ॥२३॥२९॥

॥९॥ आ नूनं अश्विना युवं वत्सस्य गंतं अवसे प्र अस्मे यच्छतं अवृकं पृथु छर्दिः युयुतं याः अरातयः ॥१॥ यत् अंतरिक्षे यत् दिवि यत् पंच मानुषान् अनु नृम्णं तत् धत्तं अश्विना ॥२॥ ये वां दंसांसि अश्विना विप्रासः परिऽममृशुः एव इत् काण्वस्य बोधतं ॥३॥ अयं वां घर्मः अश्विना स्तोमेन परि सिच्यते अयं सोमः मधुऽमान् वाजिनीऽवसू० येन वृषं चिकेतथः ॥४॥ यत् अप्ऽसु यत् वनस्पतौ यत् ओषधीषु पुरुऽदंससा कृतं तेन मा अविष्टं अश्विना ॥५॥३०॥ यत् नासत्या भुरण्यथः यत् वा देवा भिषज्यथः अयं वां वत्सः मतिऽभिः न विंधते हविष्मंतं हि गच्छथः ॥६॥ आ नूनं अश्विनोः ऋषिः स्तोमं चिकेत वामया आ सोमं मधुमत्ऽतमं घर्मं सिंचात् अथर्वणि ॥७॥ आ नूनं रघुऽवर्तनिं रथं तिष्ठाथः अश्विना आ वां स्तोमाः इमे मम नभः न चुच्यवीरत ॥८॥ यत् अद्य वां नासत्या उक्थैः आऽचुच्युवीमहि यत् वा वाणीभिः अश्विना एव इत् काण्वस्य बोधतं ॥९॥ यत् वां कक्षीवान् उत यत् विऽअश्वः ऋषिः यत् वां दीर्घऽतमाः जुहावे पृथौ यत् वां वैन्यः सदनेषु एव इत् अतः अश्विना चेतं-

येषां ॥१०॥३१॥ यातं दृदिप्पा उत नः परस्या भूतं जगत्या उत नस्तनूषा। चर्तिस्तोकाय तनयाय यातं ॥११॥ यदिंद्रेण सरथं याथो अश्विना यद्वा वायुना भवथः समोकसा। यदादित्येभिर्ऋभुभिः सजोषसा यद्वा विष्णोर्विक्रमणेषु तिष्ठथः ॥१२॥ यद्वाश्विनावहं हुवेय वाजसातये। यत्पृत्सु तुर्वणे सहस्त्यप्रेषमश्विनोरवः ॥१३॥ आ नूनं यातमश्विनेमा हव्यानि वां हिता। दुमे सोमासो अधि तुर्वशे यदावियुमे कण्वेषु वामथः ॥१४॥ यद्वां सत्या पराके अवाके अस्ति भेषजं। तेन नूनं विमदाय प्रचेतसा दृदिप्तमाय यच्छतं ॥१५॥३२॥ अभुत्स्यु प्र देव्या साकं वाचाहमश्विनोः। प्यावयेव्या मतिं वि रातिं मर्त्येभ्यः ॥१६॥ प्र बोधयोषो अश्विना प्र देवि सूनृते महि। प्र यज्ञहोतरानुषक्प्र मदाय श्रवो बृहत् ॥१७॥ यदुषो यासि भानुना सं सूर्येण रोचसे। आ हायमश्विनो रथो वर्तिर्याति नृपाय्यं ॥१८॥ यदापीतासो अंगवो गावो न दुह्र ऊधभिः। यद्वा वाणीरनूषत प्र देवयंतो अश्विना ॥१९॥ प्र शुभ्राय प्र शवसे प्र नृषाह्याय शर्मणे। प्र दक्षाय प्रचेतसा ॥२०॥ यन्नूनं धीभिरश्विना पितुर्योना निषीदथः। यद्वा सुम्नेभिरुक्थ्या ॥२१॥३३॥

॥ १० ॥ १–६ प्रगाथः काण्वः ॥ अश्विनौ ॥ १, ५ बृहती । २ मध्येज्योतिः । ३ अनुष्टुप् । ४ पादनिचृत्पंक्तिः । ६ महाबृहती ॥

॥१०॥ यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः। यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना ॥१॥ यद्वां युजं मनवे संमिमिक्षुरेवैत्काण्वस्य बोधतं। बृहस्पतिं विश्वान्देवाँ अहं हुव इंद्राविष्णू अश्विनावाशुहेषसा ॥२॥ त्या न्वश्विना हुवे सुदंससा गृभे कृता। ययोरस्ति प्र णः सख्यं

येथां॥१०॥३१॥ यातं छर्दिःऽपौ उत नः परःऽपा भूतं जगत्ऽपौ उत नः ततनूऽपा वर्तिः तोकाय तनयाय यातं॥११॥ यत् इंद्रेण सऽरथं याथः अश्विना यत् वा वायुना भवथः संऽओकसा यत् आदित्येभिः ऋभुऽभिः सऽजोषसा यत् वा विष्णोः विऽक्रमणेषु तिष्ठथः॥१२॥ यत् अद्य अश्विनौ अहं हुवेयं वाजेऽसातये यत् पृत्ऽसु तुर्वणे सहः तत् श्रेष्ठं अश्विनोः अवः॥१३॥ आ नूनं यातं अश्विना इमा हव्यानि वां हिता इमे सोमासः अधि तुर्वशे यदौ इमे कण्वेषु वां अथ॥१४॥ यत् नासत्या परावति अर्वाके अस्ति भेषजं तेन नूनं विऽमदाय प्रऽचेतसा छर्दिः वत्साय यच्छतं॥१५॥३२॥ अभुत्सि ऊं प्रदेव्या साकं वाचा अहं अश्विनोः वि आवः देवि आ मतिं वि रातिं मर्त्येभ्यः॥१६॥ प्र बोधय उषः अश्विना प्र देवि सूनृते महि प्र यज्ञेऽहोतः आनुषक् प्र मदाय श्रवः बृहत्॥१७॥ यत् उषः यासि भानुना सं सूर्येण रोचसे आ हं अयं अश्विनोः रथः वर्तिः याति नृऽपाय्यं॥१८॥ यत् आऽपीतासः अंशवः गावः न दुह्रे ऊधऽभिः यत् वा वाणीः अनूषत प्र देवऽयंतः अश्विना॥१९॥ प्र द्युम्नाय प्र शवसे प्र नृऽसह्याय शर्मणे प्र दक्षाय प्रऽचेतसा॥२०॥ यत् नूनं धीभिः अश्विना पितुः योना निऽसीदथः यत् वा सुम्नेभिः उक्थ्या॥२१॥३३॥

॥१०॥ यत् स्थः दीर्घऽप्रसद्मनि यत् वा अदः रोचने दिवः यत् वा समुद्रे अधि आऽकृते गृहे अतः आ यातं अश्विना॥१॥ यत् वा यज्ञं मनवे संऽमिमिक्षथुः एव इत् काण्वस्य बोधतं वृहस्पतिं विश्वान् देवान् अहं हुवे इंद्राविष्णू अश्विनौ आशुऽहेषसा॥२॥ त्या नु अश्विना हुवे सुऽदंससा गृभे कृता ययोः अस्ति प्र नः सख्यं

देवेष्वध्यायँ ॥३॥ ययोरधि प्र यज्ञा असूरे संति सूर्यः। ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिवतः सोम्यं मधु ॥४॥ यद्द्यावि नावपाग्यत्प्राक्स्थो वाजिनीवसू। यद्वह्व्यनवि तुर्वशे यदौ हुवे वामथ मा गतं ॥५॥ यदंतरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु। यद्वा स्वधाभिरधितिष्ठथो रथमत आ यातमश्विना ॥६॥ ३४॥

॥ ११ ॥ १–१० यामः कात्यः ॥ अग्निः ॥ १ प्रतिष्ठा। २ वर्धमाना। ३–९ गायत्री। १० त्रिष्टुप् ॥

॥ ११ ॥ त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेष्वीड्यः ॥१॥ त्वमसि प्रशस्यो विदथेषु सहंत्य। अग्ने रथीरध्वराणां ॥२॥ स त्वमस्मदप द्विषो युयोधि जातवेदः। अदेवीरग्ने अरातीः ॥३॥ अंति चित्संतमह यज्ञं मर्तस्य रिपोः। नोप वेषि जातवेदः ॥४॥ मतीं अमर्त्यस्य ते भूरि नाम मनामहे। विप्रासो जातवेदसः ॥५॥ ३५॥ विप्रं विप्रासोऽवसे देवं मर्तास ऊतये। अग्निं गीर्भिर्हवामहे ॥६॥ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्। अग्ने त्वांकामया गिरा ॥७॥ पुरुत्रा हि सदृङ्असि विशो विश्वा अनु प्रभुः। समत्सु त्वा हवामहे ॥८॥ समत्स्वग्निमवसे वाजयंतो हवामहे। वाजेषु चित्रराधसं ॥९॥ प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि। स्वां चाग्ने तन्वं पिप्रयस्वास्मभ्यं च सौभगमा यजस्व ॥१०॥ ३६॥ ८॥ ५॥

॥ १२ ॥ १–३३ पर्वतः कात्यः ॥ इंद्रः ॥ उष्णिक् ॥

॥ १२ ॥ य इंद्र सोमपातमो मदः शविष्ठ चेतति। येना हंसि न्यत्रिणं तमीमहे ॥१॥ येना दशग्वमधिगुं वेपयंतं स्वर्णरं। येनो समुद्रमाविथा तमीमहे ॥२॥ येन सिंधुं महीरपो रथाँ इव

देवेषु अधि आयम्॥३॥ ययोः अधि प्र यज्ञाः असूरे संति सूरयः ता यज्ञस्य अध्वरस्य प्रऽचेतसा स्वधाभिः या पिबतः सोम्यं मधु ॥४॥ यत् अद्य अश्विनौ अपाक् यत् प्राक् स्थः वाजिनीऽवसू॰ यत् द्रुह्यवि अनवि तुर्वशे यदौ हुवे वां अध्व मा आ गतं॥५॥ यत् अंतरिक्षे पतथः पुरुऽभुजा यत् वा इमे रोदसी अनु यत् वा स्वधाभिः अधिऽतिष्ठथः रथं अतः आ यातं अश्विना ॥६॥३४॥

॥११॥ त्वं अग्ने व्रतऽपाः असि देवः आ मर्त्येषु आ त्वं यज्ञेषु ईड्यः॥१॥ त्वं असि प्रऽशस्यः विदथेषु सहंत्य अग्ने रथीः अध्वराणां॥२॥ सः त्वं अस्मत् अप द्विषः युयोधि जातऽवेदः अदेवीः अग्ने अरातीः॥३॥ अंति चित् संतं अह यज्ञं मर्तस्य रिपोः न उप वेषि जातऽवेदः॥४॥ मर्तः अमर्त्यस्य ते भूरि नाम मनामहे विप्रासः जातऽवेदसः॥५॥३५॥ विप्रं विप्रासः अवसे देवं मर्तासः ऊतये अग्निं गीःऽभिः हवामहे॥६॥ आ ते वत्सः मनः यमत् परमात् चित् सधऽस्थात् अग्ने त्वांऽकामया गिरा॥७॥ पुरुऽचा हि सऽइट् असि विशः विश्वाः अनु प्रऽभुः समत्ऽसु त्वा हवामहे ॥८॥ समत्ऽसु अग्निं अवसे वाजऽयंतः हवामहे वाजेषु चित्रऽराधसं॥९॥ प्रत्नः हि कं ईड्यः अध्वरेषु सनात् च होता नव्यः च सत्सि स्वां च अग्ने तन्वं पिप्रयस्व अस्मभ्यं च सौभगं आ यजस्व ॥१०॥३६॥८॥५॥

॥१२॥ यः इंद्र सोमऽपातमः मदः शविष्ठ चेतति येन हंसि निऽअचिणं तं ईमहे॥१॥ येन दशऽग्वं अध्रिऽगुं वेपयंतं स्वःऽनरं येन समुद्रं आविथ तं ईमहे॥२॥ येन सिंधुं महीः अपः रथान्ऽइव

प्रचोदयः। पंथामृतस्य यातवे तमीमहे॥३॥ इमं स्तोममभिष्टये घृतं न पूतमद्रिवः। येना नु सद्य ओजसा ववक्षिथ॥४॥ इमं जुषस्व गिर्वणः समुद्र इव पिन्वते। इंद्र विश्वाभिरूतिभिर्ववक्षिथ॥५॥१॥ यो नो देवः परावतः सखित्वनाय मामहे। दिवो न वृष्टिं प्रयर्यन्ववक्षिथ॥६॥ ववक्षुरस्य केतवे उत यज्ञो गभस्त्योः। यत्सूर्यो न रोदसी अवर्धयत्॥७॥ यदिंद्र प्रवृद्ध सत्पते सहस्रं महिषाँ अवः। आदित्ते इंद्रियं महि प्र वावृधे॥८॥ इंद्रः सूर्यस्य रश्मिभिर्न्येजसानमोषति। अग्निर्वनेव सासहिः प्र वावृधे॥९॥ इयं न चक्रियावती धीतिरेति नवीयसी। सपर्यंती पुरुप्रिया मिमीत इत्॥१०॥२॥ गर्भो यज्ञस्य देवयुः क्रतुं पुनीत आनुषक्। सोमेरिंद्राय वायवे मिमीत इत्॥११॥ सनिमिंचस्य यशस इंद्रः सोमस्य पीतये। प्राची वाशीव सुन्वते मिमीत इत्॥१२॥ यं विप्रा उक्थवाहसोऽभिप्रमंदुरायवः। घृतं न पिप्य आसन्यृतस्य यत्॥१३॥ उत स्वराजे अदितिः सोममिंद्राय जीजनत्। पुरुप्रशस्तमूतये ज्योतिस्य यत्॥१४॥ अभि यद्देव ऊतये ऽनूषत प्रशंसये। न देव विव्रता हरी ज्योतिस्य यत्॥१५॥३॥ यासोमंमिंद्र चिच्चोदयो यज्ञे च चित्तनाने। यज्ञो मरुत्सु मंदसे ममिंदुभिः॥१६॥ यज्ञो नक्ष परावति समुद्रे अधि मंदसे। अस्माकमिन्नुते रया ममिंदुभिः॥१७॥ यज्ञासि सुन्वतो वृधो यजमानस्य सत्पते। उक्थे वा यस्य रण्यसि ममिंदुभिः॥१८॥ देवदेवं वो ऽवसे इंद्रमिंद्रं गृणीषणि। अधा यज्ञाय तुर्वणे धनंजयः॥१९॥ यज्ञेभिर्यज्ञवाहसमिंद्रं सोमेभिः सोमपातमं। हरिभिरिंद्र वावृधुर्धनंजयः॥२०॥४॥ महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः। विश्वा

प्रऽचोदयः पंथाँ ऋतस्य यानंवे तं ईमहे॥३॥ इमं स्तोमँ अभिष्टये घृतं न पूतं अद्रिऽवः येन नु सद्यः ओजसा ववक्षिथ॥४॥ इमं जु-षस्व गिर्वणः समुद्रःऽइव पिन्वते इंद्र विश्वाभिः ऊतिऽभिः ववक्षिथ॥५॥१॥ यः नः देवः पराऽवतः सखिऽत्वनाय ममहे दिवः न वृष्टिं प्रथयन् ववक्षिथ॥६॥ ववक्षुः अस्य केतवः उत वज्रः गभस्त्योः यत् सूर्यः न रोदसी अवर्धयत्॥७॥ यदिं प्रऽवृद्ध सत्-ऽपते सहस्रं महिषान् अर्घः आत् इत् ते इंद्रियं महिं प्र ववृधे॥८॥ इंद्रः सूर्यस्य रश्मिऽभिः नि अर्शसानं ओषति अग्निः वनाऽइव सस्रहिः प्र ववृधे॥९॥ इयंते ऋत्वियऽवती धीतिः एति नवीयसी सपर्यंती पुरुऽप्रिया मिमीते इत्॥१०॥२॥ गर्भेः यज्ञस्य देवऽयुः क्रतुं पुनीते आनुषक् स्तोमैः इंद्रस्य ववृधे मिमीते इत्॥११॥ स-निः मित्रस्य पप्रथे इंद्रः सोमस्य पीतये प्राचीं वाशीऽइव सुन्वते मिमीते इत्॥१२॥ यं विप्राः उक्थऽवाहसः अभिऽप्रमंदुः आ-यवः घृतं न पिप्ये आसनि ऋतस्य यत्॥१३॥ उत स्वऽराजे अ-दितिः स्तोमँ इंद्राय जीजनत् पुरुऽप्रशस्तं ऊतये ऋतस्य यत्॥१४॥ अभि वह्नयः ऊतये अनूषत प्रऽशस्तये न देव विऽव्रता हरी ऋतस्य यत्॥१५॥३॥ यत् सोमँ इंद्र विष्णवि यत् वा घ चिते आग्ने यत् वा मरुत्ऽसु मंदसे सं इंदुऽभिः॥१६॥ यत् वा शक्र परा-ऽवति समुद्रे अधि मंदसे अस्माकँ इत् सुते रण सं इंदुऽभिः॥१७॥ यत् वा असि सुन्वतः वृधः यजमानस्य सत्ऽपते उक्थे वा यस्य रण्यसि सं इंदुऽभिः॥१८॥ देवंऽदेवं वः अवसे इंद्रंऽइंद्रं गृ-णीषणि अर्घ यज्ञाय तुर्वणे वि आनशुः॥१९॥ यज्ञेभिः यज्ञऽवा-हसं सोमेभिः सोमऽपातमं होत्राभिः इंद्रं ववृधुः वि आनशुः॥२०॥४॥ महीः अस्य प्रऽनीतयः पूर्वीः उत प्रऽशस्तयः विश्वा

वसूनि दाशुषे व्यानशुः ॥२१॥ इंद्रं वृत्राय हंतवे देवासो दधिरे पुरः। इंद्रं वाणीरनूषता समोजसे ॥२२॥ महांतं महिना वयं स्तोमेभिर्हवनश्रुतं। अर्कैरभि प्र णोनुमः समोजसे ॥२३॥ न यं विविक्तो रोदसी नांतरिक्षाणि वज्रिणं। अमादिदस्य तित्विषे समोजसः ॥२४॥ यदिंद्र पृतनाज्ये देवास्त्वा दधिरे पुरः। आदित्ते हर्यता हरी ववक्षतुः ॥२५॥५॥ यदा वृत्रं नदीवृतं शवसा वज्रिन्नर्बधीः। आदित्ते हर्यता हरी ववक्षतुः ॥२६॥ यदा ते विष्णुरोजसा त्रीणि पदा विचक्रमे। आदित्ते हर्यता हरी ववक्षतुः ॥२७॥ यदा ते हर्यता हरी वावृधाते दिवेदिवे। आदित्ते विश्वा भुवनानि येमिरे ॥२८॥ यदा ते मारुतीर्विशस्तुभ्यमिंद्र नियेमिरे। आदित्ते विश्वा भुवनानि येमिरे ॥२९॥ यदा सूर्यममुं दिवि शुक्रं ज्योतिरधारयः। आदित्ते विश्वा भुवनानि येमिरे ॥३०॥ इमां त इंद्र सुष्टुतिं विप्र इयर्ति धीतिभिः। जामिं पदेव पिप्रतीं प्राध्वरे ॥३१॥ यदस्य धार्मनि प्रिये संमीचीनासो अस्वरन्। नाभा यज्ञस्य दोहना प्राध्वरे ॥३२॥ सुवीर्यं स्वश्व्यं सुगव्यमिंद्र दद्धि नः। होतेव पूर्वचित्तये प्राध्वरे ॥३३॥६॥२॥

॥ १३ ॥ १-३३ नारदः काण्वः ॥ इंद्रः ॥ त्रयस्त्रिंशदृचम् ॥

॥१३॥ इंद्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यं। विदे वृधस्य दक्षसो महान्हि षः ॥१॥ स प्रथमे व्योमनि देवानां सदने वृधः। सुपारः सुश्रवस्तमः समप्सुजित् ॥२॥ तमर्ह वाजसातय इंद्रं भराय शुष्मिणं। भवा नः सुम्ने अंतमः सखा वृधे ॥३॥ इयं त इंद्र गिर्वणो रातिः क्षरति सुन्वतः। मंदानो अस्य बर्हिषो वि राजसि ॥४॥ नूनं तदिंद्र दद्धि नो यत्त्वा सुन्वंत ईमहे। रयिं न-

वसूनि दाशुषे वि आनशुः ॥२१॥ इंद्रं वृत्राय हंतवे देवासः दधिरे पुरः इंद्रं वाणीः अनूषत सं ओजसे ॥२२॥ महांतं महिना वयं स्तोमेभिः हवनऽश्रुतं अर्कैः अभि प्र नोनुमः सं ओजसे ॥२३॥ न यं विविक्तः रोदसी न अंतरिक्षाणि वज्रिणं अमांत् इत् अस्य तित्विषे सं ओजसः ॥२४॥ यत् इंद्र पृतनाज्ये देवाः त्वा दधिरे पुरः आत् इत् ते हर्यता हरी ववक्षतुः ॥२५॥५॥ यदा वृत्रं नदीऽवृतं शवसा वज्रिन् अवधीः आत् इत् ते हर्यता हरी ववक्षतुः ॥२६॥ यदा ते विष्णुः ओजसा चोरिं पदा विऽचक्रमे आत् इत् ते हर्यता हरी ववक्षतुः ॥२७॥ यदा ते हर्यता हरी ववृधाते दिवेऽदिवे आत् इत् ते विश्वा भुवनानि येमिरे ॥२८॥ यदा ते मारुतीः विशः तुभ्यं इंद्र निऽयेमिरे आत् इत् ते विश्वा भुवनानि येमिरे ॥२९॥ यदा सूर्यं अमुं दिवि शुक्रं ज्योतिः अधारयः आत् इत् ते विश्वा भुवनानि येमिरे ॥३०॥ इमां ते इंद्र सुऽस्तुतिं विप्रः इयर्ति धीतिऽभिः जामिं पदाऽइव पिप्रतीं प्र अध्वरे ॥३१॥ यत् अस्य धामनि प्रिये संऽईचीनासः अस्वरन् नाभा यज्ञस्य दोहना प्र अध्वरे ॥३२॥ सुऽवीर्यं सुऽअश्व्यं सुऽगव्यं इंद्र दधि नः होताऽइव पूर्वऽचित्तये प्र अध्वरे ॥३३॥६॥२॥

॥१३॥ इंद्रः सुतेषु सोमेषु क्रतुं पुनीते उक्थ्यं विदे वृधस्य दक्षसः महान् हि सः ॥१॥ सः प्रथमे विऽओमनि देवानां सदने वृधः सुऽपारः सुश्रवःऽतमः सं अप्सुऽजित् ॥२॥ तं अह्वे वाजऽसातये इंद्रं भराय शुष्मिणं भवं नः सुम्ने अंतमः सखा वृधे ॥३॥ इयंते इंद्र गिर्वणः रातिः क्षरति सुन्वतः मंदानः अस्य बर्हिषः वि राजसि ॥४॥ नूनं तत् इंद्र दधि नः यत् त्वा सुन्वंतः ईमहे रयिं नः

श्चित्रमा भरा स्वर्विदं ॥५॥७॥ स्तोता यत्ते विचर्षणिरति-प्रशर्धयन्निरः। वया इवानु रोहते जुषंत यत् ॥६॥ प्रत्नवज्जनया गिरः शृणुधी जरितुर्हवं। मदेमदे ववक्षिथा सुकृत्वने ॥७॥ क्रीळँत्यस्य सूनृता आपो न प्रवता यतीः। अया धिया य उच्यते पतिर्दिवः ॥८॥ उतो पतिर्य उच्यते कृष्टीनामेक इद्वशी। नमोवृधैरवस्युभिः सुते रण ॥९॥ स्तुहि श्रुतं विपश्चितं हरी यस्य प्रसक्षिणा। गंतारा दाशुषो गृहं नमस्विनः ॥१०॥८॥ तूतुजानो महेमतेऽश्वेभिः शुपितप्सुभिः। आ याहि यज्ञमाशुभिः शमिद्धि त्वं ॥११॥ इंद्र शविष्ठ सत्पते रयिं गृणत्सु धारय। अवः सूरिभ्यो अमृतं वसुत्वनं ॥१२॥ हवे त्वा सूर उदिते हवे मध्यंदिने दिवः। जुषाण इंद्र सप्तिभिर्न आ गहि ॥१३॥ आ तू गहि प्र तु द्रव मत्स्वा सुतस्य गोमतः। नंतुं तनुष्व पूर्व्य यथा विदे ॥१४॥ यच्छुक्रासि परावति यदर्वावति वृत्रहन्। यद्वा समुद्रे अंधसोऽवितेदसि ॥१५॥९॥ इंद्रं वर्धंतु नो गिर इंद्रं सुतास इंदवः। इंद्रं हविष्मतीर्विशो अराणिषुः ॥१६॥ तमिद्विप्रा अवस्यवः प्रवत्वंतीभिरूतिभिः। इंद्रं स्तोमीरवर्धयन्वया इव ॥१७॥ त्रिकद्रुकेषु चेतनं देवासो यज्ञमंतत। तमिद्वर्धंतु नो गिरः सदावृधं ॥१८॥ स्तोता यत्ते अनुव्रत उक्थान्यृतुथा दधे। शुचिः पावक उच्यते सो अद्भुतः ॥१९॥ तदिद्रुद्रस्य चेतति यद्गृणेषु धामसु। मनो यत्रा वि तद्धुर्विचेतसः ॥२०॥१०॥ यदि मे सख्यमावरं इमस्य पाह्यंधसः। येन विश्वा अति द्विषो अतारिम ॥२१॥ कदा त इंद्र गिर्वणः स्तोता भवाति शंतमः। कदा नो गव्ये अश्व्ये वसौ दधः ॥२२॥ उत ते सुष्टुता हरी वृषणा वहतो रथं। अजुर्यस्य मदिं-

चित्रं आभर स्वःऽविदे॥५॥७॥ स्तोता यत्ते विऽचर्षणिः श्रुतिऽअग्रश्रवयत् गिरः वयाःऽइव अनु रोहते जुषंत यत्॥६॥ मन्दऽअत् जनय गिरः शृणुधि जरितुः हवं मदेऽमदे वविक्षिय सुऽकृत्वने ॥७॥ क्रीळंति अस्य सूनृताः आपः न प्रऽवता यतीः अया धिया यः उच्यते पतिः दिवः॥८॥ उतो पतिः यः उच्यते कृष्टीनां एकः इत् वशी नमःऽवृधैः अवस्युऽभिः सुते रण॥९॥ स्तुहि श्रुतं विपःऽचितं हरीं यस्य प्रऽसक्षिणा गंतारा दाशुषः गृहं नमस्विनः ॥१०॥८॥ तूतुजानः महेऽमते अश्वेभिः प्रुषितप्सुऽभिः आ याहि यज्ञं आशुऽभिः शं इत् हि ते॥११॥ इंद्र शविष्ठ सत्ऽपते रयिं गृणत्ऽसु धारय श्रवः सूरिऽभ्यः अमृतं वसुऽत्वनं॥१२॥ हवे त्वा सूरं उत्ऽइते हवे मध्यंदिने दिवः जुषाणः इंद्र सत्मिऽभिः नः आ गहि॥१३॥ आ तु गहि प्र तु द्रव मत्स्वा सुतस्य गोऽमतः तंतुं ततुष्व पूर्व्यं यथा विदे॥१४॥ यत् शक्र असि पराऽवति यत् अर्वाऽवति वृत्रऽहन् यत् वा समुद्रे अंधसः अविता इत् असि॥१५॥९॥ इंद्रं वर्धंतु नः गिरः इंद्रं सुतासः इंदवः इंद्रं हविष्मतीः विशः अरण्युः॥१६॥ तं इत् विप्राः अवस्यवः प्रवत्वतीभिः ऊतिऽभिः इंद्रं क्षोणीः अवर्धयन् वयाःऽइव ॥१७॥ चिऽकेतुकेषु चेतनं देवासः यज्ञं अक्तत तं इत् वर्धंतु नः गिरः सदाऽवृधं॥१८॥ स्तोता यत् ते अनुऽव्रतः उक्थानि हृतुऽथा दधे शुचिः पावकः उच्यते सः अद्भुतः॥१९॥ तत् इत् रुद्रस्य चेतति यद्वं प्रनेषु धामऽसु मनः यच्च वितत्नुधः विऽचेतसः॥२०॥१०॥ यदिमे सख्यं आऽवरः द्रुमस्य पाहि अंधसः येन विश्वाः अति द्विषः अतारिम॥२१॥ कदा ते इंद्र गिर्वणः स्तोता भवाति शंऽतमः कदा नः गव्ये अश्व्ये वसौ दधः ॥२२॥ उत ते सुऽस्तुता हरी वृषणा वहतः रथं अजुर्यस्य मदिन्-

तमु॑ यमीमहे॥२३॥ तमी॑महे पुरुष्टुतं य॒ह्वं प्र॒त्नाभि॑रू॒तिभिः॑। नि ब॒र्हिषि॑ प्रि॒ये स॑दद्धि॒ता॥२४॥ वर्धे॑स्वा॒ सु पु॑रुष्टुत ऋ॒षि॑ष्टुता-भिरू॒तिभिः॑। धु॒क्षस्व॑ पिप्युषी॒मिष॒मवा॑ च नः ॥२५॥११॥ इंद्र॒ त्वमि॑ति॒दंसी॒त्थां स्तु॒वतो॑ अद्रिवः। ऋ॒तादि॑यर्मि ते॒ धियं॑ मनो॒-युजं॑ ॥२६॥ इ॒ह त्या सध॒माद्या॑ युजा॒नः सोम॑पीतये। हरी॑ इंद्र॒ प्रत॑द्वसू॒ अभि॑ स्वर॥२७॥ अ॒भि स्व॑रंतु ये त॑व रु॒द्रासः॑ सश्चत॒ श्रिय॑ं। उ॒तो म॒रुत्व॑तीर्विशो॒ अभि॑ प्रयः॥२८॥ इ॒मा अ॑स्य प्र॒तू॒तयः॑ पदं जु॑षंत य॒ह्वि॑। नाभा॑ य॒ज्ञस्य॒ सं द॑धुर्यथा॑ वि॒दे॥२९॥ अ॒यं दी॒र्घाय॒ चक्ष॑से॒ प्राचि॑ प्रयत्यध्व॒रे। मि॒मी॒ते य॒ज्ञमा॑नुषग्वि॒चक्ष्य॑ ॥३०॥१२॥ वृषा॒यमिं॑द्र ते॒ रथ॑ उ॒तो ते॒ वृष॑णा॒ हरी॑। वृषा॒ त्वं श॑त॒क्रतो॒ वृषा॒ हव॑ः॥३१॥ वृषा॒ यावा॒ वृषा॒ मदो॒ वृषा॒ सोमो॑ अ॒यं सु॒तः॑। वृषा॑ य॒ज्ञो य॑मिन्व॑सि॒ वृषा॒ हव॑ः॥३२॥ वृषा॑ त्वा॒ वृष॑णं हुवे॒ वज्रि॑-ञ्चि॒त्राभि॑रू॒तिभिः॑। वा॒वंथ॒ हि प्रति॑ष्टुतिं॒ वृषा॒ हव॑ः ॥३३॥१३॥

॥ १४ ॥ १–१५ गोपूत्रयश्वसूक्तिनौ काण्वायनौ । इंद्रः ॥ गायत्री ॥

॥१४॥ यदिं॑द्राहं यथा॒ त्वमीशी॑य॒ वस्व॒ एक॒ इत्। स्तो॒ता मे॒ गोष॑खा स्यात्॥१॥ शिक्षे॑यमस्मै॒ दित्से॑यं॒ शची॑पते॒ मनी॑षिणे॑। यदहं गोप॑तिः स्यां॥२॥ धे॒नुष्ट॑ इंद्र सू॒नृता॒ यज॑मानाय सुन्व॒ते। गामश्वं॑ पिप्युषीं॑ दुहे॥३॥ न तं॑ वंतास्ति॒ राध॑स॒ इंद्रं॑ देवो॒ न मर्त्यः॑। यद्दित्स॑सि॒ स्तुतो॒ मघं॑॥४॥ यज्ञ॒ इंद्र॑मवर्धय॒द्यद्भूमिं॒ व्यवर्तयत्। च॒क्राण॒ ओप॑शं दि॒वि॥५॥१४॥ वावृ॑धा॒नस्य॑ ते॒ वयं॑ वि॒श्वा धना॑नि जिग्युषः। ऊ॒तिमिं॑द्रा वृणीमहे॥६॥ व्यं॑ १ नरिक्ष॒मति॑रन्मदे॒ सोम॑स्य रोच॒ना। इंद्रो॒ यदभि॑नद्बलं॥७॥ उ॒ग्रा आ॑जदं॑गिरोभ्य आ॒विष्कृ॑णव॒न्गुहा॑ स॒ती॑। अ॒र्वाचं॑ नु-

ऽतमं यं ईमहे ॥२३॥ तं ईमहे पुरुऽस्तुतं यह्वं प्रत्नाभिः ऊतिऽभिः नि बर्हिषि प्रिये सदत् अधा दिता ॥२४॥ वर्धस्व सु पुरुऽस्तुत ऋषिऽस्तुताभिः ऊतिऽभिः धुक्षस्व पिप्युषीं इषं अवं च नः ॥२५॥११॥ इंद्र त्वं अविता इत् असि इत्था स्तुवतः अद्रिऽवः ऋतात् इयर्मि ते धियं मनःऽयुजं ॥२६॥ इह त्या सधऽमाद्या युजानः सोमऽपीतये हरी इंद्र प्रतत्ऽवसू० अभि स्वर ॥२७॥ अभि स्वरंतु ये तवं रुद्रासः सश्चत श्रियं उतो मरुत्वतीः विशः अभिप्रयः ॥२८॥ इमाः अस्य प्रऽतूर्तयः पदं जुषंत यत् दिवि नाभा यज्ञस्य संदधुः यथा विदे ॥२९॥ अयं दीर्घाय चक्षसे प्राचिं प्रऽयति अध्वरे मिमीते यज्ञं आनुषक् विऽचक्ष्यं ॥३०॥१२॥ वृषा अयं इंद्र ते रथः उतो ते वृषणा हरी वृषा त्वं शतऽक्रतो० वृषा हवः ॥३१॥ वृषा यावा वृषा मदः वृषा सोमः अयं सुतः वृषा यज्ञः यं इन्वसि वृषा हवः ॥३२॥ वृषा त्वा वृषणं हुवे वज्रिन् चित्राभिः ऊतिऽभिः ववंथ हि प्रतिऽस्तुतिं वृषा हवः ॥३३॥१३॥

॥१४॥ यत् इंद्र अहं यथा त्वं ईशीय वस्वः एकः इत् स्तोता मे गोऽसखा स्यात् ॥१॥ शिक्षेयं अस्मै दित्सेयं शचीऽपते मनीषिणे यत् अहं गोऽपतिः स्यां ॥२॥ धेनुः ते इंद्र सूनृता यजमानाय सुन्वते गां अश्वं पिप्युषीं दुहे ॥३॥ न ते वर्ता अस्ति राधसः इंद्र देवः न मर्त्यः यत् दित्ससि स्तुतः मघं ॥४॥ यज्ञः इंद्रं अवर्धयत् यत् भूमिं वि अवर्तयत् चक्राणः ओपशं दिवि ॥५॥१४॥ ववृधानस्य ते वयं विश्वा धनानि जिग्युषः ऊतिं इंद्र आ वृणीमहे ॥६॥ वि अंतरिक्षं अतिरत् मदे सोमस्य रोचना इंद्रः यत् अभिनत् वलं ॥७॥ उत् गाः आजत् अंगिरःऽभ्यः आविः कृण्वन् गुहा सतीः अर्वाचं नु-

नुदे वलं॥८॥ इंद्रेण रोचना दिवो दृळ्हानि दंहितानि च। स्थिराणि न पराणुदे॥९॥ अपामूर्मिमदन्निव स्तोमं इंद्राजिरायते। वि ते मदा अराजिषुः॥१०॥१५॥ त्वं हि स्तोमवर्धन इंद्रास्युक्थवर्धनः। स्तोतृणामुत भद्रकृत्॥११॥ इंद्रमित्केशिना हरी सोमपेयाय वक्षतः। उप यज्ञं सुराधसं॥१२॥ अपां फेनेन नमुचेः शिर इंद्रोदवर्तयः। विश्वा यदजयः स्पृधः॥१३॥ मायाभिरुत्सिसृप्सत इंद्र द्यामारुरुक्षतः। अव दस्यूँरधूनुथाः॥१४॥ असुन्वामिंद्र संसदं विषूचीं व्यनाशयः। सोमपा उत्तरो भवन्॥१५॥१६॥

॥ १५ ॥ १–१३ गोपूत्रयाश्वमूत्रिणौ काण्वायनौ ॥ इंद्रः ॥ त्रिष्टुबाद्याः ॥

॥१५॥ तम्वभि प्र गायत पुरुहूतं पुरुष्टुतं। इंद्रं गीर्भिस्तविषमा विवासत॥१॥ यस्य द्विबर्हसो बृहत्सहो दाधार रोदसी। गिरीरजाँ अपः स्वर्वृषत्वना॥२॥ स राजसि पुरुष्टुतँ एको वृत्राणि जिघ्नसे। इंद्र जैत्रा श्रवस्या च यंतवे॥३॥ तं ते मदं गृणीमसि वृषणं पृत्सु सासहिं। उ लोककृत्नुमद्रिवो हरिश्रियं॥४॥ येन ज्योतीष्यायवे मनवे च विवेदिथ। मंदानो अस्य बर्हिषो वि राजसि॥५॥१७॥ तदुद्या चित्त उक्थिनोऽनु ष्टुवंति पूर्वथा। वृषपत्नीरपो जया दिवेदिवे॥६॥ तव त्यदिंद्रियं बृहत्तव शुष्ममुत क्रतुं। वज्रं शिशाति धिषणा वरेण्यं॥७॥ तव द्यौरिंद्र पौंस्यं पृथिवी वर्धति श्रवः। त्वामापः पर्वतासश्च हिन्विरे॥८॥ त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः। त्वां शर्धो मदत्यनु मारुतं॥९॥ त्वं वृषा जनानां मंहिष्ठ इंद्र जज्ञिषे। सचा विश्वा स्वपत्यानि दधिषे॥१०॥१८॥ सचा त्वं पुरुष्टुतँ एको वृत्राणि तोशसे। नान्य इंद्रात्करणं

नुदे वलं॥८॥ इंद्रेण रोचना दिवः दृळ्हानि दृंहितानि च स्थिराणि न पराऽनुदे॥९॥ अपां ऊर्मिः मदन्ऽइव स्तोमः इंद्र अजिरऽयते वि ते मदाः अराजिषुः॥१०॥१५॥ त्वं हि स्तोमऽवर्धनः इंद्र असि उक्थ्ऽवर्धनः स्तोतॄणां उत भद्रऽकृत्॥११॥ इंद्रं इत् केशिना हरी सोमऽपेयाय वक्षतः उप यज्ञं सुऽराधसं॥१२॥ अपां फेनेन नमुचेः शिरः इंद्र उत् अवर्तयः विश्वाः यत् अजयः स्पृधः॥१३॥ मायाभिः उत्ऽसिसृप्सतः इंद्र द्यां आऽरुरुक्षतः अवदस्यून् अधूनुथाः॥१४॥ असुन्वां इंद्र संऽसदं विषूचीं वि अनाशयः सोमऽपाः उत्ऽतरः भवन्॥१५॥१६॥

॥१५॥ तं ऊं अभि प्र गायत पुरुऽहूतं पुरुऽस्तुतं इंद्रं गीःऽभिः तविषं आ विवासत॥१॥ यस्य द्विऽबर्हसः बृहत् सहः दाधारं रोदसी गिरीन् अजान् अपः स्वः वृषऽत्वना॥२॥ सः राजसि पुरुऽस्तुत एकः वृत्राणि जिघ्नसे इंद्र जैत्रा श्रवस्या च यंतवे॥३॥ तं ते मदं गृणीमसि वृषणं पृत्ऽसु सासहिं ऊं लोकऽकृत्नुं अद्रिऽवः हरिऽश्रियं॥४॥ येन ज्योतींषि आयवे मनवे च विवेदिथ मंदानः अस्य बर्हिषः वि राजसि॥५॥१७॥ तत् अद्य चित् ते उक्थिनः अनु स्तुवंति पूर्वऽथा वृषऽपत्नीः अपः जय दिवेऽदिवे॥६॥ तवं त्यत् इंद्रियं बृहत् तवं शुष्मं उत क्रतुं वज्रं शिशाति धिषणा वरेण्यं॥७॥ तवं द्यौः इंद्र पौंस्यं पृथिवी वर्धति श्रवः त्वां आपः पर्वतासः च हिन्विरे॥८॥ त्वां विष्णुः बृहन् क्षयः मित्रः गृणाति वरुणः त्वां शर्धः मदति अनु मारुतं॥९॥ त्वं वृषा जनानां मंहिष्ठः इंद्र जज्ञिषे सचा विश्वा सुऽअपत्यानि दुधिषे॥१०॥१८॥ सचा त्वं पुरुऽस्तुत एकः वृत्राणि तोशसे न अन्यः इंद्रात् करणं

भूयं इत्वति॥११॥ यदिंद्र मन्मुशस्त्वा नानां हवंत ऊतयें। अस्माकेभिर्नृभिरत्रा स्वर्जय॥१२॥ अरं क्षयाय नो महे विश्वा रूपाण्याविशन्। इंदुं जैत्राय हर्षया शचीपतिं॥१३॥१९॥

॥ १६ ॥ १–१२ इरिंबिठिः काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥१६॥ प्र सम्राजं चर्षणीनामिंदुं स्तोता नव्यं गीर्भिः। नरं नृषाहं मंहिष्ठं॥१॥ यस्मिन्नुक्थानि रण्यंति विश्वानि च श्रवस्या। अपामवो न समुद्रे॥२॥ तं सुष्टुत्या विवासे ज्येष्ठराजं भरे कृत्नुं। महो वाजिनं सनिभ्यः॥३॥ यस्यानूना गभीरा मदा उरुवस्तरुत्राः। हर्षुमंतः शूरसातौ॥४॥ तमिद्वनेषु हितेष्वधिवाकायं हवंते। येषामिंद्रस्ते जयंति॥५॥ तमिन्नरोयंति तं कृतेभिश्चर्षणयः। एष इंद्रो वरिवस्कृत्॥६॥२०॥ इंद्रो ब्रह्मेंद्र ऋषिरिंद्रः पुरू पुरुहूतः। महान्महीभिः शचीभिः॥७॥ स स्तोम्यः स हव्यः सत्यः सत्वा तुविकूर्मिः। एकश्चित्सन्नभिभूतिः॥८॥ तमर्केभिस्तं सामभिस्तं गायत्रैश्चर्षणयः। इंदुं वर्धंति क्षितयः॥९॥ प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु। सासह्वांसं युधामित्रान्॥१०॥ स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः। इंद्रो विश्वा अति द्विषः॥११॥ स त्वं नं इंद्र वाजेभिर्दशस्वा चं गातुया चं। अच्छा च नः सुम्नं नेषि॥१२॥२१॥

॥ १७ ॥ १–१५ इरिंबिठिः काण्व ॥ इंद्रः ॥ १–१३ गायत्री । १४ बृहती । १५ सतोबृहती ॥

॥१७॥ आ याहि सुषुमा हि त इंदो सोमं पिबा इमं। एदं बर्हिः सदो मम॥१॥ आ त्वा ब्रह्मयुजा हरी वहंतामिंद्र केशिना। उप ब्रह्माणि नः शृणु॥२॥ ब्रह्माणस्त्वा वयं युजा सोमपामिंद्र सोमिनः। सुतावंतो हवामहे॥३॥ आ नो याहि सुतावंतोऽस्माकं

भूयः इन्वति॥११॥ यत् इंद्र मन्मऽशः त्वा नानां हवंते ऊतये अस्माकेभिः नृऽभिः अत्र स्वः जय॥१२॥ अरं क्षयाय नः महे विश्वा रूपाणि आऽविशन् इंद्रं जैत्राय हर्षय शचीऽपतिं॥१३॥१९॥

॥१६॥ प्र संऽराजं चर्षणीनां इंद्रं स्तोत नव्यं गीःऽभिः नरं नृऽसहं मंहिष्ठं॥१॥ यस्मिन् उक्थानि रण्यंति विश्वानि च श्रवस्या अपां अवः न समुद्रे॥२॥ तं सुऽस्तुत्या आ विवासे ज्येष्ठऽराजं भरे कृत्नुं महः वाजिनं सनिऽभ्यः॥३॥ यस्य अनूनाः गभीराः मदाः उरवः तरुत्राः हर्षुऽमंतः शूरऽसातौ॥४॥ तं इत् धनेषु हितेषु अधिऽवाकाय हवंते येषां इंद्रः ते जयंति॥५॥ तं इत् च्यौत्नैः आयंति तं कृतेभिः चर्षणयः एषः इंद्रः वरिवःऽकृत्॥६॥२०॥ इंद्रः ब्रह्मा इंद्रः ऋषिः इंद्रः पुरु पुरुऽहूतः महान् महीभिः शचीभिः॥७॥ सः स्तोम्यः सः हव्यः सत्यः सत्वा तुविऽकूर्मिः एकः चित् सन् अभिऽभूतिः॥८॥ तं अर्केभिः तं सामऽभिः तं गायत्रैः चर्षणयः इंद्रं वर्धंति क्षितयः॥९॥ प्रऽनेतारं वस्यः अच्छ कर्तारं ज्योतिः समत्ऽसु ससह्वांसं युधा अमित्रान्॥१०॥ सः नः पप्रिः पारयाति स्वस्ति नावा पुरुऽहूतः इंद्रः विश्वाः अति द्विषः॥११॥ सः त्वं नः इंद्र वाजेभिः दुग्धस्य च गातुऽय च अच्छ च नः सुम्नं नेषि॥१२॥२१॥

॥१७॥ आ याहि सुषुम हितेन इंद्र सोमं पिब इमं आ इदं बर्हिः सदः ममं॥१॥ आ त्वा ब्रह्मऽयुजा हरी वहतां इंद्र केशिना उप ब्रह्माणि नः शृणु॥२॥ ब्रह्माणः त्वा वयं युजा सोमऽपां इंद्र सोमिनः सुतऽवंतः हवामहे॥३॥ आ नः याहि सुतऽवंतः अस्माकं

सुष्टुतीरुप। पिवा सु शिप्रिन्नंधसः ॥४॥ आ ते सिंचामि कुक्ष्यो-
रनु गात्रा वि धावतु। गृभाय जिह्वया मधु ॥५॥२२॥ स्वादुष्टे
अस्तु संसुदे मधुमान्तन्वे३ तव। सोमः शमस्तु ते हृदे ॥६॥ अयमु
त्वा विचर्षणे जनीरिवाभि संवृतः। प्र सोम इंद्र सर्पतु ॥७॥ तु-
विग्रीवो वपोदरः सुवाहुरंधसो मदे। इंद्रो वृत्राणि जिघ्नते ॥८॥
इंद्र प्रेहि पुरस्त्वं विश्वस्येशान ओजसा। वृत्राणि वृत्रहञ्जहि ॥९॥
दीर्घस्ते अस्त्वंकुशो येना वसु प्रयच्छसि। यजमानाय सुन्वते
॥१०॥२३॥ अयं त इंद्र सोमो निपूतो अधि बर्हिषि। एहीमस्य
द्रवा पिब ॥११॥ शाचिगो शाचिपूजनायं रणाय ते सुतः। आ-
खंडल प्र हूयसे ॥१२॥ यस्ते शृंगवृषो नपात्प्रणपात्कुंडपाय्यः।
न्यस्मिन्दध्र आ मनः ॥१३॥ वास्तोष्पते ध्रुवा स्थूणांसत्रं सोम्या-
नाँ। द्रप्सो भेत्ता पुरां शश्वतीनामिंद्रो मुनीनां सखा ॥१४॥ पृ-
दाकुसानुर्यजतो गवेषण एकः सन्नभि भूयसः। भूर्णिमश्वं न-
यत्तुजा पुरो गृभेंदुं सोमस्य पीतये ॥१५॥२४॥

॥ १८ ॥ १–२२ इरिंबिठिः काण्वः ॥ १–७. १०–२२ आदित्याः । ८ अश्विनौ ।
९ अग्निसूर्यानिलाः ॥ त्रिष्टुप् ॥

॥१८॥ इदं ह नूनमेषां सुम्नं भिक्षेत मर्त्यः। आदित्यानामपूर्व्ये
सवीमनि ॥१॥ अनर्वाणो ह्येषां पंथा आदित्यानाँ। अदब्धाः
संति पायवः सुगेवृधः ॥२॥ तत्सु नः सविता भगो वरुणो मित्रो अर्यमा। शर्म यच्छंतु सप्रथो यदीमहे ॥३॥ देवेभिर्दे-
व्यदितेऽरिष्टभर्मन्ना गहि। स्मत्सूरिभिः पुरुप्रिये सुशर्म-
भिः ॥४॥ ते हि पुत्रासो अदितेर्विदुर्द्वेषांसि योतवे। अंहो-
श्चिदुरुचक्रयोऽनेहसः ॥५॥२५॥ अदितिर्नो दिवा पशुमदि-
तिर्नक्तमद्वया। अदितिः पात्वंहसः सदावृधा ॥६॥ उत स्या

सुऽस्तुतीः उप पिबसु शिप्रिन् अंधसः ॥४॥ आ ते सिंचामि कुक्ष्योः अनु गात्रा वि धावतु गृभाय जिह्वया मधु ॥५॥२२॥ स्वादुः ते अस्तु संऽसुदे मधुऽमान् तन्वे तव सोमः शं अस्तु ते हृदे ॥६॥ अयं ऊं त्वा विऽचर्षणे जनीःऽइव अभि संऽवृतः प्र सोमः इंद्र सर्पतु ॥७॥ तुविऽग्रीवः वपाऽउदरः सुऽबाहुः अंधसः मदे इंद्रः वृत्राणि जिघ्नते ॥८॥ इंद्र प्र इहि पुरः नः विश्वस्य ईशानः ओजसा वृत्राणि वृत्रऽहन् जहि ॥९॥ दीर्घः ते अस्तु अंकुशः येन वसु प्रऽयच्छसि यजमानाय सुन्वते ॥१०॥२३॥ अयं ते इंद्र सोमः निऽपूतः अधि बर्हिषि आ इहि द्रुं अस्य द्रव पिब ॥११॥ शाचिऽगो० शाचिऽपूजन अयं रणाय ते सुतः आखंडल प्र हूयसे ॥१२॥ यः ते शृंगऽवृषः नपात् प्रऽनपात्० कुंडऽपाय्यः नि अस्मिन् दध्रे आ मनः ॥१३॥ वास्तोः पते ध्रुवा स्थूणा अंसत्रं सोम्यानां द्रप्सः भेत्ता पुरां शश्वतीनां इंद्रः मुनीनां सखा ॥१४॥ पृदाकुऽसानुः यजतः गोऽएषणः एकः सन् अभि भूयसः भूरिं अश्वं नयत् तुजा पुरः गृभा इंद्र सोमस्य पीतये ॥१५॥२४॥

॥१८॥ इदं हु नूनं एषां सुम्नं भिक्षेत मर्त्यः आदित्यानां अपूर्व्यं सवीमनि ॥१॥ अनर्वाणः हि एषां पंथाः आदित्यानां अदब्धाः संति पायवः सुगेऽवृधः ॥२॥ तत् सु नः सविता भगः वरुणः मित्रः अर्यमा शर्म यच्छंतु सऽप्रथः यत् ईमहे ॥३॥ देवेभिः देवि अदिते अरिष्टऽभर्मन् आ गहि स्मत् सूरिऽभिः पुरुऽप्रिये सुशर्मऽभिः ॥४॥ ते हि पुत्रासः अदितेः विदुः द्वेषांसि योतवे अंहोः चित् उरुऽचक्रयः अनेहसः ॥५॥२५॥ अदितिः नः दिवा पशुं अदितिः नक्तं अद्वयाः अदितिः पातु अंहसः सदाऽवृधा ॥६॥ उत स्या

नो दिवा मतिरदितिरूत्या गमत्। सा शंताति मयस्करदप स्रिधः॥७॥ उत त्या दैव्या भिषजा शं नः करतो अश्विना। युयुयातामितो रपो अप स्रिधः॥८॥ शमग्निरग्निभिः करच्छं नस्तपतु सूर्यः। शं वातो वातवरपा अप स्रिधः॥९॥ अपामीवामप स्रिधमप सेधत दुर्मतिं। आदित्यासो युयोतना नो अंहसः॥१०॥२६॥ युयोता शरुमस्मदाँ आदित्यास उतामतिं। क्रुधग्द्वेषः कृणुत विश्ववेदसः॥११॥ तत्सु नः शर्म यच्छतादित्या यन्मुमोचति। एनस्वंतं चिदेनसः सुदानवः॥१२॥ यो नः कश्चिद्रिरिक्षति रक्षस्वेन मर्त्यः। स्वैः ष एवैं रिरिषीष्ट युर्जनः॥१३॥ समित्तमघमंश्नवद्वहुःशंसं मर्त्यं रिपुं। यो अस्मचा दुहेणावाँ उप द्वयुः॥१४॥ पाकत्वा स्थेन देवा हृत्सु जानीथ मर्त्यं। उप द्वयुं चाद्वयुं च वसवः॥१५॥२७॥ आ शर्म पर्वतानामोतापां वृणीमहे। द्यावाक्षामारे अस्मद्रपस्कृतं॥१६॥ ते नो भद्रेण शर्मणा युष्माकैं नावा वसवः। अति विश्वानि दुरिता पिपर्तन॥१७॥ तुचे तनाय तत्सु नो द्राघीय आयुर्जीवसे। आदित्यासः सुमहसः कृणोतन॥१८॥ यज्ञो होळ्हो वो अंतर आदित्या अस्ति मृळतं। युष्मे इद्वो अपि ष्मसि सजात्यें॥१९॥ बृहद्वयं मरुतां देवं चातारमश्विना। मित्रमीमहे वरुणं स्वस्तयें॥२०॥ अनेहो मित्रार्यमन्नृवद्वरुण शंस्यं। चिवरूथं मरुतो यंत नस्कृधि॥२१॥ ये चिद्धि मृत्युवंधव आदित्या मनवः स्मसि। प्र सू न आयुर्जीवसे तिरेतन॥२२॥२८॥

॥ १९॥ १-३१ गोभटि काण्वः॥ १-३३ अग्निः। ३४. ३५ आदित्याः। ३६. ३७ चमदग्न्योदौनलुतिः॥ १-२६. २८-३३ प्रागाथं काकुभं। २७ द्विपदा। ३४ उष्णिक्। ३५ सतोबृहती। ३६ ककुप्। ३७ पंक्तिः॥

॥ १९॥ तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे। देवत्रा

नः दिवा मतिः अदितिः ऊत्या आ गमत् सा शंऽतांति मयः करत् अप सिधः ॥७॥ उत त्या दैव्या भिषजा शं नः करतः अश्विना युयुयातां इतः रपः अप सिधः ॥८॥ शं अग्निः अग्निऽभिः करत् शं नः तपतु सूर्यः शं वातः वातु अरपाः अप सिधः ॥९॥ अप अमीवां अप सिधं अप सेधत दुःऽमतिं आदित्यासः युयोतन नः अंहसः ॥१०॥२६॥ युयोत शरुं अस्मत् आ आदित्यासः उत अमतिं ऋधक् द्वेषः कृणुत विश्वऽवेदसः ॥११॥ तत् सु नः शर्म यच्छत आदित्याः यत् मुमोचति एनःऽवंतं चित् एनसः सुऽदानवः ॥१२॥ यः नः कः चित् रिरिक्षति रक्षःऽतेन मर्त्यः स्वैः सः एवैः रिरिषीष्ट युःजनः ॥१३॥ सं इत् तं अघं अश्नवत् दुःऽशंसं मर्त्यं रिपुं यः अस्मऽचा दुःऽहनावान् उप द्वयुः ॥१४॥ पाकऽचा स्यन देवाः हृत्ऽसु जानीथ मर्त्यं उप द्वयुं च अर्डयुं च वसवः ॥१५॥२७॥ आ शर्म पर्वतानां आ उत अपां वृणीमहे द्यावाक्षामा आरे अस्मत् रपः कृतं ॥१६॥ ते नः भद्रेण शर्मणा युष्माकं नावा वसवः अति विश्वानि दुःऽइता पिपर्तन ॥१७॥ तुचे तनाय तत् सु नः द्राघीयः आयुः जीवसे आदित्यासः सुऽमहसः कृणोतन ॥१८॥ यज्ञः हीळः वः अंतरः आदित्याः अस्ति मृळत युष्मे इत् वः अपि स्मसि सऽजात्ये ॥१९॥ बृहत् वरूथं मरुतां देवं चातारं अश्विना मित्रं ईमहे वरुणं स्वस्तये ॥२०॥ अनेहः मित्र अर्यमन् नृऽवत् वरुण शंस्यं चिऽवरूथं मरुतः यंत नः छर्दिः ॥२१॥ ये चित् हि मृत्युऽबंधवः आदित्याः मनवः स्मसि प्र सु नः आयुः जीवसे तिरतन ॥२२॥२८॥

॥१९॥ तं गूर्धय स्वःऽनरं देवासः देवं अरतिं दधन्विरे देवऽचा

हव्यमीहिरे ॥१॥ विभूतरातिं विप्र चित्रशोचिषमग्निमी-ळिष्व यंतुरं। अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यं ॥२॥ यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारमर्मत्यं। अस्य यज्ञस्य सुक्रतुं ॥३॥ ऊर्जो नपातं सुभगं सुदीदितिमग्निं श्रेष्ठशोचिषं। स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि ॥४॥ यः समिधा य आहुतो यो वेदेन ददाश मर्तो अग्नये। यो नमसा स्वध्वरः ॥५॥२९॥ तस्येदेवंतो रंहयंत आशवस्तस्य द्युम्नितमं यशः। न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत् ॥६॥ स्वग्नयो वो अग्निभिः स्याम सूनो सहस ऊर्जो पते। सुवीरस्त्वमस्मयुः ॥७॥ प्रशंसमानो अतिथिर्न मित्रियोऽग्नी रथो न वेद्यः। त्वे क्षेमासो अपि संति साधवस्त्वं राजा रयीणां ॥८॥ सो अद्धा दाश्वध्वरोऽग्ने मर्तः सुभग स प्रशंस्यः। स धीभिरस्तु सनिता ॥९॥ यस्य त्वमूर्ध्वो अध्वराय तिष्ठसि क्षयद्वीरः स साधते। सो अर्वद्भिः सनिता स विपन्युभिः स शूरैः सनिता कृतं ॥१०॥३०॥ यस्याग्निर्वपुर्गृहे स्तोमं चनो दधीत विश्ववार्यः। हव्या वा वेविषद्विषः ॥११॥ विप्रस्य वा स्तुवतः संहसो यहो मष्टूतमस्य रातिषु। अधोदेवमुप-रिमर्त्यं कृधि वसो विविदुषो वचः ॥१२॥ यो अग्निं हव्यदा-तिभिर्नमोभिर्वा सुदक्षमाविवासति। गिरा वाजिरशो-चिषं ॥१३॥ समिधा यो निशितो दाशददितिं धामभिरस्य मर्त्यः। विश्वेत्स धीभिः सुभगो जनाँ अति द्युम्नैरुद्न इव तारिषत् ॥१४॥ तदग्ने द्युम्नमा भर यत्सासहत्सदने कं चिदत्रिणं। मन्युं जनस्य दूढ्यः ॥१५॥३१॥ येन चष्टे वरुणो मित्रो अर्यमा येन नासत्या भगः। वयं तत्ते शवसा गातुवित्त-

हव्यं आ ऊहिरे ॥१॥ विभूतऽरातिं विप्र चित्रऽशोचिषं अग्निं ईळिष्व यंतुरं अस्य मेधस्य सोम्यस्य सोभरे प्र इं अध्वराय पूर्व्यं ॥२॥ यजिष्ठं त्वा ववृमहे देवं देवऽहा होतारं अमर्त्यं अस्य यज्ञस्य सुऽक्रतुं ॥३॥ ऊर्जः नपातं सुऽभगं सुऽदीदितिं अग्निं श्रेष्ठऽशोचिषं सः नः मित्रस्य वरुणस्य सः अपां आ सुम्नं यक्षते दिवि ॥४॥ यः सुऽइधा यः आऽहुती यः वेदेन दाशत् मर्तः अग्नये यः नमसा सुऽअध्वरः ॥५॥२९॥ तस्य इत् अर्वंतः रंहयंते आशवः तस्य द्युम्निऽतमं यशः न तं अंहः देवऽकृतं कुतः चन न मर्त्यऽकृतं नशत् ॥६॥ सुऽअग्नयः वः अग्निऽभिः स्याम सूनोः सहसः ऊर्जां पते सुऽवीरः त्वं अस्मऽयुः ॥७॥ प्रऽशंसमानः अतिथिः न मित्रियः अग्निः रथः न वेद्यः त्वे इति क्षेमासः अपि संति साधवः त्वं राजा रयीणां ॥८॥ सः अद्धा दाशुऽअध्वरः अग्ने मर्तः सुऽभगः सः प्रऽशंस्यः सः धीभिः अस्तु सनिता ॥९॥ यस्य त्वं ऊर्ध्वः अध्वराय तिष्ठसि क्षयत्ऽवीरः सः साधते सः अर्वंतऽभिः सनिता स विप्न्युऽभिः सः शूरैः सनिता कृतं ॥१०॥३०॥ यस्य अग्निः वपुः गृहे स्तोमं चनः दधीत विश्वऽवार्यः हव्या वा वेविषत् विषः ॥११॥ विप्रस्य वा स्तुवतः सहसः यहो इति मक्षुऽतमस्य रातिषु अवःऽदेवं उपरिऽमर्त्यं कृधि वसो इति विविदुषः वचः ॥१२॥ यः अग्निं हव्यदातिऽभिः नमःऽभिः वा सुऽदक्षं आऽविवासति गिरा वा अजिरऽशोचिषं ॥१३॥ सुऽइधा यः निऽशितिं दाशत् अदितिं धामऽभिः अस्य मर्त्यः विश्वा इत् सः धीभिः सुऽभगः जनान् अति द्युम्नैः उद्नःऽइव तारिषत् ॥१४॥ तत् अग्ने द्युम्नं आ भर यत् ससहत् सदने कं चित् अत्रिणं मन्युं जनस्य दुःऽध्यः ॥१५॥३१॥ येन चष्टे वरुणः मित्रः अर्यमा येन नासत्या भगः वयं तत् ते शवसा गातुवित्-

हव्यमोहिरे ॥१॥ विभूतरातिं विप्र चित्रशोचिषमग्निमी-ळिष्व यंतुरं । अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यं ॥२॥ यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारमर्मर्त्यं । अस्य यज्ञस्य सुक्रतुं ॥३॥ ऊर्जो नपातं सुभगं सुदीदितिमग्निं श्रेष्ठशोचिषं । स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि ॥४॥ यः समिधा य आहुती यो वेदेन दादाश मर्तो अग्नये । यो नमसा स्वध्वरः ॥५॥२९॥ तस्येदवेतो रहयंत आशवस्तस्य द्युम्नितमं यशः । न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत् ॥६॥ स्वग्नयो वो अग्निभिः स्याम सूनो सहस ऊर्जो पते । सुवीरस्त्वमस्मयुः ॥७॥ प्रशंसमानो अतिथिर्न मित्रियोऽग्नी रथो न वेद्यः । त्वे क्षेमासो अपि संति साधवस्त्वं राजा रयीणां ॥८॥ सो अद्धा दाध्वध्वरोऽग्ने मर्तः सुभग स प्रशंस्यः । स धीभिरस्तु सनिता ॥९॥ यस्य त्वमूर्ध्वो अध्वराय तिष्ठसि क्षयद्वीरः स साधते । सो अर्वद्भिः सनिता स विपन्युभिः स शूरैः सनिता कृतं ॥१०॥३०॥ यस्याग्निर्वपुर्गृहे स्तोमं चनो दधीत विश्ववार्यः । हव्या वा वेविषद्विषः ॥११॥ विप्रस्य वा स्तुवतः संहसो यहो मक्षूतमस्य रातिषु । अवोदेवमुप-रिमर्त्य कृधि वसो विविदुषो वचः ॥१२॥ यो अग्निं हव्यदा-तिभिर्नमोभिर्वा सुदक्षमाविवासति । गिरा वाजिरशो-चिषं ॥१३॥ समिधा यो निशितो दाशददितिं धामभिरस्य मर्त्यः । विश्वेत स धीभिः सुभगो जनाँ अति द्युम्नैरुद्न इव तारिषत् ॥१४॥ तदग्ने द्युम्नमा भर यत्सासहत्सदने कं चिदत्रिणं । मन्युं जनस्य दूढ्यः ॥१५॥३१॥ येन चष्टे वरुणो मित्रो अर्यमा येन नासत्या भगः । वयं तत्ते गवसा गातुवित्त-

हव्यं आ ऊहिरे ॥१॥ विभूतऽरातिं विप्र चित्रऽशोचिषं अग्निं ईळिष्व यंतुरं अस्य मेधस्य सोम्यस्य सोभरे प्र ईं अध्वराय पूर्व्यं ॥२॥ यजिष्ठं त्वा ववृमहे देवं देवऽहा होतारं अमर्त्यं अस्य यज्ञस्य सुऽक्रतुं ॥३॥ ऊर्जः नपातं सुऽभगं सुऽदीदितिं अग्निं श्रेष्ठऽशोचिषं सः नः मित्रस्य वरुणस्य सः अपां आ सुम्नं यक्षते दिवि ॥४॥ यः सुऽइधा यः आऽहुती यः वेदेन ददाश मर्तः अग्नये यः नमसा सुऽअध्वरः ॥५॥२९॥ तस्य इत् अर्वंतः रंहयंते आशवः तस्य द्युम्निऽतमं यशः न तं अंहः देवऽकृतं कुतः चन न मर्त्यऽकृतं नशत् ॥६॥ सुऽअग्नयः वः अग्निऽभिः स्याम सूनोः सहसः ऊर्जां पते सुऽवीरः त्वं अस्मऽयुः ॥७॥ प्रऽशंसमानः अतिथिः न मित्रियः अग्निः रथः न वेद्यः त्वे इति क्षेमासः अपि संति साधवः त्वं राजा रयीणां ॥८॥ सः अद्धा दाशुऽअध्वरः अग्ने मर्तः सुऽभगः सः प्रऽशंस्यः सः धीभिः अस्तु सनिता ॥९॥ यस्य त्वं ऊर्ध्वः अध्वराय तिष्ठसि क्षयत्ऽवीरः सः साधते सः अर्वंत्ऽभिः सनिता स विपन्युऽभिः सः शूरैः सनिता कृतं ॥१०॥३०॥ यस्य अग्निः वपुः गृहे स्तोमं चनः दधीत विश्वऽवार्यः हव्या वा वेविषत् विषः ॥११॥ विप्रस्य वा स्तुवतः सहसः यहो इति मघुऽतमस्य रातिषु अवः ऽदेवं उपरिऽमर्त्यं कृधि वसो इति विविदुषः वचः ॥१२॥ यः अग्निं हव्यदातिऽभिः नमःऽभिः वा सुऽदक्षं आऽविवासति गिरा वा अजिरऽशोचिषं ॥१३॥ सुऽइधा यः निऽशितः दाशत् अदितिं धामऽभिः अस्य मर्त्यः विश्वा इत् सः धीभिः सुऽभगः जनान् अतिं द्युभिः उग्रःऽइव तारिषत् ॥१४॥ तत् अग्ने द्युम्नं आ भर यत् ससहत् सदने कं चित् अत्रिणं मन्युं जनस्य दुःऽध्यः ॥१५॥३१॥ येन चष्टे वरुणः मित्रः अर्यमा येन नासत्या भगः वयं तत् ते अवसा गातुवित्-

मा इंद्रलोता विधेमहि ॥१६॥ ते घेदग्ने स्वाध्योऽ३ये त्वां विप्र निदधिरे नृचक्षसं । विप्रासो देव सुक्रतुं ॥१७॥ त इद्देवेदिं सुभग त आहुतिं ते सोतुं चक्रिरे दिवि । त इद्वाजैभिर्जिग्युर्महद्धनं ये त्वे कामं न्येरिरे ॥१८॥ भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः । भद्रा उत प्रशस्तयः ॥१९॥ भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहः । अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टिभिः ॥२०॥३२॥ ईळेन्यो गिरा मनुर्हितं यं देवा दूतमरतिं न्येरिरे । यजिष्ठं हव्यवाहनं ॥२१॥ तिग्मजंभाय तरुणाय राजते प्रयो गायस्यग्नये । यः पिंशते सूनृताभिः सुवीर्यमग्निर्घृतेभिराहुतः ॥२२॥ यदी घृतेभिराहुतो वाशीमग्निर्भरत उच्चरा च । असुर इव निर्णिजं ॥२३॥ यो हव्यान्यैरयता मनुर्हितो देव आसा सुगंधिना । विवासते वार्याणि स्वध्वरो होता देवो अमर्त्यः ॥२४॥ यदग्ने मर्त्यस्त्वं स्यामहं मिचमहो अमर्त्यः । सहसः सूनवाहुत ॥२५॥३३॥ न त्वा रासीयाभिशस्तये वसो न पापत्वाय संत्य । न मे स्तोतामतीवा न दुर्हितः स्यादग्ने न पापया ॥२६॥ पितुर्न पुत्रः सुभृतो दुरोण आ देवाँ एतु प्र णो हविः ॥२७॥ तवाहमग्न ऊतिभिर्नेदिष्ठाभिः सचेय जोषमा वसो । सदा देवस्य मर्त्यः ॥२८॥ तव क्रत्वा सनेयं तव रातिभिरग्ने तव प्रशस्तिभिः । त्वामिदाहुः प्रमतिं वसो ममाग्ने हर्षस्व दातवे ॥२९॥ प्र सो अग्ने तवोतिभिः सुवीराभिस्तिरते वाजभर्मभिः । यस्य त्वं सख्यमावरः ॥३०॥३४॥ तव द्रप्सो नीलवान्वाश ऋत्विय इंधानः सिष्णवा ददे । त्वं महीनामुपसामसि प्रियः क्षपो वस्तुषु राजसि

ऽतमाः इंद्रंत्वाऽऊताः विधेमहि॥१६॥ ते घ इत् अग्ने सुऽआध्यः ये त्वा विप्र निऽदधिरे नृऽचक्षसं विप्रासः देव सुऽक्रतुं॥१७॥ ते इत् वेदिं सुऽभगं ते आऽहुतिं ते सोतुं चक्रिरे दिवि ते इत् वाजेभिः जिग्युः महत् धनं ये ते कामं निऽएरिरे॥१८॥ भद्रः नः अग्निः आऽहुतः भद्रा रातिः सुऽभग भद्रः अध्वरः भद्राः उत प्रऽशस्तयः॥१९॥ भद्रं मनः कृणुष्व वृत्रऽतूर्ये येन समत्ऽसु सासहः अव स्थिरा तनुहि भूरि शर्धतां वनेमं ते अभिष्टिऽभिः॥२०॥३२॥ ईळे गिरा मनुःऽहितं यं देवाः दूतं अरतिं निऽएरिरे यजिष्ठं हव्यऽवाहनं॥२१॥ तिग्मऽजंभाय तरुणाय राजते प्रयः गायसि अग्नये यः पिंशते सूनृताभिः सुऽवीर्यं अग्निः घृतेभिः आऽहुतः॥२२॥ यदि घृतेभिः आऽहुतः वाशीं अग्निः भरते उत् च अव च असुरःऽइव निःऽनिजं॥२३॥ यः हव्यानि ऐरयत मनुःऽहितः देवः आसा सुऽगंधिना विवासते वार्याणि सुऽअध्वरः होता देवः अमर्त्यः॥२४॥ यत् अग्ने मर्त्यः त्वं स्यां अहं मित्रऽमहः अमर्त्यः सहसः सूनो आऽहुत॥२५॥३३॥ न त्वा रासीय अभिऽशस्तये वसो न पापऽत्वाय सन्त्य न मे स्तोता अमतिऽवा न दुःऽहितः स्यात् अग्ने न पापया॥२६॥ पितुः न पुत्रः सुऽभृतः दुरोणे आ देवान् एतु प्र नः हविः॥२७॥ तव अहं अग्ने ऊतिऽभिः नेदिष्ठाभिः सचेय जोषं आ वसो सदा देवस्य मर्त्यः॥२८॥ तव ऋत्या सनेयं तव रातिऽभिः अग्ने तव प्रशस्तिऽभिः त्वां इत् आहुः प्रऽमतिं वसो मम अग्ने हर्षस्व दातवे॥२९॥ प्र सः अग्ने तव ऊतिऽभिः सुऽवीराभिः तिरते वाजभर्मऽभिः यस्य त्वं सख्यं आऽवरः॥३०॥३४॥ तव द्रप्सः नीलऽवान् वाशः ऋत्वियः इंधानः सिष्णो आ ददे त्वं महीनां उपसां असि प्रियः क्षपः वस्तुषु राजसि

॥३१॥ तमागन्म सोभरयः सहस्रमुष्कं स्वभिष्टिमवसे। सम्राजं चासदस्यवं॥३२॥ यस्य ते अग्ने अन्ये अग्नय उपक्षितो वया इव। विपो न द्युम्ना नि युवे जनानां तव क्षत्राणि वर्धयन्॥३३॥ यमादित्यासो अद्रुहः पारं नयथ मर्त्यं। मघोनां विश्वेषां सुदानवः॥३४॥ यूयं राजानः कं चिच्चर्षणीसहः क्षयंतं मानुषाँ अनु। वयं ते वो वरुण मित्रार्यमन्त्स्यामेदृतस्य रथ्यः॥३५॥ अदान्मे पौरुकुत्स्यः पंचाशतं चसदस्युर्वधूनां। मंहिष्ठो अर्यः सत्पतिः॥३६॥ उत मे प्रयियोर्वयियोः सुवास्वा अधि तुग्वनि। तिसृणां संप्रतीनां श्यावः प्रणेता भुवद्यसुर्दियानां पतिः॥३७॥३५॥

॥ २० ॥ १–२६ सोभरिः काण्वः ॥ मरुतः ॥ प्रागाथं काकुभं ॥

॥२०॥ आ गंता मा रिषण्यत प्रस्थावानो मापं स्थाता समन्यवः। स्थिरा चिन्नमयिष्णवः॥१॥ वीळुपविभिर्मरुत ऋभुक्षण आ रुद्रासः सुदीतिभिः। इषा नो अद्या गंता पुरुस्पृहो यज्ञमा सोभरीयवः॥२॥ विद्मा हि रुद्रियाणां शुष्ममुग्रं मरुतां शिमीवतां। विष्णोरेषस्य मीळ्हुषां॥३॥ वि द्वीपानि पार्पतन्तिष्टंहुच्छुनोभे युंजंत रोदसी। प्र धन्वान्यरत शुभ्रखादयो यदेजथ स्वभानवः॥४॥ अच्युता चिद्वो अज्मन्ना नानदति पर्वतासो वनस्पतिः। भूमिर्यामेषु रेजते॥५॥३६॥ अमाय वो मरुतो यातवे द्यौर्जिहीत उत्तरा बृहत्। यचा नरो देदिशते तनूपा त्वक्षांसि बाह्वोजसः॥६॥ स्वधामनु श्रियं नरो महि त्वेषा अमवंतो वृषप्सवः। वहंते अहुतप्सवः॥७॥ गोभिर्वाणो अंज्यते सोभरीणां रये कोणे हिरण्यये। गोबंधवः सुजातासो इषे भुजे महांतो नः स्परसे नु॥८॥ प्रति वो वृषदं-

॥३१॥ तं आ अगन्म सोभरयः सहस्रऽमुष्कं सुऽअभिष्टिं अवसे सऽराजं चासदस्यवं॥३२॥ यस्य ते अग्ने अन्ये अग्नयः उपऽक्षितः वयाःऽइव विषः न द्युम्ना नि युवे जनानां तव क्षुचाणि वर्धयन् ॥३३॥ यं आदित्यासः अदुहः पारं नयथ मर्त्यं मघोनां विश्वेषां सुऽदानवः॥३४॥ यूयं राजानः कं चित् चर्षणिऽसहः क्षयंतं मानुषान् अनु वयं ते वः वरुण मित्र अर्यमन् स्याम इत् ऋतस्य रथ्यः॥३५॥ अदात् मे पौरुऽकुत्सः पंचाशतं चसदस्युः वधूनां मंहिष्ठः अर्यः सत्ऽपतिः ॥३६॥ उत मे प्रयियोः वयियोः सुऽवास्त्वाः अधि तुर्वनि तिसृणां सप्तीनां श्यावः प्रऽनेता भुवत् वसुः दियानां पतिः ॥३७॥३५॥

॥२०॥ आ गंत मा रिषण्यत प्रऽस्यावानः मा अप स्यात सऽमन्यवः स्थिरा चित् नमयिष्णवः॥१॥ वीळुपविऽभिः मरुतः ऋभुक्षणः आ रुद्रासः सुदीतिऽभिः इषा नः अद्य आ गत पुरुऽस्पृहः यज्ञं आ सोभरीऽयवः॥२॥ विद्म हि रुद्रियाणां शुष्मं उग्रं मरुतां शिमींऽवतां विष्णोः एषस्य मीळ्हुषां॥३॥ वि द्वीपानि पार्पतन् तिष्ठत् दुच्छुना उभे युजंत रोदसी प्र धन्वानि ऐरत शुभ्रऽखादयः यत् एजथ स्वऽभानवः॥४॥ अच्युता चित् वः अज्मन् आ नानदति पर्वतासः वनस्पतिः भूमिः यामेषु रेजते॥५॥३६॥ अमाय वः मरुतः यातवे द्यौः जिहीते उत्ऽतरा बृहत् यच नरः देदिश्ते तनूषु आ त्वक्षांसि बाहुऽओजसः॥६॥ स्वधां अनु श्रियं नरः महि त्वेषाः अमऽवंतः वृषऽप्सवः वहंते अहुतऽप्सवः॥७॥ गोभिः वाणः अज्यते सोभरीणां रथे कोशे हिरण्यये गोऽवंधवः सुऽजातासः इषे भुजे महांतः नः स्परसे नु॥८॥ प्रति वः वृषन्-

जयो वृष्णे शर्धाय मारुताय भरध्वं। हव्या वृषप्रयाव्णे ॥९॥ वृषण्वसेनं मरुतो वृषप्सुना रथेन वृषनाभिना। आ श्येनासो न पक्षिणो वृथा नरो हव्या नो वीतये गत ॥१०॥३७॥ समानमंजेषां वि भ्राजंते रुक्मासो अधि बाहुषु। दविद्युतत्यृष्टयः ॥११॥ त उग्रासो वृषण उग्रबाहवो नकिष्टनूषु येतिरे। स्थिरा धन्वान्यायुधा रथेषु वोऽनीकेष्वधि श्रियः ॥१२॥ येषामर्णो न सप्रथो नाम त्वेषं शर्धतामेकमिद्भुजे। वयो न पिप्र्युः सहः ॥१३॥ तान्वंदस्व मरुतस्ताँ उप स्तुहि तेषां हि धुनीनां। अराणां न चरमस्तेषां दाना महा तेषां ॥१४॥ सुभगः स वं ऊतिष्वास पूर्वासु मरुतो व्युष्टिषु। यो वो नूनमुतासति ॥१५॥३८॥ यस्य वा यूयं प्रति वाजिनो नर आ हव्या वीतये गथ। अभि प द्युम्निरुत वाजसातिभिः सुम्ना वो धूतयो नशत् ॥१६॥ यथा रुद्रस्य सूनवो दिवो वशंत्यसुरस्य वेधसः। युवानस्तथेदसत् ॥१७॥ ये चार्हंति मरुतः सुदानवः स्मन्मीळ्हुष्यरंति ये। अतश्चिदा न उप वस्यसा हृदा युवान आ ववृध्वं ॥१८॥ यूनं ऊ षु नविष्टया वृषणः पावकाँ अभि सोभरे गिरा। गाय गा इव चर्कृषत् ॥१९॥ साह्या ये संति सुष्टिहेव हव्यो विश्वासु पृत्सु होतृषु। वृषण्वंद्रान्न सुश्रवस्तमान् गिरा वंदस्व मरुतो अह ॥२०॥३९॥ गावश्चिद्घा समन्यवः सजात्येन मरुतः सबंधवः। रिहते ककुभो मिथः ॥२१॥ मतश्चिद्धो नृतवो रुक्मवक्षस उप भ्रातृत्वमायति। अधि नो गात मरुतः सदा हि वं आपित्वमस्ति निर्भुवि ॥२२॥ मरुतो मारुतस्य नु आ भेषजस्य वहता सुदानवः। यूयं संखायः सप्रथः ॥२३॥ याभिः सिंधुमवथ याभिरूर्वथ याभिर्दशस्यथा क्रिविं।

ऽअंजयः वृषणे शर्धाय मारुताय भरध्वं हव्या वृषऽप्रयावे ॥९॥ वृषणश्वेनं मरुतः वृषऽप्सुना रथेन वृषऽनाभिना आ रयेनासः न पक्षिणः वृथा नरः हव्या नः वीतये गत ॥१०॥३७॥ समानं अंजि एषां वि भ्राजन्ते रुक्मासः अधि बाहुषु दविद्युतति क्रष्टयः ॥११॥ ते उषासः वृषणः उषऽबाहवः नकिः तनूषु येतिरे स्थिरा धन्वानि आयुधा रथेषु वः अनीकेषु अधि श्रियः॥१२॥ येषां अर्णः न सऽप्रथः नामं लेपं शर्धतां एकं इत् भुजे वयः न पित्र्यं सहः ॥१३॥ तान् वंदस्व मरुतः तान् उप स्तुहि तेषां हि धुनीनां अराणाँ न चरमः तत् एषां दाना महा तत् एषां॥१४॥ सुऽभगः सः वः ऊतिषु आसे पूर्वासु मरुतः विऽउष्टिषु यः वा नूनं उत असति ॥१५॥३८॥ यस्य वा यूयं प्रति वाजिनः नरः आ हव्या वीतये गथ अभि सः द्युम्नैः उत वाजसातिऽभिः सुम्ना वः धूतयः नशत्॥१६॥ यथा रुद्रस्य सूनवः दिवः वशँति असुरस्य वेधसः युवानः तथा इत् असत्॥१७॥ ये च अर्हंति मरुतः सुऽदानवः स्मत् मीळ्हुषः चरंति ये अतः चित् आ नः उप वस्यसा हृदा युवानः आ ववृध्वं ॥१८॥ यूनः ऊं सु नविष्टया वृष्णः पावकान् अभि सोभरे गिरा गायं गाःऽइव चर्कृषत् ॥१९॥ सहाः ये संति सुष्टिहाऽइव हव्यः विश्वासु पृत्ऽसु होतृषु वृष्णः चंद्रान् न सुष्टुवःऽतमान् गिरा वंदस्व मरुतः अर्हं॥२०॥३९॥ गावः चित् घ सऽमन्यवः सऽजात्येन मरुतः सऽबंधवः रिहते ककुभः मिथः॥२१॥ मतीः चित् वः नृतवः रुक्मऽवक्षसः उप भातृऽत्वं आ अयति अधि नः गातु मरुतः सदा हि वः आपिऽत्वं अस्ति निऽध्रुवि॥२२॥ मरुतः मारुतस्य नः आ भेषजस्य वहत सुऽदानवः यूयं सखायः सप्तयः ॥२३॥ याभिः सिंधुं अवथ याभिः तूर्वथ याभिः दुर्गस्यर्थं क्रिविं

मयो नो भूतोतिभिर्मयोभुवः शिवाभिरसचद्विषः॥२४॥ यत्सिंधौ यदसिक्ष्यां यत्समुद्रेषु मरुतः सुबर्हिषः। यत्यर्वतेषु भेषजं॥२५॥ विश्वं पश्यंतो विभृथा तनूष्वा तेना नो अधि वोचत। क्षमा रपो मरुत आतुरस्य न इष्कर्ता विहुतं पुनः॥२६॥४०॥१॥३॥

॥२१॥ १–१८ सोभरिः काण्वः॥ १–१६ इंद्रः। १७. १८ विश्वस्य दानस्तुतिः॥ प्रागाथं काकुभं॥

॥२१॥ वयमु त्वामपूर्व्य स्थूरं न कञ्चिद्भरंतोऽवस्यवः। वाजे चित्रं हवामहे॥१॥ उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत्। त्वामिद्ध्यवितारं ववृमहे सखाय इंद्र सानसिं॥२॥ आ याहीम इंद्वोऽश्वपते गोपत उर्वरापते। सोमं सोमपते पिब॥३॥ वयं हि त्वा बंधुमंतमबंधवो विप्रास इंद्र येमिम। या ते धामानि वृषभ तेभिरा गहि विश्वेभिः सोमपीतये॥४॥ सीदंतस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे। अभि त्वामिंद्र नोनुमः॥५॥१॥ अच्छा च विना नमसा वदामसि किं मुहुश्चिद्वि दीधयः। संति कामासो हरिवो दुदिष्टय स्मो वयं संति नो धियः॥६॥ नूनो इदिंद्र ते वयमूती अभूम नहि नू ते अद्रिवः। विद्मा पुरा परीणसः॥७॥ विद्मा संखित्वमुत शूर भोज्यं मा ते ता वज्रिन्नीमहे। उतो समस्मिन्ना शिंशीहि नो वसो वाजे सुशिप्र गोमति॥८॥ यो नं इदमिदं पुरा प्र वस्य आनिनाय तमु वः स्तुषे। सखाय इंद्रमूतये॥९॥ हयंश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमंदत। आ तु नः स वयति गव्यमश्व्यं स्तोतृभ्यो मघवा शतं॥१०॥२॥ त्वया ह स्विद्युजा वयं प्रति श्वसंतं वृषभ चुचीमहि। संस्थे जनस्य गोमतः॥११॥ जयेम कारे पुरुहूत कारिणोऽभि तिष्ठेम दूढ्यः।

मयः नः भूत ऊतिऽभिः मयःऽभुवः शिवाभिः अस्रक्षऽद्विषः ॥२४॥ यत् सिंधौ यत् असिक्न्यां यत् समुद्रेषु मरुतः सुऽवर्हिषः यत् पर्वतेषु भेषजं ॥२५॥ विश्वे पश्यंतः विभृथ तनूषु आ तेन नः अधि वोचत क्षमा रपः मरुतः आतुरस्य नः इष्कर्त विऽहुतं पुनः ॥२६॥४०॥१॥३॥

॥२१॥ वयं ऊं त्वा अपूर्व्य स्थूरं न कत् चित् भरंतः अवस्यवः वाजे चित्रं हवामहे ॥१॥ उप त्वा कर्मन् ऊतये सः नः युवा उपः चक्राम यः धृषत् त्वां इत् हि अवितारं ववृमहे सखायः इंद्र सानसिं ॥२॥ आ याहि इमे इंदवः अश्वऽपते गोऽपते उर्वराऽपते सोमं सोमऽपते पिव ॥३॥ वयं हि त्वा बंधुऽमंतं अबंधवः विप्रासः इंद्र येमिम या ते धामानि वृषभ तेभिः आ गहि विश्वेभिः सोमऽपीतये ॥४॥ सीदंतः ते वयः यथा गोऽपीते मधौ मदिरे विवक्षणे अभि त्वां इंद्र नोनुमः ॥५॥१॥ अच्छ च त्वा एना नमसा वदामसि किं मुहुः चित् वि दीधयः संति कामासः हरिऽवः ददिः त्वं सः वयं संति नः धियः ॥६॥ नूनाः इत् इंद्र ते वयं ऊती अभूम नहि नु ते अद्रिऽवः विम्न पुरा परीणसः ॥७॥ विम्न सखिऽत्वं उत शूर भोज्यं आ ते ता वज्रिन् ईमहे उतो समस्मिन् आ शिशीहि नः वसो वाजे सुऽशिप्र गोऽमति ॥८॥ यः नः इदंऽइदं पुरा प्र वस्यः आऽनिनाय तं ऊं वः स्तुषे सखायः इंद्रं ऊतये ॥९॥ हरिऽअश्वं सत्ऽपतिं चर्षणिऽसहं सः हि स्म यः अमंदत आ तु नः सः वयति गव्यं अश्व्यं स्तोतृऽभ्यः मघऽवा शतं ॥१०॥२॥ त्वया हि स्वित् युजा वयं प्रति श्वसंतं वृषभ बुवीमहि संऽस्थे जनस्य गोऽमतः ॥११॥ जयेम कारे पुरुऽहूत कारिणः अभि तिष्ठेम दुःऽ---

नृऽभिः वृत्रं हन्याम शूशुयाम च अवेः इंद्र प्र नः धियः॥१२॥ अभातृव्यः अना त्वं अनापिः इंद्र जनुषा सनात् असि युधा इत् आपिऽत्वं इच्छसे॥१३॥ नकिः रेवंतं सख्याय विंदसे पीयंति ते सुराश्वः यदा कृणोषि नदनुं संऽऊहसि आत् इत् पिताऽइव हूयसे॥१४॥ मा ते अमाऽजुरः यथा मूरासः इंद्र सख्ये त्वाऽवंतः नि सदाम सचा सुते॥१५॥३॥ मा ते गोऽदत्र निः अराम राधसः इंद्र मा ते गृहामहि हृळ्हा चित् अर्यः प्र मृश अभि आ भर न ते दामानंः आऽदभे॥१६॥ इंद्रः वा घ इत् इयत् मघं सरस्वती वा सुऽभगा ददिः वसु त्वं वा चित्र दाशुषे॥१७॥ चित्रः इत् राजा राजकाः इत् अन्यके यके सरस्वतीं अनु पर्जन्यःऽइव ततनंत् हि वृष्ट्या सहस्रं अयुता ददत्॥१८॥४॥

॥२२॥ ओ त्यं अग्ने आ रथं अद्य दंसिष्ठं ऊतये यं अश्विना सुऽहवा रुद्रऽवर्तनी॰ आ सूर्यायै तस्थथुः॥१॥ पूर्वऽआयुषे सुऽहवं पुरुऽस्पृहं भुज्युं वाजेषु पूर्व्यं सचनाऽवंतं सुमतिऽभिः सोभरे विऽद्वेषसं अनेहसं॥२॥ इह त्या पुरुऽभूतमा देवा नमःऽभिः अश्विना अर्वाचीना सु अवसे करामहे गंतारा दाशुषः गृहं॥३॥ युवोः रथस्य परि चक्रं ईयते ईर्मा अन्यत् वां इषण्यति अस्मान् अच्छ सुऽमतिः वां शुभः पती आ धेनुःऽइव धावतु॥४॥ रथः यः वां त्रिऽवंधुरः हिरण्यऽअभीशुः अश्विना परि द्यावापृथिवी भूषति श्रुतः तेन नासत्या आ गतं॥५॥५॥ दृशस्यंता मनवे पूर्व्यं दिवि यवं वृकेण कर्षथः ता वां अद्य सुमतिऽभिः शुभः पती अश्विना प्र स्तुवीमहि॥६॥ उप नः वाजिनीऽवसू॰ यातं ऋतस्य पथिऽभिः येभिः तृक्षिं वृषणा चासदस्यवं महे क्षत्राय जिन्वथः॥७॥

अयं वामद्रिभिः सुतः सोमो नरा वृषण्वसू। आ यातं सोमपीतये पिबतं दाशुषो गृहे ॥८॥ आ हि रुहतमश्विना रथे कोशे हिरण्यये वृषण्वसू। युंजाथां पीवरीरिषः ॥९॥ याभिः पक्थमवथो याभिरध्रिगुं याभिर्बभ्रुं विजोषसं। ताभिर्नो मष्टू तूयमश्विना गतं भिषज्यतं यदातुरं ॥१०॥ ६॥ यदध्रिगावो अध्रिगू इदा चिद्दहो अश्विना हवामहे। वयं गीर्भिर्विप्रन्यवः ॥११॥ ताभिरा यातं वृषणोप मे हवं विश्वप्सुं विश्ववार्यं। इषा महिष्ठा पुरुभूतमा नरा याभिः क्रिविं वावृधुस्ताभिरा गतं ॥१२॥ ताविदा चिद्दहानां तावश्विना वंदमान उप ब्रुवे। ता ऊ नमोभिरीमहे ॥१३॥ ताविद्दोषा ता उषसि शुभस्पती ता यामन्रुद्रवर्तनी। मा नो मर्ताय रिपवे वाजिनीवसू परो रुद्रावति ख्यतं ॥१४॥ आ सुग्म्याय सुग्म्यं प्राता रथेनाश्विना वा सुक्षणी। हुवे पितेव सोभरी ॥१५॥ ७॥ मनोजवसा वृषणा मदच्युता मक्षुंगमाभिरूतिभिः। आरात्ताच्चिद्भूतमस्मे अवसे पूर्वीभिः पुरुभोजसा ॥१६॥ आ नो अश्वावदश्विना वर्तिर्यासिष्टं मधुपातमा नरा। गोमद्रसा हिरण्यवत् ॥१७॥ सुप्रावर्गं सुवीर्यं सुष्ठु वार्यमनाधृष्टं रक्षस्विना। अस्मिन्ना वामायाने वाजिनीवसू विश्वा वामानि धीमहि ॥१८॥ ८॥

॥ २३ ॥ १-३० विश्वमना वैयश्वः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥२३॥ ईळिष्वा हि प्रतीव्यं१ यजस्व जातवेदसं। चरिष्णुधूममगृभीतशोचिषं ॥१॥ दामानं विश्वचर्षणेऽग्निं विश्वमनो गिरा। उत स्तुषे विपंधसो रयीनां ॥२॥ येषामाबाध ऋग्मियं इषः पृक्षश्च निग्रभे। उपविदा बर्हिर्विदते वसु ॥३॥

अयं वां अद्रिऽभिः सुतः सोमः नरा वृषण्ऽवसू० आ यातं सोम-ऽपीतये पिबतं दाशुषः गृहे॥८॥ आ हि रुहतं अश्विना रथे कोशे हिरण्यये वृषण्ऽवसू० युंजाथां पीवरीः इषः॥९॥ याभिः पक्थं अवथः याभिः अभिऽगुं याभिः चभ्रुं विऽजोषसं ताभिः नः मक्षु तूयं अश्विना आ गतं भिषज्यतं यत् आतुरं॥१०॥६॥ यत् अभि-ऽगावः अभिऽगू० इदा चित् अहूः अश्विना हवामहे वयं गीः-ऽभिः विप्न्यवः॥११॥ ताभिः आ यातं वृषणा उप मे हवं विश्व-ऽप्सुं विश्वऽवार्यं इषा मंहिष्ठा पुरुऽभूतमा नरा याभिः क्रिविं वृधुः ताभिः आ गतं॥१२॥ तौ इदा चित् अहानां तौ अश्विना वंदमानः उप ब्रुवे तौ ऊं नमःऽभिः ईमहे॥१३॥ तौ इत् दोषा तौ उषसि शुभः पती ता यामन् रुद्रऽवर्तनी० मा नः मर्ताय रिपवे वाजिनीऽवसू० परः रुद्रौ अति ख्यतं॥१४॥ आ सुग्म्याय सुग्म्यं प्रातः रथेन अश्विना वा सक्षणी हुवे पिताऽइव सोभरी ॥१५॥७॥ मनःऽजवसा वृषणा मदुऽच्युता मक्षुऽगमाभिः ऊ-तिऽभिः आरात्तात् चित् भूतं अस्मे अवसे पूर्वीभिः पुरुऽभोजसा ॥१६॥ आ नः अश्वऽवत् अश्विना वर्तिः यासिष्टं मधुऽपातमा नरा गोऽमत् दस्रा हिरण्यऽवत्॥१७॥ सुऽप्रावर्गं सुऽवीर्यं सुष्ठु वार्यं अनाधृष्टं रक्षस्विना अस्मिन् आ वां आऽयाने वाजिनी-ऽवसू० विश्वा वामानि धीमहि॥१८॥८॥

॥२३॥ ईळिष्व हि प्रतीव्यं यजस्व जातऽवेदसं चरिष्णुऽधूमं अगृभीतऽशोचिषं॥१॥ दामानं विश्वऽचर्षणे अग्निं विश्वऽमनःगिरा उत स्तुषे विऽस्पर्धसः रथानां॥२॥ येषां आऽवाधः ऋ-ग्मियः इषः यक्षः च निऽयभे उपऽविदा वह्निः विंदते वसु॥३॥

उदस्य शोचिरस्थादीद्युषो व्यजरं । तपुंजंभस्य सुद्युतो गणश्रियः ॥४॥ उदु तिष्ठ स्वध्वर स्तवानो देव्या कृपा । अभिख्या भासा बृहता शुशुक्वनिः ॥५॥९॥ अग्ने याहि सुशस्तिभिर्हव्या जुह्वान आनुषक् । यथा दूतो बभूथ हव्यवाहनः ॥६॥ अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनां । तमया वाचा गृणे तमु वः स्तुषे ॥७॥ यज्ञेभिरद्भुतक्रतुं यं कृपा सूदयंत इत् । मित्रं न जने सुधितमृतावनि ॥८॥ ऋतावानमृतायवो यज्ञस्य साधनं गिरा । उपो एनं जुजुषुर्नमस्यदे ॥९॥ अच्छा नो अंगिरस्तमं यज्ञासो यंतु संयतः । होता यो अस्ति विक्ष्वा यशस्तमः ॥१०॥१०॥ अग्ने तव त्ये अजरेधानासो बृहद्भाः । अश्वा इव वृषणस्तविषीयवः ॥११॥ स त्वं नं ऊर्जो पते रयिं रास्व सुवीर्यं । प्रावं नस्तोके तनये समत्स्वा ॥१२॥ यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशि । विश्वेदग्निः प्रति रक्षांसि सेधति ॥१३॥ श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते । नि मायिनस्तपुषा रक्षसो दह ॥१४॥ न तस्य माययां चन रिपुरीशीत मर्त्यः । यो अग्नये ददाशं हव्यदातिभिः ॥१५॥११॥ व्यश्वस्वा वसुविदमुक्षण्युरप्रीणाद्रपिः । महो राये तमु त्वा समिधीमहि ॥१६॥ उशनो काव्यस्वा नि होतारमसादयत् । आयजिं त्वा मनवे जातवेदसं ॥१७॥ विश्वे हि त्वा सजोषसो देवासो दूतमक्रत । श्रुष्टी देव प्रथमो यज्ञियो भुवः ॥१८॥ इमं यो वीरो अमृतं दूतं कृणीत मर्त्यः । पावकं कृष्णवर्तनिं विहायसं ॥१९॥ तं हुवेम यतस्रुचः सुभासं शुक्रशोचिषं । विग्रमग्निमजरं प्रत्नमीड्यं ॥२०॥१२॥ यो अस्मै हव्यदातिभिराहुतिं मर्तोऽविधत् । भूरि पोषं स धत्ते वीरवद्यशः ॥२१॥ प्रथमं

उत् अस्य शोचिः अस्थात् दीदियुर्वः वि अजरैः तपुः ऽजंभस्य सु-ऽद्युतः गृणऽश्रियः॥४॥ उत् ऊं इति सुऽअध्वर स्तवानः देव्या कृ-पा अभि ऽख्या भासा बृहता शुशुक्वनिः॥५॥९॥ अग्ने याहि सुश-स्तिऽभिः हव्या जुह्वानः आनुषक् यथा दूतः बभूथ हव्यऽवाहनः ॥६॥ अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनां तं अया वाचा गृणे तं ऊं वः स्तुषे॥७॥ यज्ञेभिः अद्भुतऽक्रतुं यं कृपा सूदयंते इत् मिचं न जनेसुऽधितं नृतऽवनि॥८॥ नृतऽवानं नृतऽयवः यज्ञस्य साधनं गिरा उपो इति एनं जुजुषुः नमसः पदे॥९॥ अच्छ नः अंगिरः-ऽतमं यज्ञासः यंतु संऽयतः होता यः अस्ति विक्षु आ यशःऽतमः ॥१०॥१०॥ अग्ने तव त्ये अजर इंधानासः वृहत् भाः अश्वाःऽइव वृषणः तविषीऽयवः॥११॥ स त्वं नः ऊर्जां पते रयिं रास्व सुऽवीर्यं प्र अव नः नोके तनये समत्ऽसु आ॥१२॥ यत् वै ऊं विश्पतिः शितः सुऽप्रीतः मनुषः विशि विश्वा इत् अग्निः प्रति रक्षांसि सेधति॥१३॥ श्रुष्टी अग्ने नवस्य मे स्तोमस्य वीर विश्पते नि मायिनः तपुषा रक्षसः दह॥१४॥ न तस्य मायया चन रिपुः ईशीत मर्त्यः यः अग्नये ददाश हव्यदातिऽभिः ॥१५॥११॥ विऽअश्वः त्वा वसुऽविदं उक्षण्युः अभीषाट् ऋषिः महः राये त ऊं त्वा समिधीमहि॥१६॥ उशना काव्यः त्वा नि होतारं असादयत् आऽयजिं त्वा मनवे जातऽवेदसं॥१७॥ विश्वे हि त्वा सऽजोषसः देवासः दूतं अक्रत श्रुष्टी देव प्रथमः यज्ञियः भुवः॥१८॥ इमं नु वीरः अमृतं दूतं कृण्वीत मर्त्यः पावकं कृष्णऽवर्तनिं विऽहायसं ॥१९॥ तं हुवेम यतऽस्रुचः सुऽभासं शुक्रऽशोचिषं विप्रं अग्निं अजरं प्रत्नं ईड्यं॥२०॥१२॥ यः अस्मै हव्यदातिऽभिः आऽहुतिं मर्तः अविधत् भूरि षोषं सः धत्ते वीरऽवत् यशः॥२१॥ प्रथमं

जातवेदसमग्निं यज्ञेषु पूर्व्यं। प्रति सुगेनि नमसा हविष्मती॥२२॥ आभिर्विधेमाग्नये ज्येष्ठाभिर्य्यश्ववत्। महिष्ठाभिर्मतिभिः शुक्रशोचिषे॥२३॥ नूनमर्चे विहायसे स्तोमेभिः स्थूरयूपवत्। ऋषे वैयश्व दम्यायाग्नये॥२४॥ अतिथिं मानुषाणां सूनुं वनस्पतीनां। विप्रा अग्निमवसे प्रत्नमीळते॥२५॥१३॥ महो विश्वाँ अभि पतो३ भि हव्यानि मानुषा। अग्ने नि षत्सि नमसाधि बर्हिषि॥२६॥ वंस्वा नो वार्या पुरु वंस्व रायः पुरुस्पृहः। सुवीर्यस्य प्रजावतो यशस्वतः॥२७॥ त्वं वरो सुषाम्णेऽग्ने जनाय चोदय। सदा वसो रातिं यविष्ठ शश्वते॥२८॥ त्वं हि सुप्रतूरसि त्वं नो गोमतीरिषः। महो रायः सातिमग्ने अपा वृधि॥२९॥ अग्ने त्वं यशा अस्या मिचावरुणा वह। चातावाना सम्राजा पूतदक्षसा॥३०॥१४॥

॥ २४ ॥ १–३० विश्वमना वैयश्वः ॥ १–२१ इंद्रः । २८–३० वरोः सौषाम्णस्य दानस्तुतिः ॥ १–२९ अष्टिक् । ३० अनुष्टुप् ॥

॥२४॥ सखाय आ शिषामहि ब्रह्मेंद्राय वज्रिणे। स्तुष क्रु षुवो नृतमाय धृष्णवे॥१॥ शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा। मघैर्मघोनो अति शूर दाशसि॥२॥ स नः स्तवान आ भर रयिं चित्रश्रवस्तमं। निरेके चिद्यो हरिवो वसुर्ददिः॥३॥ आ निरेकमुत प्रियमिंद्र दर्षि जनानां। धृषता धृष्णो स्तवमान आ भर॥४॥ न ते सख्यं न दक्षिणं हस्तं वरंत आमुरः। न वरिवाधो हरिवो गविष्टिषु॥५॥१५॥ आ त्वा गोभिरिव व्रजं गीर्भिर्णोम्यद्रिवः। आ स्मा कामं जरितुरा मनः पृण॥६॥ विश्वानि विश्वमनसो धिया नो वृत्रहंतम। उग्र प्रणेतरधि पू वसो गहि॥७॥ वयं ते अस्य वृत्रहन्विद्याम शूर नव्यसः। वसोः स्पार्हस्य पुरुहूत राधसः॥८॥ इंदु यथा स्व-

जातऽवेदसं अग्निं यज्ञेषु पूर्व्यं प्रति सुक्एति नमसा हविष्मती ॥२२॥ आभिः विधेम अग्नये ज्येष्ठाभिः व्यश्वऽवत् महिष्ठाभिः मतिऽभिः शुक्रऽशोचिषे॥२३॥ नूनं अर्चे विऽहायसे स्तोमेभिः स्यूरयूपऽवत् ऋषे वियश्व दस्माय अग्नये॥२४॥ अतिथिं मानुषाणां सूनुं वनस्पतीनां विप्राः अग्निं अवसे प्रत्नं ईळते॥२५॥१३॥ महः विश्वान् अभि सतः अभि हव्यानि मानुषा अग्ने नि सत्सि नमसा अधि बर्हिषि॥२६॥ वंस्व नः वार्यं पुरु वंस्व रायः पुरुऽस्पृहः सुऽवीर्यस्य प्रजाऽवंतः यशस्वतः॥२७॥ त्वं वरो सुऽसाम्ने अग्ने जनाय चोदय सदा वसो रातिं यविष्ठ शश्वते ॥२८॥ त्वं हि सुऽप्रतूः असि त्वं नः गोऽमंतीः इषः महः रायः सातिं अग्ने अप वृधि॥२९॥ अग्ने त्वं यशाः असि आ मित्रावरुणा वह ऋतऽवानासंऽराजा पूतऽदक्षसा॥३०॥१४॥

॥२४॥ सखायः आ शिषामहि ब्रह्म इंद्राय वज्रिणे स्तुपे ऊं सु वः नृऽतमाय धृष्णवे॥१॥ शवसा हि असि श्रुतः वृत्रऽहत्येन वृत्रऽहा मघैः मघोनः अति शूर दाशसि॥२॥ सः नः स्तवानः आ भर रयिं चिचश्रवःऽतमं निरेके चित् यः हरिऽवः वसुः ददिः ॥३॥ आ निरेकं उत प्रियं इंद्र दर्षि जनानां धृषता धृष्णो स्तवमानः आ भर ॥४॥ न ते सख्यं न दक्षिणं हस्तं वरंते आऽमुरः न परिऽबाधः हरिऽवः गोऽईषिषु ॥५॥१५॥ आ त्वा गोभिःऽइव व्रजं गीःऽभिः गृणोमि अद्रिऽवः आ स्म कामं जरितुः आ मनः पृण॥६॥ विश्वानि विश्वऽमंनसः शिषा नः वृत्रहन्ऽतमं ज्यं प्रऽनेतः अधि सु वसो गहि॥७॥ वयं ते अस्य वृत्रऽहन् विद्याम शूर नव्यसः वसोः स्पार्हस्य पुरुऽहूत राधसः॥८॥ इंद्र यथा हि अ-

स्ति तेऽपरीतं नृतो शवः। अमृक्ता रातिः पुरुहूत दाशुषे ॥९॥ आ वृषस्व महामह महे नृतम् राधसे। हव्यहर्षिद्दृह्य मघवन्मघत्तये ॥१०॥१६॥ नू अन्यचा चिदद्रिवस्त्वन्नो जग्मुराशसः। मघवञ्छग्धि तव तन्न ऊतिभिः ॥११॥ नह्यङ्ग नृतो त्वदन्यं विदामि राधसे। राये द्युम्नाय शवसे च गिर्वणः ॥१२॥ एंदुमिंद्राय सिंचत पिबांति सोम्यं मधु। प्र राधसा चोदयाते महित्वना ॥१३॥ उपो हरीणां पतिं दक्षं पृंचंतमब्रवं। नूनं श्रुधि स्तुवतो अश्व्यस्य ॥१४॥ नह्यङ्ग पुरा चन जज्ञे वीरतरस्त्वत्। नकीं राया नैवथा न भंदना ॥१५॥१७॥ एदु मध्वो मदिंतरं सिंच वाध्वर्यो अंधसः। एवा हि वीरः स्तवते सदावृधः ॥१६॥ इंद्र स्यातहरीणां नकिष्टे पूर्व्यस्तुतिं। उदानंश शवसा न भंदना ॥१७॥ तं वो वाजानां पतिमहूमहि श्रवस्यवः। अप्रायुभिर्यज्ञेभिर्वावृधेन्यं ॥१८॥ एतो न्विंद्रं स्तवाम सखायः स्तोम्यं नरं। कृष्टीर्यो विश्वा अभ्यस्त्येक इत् ॥१९॥ अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः। घृतात्स्वादीयो मधुनश्च वोचत ॥२०॥१८॥ यस्यामिंतानि वीर्याऽन राधः पर्येतवे। ज्योतिर्न विश्वमभ्यस्ति दक्षिणा ॥२१॥ स्तुहींद्रं व्यश्ववदनूर्मिं वाजिनं यमं। अर्यो गयं महमानं विदाशुषे ॥२२॥ एवा नूनमुप स्तुहि वेर्यश्च दशमं नवं। सुविद्यांसं चकृत्यं चरणीनां ॥२३॥ वेत्था हि निचृतीनां वज्रहस्त परिवृजं। अहरहः शुंध्युः पर्पिदामिव ॥२४॥ तदिंद्राव आ भर येना दंसिष्ठ कृत्वने। द्विता कुत्साय शिग्रथो नि चोदय ॥२५॥१९॥ तमु त्वा नूनमीमहे नव्यं दंसिष्ठ सन्यसे। स त्वं नो विश्वा अभिमातीः सक्षणिः ॥२६॥ य ऋक्षादंहसो मुचद्यो वार्यो-

स्ति ते अपरिऽइतं नृतो शवः अमृक्ता रातिः पुरुऽहूत दाशुषे ॥९॥ आ वृषस्व महाऽमह मघे नृऽतम राधसे हव्यः चित् हव मघऽवन् मघत्तये॥१०॥१६॥ नु अन्यत् चित् अद्रिऽवः त्वत् नः जग्मुः आऽशसः मघऽवन् शग्धि तव तत् नः ऊतिऽभिः॥११॥ नहि अंग नृतो त्वत् अन्यं विदामि राधसे राये द्युम्नाय शवसे च गिर्वणः॥१२॥ आ इंदुं इंद्राय सिंचत पिबाति सोम्यं मधु प्र राधसा चोदयाते महिऽव्रता ॥१३॥ उपो हरीणां पतिं दक्षं पृंचंतं अब्रवं नूनं शुधि स्तुवतः अश्व्यस्य॥१४॥ नहि अंग पुरा चन जज्ञे वीरऽतरः त्वत् नकिः राया न एवऽया न भंदना॥१५॥१७॥ आ इत् ऊं मध्यः मदिन्ऽतरं सिंच वा अध्वर्यो अंधसः एव हि वीरः स्तवते सदाऽवृधः॥१६॥ इंद्र स्यात् हरीणां नकिः ते पूर्व्यऽस्तुतिं उत् आनंश शवसा न भंदना॥१७॥ तं वः वाजानां पतिं अहूमहि श्रवस्यवः अप्रायुऽभिः यज्ञेभिः ववृधेन्यं॥१८॥ एतो नु इंद्रं स्तवाम सखायः स्तोम्यं नरं कृष्टीः यः विश्वाः अभि अस्ति एकः इत्॥१९॥ अगोऽरुधाय गोऽइषे द्युक्षाय दस्यं वचः घृतात् स्वादीयः मधुनः च वोचत ॥२०॥१८॥ यस्य अमितानि वीर्या न राधः परिऽएतवे ज्योतिः न विश्वे अभि अस्ति दक्षिणा॥२१॥ स्तुहि इंद्रं विश्वऽवत् अनूर्मिं वाजिनं यमं अर्यः गयं मंहमानं विदाशुषे॥२२॥ एव नूनं उप स्तुहि वैयश्व दशमं नवं सुऽविद्वांसं चर्कृत्यं चरणीनां॥२३॥ वेत्थ हि निःऽऋतीनां वज्रऽहस्त परिऽवृजं अहेःऽअहः शुंध्युः परिपदोऽइव॥२४॥ तत् इंद्र अवः आ भर येन दंसिष्ठ कृत्वने हिता कुत्साय शिश्नथः नि चोदय॥२५॥१९॥ तं ऊं त्वा नूनं ईमहे नव्यं दंसिष्ठ सन्यसे सः त्वं नः विश्वाः अभिऽमातीः सपत्नीः॥२६॥ यः ऋक्षात् अंहसः मुचत् यः वा आर्यात्

त्सप्र सिंधुषु। वधैर्दासस्य तुविनृम्ण नीनमः ॥२७॥ यथा वरो सुषाम्णे सनिभ्य आवहो रयिं। व्यश्वेभ्यः सुभगे वाजिनीवति ॥२८॥ आ नार्यस्य दक्षिणा व्यश्वाँ एतु सोमिनः। स्यूरं च राधः शतवत्सहस्रवत् ॥२९॥ यत्त्वा पृच्छादीजानः कुहया कुहयाकृते। एषो अप्सुश्रितो वलो गोमतीमव तिष्ठति ॥३०॥२०॥

॥ २५ ॥ १–२४ विश्वमना वैयश्वः ॥ १–९. १३–२४ मित्रावरुणौ । १०–१२ विश्वे देवाः ॥ १–१२. २४ उष्णिक् । २३ उष्णिगगर्भा ॥

॥२५॥ ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया। ऋतावानावृतमा घोषतो बृहत् ॥१॥ मित्रा तनां न रथ्या वरुणो यश्च सुक्रतुः। सनात्सुजाता तनया धृतव्रता ॥२॥ ता माता विश्ववेदसासुर्याय प्रमंहसा। मही जजानादितिर्ऋतावरी ॥३॥ महान्ता मित्रावरुणा सम्राजा देवावसुरा। ऋतावानावृतमा घोषतो बृहत् ॥४॥ नपाता शवसो महः सूनू दक्षस्य सुक्रतू। सुप्रदानू इषो वास्वधि क्षितः ॥५॥२१॥ सं या दानूनि येमथुर्दिव्याः पार्थिवीरिषः। नभस्वतीरा वां चरन्तु वृष्टयः ॥६॥ अधि या बृहतो दिवोऽभि यूथेव पश्यतः। ऋतावानावृतमा सम्राजा नमसे हिता ॥७॥ ऋतावानावृतमा नि षेदतुः साम्राज्याय सुक्रतू। धृतव्रता क्षत्रिया क्षत्रमाशतुः ॥८॥ अक्ष्णश्चिन्नातुवित्तरानुल्वणेन चक्षसा। नि चिन्मिषन्ता नि चिरा नि चिक्यतुः ॥९॥ उत नो देव्यदितिरुरुष्यतां नासत्या। उरुष्यन्तु मरुतो वृद्धशवसः ॥१०॥२२॥ ते नो नावमुरुष्यत दिवा नक्तं सुदानवः। अरिष्यन्तो नि पायुभिः सचेमहि ॥११॥ अग्ने ते विष्णवे वयमरिष्यन्तः सुदानवे। ब्रुधि स्तवानसंधो पूर्वचित्तये ॥१२॥ तद्वायं वृणीमहे वरिष्ठं गोपयत्यं। मित्रो

सप्त सिंधुषु वधः दासस्य तुविऽनृम्ण नीनमः ॥२७॥ यथा वरो सुऽसाम्ने सनिऽभ्यः आ अवहः रयिं विऽअश्वेभ्यः सुऽभगे वाजिनीऽवति ॥२८॥ आ नार्यस्य दक्षिणा विऽअश्वान् एतु सोमिनः स्यूरं च राधः शतऽवत् सहस्रऽवत् ॥२९॥ यत् त्वा पृच्छात् ईजानः कुहया कुहयाऽकृते एषः अपऽश्रितः वलः गोऽमती अवं तिष्ठति ॥३०॥२०॥

॥२५॥ ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया ऋतऽवाना यजसे पूतऽदक्षसा ॥१॥ मित्रा तना न रथ्या वरुणः यः च सुऽक्रतुः सनात् सुऽजाता तनया धृतऽव्रता ॥२॥ ता माता विश्वऽवेदसा असुर्याय प्रऽमहसा मही जजान अदितिः ऋतऽवरी ॥३॥ महांता मित्रावरुणा सम्ऽराजा देवौ असुरा ऋतऽवानौ ऋतं आ घोषतः बृहत् ॥४॥ नपाता शवसः महः सूनू दक्षस्य सुऽक्रतू सुप्रऽदानू इषः वास्तु अधि क्षितः ॥५॥२१॥ सं या दानूनि येमथुः दिव्याः पार्थिवीः इषः नभस्वतीः आ वां चरंतु वृष्टयः ॥६॥ अधि या बृहतः दिवः अभि यूथाऽइव पश्यतः ऋतऽवाना सम्ऽराजा नमसे हिता ॥७॥ ऋतऽवाना नि सेदतुः साम्ऽराज्याय सुऽक्रतू धृतऽव्रता क्षत्रिया क्षत्रं आशतुः ॥८॥ अक्ष्णः चित् गातुवित् तरा अनुल्वणेन चक्षसा नि चित् मिषंता नि ऽचिरा नि चिक्यतुः ॥९॥ उत नः देवी अदितिः उरुष्यतां नासत्या उरुष्यतु मरुतः वृद्धऽशवसः ॥१०॥२२॥ ते नः नावं उरुष्यत दिवा नक्तं सुऽदानवः अरिष्यंतः नि पायुऽभिः सचेमहि ॥११॥ अग्ने ते विष्णवे वयं अरिष्यंतः सुऽदानवे शुधि स्वऽयावन् सिंधो पूर्वऽचित्तये ॥१२॥ तत् वायं वृणीमहे वरिष्ठं गोपयत्यं मित्रः

त्स्प्न सिंधुषु। वर्धदासस्य तुविनृम्ण नीनमः ॥२७॥ यथा वरो सुषाम्णे सनिभ्य आवहो रयिं। व्यश्वेभ्यः सुभगे वाजिनीवति ॥२८॥ आ नार्यस्य दक्षिणा व्यश्वाँ एतु सोमिनः। स्यूरं च राधः शतवत्सहस्रवत् ॥२९॥ यत्त्वा पृच्छादीजानः कुहया कुहयाकृते। एषो अपप्रितो वलो गोमतीमवं तिष्ठति ॥३०॥२०॥

॥ २५ ॥ १–२४ विश्वमना वैयश्वः ॥ १–९. १३–२४ मित्रावरुणौ। १०–१२ विश्वे देवाः ॥ १–२२. २४ उष्णिक्। २३ उष्णिगगर्भा ॥

॥२५॥ ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया। ऋतावाना यजसे पूतदक्षसा ॥१॥ मित्रा तना न रथ्या वरुणो यश्च सुक्रतुः। सुनात्सुजाता तनया धृतव्रता ॥२॥ ता माता विश्ववेदसासुर्याय प्रमहसा। मही जजानादितिर्ऋतावरी ॥३॥ महान्ता मित्रावरुणा समाजा देवावसुरा। ऋतावानावृतमा घोषतो बृहत् ॥४॥ नपाता शवसो महः सूनू दक्षस्य सुक्रतू। सुप्रदानू इषो वास्वधि क्षितः ॥५॥२१॥ सं या दानूनि येमथुर्दिव्याः पार्थिवीरिषः। नभस्वतीरा वां चरन्तु वृष्टयः ॥६॥ अधि या बृहतो दिवोऽभि यूथेव पश्यतः। ऋतावाना समाजा नमसे हिता ॥७॥ ऋतावाना नि षेदतुः साम्राज्याय सुक्रतू। धृतव्रता क्षत्रिया क्षत्रमाशतुः ॥८॥ अक्ष्णश्चिन्नातुविद्वेरानुल्बणेन चक्षसा। नि चिन्मिषन्तो निचिरा नि चिक्यतुः ॥९॥ उत नो देव्यदितिरुरुष्यतां नासत्या। उरुष्यन्तु मरुतो वृद्धशवसः ॥१०॥२२॥ ते नो नावमुरुष्यत दिवा नक्तं सुदानवः। अरिष्यन्तो नि पायुभिः सचेमहि ॥११॥ अग्ने ते विष्णवे वयमरिष्यन्तः सुदानवे। शुधि स्वयावन्नंधो पूर्वचित्तये ॥१२॥ तद्वायं वृणीमहे वरिष्ठं गोपयत्यं। मित्रो

सप्त सिंधुषु वधः दासस्य तुविऽनृम्ण नीनमः॥२७॥ यथा वरो सुऽसाम्ने सनिऽभ्यः आ अवहः रयिं विऽअश्वेभ्यः सुऽभगे वाजिनीऽवति॥२८॥ आ नार्यस्य दक्षिणा विऽअश्वान् एतु सोमिनः स्यूरं च राधः शतऽवत् सहस्रऽवत्॥२९॥ यत् त्वा पृच्छात् इजानः कुहया कुहयाऽकृते एषः अपऽश्रितः वलः गोऽमती अव तिष्ठति॥३०॥२०॥

॥२५॥ ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया ऋतऽवाना यजसे पूतऽदक्षसा॥१॥ मित्रा तना न रथ्या वरुण यः च सुऽक्रतुः सनात् सुऽजाता तनया धृतऽव्रता॥२॥ ता माता विश्वऽवेदसा असुर्याय प्रऽमहसा मही जजान अदितिः ऋतऽवरी॥३॥ महांता मित्रावरुणा सम्ऽराजा देवौ असुरा ऋतऽवानौ ऋतं आ घोषतः बृहत्॥४॥ नपाता शवसः महः सूनू दक्षस्य सुऽक्रतू सुप्रऽदानू इषः वास्तु अधि क्षितः॥५॥२१॥ सं या दानूनि येमथुः दिव्याः पार्थिवीः इषः नभस्वतीः आ वां चरंतु वृष्टयः॥६॥ अधि या बृहतः दिवः अभि यूथाऽइव पश्यतः ऋतऽवाना सम्ऽराजा नमसे हिता॥७॥ ऋतऽवाना नि सेदतुः साम्ऽराज्याय सुऽक्रतू धृतऽव्रता क्षत्रिया क्षत्रं आशतुः॥८॥ अक्ष्णः चित् गातुवित् नरा अनुत्वणेन चक्षसा नि चित् मिषंता नि ऽचिरा नि चिक्यतुः॥९॥ उत नः देवी अदितिः उरुष्यतां नासत्या उरुष्यतु मरुतः वृद्धऽशवसः॥१०॥२२॥ ते नः नावं उरुष्यत दिवा नक्तं सुऽदानवः अरिष्यंतः नि पायुऽभिः सचेमहि॥११॥ अग्ने ते विष्णवे वयं अरिष्यंतः सुऽदानवे श्रुधि स्वऽयावन् सिंधो पूर्वऽचित्तये॥१२॥ तत् वायं वृणीमहे वरिष्ठं गोपयत्यं मित्रः

यत्पांति वरुणो यदर्यमा ॥१३॥ उत नः सिंधुरपां तन्मरुत्स्त-
द्विनौ। इंद्रो विष्णुर्मीढ्वांसः सजोषसः ॥१४॥ ते हि पमां वनुषो
नरोऽभिमांतिं कयस्य चित्। निग्मं न क्षोदः प्रतिग्मंति भूर्णि-
यः ॥१५॥२३॥ अयमेकं इत्या पुरूरु चष्टे वि विश्पतिः। तस्य
व्रतान्यनु वश्चरामसि ॥१६॥ अनु पूर्वाणयोका साम्राज्यस्य स-
श्चिम। मित्रस्य व्रता वरुणस्य दीर्घश्रुत् ॥१७॥ परि यो रश्मिना
दिवोऽंतान्ममे पृथिव्याः। उभे आ पप्रौ रोदसी महित्वा ॥१८॥
उदु प्य शरणे दिवो ज्योतिरयंस्त सूर्यः। अग्निर्न शुक्रः समिधान
आहुतः ॥१९॥ वचो दीर्घप्रसद्मनीशे वाजस्य गोमतः। ईशे हि
पित्वोऽविषस्य दावने ॥२०॥२४॥ तत्सूर्य रोदसी उभे दोषा व-
स्तोरुषं वुवे। भोजेष्टस्माँ अभ्युच्चरा सदा ॥२१॥ ऋजमुक्षण्या-
यने रजतं हरयाणे। रथं युक्तमसनाम सुपामणि ॥२२॥ ता मे
अश्व्यानां हरीणां नितोशना। उतो नु कृत्व्यानां नृवाह-
सा ॥२३॥ स्मदभीषू कशावंता विप्रा नविष्ठया मती। मही
वाजिनावर्वंता सचासनं ॥२४॥२५॥

॥ २६ ॥ १–२५ विश्वमना वैयश्वो व्यश्वो वांगिरसः ॥ १–१९ अश्विनौ । २०–२५ वायुः ॥
१–१५. २२–२४ उष्णिक् । १६–१९. २१. २५ गायत्री । २० अनुष्टुप् ॥

॥ २६ ॥ युवोरु षू रथं हुवे सधस्तुत्याय सूरिषु। अतूर्तदक्षा
वृषणा वृषण्वसू ॥१॥ युवं वरो सुपाम्ये महे तने नासत्या।
अवोभिर्याथो वृषणा वृषण्वसू ॥२॥ ता वामद्य हवामहे
हव्येभिर्वाजिनीवसू। पूर्वीरिष इषयंता वनिं शुपः ॥३॥ आ
वां वाहिष्ठो अश्विना रथो यातु श्रुतो नरा। उप स्तोमान्तुरस्य
दर्शयः ष्टिये ॥४॥ जुहुराणा चिदश्विना मन्येथां वृषण्वसू।
युवं हि रुद्रा पर्षयो अति द्विषः ॥५॥२६॥ दस्रा हि विश्व-

यत् पांतिं वरुणः यत् अर्यमा ॥१३॥ उत नः सिंधुः अपां तत् मरुतः तत् अश्विना इंद्रः विष्णुः मीढ्वांसः सुऽजोषसः ॥१४॥ ते हि स्म वनुषः नरः अभिऽमांतिं कयस्य चित् तिग्मं न क्षोदः प्रतिऽघ्नंतिं भूर्णयः ॥१५॥२३॥ अयं एकः इत्या पुरु उरु चष्टे वि विश्पतिः तस्य व्रतानि अनु वः चरामसि ॥१६॥ अनु पूर्वाणि ओक्या सांऽराज्यस्य सश्चिम मित्रस्य व्रता वरुणस्य दीर्घऽश्रुत् ॥१७॥ परि यः रश्मना दिवः अंतान् ममे पृथिव्याः उभे आ पप्रौ रोदसी महिऽत्वा ॥१८॥ उत् ऊं स्यः शरणे दिवः ज्योतिः अयंस्त सूर्यः अग्निः न शुक्रः संऽइधानः आऽहुतः ॥१९॥ वर्चः दीर्घऽप्रसद्मनि ईशे वाजस्य गोऽमतः ईशे हि पित्वः अविषस्य दावने ॥२०॥२४॥ तत् सूर्यः रोदसी उभे दोषा वस्तोः उप ब्रुवे भोजेषु अस्मान् अभि उत् चर सदा ॥२१॥ चित्रं उक्षण्यायने रजतं हरयाणे रथे युक्तं असनाम सुऽसामनि ॥२२॥ ता मे अश्व्यानां हरीणां निऽतोशना उतो नु कृत्व्यानां नृऽवाहसा ॥२३॥ स्मत्ऽअंभीशू० कशाऽवंता विप्रा नविष्ठया मती मह वाजिनौ अवंता सचा असनं ॥२४॥२५॥

॥२६॥ युवोः ऊं सु रथं हुवे सधऽस्तुत्याय सूरिषु अतूर्तऽदक्षा वृषणा वृषणऽवसू० ॥१॥ युवं वरो सुऽसाम्ने महे तने नासत्या अवःऽभिः याथः वृषणा वृषणऽवसू० ॥२॥ ता वां अद्य हुवामहे हव्येभिः वाजिनीऽवसू० पूर्वीः इषः इषयंती अति क्षपः ॥३॥ आ वां वाहिष्ठः अश्विना रथः यातु श्रुतः नरा उप स्तोमान् तुरस्य दर्शथः श्रिये ॥४॥ जुहुराणा चित् अश्विना आ मन्येथां वृषण्ऽवसू० युवं हि रुद्रा पर्षथः अति द्विषः ॥५॥२६॥ दस्रा हि विश्वं

मानुषङ्मृष्टूभिः परिदीयथः । धियंजिन्वा मधुवर्णा शुभस्पती ॥६॥ उप नो यातमश्विना राया विश्वपुषा सह । मघवाना सुवीरावनंपच्युता ॥७॥ आ मे अस्य प्रतीव्य१मिंद्रनासत्या गतं । देवा देवेभिरद्य सचनंस्तमा ॥८॥ वयं हि वां हवामह उक्षण्यंतो व्यश्ववत् । सुमतिभिरुप विप्राविहा गतं ॥९॥ अश्विना स्तृपे स्तुहि कुवित्ते श्रवंतो हवं । नेदीयसः कूळयातः पणीरुत ॥१०॥२७॥ वियश्वस्य श्रुतं नरोतो मे अस्य वेदथः । सजोषसा वरुणो मित्रो अर्यमा ॥११॥ युवादत्तस्य धिष्णया युवानीतस्य सूरिभिः । अहंरहर्वृषणा महं शिक्षतं ॥१२॥ यो वां यज्ञेभिरावृतोऽधिवस्त्रा वधूरिव । सपर्यंता शुभे चक्राते अश्विना ॥१३॥ यो वामुरुष्यचंस्तमं चिकेतति नृपाय्यं । वर्तिरश्विना परि यातमस्मयू ॥१४॥ अस्मभ्यं सु वृषण्वसू यातं वर्तिर्नृपाय्यं । विषुद्रुहेव यज्ञमूहथुर्गिरा ॥१५॥२८॥ वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा । युवाभ्यां भूत्वश्विना ॥१६॥ यद्दो दिवो अर्णव दूषो वा मदथो गृहे । श्रुतमिन्मे अमर्त्या ॥१७॥ उत स्या श्वेतया-वंरी वाहिष्ठा वां नदीनां । सिंधुर्हिरण्यवर्तनिः ॥१८॥ स्मदेतया सुकीर्त्याश्विना श्वेतया धिया । वहेथे शुभ्रयावाना ॥१९॥ युक्ष्वा हि त्वं रथासहो युवस्व पोषां वसो । आ नो वायो मधु पिवास्माकं सवना गहि ॥२०॥२९॥ तव वायवृतस्पते त्वष्टुर्जामातरद्भुत । अवांस्या वृणीमहे ॥२१॥ त्वष्टुर्जामातरं वयमीशानं राय ईमहे । सुतावंतो वायुं द्युम्ना जनासः ॥२२॥ वायो याहि शिवा दिवो वहस्वा सु स्वश्व्यं । वहस्व महः पृथुपक्षसा रयिं ॥२३॥ त्वां हि सुप्सरस्तमं नृ-

आ नुपक्मद्भुऽभिः परिऽदीयथः धियंऽजिन्वा मधुऽवर्णा शुभः पती' ॥६॥ उप नः यातं अश्विना राया विश्वऽपुषा सह मघऽवाना सुऽवीरां अनंपऽच्युता ॥७॥ आ मे अस्य प्रतीर्ब्यं इंद्रनासत्या गतं देवा देवेभिः अद्य सचनःऽतमा ॥८॥ वयं हि वां हवामहे उक्षण्यंतः व्यश्वऽवत् सुमतिऽभिः उप विप्रौ इह आ गतं ॥९॥ अश्विना सु ऋषे स्तुहि कुवित् ते श्वंतः हवं नेदीयसः कूळ्हयातः पणीन् उत ॥१०॥ २७॥ वैयश्वस्य श्रुतं नरा उतो' मे अस्य वेदथः सऽजोषसा वरुणः मित्रः अर्यमा ॥११॥ युवाऽदत्तस्य धिष्ण्या युवाऽनीतस्य सूरिऽभिः अहःऽअहः वृषण्वा मह्यं शिक्षतं ॥१२॥ यः वां यज्ञेभिः आऽवृतः अधिऽवस्त्रा वधूःऽइव सपर्येतो शुभे चक्राते' अश्विना ॥१३॥ यः वां उरुव्यचःऽतमं चिकेतति नृऽपाय्यं वर्तिः अश्विना परि यातं अस्मऽयू० ॥१४॥ अस्मभ्यं सु वृषण्ऽवसू० यातं वर्तिः नृऽपाय्यं विपुट्वहाऽइव यज्ञं ऊहथुः गिरा ॥१५॥ २८॥ वाहिष्ठः वां हवानां स्तोमः दूतः हुवत् नरा युवाभ्यां भूतु अश्विना ॥१६॥ यत् अदः दिवः अर्णवे इषः वा मदथः गृहे श्रुतं इत् मे अमर्त्या ॥१७॥ उत स्या श्वेतऽयावरी वाहिष्ठा वां नदीनां सिंधुः हिरण्यऽवर्तनिः ॥१८॥ स्मत् एतया सुऽकीर्त्या अश्विना श्वेतया धिया वहेथे' शुभऽयावाना ॥१९॥ युवं हि वं रथऽसहा युवं स्वं पोष्या वसो' आत् नः वायो' मधु पिब अस्माकं सवना आ गहि ॥२०॥ २९॥ तवं वायो' ऋतःऽपते त्वष्टुः जामातः अद्भुत अवांसि आ वृणीमहे ॥२१॥ त्वष्टुः जामातरं वयं ईशानं रायः ईमहे सुतऽवंतः वायुं द्युम्ना जनासः ॥२२॥ वायो' याहि शिव आ दिवः वहस्व सु सुऽअश्वं वहस्व महः पृथुऽपक्षसा रथं ॥२३॥ त्वां हि सुस्परःऽतमं नृ-

पदनेषु हूमहे। यावांणं नाश्वपृद्धं मंहनां॥२४॥ स त्वं नो देव मनसा वायो मंदानो अंग्रियः। कृधि वाजाँ अपो धियः॥२५॥३०॥

॥ २७ ॥ १–२२ मनुर्वैवस्वतः ॥ विश्वे देवाः ॥ प्रागाथं ॥

॥ २७ ॥ अग्निरुक्थे पुरोहितो यावांणो बर्हिरध्वरे। ऋचा यामि मरुतो ब्रह्मणस्पतिं देवाँ अवो वरेण्यं॥१॥ आ पशुं गांसि पृथिवीं वनस्पतीनुपासा नक्तमोषधीः। विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः॥२॥ प्र सू न एत्वध्वरोऽग्ना देवेषु पूर्व्यः। आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभानुषु॥३॥ विश्वे हि ष्मा मनवे विश्ववेदसो भुवन्वृधे रिशादसः। अरिष्टेभिः पायुभिर्विश्ववेदसो यंता नोऽवृकं हृदिः॥४॥ आ नो अद्य समनसो गंता विश्वे सजोषसः। ऋचा गिरा मरुतो देव्यदिते सदने पस्त्ये महि॥५॥३१॥ अभि प्रिया मरुतो या वो अश्वा हव्या मिंच प्रयाथन। आ बर्हिरिंद्रो वरुणस्तुरा नर आदित्यासः सदंतु नः॥६॥ वयं वो वृक्तबर्हिषो हितप्रयस आनुषक्। सुतसोमासो वरुण हवामहे मनुष्वद्विद्वाग्नयः॥७॥ आ प्र यांत मरुतो विष्णो अश्विना पूषन्नाकीनया धिया। इंद्र आ यांतु प्रथमः सनिष्युभिर्वृषा यो वृत्रहा गृणे॥८॥ वि नो देवासो अदुहोऽच्छिद्रं शर्म यच्छत। न यद्दूराद्वसवो नू चिदंतितो वरूथमाद्धर्षंति॥९॥ अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यं। प्र णः पूर्वस्मै सुविताय वोचत मक्षू सुम्नाय नव्यसे॥१०॥३२॥ इदा हि व उपस्तुतिमिदा वामस्य भक्तये। उप वो विश्ववेदसो नमस्युराँ असृक्ष्यन्यामिव॥११॥ उदु ष्य वः सविता सुप्रणीत्योऽस्थाद्दूर्वो

ऽसदंनेषु हूमहे मावांणं न अश्वंऽपृष्ठं मंहनां ॥२४॥ सः त्वं नः देव मनसा वायो मंदानः अभियः कृधि वाजान् अपः धियः ॥२५॥३०॥

॥२७॥ अग्निः उक्थे पुरःऽहितः मावांणः बर्हिः अध्वरे ऋचा यामि मरुतः ब्रह्मणः पतिं देवान् अवः वरेण्यं॥१॥ आ पशुं गासि पृथिवीं वनस्पतीन् उपसां नक्तं ओषधीः विश्वे च नः वसवः विश्वऽवेदसः धीनां भूत प्रऽअवितारः॥२॥ प्र सु नः एतु अध्वरः अग्ना देवेषु पूर्व्यः आदित्येषु प्र वरुणे धृतऽव्रते मरुत्ऽसु विश्वऽभानुषु॥३॥ विश्वे हि स्म मनवे विश्वऽवेदसः भुवन् वृधे रिशादसः अरिष्टेभिः पायुऽभिः विश्वऽवेदसः यंत नः अवृकं छर्दिः ॥४॥ आ नः अद्य सऽमनसः गतं विश्वे सऽजोषसः ऋचा गिरा मरुतः देवि अदिते सदने पस्त्ये महि॥५॥३१॥ अभि प्रिया मरुतः या वः अश्वा हव्या मिच प्रऽयाथन आ बर्हिः इंद्रः वरुणः तुराः नरः आदित्यासः सदंतु नः॥६॥ वयं वः वृक्तऽबर्हिषः हितऽप्रयसः आनुषक् सुतऽसोमासः वरुण हुवामहे मनुष्वत् इद्धऽअंग्नयः॥७॥ आ प्र यात मरुतः विष्णो अश्विना पूषन् माकीनया धिया इंद्रः आ यातु प्रथमः सनिष्युऽभिः वृषा यः वृत्रऽहा गृणे ॥८॥ विनः देवासः अदुहः अच्छिद्रं शर्म यच्छत न यत् दूरात् वसवः नु चित् अंतितः वरूथं आऽदधर्षति॥९॥ अस्ति हि वः सऽजात्यं रिशादसः देवासः अस्ति आप्यं प्र नः पूर्वस्मै सुविताय वोचत मक्षु सुम्नाय नव्यसे॥१०॥३२॥ इदा हि वः उपऽस्तुतिं इदा वामस्य भक्तये उप वः विश्वऽवेदसः नमस्युः आ असृक्षि अन्यांऽइव॥११॥ उत् ऊं स्यः वः सविता सुऽप्रनीतयः अस्थात् ऊर्ध्वः

वरेण्यः । नि द्विपादश्चतुष्पादो अर्थिनोऽविश्रन्पतयिष्णवः ॥१२॥ देवंदेवं वोऽवसे देवंदेवमभिष्टये । देवंदेवं हुवेम वाजसातये गृणंतो दैव्या धिया ॥१३॥ देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातयः । ते नो अद्य ते अपरं तुचे तु नो भवंतु वरिवोविदः ॥१४॥ प्र वः शंसाम्यद्रुहः संस्य उपस्तुतीनां । न तं धूर्ति-र्वरुण मित्र मर्त्यं यो वो धामभ्योऽविधत् ॥१५॥ प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति । प्र प्रजाभिर्जायते धर्मणस्पर्यरिष्टः सर्व एधते ॥१६॥३३॥ ऋते स विंदते युधः सुगेभिर्यात्यध्वनः । अर्यमा मित्रो वरुणः सरातयो यं चायंते सजोषसः ॥१७॥ अजैं चिदस्मै कृणुथा न्यंचनं दुर्गे चिदा सुसरणं । एषा चिदस्मादघनिः परो नु सास्रेधंती वि नश्यतु ॥१८॥ यद्य सूर्य उद्यति प्रियक्षत्रा ऋतं दध । यन्निम्रुचि प्रबुधि विश्ववेदसो यद्वा मध्यंदिने दिवः ॥१९॥ यद्वाभिपित्वे असुरा ऋतं यते छर्दिर्येम वि दाशुषे । वयं तद्वो वसवो विश्ववेदस उप स्थेयाम मध्य आ ॥२०॥ यद्य सूर उदिते यन्मध्यंदिन आतुचि । वामं धत्थ मनवे विश्ववेदसो जुह्वानाय प्रचेतसे ॥२१॥ वयं तद्वः समाज आ वृणीमहे पुचो न वंहुपाय्यं । अश्याम तदादित्या जुह्वंतो हविर्येन वस्यो-ऽनशामहै ॥२२॥३४॥

॥ २८ ॥ १-५ मनुर्वैवस्वतः ॥ विश्वे देवा. ॥ १-३ ५ गायत्री । ४ पुरउष्णिक् ॥

॥ २८ ॥ ये चिंशति चयस्परो देवासो बर्हिरासदन् । विदन्नह द्वितासनन् ॥१॥ वरुणो मित्रो अर्यमा स्मद्रातिषाचो अमयः । पत्नीवंतो वषट्कृताः ॥२॥ ते नो गोपा अपाच्यास्त उदक्त इत्या न्यक् । पुरस्तात्सर्वया विशा ॥३॥ यथा वशंति देवा-

वरेण्यः नि द्विऽपादः चतुःऽपादः अर्थिनः अविष्यन् पतयिष्णवः॥१२॥ देवंऽदेवं वः अवसे देवंऽदेवं अभिष्टये देवंऽदेवं हुवेम वाजेऽसातये गृणंतः देव्या धिया॥१३॥ देवासः हि स्म मनवे सऽमन्यवः विश्वे साकं सऽरातयः ते नः अद्य ते अपरं तुचे तु नः भवंतु वरिवःऽविदः॥१४॥ प्र वः शंसामि अद्रुहः संऽस्थे उपऽस्तुतीनां न तं धूर्तिः वरुण मित्र मर्त्यं यः वः धामेऽभ्यः अविधत्॥१५॥ प्र सः क्षयं तिरते वि महीः इषः यः वः वराय दाशति प्रऽजाभिः जायते धर्मणः परि अरिष्टः सर्वैः एधते॥१६॥३३॥ ऋते सः विंदते युधः सुऽगेभिः याति अर्वन्तः अर्यमा मित्रः वरुणः सऽरातयः यं चायंते सऽजोषसः॥१७॥ अजें चित् अस्मे कृणुथ निऽअंचनं दुःऽगे चित् आ सुऽसरणं एषा चित् अस्मात् अशनिः परः नु सा असेधंती वि नश्यतु॥१८॥ यत् अद्य सूर्ये उत्ऽयति प्रियंऽक्षचाः ऋतं दध यत् निऽमुचि प्रऽबुधि विश्वेऽवेदसः यत् वा मध्यंदिने दिवः॥१९॥ यत् वा अभिऽपित्वे असुराः ऋतं यते छर्दिः येम वि दाशुषे वयं तत् वः वसवः विश्वेऽवेदसः उप स्येयाम मध्ये आ॥२०॥ यत् अद्य सूरे उत्ऽइते यत् मध्यंदिने आऽतुचिं वामं धत्थ मनवे विश्वेऽवेदसः जुह्वानाय प्रऽचेतसे॥२१॥ वयं तत् वः संऽराजः आ वृणीमहे पुचः न वहुऽपाय्यं अश्याम तत् आदित्याः जुहुतः हविः येन वस्यः अनशामहै॥२२॥३४॥

॥२८॥ ये चिंशतिं चयः परः देवासः वर्हिः आ असदन् विदन् अहं द्विता असनन्॥१॥ वरुणः मित्रः अर्यमा स्मद्रातिऽसाचः अग्नयः पत्नीऽवंतः वषट्ऽकृताः॥२॥ ते नः गोपाः अपाच्याः ते उदक्ते इत्या न्यक् पुरस्तात् सर्वया विशा॥३॥ यथा वशंति देवाः

स्तयेदसत्तदेषां नकिरा मिनत्। अरावा चन मर्त्यः ॥४॥ सप्तानां सप्त ऋष्टयः सप्त द्युम्नान्येषां। सप्तो अधि श्रियो धिरे ॥५॥३५॥

॥ २९ ॥ १–१० मनुर्वैवस्वतः कश्यपो वा मारीचः ॥ विश्वे देवाः ॥ द्विपदा ॥

॥२९॥ बभ्रुरेको विषुणः सूनरो युवांज्येक्क हिरण्ययं ॥१॥ योनिमेक आ ससाद् द्योतनोऽन्तर्देवेषु मेधिरः ॥२॥ वाशीमेको बिभर्ति हस्त आयसीमन्तर्देवेषु निध्रुविः ॥३॥ वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते ॥४॥ तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः ॥५॥ पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनां ॥६॥ त्रीण्येक उरुगायो वि चक्रमे यत्र देवासो मदन्ति ॥७॥ विभिद्वा चरत एकया सह प्रप्रवासेव वसतः ॥८॥ सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती ॥९॥ अर्चत एके महि साम मन्वत तेन सूर्यमरोचयन् ॥१०॥३६॥

॥ ३० ॥ १–४ मनुर्वैवस्वतः ॥ विश्वे देवाः ॥ १ गायत्री । २ पुरउष्णिक् । ३ बृहती । ४ अनुष्टुप् ॥

॥३०॥ नहि वो अस्त्यर्भको देवासो न कुमारकः। विश्वे सतोमहान इत् ॥१॥ इति स्तुतासो असथा रिशादसो ये स्थ चयस्थ चिंशच्च। मनोर्देवा यज्ञियासः ॥२॥ ते नस्ताध्वं तेऽवत न उ नो अधि वोचत। मा नः पथः पित्र्यान्मानवादधि दूरं नैष्ट परावतः ॥३॥ ये देवास इह स्थन विश्वे वैश्वानरा उत। अस्मभ्यं शर्म सप्रथो गवेऽश्वाय यच्छत ॥४॥३७॥४॥

॥ ३१ ॥ १–१८ मनुर्वैवस्वतः ॥ १–४ ईन्द्राग्नयो यजमानप्रशंसा च। ५–९ दंपती। १०–१८ दंपत्योरशिषः ॥ १–८. ११–१३ गायत्री। ९. १४ अनुष्टुप्। १० पादनिचृत्। १५–१८ पंक्तिः ॥

॥३१॥ यो यजाति यजात इत्सुनवच्च पचाति च। ब्रह्मे-

तथा इत् असत् तत् एषां नकिः आ मिनत् अरावा चन मर्त्यः ॥४॥ सप्तानां सप्त ऋष्टयः सप्त द्युम्नानि एषां सप्तो अधि श्रियः धिरे ॥५॥३५॥

॥२९॥ वभ्रुः एकः विषुणः सूनरः युवा अंजि अंक्ते हिरण्ययं ॥१॥ योनिं एकः आ ससाद द्योतनः अंतः देवेषु मेधिरः ॥२॥ वाशीं एकः बिभर्ति हस्ते आयसीं अंतः देवेषु निऽधुविः ॥३॥ वज्रं एकः बिभर्ति हस्ते आऽहितं तेन वृत्राणि जिघ्नते ॥४॥ तिग्मं एकः बिभर्ति हस्ते आयुधं शुचिः उग्रः जलाषऽभेषजः ॥५॥ पथः एकः पीपाय तस्करः यथा एषः वेद निऽधीनां ॥६॥ चीणिं एकः उरुऽगायः वि चक्रमे यत्र देवासः मदंति ॥७॥ विऽभिः द्वा चरतः एकया सह प्र प्रवासाऽइव वसतः ॥८॥ सदः द्वा चक्राते उपऽमा दिवि संऽराजा सर्पिःऽआसुती० ॥९॥ अचेतः एकं महिं सामं मन्वत तेन सूर्यं अरोचयन् ॥१०॥३६॥

॥३०॥ नहि वः अस्ति अर्भकः देवासः न कुमारकः विश्वे सतःऽमहांतः इत् ॥१॥ इति स्तुतासः असथ रिशादसः ये स्थ चर्यः च चिंशत् च मनोः देवाः यज्ञियासः ॥२॥ ते नः चाध्वं ते अवत ते ऊं नः अधि वोचत मा नः पथः पित्र्यात् मानवात् अधि दूरं नैष्ट पराऽवतः ॥३॥ ये देवासः इह स्थन विश्वे वैश्वानराः उत अस्मभ्यं शर्म सऽप्रथः गवे अश्वाय यच्छत ॥४॥३७॥४॥

॥३१॥ यः यजाति यजाते इत् सुनवत् च पचाति च ब्रह्मा इत्

दिंद्रस्य चाकनत्॥१॥ पुरोळाशं यो अंस्मै सोमं रर्त आशिरं। पादिन्नं शक्रो अंहसः ॥२॥ तस्य द्युमाँ असद्रथो देवजूतः स शूंशुवत्। विश्वा वन्वन्नमित्रिया॥३॥ अस्य प्रजावंती गृहेऽसश्चंती दिवेदिवे। इळा धेनुमतीं दुहे ॥४॥ या दंपती समनसा सुनुत आ च धावतः। देवासो नित्ययाशिरा ॥५॥३८॥ प्रति प्राशुयाँ इतः सम्यंचा बर्हिरीशाते। न ता वाजेषु वायतः॥६॥ न देवानामपि हुतः सुमतिं न जुगुक्षतः। श्रवो बृहद्दिवासतः ॥७॥ पुचिणा ता कुमारिणा विश्वमायुर्व्यश्नुतः। उभा हिरण्यपेशसा ॥८॥ वीतिहोत्रा कृतद्वसू दशस्यंता मृताय कं। समूधो रोमशं हतो देवेषु कृणुतो दुवः ॥९॥ आ शर्म पर्वतानां वृणीमहे नदीनां। आ विष्णोः सचाभुवः॥१०॥३९॥ ऐतु पूषा रयिर्भगः स्वस्ति संवधातमः। उरुरध्वा स्वस्तये॥११॥ अरमंतिरनर्वणो विश्वो देवस्य मनसा। आदित्यानामनेहसः॥१२॥ यथा नो मित्रो अर्यमा वरुणः संति गोपाः। सुगा ऋतस्य पंथाः॥१३॥ अग्निं वः पूर्व्यं गिरा देवमीळे वसूनां। सपर्यंतः पुरुप्रियं मित्रं न क्षेत्रसाधसं॥१४॥ मक्षू देववंतो रथः शूरो वा पृत्सु कासु चित्। देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत्॥१५॥ न यजमान रिष्यसि न सुन्वान न देवयो। देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत्॥१६॥ नकिष्टं कर्मणा नशन्न प्र योषन्न योषति। देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत्॥१७॥ असदत्रं सुवीर्यमुत त्यदाश्वश्व्यं। देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत्॥१८॥४०॥२॥

इंद्रस्य चाकनत् ॥१॥ पुरोळाशं यः अस्मै सोमं ररते आऽशिरं पात इत् तं शुक्रः अंहसः ॥२॥ तस्य द्युऽमान् असत् रथः देवऽजूतः सः शूशुवत् विश्वा वन्वन् अमिचिया ॥३॥ अस्य प्रजाऽवंती गृहे असश्चंती दिवेऽदिवे इळा धेनुऽमती दुहे ॥४॥ या दंऽपंती० सऽमनसा सुनुतः आ च धावतः देवासः नित्यया आऽशिरा ॥५॥३८॥ प्रति प्राशुष्यान् इतः सम्यंचा वहिः आशाते न ता वाजेषु वायतः ॥६॥ न देवानां अपि हुतः सुऽमतिं न जुघुक्षतः अश्वः वृहत् विवासतः ॥७॥ पुचिणा ता कुमारिणा विश्वं आयुः वि अश्नुतः उभा हिरण्यऽपेशसा ॥८॥ वीतिऽहोत्रा कृतन्ऽवसू० दशस्यंता अमृताय कं सं ऊधः रोमशं हतः देवेषु कृणुतः दुवः ॥९॥ आ शर्मं पर्वतानां वृणीमहे नदीनां आ विष्णोः सचाऽभुवः ॥१०॥३९॥ आ एतु पूषा रयिः भगः स्वस्ति सर्वेऽधातमः उरुः अध्वा स्वस्तये ॥११॥ अरमतिः अनर्वणः विश्वः देवस्य मनसा आदित्यानां अनेहः इत् ॥१२॥ यथा नः मित्रः अर्यमा वरुणः संति गोपाः सुऽगाः ऋतस्य पंथाः ॥१३॥ अग्निं वः पूर्व्यं गिरा देवं ईळे वसूनां सपर्यंतः पुरुऽप्रियं मित्रं न क्षेत्रऽसाधसं ॥१४॥ मक्षु देवऽवंतः रथः शूरः वा पृतऽसु कासु चित् देवानां यः इत् मनः यजमानः इयक्षति अभि इत् अर्यज्वनः भुवत् ॥१५॥ न यजमानं रिष्यसि न सुन्वानं न देवऽयो० देवानां यः इत् मनः यजमानः इयक्षति अभि इत् अर्यज्वनः भुवत् ॥१६॥ नकिः तं कर्मणा नशत् न प्र योषत् न योषति देवानां यः इत् मनः यजमानः इयक्षति अभि इत् अर्यज्वनः भुवत् ॥१७॥ असत् अत्र सुऽवीर्यं उत त्यत् आशुऽअश्वं देवानां यः इत् मनः यजमानः इयक्षति अभि इत् अर्यज्वनः भुवत् ॥१८॥४०॥२॥

॥ ३२ ॥ १–३० मेधातिथिः काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥३२॥ प्र कृतान्यृजीषिणः कण्वा इंद्रस्य गायया। मदे सोमस्य वोचत ॥१॥ यः सृविंदमनर्शनिं पिप्रुं दासमहीशुवं। वधीदुग्रो रिणन्नपः ॥२॥ न्यर्बुदस्य विष्टपं वर्ष्माणं बृहतस्तिर। कृषे तदिंद्र पौंस्यं ॥३॥ प्रतिं श्रुतायं वो धृषत्तूर्णाशं न गिरिरधिं। हुवे सुंशिप्रमूतयें ॥४॥ स गोरश्वस्य वि व्रजं मदानः सोम्येभ्यः। पुरं न शूर दर्षसि ॥५॥१॥ यदिं मे रारणः सुत उक्थे वा दधसे चनः। आरादुपं स्वधा गंहि ॥६॥ वयं घा ते अपिं ष्मसि स्तोतारं इंद्र गिर्वणः। त्वं नो जिन्व सोमपाः ॥७॥ उत नः पितुमा भर संरराणो अविंक्षितं। मघवन्भूरि ते वसु ॥८॥ उत नो गोमतस्कृधि हिरण्यवतो अश्विनः। इळाभिः सं रभेमहि ॥९॥ बृवदुक्थं हवामहे सृप्रकरस्नमूतयें। साधुं कृण्वंतमवसे ॥१०॥२॥ यः संस्थे चिच्छतक्रतुरादीं कृणोतिं वृत्रहा। जरितृभ्यः पुरूवसुः ॥११॥ स नः शक्रश्चिदा शकदानवाँ अंतराभरः। इंद्रो विश्वाभिरूतिभिः ॥१२॥ यो रायो ३ वनिर्महान्त्सुपारः सुन्वतः सखा। तमिंद्रमभि गायत ॥१३॥ आयंतारं महिं स्थिरं पृतनासु श्रवोजितं। भूरेरीशानमोजसा ॥१४॥ नकिरस्य शचीनां नियंता सूनृतानां। नकिर्वक्ता न दादितिं ॥१५॥३॥ न नूनं ब्रह्मणामृणं प्राप्नूनामस्ति सुन्वतां। न सोमो अप्रता पपे ॥१६॥ पन्य इदुपं गायत पन्य उक्थानिं शंसत। ब्रह्मा कृणोत पन्य उत् ॥१७॥ पन्य आ ददिरच्छता सहस्रा वाज्यवृतः। इंद्रो यो यज्वनो वृधः ॥१८॥ वि षू चर स्वधा अनु कृष्टीनामन्वाहुवः। इंद्र पिबं सुतानां ॥१९॥ पिब स्वधैनवानामुत यस्तुग्र्ये सचा। उतायमिंद्र यस्तवं ॥२०॥४॥ अतीहि मन्युषाविणं सुषुवांसमुपारणे। इमं रातं सुतं पिब ॥२१॥ इहि

॥३२॥ प्र कृतानि ब्रह्मणस्पतिः कर्मा इंद्रस्य गार्ग्यया मदे सोमस्य वोचत ॥१॥ यः सप्तरश्मिर्वृषभस्तुविष्मान्त्रवीत्सेनो अतिरद्दासं अहीशुवं वधीत् उग्रः रिणन् अपः ॥२॥ नि अर्बुदस्य विष्टपं वर्ष्माणं बृहतः तिर कृपे तत् इंद्र पौंस्यं ॥३॥ प्रति श्रुतायं वः धृषत् तूर्णीशं न गिरेः अधि हुवे सुऽशिप्रं ऊतये ॥४॥ सः गोः अश्वस्य वि व्रजं मंदानः सोम्येभ्यः पुरं न शूर दर्षसि ॥५॥१॥ यदि मे रारणः सुते उक्थे वा दधसे चनः शारात् उप स्वधा आ गहि ॥६॥ वयं घ ते अपि स्मसि स्तोतारः इंद्र गिर्वणः त्वं नः जिन्व सोमऽपाः ॥७॥ उत नः पितुं आ भर संऽरराणः अविंऽद्धिनं मघंऽवन् भूरि ते वसु ॥८॥ उत नः गोऽमंतः कृधि हिरण्यऽवतः अश्विनः इळाभिः सं रभेमहि ॥९॥ वृषन्ऽउक्थं हवामहे सुप्रऽकेरस्य ऊतये साधु कृणंतं अवसे ॥१०॥२॥ यः संऽस्थे चित् शतऽक्रतुः आत् ईं कृणोति वृत्रऽहा जरितृऽभ्यः पुरुऽवसुः ॥११॥ सः नः शक्रः चित् आ शकत् दानंऽवान् अंतरऽआभरः इंद्रः विश्वाभिः ऊतिऽभिः ॥१२॥ यः रायः अवनिः महान् सुऽपारः सुन्वतः सखा तं इंद्रं अभि गायत ॥१३॥ आऽयंतारं महिं स्थिरं पृतनासु श्रवःऽजितं भूरेः ईशानं ओजसा ॥१४॥ नकिः अस्य शचीनां निऽयंता सूनृतानां नकिः वक्ता न दात् इति ॥१५॥३॥ न नून ब्रह्मणां ऋणं प्राणूनां अस्ति सुन्वतां न सोमः अप्रता पपे ॥१६॥ पन्यं इत् उप गायत पन्यं उक्थानि शंसत ब्रह्म कृणोत पन्यं इत् ॥१७॥ पन्यः आ दर्दिरत् शता सहस्रा वाजी अवृतः इंद्रः यः यज्वनः वृधः ॥१८॥ वि सु चर स्वधाः अनु कृष्टीनां अनु आऽहुवः इंद्र पिब सुतानां ॥१९॥ पिब स्वऽधेनवानां उत यः तुग्र्ये सचा उत श्रयं इंद्र यः तव ॥२०॥४॥ अति ह्रुहि मन्युऽसाविनं सुषुऽवांसं उप ऽअरण्ये इमं रातं सुतं पिब ॥२१॥ ह्रुहि

तिस्रः परावत इहि पञ्च जनाँ अति। धेना इंद्रावचाकशत्॥२२॥ सूर्यो रश्मिं यथा सृजा त्वा यच्छंतु मे गिरः। निम्नमापो न सध्र्यक्॥२३॥ अध्वर्यवा तु हि षिंच सोमं वीराय शिप्रिणे। भरा सुतस्य पीतये॥२४॥ य उग्रः फलिगं भिनन्त्य१क्सिंधूँरवासृजत्। यो गोषु पक्वं धारयत्॥२५॥५॥ अहंन्वृचमृचीषम और्णवाभमहीशुवं। हिमेनाविध्यदर्बुदं॥२६॥ प्र वं उग्राय निष्टुरेऽपाळ्हाय प्रसक्षिणे। देवत्तं ब्रह्म गायत॥२७॥ यो विश्वान्यभि व्रता सोमस्य मदे अंधसः। इंद्रो देवेषु चेतति॥२८॥ डुह त्या संधमाद्या हरी हिरण्यकेश्या। वोळ्हामभि प्रयो हितं॥२९॥ अवोचं त्वा पुरुष्टुत प्रियमेधस्तुता हरी। सोमपेयाय वक्षतः॥३०॥६॥

॥ ३३ ॥ १–१९ मेध्यातिथिः काण्वः ॥ इंद्रः ॥ १–१५ बृहती। १६–१८ गायत्री। १९ अनुष्टुप्॥

॥३३॥ वयं घ त्वा सुतावंत आपो न वृक्तबर्हिषः। पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते॥१॥ स्वरंति त्वा सुते नरो वसो निरेक उक्थिनः। कदा सुतं तृषाण ओक आ गम इंद्र स्वब्दीव वंसगः॥२॥ कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि सहस्रिणं। पिशंगरूपं मघवन्विचर्षणे मक्षू गोमंतमीमहे॥३॥ पाहि गायांधसो मद इंद्राय मेध्यातिथे। यः संमिश्लो हरिभिर्यः सुते सचा वज्री रथी हिरण्ययः॥४॥ यः सुपव्यः सुदक्षिण इनो यः सुक्रतुर्गृणे। य आकरः सहसा यः शतामघ इंद्रो यः पूर्भिदारितः॥५॥७॥ यो धृषितो योऽवृतो यो अस्ति श्मश्नुषु श्रितः। विभूतद्युम्न ऋष्ववनः पुरुष्टुतः क्रत्वा गौरिव शाकिनः॥६॥ क ईं वेद सुते सचा पिबंतं कद्वयो दधे। अयं यः पुरो विभिनत्त्योजसा मंदानः शिप्र्यंधसः॥७॥

तिस्रः परावतः इहि पंच जनान् अति येनाः इंद्र अवाचाकशन् ॥२२॥ सूर्यैः रश्मिं यथा सृज आ त्वा यच्छंतु मे गिरः निम्नं आपः न सध्र्यक् ॥२३॥ अध्वर्यो आ तु हि सिंच सोमं वीराय शिप्रिणे भरं सुतस्य पीतये ॥२४॥ यः उन्नः फलिगं भिनत् न्यक् सिंधून् अवासृजत् यः गोषु पक्वं धारयत् ॥२५॥५॥ अहन् वृचं ऋचीषमः और्णवाभं अहीशुवं हिमेन अविध्यत् अर्बुदं ॥२६॥ प्रवः उग्राय निःतुरे अपाळ्हाय प्रसक्षिणे देवत्तं ब्रह्म गायत ॥२७॥ यः विश्वानि अभि व्रता सोमस्य मदे अंधसः इंद्रः देवेषु चेतति ॥२८॥ इह त्या सधमाद्या हरी हिरण्यकेश्या वोळ्हां अभि प्रयः हितं ॥२९॥ अर्वाचं त्वा पुरुस्तुत प्रियमेधस्तुता हरी सोमपेयाय वक्षतः ॥३०॥६॥

॥३३॥ वयं घ त्वा सुतावंतः आपः न वृक्तबर्हिषः पवित्रस्य प्रसवेषु वृत्रहन् परि स्तोतारः आसते ॥१॥ स्वरंति त्वा सुते नरः वसो निरेके उक्थिनः कदा सुतं तृषाणः ओकः आ गमः इंद्र स्वब्दीवइव वंसगः ॥२॥ कण्वेभिः धृष्णो आ धृषत् वाजं दर्षि सहस्रिणं पिशंगरूपं मघवन् विचर्षणे मक्षु गोमंतं ईमहे ॥३॥ पाहि गाय अंधसः मदे इंद्राय मेध्यातिथे यः संमिश्लः हर्योः यः सुते सचा वज्री रथीः हिरण्ययः ॥४॥ यः सुसव्यः सुदक्षिणः दृनः यः सुक्रतुः गृणे यः आकरः सहस्रा यः शतमघः इंद्रः यः पूर्भित् आरितः ॥५॥७॥ यः धृषितः यः ऋतायुः यः अस्ति रमध्युषु स्थितः विभूतद्युम्नः च्यवनः पुरुस्तुतः ऋत्वा गीरिव शाकिनः ॥६॥ कः ईं वेद सुते सचा पिबंतं कत् वयः दधे अयं यः पुरः विभिनत्ति ओजसा मंदानः शिप्री अंधसः ॥७॥

दाना मृगो न वारणः पुरुत्रा चरथं दधे। नकिष्ट्वा नि यमदा सुते गमो महांश्चरस्योजसा ॥ ८ ॥ य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः। यदिं स्तोतुर्मघवा शृणवद्धवं नेंद्रो योषत्या गमत् ॥ ९ ॥ सत्यमित्था वृषेदसि वृषजूतिर्नोऽवृतः। वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥ १० ॥ ८ ॥ वृषणस्ते अभीशवो वृषा कशा हिरण्ययी। वृषा रथो मघवन्वृषणा हरी वृषा त्वं शतक्रतो ॥ ११ ॥ वृषा सोता सुनीतु ते वृषन्वृजीपिन्ना भर। वृषा दधन्वे वृषणं नदीष्वा तुभ्यं स्थातर्हरीणां ॥ १२ ॥ एंद्र याहि पीतये मधु शविष्ठ सोम्यं। नायमच्छा मघवां शृणवन्निरो ब्रह्मोक्था चं सुक्रतुः ॥ १३ ॥ वहंतु त्वा रथेष्ठामा हरयो रघुयुजः। निरधिद्यं सर्वनानि वृत्रहन्नन्येषां या शतक्रतो ॥ १४ ॥ अस्माकमद्यांतमं स्तोमं धिष्व महामह। अस्माकं ते सवना संतु शंतमा मदाय द्युक्ष सोमपाः ॥ १५ ॥ ९ ॥ नहि पत्नव नो मम शास्त्रे अन्यस्य रण्यति। यो अस्मान्वीर आनयत् ॥ १६ ॥ इंद्रश्चिद्धा तदब्रवीत्स्त्रिया अशास्यं मनः। उतो अह क्रतुं रघुं ॥ १७ ॥ सप्तीं चिद्धा मदच्युता मिथुना वहतो रथं। एवेद्वृष्ण उत्तरा ॥ १८ ॥ अधः पश्यस्व मोपरि संतरां पादकौ हर। मा ते कशप्लकौ दृशन्स्त्री हि ब्रह्मा बभूविथ ॥ १९ ॥ १० ॥

॥ ३४ ॥ १–१५ नीपातिथिः काण्वः। १६–१८ बहवं यमुरोचिषोऽंगिरसः ॥ इंद्रः ॥ १–१५ बनुष्टुप्। १६–१८ गायत्री ॥

॥ ३४ ॥ एंद्र याहि हरिभिरुप कण्वस्य सुष्टुतिं। दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १ ॥ आ त्वा यावा चदन्निह सोमी घोषेण यच्छतु। दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ २ ॥ अचा वि नेमिरेषामुरं न धूनुते वृकः। दिवो अ-

दाना मृगःन वारणः पुरुऽत्रा चरथं दधे नकिःत्वा नि यमत् आ सुते गमः महान् चरसि ओजसा॥८॥ यः उग्रः सन् अनिऽस्तृतः स्थिरः रणाय संस्कृतः यदि स्तोतुः मघऽवा शृणवत् हवं न इंद्रः योषति आ गमत्॥९॥ सत्यं इत्था वृषा इत् असि वृषऽजूतिः नः अवृतः वृषा हि उग्र शृण्विषे पराऽवति वृषो अर्वाऽवति श्रुतः ॥१०॥८॥ वृषणः ते अभीर्शवः वृषा कशा हिरण्ययी वृषा रथः मघऽवन् वृषणा हरी वृषा त्वं शतऽक्रतो॰॥११॥ वृषा सोतां सुनोतु ते वृषन् ऋजीषिन् आ भर वृषा दधन्वे वृषणं नदीषु आ तुभ्यं स्यातः हरीणां॥१२॥ आ इंद्र याहि पीतये मधु शविष्ठ सोम्यं न अयं अछ मघऽवा शृणवत् गिरः ब्रह्म उक्था च सुऽक्रतुः ॥१३॥ वहंतु त्वा रथेऽस्यां आ हरयः रथऽयुजः तिरः चित् अर्यं सवनानि वृचऽहन् अन्येषां या शतऽक्रतो॰॥१४॥ अस्माकं अद्य अंतमं स्तोमं धिष्व महाऽमह अस्माकं ते सवना संतु शंऽतमा मदाय द्युक्ष सोमऽपाः॥१५॥९॥ नहि सः तव नो मम शास्त्रे अन्यस्य रणयति यः अस्मान् वीरः आ अनयत्॥१६॥ इंद्रः चित् घ तत् अब्रवीत् स्त्रियाः अशास्यं मनः उतो अह क्रतुं रघुं॥१७॥ सप्तीं चित् घ मदऽच्युतं मिथुना वहतः रथं एव इत् धूः वृष्णः उत्ऽतरा॥१८॥ अधः पश्यस्व मा उपरि संऽतरां पादकौ हर मा ते कशऽप्लकौ दृशन् स्त्री हि ब्रह्मा बभूविथ॥१९॥१०॥

॥३४॥ आ इंद्र याहि हरिऽभिः उप कण्वस्य सुऽस्तुतिं दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो॰॥१॥ आ त्वा यावा वदन् इह सोमी घोषेण यच्छतु दिवः अमुष्य शासंतः दिवं यय दिवाऽवसो॰॥२॥ अवं वि नेमिः एषां उरां न धूनुते वृकः दिवः अ-

सुष्ण शासंतो दिवं यय दिवावसो ॥३॥ आ त्वा कण्वा इहावसे हवंते वाजसातये। दिवो अमुष्ण शासंतो दिवं यय दिवावसो ॥४॥ दधामि ते सुतानां वृष्णे न पूर्वपाय्यं। दिवो अमुष्ण शासंतो दिवं यय दिवावसो ॥५॥११॥ स्मत्पुरंधिर्न आ गंहि विश्वतोधीर्न ऊतये। दिवो अमुष्ण शासंतो दिवं यय दिवावसो ॥६॥ आ नो याहि महेमते सहस्रोते शतामघ। दिवो अमुष्ण शासंतो दिवं यय दिवावसो ॥७॥ आ त्वा होता मनुर्हितो देवचा यक्षदीड्यः। दिवो अमुष्ण शासंतो दिवं यय दिवावसो ॥८॥ आ त्वा मदच्युता हरी श्येनं पक्षेव वक्षतः। दिवो अमुष्ण शासंतो दिवं यय दिवावसो ॥९॥ आ याह्यर्य आ परि स्वाहा सोमस्य पीतये। दिवो अमुष्ण शासंतो दिवं यय दिवावसो ॥१०॥१२॥ आ नो याह्युपश्रुत्युक्थेषु रण्यया इह। दिवो अमुष्ण शासंतो दिवं यय दिवावसो ॥११॥ सरूपैरा सु नो गहि संभृतिः संभृताश्वः। दिवो अमुष्ण शासंतो दिवं यय दिवावसो ॥१२॥ आ याहि पर्वतेभ्यः समुद्रस्याधि विष्टपः। दिवो अमुष्ण शासंतो दिवं यय दिवावसो ॥१३॥ आ नो गव्यान्यश्व्या सहस्रा शूर दर्दहि। दिवो अमुष्ण शासंतो दिवं यय दिवावसो ॥१४॥ आ नः सहस्रणी भरायुतानि शतानि च। दिवो अमुष्ण शासंतो दिवं यय दिवावसो ॥१५॥ आ यदिंद्रष्ण दर्दहे सहस्रं वसुरोचिषः। ओजिंष्ठमश्व्यं पशुं ॥१६॥ य ऋज्रा वातंरंहसोऽरुषासो रघुष्यदः। भ्राजंते सूर्यो इव ॥१७॥ पारावतस्य रातिषु द्रवच्चक्रेषु पाणुषु। तिष्ठं वनस्य मध्य आ ॥१८॥१३॥

मुष्यं शासंतः दिवं यय दिवाऽवसो० ॥३॥ आ त्वा कण्वाः इह अर्वसे हवंते वाजंऽसातये दिवः अमुष्यं शासंतः दिवं यय दिवाऽवसो० ॥४॥ दधामि ते सुतानां वृष्णे न पूर्वऽपाय्यं दिवः अमुष्यं शासंतः दिवं यय दिवाऽवसो० ॥५॥११॥ सनत्ऽमुरधिः नः आ गहि विश्वतःऽधीः नः ऊतये दिवः अमुष्यं शासंतः दिवं यय दिवाऽवसो० ॥६॥ आ नः याहि महेऽमते सहस्रऽऊते शतंऽमघ दिवः अमुष्यं शासंतः दिवं यय दिवाऽवसो० ॥७॥ आ त्वा होता मनुःऽहितः देवऽचा वक्षत् ईड्यः दिवः अमुष्यं शासंतः दिवं यय दिवाऽवसो० ॥८॥ आ त्वा मदऽच्युता हरी श्येनं पक्षाऽइव वक्षतः दिवः अमुष्यं शासंतः दिवं यय दिवाऽवसो० ॥९॥ आ याहि अर्यः आ परि स्वाहा सोमस्य पीतये दिवः अमुष्यं शासंतः दिवं यय दिवाऽवसो० ॥१०॥१२॥ आ नः याहि उपऽश्रुति उक्थेषु रण्य इह दिवः अमुष्यं शासंतः दिवं यय दिवाऽवसो० ॥११॥ सऽरूपैः आ सु नः गहि संऽभृतैः संभृतऽअश्वः दिवः अमुष्यं शासंतः दिवं यय दिवाऽवसो० ॥१२॥ आ याहि पर्वतेभ्यः समुद्रस्य अधि विष्टपः दिवः अमुष्यं शासंतः दिवं यय दिवाऽवसो० ॥१३॥ आ नः गव्यानि अश्व्या सहस्रा शूर दर्दृहि दिवः अमुष्यं शासंतः दिवं यय दिवाऽवसो० ॥१४॥ आ नः सहस्रऽशः भर अयुतानि शतानि च दिवः अमुष्यं शासंतः दिवं यय दिवाऽवसो० ॥१५॥ आ यत् इंद्रः च दद्महे सहस्रं वसुंऽरोचिषः ओजिष्ठं अश्व्यं पशुं ॥१६॥ ये ऋजाः वातंऽरंहसः अरुषासः रघुऽस्यदः भाजंते सूर्यःऽइव ॥१७॥ पारावतस्य रातिषु द्रवत्ऽचक्रेषु आशुषु तिष्ठं वनस्य मध्ये आ ॥१८॥१३॥

॥ ३५ ॥ १–२४ श्यावाश्वः ॥ अश्विनौ ॥ १–२१ उपरिष्टाज्ज्योतिः । २२.२४ पङ्क्तिः । २३ महाबृहती ॥

॥३५॥ अग्निनेंद्रेण वरुणेन विष्णुनादित्यै रुद्रैर्वसुभिः सचाभुवा। सजोषसा उषसा सूर्येण च सोमं पिवतमश्विना ॥१॥ विश्वाभिर्धीभिर्भुवनेन वाजिना दिवा पृथिव्याद्रिभिः सचाभुवा। सजोषसा उषसा सूर्येण च सोमं पिवतमश्विना ॥२॥ विश्वेदेवेभिरेकादशेरिहाङ्गिर्भिरुक्षभिर्भृगुभिः सचाभुवा। सजोषसा उषसा सूर्येण च सोमं पिवतमश्विना ॥३॥ जुषेथां यज्ञं बोधतं हवस्य मे विश्वेह देवौ सवनावं गच्छतं। सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥४॥ स्तोमं जुषेथां युवशेव कन्यनां विश्वेह देवौ सवनावं गच्छतं। सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥५॥ गिरो जुषेथामध्वरं जुषेथां विश्वेह देवौ सवनावं गच्छतं। सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥६॥१४॥ हारिद्रवेव पतथो वनेदुप सोमं सुतं महिपेवावं गच्छथः। सजोषसा उषसा सूर्येण च चिर्वर्तिर्यातमश्विना ॥७॥ हंसाविव पतथो अध्वगाविव सोमं सुतं महिपेवावं गच्छथः। सजोषसा उषसा सूर्येण च चिर्वर्तिर्यातमश्विना ॥८॥ श्येनाविव पतथो हव्यदातये सोमं सुतं महिपेवावं गच्छथः। सजोषसा उषसा सूर्येण च चिर्वर्तिर्यातमश्विना ॥९॥ पिबतं च गृणुतं चा च गच्छतं प्रजां च धत्तं द्रविणं च धत्तं। सजोषसा उषसा सूर्येण चोजो नो धत्तमश्विना ॥१०॥ जयतं च प्र स्तुतं च प्र चावतं प्रजां च धत्तं द्रविणं च धत्तं। सजोषसा उषसा सूर्येण चोजो नो धत्तमश्विना ॥११॥ हतं च शत्रून्यतं च मित्रिणः प्रजां च धत्तं द्रविणं च धत्तं। सजोषसा उषसा सूर्येण चोजो नो धत्तमश्विना ॥१२॥१५॥

॥३५॥ अग्निना इंद्रेण वरुणेन विष्णुना आदित्यैः रुद्रैः वसुंऽभिः सचाऽभुवा सऽजोषसौ उषसा सूर्येण च सोमं पिबतं अश्विना ॥१॥ विश्वाभिः धीभिः भुवनेन वाजिना दिवा पृथिव्या अद्रिंऽभिः सचाऽभुवा सऽजोषसौ उषसा सूर्येण च सोमं पिबतं अश्विना ॥२॥ विश्वैः देवैः चिऽभिः एकादशैः इह अत्ऽभिः मरुत्ऽभिः भृगुंऽभिः सचाऽभुवा सऽजोषसौ उषसा सूर्येण च सोमं पिबतं अश्विना ॥३॥ जुषेथां यज्ञं बोधतं हवस्य मे विश्वा इह देवौ सवना अवं गच्छतं सऽजोषसौ उषसा सूर्येण च आ इषं नः वोळ्हं अश्विना ॥४॥ स्तोमं जुषेथां युवशाऽइव कन्यनां विश्वा इह देवौ सवना अवं गच्छतं सऽजोषसौ उषसा सूर्येण च आ इषं नः वोळ्हं अश्विना ॥५॥ गिरः जुषेथां अध्वरं जुषेथां विश्वा इह देवौ सवना अवं गच्छतं सऽजोषसौ उषसा सूर्येण च आ इषं नः वोळ्हं अश्विना ॥६॥१४॥ हारिद्रवाऽइव पतथः वना इत् उप सोमं सुतं महिषाऽइव अवं गच्छथः सऽजोषसौ उषसा सूर्येण च चिः वर्तिः यातं अश्विना ॥७॥ हंसौऽइव पतथः अध्वगौऽइव सोमं सुतं महिषाऽइव अवं गच्छथः सऽजोषसौ उषसा सूर्येण च चिः वर्तिः यातं अश्विना ॥८॥ श्येनौऽइव पतथः हव्यऽदातये सोमं सुतं महिषाऽइव अवं गच्छथः सऽजोषसौ उषसा सूर्येण च चिः वर्तिः यातं अश्विना ॥९॥ पिबतं च तृष्णुतं च आ च गच्छतं प्रऽजां च धत्तं द्रविणं च धत्तं सऽजोषसौ उषसा सूर्येण च ऊर्जं नः धत्तं अश्विना ॥१०॥ जयतं च प्र स्तुतं च प्र च श्रवतं प्रऽजां च धत्तं द्रविणं च धत्तं सऽजोषसौ उषसा सूर्येण च ऊर्जं नः धत्तं अश्विना ॥११॥ हतं च शत्रून् यतंतं च मित्रिणः प्रऽजां च धत्तं द्रविणं च धत्तं सऽजोषसौ उषसा सूर्येण च ऊर्जं नः धत्तं अश्विना ॥१२॥१५॥

मित्रावरुणवंता उत धर्मवंता मरुत्वंता जरितुर्गच्छथो हवं। सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥१३॥ अंगिरस्वंता उत विष्णुवंता मरुत्वंता जरितुर्गच्छथो हवं। सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥१४॥ ऋभुमंता वृषणा वाजवंता मरुत्वंता जरितुर्गच्छथो हवं। सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥१५॥ ब्रह्म जिन्वतमुत जिन्वतं धियो हतं रक्षांसि सेधतममीवाः। सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१६॥ क्षत्रं जिन्वतमुत जिन्वतं नृन्हतं रक्षांसि सेधतममीवाः। सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१७॥ धेनूर्जिन्वतमुत जिन्वतं विशो हतं रक्षांसि सेधतममीवाः। सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥१८॥१६॥ अर्चेरिव शृणुतं पूर्व्यस्तुतिं श्यावाश्वस्य सुन्वतो मदच्युता। सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यं ॥१९॥ सर्गा इव सृजतं सुष्टुतीरुप श्यावाश्वस्य सुन्वतो मदच्युता। सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यं ॥२०॥ रथमीरिव यच्छतमध्वरां उप श्यावाश्वस्य सुन्वतो मदच्युता। सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यं ॥२१॥ अर्वायथं नि यच्छतं पिबतं सोम्यं मधु। आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२२॥ नमोवाके प्रस्थिते अध्वरे नरा विवक्षणस्य पीतये। आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२३॥ स्वाहाकृतस्य तृंपतं सुतस्य देवावंधसः। आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥२४॥१७॥

मित्रावरुणऽवंतो उत धर्मेऽवंता मरुत्वँता जरितुः गच्छथः हवं सऽजोषसौ उषसा सूर्येण च आदित्यैः यातं अश्विना॥१३॥ अंगिरस्वंतो उत विष्णुऽवंता मरुत्वँता जरितुः गच्छथः हवं सऽजोषसौ उषसा सूर्येण च आदित्यैः यातं अश्विना॥१४॥ भृभुऽमंता वृषणा वाजेऽवंता मरुत्वँता जरितुः गच्छथः हवं सऽजोषसौ उषसा सूर्येण च आदित्यैः यातं अश्विना॥१५॥ ब्रह्म जिन्वतं उत जिन्वतं धियः हुतं रक्षाँसि सेधतं अमीवाः सऽजोषसौ उषसा सूर्येण च सोमं सुन्वतः अश्विना॥१६॥ क्षत्रं जिन्वतं उत जिन्वतं नॄन् हुतं रक्षाँसि सेधतं अमीवाः सऽजोषसौ उषसा सूर्येण च सोमं सुन्वतः अश्विना॥१७॥ धेनूः जिन्वतं उत जिन्वतं विशः हुतं रक्षाँसि सेधतं अमीवाः सऽजोषसौ उषसा सूर्येण च सोमं सुन्वतः अश्विना॥१८॥१६॥ अचेःऽइव शृणुतं पूर्व्यऽस्तुतिं श्यावऽअश्वस्य सुन्वतः मदेऽच्युता सऽजोषसौ उषसा सूर्येण च अश्विना तिरःऽअह्नं॥१९॥ सर्गान्ऽइव सृजतं सुऽस्तुतीः उप श्यावऽअश्वस्य सुन्वतः मदेऽच्युता सऽजोषसौ उषसा सूर्येण च अश्विना तिरःऽअह्नं॥२०॥ रथीन्ऽइव यच्छतं अध्वरान् उप श्यावऽअश्वस्य सुन्वतः मदेऽच्युता सऽजोषसौ उषसा सूर्येण च अश्विना तिरःऽअह्नं॥२१॥ अर्वाक् रथं नि यच्छतं पिबतं सोम्यं मधु आ यातं अश्विना आ गतं अवस्युः वां अहं हुवे धत्तं रत्नानि दाशुषे॥२२॥ नमःऽवाकेप्रऽस्थिते अध्वरे नरा विवक्षणस्य पीतये आ यातं अश्विना आ गतं अवस्युः वां अहं हुवे धत्तं रत्नानि दाशुषे॥२३॥ स्वाहाऽकृतस्य तृंपतं सुतस्य देवौ अंधसः आ यातं अश्विना आ गतं अवस्युः वां अहं हुवे धत्तं रत्नानि दाशुषे॥२४॥१७॥

॥ ३६ ॥ १–७ श्यावाश्वः ॥ इंद्रः ॥ १–६ शक्वरी । ७ महापंक्तिः ॥

॥३६॥ अवितासि सुन्वतो वृक्तबर्हिषः पिबा सोमं मदाय कं शतक्रतो। यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इंद्र सत्पते ॥१॥ प्रावं स्तोतारं मघवन्नव त्वां पिबा सोमं मदाय कं शतक्रतो। यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इंद्र सत्पते ॥२॥ ऊर्जा देवाँ अवस्योजसा त्वां पिबा सोमं मदाय कं शतक्रतो। यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इंद्र सत्पते ॥३॥ जनिता दिवो जनिता पृथिव्याः पिबा सोमं मदाय कं शतक्रतो। यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इंद्र सत्पते ॥४॥ जनिताश्वानां जनिता गवामसि पिबा सोमं मदाय कं शतक्रतो। यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इंद्र सत्पते ॥५॥ अचीर्णा स्तोममदिवो महस्कृधि पिबा सोमं मदाय कं शतक्रतो। यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इंद्र सत्पते ॥६॥ श्यावाश्वस्य सुन्वतस्तथा शृणु यथा शृणोरचेः कर्माणि कृण्वतः। प्र चसर्दस्युमाविध त्वमेक इन्नृपाय्य इंद्र ब्रह्माणि वर्धयन् ॥७॥१८॥

॥ ३७ ॥ १–७ श्यावाश्वः ॥ इंद्रः ॥ १ अतिजगती । २–७ महापंक्तिः ॥

॥३७॥ प्रेदं ब्रह्म वृषतूयेष्ठाविध प्र सुन्वतः शचीपत इंद्र विश्वाभिरूतिभिः। माध्यंदिनस्य सवनस्य वृषहन्ननेद्य पिबा सोमस्य वज्रिवः ॥१॥ सेहान उग्र पृतना अभि द्रुहः शचीपत इंद्र विश्वाभिरूतिभिः। माध्यंदिनस्य सवनस्य वृषहन्न-

॥३६॥ अविता असि सुन्वतः वृक्तऽवर्हिषः पिबा सोमं मदाय कं शतऽक्रतो° यं ते भागं अधारयन् विश्वाः सेहानः पृतनाः उरु ज्रयः सं अप्सुऽजित् मरुत्वान् इंद्र सतऽपते ॥१॥ प्र अव स्तोतारं मघऽवन् अवा त्वां पिबा सोमं मदाय कं शतऽक्रतो° यं ते भागं अधारयन् विश्वाः सेहानः पृतनाः उरु ज्रयः सं अप्सुऽजित् मरुत्वान् इंद्र सतऽपते ॥२॥ ऊर्जी देवान् अवसि ओजसा त्वां पिबा सोमं मदाय कं शतऽक्रतो° यं ते भागं अधारयन् विश्वाः सेहानः पृतनाः उरु ज्रयः सं अप्सुऽजित् मरुत्वान् इंद्र सतऽपते ॥३॥ जनिता दिवः जनिता पृथिव्याः पिबा सोमं मदाय कं शतऽक्रतो° यं ते भागं अधारयन् विश्वाः सेहानः पृतनाः उरु ज्रयः सं अप्सुऽजित् मरुत्वान् इंद्र सतऽपते ॥४॥ जनिता अश्वानां जनिता गवां असि पिबा सोमं मदाय कं शतऽक्रतो° यं ते भागं अधारयन् विश्वाः सेहानः पृतनाः उरु ज्रयः सं अप्सुऽजित् मरुत्वान् इंद्र सतऽपते ॥५॥ अचीणां स्तोमं अद्रिऽवः महः कृधि पिबा सोमं मदाय कं शतऽक्रतो° यं ते भागं अधारयन् विश्वाः सेहानः पृतनाः उरु ज्रयः सं अप्सुऽजित् मरुत्वान् इंद्र सतऽपते ॥६॥ श्यावऽअश्वस्य सुन्वतः तथा शृणु यथा अशृणोः अत्रेः कर्माणि कृण्वतः प्र चसदस्युं आविथ त्वं एकः इत् नृऽसह्ये इंद्र ब्रह्माणि वर्धयन् ॥७॥१८॥

॥३७॥ प्र इदं ब्रह्म वृचऽतूर्येषु आविथ प्र सुन्वतः शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः माध्यंदिनस्य सवनस्य वृचऽहन् अनेद्य पिबा सोमस्य वज्रिऽवः ॥१॥ सेहानः उप पृतनाः अभि दुहः शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः माध्यंदिनस्य सवनस्य वृचऽहन्

नेद्य पिबा सोमस्य वज्रिवः॥२॥ एकराळस्य भुवनस्य राजसि शचीपत इंद्र विश्वाभिरूतिभिः। माध्यंदिनस्य सवनस्य वृत्रहन्नेद्य पिबा सोमस्य वज्रिवः॥३॥ सुस्यावाना यवयसि त्वमेक इच्छचीपत इंद्र विश्वाभिरूतिभिः। माध्यंदिनस्य सवनस्य वृत्रहन्नेद्य पिबा सोमस्य वज्रिवः॥४॥ क्षोमस्य च प्रयुजश्च त्वमीशिषे शचीपत इंद्र विश्वाभिरूतिभिः। माध्यंदिनस्य सवनस्य वृत्रहन्नेद्य पिबा सोमस्य वज्रिवः॥५॥ क्षत्राय त्वमवसि न त्वमाविथ शचीपत इंद्र विश्वाभिरूतिभिः। माध्यंदिनस्य सवनस्य वृत्रहन्नेद्य पिबा सोमस्य वज्रिवः॥६॥ श्यावाश्वस्य रेभतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्वतः। प्र चसदस्युमाविथ त्वमेक इन्नृषाह्य इंद्र क्षत्राणि वर्धयन्॥७॥१९॥

॥ ३८ ॥ १—१० श्यावाश्वः ॥ इंद्राग्नी ॥ गायत्री ॥

॥३८॥ यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु। इंद्राग्नी तस्य बोधतं॥१॥ तोशासा रथयावाना वृत्रहणापराजिता। इंद्राग्नी तस्य बोधतं॥२॥ इदं वां मदिरं मध्वधुक्षन्द्रिभिर्नरः। इंद्राग्नी तस्य बोधतं॥३॥ जुषेथां यज्ञमिष्टये सुतं सोमं सधस्तुती। इंद्राग्नी आ गतं नरा॥४॥ इमा जुषेथां सवना येभिर्हव्यान्यूहथुः। इंद्राग्नी आ गतं नरा॥५॥ इमां गायत्रवर्तनिं जुषेथां सुष्टुतिं मम। इंद्राग्नी आ गतं नरा॥६॥२०॥ प्रातर्यावभिरा गतं देवेभिर्जेन्यावसू। इंद्राग्नी सोमपीतये॥७॥ श्यावाश्वस्य सुन्वतोऽचीर्णां शृणुतं हवं। इंद्राग्नी सोमपीतये॥८॥ एवा वामह्व ऊतये यथाहुवंत मेधिराः। इंद्राग्नी सोम-

अनेद्य पिबा सोमस्य वज्रिऽवः॥२॥ एकऽराट् अस्य भुवनस्य राजसि शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः माध्यंदिनस्य सवनस्य वृचऽहन् अनेद्य पिबा सोमस्य वज्रिऽवः॥३॥ सऽस्यावांना यवयसि त्वं एकः इत् शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः माध्यंदिनस्य सवनस्य वृचऽहन् अनेद्य पिबा सोमस्य वज्रिऽवः॥४॥ क्षोमस्य च प्रऽयुजः च त्वं ईशिषे शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः माध्यंदिनस्य सवनस्य वृचऽहन् अनेद्य पिबा सोमस्य वज्रिऽवः॥५॥ क्षचायं त्वं अवसि न त्वं आविथ शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः माध्यंदिनस्य सवनस्य वृचऽहन् अनेद्य पिबा सोमस्य वज्रिऽवः॥६॥ श्यावऽअश्वस्य रेभतः तथा शृणु यथा अशृणोः अत्रेः कर्माणि कृण्वतः प्र चसदस्युं आविथ त्वं एकः इत् नृऽसहे इंद्र क्षत्राणि वर्धयन्॥७॥१९॥

॥३८॥ यज्ञस्य हि स्थः ऋत्विजा सस्नी वाजेषु कर्मऽसु इंद्राग्नी तस्य बोधतं॥१॥ तोशासा रथऽयावांना वृचऽहना अपराऽजिता इंद्राग्नी तस्य बोधतं॥२॥ इदं वां मदिरं मधु अधुक्षन् अद्रिऽभिः नरः इंद्राग्नी तस्य बोधतं॥३॥ जुषेथां यज्ञं इष्टये सुतं सोमं सधऽस्तुती इंद्राग्नी आ गतं नरा॥४॥ इमा जुषेथां सवना येभिः हव्यानि ऊहथुः इंद्राग्नी आ गतं नरा॥५॥ इमां गायत्रऽवर्तनिं जुषेथां सुऽस्तुतिं मम इंद्राग्नी आ गतं नरा॥६॥२०॥ प्रातर्यावऽभिः आ गतं देवेभिः जेन्यावसू इंद्राग्नी सोमऽपीतये॥७॥ श्यावऽअश्वस्य सुन्वतः अत्रीणां शृणुतं हवं इंद्राग्नी सोमऽपीतये॥८॥ एव वां अह्वे ऊतये यथा अहुवंत मेधिराः इंद्राग्नी सोम-

पीतये ॥ ९ ॥ आहं सरस्वतीवतोरिंद्राग्न्योरवो वृणे । याभ्यां गायचमृच्यते ॥ १० ॥ २१ ॥

॥ ३९ ॥ १–१० नाभाकः काण्वः ॥ अग्निः ॥ महापंक्तिः ॥

॥ ३९ ॥ अग्निमंस्तोष्टग्मियंमग्निमीळा यजध्यै । अग्निर्देवाँ अनक्तु न उभे हि विदथे कविरंतश्चरति दूत्यं१नभंतामन्यके समे ॥ १ ॥ न्यंग्ने नव्यसा वचस्तनूषु शंसमेषां । न्यरातीर्ररावणां विश्वा अर्यो अरातीरितो युंच्छंत्वामुरो नभंतामन्यके समे ॥ २ ॥ अग्ने मन्मांनि तुभ्यं कं घृतं न जुह्व आसनि । स देवेषु प्र चिकिद्धि त्वं ह्यसि पूर्व्यः शिवो दूतो विवस्वतो नभंतामन्यके समे ॥ ३ ॥ तत्तदग्निर्वयो दधे यथायथा कृपण्यतिं । ऊर्जाहुतिर्वसूनां शं च योश्च मयो दधे विश्वस्मै देवहूत्ये नभंतामन्यके समे ॥ ४ ॥ स चिकेत सहीयसाग्निश्चित्रेण कर्मणा । स होता शश्वतीनां दक्षिणाभिरभीवृत इनोति च प्रतीव्यं१नभंतामन्यके समे ॥ ५ ॥ २२ ॥ अग्निर्जातो देवानामग्निर्वेद मर्तानामपीच्यं । अग्निः स द्रविणोदा अग्निर्द्वारा व्यूर्णुते स्वाहुतो नवीयसा नभंतामन्यके समे ॥ ६ ॥ अग्निर्देवेषु संवसुः स विप्रेषु यज्ञियास्वा । स मुदा काव्या पुरु विश्वं भूमेव पुष्यति देवो देवेषु यज्ञियो नभंतामन्यके समे ॥ ७ ॥ यो अग्निः सप्तनामानुपः श्रितो विश्वेषु सिंधुषु । तमागन्म विपस्त्यं मंधातुर्देस्युहंतममग्निं यज्ञेषु पूर्व्यं नभंतामन्यके समे ॥ ८ ॥ अग्निस्तीर्णिं विधातून्या क्षेति विदथा कविः । स चीरेकादशाँ इह यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतो नभंतामन्यके समे ॥ ९ ॥ त्वं नो अग्न आयुषु त्वं देवेषु पूर्व्य वस्व

ऽपीतये ॥९॥ आ अहं सरस्वतीऽवतोः इंद्राग्न्योः अवः वृणे याभ्यां गायत्रं ऋच्यते ॥१०॥२१॥

॥३९॥ अग्निं अस्तोपि ऋग्मियं अग्निं इळा यजध्यै अग्निः देवान् अनक्तु नः उभे हि विदथे कविः अंतः चरति दूत्यं नभंतां अन्यके समे ॥१॥ नि अग्ने नव्यसा वचः तनूषु शंसं एषां नि अरातीः रराव्णां विश्वाः अर्यः अरातीः इतः युयोतु आऽमुरः नभंतां अन्यके समे ॥२॥ अग्ने मन्मानि तुभ्यं कं घृतं न जुह्वे आसनि सः देवेषु प्र चिकिद्धि त्वं हि असि पूर्व्यः शिवः दूतः विवस्वतः नभंतां अन्यके समे ॥३॥ तत्ऽतत् अग्निः वयः दधे यथाऽयथा कृपण्यति ऊर्जाऽआहुतिः वसूनां शं च योः च मयः दधे विश्वस्मै देवऽहूत्यै नभंतां अन्यके समे ॥४॥ सः चिकेत सहीयसा अग्निः चित्रेण कर्मणा सः होता शश्वतीनां दक्षिणाभिः अभिऽवृतः द्युतिं च प्रतीव्यं नभंतां अन्यके समे ॥५॥२२॥ अग्निः जाता देवानां अग्निः वेद मर्तानां अपीच्यं अग्निः सः द्रविणःऽदाः अग्निः द्वारा वि ऊर्णुते सुऽआहुतः नवीयसा नभंतां अन्यके समे ॥६॥ अग्निः देवेषु संऽवसुः सः चित्रेषु यज्ञियासु आ सः मुदा काव्या पुरु विश्वं भूमंऽइव पुष्यति देवः देवेषु यज्ञियः नभंतां अन्यके समे ॥७॥ यः अग्निः सप्तऽमानुषः श्रितः विश्वेषु सिंधुषु तं आ अगन्म चिऽअस्त्यं मंधातुः दस्युहन्ऽतमं अग्निं यज्ञेषु पूर्व्यं नभंतां अन्यके समे ॥८॥ अग्निः चीर्णि चिऽधातूंनि आ क्षेति विदथा कविः सः चीन् एकादशान् इह यक्षत् च पिप्रयत् च नः विप्रः दूतः परिऽकृतः नभंतां अन्यके समे ॥९॥ त्वं नः अग्ने आयुषु त्वं देवेषु पूर्व्य वस्वः

एकं इरज्यसि। त्वामायः परिस्रुतः परि यंति स्वसेतवो नभंतामन्यके समे ॥१०॥२३॥

॥ ४० ॥ १–१२ नाभाकः काण्वः ॥ इंद्राग्नी ॥ १, ३–११ महापंक्तिः। २ शाक्करी। १२ त्रिष्टुप्॥

॥४०॥ इंद्राग्नी युवं सु नः सहंता दासथो रयिं। येनं हव्हा समत्स्वा वीळु चित्साहिषीमह्यग्निर्वनेव वात इन्नभंतामन्यके समे ॥१॥ नहि वां वज्रयामहेऽथेंद्रमिद्यजामहे शविष्ठं नृणां नरं। स नः कदा चिदर्वता गमदा वाजसातये गमदा मेधसातये नभंतामन्यके समे ॥२॥ ता हि मध्यं भरांणामिंद्राग्नी अधिक्षितः। ता उ कवित्वना कवी पृच्छ्यमाना सखीयते सं धीतमश्नुतं नरा नभंतामन्यके समे ॥३॥ अभ्यर्च नभाकवदिंद्राग्नी यजसा गिरा। ययोर्विश्वमिदं जगदियं द्यौः पृथिवी महु पस्थे विभृतो वसु नभंतामन्यके समे ॥४॥ प्र ब्रह्माणि नभाकवदिंद्राग्निभ्यामिरज्यत। या सप्रवुध्नमर्णवं जिह्मबारमपोर्णुत इंदु ईशान ओजसा नभंतामन्यके समे ॥५॥ अपिं वृश्च पुराणवद्नतेरिव गुप्यितमोजो दासस्य दंभय। वयं तदस्य संभृतं वस्विंद्रेण वि भंजेमहि नभंतामन्यके समे ॥६॥२४॥ यदिंद्राग्नी जनां इमे विह्वयंते तना गिरा। अस्माकेभिर्नृभिर्वयं सासह्यामं पृतन्यतो वनुयामं वनुष्यतो नभंतामन्यके समे ॥७॥ या नु श्वेतावको दिव उच्चरांत उप द्युभिः। इंद्राग्न्योरनु व्रतमुहाना यंति सिंधवो यान्त्सीं वंधादमुंचतां नभंतामन्यके समे ॥८॥ पूर्वीष्टे इंद्रोपमातयः पूर्वीरुत प्रशस्तयः सूनो हिन्वस्य हरिवः। वस्वो वीरस्यापृचो या नु साधंत नो धियो नभंतामन्यके समे ॥९॥ तं शिशीता सुवृक्तिभिस्त्वेषं सत्वानमूर्मियं।

एकः इरज्यसि त्वां आपः परिऽसुतः परि यंति स्वऽसेतवः नभंतां अन्यके समे ॥१०॥२३॥

॥४०॥ इंद्राग्नी युवं सु नः सहंता दासयः रयिं येन हव्हा समत्ऽसु आ वीळु चित् सहिषीमहि अभिः वनाऽइव वाते इत् नभंतां अन्यके समे ॥१॥ नहि वां वयंयामहे अथ इंद्रं इत् यजामहे शविष्ठं नृणां नरं सः नः कदा चित् अर्वंता गमत् आ वाजेऽसातये गमत् आ मेधऽसातये नभंतां अन्यके समे ॥२॥ ता हि मध्यं भरांणां इंद्राग्नी अधिऽस्थितः तौ ऊं कविऽतमा कवी पृच्छमाना सखिऽयते सं धीतं अश्नुतं नरा नभंतां अन्यके समे ॥३॥ अभि अर्च नभाकऽवत् इंद्राग्नी यजसा गिरा ययोः विश्वं इदं जगत् इयं द्यौः पृथिवी मही उपऽस्थे बिभृतः वसु नभंतां अन्यके समे ॥४॥ प्र ब्रह्माणि नभाकऽवत् इंद्राग्निऽभ्यां इरज्यत या सप्नऽवुभं अर्णवं जिह्मऽबारं अपऽऊर्णुतः इंद्रः ईशानः ओजसा नभंतां अन्यके समे ॥५॥ अपि वृश्च पुराणऽवत् वततेःऽइव गुष्मितं ओजः दासस्य दंभय वयं तत् अस्य संऽभृतं वसु इंद्रेण वि भजेमहि नभंतां अन्यके समे ॥६॥२४॥ यत् इंद्राग्नी जनाः इमे विऽह्वयंते तना गिरा अस्माकेभिः नृऽभिः वयं ससवांसः पृतन्यतः वनुयाम वनुष्यतः नभंतां अन्यके समे ॥७॥ या नु श्वेता अवः दिवः उत्ऽचरांतः उप द्युऽभिः इंद्राग्न्योः अनु व्रतं उहानाः यंति सिंधवः यान् सीं बंधात् अमुंचतां नभंतां अन्यके समे ॥८॥ पूर्वीः ते इंद्र उषसः मातयः पूर्वीः उत प्रऽशस्तयः सूनो हिन्वस्य हरिऽवः वस्वः वीरस्य आऽपृचः याः नु साधंत नः धियः नभंतां अन्यके समे ॥९॥ तं शिशीत सुवृक्तिऽभिः त्वेषं सत्वानं ऋग्मियं

उतो नु चिद्य ओजसा शुष्णस्यांडानि भेदति जेषत्स्वर्वतीरपो नभंतामन्यके समे॥१०॥ तं शिंशीता स्वध्वरं सत्यं सत्वानमृत्वियं। उतो नु चिद्य ओहत आंडा शुष्णस्य भेदत्यजैः स्वर्वतीरपो नभंतामन्यके समे ॥११॥ एवेंद्राग्निभ्यां पितृवन्नवीयो मंधातृवद्गिरस्वदंवाचि। त्रिधातुना शर्मणा पातमस्मान्वयं स्याम पतयो रयीणां ॥१२॥२५॥

॥ ४१ ॥ १–१० नाभाकः काण्वः ॥ वरुणः ॥ महापंक्तिः ॥

॥४१॥ अस्मा ऊ षु प्रभूतये वरुणाय मरुद्भ्योऽर्चा विदुष्टरेभ्यः। यो धीता मानुषाणां पश्वो गा इव रक्षति नभंतामन्यके समे ॥१॥ तमू षु संमना गिरा पितॄणां च मन्मभिः। नाभाकस्य प्रशस्तिभिर्यः सिंधूनामुपोदये सप्तस्वसा स मंथमो नभंतामन्यके समे ॥२॥ स क्षपः परि षस्वजे न्युष्टो मायया दधे स विश्वं परि दर्शतः। तस्य वेनीरनु व्रतमुपस्तिरन्नो अंवर्धयन्नभंतामन्यके समे ॥३॥ यः ककुभो निधारयः पृथिव्यामधि दर्शतः। स माता पूर्व्ये पदे तद्वरुणस्य सप्सदं स हि गोपा इवेर्यो नभंतामन्यके समे ॥४॥ यो धर्ता भुवनानां य उस्राणामपीच्या३वेद नामानि गुह्या। स कविः काव्या पुरु रूपं द्यौरिव पुष्यति नभंतामन्यके समे ॥५॥२६॥ यस्मिन्विश्वानि काव्या चक्रे नाभिरिव श्रिता। तिरश्चीनो विततो रश्मिरोजसा नभंतामन्यके समे ॥६॥ य आस्वर्क आग्नये विश्वा जातान्येषां। परि धामानि मर्मृशद्वरुणस्य पुरो गये विश्वे देवा अनु व्रतं नभंतामन्यके समे ॥७॥ स समुद्रो अपीच्यस्तुरो द्यामिव रोहति नि यदासु यजुर्दधे।

उतो नु चित् यः ओजसा शुष्णस्य आंडानि भेदति जेयन् स्वः-ऽवतीः अपः नभंतां अन्यके समे ॥१०॥ तं शिशीत सुऽअध्वरं सत्यं सत्वानं ऋत्वियं उतो नु चित् यः ओहते आंडा शुष्णस्य भेदति अजैः स्वःऽवतीः अपः नभंतां अन्यके समे ॥११॥ एव इंद्राग्निऽभ्यां पितृऽवत् नवीयः मंधातृऽवत् अंगिरस्वत् अवाचि चिऽधातुना शर्मणा पातं अस्मान् वयं स्याम पतयः रयीणां ॥१२॥२५॥

॥४१॥ अस्मै ऊं सु प्रऽभूतये वरुणाय मरुत्ऽभ्यः अर्चं विदुःऽतरेभ्यः यः धीता मानुषाणां पश्वः गाःऽइव रक्षति नभंतां अन्यके समे ॥१॥ तं ऊं सु समना गिरा पितॄणां च मन्मंऽभिः नाभाकस्य प्रशस्तिऽभिः यः सिंधूनां उपऽक्षत्ऽअये सुम्नऽएषसा सः मध्यमः नभंतां अन्यके समे ॥२॥ सः द्यावः परि सस्वजे नि उस्रः मायया दधे सः विश्वं परि दर्शतः तस्य वेनीः अनु व्रतं उषः तिस्रः अवर्धयन् नभंतां अन्यके समे ॥३॥ यः ककुभः निऽधारयः पृथिव्यां अधि दर्शतः सः मातरा पूर्व्ये पदे तत् वरुणस्य सप्सदः सः हि गोपाःऽइव इर्यः नभंतां अन्यके समे ॥४॥ यः धर्ता भुवनानां यः उस्राणां अपीच्या वेद नामानि गुह्या सः कविः काव्या पुरु रूपं द्यौःऽइव पुष्यति नभंतां अन्यके समे ॥५॥२६॥ यस्मिन् विश्वानि काव्या चक्रे नाभिःऽइव श्रिता चित्तं जूती सपर्यत व्रजे गावः न संऽयुजे युजे अश्वान् अयुक्षत नभंतां अन्यके समे ॥६॥ यः आसु अर्कः आऽअर्पितः विश्वा जातानि एषां परि धामानि मर्मृशत् वरुणस्य पुरः गये विश्वे देवाः अनु व्रतं नभंतां अन्यके समे ॥७॥ सः समुद्रः अपीच्यः तुरः द्यांऽइव रोहति नि यत् आसु यजुः दधे

स मा॒या अ॒र्चिना॑ पदा॒स्तृणा॒नाक॑मारु॒हन्न॑भँता॒मन्य॒के सं॒मे ॥ ८॥ यस्य॑ श्वे॒ता वि॑चक्ष॒णा ति॒स्रो भूमी॑रधिक्षि॒तः। चि॒रुत्त॑राणि पप्रतु॒र्वरू॑णस्य ध्रु॒वं सद॒: स सं॒ताना॑मिरज्यति॒ नभँता॒मन्य॒के सं॒मे ॥ ९॥ यः श्वे॒ताँ अधि॑निर्णि॒जश्च॒क्रे कृ॒ष्णाँ अनु॑ व्र॒ता। स धाम॑ पू॒र्व्यं मं॑मे॒ यः स्क॒म्भेन॒ वि रोद॑सी॒ अज॑ो॒ न द्याम॑धा॒रय॒न्नभँता॒मन्य॒के सं॒मे ॥ १०॥ २९॥

॥ ४२ ॥ १–६ नाभाकः काण्व अर्चनाना वा। अथवा १–३ नाभाकः काण्वः। ४–६ नाभाकः काण्व अर्चनाना वा ॥ १–३ वरुणः। ४–६ अश्विनौ ॥ १–३ त्रिष्टुप्। ४–६ अनुष्टुप् ॥

॥ ४२ ॥ अस्त॑भ्ना॒द्द्यामसु॑रो वि॒श्ववे॑दा॒ अमि॑मीत वरि॒माणं॑ पृथि॒व्याः। आसी॑दद्विश्वा॒ भुव॑नानि स॒म्राड्विश्वेत्तानि॒ वरु॑णस्य व्र॒तानि॑ ॥ १॥ एवा॑ वँदस्व॒ वरु॑णं बृ॒हंतं॑ नम॒स्या धी॒रम॒मृत॑स्य गो॒पां। स नः॒ शर्म॑ त्रि॒वरू॑थं॒ वि यं॑सत्पा॒तं नो॑ द्यावापृथिवी उ॒पस्थे॑ ॥ २॥ इ॒मां धियं॒ शिक्ष॑माणस्य देव॒ क्रतुं॑ दक्षं॑ वरुण॒ सं शि॑शाधि। यया॑ति॒ विश्वा॑ दुरि॒ता तरे॑म सु॒तर्मा॑णमधि॒ नावं॑ रुहेम ॥ ३॥ आ वां॒ रथो॑ऽवा॒णी अ॑श्विना धी॒भिर्विप्रो॑ अच्युच्यवुः। नास॑त्या॒ सोम॑पीतये॒ नभँता॒मन्य॒के सं॒मे ॥ ४॥ यथा॑ वा॒मत्रि॑रश्विना गी॒र्भिर्विप्रो॒ अजो॑हवीत्। नास॑त्या॒ सोम॑पीतये॒ नभँता॒मन्य॒के सं॒मे ॥ ५॥ एवा वा॑मह्व ऊ॒तये॒ यथाहु॑वंत॒ मेधि॑राः। नास॑त्या॒ सोम॑पीतये॒ नभँता॒मन्य॒के सं॒मे ॥ ६॥ २८॥ ५॥

॥ ४३ ॥ १–३३ विरूप आंगिरसः ॥ अग्निः ॥ गायत्री ॥

॥ ४३ ॥ इ॒मे विप्र॑स्य वे॒धसो॒ऽग्नेरस्तृ॑तयज्वनः। गिरः॒ स्तोमा॑स ईरते ॥ १॥ अ॒स्मै ते प्रति॒हर्य॑ते जातवेदो॒ विच॑र्षणे। अग्ने॒ जना॑मि सुष्टु॒तिं ॥ २॥ आरो॑का इ॒व॒ घेदहं॑ ति॒ग्मा अ॑ग्ने॒ तव॒ त्विषः॑। द॒द्भिर्वना॑नि॒ बप्स॑ति ॥ ३॥ हरी॑यो धू॒मके॑तवो॒ वा-

सः मायाः अचिना पदा अस्तृणात् नाकं आ अरुहत् नभंतां अन्यके समे॥८॥ यस्य श्वेता विऽचक्षणा तिस्रः भूमीः अधिऽक्षितः विः उत्ऽतराणि पप्रतुः वरुणस्य ध्रुवं सदः सः सप्तानां इरज्यति नभंतां अन्यके समे॥९॥ यः श्वेतान् अधिऽनिर्निजः चक्रे कृष्णान् अनु व्रता सः धामं पूर्व्यं ममे यः स्कंभेन वि रोदसी अजः न द्यां अधारयत् नभंतां अन्यके समे॥१०॥२७॥

॥४२॥ अस्तभ्नात् द्यां असुरः विश्वऽवेदाः अमिमीत वरिमाणं पृथिव्याः आ असीदत् विश्वा भुवनानि संऽराट् विश्वा इत् तानि वरुणस्य व्रतानि॥१॥ एव वंदस्व वरुणं बृहंतं नमस्य धीरं अमृतस्य गोपां सः नः शर्म विऽवरूथं वि यंसत् पातं नः द्यावापृथिवी उपऽस्थे॥२॥ इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण संऽशिशाधि यया अति विश्वा दुःऽइता तरेम सुऽतर्माणं अधि नावं रुहेम॥३॥ आ वां यावाणः अश्विना धीभिः विप्राः अचुच्यवुः नासत्या सोमऽपीतये नभंतां अन्यके समे॥४॥ यथा वां अत्रिः अश्विना गीःऽभिः विप्रः अजोहवीत् नासत्या सोमऽपीतये नभंतां अन्यके समे॥५॥ एव वां अद्ये ऊतये यथा अहुवंत मेधिराः नासत्या सोमऽपीतये नभंतां अन्यके समे॥६॥२८॥५॥

॥४३॥ इमे विप्रस्य वेधसः अग्नेः अस्तृतऽयज्वनः गिरः स्तोमासः ईरते॥१॥ अस्मै ते प्रतिऽहर्यते जातऽवेदः विऽचर्षणे अग्ने जनामि सुऽस्तुतिं॥२॥ आरोकाःऽइव घ इत् अह तिग्माः अग्ने तव त्विषः दतऽभिः वनानि वप्सति॥३॥ हरयः धूमऽकेतवः वा-

तंजूना उप द्यवि । यतंते वृथगग्नयः ॥४॥ एते त्ये वृथगग्नय इद्धासः समदक्षत । उषसामिव केतवः ॥५॥२९॥ कृष्णा रजांसि पत्सुतः प्रयाणे जातवेदसः । अग्निर्यद्रोधति क्षमि ॥६॥ धासिं कृण्वान ओषधीर्वप्सदग्निर्न वायति । पुनर्यन्तरुणीरपि ॥७॥ जिह्वाभिरह नंनमद्विषा जंजणाभवन् । अग्निर्वनेषु रोचते ॥८॥ अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः ॥९॥ उदग्ने तव तद्घृताद्वीं रोचत आहुतं । निंसानं जुह्वो३मुखे ॥१०॥३०॥ उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमाग्नये ॥११॥ उत त्वा नमसा वयं होतर्वरेण्यक्रतो । अग्ने समिद्भिरीमहे ॥१२॥ उत त्वा भृगुवच्छुचे मनुष्वदग्न आहुत । अंगिरस्वद्धवामहे ॥१३॥ त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्सता । सखा सख्या समिध्यसे ॥१४॥ स त्वं विप्राय दाशुषे रयिं देहि सहस्रिणं । अग्ने वीरवतीमिषं ॥१५॥३१॥ अग्ने भ्रातः सहस्कृत रोहिदश्व शुचिव्रत । इमं स्तोमं जुषस्व मे ॥१६॥ उत त्वाग्ने मम स्तुतो वाश्राय प्रतिहर्यते । गोष्ठं गावं इवाशत ॥१७॥ तुभ्यं ता अंगिरस्तम विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिरे ॥१८॥ अग्निं धीभिर्मनीषिणो मेधिरासो विपश्चितः । अश्वसद्याय हिन्विरे ॥१९॥ तं त्वामज्मेषु वाजिनं तन्वाना अग्ने अध्वरं । वह्निं होतारमीळते ॥२०॥३२॥ पुरुत्रा हि सदृङ्असि विशो विश्वा अनु प्रभुः । समत्सु त्वा हवामहे ॥२१॥ तमीळिष्व य आहुतोऽग्निर्विभाजते घृतैः । इमं नः शृणवद्धवं ॥२२॥ तं त्वा वयं हवामहे शृणवंतं जातवेदसं । अग्ने घंतमप द्विषः ॥२३॥ विशां राजानमद्भुतमध्यक्षं धर्मणामिमं । अग्निमीळे स उ

त्तऽजूताः उपं द्यविं यतंते वृथक् अग्नयः॥४॥ एते त्ये वृथक् अग्नयः इद्धासः सं अदृक्षत उपसाँऽइव केतवः॥५॥२९॥ कृष्णा रजाँसि पत्सुतः प्रऽयानें जातऽवेदसः अग्निः यत् रोधति क्ष्मि॥६॥ धासिं कृण्वानः ओषधीः चर्षत् अग्निः न वायति पुनः यन् तरणीः अपि॥७॥ जिह्वाभिः अह नंनमत् अर्चिषा जंजृणाऽभवन् अग्निः वनेषु रोचते॥८॥ अप्ऽसु अग्ने सधिः तवं सः ओषधीः अनु रुध्से गर्भे सन् जायसे पुनः"॥९॥ उत् अग्ने तवं तत् घृतात् अर्चिः रोचते आऽहुतं निंसानं जुह्वः मुखे॥१०॥३०॥ उक्षाऽअन्नाय वशाऽअन्नाय सोमंऽपृष्टाय वेधसे स्तोमैः विधेम अग्नयें॥११॥ उत त्वा नमसा वयं होतः वरेण्यऽक्रतो॰ अग्ने समित्ऽभिः इमहे॥१२॥ उत त्वा भृगुऽवत् शुचे मनुष्वत् अग्ने आऽहुत अंगिरस्वत् हवामहे॥१३॥ त्वं हि अग्ने अग्निना विप्रः विप्रेण सन्सता सखा सख्या सऽइध्यसें॥१४॥ सः त्वं विप्राय दाशुषें रयिं देहि सहस्रिणं अग्ने वीरऽवंतीं इषं॥१५॥३१॥ अग्ने भातः" सहःऽकृत रोहित्ऽअश्व शुचिऽव्रत इमं स्तोमं जुषस्व मे॥१६॥ उत त्वा अग्ने मम स्तुतः वाश्राय प्रतिऽहर्यंते गोऽस्यं गावःऽइव आशत॥१७॥ तुभ्यं ताः अंगिरःऽतम विश्वाः सुऽक्षितयः पृथक् अग्ने कामाय येमिरे॥१८॥ अग्निं धीभिः मनीषिणः मेधिरासः विपःऽचितः अग्नऽसद्याय हिन्विरे॥१९॥ तं त्वां अज्मेषु वाजिनं तन्वानाः अग्ने अध्वरं वहिं होतारं ईळते॥२०॥३२॥ पुरुऽचा हि सऽइदङ् असि विशः विश्वाः अनु प्रऽभुः समत्ऽसु त्वा हवामहे॥२१॥ तं ईळिष्व यः आऽहुतः अग्निः विऽभाजते घृतैः इमंनः शृणवत् हवं॥२२॥ तं त्वा वयं हवामहे शृण्वंतं जातऽवेदसं अग्ने मंतें अपं द्विषः॥२३॥ विशां राजानं अद्भुतं अधिऽअक्षं धर्मणां इमं अग्निं ईळे सः ऊं॰

श्रवत् ॥२४॥ अग्निं विश्वायुवेपसं मर्यं न वाजिनं हितं। सप्तिं न वाजयामसि ॥२५॥३३॥ मन्मुधाग्नयप द्विषो दह्वन्नक्षांसि विश्वहा। अग्ने तिग्मेन दीदिहि ॥२६॥ यं त्वा जनास इंधते मनुष्वदंगिरस्तम। अग्ने स बोधि मे वचः ॥२७॥ यदग्ने दिविजा असप्सुजा वा सहस्कृत। तं त्वा गीर्भिर्हवामहे ॥२८॥ तुभ्यं धेनुं जनां इमे विशां सुक्षितयः पृथक्। धासिं हिन्वंत्यत्तवे ॥२९॥ ते धेदग्ने स्वाध्योऽहा विश्वा नृचक्षसः। तरंतः स्याम दुर्गहा ॥३०॥३४॥ अग्निं मंद्रं पुरुप्रियं शीरं पावकशोचिषं। हृद्भिर्मंद्रेभिरीमहे ॥३१॥ स त्वमग्ने विभावसुः सृजन्त्सूर्यो न रश्मिभिः। शर्धन्तमांसि जिघ्नसे ॥३२॥ तन्ने सहस्व ईमहे दात्रं यन्नोपदस्यति। त्वदग्ने वार्यं वसु ॥३३॥३५॥

॥ ४४ ॥ १–३० विरूप आंगिरसः ॥ अग्निः ॥ गायत्री ॥

॥४४॥ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिं। आस्मिन्हव्या जुहोतन ॥१॥ अग्ने स्तोमं जुषस्व मे वर्धस्वानेन मन्मना। प्रति सूक्तानि हर्य नः ॥२॥ अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे। देवाँ आ सादयादिह ॥३॥ उत्ते बृहंतो अर्चयः समिधानस्य दीदिवः। अग्ने शुक्रास ईरते ॥४॥ उप त्वा जुह्वो३मम घृताचीर्यंतु हर्यत। अग्ने हव्या जुषस्व नः ॥५॥३६॥ मंद्रं होतारमृत्विजं चित्रभानुं विभावसुं। अग्निमीळे स उ श्रवत् ॥६॥ प्रत्नं होतारमीड्यं जुष्टमग्निं कविक्रतुं। अध्वराणामभिश्रियं ॥७॥ जुषाणो अंगिरस्तमेमा हव्यान्यानुषक्। अग्ने यज्ञं नय ऋतुथा ॥८॥ समिधान उ संत्य शुक्रशोच इहा वह। चिकित्वान्दिव्यं जनं ॥९॥ विप्रं होतारमद्रुहं धूमकेतुं

श्रवत्॥२४॥ अग्निं विश्वायुंऽवेपसं मर्यं न वाजिनं हितं सप्तिं न वाजयामसि॥२५॥३३॥ घ्नन् मृधाणि अप द्विषः दहन् रक्षांसि विश्वहा अग्ने तिग्मेन दीदिहि॥२६॥ यं त्वा जनासः इंधते मनुष्वत् अंगिरःऽतम अग्ने सः बोधि मे वचः॥२७॥ यत् अग्ने दिविऽजाः असि अप्सुऽजाः वा सहःऽकृत तं त्वा गीःऽभिः हवामहे॥२८॥ तुभ्यं घ इत् ते जनाः इमे विश्वाः सुऽक्षितयः पृथक् धासिं हिन्वंति अत्तवे॥२९॥ ते घ इत् अग्ने सुऽआध्यः अहा विश्वा नृऽचक्षसः तरंतः स्याम दुःऽगहा॥३०॥३४॥ अग्निं मंद्रं पुरुऽप्रियं शीरं पावकऽशोचिषं हृत्ऽभिः मंद्रेभिः ईमहे॥३१॥ सः त्वं अग्ने विभाऽवसुः सृजन् सूर्यः न रश्मिऽभिः शर्धन् तमांसि जिघ्नसे॥३२॥ तत् ते सहस्वः ईमहे दावं यत् न उपऽदस्यति तत् अग्ने वाय्यं वसु॥३३॥३५॥

॥४४॥ संऽइधा अग्निं दुवस्यत घृतैः बोधयत अतिथिं आ अस्मिन् हव्या जुहोतन॥१॥ अग्ने स्तोमं जुषस्व मे वर्धस्व अनेन मन्मना प्रति सुऽउक्तानि हर्य नः॥२॥ अग्निं दूतं पुरः दधे हव्यऽवाहं उप ब्रुवे देवान् आ सादयात् इह॥३॥ उत ते बृहंतः अर्चयः संऽइधानस्य दीदिऽवः अग्ने शुक्रासः ईरते॥४॥ उप त्वा जुह्वः मम घृताचीः यंतु हर्यत अग्ने हव्या जुषस्व नः॥५॥३६॥ मंद्रं होतारं ऋत्विजं चित्रऽभानुं विभाऽवसुं अग्निं ईळे सः ऊं श्रवत्॥६॥ प्रत्नं होतारं ईड्यं जुष्टं अग्निं कविऽक्रतुं अध्वराणां अभिऽश्रियं॥७॥ जुषाणः अंगिरःऽतम इमा हव्यानि आनुषक् अग्ने यज्ञं नय ऋतुऽथा॥८॥ संऽइधानः ऊं सत्य शुक्रऽशोचे इह आ वह चिकित्वान् दैव्यं जनं॥९॥ विप्रं होतारं अद्रुहं धूमऽकेतुं

विभावसुं । यज्ञानां केतुमीमहे ॥१०॥३७॥ अग्ने नि पाहि नस्त्वं प्रति ष्म देव रीषतः । भिंधि द्वेषः सहस्कृत ॥११॥ अग्निः प्रत्नेन मन्मना शुंभानस्तन्वं१स्वां । कविर्विप्रेण वावृधे ॥१२॥ ऊर्जो नपातमा हुवेऽग्निं पावकशोचिषं । अस्मिन्यज्ञे स्वध्वरे ॥१३॥ स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा । देवैरा सत्सि बर्हिषि ॥१४॥ यो अग्निं तन्वो३दमे देवं मर्तः सपर्यति । तस्मा इद्दीदयद्वसु ॥१५॥३८॥ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं । अपां रेतांसि जिन्वति ॥१६॥ उदग्ने शुचयस्तव शुक्रा भ्राजंत ईरते । तव ज्योतींष्यर्चयः ॥१७॥ ईशिषे वार्यस्य हि दात्वस्याग्ने स्वर्पतिः । स्तोता स्यां तव शर्मणि ॥१८॥ त्वामग्ने मनीषिणस्त्वां हिन्वंति चित्तिभिः । त्वां वर्धंतु नो गिरः ॥१९॥ अदब्धस्य स्वधावतो दूतस्य रेभतः सदा । अग्नेः सख्यं वृणीमहे ॥२०॥३९॥ अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः । शुची रोचत आहुतः ॥२१॥ उत त्वा धीतयो मम गिरो वर्धंतु विश्वहा । अग्ने सख्यस्य बोधि नः ॥२२॥ यदग्ने स्यामहं त्वं त्वं वा घा स्या अहं । स्युष्टे सत्या इहाशिषः ॥२३॥ वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः । स्याम ते सुमतावपि ॥२४॥ अग्ने घृतव्रताय ते समुद्रायेव सिंधवः । गिरो वाश्रास ईरते ॥२५॥४०॥ युवानं विश्पतिं कविं विश्वादं पुरुवेषसं । अग्निं शुंभामि मन्मभिः ॥२६॥ यज्ञानां रथ्यं वयं तिग्मजंभाय वीळवे । स्तोमैरिषेमाग्नये ॥२७॥ अयमग्ने त्वे अपि जरिता भूतु संत्य । तस्मै पावक मृळय ॥२८॥ धीरो ह्यस्यद्मसद्विप्रो न जागृविः सदा । अग्ने दीदयसि द्यवि ॥२९॥ पुरा अग्ने दुरितेभ्यः पुरा मृध्रेभ्यः कवे । प्र ण आयुर्वसो तिर ॥३०॥४१॥

विभाऽवसुं यज्ञानाँ केतुं ईमहे ॥१०॥३७॥ अग्ने नि पाहि नः त्वं प्रति स्म देव रिषतः भिंधि द्वेषः सहःऽकृत ॥११॥ अग्निः प्रत्नेन मन्मना शुंभानः तन्वं स्वां कविः विप्रेण वावृधे ॥१२॥ ऊर्जः नपातं आ हुवे अग्निं पावकऽशोचिषं अस्मिन् यज्ञे सुऽअध्वरे ॥१३॥ सः नः मित्रऽमहः त्वं अग्ने शुक्रेण शोचिषा देवैः आ सत्सि बर्हिषि ॥१४॥ यः अग्निं तन्वः दमे देवं मर्तः सपर्यति तस्मै इत् दीदयत् वसु ॥१५॥३८॥ अग्निः मूर्धा दिवः ककुत् पतिः पृथिव्याः अयं अपां रेताँसि जिन्वति ॥१६॥ उत् अग्ने शुचयः तव शुक्राः भ्राजंतः ईरते तव ज्योतींषि अर्चयः ॥१७॥ ईशिषे वार्यस्य हि दावने अग्ने स्वःऽपतिः स्तोता स्यां तव शर्मणि ॥१८॥ त्वां अग्ने मनीषिणः त्वां हिन्वंति चित्तिऽभिः त्वां वर्धंतु नः गिरः ॥१९॥ अदब्धस्य स्वधाऽवंतः दूतस्य रेभतः सदा अग्नेः सख्यं वृणीमहे ॥२०॥३९॥ अग्निः शुचिव्रततमः शुचिः विप्रः शुचिः कविः शुचिः रोचते आऽहुतः ॥२१॥ उत त्वा धीतयः मम गिरः वर्धंतु विश्वहा अग्ने सख्यस्य बोधि नः ॥२२॥ यत् अग्ने स्यां अहं त्वं त्वं वा घ स्याः अहं स्युः ते सत्याः इह आऽशिषः ॥२३॥ वसुः वसुऽपतिः हि कं असि अग्ने विभाऽवसुः स्याम ते सुऽमतौ अपि ॥२४॥ अग्ने धृतऽव्रताय ते समुद्राय अऽइव सिंधवः गिरः वाश्रासः ईरते ॥२५॥४०॥ युवानं विशपतिं कविं विश्वऽआदं पुरुऽवेपसं अग्निं शुंभामि मन्मऽभिः ॥२६॥ यज्ञानां रथ्यं वयं तिग्मऽजंभाय वीळवे स्तोमैः इषेम अग्नये ॥२७॥ अयं अग्ने त्वे अपि जरिता भूतु सत्य तस्मै पावक मृळय ॥२८॥ धीरः हि असि अग्ने ऽसत् विप्रः न जागृविः सदा अग्ने दीदयसि द्यवि ॥२९॥ पुरा अग्ने दुःऽइतेभ्यः पुरा मृध्रेभ्यः कवे प्र नः आयुः वसो तिर ॥३०॥४१॥

॥ ४५ ॥ १-४२ त्रिशोकः काण्वः ॥ १ इंद्राग्नी । २-४२ इंद्रः ॥ गायत्री ॥

॥४५॥ आ घा॑ ये अग्निमिंधते स्तृणंति॑ बर्हिरा॑नुषक्। येषा॒मिंद्रो॒ युवा॒ सखा॑ ॥१॥ बृह॒न्निद्ध्म ए॑षां॒ भूरि॑ शस्तं पृथु॒ः स्वरुः॑। येषा॒मिंद्रो॒ युवा॒ सखा॑॥२॥ अयु॑ज्र इद्यु॒धा वृतं॒ शूर॒ आजं॑ति॒ सत्व॑भिः। येषा॒मिंद्रो॒ युवा॒ सखा॑॥३॥ आ बु॑दं वृंचहा॒ ददे॒ जा॒तः पृ॑च्छ॒द्वि मा॒तर॑म्। क उ॒ग्राः के ह॑ शृण्विरे॥४॥ प्रति॑ त्वा शवसी॒ वदद्गि॒रावप्सो॒ न योध॑षत्। यस्ते॑ शत्रुत्वमा॑चके॥५॥४२॥ उ॒त त्वं म॑घवञ्छृणु॒ यस्ते॒ वष्टि॑ ववक्षि॒ तत्। यद्वी॒ळ्यां॑सि वी॒ळु ते॒॥६॥ यदा॒जिं या॒त्याजि॑कृदिंद्रः स्वश्व्युरुप॑। रथी॑तमो॒ रथी॑नाम्॥७॥ वि षु विश्वा॑ अ॒भियु॑जो॒ वज्रि॒न्विष्व॒ग्यथा॑ वृह। भवा॑ नः सुश्रव॒स्तमः॥८॥ अ॒स्माक॑ं सु॒ रथं॑ पुर॒ इंद्रः॑ कृणोतु सा॒तये॑। न यं धूर्वं॑ति॒ धूर्त॑यः॥९॥ वृ॒ज्याम॑ ते॒ परि॒ द्विषोऽरं॑ ते शक्र दावने। गम॒मेदिंद्र॒ गोम॑तः॥१०॥४३॥ शने॑श्चिद्यंतो॒ अद्रि॑वोऽश्वा॑वंतः शतग्विनः। वि॒वक्ष॑णा अनेहसः॥११॥ ऊ॒र्ध्वो हि ते॑ दि॒वेदि॑वे स॒हस्रा॑ सूनृ॒ता श॒ता। जरि॑तृभ्यो॒ वि॒मंह॑ते॥१२॥ वि॒द्मा हि त्वा॑ धनंज॒यमिंद्र॑ हव॒ह्वा चि॑दा॒रुज॑म्। आदा॑रिणं॒ यथा॒ गय॑म्॥१३॥ कुकु॑हं चि॒त्त्वा कवे॒ मंदं॑तु धृष्णविंदवः। आ त्वा॑ पृणंि॑ यदीम॑हे॥१४॥ यस्ते॑ रे॒वाँ अदा॑शुरिः प्रम॒मर्ष॑ म॒र्घत्त॑ये। तस्य॑ नो वेद॒ आ भ॑र॥१५॥४४॥ इ॒म उ॑ त्वा॒ वि च॑क्षते॒ सखा॑य इंद्र सो॒मिनः॑। पु॒ष्टावं॑तो॒ यथा॑ प॒शुं॥१६॥ उ॒त त्वाधि॑रं व॒यं शुल्कं॑पृ॒ संत॑मूतये। दू॒रादि॒ह हवा॑महे॥१७॥ यच्छु॒श्रूया इ॒मं हवं॑ दु॒र्मर्षं॑ चक्रिया उ॒त। भवे॑रापि॒र्नो अं॑तमः॥१८॥ यच्चि॒द्धि ते॒ अपि॒ व्यथि॑र्जगन्वांसो॒ अमं॑न्महि। गो॒दा इ॑दिंद्र॒ वोधि॑ नः॥१९॥ आ त्वा॑ रंभं॑ न जिव्रयो॒ रभ्मा॑ शवसस्पते। उ॒श्मसि॑ त्वा॒ सध॑स्थ॒ आ॥२०॥४५॥ स्तो॒चमिंद्रा॑य गायत पुरुनृ॒म्णाय॒ सत्व॑ने। नकि॑र्यं वृ॒-

॥४५॥ आ घ ये अग्निं इंधते स्तृणंति बर्हिः आनुषक् येषां इंद्रः युवा सखा॥१॥ बृहन् इत् इध्मः एषां भूरि शस्तं पृथुः स्वरुः येषां इंद्रः युवा सखा॥२॥ अयुंजः इत् युधा वृतं शूरः आ अजति सत्वभिः येषां इंद्रः युवा सखा॥३॥ आ बुंदं वृत्रऽहा दृदे जातः पृच्छत् वि मातरं के उ्याः के ह शृण्विरे॥४॥ प्रति त्वा शवसी वदत् गिरौ अप्सः न योधिषत् यः ते शत्रुऽत्वं आऽचके॥५॥४२॥ उत त्वं मघऽवन् शृणु यः ते वष्टि ववक्षि तत् यत् वीळयासि वीळु तत्॥६॥ यत् आजिं याति आजिऽकृत् इंद्रः स्वश्वऽयुः उप रथिऽतमः रथिनां॥७॥ वि सु विश्वाः अभिऽयुजः वज्रिन् विष्वक् यथा वृहः भवं नः सुश्रवःऽतमः॥८॥ अस्माकं सु रथं पुरः इंद्रः कृणोतु सातये नयं धूर्वंति धूर्तयः॥९॥ वृज्यामं ते परि द्विषः अरं ते शक्र दावने गमेम इत् इंद्र गोऽमतः॥१०॥४३॥ शनैः चित् यंतः अद्रिऽवः अश्वऽवंतः शतऽग्विनः विवक्षणाः अनेहसः॥११॥ ऊर्ध्वा हि ते दिवेऽदिवे सहस्रा सूनृता शता जरितृऽभ्यः विऽमंहते॥१२॥ विश्वा हि त्वा धनंऽजयं इंद्र हवंत्हा चित् आऽरुजं आऽदारिणं यथा गयं॥१३॥ ककुहं चित् त्वा कवे मंदंतु धृष्णो इंदवः आ त्वा पणिं यत् ईमहे॥१४॥ यः ते रेवान् अदाशुरिः प्रऽमंमर्षि मघत्तये तस्य नः वेदः आ भर॥१५॥४४॥ इमे ऊं त्वा वि चक्षते सखायः इंद्र सोमिनः पुष्टऽवंतः यथा पशुं॥१६॥ उत त्वा अबधिरं वयं श्रुत्ऽकर्णं संतं ऊतये दूरात् इह हवामहे॥१७॥ यत् शुश्रुयाः इमं हवं दुःऽमर्षं चक्रियाः उत भवेः आपिः नः अंतमः॥१८॥ यत् चित् हि ते अपि व्यथिः जगन्वांसः अमंन्महि गोऽदाः इत् इंद्र वोधि नः॥१९॥ आ त्वा रंभं न जिव्रयः ररभ्म शवसः पते उश्मसि त्वा सधऽस्थे आ॥२०॥४५॥ स्तोत्रं इंद्राय गायत पुरुऽनृम्णाय सत्वने नकिः यं वृ-

खते युधि ॥२१॥ अभि त्वा वृषभा सुते सुतं सृजामि पीतये। तृप्पा व्यश्नुही मदं ॥२२॥ मा त्वा मूरा अविष्यवो मोपहस्वान् आ दभन्। माकीं ब्रह्मद्विषो वनः ॥२३॥ इह त्वा गोपरीणसा महे मंदंतु राधसे। सरो गौरो यथा पिब ॥२४॥ या वृत्रहा परावति सना नवा च चुच्युवे। ता संसत्सु प्र वोचत ॥२५॥ ४६॥ अपिबत्कद्रुवः सुतमिंद्रः सहस्रबाह्वे। अवादेदिष्ट पौंस्यं ॥२६॥ सत्यं तत्तुर्वशे यदौ विदानो अह्नवाय्यं। व्यानट् तुर्वणे शमि ॥२७॥ तरणिं वो जनानां चंदं वाजस्य गोमतः। समानमु प्र शंसिषं ॥२८॥ ऋभुक्षणं न वर्तव उक्थेषु तुग्र्यावृधं। इंद्रं सोमे सचा सुते ॥२९॥ यः कृंतदिद्धि योन्यं त्रिशोकाय गिरिं पृथुं। गोभ्यो गातुं निरेतवे ॥३०॥ ४७॥ यद्धिषे मनस्यसि मंदानः प्रेदियक्षसि। मा तत्करिंद्र मृळय ॥३१॥ दभ्रं चिद्धि त्वावतः कृतं शृणोषि अधि क्षमि। जिगात्विंद्र ते मनः ॥३२॥ तवेदु ताः सुकीर्तयोऽसन्नुत प्रशस्तयः। यदिंद्र मृळयासि नः ॥३३॥ मा नु एकस्मिन्नागसि मा द्वयोरुत त्रिषु। वधीर्मा शूर भूरिषु ॥३४॥ त्रिभया हि त्वावत उपादभिप्रभंगिणः। दस्मादहमृतीषहः ॥३५॥ ४८॥ मा सख्युः शूनमा विदे मा पुत्रस्य प्रभूवसो। आवृत्वद्भूतु ते मनः ॥३६॥ को नु मर्या अमिंथितः सखा सखायमब्रवीत्। जहा को अस्मदीषते ॥३७॥ एवारे वृषभा सुतेऽसिन्वन्भूर्योवयः। श्यावीव नित्रता चरन् ॥३८॥ आ त एना वचोयुजा हरी गृभ्णे सुमद्रथा। यदीं ब्रह्मभ्य इद्ददः ॥३९॥ भिंधि विश्वा अप द्विषः परि बाधो जही मृधः। वसु स्पार्हं तदा भर ॥४०॥ यद्दीक्षाविंद्र यतिष्वरे यत्पर्जन्ये परावति। वसु स्पार्हं तदा भर ॥४१॥ यस्य ते

एते युधि॥२१॥ अभि त्वा वृषभ सुते सुतं सृजामि पीतये तृंपा वि अश्नुहि मदं॥२२॥ मा त्वा मूराः अविष्यवः मा उपऽहस्वानः आ दभन् माकीं ब्रह्मऽद्विषः वनः॥२३॥ इह त्वा गोऽपरीणसा महे मंदंतु राधसे सरः गौरः यथा पिब॥२४॥ या वृचऽहा परा-ऽवति सना नवा च चुच्युवे ता संसत्ऽसु प्र वोचत॥२५॥४६॥ अपिबत् कद्रुवः सुतं इंद्रः सहस्रऽवाह्ये अवं अर्देदिष्ट पौंस्यं॥२६॥ सत्यं तत् तुर्वशे यदौ विदानः अहवाय्यं वि आनट् तुर्वणे शमि॥२७॥ तरणिं वः जनानां चर्दं वाजस्य गोऽमंतः समानं ऊं प्र शंसिषं॥२८॥ ऋभुक्षणं न वर्तवे उक्थेषु तुग्र्यऽवृधं इंद्रं सोमे सचा सुते॥२९॥ यः कृंतत् इत् वि योन्यं चिऽशोकाय गिरिं पृथुं गोभ्यः गातुं निःऽएतवे॥३०॥४७॥ यत् दुधिषे मनस्यसि मंदानः प्रऽइत् इयक्षसि मा तत् कः इंद्र मृळयं॥३१॥ दभ्रं चित् हि त्वाऽवंतः कृतं शृण्वे अधि क्षमि जिगातु इंद्र ते मनः॥३२॥ तवं इत् ऊं ताः सुऽकीर्तयः असन् उत प्रऽशंस्तयः यत् इंद्र मृळयासि नः॥३३॥ मा नः एकस्मिन् आगंसि मा द्वयोः उत त्रिषु वधीः मा शूर भूरिषु॥३४॥ विभयं हि त्वाऽवंतः उग्रात् अभिऽप्रभंगिनः द-स्मात् अहं ऋतिऽसहः॥३५॥४८॥ मा सख्युः शूनं आ विदे मा पुत्रस्य प्रभुऽवसो° आऽवृत्वंत् भूतु ते मनः॥३६॥ कः नु मर्यः अमिंथितः सखा सखायं अब्रवीत् जहा कः अस्मत् ईषते॥३७॥ एवारे वृषभ सुते असिन्वन् भूरि आवयः श्वघ्नीऽइव निऽवता चरन्॥३८॥ आ ते एता वचःऽयुजा हरी गृभ्णे सुमत्ऽरथा यत् ईं ब्रह्मऽभ्यः इत् ददः॥३९॥ भिंधि विश्वाः अप द्विषः परि बाधः जहि मृधः वसु स्पार्हं तत् आ भर॥४०॥ यत् वीळौ इंद्र यत् स्थिरे यत् पर्शाने परांऽभृतं वसु स्पार्हं तत् आ भर॥४१॥ यस्य ते

विश्वमानुषो भूरेर्दत्तस्य वेदति। वसु स्पार्हं तदा भर॥४२॥४९॥३॥

॥ ४६ ॥ १–३३ वशोऽश्वः ॥ १–२०. २९–३१. ३३ इंद्रः । २१–२४ पपुथ्यसः कानीतस्य दानस्तुतिः । २५–२८ ३२ वायुः ॥ १ पादनिचृत् । २–४. ६. १०. २३ २९. ३३ गायत्री । ५ ककुप् । ७. ११. १९. २५. २७ बृहती । ८ अनुष्टुप् । ९. २६. २८ सतोबृहती । १२ विपरीता । १३ द्विपदा । १४ बृहती विपरीतालिकमध्या । १५ ककुम्न्यंकुशिरा । १६ विराट् । १७ जगती । १८ उपरिष्टाद्बृहती । २० विषमपदा । २१. २२. २४ ३२ पंक्तिः । ३० द्विपदा विराट् । ३१ सप्तिक् ॥

॥४६॥ त्वावतः पुरूवसो वयमिंद्र प्रणेतः। स्मसि स्थातर्हरीणां ॥१॥ त्वां हि सत्यमद्रिवो विभ्म दातारमिषां। विभ्म दातारं रयीणां॥२॥ आ यस्य ते महिमानं शतमूते शतक्रतो। गोभिर्गृणंति कारवः॥३॥ सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा। मित्रः पांत्यदुर्हः॥४॥ दधानो गोमदश्ववत्सुवीर्यमादित्यजूत एधते। सदा राया पुरुस्पृहा ॥५॥१॥ तमिंद्रं दानमीमहे शवसानमभीर्वं। ईशानं राय ईमहे॥६॥ तस्मिन्हि संत्यूतयो विश्वा अभीरवः सचा। तमा वहंतु सप्तयः पुरूवसुं मदाय हरयः सुतं॥७॥ यस्ते मदो वरेण्यो य इंद्र वृत्रहंतमः। य आददिः स्वर्नृभिर्यः पृतनासु दुष्टरः॥८॥ यो दुष्टरो विश्ववार श्रवाय्यो वाजेष्वस्ति तरुता। स नः शविष्ठ सवना वसो गहि गमेम गोमति व्रजे॥९॥ गव्यो षु णो यथा पुराश्वयोत रथ्या। वरिवस्य महामह॥१०॥२॥ नहि ते शूर राधसोऽंतं विंदामि सचा। दशस्या नो मघवन्नू चिदद्रिवो धियो वाजेभिराविथ॥११॥ य चाप्रः श्रावयत्सखा विश्वेत्स वेद जनिमा पुरुष्टुतः। तं विश्वे मानुषा युगेंद्रं हवंते तविषं यतस्रुचः॥१२॥ स नो वाजेष्वविता पुरूवसुः पुरःस्याता। मघवा वृत्रहा भुवत्॥१३॥ अभि वो वीरमंधसो मदेषु गाय गिरा महा विचेतसं। इंद्रं नाम श्रुत्यं शाकिनं वचो यथा॥१४॥ दृदी रेक्णस्तन्वे दृदिर्वसुं दृदिर्वाजेषु पुरुहूत वाजिनं।

विंश्वऽमानुषभूरेः दत्तस्य वेदति वसु स्याहि तत् आ भर ॥४२॥
॥४९॥३॥

॥४६॥ त्वाऽवंतः पुरुऽवसोः वयं इंद्र प्रऽनेतः स्मसि स्यात् हरीणां ॥१॥ त्वां हि सत्यं अद्रिऽवः विप्र दातारं इषां विप्र दातारं रयीणां ॥२॥ आ यस्य ते महिमानं शतंऽऊते शतंऽऋतो गीःऽभिः गृणंति कारवः ॥३॥ सुऽनीथः घ सः मर्त्यः यं मरुतः यं अर्यमा मित्रः पांति अद्रुहः ॥४॥ दधानः गोऽमत् अश्वऽवत् सुऽवीर्यं आदित्यऽजूतः एधते सदा राया पुरुऽस्पृहा ॥५॥१॥ तं इंद्रं दानं ईमहे शवसानं अभीर्वे ईशानं रायः ईमहे ॥६॥ तस्मिन् हि संति ऊतयः विश्वाः अभीरवः सचा तं आ वहंतु सप्तयः पुरुऽवसुं मदाय हरयः सुतं ॥७॥ यः ते मदः वरेण्यः यः इंद्र वृत्रहन्ऽतमः यः आऽददिः स्वः नृऽभिः यः पृतनासु दुस्तरः ॥८॥ यः दुस्तरः विश्वऽवार अवार्यः वाजेषु अस्ति तरुता सः नः शविष्ठ सवना आ वसो गहि गमेम गोऽमति व्रजे ॥९॥ गव्यो सु नः यथा पुरा अश्वऽया उत रथऽया वरिवस्य महाऽमह ॥१०॥२॥ नहि ते शूर राधसः अंतं विंदामि सचा दशस्य नः मघऽवन् नु चित् अद्रिऽवः धियः वाजेभिः आविथ ॥११॥ यः चर्षणिः अवयत्ऽसखा विश्वा इत् सः वेद जनिम पुरुऽस्तुतः तं विशे मानुषा युगा इंद्रं हवंते तविषं यतऽसुचः ॥१२॥ सः नः वाजेषु अविता पुरुऽवसुः पुरःऽस्थाता मघऽवा वृत्रऽहा भुवत् ॥१३॥ अभि वः वीरं अंधसः मदेषु गाय गिरा महा विऽचेतसं इंद्रं नाम श्रुत्यं शाकिनं वचः यथा ॥१४॥ ददिः रेक्णः तत्वे ददिः वसु ददिः वाजेषु पुरुऽहूत वाजिनं

विश्वमानुषो भूरेर्दत्तस्य वेदति। वसु स्पार्हं तदा भर ॥४२॥४९॥३॥

॥ ४६ ॥ १–३३ यशोऽश्व्यः ॥ १–२०. २९–३१. ३३ इंद्रः । २१–२४ पृषुश्रवसः कानीतस्य दानस्तुतिः । २५–२८. ३२ यायुः ॥ १ पादनिचृत् । २–४. ६. १०. २२. २९. ३३ गायत्री । ५ ककुप् । ७. ११. १९. २५. ३७ बृहती । ८ अनुष्टुप् । ९. २६. २८ सतोबृहती । १२ विपरीता । १३ द्विपदा । १४ बृहती विपौलिकमध्या । १५ ककुम्मत्यनुशिष्टा । १६ विराट् । १७ जगती । १८ उपरिष्टाद्बृहती । २० विषमपदा । २१. २३. २४. ३२ पंक्तिः । ३० द्विपदा विराट् । ३१ उष्णिक् ॥

॥ ४६ ॥ त्वावंतः पुरूवसो वयमिंद्र प्रणेतः। स्मसि स्थातर्हरीणां ॥१॥ त्वां हि सत्यमद्रिवो विद्म दातारमिषां। विद्म दातारं रयीणां ॥२॥ आ यस्ते महिमानं शतमूते शतक्रतो। गीर्भिर्गृणंति कारवः ॥३॥ सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा। मित्रः पांत्यदुर्हः ॥४॥ दधानो गोमदश्ववत्सुवीर्यमादित्यजूत एधते। सदा राया पुरुस्पृहा ॥५॥१॥ तमिंद्रं दानमीमहे शवसानमभीर्वे। ईशानं राय ईमहे ॥६॥ तस्मिन्हि संत्यूतयो विश्वा अभीरवः सचा। तमा वहंतु सप्तयः पुरूवसुं मदाय हरयः सुतं ॥७॥ यस्ते मदो वरेण्यो य इंद्र वृत्रहंतमः। य आददिः स्व१र्नृभिर्यः पृतनासु दुष्टरः ॥८॥ यो दुष्टरो विश्ववार श्रवाय्यो वाजेष्वस्ति तरुता। स नः शविष्ठ सवना वसो गहि गमेम गोमति व्रजे ॥९॥ गव्यो षु णो यथा पुराश्वयोत रंरण्या। वरिवस्य महामह ॥१०॥२॥ नहि ते शूर राधसोऽंतं विंदामि सचा। दशस्या नो मघवन्नू चिदद्रिवो धियो वाजेभिराविथ ॥११॥ य ऋष्वः श्रावयत्सखा विश्वेत्स वेद जनिमा पुरुष्टुतः। तं विश्वे मानुषा युगेंद्रं हवंते तविषं यतस्रुचः ॥१२॥ स नो वाजेष्वविता पुरूवसुः पुरःस्याता। मघवा वृत्रहा भुवत् ॥१३॥ अभि वो वीरमंधसो मदेषु गाय गिरा महा विचेतसं। इंद्रं नाम श्रुत्यं शाकिनं वचो यथा ॥१४॥ ददी रेक्णस्तन्वे ददिर्वसु ददिर्वाजेषु पुरुहूत वाजिनं।

विश्वऽमानुषः भूरेः दत्तस्य वेदति वसु स्पार्हे तत् आ भर ॥४२॥
॥४९॥३॥

॥४६॥ त्वाऽवंतः पुरुऽवसोऽवयं इंद्र प्रऽनेतःऽस्मसि स्याताः हरीणां ॥१॥ त्वां हि सत्यं अद्रिऽवः विप्र दातारं इषां विप्र दातारं रयीणां ॥२॥ आ यस्य ते महिमानं शतंऽऊते शतंऽक्रतोऽगीःऽभिः गृणंति कारवः ॥३॥ सुऽनीथः घ सः मर्त्यः यं मरुतः यं अर्यमा मित्रः पांति अद्रुहः ॥४॥ दधानः गोऽमत् अश्वऽवत् सुऽवीर्यं आदित्यऽजूतः एधते सदा राया पुरुऽस्पृहा ॥५॥१॥ तं इंद्रं दानं ईमहे शवसानं अभीर्वं ईशानं रायः ईमहे ॥६॥ तस्मिन् हि संति ऊतयः विश्वाः अभीरवः सचा तं आ वहंतु सप्तयः पुरुऽवसुं मदाय हरयः सुतं ॥७॥ यः ते मदः वरेण्यः यः इंद्र वृत्रहन्ऽतमः यः आऽददिः स्वः नृऽभिः यः पृतनासु दुस्तरः ॥८॥ यः दुस्तरः विश्वऽवार अवार्यः वाजेषु अस्ति तरुता सः नः शविष्ठ सवना आ वसोऽगहि गमेम गोऽमति व्रजे ॥९॥ गव्योऽसु नः यथा पुरा अश्वऽया उत रथऽया वरिवस्य महाऽमह ॥१०॥२॥ नहि ते शूर राधसः अंतं विंदामि सचा दशस्य नः मघऽवन् नु चित् अद्रिऽवः धियः वाजेभिः आविथ ॥११॥ यः चुच्युः अवयत्ऽसखा विश्वा इत् सः वेद जनिम पुरुऽस्तुतः तं विश्वे मानुषा युगा इंद्रं हवंते तविषं यतऽसुचः ॥१२॥ सः नः वाजेषु अविता पुरुऽवसुः पुरःऽस्याता मघऽवा वृत्रऽहा भुवत् ॥१३॥ अभि वः वीरं अंधसः मदेषु गाय गिरा महा विऽचेतसं इंद्रं नामं श्रुत्यं शाकिनं वचः यथा ॥१४॥ ददिः रेक्णः तत्वे ददिः वसु ददिः वाजेषु पुरुऽहूत वाजिनं

नूनमर्थ ॥१५॥३॥ विश्वेषामिरज्यंतं वसूनां सासद्वांसं चिदस्य वर्पसः। कृपयतो नूनमत्यर्थ ॥१६॥ महः सु वो अरमिषे स्तवामहे मीळ्हुषे अरंगमाय जग्मये। यज्ञेभिर्गीर्भिर्विश्वमनुषां मरुतामियक्षसि गायें त्वा नमसा गिरा ॥१७॥ ये यातयंते अज्मभिर्गिरीणां स्वभिरेषां। यज्ञं महिघ्नणीनां सुम्नं तुविघ्नणीनां प्राध्वरे ॥१८॥ प्रभंगं दुर्मतीनामिंद्र शविष्ठा भर। रयिमस्मभ्यं युज्यं चोदयन्मते ज्येष्ठं चोदयन्मते ॥१९॥ सनितः सुसनितरुग्र चिच्र चेतिष्ठ सूनृत। प्रासहा सस्राद् सहुरिं सहंतं भुज्युं वाजेषु पूर्व्यं ॥२०॥४॥ आ स एतु य ईवदाँ अदेवः पूर्तमादुदे। यथा चिद्वशो अश्व्यः मृगुश्रवसि कानीतेऽस्या व्युषादुदे ॥२१॥ पष्टिं सहस्राश्वस्यायुतासनमुष्ट्रानां विंशतिं शता। दश श्यावीनां शता दश ऋष्वीणां दश गवां सहस्रा ॥२२॥ दश श्यावा चतुर्धर्यो वीतवारास आशवः। मघा नेमिं नि वावृतुः ॥२३॥ दानासः पृथुश्रवसः कानीतस्य सुराधसः। रथं हिरण्ययं ददुर्महिष्ठः सूरिरभूद्यविष्ठमकृत श्रवः ॥२४॥ आ नो वायो महे तने याहि मखाय पाजसे। वयं हि ते चकृमा भूरि दावने सद्यश्चिन्महि दावने ॥२५॥५॥ यो अश्वेभिर्वहते वस्त उस्रास्त्रिः सप्त सप्ततीनां। एभिः सोमेभिः सोमसुद्भिः सोमपा दानाय शुक्रपूतपाः ॥२६॥ यो मं दुमं चिदु त्मनामंदच्चिचं दावने। अरद्धे अक्षे नहुषे सुकृत्वनि सुकृत्तराय सुक्रतुः ॥२७॥ उच्चथ्येऽवर्पुषि यः स्वराळुत वायो घृतस्नाः। अश्वेयितं रजेपितं शुनेपितं प्राज्म तदिदं नु तत् ॥२८॥ अर्ध प्रियमिषिरायं पष्टिं सहस्रासनं। अश्वानामिव वृष्णां ॥२९॥

नूनं अर्च॥१५॥३॥ विश्वेषां इज्जयंतं वसूनां सुसुह्वांसं चित् अस्य वर्पसः कुपऽयतः नूनं अर्ति अर्च॥१६॥ महः सु वः अरं इषे स्तवामहे मीळ्हुषे अरंऽगमाय जग्मये यज्ञेभिः गीःऽभिः विष्वऽमनुषां मरुतां इयक्षसि गायेत्वा नमसा गिरा॥१७॥ ये पातयंते अज्मंऽभिः गिरीणां स्नुऽभिः एषां यज्ञं महिऽस्वनीनां सुम्नं तुविऽस्वनीनां प्र अश्रेरे॥१८॥ प्रऽभंगं दुःऽमतीनां इंद्र शविष्ठ आ भर रयिं अस्मभ्यं युज्यं चोदयत्ऽमते ज्येष्ठं चोदयत्ऽमते॥१९॥ सनितः सुऽसनितः उर्वं चिच्च चेतिष्ठ सूनृत प्रऽसहा संऽराट् सहुरिं सहंतं भुज्युं वाजेषु पूर्व्यं॥२०॥४॥ आ सः एतु यः ईवत् आ अदेवः मूर्तं आऽददे यथा चित् वशः अश्व्यः मृगुऽअर्वसि कानीते अस्याः विऽउपि आऽददे॥२१॥ पृक्षिं सहस्रा अश्वस्य अयुता असनं उष्ट्रानां विंशतिं शता दश श्यावीनां शता दश चिऽअरुषीणां दश गवां सहस्रा॥२२॥ दश श्यावाः शुधत्ऽरयः वीतऽवारासः आशवः मघाः नेमिं नि ववृतुः॥२३॥ दानासः पृगुऽअर्वसः कानीतस्य सुऽराधसः रथं हिरण्ययं ददत् मंहिष्ठः सूरिः अभूत् वर्पिष्ठं अकृत श्रवः॥२४॥ आ नः वायो महे तने याहि मखाय पाजसे वयं हि ते चकृम भूरि दावने सद्यः चित् महि दावने॥२५॥५॥ यः अश्वेभिः वहते वस्ते उस्राः चिः सप्त सप्तीनां एभिः सोमेभिः सोमसुत्ऽभिः सोमऽपाः दानाय शुक्रपूतऽपाः॥२६॥ यः मे इमं चित् ऊं त्मना अमंदत् चित्रं दावने अर्द्धे अक्षे नहुषे सुऽकृत्वनि सुकृत्ऽतराय सुऽक्रतुः॥२७॥ उच्चर्ये वयुषि यः स्वऽराट् उत वायो घृतऽस्नाः अश्वंऽइषितं रजःऽइषितं शुनाऽइषितं प्र अज्मं तत् इदं नु तत्॥२८॥ अर्च प्रियं इषिराय पृक्षिं सहस्रा असनं अश्वानां इत् न वृष्णां॥२९॥

गावो न यूथमुप यंति वध्रय उप मा यंति वध्रयः ॥३०॥ अध यन्नारंधे गणे शतमुष्ट्राँ अचिक्रदत्। अध स्विन्नेषु विंशतिं शता ॥३१॥ शतं दासे वंल्बूथे विप्रस्तरुक्ष आ ददे। ते ते वायविमे जना मदंतीर्देवगोपा मदंति देवगोपाः ॥३२॥ अध स्या योषणा मही प्रतीची वशंमुश्मि। अधिरुक्मा वि नीयते ॥३३॥ ६॥

॥४७॥ १–१८ त्रित आप्त्यः ॥ १–१३ आदित्याः । १४–१८ आदित्या उषाश्च ॥ महापंक्तिः ॥

॥४७॥ महि वो महतामवो वरुण मित्र दाशुषे। यमादित्या अभि द्रुहो रक्षथा नेमघं नशदनेहसो व ऊतयः सुऊतयो व ऊतयः ॥१॥ विदा देवा अधानामादित्यासो अपाकृतिं। पक्षा वयो यथोपरि व्यस्मे शर्म यच्छतानेहसो व ऊतयः सुऊतयो व ऊतयः ॥२॥ व्यस्मे अधि शर्म तत्पक्षा वयो न यंतन। विश्वानि विश्ववेदसो वरूथ्या मनामहेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥३॥ यस्मा अरासत क्षयं जीवातुं च प्रचेतसः। मनोर्विश्वस्य घेदिम आदित्या राय ईशतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥४॥ परि णो वृणजन्नघा दुर्गाणि रथ्यो यथा। स्यामेदिंद्रस्य शर्मण्यादित्यानामुतावस्यनेहसो व ऊतयः सुऊतयो व ऊतयः ॥५॥७॥ परिह्रुतेदना जनो युष्मादत्तस्य वायति। देवा अदब्धमाश वो यमादित्या अहेतनानेहसो व ऊतयः सुऊतयो व ऊतयः ॥६॥ न तं तिग्मं चन त्यजो न द्रासदभि तं गुरु। यस्मा उ शर्म सप्रथ आदित्यासो अरध्यमनेहसो व ऊतयः सुऊतयो व ऊतयः ॥७॥ युष्मे देवा अपि ष्मसि युध्यंत इव वर्मसु। यूयं महो न एनसो यूयमर्भादुरुष्यतानेहसो व ऊतयः सुऊतयो व ऊतयः ॥८॥ अदितिर्न उरुष्यत्वदितिः शर्म य-

गावः न यूथं उप यंति वध्रयः उप मा आ यंति वध्रयः॥३०॥ अध यत् चारंथे गणे शतं उष्ट्रान् अचिक्रदत् अध श्वित्नेषु विंशतिं शता॥३१॥ शतं दासे वल्वूथे विप्रः तरुक्षे आ ददे ते ते वायो इमे जनाः मदंति इंद्रऽगोपाः मदंति देवऽगोपाः॥३२॥ अध स्या योः पर्णा मही प्रतीची वशं अप्यं अधिऽरुक्मा वि नीयते॥३३॥ ६॥

॥ ४७ ॥ महि वः महतां अवः वरुण मित्र दाशुषे यं आदित्याः अभि द्रुहः रक्षथ न दुःशंसं नशत् अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥१॥ विद देवाः अघानां आदित्यासः अपऽआकृतिं पक्षा वयः यथा उपरि वि अस्मे शर्म यच्छत अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥२॥ वि अस्मे अधि शर्म तत् पक्षा वयः न यंतन विष्वानि विश्वऽवेदसः वरूथ्या मनामहे अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥३॥ यस्मै अरासत क्षयं जीवातुं च प्रऽचेतसः मनोः विश्वस्य घ इत् इमे आदित्याः रायः ईशते अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥४॥ परि नः वृणज्न् अघा दुःऽगानि रथ्यः यथा स्याम इत् इंद्रस्य शर्मणि आदित्यानां उत अवसि अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥५॥ ७॥ परिऽहृता इत् अना जनः युष्माऽदत्तस्य वायति देवाः अदब्धं आशु वः यं आदित्याः अहेतन अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥६॥ न तं तिग्मं चन त्यजः न द्रासत् अभि तं गुरु यस्मै ऊं शर्म सऽप्रथः आदित्यासः अरध्यं अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥७॥ युष्मे देवाः अपि ष्मसि युध्यंतःऽइव वर्मऽसु यूयं महः नः एनसः यूयं अर्भात् उरुष्यत अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः॥८॥ अदितिः नः उरुष्यतु अदितिः शर्म यः

च्छतु। माता मित्रस्य रेवतोऽर्यम्णो वरुणस्य चानेहसो व ऊतयः सुऊतयो व ऊतयः॥९॥ यद्देवाः शर्म शरणं यद्भद्रं यदनातुरं। त्रिधातु यद्वरूथ्यं१तदस्मासु वि यंतनानेहसो व ऊतयः सुऊतयो व ऊतयः॥१०॥८॥ आदित्या अव हि ख्यताधि कूलादिव स्पशः। सुतीर्थमर्वतो यथानु नो नेषथा सुगमनेहसो व ऊतयः सुऊतयो व ऊतयः॥११॥ नेह भद्रं रक्षस्विने नावयै नोपया उत। गवे च भद्रं धेनवे वीराय च श्रवस्यतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः॥१२॥ यदाविर्यदपीच्यं१देवासो अस्ति दुष्कृतं। त्रिते तद्विश्वमाप्त्य ऋरे अस्मद्धातनानेहसो व ऊतयः सुऊतयो व ऊतयः॥१३॥ यच्च गोषु दुःष्वप्न्यं यच्चास्मे दुहितर्दिवः। त्रिताय तद्विभावर्याप्राय परा वहानेहसो व ऊतयः सुऊतयो व ऊतयः॥१४॥ निष्कं वा या कृणवते स्रजं वा दुहितर्दिवः। त्रिते दुःष्वप्न्यं सर्वमाप्त्ये परि दद्मस्यनेहसो व ऊतयः सुऊतयो व ऊतयः॥१५॥९॥ तदन्नाय तदपसे तं भागमुपसेदुषे। त्रिताय च द्विताय चोषो दुःष्वप्न्यं वहानेहसो व ऊतयः सुऊतयो व ऊतयः॥१६॥ यथा कलां यथा शफं यथर्णं संनयामसि। एवा दुःष्वप्न्यं सर्वमाप्त्ये सं नयामस्यनेहसो व ऊतयः सुऊतयो व ऊतयः॥१७॥ अजैष्माद्यासनाम चाभूमानागसो वयं। उषो यस्माद्दुःष्वप्न्यादभैष्माप तदुच्छत्वनेहसो व ऊतयः सुऊतयो व ऊतयः॥१८॥१०॥

॥ ४८ ॥ १–१७ इरापुत्रः काण्वः ॥ मोषः ॥ १–४ ६–१७ त्रिष्टुप्। ५ भुरिक्॥

॥४८॥ स्वादोरभिष्टि वयसः सुमेधाः स्वाध्यो वरिवोविन्नरस्य। विश्वे यं देवा उत मर्त्यासो मधु ब्रुवंतो अभि संऽ

च्छतु माता मित्रस्य रेवतः अर्यमणः वरुणस्य च अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥९॥ यत् देवाः शर्मं शरणं यत् भद्रं यत् अनातुरं चिऽधातु यत् वरूथ्यं तत् अस्मासु वि यंतन अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१०॥८॥ आदित्याः अवं हि खातं अधि कूलात्ऽइव स्पशः सुऽतीर्थे अर्वतः यथा अनुं नः नेषथ सुऽगं अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥११॥ न इह भद्रं रक्षस्विने न अवऽयै न उपऽयै उत गवे च भद्रं धेनवे वीराय च श्रवस्यते अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१२॥ यत् आविः यत् अपीच्यं देवासः अस्ति दुःऽकृतं चिते तत् विश्वं आप्ये आरे अस्मत् दधातन अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१३॥ यत् च गोषु दुःस्वप्न्यं यत् च अस्मे दुहितः दिवः चितायं तत् विभाऽवरि आप्राय परा वह अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१४॥ निष्कं वा घ कृणवते स्रजं वा दुहितः दिवः चिते दुःऽस्वप्न्यं सर्वं आप्ये परि दद्मसि अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१५॥९॥ तत्ऽअंन्नाय तत्ऽअपसे तं भागं उपऽसेदुषे चितायं च द्वितायं च उषः दुःऽस्वप्न्यं वह अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१६॥ यथा कलां यथा शफं यथा ऋणं संऽनयामसि एव दुःऽस्वप्न्यं सर्वं आप्ये सं नयामसि अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१७॥ अजैष्म अद्य असनाम च अभूम अनागसः वयं उषः यस्मात् दुःऽस्वप्नात् अभैष्म अप तत् उच्छतु अनेहसः वः ऊतयः सुऽऊतयः वः ऊतयः ॥१८॥१०॥

॥४८॥ स्वादोः अभक्षि वयसः सुऽमेधाः सुऽआर्यः वरिवोवित्ऽतरस्य विश्वे यं देवाः उत मर्त्यासः मधु ब्रुवंतः अभि संऽ

चरंति ॥१॥ अंतश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य । इंद्रविंद्रस्य सख्यं जुषाणः प्रौष्ठीव धुरमनु राय ऋंध्याः ॥२॥ अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् । किं नूनमस्मान्कृणवदराति: किमु धूर्तिरमृत मर्त्यस्य ॥३॥ शं नो भव हृद आ पीत इंदो पितेव सोम सूनवे सुशेवः । सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः ॥४॥ इमे मा पीता यशसं उरुष्यवो रथं न गावः समनाहु पर्वसु । ते मा रक्षंतु विस्रसश्चरित्रादुत मा स्रामाद्यवयंत्विंदवः ॥५॥११॥ अग्निं न मा मथितं सं दिदीपः प्र चक्षय कृणुहि वस्यसो नः । अथा हि ते मद आ सोम मन्ये देवाँ इव प्र चरा पुष्टिमच्छ ॥६॥ इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः । सोम राजन्प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि ॥७॥ सोम राजन्मृळया नः स्वस्ति तव स्मसि व्रत्या३ स्तस्य विद्धि । अलर्ति दृष्टा उत मन्युरिंदो मा नो अर्यो अनुकामं परा दाः ॥८॥ त्वं हि नस्तन्वः सोम गोपा गात्रेगात्रे निषसत्था नृचक्षाः । यत्ते वयं प्रमिनाम व्रतानि स नो मृळ सुषखा देव वस्यः ॥९॥ चतूरथेण सख्या सचेय यो मा न रिषेदधर्ष्य पीतः । अयं यः सोमो न्यधायि यस्मे तस्मा इंद्रं प्रतिरमेम्यायुः ॥१०॥१२॥ अप त्या अस्युरनिरा अमीवा निरचस्तमिषीरैभ्युः । आ सोमो अस्माँ अरुहद्विहाया अगन्म यत्र प्रतिरंत आयुः ॥११॥ यो न इंदुः पितरो हृत्सु पीतोऽमर्त्यो मर्त्याँ आविवेश । तस्मै सोमाय हविषा विधेम मृळीके अस्य सुमतौ स्याम ॥१२॥ त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततंथ । तस्मै

ऽचरँति॥१॥ अंतः॑ च॒ प्र अगा॑ः अदि॑तिः भ॒वा॒सि॒ अव॑ऽयाता हर॑ः. सः दैव्यस्य इंदो॑ः इंद्र॑स्य सख्यं जु॒षा॒णः प्रौष्टीऽइव धुरं॑ अनु॑ रा॒ये ऋ॒ध्याः॥२॥ अपा॑म सोमं॑ अ॒मृता॑ः अभूम॒ अग॑न्म ज्योति॑ः अवि॑दाम देवान् किं नू॑नं अ॒स्मान् कृ॒णव॑त् अरा॑तिः किं ऊं॑ धू॒र्ति॑ः अ॒मृ॒त॒ मर्त्यस्य॥३॥ शं नः॑ भव हृ॒दे आ पी॒तः इंदो॑ पि॒ताऽइ॑व सोम॒ सू॒नवे॑ सु॒ऽशेवः॑ सखा॑ऽइव सख्ये॑ उरु॒ऽशंस॒ धीर॑ः प्र नः॒ आयुः॑ जी॒वसे॑ सोम तारीः॥४॥ इ॒मे मा॒ पी॒ताः य॒शसः॑ उरु॒ऽप्वः॑ रथं॑ न गा॒वः॑ सं अ॒ना॒ह॒ पर्व॑ऽसु ते मा॒ रक्षं॑तु वि॒ऽश्वसः॑ चरि॒त्रात् उ॒त मा॒ स्रा॒मा॑त् यवयंतु इंदवः॥५॥११॥ अ॒ग्निं न मा॒ मथि॑तं सं दि॒दी॒पः प्र च॒क्षय॑ कृणुहि वस्यसः नः॒ अर्थं॑ हि ते॒ मदे॑ आ सो॒म॒ मन्ये॑ र॒वान्॑ऽइव प्र च॑र॒ पुष्टिं॑ अच्छ॥६॥ इ॒षि॒रेण॑ ते॒ मन॑सा सु॒तस्य॑ भक्षी॒महि॑ पि॒त्र्य॑स्य॑ऽइव रा॒यः सोम॑ राजन् प्र नः॒ आयूं॑षि तारीः अहा॑नि॑ऽइव सूर्यः॑ वा॒स॒राणि॑॥७॥ सोम॑ राजन् मृळय॑ नः॒ स्व॒स्ति तव॑ स्मसि व्र॒त्याः॑ तस्य॑ विद्धि अल॑र्ति दक्षः॑ उ॒त म॒न्युः॒ इंदो॑ मा नः॒ अ॒र्यः॑ अनु॑ऽकामं परा॑ दाः॥८॥ त्वं हि नः॒ त॒न्वः॑ सोम॒ गोपाः॑ गा॒वेऽगा॑वे नि॒ऽस॒स॒त्थ॒ नृ॒ऽचक्षाः॑ यत् ते॒ वयं॑ प्र॒ऽमि॒नाम॑ व्र॒तानि॑ सः नः॒ मृ॒ळ॒ सु॒ऽस॒खा दे॑व वस्यः॥९॥ ऋ॒दू॒दरे॑ण सख्या॑ सचेय॒ यः मा॒ न रि॑ष्येत् हरि॑ऽअश्व पी॒तः अ॒यं यः सोमः॑ नि अधा॑यि अ॒स्मे॑ तस्मै॑ इंद्र॑ प्र॒ऽतिरं॑ एमि॒ आयुः॑॥१०॥१२॥ अप॑ त्याः अ॒स्युः अनि॑राः अमी॑वाः निः अ॒व॒स॒न् तमि॑षीचीः अभै॑षुः आ सोमः॑ अ॒स्मान् अ॒रु॒हत् वि॒ऽहा॑याः अग॑न्म यत्र॑ प्र॒ऽतिर॑न्ते॑ आयुः॑॥११॥ यः नः॒ इंदुः॑ पि॒तरः॑ हृ॒त्ऽसु॒ पी॒तः अ॒मर्त्यः॑ मर्त्या॑न् आ॒ऽवि॒वेश॑ तस्मै॑ सोमा॑य ह॒विषा॑ विधेम मृ॒ळी॒के अ॒स्य॒ सु॒ऽम॒तौ स्या॑म॥१२॥ त्वं सो॒म॒ पि॒तृ॒ऽभिः॑ सं॒ऽविदा॑नः अनु॑ द्या॒वा॒पृ॒थि॒वी॑ आ त॑तंथ॒ तस्मै॑

न इंदो हविषा विधेम वयं स्याम पतयो रयीणां ॥१३॥ चातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः। वयं सोमस्य विश्वहा प्रियासः सुवीरासो विदथमा वदेम ॥१४॥ त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः। त्वं न इंद्र ऊतिभिः सजोषाः पाहि पश्चादुत वा पुरस्तात् ॥१५॥१३॥६॥

॥ अथ वालखिल्यं ॥

॥ ४९ ॥ १–१० प्रस्कण्वः काण्वः ॥ इंद्रः ॥ प्रागाथं ॥

॥४९॥ अभि प्र वः सुराधसमिंद्रमर्च यथा विदे। यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥१॥ शतानीकेव प्र जिगाति धृष्णुया हंति वृत्राणि दाशुषे। गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥२॥ आ त्वा सुतास इंदवो मदा य इंद्र गिर्वणः। आपो नु वज्रिन्नन्वोक्यं सरः पृणंति शूर राधसे ॥३॥ अनेहसं प्रतरणं विवक्षणं मध्वः स्वादिष्ठमीं पिब। आ यथा मंदसानः किरासि नः प्र क्षुद्रेव त्मना धृषत् ॥४॥ आ नः स्तोममुप द्रवद्धियानो अश्वो न सोतृभिः। यं ते स्वधावन्त्स्वदयंति धेनव इंद्र कण्वेषु रातयः ॥५॥१४॥ उपं न वीरं नमसोप सेदिम विभूतिमक्षितावसुं। उद्रीव वज्रिन्नवतो न सिंचते दात्रैतींद्र धीतयः ॥६॥ यद्वा नूनं यद्वा यज्ञे यद्वा पृथिव्यामधि। अतो नो यज्ञमाशुभिर्महेमत उप उपेभिरा गहि ॥७॥ अजिरासो हरयो ये ते आशवो वाता इव प्रसक्षिणः। येभिरपत्यं मनुषः परीयसे येभिर्विश्वं स्वर्दृशे ॥८॥ एतावंतस्त ईमहे इंद्र सुम्नस्य गोमतः। यथा प्रावो मघवन्मेध्यातिथिं यथा नीपातिथिं

ने इंदो हविषा विधेम वयं स्याम पतयः रयीणां ॥१३॥ चातारः देवाः अधि वोचत नः मा नः निऽद्राः ईशत मा उत जल्पिः वयं सोमस्य विश्वहा प्रियासः सुऽवीरासः विदथं आ वदेम ॥१४॥ त्वं नः सोम विश्वतः वयःऽधाः त्वं स्वःऽवित् आ विश नृऽचक्षाः त्वं नः इंदो ऊतिऽभिः सुऽजोषाः पाहि पश्चातात् उत वा पुरस्तात् ॥१५॥१३॥६॥

॥ अथ वालखिल्यं ॥

॥४९॥ अभि प्र वः सुऽराधसं इंद्रं अर्च यथा विदे यः जरितृऽभ्यः मघऽवा पुरुऽवसुः सहस्रेणऽइव शिक्षति ॥१॥ शतानीकाऽइव प्रजिगाति धृष्णुऽया हंति वृत्राणि दाशुषे गिरेःऽइव प्र रसाः अस्य पिन्विरे दत्राणि पुरुऽभोजसः ॥२॥ आ त्वा सुतासः इंदवः मदाः ये इंद्र गिर्वणः आपः नु वज्रिन् अनु ओकं सरः पृणंति शूर राधसे ॥३॥ अनेहसं प्रऽतरणं विवक्षणं मध्वः स्वादिष्ठं ईं पिब आ यथा मंदसानः किरासि नः प्र क्षुद्राऽइव त्मना धृषत् ॥४॥ आ नः सोमे उप द्रवत् हियानः अश्वः न सोतृऽभिः यं ते स्वधाऽवन् स्वदयंति धेनवः इंद्र कर्णेषु रातयः ॥५॥१४॥ उयं न वीरं नमसा उप सेदिम विऽभूतिं अक्षितऽवसुं उद्रीऽइव वज्रिन् अवतः न सिंचते क्षरंति इंद्र धीतयः ॥६॥ यत् ह नूनं यत् वा यज्ञे यत् वा पृथिव्यां अधि अतः नः यज्ञं आशुऽभिः महेऽमते उयः उयेभिः आ गहि ॥७॥ अजिरासः हरयः ये ते आशवः वाताःऽइव प्रऽसक्षिणः येभिः अपत्यं मनुषः परिऽईयसे येभिः विश्वं स्वः दृशे ॥८॥ एतावंतः ते ईमहे इंद्र सुम्नस्य गोऽमंतः यथा प्र आवः मघऽवन् मेध्यऽअतिथिं यथा नीपऽअतिथिं

धनें ॥९॥ यथा कण्वे मघवन्त्सप्तर्स्यवि यथा पक्थे दश-व्रजे । यथा गोशर्ये असनोर्ऋजिश्वनींद्र गोमद्धिरण्यवत् ॥१०॥१५॥

॥ ५० ॥ १–१० पुष्टिगुः काण्वः ॥ इंद्रः ॥ प्रागाथं ॥

॥५०॥ प्र सु श्रुतं सुराधसमर्चा शक्रमभिष्टये। यः सुन्वते स्तु-वते काम्यं वसु सहस्रेणेव मंहते ॥१॥ शुतानीका हेतयो अस्य दुष्टरा इंद्रस्य समिषो महीः। गिरिर्न भुज्मा मघवत्सु पिन्वते य-दीं सुता अमंदिषुः॥२॥ यदीं सुतास इंदवोऽभि प्रियममंदिषुः। आपो न धायि सवनं म आ वसो दुधा इवोप दाशुषे॥३॥ अने-हसं वो हवमानमूतये मध्वः क्षरंति धीतयः। आ त्वा वसो हव-मानास इंदव उप स्तोत्रेषु दधिरे॥४॥ आ नः सोमे स्वध्वरं इया-नो अत्यो न तोशते। यं ते स्वदावन्स्वदंति गूर्तयः पौरं छंदयसे हवं ॥५॥१६॥ प्र वीरमुग्रं विविचिं धनस्पृतं विभूतिं राधसो महः। उद्रीव वज्रिन्नवतो वसुत्वना सदा पीपेथ दाशुषे॥६॥ यद्वं नूनं परावति यद्वा पृथिव्यां दिवि। युजान इंद्र हरिभिर्महेमत आ त्वा त्वाभिरा गहि॥७॥ रथिरासो हरयो ये ते अस्रिध ओजो वातस्य पिप्रति। येभिर्नि दस्युं मनुषो निघोषयो येभिः स्वः परीयसे॥८॥ एतावंतस्ते वसो विद्याम शूर नव्यसः। यथा प्राव एतशं कृत्व्ये धने यथा वशं दशव्रजे ॥९॥ यथा कण्वे मघवन्मेधे अध्वरे दीर्घनीथे दमूनसि। यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रं हरिश्रियं ॥१०॥१७॥

॥ ५१ ॥ १–१० पुष्टिगुः काण्वः ॥ इंद्रः ॥ प्रागाथं ॥

॥५१॥ यथा मनौ सांवरणौ सोममिंद्रार्पिबः सुतं। नीथा-

धनें ॥९॥ यथा कण्वें मघऽवन् वसदस्यवि यथा पक्थे दशऽव्रजे यथा गोऽशर्यें असनोः ऋजिश्वनि इंद्र गोऽमत् हिरण्यऽवत् ॥१०॥१५॥

॥५०॥ प्र सु श्रुतं सुऽराधसं अर्चा शक्रं अभिष्टये यः सुन्वते स्तुवते काम्यं वसु सहस्रेणऽइव मंहते ॥१॥ शतऽअनीकाः हेतयः अस्य दुस्तराः इंद्रस्य संऽइषः महीः गिरिः न भुज्मा मघवन्ऽसु पिन्वते यत् ईं सुताः अमंदिषुः॥२॥ यत् ईं सुतासः इंदवः अभि प्रियं अमंदिषुः आपः न धायि सवनं मे आ वसो दुघाःऽइव उप दाश्वुषें॥३॥ अनेहसं वः हवमानं ऊतयें मध्वः ष्टारंति धीतयः आ त्वा वसो हवमानासः इंदवः उप स्तोत्रेषु दधिरे॥४॥ आ नः सोमें सुऽअध्वरे इयानः अत्यः न तोशते यंते स्वदाऽवन् स्वदंति गूर्तयः पारे छंदयसे हवें ॥५॥१६॥ प्र वीरं उग्रं विविचिं धनऽस्पृतं विऽभूतिं राधसः महः उद्रीऽइव वज्रिन् अवतः वसुऽत्वना सदा पीपेथ दाश्वुषें॥६॥ यत् हं नूनं पराऽवति यत् वा पृथिव्यां दिवि युजानः इंद्र हरिऽभिः महेऽमते ऋष्वः ऋष्वेभिः आ गहि ॥७॥ रथिरासः हरयः ये ते असिध्वः ओजः वातस्य पिप्रति येभिः नि दस्युं मनुषः निऽघोषयः येभिः स्वः परिऽईयसे॥८॥ एतावंतः ते वसो विद्याम शूर नव्यसः यथा प्र आवः एतशं कृत्व्यें धनें यथा वशं दशऽव्रजे ॥९॥ यथा कण्वें मघऽवन् मेधें अध्वरे दीर्घऽनीथे दमूनसि यथा गोऽशर्यें असिसासः अद्रिऽवः मयि गोत्रं हरिऽश्रियं॥१०॥१७॥

॥५१॥ यथा मनौ सांऽवरणौ सोमें इंद्र अपिंवः सुतं नीपं-

तिषौ मघवन्मेध्यातिथौ पुष्टिगौ शुष्टिगौ सचा ॥१॥ पार्षद्वाणः प्रस्कण्वं समसादयच्छयानं जिह्मबुध्नं । सहस्राण्यसिषासन्नवाभृथस्योतो दस्यवे वृकः ॥२॥ य उक्थेभिर्न विधर्ते चिकित्व ऋषिचोदनः । इंद्रं तमच्छा वद नव्यस्या मत्यं विप्यंतं न भोजसे ॥३॥ यस्मा अर्कं सप्तशीर्षाणमानृचुस्त्रिधातुमुत्तमे पदे । स त्वं मा विश्वा भुवनानि चिक्रददादिर्ज्जनिष्ट पौंस्यै ॥४॥ यो नो दाता वसूनामिंद्रं तं हूमहे वयं । विप्रा ह्यस्य सुमतिं नवीयसीं गमेम गोमंति व्रजे ॥५॥१८॥ यस्मै त्वं वसो दानाय शिक्षसि स रायस्पोषमश्नुते । तं त्वा वयं मघवन्निंद्र गिर्वणः सुतावंतो हवामहे ॥६॥ कदा चन स्तरीरसि नेंद्र सश्चसि दाशुषे । उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥७॥ प्रयो नंनक्षे अभ्योजसा क्रिविं वधैः सुशेवं निघोषयन् । यदेदस्तंभीत्प्रथयन्नमूं दिवमादिर्ज्जनिष्ट पार्थिवः ॥८॥ यस्यायं विश्व आर्यो दासः शेवधिपा अरिः । तिरश्चिद्यें रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥९॥ तुरण्यवो मधुमंतं घृतश्चुतं विप्रासो अर्कमानृचुः । अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे सुवानास इंदवः ॥१०॥१९॥

॥ ५२ ॥ १–१० शायुः काण्वः ॥ इंद्रः ॥ प्रागाथं ॥

॥ ५२ ॥ *यथा मनौ विवस्वति सोमं शक्रापिबः सुतं । यथा त्रिते छंद इंद्र जुजोषस्यायौ मादयसे सचा ॥१॥* पृषध्रे मेध्ये मातरिश्वनींद्र सुवाने अमंदयाः । यथा सोमं दशशिप्रे दशोण्ये स्यूमरश्मावृजूनसि ॥२॥ य उक्था केवला दधे यः सोमं धृषितापिबत् । यस्मै विष्णुस्त्रीणि पदा विचक्रम उप मित्रस्य धर्मभिः ॥३॥ यस्य त्वमिंद्र स्तोमेषु चाकनो वाजे वाजिञ्छतक्रतो ।

ऽअतिथौ मघऽवन् मेध्यऽअतिथौ पुष्टिऽगौ श्रुष्टिऽगौ सचा॥१॥ पार्यद्वाणः प्रस्कण्वं सं असादयत् शयानं जिविं उद्धितं सहस्राणि असिसासत् गवां ऋषिः त्वाऽऊतः दस्यवे वृकः॥२॥ यः उक्थेभिः न विंधते चिकित् यः ऋषिऽचोदनः इंद्रं तं अच्छ वद् नव्यस्या मती अविष्यंतं न भोजसे॥३॥ यस्मै अर्कं सप्तऽशीर्षाणं आनृचुः चिऽधातुं उत्ऽतमे पदे सः तु इमा विश्वा भुवनानि चिक्रदत् आत् इत् जनिष्ट पौंस्यै॥४॥ यः नः दाता वसूनां इंद्रं तं हूमहे वयं विप्रा हि अस्य सुऽमतिं नवीयसीं गमेम गोऽमति व्रजे॥५॥१८॥ यस्मै त्वं वसो दानाय शिक्षसि सः रायः पोषं अश्नुते तं त्वा वयं मघऽवन् इंद्र गिर्वणः सुतऽवंतः हवामहे॥६॥ कदा चन स्तरीः असि न इंद्र सश्चसि दाशुषे उपऽउप इत् नु मघऽवन् भूयः इत् नु ते दानं देवस्य पृच्यते॥७॥ प्र यः ननक्षे अभि ओजसा क्रिविं वधैः शुष्णं निऽघोषयन् यदा इत् असैभीत् प्रथयन् अमूं दिवं आत् इत् जनिष्ट पार्थिवः॥८॥ यस्य अयं विश्वः आर्यः दासः शेवधिऽपाः अरिः तिरः चित् अर्ये रशंमे पवीरवि तुभ्यं इत् सः अज्यते रयिः॥९॥ तुरण्यवः मधुऽमंतं घृतऽश्चुतं विप्रासः अर्कं आनृचुः अस्मे रयिः पप्रथे वृष्ण्यं शवः अस्मे सुवानासः इंदवः॥१०॥१९॥

॥५२॥ यथा मनौ विवस्वति सोमं शक्र अपिबः सुतं यथा चिते दृढे इंद्र जुजोषसि आयौ मादयसे सचा॥१॥ पृषध्रे मेध्ये मातरिश्वनि इंद्र सुवाने अमंदयाः यथा सोमं दशऽशिप्रे दशऽओणये स्यूमऽरश्मौ ऋजूनसि॥२॥ यः उक्था केवला दधे यः सोमं धृषिता अपिबत् यस्मै विष्णुः चीर्णिं पदा विऽचक्रमे उप मित्रस्य धर्मऽभिः॥३॥ यस्य त्वं इंद्र स्तोमेषु चाकनः वाजे वाजिन् शतऽक्रतो

तं त्वा वयं सुदुघामिव गोदुहो जुहूमसि श्रवस्यवः ॥४॥ यो नो दाता स नः पिता महाँ उग्र ईशानकृत्। अयामन्नुग्रो मघवा पुरूवसुर्गोरश्वस्य प्र दातु नः ॥५॥२०॥ यस्मै त्वं वसो दानाय मंहसे स रायस्पोषमिन्वति। वसूयवो वसुपतिं शतक्रतुं स्तोमैरिंद्रं हवामहे ॥६॥ कदा चन प्र युच्छस्युभे नि पासि जन्मनी। तुरीयादित्य हवनं त इंद्रियमा तस्थावमृतं दिवि ॥७॥ यस्मै त्वं मघवन्निंद्र गिर्वणः शिक्षो शिक्षसि दाशुषे। अस्माकं गिर उत सुष्टुतिं वसो कण्ववच्छृणुधी हवं ॥८॥ अस्तावि मन्म पूर्व्यं ब्रह्मेंद्राय वोचत। पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥९॥ समिंद्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यं। सं शुक्रासः शुचयः सं गवाशिरः सोमा इंद्रममंदिषुः ॥१०॥२१॥

॥ ५३ ॥ १–६ मेध्यः काण्वः ॥ इंद्रः ॥ प्रागाथं ॥

॥५३॥ उपमं त्वा मघोनां ज्येष्ठं च वृषभाणां। पूर्भिष्ठमं मघवन्निंद्र गोविदमीशानं राय ईमहे ॥१॥ य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवेदिवे। तं त्वा वयं हर्यश्वं शतक्रतुं वाजयंतो हवामहे ॥२॥ आ नो विश्वेषां रसं मध्वः सिंचंत्वद्रयः। ये परावति सुन्विरे जनेष्वा ये अर्वावतीदवः ॥३॥ विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वंत्वा वसु। शीष्टेषु चित्ते मदिरासो अंशवो यत्रा सोमस्य तृंपसि ॥४॥२२॥ इंद्र नेदीय एदिहि मितमेधाभिरूतिभिः। आ शंतम शंतमाभिरभिष्टिभिरा स्वापे स्वापिभिः ॥५॥ आजितुरं सत्पतिं विश्वचर्षणिं कृधि प्रजास्वाभगं। प्र सू तिरा शचीभिर्ये ते उक्थिनः क्रतुं पुनत आनुषक् ॥६॥ यस्ते सा-

तं त्वा वयं सुदुघाँऽइव गोऽदुहः जुहूमसि श्रवस्यवः॥४॥ यः नः दाता सः नः पिता महान् उग्रः ईशानऽकृत् अर्यामन् उग्रः मघऽवा पुरुऽवसुः गोः अश्वस्य प्र दातु नः॥५॥२०॥ यस्मै त्वं वसो दानाय मंहसे सः रायः पोषं इव्वति वसुऽयवः वसुऽपतिं शतऽक्रतुं स्तोमैः इंद्रं हवामहे॥६॥ कदा चन प्र युच्छसि उभे नि पासि जन्मनी तुरीय अदित्य हवनं ते इंद्रियं आ तस्थौ अमृतं दिवि॥७॥ यस्मै त्वं मघऽवन् इंद्र गिर्वणः शिक्षो शिक्षसि दाशुषे अस्माकं गिरः उत सुऽस्तुतिं वसो कण्वऽवत् शृणुधि हवं॥८॥ अस्तावि मन्म पूर्व्यं ब्रह्म इंद्राय वोचत पूर्वीः ऋतस्य बृहतीः अनूषत स्तोतुः मेधाः असृक्षत॥९॥ सं इंद्रः रायः बृहतीः अधूनुत सं क्षोणी सं उ सूर्यं सं शुक्रासः शुचयः सं गोऽआशिरः सोमाः इंद्रं अमंदिषुः॥१०॥२१॥

॥५३॥ उपऽमं त्वा मघोनां ज्येष्ठं च वृषभाणां पूर्भित्ऽतमं मघऽवन् इंद्र गोऽविदं ईशानं रायः ईमहे॥१॥ यः आयुं कुत्सं अतिथिऽग्वं अदर्दरः ववृधानः दिवेऽदिवे तं त्वा वयं हरिऽअश्वं शतऽक्रतुं वाजऽयंतः हवामहे॥२॥ आ नः विश्वेषां रसं मध्वः सिंचंतु अद्रयः ये पराऽवति सुन्विरे जनेषु आ ये अर्वाऽवति इंदवः॥३॥ विश्वा द्वेषांसि जहि च अव च आ कृधि विश्वे सन्वंतु आ वसु शीर्षेषु चित् ते मदिरासः अंशवः यत्र सोमस्य तृंपसि॥४॥२२॥ इंद्र नेदीयः आ इत् इहि मितऽमेधाभिः ऊतिऽभिः आ शंतमं शंऽतमाभिः अभिष्टिऽभिः आ सुऽआपे स्वापिऽभिः॥५॥ आजिऽतुरं सत्ऽपतिं विश्वऽचर्षणिं कृधि प्रऽजासु आऽभगं प्र सु तिर शचीभिः ये ते उक्थिनः क्रतुं पुनंते आनुषक्॥६॥ यः ते सा-

धिष्टो ऽवसे ते स्याम भरेषुते। वयं होत्राभिरुत देवहूतिभिः सस-वांसो मनामहे॥७॥ अहं हि ते हरिवो वज्रं वाजयुराजिं यामि सदोतिभिः। त्वामिदेव तममे समन्युयुग्भ्युरेमे मघोनां॥८॥२३॥

॥५३॥ १–८ मातरिश्वा कण्वः॥ १, २, ५–८ इंद्रः। ३, ४ विश्वे देवाः॥ प्रागार्च॥

॥५४॥ एतत्त इंद्र वीर्यं गीर्भिर्गृणंति कारवः। ते स्तोभंत ऊर्जा-मावन्घृतश्चुतं पीरासो नक्षन्धीतिभिः॥१॥ नक्षंत इंद्रमवसे सुकृ-त्यया येषां सुतेषु मंदसे। यथा संवर्ते अमदो यथा कृश एवास्मे इंद्र मत्स्व॥२॥ आ नो विश्वे सजोषसो देवासो गंतनोप नः। वसवो रुद्रा अवसे न आ गमञ्छृण्वंतु मरुतो हवं॥३॥ पूषा विष्णुर्हवनं मे सरस्वत्यवंतु सप्त सिंधवः। आपो वातः पर्वतासो वनस्पतिः शृणोतु पृथिवी हवं॥४॥२४॥ यदिंद्र राधो अस्ति ते माघोनं मघवत्तम। तेनं नो बोधि सधमाद्यो वृधे भगो दानाय वृत्रहन्॥५॥ आजिंपते नृपते त्वमिद्धि नो वाज आ वंक्षि सुक्रतो। वीती होत्राभिरुत देववीतिभिः ससवांसो वि शृंखिरे॥६॥ संति ह्यृ१र्य आशिष इंद्र आयुर्जनानां। अस्मान्नक्षस्व मघवन्नुपावसे धुक्षस्व पिप्युषीमिषं॥७॥ वयं त इंद्र स्तोमेभिर्विधेम त्वमस्माकं शतक्रतो। महि स्थूरं शशयं राधो अह्रयं प्रस्कण्वाय नि तोशय॥८॥२५॥

॥५५॥ १–५ कृष्णः कण्वः॥ प्रस्कण्वस्य दानस्तुतिः॥ १, ३ गायत्री। २, ४, ५ अनुष्टुप्॥

॥५५॥ भूरीदिंद्रस्य वीर्यं व्यख्यमभ्यायति। राधस्ते दस्यवे वृक॥१॥ शतं श्वेतासं उक्षणो दिवि तारो न रोचंते। बृहदिंद्रं न तंस्तभुः॥२॥ शतं वेणूञ्छतं शुनः शतं चर्माणि मृ-

धिष्ठः अवसे ते स्याम भरेषु ते वयं होत्राभिः उत देवहूतिऽभिः सऽसऽवांसः सनामहे॥७॥ अहं हि ते हरिऽवः वक्षे वाजऽयुः आजिं यामि सदा ऊतिऽभिः त्वां इत् एव तं अमे सं अश्वऽयुः गव्युः अयें मघोनां ॥८॥२३॥

॥५४॥ एतत् ते इंद्र वीर्यं गीःऽभिः गृणंति कारवः ते स्तोभंतः ऊर्जं आवन् घृतऽश्चुतं पौरासः नक्षन् धीतिऽभिः ॥१॥ नक्षंते इंद्रं अवसे सुऽकृत्यया येषां सुतेषु मंदसे यथा संऽवर्ते अमदः यथा कृशे एव अस्मे इंद्र मत्स्व ॥२॥ आ नः विश्वे सुऽजोषसः देवासः गंतन उप नः वसवः रुद्राः अवसे नः आ गमन् गृणंतु मरुतः हवं॥३॥ पूषा विष्णुः हवनं मे सरस्वती अवंतु सप्त सिंधवः आपः वातः पर्वतासः वनस्पतिः शृणोतु पृथिवी हवं ॥४॥२४॥ यत् इंद्र राधः अस्ति ते माघोनं मघवन्ऽतम तेन नः बोधि सधऽमाद्यः वृधे भगः दानाय वृचऽहन् ॥५॥ आजिंऽपते नृऽपते त्वं इत् हि नः वाजे आ वक्षि सुऽक्रतो° वीती होत्राभिः उत देववीतिऽभिःससऽवांसः वि शृण्विरे॥६॥ संति हि अर्य आऽशिषः इंद्रे आयुः जनानां अस्मान् नक्षस्व मघऽवन् उप अवसे धुक्षस्व पिप्युषीं इषं॥७॥ वयं ते इंद्र स्तोमेभिः विधेम त्वं अस्माकं शतऽक्रतो° महि स्थूरं शशयं राधः अह्रयं प्रस्कण्वाय नि तोशय ॥८॥२५॥

॥५५॥ भूरि इत् इंद्रस्य वीर्यं वि अख्यं अभि आ अयति राधः ते दस्यवे वृक॥१॥ शतं श्वेतासः उक्षणः दिवि तारः न रोचंते महा दिवं न तस्तभुः॥२॥ शतं वेणून् शतं शुनः शतं चर्माणि मया-

तानि। शतं मे वस्वजस्तुका अरुषीणां चतुःशतं॥३॥ सुदेवाः स्थ काण्वायना वयोवयो विचरंतः। अश्वासो न चंक्रमत॥४॥ आदित्साप्तस्य चर्किरन्नानूनस्य महि श्रवः। श्यावीरतिध्वसन्पथष्ठ्युपा चन संनशे॥५॥ २६॥

॥ ५६॥ १–५ पृषधः काण्वः ॥ १–४ प्रस्कण्वस्य दानस्तुतिः । ५ अग्निस्तूयते ॥ १–४ गायत्री । ५ पंक्तिः ॥

॥५६॥ प्रति ते दस्यवे वृक राधो अदर्श्याहुयं। द्यौर्न प्रथिना शवः॥१॥ दश मह्यं पौतक्रतः सहस्रा दस्यवे वृकः। नित्याद्रायो अमंहत॥२॥ शतं मे गर्दभानां शतमूर्णावतीनां। शतं दासाँ अति स्रजः॥३॥ तचो अपि प्राणीयत पूतक्रतायै वंक्ता। अश्वान्नामिन्न यूथ्या॥४॥ अचेत्यग्निश्चिकितुर्हव्यवाड्न सुमद्रथः। अग्निः शुक्रेण शोचिषा बृहत्सूरो अरोचत दिवि सूर्यो अरोचत॥५॥ २७॥

॥ ५७॥ १–४ मेध्यः काण्वः ॥ अश्विनौ ॥ विराट् ॥

॥५७॥ युवं देवा क्रतुना पूर्व्येण युक्ता रथेन नविषं यजत्रा। आगच्छतं नासत्या शचीभिरिदं नृतीयं सवनं पिबाथः॥१॥ युवां देवास्त्रय एकादशासः सत्याः सत्यस्य दहशे पुरस्तात्। अस्माकं यज्ञं सवनं जुषाणा पातं सोममश्विना दीद्यग्नी॥२॥ पुनाय्यं तदश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः। सहस्रं शंसा उत ये गविष्टौ सर्वाँ इन्नाँ उपयाता पिबध्यै॥३॥ अयं वां भागो निहितो यजत्रेमा गिरो नासत्योप यातं। पिबतं सोमं मधुमंतमस्मे प्र दाश्वांसमवतं शचीभिः॥४॥ २८॥

॥ ५८॥ १–३ मेध्यः काण्वः ॥ १ विश्वे देवा ऋत्विजो वा । २ ३ विश्वे देवाः ॥ विराट् ॥

॥५८॥ यमृत्विजो बहुधा कल्पयंतः सचेतसो यज्ञमिमं वहंत-

तानि शतं मे वल्वजऽस्तुकाः अरुंधीणां चतुःऽशतं ॥३॥ सुऽदेवाः स्थ काण्वायनाः वयःऽवयः विऽचरंतः अश्वासः न चंक्रमत ॥४॥ आत् इत् सायस्य चर्किरन् न अनूनस्य महिं श्रवः श्यावीः अतिऽअध्वसन् पथः चक्षुषा चन संऽनशे॥५॥२६॥

॥५६॥ प्रतिं ते दस्यवे वृक राधः अदर्शि अहूयं द्यौः न प्रथिना शवः॥१॥ दशं मह्यं पौतऽक्रतः सहस्रा दस्यवे वृकः नित्यात् रायः अमंहत ॥२॥ शतं मे गर्दभानां शतं ऊर्णाऽवतीनां शतं दासान् अति स्रजः॥३॥ तचौ अपिं प्र अनीयत पूतऽक्रताय विऽअक्ता अश्वानां इत् न यूथ्या ॥४॥ अचेति अग्निः चिकितुः हव्यऽवाट् सः सुमतऽरथः अग्निः शुक्रेण शोचिषा बृहत् सूरः अरोचत दिवि सूर्यः अरोचत ॥५॥२७॥

॥५७॥ युवं देवा क्रतुना पूर्व्येण युक्ता रथेन नविषा यजत्रा आ अगच्छतं नासत्या शचीभिः इदं नृतीयं सवनं पिबाथः॥१॥ युवां देवाः चयः एकादशासः सत्याः सत्यस्य दहशे पुरस्तात् अस्माकं यज्ञं सवनं जुषाणा पातं सोमं अश्विना दीदिऽअग्नी॰ ॥२॥ पनाय्यं तत् अश्विना कृतं वां वृषभः दिवः रजसः पृथिव्याः सहस्रं शंसाः उत ये गोऽइष्टौ सर्वान् इत् नान् उप यात पिबध्यै ॥३॥ अयं वां भागः निऽहितः यजत्रा इमाः गिरः नासत्या उप यातं पिबतं सोमं मधुऽमंतं अस्मे प्र दाश्वांसं श्रवतं शचीभिः ॥४॥२८॥

॥५८॥ यं ऋत्विजः बहुधा कल्पयंतः सऽचेतसः यज्ञं इमं वहं-

ति। यो अनूचानो ब्राह्मणो युक्त आसीत्का स्वित्तत्र यजमानस्य संवित्॥१॥ एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः। एकैवोषाः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वं॥२॥ ज्योतिष्मंतं केतुमंतं चित्रकं सुखं रथं सुपदं भूरिवारं। चित्रामघा यस्य योगेऽधिजज्ञे तं वां हुवे अतिं रिक्तं पिबध्ये॥३॥२९॥

॥ ५९ ॥ १–३ सुपर्णः काण्वः ॥ इंद्रावरुणौ ॥ जगती ॥

॥५९॥ इमानिं वां भागधेयानि सिस्रत इंद्रावरुणा प्र महे सुतेषु वां। यज्ञेयज्ञे हु सवना भुरण्यथो यत्सुन्वते यजमानाय शिक्षथः॥१॥ निःपिप्वरीरोषधीरापं आस्तामिंद्रावरुणा महिमानंमाशत। या सिस्रंतू रजसः पारे अध्वनो ययोः शत्रुर्नकिरादेव ओहते॥२॥ सत्यं तदिंद्रावरुणा कृणोम्यं वां मध्व ऊर्मिं दुहते सप्त वाणीः। ताभिर्दाश्वांसमवतं शुभस्पती यो वामर्ध्यो अभि पाति चित्तिभिः॥३॥ घृतप्रुषः सौम्या जीरदानवः सप्त स्वसारः सदन चृतस्य। या हे वामिंद्रावरुणा घृतश्चुतस्ताभिर्धत्तं यजमानाय शिक्षतं॥४॥३०॥ अवोचाम महते सौभगाय सत्यं त्वेषाभ्यां महिमानंमिंद्रियं। अस्मान्त्स्विंद्रावरुणा घृतश्चुतस्त्विभिः साप्तेभिरवतं शुभस्पती॥५॥ इंद्रावरुणा यदपिभ्यो मनीषां वाचो मतिं श्रुतमदत्तमर्यो। यानि स्थानान्यसृजंत धीरा यज्ञं तन्वाना अस्तभ्नंस्तान्यपश्यं॥६॥ इंद्रावरुणा सौमनसमद्भुतं रायस्पोषं यजमानेषु धत्तं। प्रजां पुष्टिं भूतिमस्मासु धत्तं दीर्घायुत्वाय प्र तिरंतं नु आयुः॥७॥३१॥

॥ इति वालखिल्यं समाप्तं ॥

॥ ६० ॥ १–२० भर्गः प्रागाथः ॥ चरिष्णुः ॥ प्रागाथं ॥

॥६०॥ अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे। आ त्वामं-

ति यः अनूचानः ब्राह्मणः युक्तः आसीत् का स्वित् तत्र यजमानस्य सऽवित्॥१॥ एकः एव अग्निः बहुधा समिद्धः एकः सूर्यः विश्वं अनु प्रऽभूतः एका एव उषाः सर्वं इदं वि भाति एकं वै इदं वि बभूव सर्वं॥२॥ ज्योतिष्मंतं केतुऽमंतं चिऽचक्रं सुऽखं रथं सुऽसदं भूरिऽवारं चित्रऽमघा यस्य योगे अधिऽजज्ञे तं वां हुवे अतिं रिक्तं पिबध्यै॥३॥२९॥

॥५९॥ इमानि वां भागुऽधेयानि सिस्रते इंद्रावरुणा प्र महे सुतेषु वां यज्ञेऽयज्ञे हुसवना भुरण्यथः यत् सुन्वते यजमानाय शिक्षथः॥१॥ निःऽसिध्वरीः ओषधीः आपः आस्तां इंद्रावरुणा महिमानं आगत या सिस्रतुः रजसः पारे अध्वनः ययोः शवुः नकिः अदेवः ओहते॥२॥ सत्यं तत् इंद्रावरुणा कृशस्य वां मध्वः ऊर्मिं दुहते सप्त वाणीः ताभिः दाश्वांसं अवतं शुभः पती यः वां अदेव्यः अभि पाति चित्तिऽभिः॥३॥ घृतऽमुषः सौम्यः जीरऽदानवः सप्त स्वसारः सदने ऋतस्य याः हु वां इंद्रावरुणा घृतऽश्चुतः ताभिः धत्तं यजमानाय शिक्षतं॥४॥३०॥ अवोचाम महते सौभगाय सत्यं त्वेषाभ्यां महिमानं इंद्रियं अस्मान् सु इंद्रावरुणा घृतऽश्चुतः चिऽभिः साप्तेभिः अवतं शुभः पती॥५॥ इंद्रावरुणा यत् ऋषिऽभ्यः मनीषां वाचः मतिं श्रुतं अदत्तं अर्यः यानि स्थानानि असृजंत धीराः यज्ञं तन्वानाः तपसा अभि अपश्यं॥६॥ इंद्रावरुणा सौमनसं अहंन्नं रायः पोषं यजमानेषु धत्तं प्रऽजां पुष्टिं भूतिं अस्मासु धत्तं दीर्घायुऽत्वाय प्र तिरतं नः आयुः॥७॥३१॥

॥ इति वालखिल्यं समाप्तं ॥

॥६०॥ अग्ने आ याहि अग्निऽभिः होतारं त्वा वृणीमहे आ त्वां

नक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥१॥ अच्छा हि त्वा सहसः सूनो अंगिरः सुचश्चरंत्यध्वरे। ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यं ॥२॥ अग्ने कविर्वेधा असि होता पावक यज्ञ्यः। मंद्रो यजिष्ठो अध्वरस्रीळ्यो विप्रेभिः शुक्र मन्मभिः ॥३॥ अद्रोघमा वहीशतो यविष्ठ्य देवाँ अजस्र वीतये। अभि प्रयांसि सुधिता वसो गहि मंदस्व धीतिभिर्हितः ॥४॥ त्वमित्सप्रथा असयग्ने त्वातर्भूतस्कविः। त्वां विप्रासः समिधान दीदिव आ विवासंति वेधसः ॥५॥३२॥ शोचा शोचिष्ट दीदिहि विशे मयो रास्व स्तोत्रे महाँ असि। देवानां शर्मन्मम संतु सूरयः शचूपाहः स्वग्नयः ॥६॥ यथा चिद्वृद्धमंतसमग्ने संजूर्वसि क्षमि। एवा देह मित्रमहो यो अस्मध्रुग्दुर्मन्मा कश्च वेनति ॥७॥ मा नो मर्ताय रिपवे रक्षस्विने माघशंसाय रीरधः। असेधद्विस्तरणिभिर्यविष्ठ्य शिवेभिः पाहि पायुभिः ॥८॥ पाहि नो अग्न एकया पाह्युत द्वितीयया। पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥९॥ पाहि विश्वस्माद्रक्षसो अरांण्यः प्र स्म वाजेषु नोऽव। त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥१०॥३३॥ आ नो अग्ने वयोवृधं रयिं पावक शंस्यं। रास्वा च न उपमाते पुरुस्पृहं सुनीती स्वयशस्तरं ॥११॥ येन वंसाम पृतनासु शर्धंतस्तरंतो अर्य आदिशः। स त्वं नो वर्धं प्रयसा शचीवसो जिन्वा धियो वसुविदः ॥१२॥ शिशानो वृषभो यथाग्निः शृंगे दविध्वत्। तिग्मा अस्य हनवो न प्रतिधृषे सुजंभः सहसो यहुः ॥१३॥ नहि ते अग्ने वृषभ प्रतिधृषे जंभासो यद्वितिष्ठसे। स त्वं नो हीतः सुहुतं हविष्कृधि वंस्वा नो वार्या पुरु ॥१४॥ शेषे

अनक्तु प्रऽयता हविष्मती यजिष्ठं बर्हिः आऽसदे॥१॥ अच्छ हि त्वा सहसः सूनो अंगिरः सुचः चरंति अध्वरे ऊर्जः नपातं घृतऽकेशं ईमहे अग्निं यज्ञेषु पूर्व्यं॥२॥ अग्ने कविः वेधाः असि होता मावक यक्ष्यः मंद्रः यजिष्ठः अध्वरेषु ईड्यः विप्रेभिः शुक्र मन्मऽभिः॥३॥ अद्रोघं आ वह उशतः यविष्ठ्य देवान् अजस्र वीतये अभि प्रयांसि सुऽधिता आ वसो गहि मंदस्व धीतिऽभिः हितः॥४॥ त्वं इत् सऽप्रथाः असि अग्ने जातः ऋतः कविः त्वां विप्रासः समिधान दीदिऽवः आ विवासंति वेधसः॥५॥३२॥ शोचं शोचिष्ट दीदिहि विशे मयः रास्व स्तोचे महान् असि देवानां शर्मन् मम संतु सूरयः शुचुऽसहः सुऽअग्नयः॥६॥ यथा चित् वृद्धं अतसं अग्ने संऽजूर्वसि द्यामिं एव दहसि चऽमहः यः अस्मऽअकृत दुःऽमन्मा कः च वेनति॥७॥ मा नः मर्ताय रिपवे रक्षस्विने मा अघऽशंसाय रीरधः असेधत्ऽअभिः तरणिऽभिः यविष्ठ्य शिवेभिः पाहि पायुऽभिः॥८॥ पाहि नः अग्ने एकया पाहि उत द्वितीयया पाहि गीःऽभिः तिसृऽभिः ऊर्जां पते पाहि चतसृऽभिः वसो॥९॥ पाहि विश्वस्मात् रक्षसः अराव्णः प्र स्म वाजेषु नः अव त्वां इत् हि नेदिष्ठं देवऽतातये आपिं नक्षामहे वृधे॥१०॥३३॥ आ नः अग्ने वयःऽवृधं रयिं मावक शंस्यं रास्व च नः उपऽमाते पुरुऽस्पृहं सुऽनीती स्वर्यशःऽतरं॥११॥ येन वंसाम पृतनासु शर्धतः तरंतः अर्यः आऽदिशः सः त्वं नः वर्धं प्रयसा शचीऽवसो जिन्व धियः वसुऽविदः॥१२॥ शिशानः वृषभः यथा अग्निः शृंगे दविध्वत् तिग्माः अस्य हनवः न प्रतिऽधृषे सुऽजंभः सहसः यहुः॥१३॥ नहि ते अग्ने वृषभ प्रतिऽधृषे जंभासः यत् विऽतिष्ठसे सः त्वं नः होतः सुऽहुतं हविः कृधि वंस्व नः वार्यं पुरु॥१४॥ शेषे

वनेषु माचोः सं त्वा मर्तास इंधते। अतंद्रो हव्या वहसि हविष्कृत आदिद्देवेषु राजसि॥१५॥३४॥ सप्त होतारस्तमिदीळते त्वाग्ने सुत्यजमद्रयं। भिनत्स्यद्रिं तपसा वि शोचिषा प्राग्ने तिष्ठ जनाँ अति ॥१६॥ अग्निमग्निं वो अग्रिंगुं हुवेमं वृक्तबर्हिषः। अग्निं हितप्रयसः शश्वतीष्वा होतारं चर्षणीनां॥१७॥ केतेन शर्मन्त्सचते सुषामण्यग्ने तुभ्यं चिकित्वनो। इषण्यया नः पुरूरूपमा भर वाजं नेदिष्ठमूतये ॥१८॥ अग्ने जरितर्विश्पतिस्तेपानो देव रक्षसः। अप्रोषिवान्गृहपतिर्महाँ असि दिवस्पायुर्दुरोणयुः ॥१९॥ मा नो रक्ष आ वेशीदाघृणीवसो मा यातुर्यातुमावतां। परोगव्यूत्यनिरामप क्षुधमग्ने सेध रक्षस्विनः ॥२०॥३५॥

॥ ६१ ॥ १–१८ भगः प्रागाथः ॥ इंद्रः ॥ प्रागार्थं ॥

॥६१॥ उभयं शृणवच्च न इंद्रो अर्वागिदं वचः। सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत् ॥१॥ तं हि स्वराजं वृषभं तमोजसे धिषणे निष्टतक्षतुः। उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः ॥२॥ आ वृषस्व पुरूवसो सुतस्येंद्रांधसः। विद्मा हि त्वा हरिवः यृत्सु सासहिमधृष्टं चिद्धृषन्मणिं ॥३॥ अप्रोमिसत्य मघवन्नयेदसदिंद्र ऋत्वा यथा वशः। सनेम वाजं तव शिप्रिन्नवसा मक्षू चिद्यंतो अद्रिवः ॥४॥ शग्ध्यू३षु शचीपत इंद्र विश्वाभिरूतिभिः। भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥५॥३६॥ पौरो अश्वस्य पुरुकृद्वामस्युत्सो देव हिरण्ययः। नकिर्हि दानं परिमर्धिषत्त्वे यद्यद्यामि तदा भर ॥६॥ त्वं ह्येहि चेरवे विदा भगं वसुत्तये। उद्वावृषस्व मघव-

वनेषु मांचोः संत्वा मर्तासः इंधते अतंद्राः हव्या वहसि हविःऽकृतः आत् इत् देवेषु राजसि॥१५॥३४॥ सप्त होतारः तं इत् ईळते त्वा अग्ने सुऽअध्वरं अहर्यं भिनत्सि अद्रिं तपसा वि शोचिषा प्र अग्ने तिष्ठ जनान् अति॥१६॥ अग्निंऽअग्निं वः अग्निंऽगुं हुवेम वृक्तऽबर्हिषः अग्निं हितऽप्रयसः शश्वतीषु आ होतारं चर्षणीनां॥१७॥ केतेन शर्मन् सचते सुऽसामनि अग्ने तुभ्यं चिकित्वना दृषण्यया नः पुरुऽरूपं आ भर वाजं नेदिष्ठं ऊतये॥१८॥ अग्ने जरितः विश्पतिः तेपानः देव रक्षसः अग्नेपिऽवान् गृहऽपतिः महान् असि दिवः पायुः दुरोणेऽयुः॥१९॥ मा नः रक्षः आ वेशीत् आघृणिऽवसोः मा यातुः यातुऽमावतां परःऽगव्यूति अनिरां अप सुधं अग्ने सेध रक्षस्विनः॥२०॥३५॥

॥ ६१ ॥ उभयं शृणवत् च नः इंद्रः अर्वाक् इदं वचः सत्राच्या मघऽवा सोमंऽपीतये धिया शविष्ठः आ गमत्॥१॥ तं हि स्वऽराजं वृषभं तं ओजसे धिषणे निःऽततक्षतुः उत उपऽमानां प्रथमः नि सीदसि सोमंऽकामं हि ते मनः॥२॥ आ वृषस्व पुरुऽवसोः सुतस्य इंद्र अंधसः विद्मा हि त्वा हरिऽवः पृतऽसु सासहिं अधृष्टं चित् दधृष्णिं॥३॥ अर्वांमिऽसत्य मघऽवन् तथा इत् असत् इंद्र कृत्वा यथा वशः सनेमं वाजं तवं शिप्रिन् अवसा मक्षु चित् यंतः अद्रिऽवः॥४॥ शग्धि ऊं सु शचीऽपते इंद्र विश्वाभिः ऊतिऽभिः भगं न हि त्वा यशसं वसुऽविदं अनु शूर चरामसि॥५॥३६॥ पीरः अश्वस्य पुरुऽकृत् गवां असि उत्सः देव हिरण्ययः नकिः हि दानं परिऽमर्धिषत् त्वे यत्ऽयत् यामि तत् आ भर॥६॥ त्वं हि आ इहि चेरवे विदाः भगं वसुत्तये उत् ववृत्स्व मघऽवन्

ग्गविष्टय उदिंद्राश्वमिष्टये ॥७॥ त्वं पुरू सहस्राणि शतानि च यूथा दानाय मंहसे। आ पुरंदरं चकृम विप्रवचस इंद्रं गायंतोऽवसे ॥८॥ अविप्रो वा यदविधद्विप्रो वेंद्र ते वचः। स प्र मंमंदत्त्वाया शंतक्रतो प्राचामन्यो अहंसन ॥९॥ उप्यर्वाहुर्मघवन्कृत्वा पुरंदरो यदि मे शृणवद्यवै। वसूयवो वसुपतिं शतक्रतुं स्तोमैरिंद्रं हवामहे ॥१०॥३७॥ न पापासो मनामहे नारायासो न जळ्हवः। यदिन्विंद्रं वृषणं सचा सुते सखायं कृणवामहै ॥११॥ उग्रं युयुज्म पृतनासु सासहिमृणक्तिमदाभ्यं। वेदा भूमं चिन्सनिता रथीतमो वाजिनं यमिदूनयंत ॥१२॥ यत इंद्र भयामहे ततो नो अभयं कृधि। मघवञ्छग्धि तव तन्न ऊतिभिर्वि द्विषो वि मृधो जहि ॥१३॥ त्वं हि राधस्पते राधसो महः क्षयस्यासिं विधतः। तं त्वा वयं मघवन्निंद्र गिर्वणः सुतावंतो हवामहे ॥१४॥ इंद्रः स्पळुत वृत्रहा परस्या नो वरेण्यः। स नो रक्षिषच्चरमं स मध्यमं स पश्चात्पातु नः पुरः ॥१५॥३८॥ त्वं नः पश्चादधरादुत्तरात्पुर इंद्र नि पाहि विश्वतः। आरे अस्मत्कृणुहि दैव्यं भयमारे हेतीरदेवीः ॥१६॥ अद्याद्या श्वःश्व इंद्र वास्तू परे च नः। विश्वा च नो जरितॄन्तूतमेधहा दिवा नक्तं च रक्षिषः ॥१७॥ प्रभंगी शूरो मघवा तुवीमघः संमिश्लो वीर्याय कं। उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ॥१८॥३९॥

॥ ६२ ॥ १–१२ प्रगाथः काण्वः ॥ इंद्रः ॥ १–६. १२–१४ पंक्तिः । ७–९ बृहती ॥

॥६२॥ प्रो ष्वस्मा उपस्तुतिं भरता यज्युजोपति। उक्थैरिंद्रस्य माहिनं वयो वर्धंति सोमिनो भद्रा इंद्रस्य रातयः ॥१॥ अयुजो अस्मो नृभिरेकः कृष्टीरयास्यः। पूर्वीरिति प्र चावृधे

गोऽइष्टये उत इंद्र अश्वेऽइष्टये॥७॥ त्वं पुरु सहस्राणि शतानि च यूथा दानाय मंहसे आ पुरंऽदरं चकृम विप्रेऽवचसः इंद्रं गायंतः अवसे॥८॥ अविप्रः वा यत् अविधत् विप्रः वा इंद्र ते वचः सः प्र ममंदत् त्वाऽया शतऽक्रतो॰ प्राचाऽमन्यो॰ अहंऽसन॥९॥ उपऽवाहुः मघऽकृत्वा पुरंऽदरः यदिं मे शृणवत् हवं वसुऽयवः वसुंऽपतिं शतऽक्रतुं स्तोमैः इंद्रं हवामहे॥१०॥३७॥ न पापासः मनामहे न अरायासः न जल्हवः यत् इत् नु इंद्रं वृषणं सचा सुते सखायं कृणवामहै॥११॥ उपं युयुज्म पृतनासु सस्हिं शृणऽक्रांतिं अदाभ्यं वेदं भूमं चित् सनिता रथिऽतमः वाजिनं यं इत् ऊं नशत्॥१२॥ यतः इंद्र भयामहे ततः नः अभयं कृधि मघऽवन् शग्धि तवं तत् नः ऊतिऽभिः वि द्विषः वि मृधः जहि॥१३॥ त्वं हि राधःऽपते राधसः महः क्षयस्य असिं विधतः तं त्वा वयं मघऽवन् इंद्र गिर्वणः सुतऽवंतः हवामहे॥१४॥ इंद्रः स्पृत् उत वृचऽहा पुरुऽषाः नः वरेण्यः सः नः रक्षिषत् चरमं सः मध्यमं सः पश्चात् पातु नः पुरः॥१५॥३८॥ त्वं नः पश्चात् अधरात् उत्तरात् पुरः इंद्र नि पाहि विश्वतः आरे अस्मत् कृणुहि दैव्यं भयं आरे हेतीः अदेवीः॥१६॥ अद्यऽअद्य श्वःऽश्वः इंद्र चास्मे परे च नः विश्वा च नः जरितॄन् सत्ऽपते अहा दिवा नक्तं च रक्षिषः॥१७॥ प्रऽभंगी शूरः मघऽवा तुविऽमघः संऽमिश्टः वीर्याय कं उभा ते वाहू वृषणा शतऽक्रतो॰ नि या वज्रं मिमिक्षतुः॥१८॥३९॥

॥६२॥ प्रो अस्मै उपंऽस्तुतिं भरत यत् जुजोषति उक्थैः इंद्रस्य माहिनं वयः वर्धंति सोमिनः भद्राः इंद्रस्य रातयः॥१॥ अयुजः असमः नृऽभिः एकः कृष्टीः अयास्यः पूर्वीः अतिं प्र ववृधे

विश्वा जातान्योजसा भद्रा इंद्रस्य रातयः ॥२॥ अहिंतेन चिदर्वता जोरदानुः सिषासति । प्रवाच्यमिंद्र तत्तव वीर्याणि करिष्यतो भद्रा इंद्रस्य रातयः ॥३॥ आ याहि कृणवाम त इंद्र ब्रह्माणि वर्धना। येभिः शविष्ठ चाकनो भद्रमिह श्रवस्यते भद्रा इंद्रस्य रातयः ॥४॥ धृषतश्चिद्धृषन्मनः कृणोषींद्र यत्त्वं । तीव्रैः सोमैः सपर्यतो नमोभिः प्रतिभूषतो भद्रा इंद्रस्य रातयः ॥५॥ अवं चष्ट ऋचीषमोऽवताँ इव मानुषः। जुष्टी दक्षस्य सोमिनः सखायं कृणुते युजं भद्रा इंद्रस्य रातयः ॥६॥४०॥ विश्वे न इंद्र वीर्यं देवा अनु क्रतुं ददुः। भुवो विश्वस्य गोपतिः पुरुहुत भद्रा इंद्रस्य रातयः ॥७॥ गृणे तदिंद्र ते शव उपमं देवतातये। यदंसिं वृत्रमोजसा शचीपते भद्रा इंद्रस्य रातयः ॥८॥ समनेव वपुष्यतः कृणवन्मानुषा युगा। विदे तदिंद्र श्रेतनमध श्रुतो भद्रा इंद्रस्य रातयः ॥९॥ उज्जातमिंद्र ते शव उत्त्वामुत्तव क्रतुं । भूरिगो भूरि वावृधुर्मघवन्तव शर्मणि भद्रा इंद्रस्य रातयः ॥१०॥ अहं च त्वं च वृत्रहन्त्संयुज्याव सनिभ्य आ। अरातीवा चिदद्रिवोऽनु नौ शूर मंसते भद्रा इंद्रस्य रातयः ॥११॥ सत्यमिद्वा उ तं वयमिंद्रं स्तवाम नानृतं। महाँ असुन्वतो वधो भूरि ज्योतींषि सुन्वतो भद्रा इंद्रस्य रातयः ॥१२॥४१॥

॥ ६३ ॥ १–१२ प्रगाथः काण्वः ॥ १–११ इंद्रः । १२ देवाः ॥ १, ४, ५, ७ अनुष्टुप् । २, ३, ६, ८–११ गायत्री । १२ विष्टुप् ॥

॥ ६३ ॥ स पूर्व्यो महानाँ वेनः क्रतुभिरानजे । यस्य द्वारा मनुष्पिता देवेषु धिय आनजे ॥१॥ दिवो मानं नोत्सदन्त्सोमपृष्ठासो अद्रयः । उक्था ब्रह्म च शंस्या ॥२॥ स विह्वाँ अंगिरोभ्य इंद्रो गा अवृणोदपः । स्तुपे तदस्य पौंस्यं ॥३॥ स प्र-

विश्वा जातानि ओजसा भद्राः इंद्रस्य रातयः॥२॥ अहिंतेन चित् अर्वता जीरऽदानुः सिसासति प्रऽवाच्यं इंद्र तत् तव वीर्याणि कृरिष्यतः भद्राः इंद्रस्य रातयः॥३॥ आ याहि कृणवाम ते इंद्र ब्रह्माणि वर्धना येभिः गविष्ठ चाकनः भद्रं दृह श्रवस्यते भद्राः इंद्रस्य रातयः॥४॥ धृषतः चित् धृषत् मनः कृणोषि इंद्र यत् त्वं तीव्रैः सोमैः सपर्यतः नमःऽभिः प्रतिऽभूषतः भद्राः इंद्रस्य रातयः॥५॥ अवं चष्टे ऋचीषमः अवतान्ऽइव मानुषः जुष्टी दक्षस्य सोमिनः सखायं कृणुते युजं भद्राः इंद्रस्य रातयः॥६॥४०॥ विश्वे ते इंद्र वीर्यं देवाः अनु क्रतुं दधुः भुवः विश्वस्य गोऽपतिः पुरुऽस्तुत भद्राः इंद्रस्य रातयः॥७॥ गृणे तत् इंद्र ते शवः उपऽमं देवऽतातये यत् हंसि वृत्रं ओजसा शचीऽपते भद्राः इंद्रस्य रातयः॥८॥ सम्नाऽइव वपुष्यतः कृणवंत् मानुषा युगा विदे तत् इंद्रः चेतनं अधथुतः भद्राः इंद्रस्य रातयः॥९॥ उत् जातं इंद्र ते शवः उत् त्वां उत् तवं क्रतुं भूरिऽगो॰ भूरि ववृधुः मघऽवन् तवं शर्मणि भद्राः इंद्रस्य रातयः॥१०॥ अहं च त्वं च वृचऽहन् सं युज्याव सनिऽभ्यः आ अरातिऽवा चित् अद्रिऽवः अनु नौ शूर मंसते भद्राः इंद्रस्य रातयः॥११॥ सत्यं इत् वै ऊं तं वयं इंद्रं स्तवाम न अनृतं महान् असुंन्वतः वधः भूरि ज्योतींषि सुन्वतः भद्राः इंद्रस्य रातयः॥१२॥४१॥

॥६३॥ सः पूर्व्यः महानां वेनः क्रतुंऽभिः आनजे यस्य द्वारा मनुः पिता देवेषु धियः आनजे॥१॥ दिवः मानं न उत् सदन् सोमंऽपृष्ठासः अद्रयः उक्था ब्रह्म च शंस्या॥२॥ सः विद्वान् अंगिरःऽभ्यः इंद्रः गाः अवृणोत् अप स्तुपे तत् अस्य पौंस्यं॥३॥ सः प्र-

त्नथा कविवृध इंद्रो वाकस्य वक्षणिः। शिवो अर्कस्य होमन्यस्मचा गंत्ववसे॥४॥ आदू नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः। श्वात्रमर्का अनूषतेंद्र गोत्रस्य दावने॥५॥ इंद्रे विश्वानि वीर्या कृतानि कर्त्वानि च। यमर्का अध्वरं विदुः॥६॥४२॥ यत्मांचजन्यया विशेंद्रे घोषा असृक्षत। अस्तृणान्बर्हणा विपो३र्यो मानस्य सद्मयः॥७॥ इयमु ते अनुष्टुतिश्चकृपे तानि पौंस्या। प्रावंश्वक्रस्य वर्तनिं॥८॥ अस्य वृष्णो व्योदन उरु क्रमिष्ट जीवसे। यवं न मध्व आ ददे॥९॥ तद्धाना अवस्यवो युष्माभिर्दक्षपितरः। स्यामं मरुत्वंतो वृधे॥१०॥ वळृत्वियाय धासृ ऋक्वभिः शूर नोनुमः। जेयामेंद्र त्वया युजा॥११॥ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः। यः शंसंते स्तुवते धायि पज्र इंद्रज्येष्ठा अस्माँ अवंतु देवाः॥१२॥४३॥

॥ ६३ ॥ १–१२ प्रगाथः काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥ ६४ ॥ उक्था मंदंतु स्तोमाः कृणुष्व राधो अद्रिवः। अव ब्रह्मद्विषो जहि ॥१॥ पदा पणीरराधसो नि बाधस्व महाँ असि। नहि त्वा कश्चन प्रति॥२॥ त्वमींशिषे सुतानामिंद्र त्वमसुतानां। त्वं राजा जनानां॥३॥ एहि मेहि शतो दिव्या३ घोषंश्चर्षणीनां। आभे पृणासि रोदसी॥४॥ त्यं चित्पर्वतं गिरिं शतवंतं सहस्रिणं। वि स्तोतृभ्यो ररोजिथ॥५॥ वयमु त्वा दिवा सुते वयं नक्तं हवामहे। अस्माकं कामुमा पृण॥६॥४४॥ ऋषेस्य वृषभो युवा तुविग्रीवो अनानतः। ब्रह्मा कण्वं संपर्यति॥७॥ कस्य स्वित्सवनं वृषा जुजुषाँ अव गच्छति। इंद्रं कउ स्विदा चके॥८॥ कं तें दाना असदात् वृत्रहन्कं सुवीर्यो। उक्थे क उ स्विदंतमः॥९॥ अयं ते मानुषे जने सोमः पूरुषु सूयते। तस्मे-

त्नऽर्या कविऽवृधः इंद्रः वाकस्य वक्षणिः शिवः अर्कस्य होमनि अस्मऽत्रा गंतु अवसे॥४॥ आत् ऊं नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः श्वाचं अर्काः अनूषत इंद्र गोचस्य दावने॥५॥ इंद्रे विश्वानि वीर्या कृतानि कर्वानि च यं अर्काः अध्वरं विदुः॥६॥४२॥ यत् पांचऽजन्यया विशा इंद्रे घोषाः असृक्षत अस्तृणात् बर्हणा विपः अर्यः मानस्य सः क्षयः॥७॥ इयं ऊं ते अनुऽस्तुतिः चकृषे तानि पौंस्या प्र आवः चक्रस्य वर्तनिं॥८॥ अस्य वृष्णः विऽओदने उरु क्रमिष्ट जीवसे यवं न पक्वः आ ददे॥९॥ तत् दधानाः अवस्यवः युष्माभिः दक्षऽपितरः स्याम मरुत्वतः वृधे॥१०॥ बट् ऋतुऽर्याय धाम्ने ऋक्वऽभिः शूर नोनुमः जेषाम इंद्र त्वया युजा॥११॥ अस्मे रुद्राः मेहना पर्वतासः वृत्रऽहत्ये भरेऽहूतौ सऽजोषाः यः शंसते स्तुवते धायि पज्रः इंद्रऽज्येष्ठाः अस्मान् अवंतु देवाः॥१२॥४३॥

॥६४॥ उत् त्वा मंदंतु स्तोमाः कृणुष्व राधः अद्रिऽवः अव ब्रह्मऽद्विषः जहि॥१॥ पदा पणीन् अराधसः नि बाधस्व महान् असि नहि त्वा कः चन प्रति॥२॥ त्वं ईशिषे सुतानां इंद्र त्वं असुतानां त्वं राजा जनानां॥३॥ आ इहि प्र इहि दयसे दिवि आऽघोषन् चर्षणीनां आ उभे पृणासि रोदसी॥४॥ त्यं चित् पर्वतं गिरिं शतऽवंतं सहस्रिणं वि स्तोतृऽभ्यः रुरोजिथ॥५॥ वयं ऊं त्वा दिवा सुते वयं नक्तं हवामहे अस्माकं कामे आ पृण॥६॥४४॥ क्व स्यः वृषभः युवा तुविऽग्रीवः अनानतः ब्रह्मा कः तं सपर्यति॥७॥ कस्य स्वित् सवनं वृषा जुजुष्वान् अव गच्छति इंद्रं कः ऊं स्वित् आ चके॥८॥ कं ते दानाः असक्षत वृत्रऽहन् कं सुऽवीर्यो उक्थे कः ऊँ स्वित् अंतमः॥९॥ अयं ते मानुषे जने सोमः पूरुषु सूयते तस्य

हि प्र द्रवा पिबं॥१०॥ अयं ते शर्येणावति सुषोमायामधि प्रियः। आजीकीये मदिंतमः॥११॥ तमद्य राधसे महे चारुं मदाय घृष्वये। एहीमिंद्र द्रवा पिबं॥१२॥४५॥

॥ ६५ ॥ १–१२ प्रगाथः काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥६५॥ यदिंद्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः। आ यांहि तूयंमाशुभिः॥१॥ यद्वा प्रस्रवणे दिवो मादयासे स्वर्णरे। यद्वा समुद्रे अंधसः॥२॥ आ त्वा गीर्भिर्महामुरुं हुवे गामिव भोजसे। इंद्र सोमंस्य पीतयें॥३॥ आ तं इंद्र महिमानं हरयो देव ते महः। रथें वहंतु बिभ्रतः॥४॥ इंद्रं गृणीष उ स्तुषे महाँ उग्र ईशानकृत्। एहि नः सुतं पिबं॥५॥ सुतावंतस्त्वा वयं प्रयस्वंतो हवामहे। इदं नो बर्हिरासदें॥६॥४६॥ यच्चिद्धि शश्वतामसींद्र साधारणस्त्वं। तं त्वा वयं हवामहे॥७॥ इदं ते सोम्यं मध्वधुक्षन्नद्रिभिर्नरः। जुषाण इंद्र तत्पिबं॥८॥ विश्वाँ अर्यो विपश्चितोऽति ख्यस्तूयमा गहि। अस्मे धेहि श्रवो बृहत्॥९॥ दाता मे पृषतीनां राजा हिरण्यवीनां। मा देवा मघवा रिषत्॥१०॥ सहस्रे पृषतीनामधि श्रंद्रं बृहत्पृथु। शुक्रं हिरण्यमा ददे॥११॥ नयांतो दुर्गहस्य मे सहस्रेण सुरार्थसः। श्रवो देवेष्वक्रत॥१२॥४७॥

॥ ६६ ॥ १–१५ कलिः प्रागाथः ॥ इंद्रः ॥ १–१३ प्रागार्थं । १५ अनुष्टुप् ॥

॥६६॥ तरोभिर्वो विदद्वसुमिंद्रं सवार्य ऊतयें। बृहद्गायंतः सुतसोमे अध्वरे हुवे भरं न कारिणं॥१॥ न यं दुधा वर्रते न स्थिरा मुरो मदें सुशिप्रमंधसः। य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यं॥२॥ यः शुक्रो मृष्टो अस्योयो वा कीजो हिरण्ययः। स ऊर्वस्य रेजयत्यपावृतिमिंद्रो गव्यस्य वृत्रहा

आ इहि प्र द्रव पिब ॥१०॥ अयं ते शर्यणाऽवति सुऽसोमा यां अधि प्रियः आजीकीये मदिन्ऽतमः ॥११॥ तं अद्य राधसे महे चारुं मदाय घृष्वये आ इहि ई इंद्र द्रवं पिब ॥१२॥४५॥

॥६५॥ यत् इंद्र प्राक् अपाक् उदक् न्यक् वा हूयसे नृऽभिः आ याहि तूयं आ शुऽभिः ॥१॥ यत् वा प्रऽसवंणे दिवः माद्यासे स्वःऽनरे यत् वा समुद्रे अंधसः ॥२॥ आ त्वा गीःऽभिः महां उरुं हुवे गांऽइव भोजसे इंद्र सोमस्य पीतये ॥३॥ आ ते इंद्र महिमानं हरयः देव ते महः रथं वहंतु विभ्रतः ॥४॥ इंद्र गृणीषे ऊं स्तुषे महान् उग्रः ईशानऽकृत् आ इहि नः सुतं पिब ॥५॥ सुतऽवंतः त्वा वयं प्रयस्वंतः हवामहे इदं नः बर्हिः आऽसदे ॥६॥४६॥ यत् चित् हि शश्वंतां असि इंद्र साधारणः त्वं तं त्वा वयं हवामहे ॥७॥ इदं ते सोम्यं मधु अधुक्षन् अद्रिऽभिः नरः जुषाणः इंद्र तत् पिब ॥८॥ विश्वान् अर्यः विपःऽचितः अति ख्यः तूयं आ गहि अस्मे धेहि श्रवः बृहत् ॥९॥ दाता मे पृषतीनां राजा हिरण्यऽवीनां मा देवाः मघऽवा रिषत् ॥१०॥ सहस्रं पृषतीनां अधि चंद्रं बृहत् पृथु शुक्रं हिरण्यं आ ददे ॥११॥ नपातः दुःऽगहस्य मे सहस्रेण सुऽराधसः श्रवः देवेषु अक्रत ॥१२॥४७॥

॥६६॥ नरःऽभिः वः वितत्ऽवंसुं इंद्रं सऽवार्धः ऊतये बृहत् गायंतः सुतऽसोमे अध्वरे हुवे भरं न कारिणं ॥१॥ न यं दुभाः वरंते न स्थिराः मुरः मदे सुऽशिप्रं अंधसः यः आऽहत्यं शशमानाय सुन्वते दाता जरित्रे उक्थ्यं ॥२॥ यः शुक्रः मृक्षः अभ्यः यः वा कीजः हिरण्ययः सः ऊर्वस्य रेजयति अयंऽवृतिं इंद्रः गव्यस्य वृतऽहा

॥ ३॥ निखातं चिद्यः पुरुसंभृतं वसूदिद्वपंति दाशुषे। वज्री सुशिप्रो हरिवाञ्छतक्रतुरिंद्रः क्रत्वा यथा वशत्॥ ४॥ यद्वावंथ पुरुष्टुत पुरा चिच्छूर नृणां। वयं तत्त इंद्र संभरामसि यज्ञमुक्थं तुरं वचः ॥ ५॥ ४८॥ सचा सोमेषु पुरुहूत वज्रिवो मदाय हृष्व सोमपाः। त्वमिद्धि ब्रह्मकृते काम्यं वसु देष्ठः सुन्वते भुवः॥ ६॥ वयमेनमिदा ह्योऽपीपेमेह वज्रिणं। तस्मा उ अद्य समना सुतं भरा नूनंभूषत श्रुते॥ ७॥ वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति। सेमं नः स्तोमं जुजुषाण आ गहींद्र प्र चित्रया धिया ॥ ८॥ कदू न्व१स्याकृतमिंद्रस्यास्ति पौंस्यं। केनो नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृत्रहा॥ ९॥ कदू महीरधृषा अस्य तविषीः कदु वृत्रघ्नो अस्तृतं। इंद्रो विश्वान्वेकनाटाँ अहर्दृशं उत क्रत्वा पणीरभि॥ १०॥ ४९॥ वयं घा ते अपूर्व्येंद्र ब्रह्माणि वृत्रहन्। पुरूतमासः पुरुहूत वज्रिवो भृतिं न प्र भरामसि॥ ११॥ मूर्वीरिषिद्धि त्वे तुविकूर्मिन्नाशसो हवंत इंद्रोतयः। तिरश्चिद्यैः सवना वसो गहि शविष्ठ श्रुधि मे हवं॥ १२॥ वयं घा ते त्वे इद्धिंद्र विप्रा अपि ष्मसि। नहि त्वदन्यः पुरुहूत कश्चन मघवन्नस्ति मर्डिता॥ १३॥ त्वं नो अस्या अमतेरुत क्षुधोऽभिशस्तेरव स्पृधि। त्वं नं ऊती तव चित्रया धिया शिक्षा शचिष्ठ गातुवित्॥ १४॥ सोम इद्वः सुतो अस्तु कलयो मा बिभीतन। अपेदेष ध्वस्मायंति स्वयं दिषो अमायति॥ १५॥ ५०॥

॥ ६७ ॥ १–२१ मरुतः मामदो माम्यो वा मैत्रावरुणिर्वसिष्ठो वा मरुत्या नालनद्धाः ॥ आदित्याः ॥ गायत्री ॥

॥ ६७॥ त्यान्नु क्षत्रियाँ अव आदित्यान्याचिषामहे। सुमृळीकाँ अभिष्टये॥ १॥ मित्रो नो अत्यंहतिं वरुणः पर्षदर्यमा।

॥३॥ निऽखातं चित् यः पुरुऽसंभृतं वसु उत् इत् वपति दाशुषे वज्री सुऽशिप्रः हरिऽअश्वः इत् करत् इंद्रः ऋत्वा यथा वशत् ॥४॥ यत् ववर्ध पुरुऽस्तुत पुरा चित् शूर नृणां वयं तत् ते इंद्र संभराम-सि यज्ञं उक्थं तुरं वचः ॥५॥४८॥ सचा सोमेषु पुरुऽहूत वज्रिऽवः मदाय शुष्म सोमऽपाः त्वं इत् हि ब्रह्मऽकृतें काम्यं वसु देष्टः सुन्वते भुवः ॥६॥ वयं एनं इदा ह्यः अपीपेम इह वज्रिणं तस्मै ऊं अद्य समना सुतंभर आ नूनं भूषत श्रुते ॥७॥ वृकः चित् अस्य वारणः उराऽअर्थिः आ वयुनेषु भूषति सः इमं नः स्तोमं जुजुषाणः आ गहि इंद्र मचिचया धिया ॥८॥ कत् ऊं नु अस्य अकृतं इंद्रस्य अस्ति पौंस्यं कैनी नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृत्रऽहा ॥९॥ कत् ऊं महीः अधृष्टाः अस्य तविषीः कत् ऊं वृत्रऽघ्नः अस्तृतं इंद्रः विश्वान् वेकुऽनाटान् अहःऽदृशः उत ऋत्वा पणीन् अभि ॥१०॥४९॥ वयं घ ते अपूर्व्या इंद्र ब्रह्माणि वृत्रऽहन् पुरुऽतमासः पुरुऽहूत वज्रिऽवः भृतिं न प्र भरामसि ॥११॥ पूर्वीः चित् हि त्वे तुविऽकूर्मिन् आऽशसः हवंते इंद्र ऊतयः तिरः चित् अर्यः सवना आ वसो गहि शविष्ठ श्रुधि मे हवं ॥१२॥ वयं घ ते त्वे इत् ऊं इंद्र विप्राः अपि स्मसि नहि त्वत् अन्यः पुरुऽहूत कः चन मघऽवन् अस्ति मर्डिता ॥१३॥ त्वं नः अस्याः अमतेः उत क्षुधः अभिऽशस्तेः अव स्पृधि त्वं नः ऊती तव चिचया धिया शिक्षा शचिष्ठ गातु-ऽवित् ॥१४॥ सोमः इत् वः सुतः अस्तु कलयः मा बिभीतन अप इत् एषः ध्वस्मा अयति स्वयं घ एषः अपं अयति ॥१५॥५०॥

॥६७॥ त्यान् नु क्षत्रियान् अवः आदित्यान् याचिषामहे सु-ऽमृळीकान् अभिष्टये ॥१॥ मित्रः नः अत्रिं अंहतिं वरुणः पर्षत् अर्यमा

यैमा। आदित्यासो यथा विदुः ॥२॥ तेषां हि चित्रमुक्थ्यं वरूथमस्ति दाशुषे। आदित्यानामरंकृते ॥३॥ महि वो महतामवो वरुण मित्रार्यमन्। अवांस्या वृणीमहे ॥४॥ जीवान्नो अभि धेतनादित्यासः पुरा हथात्। कद्ध स्थ हवनश्रुतः ॥५॥५१॥ यद्वः शंताय सुन्वते वरूथमस्ति यच्छर्दिः। तेना नो अधि वोचत ॥६॥ अस्ति देवा अंहोरुवस्ति रत्नमनागसः। आदित्या अङ्कतिनसः ॥७॥ मा नः सेतुः सिषेदयं महे वृणक्तु नस्परि। इंद्र इद्धि श्रुतो वशी ॥८॥ मा नो मृचा रिपूणां वृजिनानामविष्यवः। देवा अभि प्र मृक्षत ॥९॥ उत त्वामदिते मह्यं देव्युप ब्रुवे। सुमृळीकामभिष्टये ॥१०॥५२॥ पर्षि दीने गभीर आँ उग्रपुत्रे जिघाँसतः। माकिस्तोकस्य नो रिषत् ॥११॥ अनेहो नं उरुव्रज उरूचि वि प्रसर्तवे। कृधि तोकाय जीवसे ॥१२॥ ये मूर्धानः क्षितीनामदब्धासः स्वयशसः। व्रता रक्षंते अद्रुहः ॥१३॥ ते नं आसो वृकाणामादित्यासो मुमोचत। स्तेनं वह्निमिवादिते ॥१४॥ अपो षु णं इयं शरुरादित्या अप दुर्मतिः। अस्मदेत्वजघ्रुषी ॥१५॥५३॥ शश्वद्धि वः सुदानव आदित्या ऊतिभिर्वयं। पुरा नूनं बुभुज्महे ॥१६॥ शश्वंतं हि प्रचेतसः प्रतियंतं चिदेनसः। देवाः कृणुथ जीवसे ॥१७॥ तत्सु नो नव्यं सन्यस आदित्या यन्मुमोचति। बंधाद्वह्निमिवादिते ॥१८॥ नास्माकमस्ति तत्तर आदित्यासो अतिष्कदे। यूयमस्मभ्यं मृळत ॥१९॥ मा नो हेतिर्विवस्वत आदित्याः कृचिमा शरुः। पुरा नु जरसो वधीत् ॥२०॥ वि षु द्वेषो व्यंहतिमादित्यासो वि संहितं। विष्वग्वि वृहता रपः ॥२१॥५४॥४॥

अर्यमा आदित्यासः यथा विदुः॥२॥ तेषां हि चित्रं उक्थ्यं वरूथं अस्ति दाशुषे आदित्यानां अरंऽकृते॥३॥ महि वः महतां अवः वरुण मित्र अर्यमन् अवांसि आ वृणीमहे॥४॥ जीवान् नः अभि धेतन आदित्यासः पुरा हर्यात् कत् ह स्य हवनऽश्रुतः॥५॥ ॥५१॥ यत् वः आंतार्यं सुन्वते वरूथं अस्ति यत् छर्दिः तेन नः अधि वोचत॥६॥ अस्ति देवाः अंहोः उरु अस्ति रत्नं अनागसः आदित्याः अद्भुतऽएनसः॥७॥ मा नः सेतुः सिसेत् अयं महे वृणक्तु नः परि इंद्रः इत् हि श्रुतः वशी॥८॥ मा नः मृचा रिपूणां वृजिनानां अविष्यवः देवाः अभि प्र मृक्षत॥९॥ उत त्वां अदिते महि अहं देवि उपब्दे सुऽमृळीकां अभिष्टये॥१०॥५२॥ पर्षि दीने गभीरे आ उर्यऽमुचे जिघांसतः माकिः तोकस्य नः रिषत्॥११॥ अनेहः नः उरुऽव्रजे उरूचि वि प्रऽसर्तवे कृधि तोकाय जीवसे॥१२॥ ये मूर्धानः क्षितीनां अदब्धासः स्वऽयंशसः व्रता रक्षंते अदृहः॥१३॥ ते नः आसन्नः वृकाणां आदित्यासः मुमोचत स्तेनं वद्धंऽइव अदिते॥१४॥ अपो सु नः इयं शरुः आदित्याः अप दुःऽमतिः अस्मत् एतु अजमुषी॥१५॥५३॥ शश्वत् हि वः सुऽदानवः आदित्याः ऊतिऽभिः वयं पुरा नूनं वुभुज्महे॥१६॥ शश्वंतं हि प्रऽचेतसः प्रतिऽयंतं चित् एनसः देवाः कृणुथ जीवसे॥१७॥ तत् सु नः नव्यं सन्यसे आदित्याः यत् मुमोचति वंधात् वद्धंऽइव अदिते॥१८॥ न अस्माकं अस्ति तत् तरः आदित्यासः अतिऽस्कदे यूयं अस्मभ्यं मृळत॥१९॥ मा नः हेतिः विवस्वतः आदित्याः कृचिमा शरुः पुरा नु जरसः वधीत्॥२०॥ वि सु द्वेषः वि अंहतिं आदित्यासः वि संऽहितं विश्वक् वि वृहत रपः॥२१॥ ॥५४॥४॥

॥ ६८ ॥ १–१९ प्रियमेध ॥ १–१३ इन्द्रः । १४–१९ वृषाश्वमेधयोर्दानस्तुतिः ॥
१ ४ ७ १० अनुष्टुप् । २ ३ ५ ६ ८ ९. ११–१९ गायत्री ॥

॥ ६८ ॥ आ त्वा रथं यथोतये सुम्नाय वर्तयामसि । तुविकूर्मिमृतीषहमिंद्रं शविष्ठ सत्पते ॥ १ ॥ तुविशुष्म तुविक्रतो शचीवो विश्वया मते । आ पप्राथ महित्वना ॥ २ ॥ यस्य ते महिना महः परि ज्मायंतमीयतुः । हस्ता वज्रं हिरण्ययं ॥ ३ ॥ विश्वानरस्य वस्पतिमनानतस्य शवसः । एवैश्च चर्षणीनामूती हुवे रथानां ॥ ४ ॥ अभिष्टये सदावृधं स्वर्मीळ्हेषु यं नरः । नाना हवंत ऊतये ॥ ५ ॥ १ ॥ परोमात्रमृचीषममिंद्रमुग्रं सुराधसं । ईशानं चिद्रसूनां ॥ ६ ॥ तंतमिद्राधसे महे इंद्रं चोदामि पीतये । यः पूर्व्यामनुष्टुतिमीशे कृष्टीनां नृतुः ॥ ७ ॥ न यस्य ते शवसान सख्यमानंश मर्त्यः । नकिः शवांसि ते नशत् ॥ ८ ॥ त्वोतासस्त्वा युजाप्सु सूर्ये महद्धनं । जयेम पृत्सु वज्रिवः ॥ ९ ॥ तं त्वा यज्ञेभिरीमहे तं गीर्भिर्गिर्वणस्तम । इंद्र यथा चिदाविथ वाजेषु पुरुमाय्यं ॥ १० ॥ २ ॥ यस्य ते स्वादु सख्यं स्वाद्वी प्रणीतिरद्रिवः । यज्ञो वितंतसाय्यः ॥ ११ ॥ उरु णस्त्वे३ तनं उरु क्षयाय नस्कृधि । उरु णो यंधि जीवसे ॥ १२ ॥ उरुं नृभ्य उरुं गव उरुं रथाय पंथां । देववीतिं मनामहे ॥ १३ ॥ उप मा पड्भाद्भा नरः सोमस्य हर्षा । तिष्ठंति स्वादुरातयः ॥ १४ ॥ ऋज्राविंद्रोत आ ददे हरी ऋष्वस्य सूनवि । आश्वमेधस्य रोहिता ॥ १५ ॥ ३ ॥ सुरथाँ आतिथिग्वे स्वभीशूँरादंसे । आश्वमेधे सुपेशसः ॥ १६ ॥ पळश्वाँ आतिथिग्व इंद्रोते वधूमतः । सचा पूतक्रतौ सनं ॥ १७ ॥ ऐषु चेतद्यथत्यंतर्ऋज्रेषु रुषी । स्वभीशुः कशावती ॥ १८ ॥ न युष्मे वाजबंधवो निनित्सुश्चन मर्त्यः । अवद्यमधि दीधरत् ॥ १९ ॥ ४ ॥

॥६८॥ आ त्वा रथं यथोतये सुम्नाय वर्तयामसि तुविकूर्मिं ऋतिषहं इंद्रं शविष्ठ सत्पते ॥१॥ तुविष्णुम तुविक्रतो॰ शचीऽवः विष्णवा मते आ पप्राथ महिऽत्वना ॥२॥ यस्य ते महिना महः परि ज्मायंतं ईयतुः हस्ता वज्रं हिरण्ययं॥३॥ विश्वानरस्य वः पतिं अनानतस्य शवसः एवैः च चर्षणीनां ऊती हुवे रथानां ॥४॥ अभिष्टये सदाऽवृधं स्वःऽमीळ्हेषु यं नरः नाना हवंते ऊतये॥५॥१॥ परःऽमांचं ऋचीषमं इंद्रं उग्रं सुऽराधसं ईशानं चित् वसूनां ॥६॥ तंऽतं इत् राधसे महे इंद्रं चोदामि पीतये यः पूर्व्यो अनुंऽस्तुतिं देवेभ कृष्टीनां नृतुः ॥७॥ न यस्य ते शवसान सख्यं आनंश मर्त्यः नकिः शवांसि ते नशत् ॥८॥ त्वाऽऊतासः त्वा युजा अप्ऽसु सूर्ये महत् धनं जयेम पृत्ऽसु वज्रिऽवः ॥९॥ तं त्वा यज्ञेभिः ईमहे तं गीःऽभिः गिर्वणःऽतम इंद्र यथा चित् आविथ वाजेषु पुरुऽमाय्यं॥१०॥२॥ यस्य ते स्वादुसख्यं स्वाद्वी प्रऽनीतिः अद्रिऽवः यज्ञः वितंतसाय्यः ॥११॥ उरु नः तन्वे तने उरु क्षयाय नः कृधि उरु नः यंधि जीवसे॥१२॥ उरुं नृऽभ्यः उरुं गवे उरुं रथाय पंथां देवऽवीतिं मनामहे ॥१३॥ उप मा पट् ह्याऽद्या नरः सोमस्य हर्यां तिष्ठंति स्वादुऽरातयः ॥१४॥ ऋज्वी इंद्रोते आ दद्रे हरी घृष्वस्य सूनवि आशुऽमेधस्य रोहिता ॥१५॥३॥ सुऽरथान् आतिथिऽग्वे सुऽअभीशून् आदधे आशुऽमेधे सुऽमेधसः ॥१६॥ षट् अश्वान् आतिथिऽग्वे इंद्रोते वधूऽमतः सचा पूतऽक्रतौ सनं॥१७॥ आ एषु चेतत् वृषणऽवती शंतः ऋज्रेषु अरुषी सुऽअभीशुः कशाऽवती॥१८॥ न युष्मे वाजऽबंधवः निनित्सुः चन मर्त्यः अवद्यं अधि दीधरत् ॥१९॥४॥

॥ ६९ ॥ १–१६ प्रियमेधः ॥ १–१०, १३–१६ इंद्रः । ११[1] विश्वे देवाः । ११[2], १२ वरुणः ॥ १, ३ ७–१०, १२–१५ अनुष्टुप् । २ उष्णिक् । ४–६ गायत्री । ११, १६ पंक्तिः । १३, १४ बृहती ॥

॥६९॥ प्रप्रं वस्त्रिष्टुभमिषं मंदद्वीरायेंदवे। धिया वो मेधसातये पुरंध्या विवासति॥१॥ नदं व ओदतीनां नदं योयुवतीनां। पतिं वो अघ्न्यानां धेनूनामिषुध्यसि॥२॥ ता अस्य सूददोहसः सोमं श्रीणंति पृश्नयः। जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः॥३॥ अभि प्र गोपतिं गिरेंद्रमर्च यथा विदे। सूनुं सत्यस्य सत्पतिं॥४॥ आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि। यत्राभि संनवामहे॥५॥५॥ इंद्राय गावं आशिरं दुदुह्रे वज्रिणे मधु। यत्सीमुपह्वरे विदत्॥६॥ उद्यद्ब्रध्नस्य विष्टपं गृहमिंद्रश्च गन्वहि। मध्वः पीत्वा सचेवहि चिः सन्न सख्युः पदे॥७॥ अर्चत प्रार्चत प्रियमेधासो अर्चत। अर्चंतु पुत्रका उत पुरं न धृष्ण्वर्चत॥८॥ अव स्वराति गर्गरो गोधा परि सनिष्णत। पिंगा परि चनिष्कदिंद्राय ब्रह्मोद्यतं॥९॥ आ यत्पतंत्येन्यः सुदुघा अनपस्फुरः। अपस्फुरं गृभायत सोममिंद्राय पातवे॥१०॥६॥ अपादिंद्रो अपादग्निर्विश्वे देवा अमत्सत। वरुण इद्दह क्षयत्तमापो अभ्यनूषत वत्सं संशिश्वरीरिव॥११॥ सुदेवो असि वरुण यस्य ते सप्त सिंधवः। अनुक्षरंति काकुदं सूर्म्यं सुषिरामिव॥१२॥ यो व्यँतीरफाणयत्सुयुक्ताँ उप दाशुषे। तक्षो नेता तदिद्वपुरुपमा यो अमुंच्यत॥१३॥ अतीदु शक्र ओहत इंद्रो विश्वा अति द्विषः। भिनत्कनीनं ओदनं पच्यमानं परो गिरा॥१४॥ अर्भको न कुमारकोऽधि तिष्ठन्नवं रथं। स पक्षन्महिषं मृगं पित्वे मात्रे विभुक्रतुं॥१५॥ आ तू सुशिप्र दंपते रथं तिष्ठा हिरण्ययं। अधं द्युक्षं सचेवहि सहस्रपादमरुषं स्वस्तिगामनेहसं॥१६॥ तं घेमित्था नमस्विन उप स्वराजमासते। अर्थं चिदस्य

॥ ६९ ॥ प्रऽप्रं वः चिऽस्तुभं इषं मंदत्ऽचीराय इंदवे धिया वः मेधऽसातये पुरंऽध्या आ विवासति ॥१॥ नदं वः ओदतीनां नदं योयुवतीनां पतिं वः अघ्यानां धेनूनां इषुध्यसि ॥२॥ ताः अस्य सूदंऽदोहसः सोमं श्रीणंति पृश्नयः जन्मन् देवानां विशः चिपु आ रोचने दिवः ॥३॥ अभि प्र गोऽपतिं गिरा इंद्रं अर्च यथा विदे सूनुं सत्यस्य सत्ऽपतिं ॥४॥ आ हरयः ससृज्रिरे अरुषीः अधि बर्हिषि यत्र अभि संऽनवामहे ॥५॥५॥ इंद्राय गावः आऽशिरं दुदुह्रे वज्रिणे मधु यत् सीं उपऽहरे विदत् ॥६॥ उत् यत् ब्रध्नस्य विष्टपं गृहं इंद्रः च गच्छथः मध्वः पीत्वा सचेवहि चित्रः सन्न सख्युः पदे ॥७॥ अर्चत प्र अर्चत प्रियंऽमेधासः अर्चत अर्चंतु पुत्रकाः उत पुरं न धृष्णु अर्चत ॥८॥ अव स्वराति गर्गरः गोधा परि सनिस्वनत् पिंगा परि चनिस्कदत् इंद्राय ब्रह्म उत्ऽयंतं ॥९॥ आ यत् पतंति एन्यः सुऽदुघाः अनपऽस्फुरः अपऽस्फुरं गृभायत सोमं इंद्राय पातवे ॥१०॥६॥ अपात् इंद्रः अपात् अग्निः विश्वे देवाः अमत्सत वरुणः इत् उ ह क्षयत् तं आपः अभि अनूषत वत्सं संशिश्वरीःऽइव ॥११॥ सुऽदेवः असि वरुण यस्य ते सप्त सिंधवः अनुऽक्षरंति काकुदं सूर्म्ये सुषिरांऽइव ॥१२॥ यः व्यतीन् अफाणयत् सुऽयुक्तान् उप दाशुषे तक्वः नेता तत् इत् वपुः उपऽमा यः अमुच्यत ॥१३॥ अतिं इत् ऊं शक्रः ओहते इंद्रः विश्वाः अतिं द्विषः भिनत् कनीनः ओदनं पच्यमानं परः गिरा ॥१४॥ अभीकः न कुमारकः अधि तिष्ठत् नवं रथं सः पक्षत् महिषं मृगं पिचे मात्रे विभुऽक्रतुं ॥१५॥ आ तु सुऽशिप्र दंऽपते रथं तिष्ठ हिरण्ययं अध द्युक्षं सचेवहि सहस्रंऽपादं अरुषं स्वस्तिऽगां अनेहसं ॥१६॥ तं घ ईं इत्था नमस्विनः उप स्वऽराजं आसते अर्थं चित् अस्य

सुधितं यदेतव आवर्तयंति दावने ॥ १७ ॥ अनु प्रत्नस्यौकसः प्रियमेधास एषां । पूर्वामनु प्रयतिं वृक्तबर्हिषो हितप्रयस आशत ॥ १८ ॥ ७ ॥ ७ ॥

॥ ७० ॥ १–१५ पुरुहन्मा ॥ इंद्रः ॥ १–६ त्रिष्टुप् । ७–१२ गायत्री । १३ उष्णिक् । १४ अनुष्टुप् । १५ पुरउष्णिक् ॥

॥ ७० ॥ यो राजा चर्षणीनां याता रथेभिरध्रिगुः । विश्वासां तरुता पृतनानां ज्येष्ठो यो वृत्रहा गृणे ॥ १ ॥ इंद्रं तं शुंभ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि । हस्ताय वज्रः प्रति धायि दर्शतो महो दिवे न सूर्यः ॥ २ ॥ नकिष्टं कर्मणा नशद्यश्चकार सदावृधं । इंद्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णवोजसं ॥ ३ ॥ अपाळ्हमुग्रं पृतनासु सासहिं यस्मिन्महीरुरुजयः । सं धेनवो जायमाने अनोनवुर्द्यावः क्षामो अनोनवुः ॥ ४ ॥ यद्द्यावः इंद्र ते शतं शतं भूमीरुत स्युः । न त्वा वज्रिन्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥ ५ ॥ ८ ॥ आ पप्राथ महिना कृष्ण्या वृषन्विश्वा शविष्ठ शवसा । अस्माँ अव मघवन्गोमति व्रजे वज्रिंश्चित्राभिरूतिभिः ॥ ६ ॥ न सीमदेव आप दिवं दीर्घायो मर्त्यः । एतग्वा चिद्य एतशा युयोजते हरी इंद्रो युयोजते ॥ ७ ॥ तं वो महो महाय्यमिंद्रं दानाय सुष्टुतिं । यो गाधेषु य आरणेषु हव्यो वाजेष्वस्ति हव्यः ॥ ८ ॥ उदू षु णो वसो महे मृळस्व पूर्वचित्तये । उदिंद्र श्रवसे महे ॥ ९ ॥ त्वं न इंद्र ऋतयुस्त्वानिदो नि तृंपसि । मध्ये वसिष्ठ तुविनृम्णो वोनिं दासं शिश्नथो हथैः ॥ १० ॥ ९ ॥ अन्यव्रतममानुषमयज्वानमदेवयुं । अव स्वः सखा दुधुवीत पर्वतः सुप्राय दस्युं पर्वतः ॥ ११ ॥ त्वं न इंद्रासां हस्ते शविष्ठ दावने । धानानां न सं गृभायास्मयुर्हिः सं गृभायास्मयुः ॥ १२ ॥ मघोनः ऋतुमि-

सुऽधितं यत् एतवे आऽवर्तयंति दावने॥१७॥ अनु प्रत्नस्य ओकसः प्रियऽमेधासः एषां पूर्वो अनु प्रऽयतिं वृक्तऽबर्हिषः हिन्तऽप्रयसः आशत॥१८॥७॥७॥

॥७०॥ यः राजा चर्षणीनां याता रथेभिः अध्रिऽगुः विश्वासां तरुता पृतनानां ज्येष्ठः यः वृत्रऽहा गृणे॥१॥ इंद्रं तं शुंभ पुरुऽहन्मन् अवसे यस्य द्विता विऽधर्तरि हस्तांय वज्रः प्रति धायि दर्शतः महः दिवे न सूर्यः॥२॥ नकिः तं कर्मणा नशत् यः चकार सदाऽवृधं इंद्रं न यज्ञैः विश्वऽगूर्तं ऋभ्वसं अधृषं धृष्णुऽओजसं॥३॥ अपाळ्हं उग्रं पृतनासु सस्हिं यस्मिन् महीः उरुऽजयः संऽधेनवः जायमाने अनोनवुः द्यावः क्षामः अनोनवुः॥४॥ यत् द्यावः इंद्र ते शतं शतं भूमीः उत स्युः० न त्वा वज्रिन् सहस्रं सूर्यः अनु न जातं अष्ट रोदसी॥५॥८॥ आ यत्प्राथ महिना वृष्ण्यां वृषन् विश्वा शविष्ठ शवसा अस्मान् अव मघऽवन् गोऽमति व्रजे वज्रिन् चित्राभिः ऊतिऽभिः॥६॥ न सीं अदेवः आपत् इषे दीर्घऽआयोः० मर्त्यः एतऽग्वा चित् यः एतशे युयोजते हरी इंद्रः युयोजते॥७॥ तं वः महः महाय्यं इंद्रं दानायसत्पतिं यः गाधेषु यः आऽअरणेषु हव्यः वाजेषु अस्ति हव्यः॥८॥ उत् ऊं सु नः वसोः महे मृळस्व पूर राधसे उत् ऊं सु मह्यै मघऽवन् मघत्तये उत् इंद्र अवसे महे॥९॥ त्वं नः इंद्र ऋतऽयुः त्वाऽनिदः नि तृंपसि मध्ये वसिष्ठ तुविऽनृम्ण ऊर्वोः नि दासं शिश्नथः हथैः॥१०॥९॥ अन्यऽव्रतं अमानुषं अयज्वानं अदेवऽयुं अव स्वः सखा दुधुवीत पर्वतः सुऽआयं दस्युं पर्वतः॥११॥ त्वं नः इंद्र आसां हस्ते शविष्ठ दावने धानानां न संगृभाय अस्मऽयुः द्विः सं गृभाय अस्मऽयुः॥१२॥ सखायः क्रतुं इ-

च्छत कथा राधाम शरस्यं । उपस्तुतिं भोजः सूरियों अह्रयः ॥१३॥ भूरिभिः समहृ ऋषिभिर्बर्हिष्मद्भिः स्तविष्यसे । यदित्थमेकमेकमिच्छरं वत्साय्परादर्दः ॥१४॥ कर्णगृह्या मघवा शौरदेव्यो वत्सं नस्त्रिभ्य आनयत् । अजां सूरिर्न धातवे ॥१५॥१०॥

॥ ७१ ॥ १–१५ सुदीतिपुरुमीळ्हौ ऋषी पौरान्यतष्टुभौ ॥ अग्निः ॥ १–९ गायत्री । १०–१५ प्रागाथं ॥

॥७१॥ त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः । उत द्विषो मर्त्यस्य ॥१॥ नहि मन्युः पौरुषेय ईशे हि वः प्रियजात । त्वमिद्दंसि दाशुषे दाशवान् ॥२॥ स नो विश्वेभिर्देवेभिरूर्जो नपाद्भद्रशोचे । रयिं देहि विश्ववारं ॥३॥ न तमग्ने अरातयो मर्तं युवन्त रायः । यं चायसे दाश्वांसं ॥४॥ यं त्वं विप्र मेधसातावग्ने हिनोषि धनाय । स तवोती गोषु गन्ता ॥५॥११॥ त्वं रयिं पुरुवीरमग्ने दाशुषे मर्ताय । प्र णो नय वस्यो अच्छ ॥६॥ उरुष्या णो मा परा दा अघायते जातवेदः । दुराध्येऽ३ मर्ताय ॥७॥ अग्ने मार्किष्टे देवस्य रातिमदेवो युयोत । त्वमीशिषे वसूनां ॥८॥ स नो वस्व उप मास्यूर्जो नपान्माहिनस्य । सख वसो जरितृभ्यः ॥९॥ अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतं । अच्छा यज्ञासो नमसा पुरुवसुं पुरुप्रशस्तमूतये ॥१०॥१२॥ अग्निं सूनुं सहसो जातवेदसं दानाय वार्याणां । हिता यो भूदमृतो मर्त्येष्वा होता मन्द्रतमो विशि ॥११॥ अग्निं यो देवयुज्ययाग्निं प्रयत्यध्वरे । अग्निं धीषु प्रथममग्निमर्वत्यग्निं क्षेत्रायसाधसे ॥१२॥ अग्निरिषां सख्ये ददातु न ऊर्जे यो वार्याणां । अग्निं तोके तनये शश्वदीमहे वसुं संतं तनूषां ॥१३॥ अग्निमीळिष्वायवसे गाथाभिः शीरशोचिषं । अग्निं राये पुरुमीळ्हं श्रुतं नरोऽग्निं सुदीतये

च्छत् कथा राधाम् शरस्य उपऽस्तुतिं भोजः सूरिः यः अह्रयः ॥१३॥ भूरिऽभिः समहन् ऋषिऽभिः वृहिन्मन्तऽभिः स्तविष्यसे यत् इत्थं एकंऽएकं इत् शरे वत्सान् पराऽददेः ॥१४॥ कर्णऽगृह्य मघऽवा शीरऽदेव्यः वत्सं नः विऽभ्यः आ अनयत् अजां सूरिः न धातवे ॥१५॥१०॥

॥७१॥ त्वं नः अग्ने महःऽभिः पाहि विश्वस्याः अरातेः उत द्विषः मर्त्यस्य ॥१॥ नहि मन्युः पौरुषेयः ईशे हि वः प्रियऽजात त्वं इत् असि क्षपाऽवान् ॥२॥ सः नः विश्वेभिः देवेभिः ऊर्जः नपात् भद्रऽशोचे रयिं देहि विश्वऽवारं ॥३॥ न तं अग्ने अरातयः मर्तं युवंत रायः यं चायसे दाश्वांसं ॥४॥ यं त्वं विप्र मेधऽसातौ अग्ने हिनोषि धनाय सः तवं ऊती गोषु गंता ॥५॥११॥ त्वं रयिं पुरुऽवीरं अग्ने दाशुषे मर्ताय प्र नः नय वस्यः अच्छ ॥६॥ उरुष्य नः मा परा दाः अघऽयते जातऽवेदः दुःऽआध्ये मर्ताय ॥७॥ अग्ने माकिः ते देवस्य रातिं अदेवः युयोत् त्वं ईशिषे वसूनां ॥८॥ सः नः वस्वः उप मासि ऊर्जः नपात् माहिनस्य सखे वसो जरितृऽभ्यः ॥९॥ अच्छ नः शीरऽशोचिषं गिरः यंतु दर्शतं अच्छ यज्ञासः नमसा पुरुऽवसुं पुरुऽप्रशस्तं ऊतये ॥१०॥१२॥ अग्निं सूनुं सहसः जातऽवेदसं दानाय वार्याणां हिता यः भूत् अमृतः मर्त्येषु आ होता मंद्रऽतमः विशि ॥११॥ अग्निं वः देवऽयज्यया अग्निं प्रऽयति अध्वरे अग्निं धीषु प्रथमं अग्निं अर्वंति अग्निं क्षेचाय साधसे ॥१२॥ अग्निः द्विषां सख्ये दधातु नः ईशे यः वार्याणां अग्निं तोकस्य तनये शश्वत् ईमहे वसुं संतं तनूऽपां ॥१३॥ अग्निं ईळिष्व अवसे गाथाभिः शीरऽशोचिषं अग्निं राये पुरुऽमीळ्हं श्रुतं नरः अग्निं सुऽदीतये

छर्दिः॥१४॥ अग्निं द्वेषो॒ योत॒वै नो॑ गृणी॒मस्य॒ग्निं शं योश्च॒ दात॑वे।
विश्वा॑सु विक्ष्वि॒तेव॒ ह्यो॒ भुव॒द्वस्तु॑र्धू॒णां ॥१५॥१३॥

॥ ७२ ॥ १–१८ हर्यतः प्रागाथः ॥ अग्निर्हवींषि वा ॥ गायत्री ॥

॥७२॥ हु॒विष्कृ॑णुध्व॒मा ग॑मद्ध्व॒र्युर्वे॑नते॒ पुनः॑। विद्वाँ अ॑स्य प्रशासनं॥१॥ नि ति॒ग्ममभ्यं१॑ शुं सीद॒द्धोता॑ म॒नावधि। जु॒षा॒णो अ॑स्य स॒ख्यं॥२॥ अ॒न्तरि॑च्छति॒ तं जने॑ रु॒द्रं प॒रो म॑नी॒षया॑। गृ॒भ्णंति॑ जि॒ह्वया॑ स॒सं॥३॥ जाम्यं॑तीतपे॒ धनु॑र्वयो॒धा अ॑रुह॒द्वनं॑। ह॒पर्दं॑ जि॒ह्वयाव॑धीत्॥४॥ चर॑न्व॒त्सो र॒ण॒न्नि॒ह नि॑दा॒तारं॒ न वि॑न्दते। वेति॒ स्तोत॑व अ॒ब्यं॑॥५॥१४॥ उ॒तो न्व॑स्य॒ यन्म॒हद्श्वा॑ वृ॒द्धोज॑नं बृ॒हत्। दा॒मा रथ॑स्य दं॒शने॑॥६॥ दु॒हंति॑ स॒प्तिका॑मुप॒ द्वा पंच॑ सृ॒जतः॑। तीर्थे॑ सिंधो॒रधि॑ स्व॒रे॥७॥ आ दु॒रभि॑र्वि॒वस्व॑त॒ इंद्रः॑ कोश॑मचुच्यवीत्। खेद॑या चि॒वृता॑ दि॒वः॥८॥ परि॑ वि॒धात॑रध्व॒रं जू॒र्णिरे॑ति॒ न॑वीयसी। मध्वा॑ होता॑रो अंजते॥९॥ सिं॒चंति॒ नम॑सावतमु॒च्चा च॑क्रं॒ परि॑ज्मानं। नी॒चीन॑बारमक्षि॒तं॥१०॥१५॥ अ॒भ्या॒रु॒मिद॑द्रयो॒ निपि॑क्तं पु॒ष्क॒रे॒ मधु॑। अ॒व॒तस्य॑ वि॒सर्ज॑ने॥११॥ गाव॒ उपा॑वता॒वतं॑ म॒ही य॒ज्ञस्य॑ र॒प्सुदा॑। उ॒भा कर्णा॑ हिर॒ण्यया॑॥१२॥ आ सु॒ते सिं॑चत श्रि॒यं॑ रो॒दस्यो॑र॒भिश्रि॑यं॑। रसा॑ दधीत वृष॒भं॥१३॥ ते जा॑नत॒ स्वमो॒क्यं१॑सं व॒त्सासो॒ न मा॒तृभिः॑। मि॒थो न॑संत जा॒मिभिः॑॥१४॥ उप॒ स्रक्षे॑षु॒ वप॑संतः कृण्वते धरु॒णं दि॒वि। दे॒वेषु॑ अ॒श्रमं॒ नमः॑ स्वः॥१५॥१६॥ अधु॑क्षन्पि॒प्युषी॒मिष॒मूर्जं॑ स॒प्तप॑दीम॒रिः। सू॒र्यस्य॑ स॒प्त र॒श्मिभिः॑॥१६॥ सोम॑स्य मि॒त्रावरु॑णो॒दिता॒ सूर॒ आ द॑दे। तदा॑तुरस्य भेष॒जं॥१७॥ उ॒तो न्व॑स्य॒ यत्प॒दं हर्य॑तस्य नि॒धान्य॑। परि॒ द्यां जि॒ह्वया॑ तनन्॥१८॥१७॥

हृदिः॥१४॥ अग्निं देवैः योतवै नः गृणीमसि अग्निं शं योः च दातवे विश्वासु विक्षु अविताऽइव हव्यः भुवत् वस्तुः चृषूणां॥१५॥१३॥

॥७२॥ हविः कृणुध्वं आ गमत् अध्वर्युः वनते पुनः' विद्वान् अस्य प्रऽशासनं॥१॥ नि तिग्मं अभि अंशुं सीदत् होता मनौ अधि जुषाणः अस्य सख्यं॥२॥ अंतः इच्छंति तं जनें रुद्रं परः मनीषया गृभ्णंति जिह्वया ससं॥३॥ जामि अतीतपे धनुः वयःऽधाः अरुहत् वनं हपदं जिह्वया आ अवधीत्॥४॥ चरन् वत्सः रुशन् इह निऽदातारं न विंदते वेतिं स्तोतवे अंव्यं॥५॥१४॥ उतो' नु अस्य यत् महत् अश्वंऽवत् योजनं बृहत् दामा रथस्य दर्हशे॥६॥ दुहंतिं सप्त एकां उपं द्वा पंच सृजतः तीर्थे सिंधोः अधि स्वरे॥७॥ आ दशऽभिः विवस्वंतः इंद्रः कोशं अचुच्यवीत् खेदया चिऽवृता दिवः॥८॥ परि चिऽधातुः अध्वरं जूर्णिः एति नवीयसी मध्वा होतारः अंजते॥९॥ सिंचंति नमसा अवतं उच्चाऽचक्रं परिऽज्मानं नीचीनंऽवारं अक्षितं॥१०॥१५॥ अभिऽआरे इत् अद्रयः निऽसिक्तं पुष्करे मधु अवतस्य विऽसर्जने॥११॥ गावः उप अवत अवतं मही' यज्ञस्य रप्सुदा उभा कर्णा हिरण्यया॥१२॥ आ सुते सिंचत श्रियं रोदस्योः अभिऽश्रियं रसा दधीत वृषभं॥१३॥ ते जानत स्वं ओक्यं सं वत्सासः न मातृऽभिः मिथः नसंत जामिऽभिः॥१४॥ उप सद्मेषु बप्सतः कृण्वते धरुणं दिवि इंदें अभ्रा नर्मः स्वः०॥१५॥१६॥ अधुक्षत् पिप्युषीं इषं ऊर्जं सप्तऽपदीं अरिः सूर्यस्य सप्त रश्मिऽभिः॥१६॥ सोमस्य मित्रावरुणा उतऽईता सूरे आ दद्रे तत् आतुरस्य भेषजं॥१७॥ उतो' नु अस्य यत् पदं हर्यतस्य निऽधान्यं परि द्यां जिह्वया अतनत्॥१८॥१७॥

॥ ७३ ॥ १–१८ गोपवन आत्रेयः सप्तवधिर्वा ॥ अश्विनौ ॥ गायत्री ॥

॥७३॥ उदीराथामृतायते युंजाथामश्विना रथँ। अंति पद्भूतु वामवः॥१॥ निमिषंश्चिज्जवीयसा रथेना यातमश्विना। अंति पद्भूतु वामवः॥२॥ उप स्तृणीतमत्रये हिमेन घर्ममश्विना। अंति पद्भूतु वामवः॥३॥ कुह स्थः कुह जग्मथुः कुह श्येनेव पेतथुः। अंति पद्भूतु वामवः॥४॥ यद्य कर्हि कहिं चिच्छुश्रूयातमिमं हवं। अंति पद्भूतु वामवः॥५॥१८॥ अश्विना यामहूतमा नेदिष्ठं याम्याप्यं। अंति पद्भूतु वामवः॥६॥ अवीतमत्रये गृहं कृणुतं युवमश्विना। अंति पद्भूतु वामवः॥७॥ वरेण्ये अग्निमातपो वदते वल्गवत्रये। अंति पद्भूतु वामवः॥८॥ प्र सप्तवधिराशसा धारामग्नेरशायत। अंति पद्भूतु वामवः॥९॥ इहा गंतं वृषण्वसू शृणुतं म इमं हवं। अंति पद्भूतु वामवः॥१०॥१९॥ किमिदं वां पुराणवज्जरंतोरिव शस्यते। अंति पद्भूतु वामवः॥११॥ समानं वां सजात्यं समानो बंधुरश्विना। अंति पद्भूतु वामवः॥१२॥ यो वां रजांस्यश्विना रथो वियाति रोदसी। अंति पद्भूतु वामवः॥१३॥ आ नो गव्येभिरश्व्यैः सहस्रैरुप गच्छतं। अंति पद्भूतु वामवः॥१४॥ मा नो गव्येभिरश्व्यैः सहस्रेभिरति ख्यतं। अंति पद्भूतु वामवः॥१५॥ अरुणप्सुरुषा अभूदकर्ज्योतिर्कृतावरी। अंति पद्भूतु वामवः॥१६॥ अश्विना सु विचाकशद्वृष्टिं परिज्मनाँ इव। अंति पद्भूतु वामवः॥१७॥ पुरं न धृष्णवा रुज कृष्णया बाधितो विशा। अंति पद्भूतु वामवः॥१८॥२०॥

॥ ७४ ॥ १–१५ गोपवन आत्रेयः ॥ १–१२ अश्विनौ । १३–१५ सुतंभरो वात्स्यस्य दानस्तुतिः ॥ १ ३ ७ १०.१३–१५ अनुष्टुप् । २ ४ ५. ६ ८ ९.११.१२ गायत्री ॥

॥७४॥ विशोविशो वो अतिथिं वाजयंतः पुरुप्रियं। अ-

॥ ७३ ॥ उत् ईराथां ऋतऽयते युंजाथां अश्विना रथं अंतिं सत् भूतु वां अवः ॥ १ ॥ निऽमिषः चित् जवीयसा रथेन आ यातं अश्विना अंतिं सत् भूतु वां अवः ॥ २ ॥ उप स्तृणीत अचये हिमेन घर्मं अश्विना अंतिं सत् भूतु वां अवः ॥ ३ ॥ कुहं स्थः कुहं जग्मथुः कुहं श्येनाऽइव पेतथुः अंतिं सत् भूतु वां अवः ॥ ४ ॥ यत् अद्य कर्हि कर्हि चित् शुश्रुयातं इमं हवं अंतिं सत् भूतु वां अवः ॥ ५ ॥ १८ ॥ अश्विना यामऽहूतमा नेदिष्ठं यामि आप्यं अंतिं सत् भूतु वां अवः ॥ ६ ॥ अवंतं अचये गृहं कृणुतं युवं अश्विना अंतिं सत् भूतु वां अवः ॥ ७ ॥ वरेये अग्निं आऽतपः वदते वल्गु अचये अंतिं सत् भूतु वां अवः ॥ ८ ॥ प्र सप्तऽवध्रिः आऽशसा धारां अग्रेः अशायत अंतिं सत् भूतु वां अवः ॥ ९ ॥ इह आ गतं वृषण्ऽवसू शृणुतं मे इमं हवं अंतिं सत् भूतु वां अवः ॥ १० ॥ १९ ॥ किं इदं वां पुराणऽवत् जरंतोः ऽइव शस्यते अंतिं सत् भूतु वां अवः ॥ ११ ॥ समानं वां सऽजात्यं समानः बंधुः अश्विना अंतिं सत् भूतु वां अवः ॥ १२ ॥ यः वां रजांसि अश्विना रथः विऽयाति रोदसी अंतिं सत् भूतु वां अवः ॥ १३ ॥ आ नः गव्येभिः अश्व्यैः सहस्रैः उप गच्छतं अंतिं सत् भूतु वां अवः ॥ १४ ॥ मा नः गव्येभिः अश्व्यैः सहस्रेभिः अति ख्यतं अंतिं सत् भूतु वां अवः ॥ १५ ॥ अरुणऽप्सुः उषाः अभूत् अर्कः ज्योतिः ऋतऽवरी अंतिं सत् भूतु वां अवः ॥ १६ ॥ अश्विना सु विऽचाकशत् वृक्षं पर्णयमान्ऽइव अंतिं सत् भूतु वां अवः ॥ १७ ॥ पुरं न धृष्णो आ रुज कृष्णया बाधितः विशा अंतिं सत् भूतु वां अवः ॥ १८ ॥ २० ॥

॥ ७४ ॥ विशःऽविशः वः अतिथिं वाजऽयंतः पुरुऽप्रियं अ-

मिं वो दुर्यं वचः स्तुषे शूषस्य मन्मंभिः ॥१॥ यं जनांसो हुविष्मंतो मित्रं न सर्पिरासुतिं। प्रशंसंन्ति प्रशस्तिभिः ॥२॥ पन्यांसं जात-वेदसं यो देवतात्युद्यता। हव्यान्यैरयद्दिवि ॥३॥ आगंन्म वृत्रहंतमं ज्येष्ठमग्निमानवं। यस्य श्रुतर्वी बृहन्नाक्षो अनीक एधते ॥४॥ अमृतं जातवेदसं तिरस्तमांसि दर्शतं। घृताहवनमीड्यं ॥५॥२१॥ सवाधो यं जना इमे३ मिं हव्येभिरीळते। जुह्वानासो यतस्रुचः ॥६॥ इयं ते नव्यसी मतिरग्ने अधायि अस्मदा। मंद्र सुजात सुक्रतो-ऽमूर दस्मातिथे ॥७॥ सा ते अग्ने शंतमा चनिष्ठा भवतु प्रिया। तया वर्धस्व सुष्टुतः ॥८॥ सा द्युम्निन्द्युम्निनी बृहदुपोप श्रवंसि श्रवः। दधीत वृत्रतूर्ये ॥९॥ अश्वमिन्नां रथ्यां त्वमिंद्रं न सत्य-तिं। यस्य श्रवांसि तूर्वथ पन्यंपन्यं च कृष्टयः ॥१०॥२२॥ यं त्वा गोपवनो गिरा चनिष्ठदग्ने अंगिरः। स पावक श्रुधी हवं ॥११॥ यं त्वा जनास ईळते सवाधो वाजसातये। स बोधि वृत्रतूर्ये ॥१२॥ अहं हुवान आर्द्रे श्रुतर्वणि मद्च्युतिं। शर्धांसीव स्तुका-विनां मृक्षा शीर्षा चतुर्णी ॥१३॥ मां चत्वार आशवः शविष्ठस्य द्रवित्नवः। सुरथांसो अभि प्रयो वक्षन्वयो न तुग्र्यं ॥१४॥ सत्य-मित्था महेनदि परुष्णयवं देदिशं। नेमापो अश्वदातरः शवि-ष्ठादस्ति मर्त्यः ॥१५॥२३॥

॥ ७५ ॥ १–१६ विरूपः ॥ अग्निः ॥ गायत्री ॥

॥७५॥ युक्ष्वा हि देवहूतमाँ अश्वाँ अग्ने रथीरिव। नि होता पूर्व्यः सदः ॥१॥ उत नो देव देवाँ अच्छा वोचो विदुष्टरः। अविष्टा वार्यो कृधि ॥२॥ त्वं हु यद्यविष्यवे सहसः सूनवाहुत। ऋतावा यज्ञियो भुवः ॥३॥ अयमग्निः सहस्रिणो वाजस्य

मिं वः दुर्यं वचः स्तुपे पूपस्यं मन्मंऽभिः॥१॥ यं जनांसः हुवि-
ष्मंतः मित्रं न सर्पिःऽआसुतिं प्रऽशंसंन्ति प्रशस्तिऽभिः॥२॥ प-
न्यांसं जातऽवेदसं यः देवऽतांति उत्ऽयंता हव्यानिं ऐरयत् दिवि
॥३॥ आ अगन्म बृहन्ऽतमं ज्येष्ठं अग्निं आनवं यस्यं श्रुतर्वी
बृहत् आर्क्षः अनीकेऽधते॥४॥ अमृतं जातऽवेदसं तिरः तमां-
सि दर्शतं घृतऽआहवनं ईड्यं॥५॥२१॥ सऽवार्धः यं जनाः इमे
अग्निं हव्येभिः ईळते जुह्वानासः यतऽस्रुचः॥६॥ इयं ते नव्यसी
मतिः अग्ने अधायि अस्मत् आ मंद्र सुऽजात सुऽक्रतो॰ अमूर
दस्म अतिथे॥७॥ सा ते अग्ने शंऽतमा चनिष्ठा भवतु प्रिया तया
वर्धस्व सुऽस्तुतः॥८॥ सा द्युम्नैः द्युम्निनी बृहत् उपऽउप श्रवंसि
श्रवः दधीत वृत्रऽतूर्ये॥९॥ अश्वं इत् गां रथ्ऽआं त्वेपं इंद्रं न सत्-
ऽपतिं यस्य श्रवांसि तूर्वथ पन्यैऽपन्यं च कृष्टयः॥१०॥२२॥ यं त्वा
गोपवनः गिरा चनिष्ठत् अग्ने अंगिरः सः पावक श्रुधि हवं॥११॥
यं त्वा जनासः ईळते सऽवार्धः वाजेऽसातये सः बोधि वृत्रऽतूर्ये
॥१२॥ अहं हुवानः आर्क्षं श्रुतर्वणि मद्ऽच्युतं शर्धांसिऽइव स्तु-
काऽविनां मृक्षा शीर्षा चतुर्णी॥१३॥ मां चत्वारः आशवः शर्वि-
ष्टस्य द्रविन्नवः सुऽरथासः अभि प्रयः वहन्ति वयः न तुग्र्यं॥१४॥
सत्यं इत् त्वा महेऽनदि परुष्णि अव देदिशं न इट् आपः अश्वऽदा-
तरः शर्विष्टात् अस्मि मर्त्यः॥१५॥२३॥

॥७५॥ मुञ्च हि देवऽहूतमान् अश्वान् अग्ने रथीःऽइव नि होः-
ता पूर्व्यः सदः॥१॥ उत नः देव देवान् अच्छ वोचः विदुःऽतरः
श्रत् विश्वा वार्या कृधि॥२॥ त्वं हि यत् यविष्ठ्य सहसः सूनो आ-
ऽहुत चित्तऽवां यज्ञियः भुवः॥३॥ अयं अग्निः सहसिणः वाजस्य

शतिनस्पतिः। मूर्धा कवी रयीणां॥४॥ तं नेमिमृभवो यथा नं-मस्व सहूतिभिः। नेदीयो यज्ञमंगिरः॥५॥२४॥ तस्मै नूनमभिद्यवे वाचा विरूप नित्यया। वृष्णे चोदस्व सुष्टुतिं॥६॥ कमु ष्विदस्य सेनयाग्नेरपाकचक्षसः। पणिं गोषुं स्तरामहे॥७॥ मा नो देवानां विशः प्रस्नातीरिवोत्सदः। कृशं न हासुरघ्न्याः॥८॥ मा नः समस्य दूढ्यः परिद्वेषसो अंहतिः। ऊर्मिर्न नावमा वधीत्॥९॥ नमस्ते अग्न ओजसे गृणंति देव कृष्टयः। अमैरमित्रमर्दय॥१०॥२५॥ कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिं। उरुकृदुरु णस्कृधि॥११॥ मा नो अस्मिन्महाधने परा वर्भारभृद्यथा। संवर्गे सं रयिं जय॥१२॥ अन्यमस्मद्धिया इयमग्ने सिषक्तु दुच्छुना। वधैर्नो अभि-वृच्छवः॥१३॥ यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा। तं घेदग्निर्वृधावति॥१४॥ परस्या अधि संवतोऽवराँ अभ्या तर। यत्राहमस्मि ताँ अव॥१५॥ विद्मा हि ते पुरा वयमग्ने पितुर्यथावसः। अधा ते सुम्नमीमहे॥१६॥२६॥

॥ ७६ ॥ १-१२ कुरुसुतिः काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥७६॥ इमं नु मायिनं हुव इंद्रमीशानमोजसा। मरुत्वंतं न वृंजसे॥१॥ अयमिंद्रो मरुत्सखा वि वृत्रस्याभिनच्छिरः। व-ज्रेण शतपर्वणा॥२॥ वावृधानो मरुत्सखेंद्रो वि वृत्रमैरयत्। सृजन्त्समुद्रिया अपः॥३॥ अयं ह येन वा इदं स्वर्मरुत्वता जितं। इंद्रेण सोमपीतये॥४॥ मरुत्वंतमृजीषिणमोजस्वंतं वि-दथ्यिनं। इंद्रं गीर्भिर्हवामहे॥५॥ इंद्रं प्रत्नेन मन्मना मरुत्वंतं ह-वामहे। अस्य सोमस्य पीतये॥६॥२७॥ मरुत्वाँ इंद्र मीढ्वः पिबा सोमं शतक्रतो। अस्मिन्यज्ञे पुरुष्टुत॥७॥ तुभ्येदिंद्र म-

शतिनः पतिः मूर्धा कविः रयीणां ॥४॥ तं नेमिं ऋभवः यथा आ नमस्य सहूतिऽभिः नेदीयः यज्ञं अंगिरः ॥५॥२४॥ तस्मै नूनं अभिऽद्यवे वाचा विऽरूप नित्यया वृष्णे चोदस्व सुऽस्तुतिं ॥६॥ कं ऊं स्वित् अस्य सेनया अग्नेः अपाकऽचक्षसः पणिं गोषु स्तरामहे ॥७॥ मा नः देवानां विशः प्रऽप्रयतीः ऽइव उषाः कृणं न हासुः अघ्न्याः ॥८॥ मा नः समस्य दुःऽध्यः परिऽद्वेषसः अंहतिः ऊर्मिः न नावं आ वधीत् ॥९॥ नमः ते अग्ने ओजसे गृणंति देव कृष्टयः अमैः अमित्रं अर्दय ॥१०॥२५॥ कुवित् सु नः गोऽइष्टये अग्ने संऽवेषिषः रयिं उरुऽकृत् उरु नः कृधि ॥११॥ मा नः अस्मिन् महाऽधने परा वर्क् भारऽभृत् यथा संऽवर्गं संरयिं जय ॥१२॥ अन्यं अस्मत् भियेषयं अग्ने सिसक्तु दुच्छुना वधं नः अमऽवत् शवः ॥१३॥ यस्य अजुषत् नमस्विनः शमीं अदुःऽमखस्य वा तं घ इत् अग्निः वृधा अवति ॥१४॥ परस्याः अधि संऽवतः अवरान् अभि आ तर यत्र अहं अस्मि तान् अव ॥१५॥ विद्म हि ते पुरा वयं अग्ने पितुः यथा अवसः अध ते सुम्नं ईमहे ॥१६॥२६॥

॥७६॥ इमं नु मायिनं हुवे इंद्रं ईशानं ओजसा मरुत्वंतं न वृजसे ॥१॥ अयं इंद्रः मरुत्ऽसखा वि वृत्रस्य अभिनत् शिरः वज्रेण शतऽपर्वणा ॥२॥ ववृधानः मरुत्ऽसखा इंद्रः वि वृत्रं ऐरयत् सृजन् समुद्रियाः अपः ॥३॥ अयं ह येन वै इदं स्वः मरुत्वता जितं इंद्रेण सोमऽपीतये ॥४॥ मरुत्वंतं ऋजीषिणं ओजस्वंतं विऽरप्शिनं इंद्रं गीःऽभिः हवामहे ॥५॥ इंद्रं प्रत्नेन मन्मना मरुत्वंतं हवामहे अस्य सोमस्य पीतये ॥६॥२७॥ मरुत्वान् इंद्र मीढ्वः पिबं सोमं शतऽक्रतो० अस्मिन् यज्ञे पुरुऽस्तुत ॥७॥ तुभ्यं इत् इंद्र मन्

रुत्वंते सुताः सोमासो अद्रिवः। हृदा हूयंत उक्थिनः ॥८॥ पिवेदिंद्र मरुत्सखा सुतं सोमं दिविष्टिषु। वज्रं शिशान ओजसा ॥९॥ उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः। सोममिंद्र चमू सुतं ॥१०॥ अनु त्वा रोदसी उभे क्रक्षमाणमकृपेतां। इंद्र यद्देवहाभवः ॥११॥ वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशं। इंद्रात्परि तन्वं ममे ॥१२॥ २८॥

॥ ७७ ॥ १–११ कुरुसुतिः काण्वः ॥ इंद्रः ॥ १–९ गायत्री। १० पृहती। ११ सतोबृहती ॥

॥ ७७ ॥ जज्ञानो नु शतक्रतुर्वि पृच्छदिति मातरं। क उग्राः के ह शृण्विरे ॥१॥ आदीं श्वत्न्यवदीर्णाभमहीशुवं। ते पुत्र संतु निष्टुरः ॥२॥ समित्तान्वृत्रहाखिदत्से अराँ इव खेदया। प्रवृद्धो दस्युहाभवत् ॥३॥ एकया प्रतिधापिबत्साकं सरांसि त्रिंशतं। इंद्रः सोमस्य काणुका ॥४॥ अभि गंधर्वमतृणदवुभेषु रजःस्वा। इंद्रो वलस्य दद्रुधे ॥५॥ २९॥ निरावित्यद्रिरिभ्य आ धारयत्पक्वमोदनं। इंद्रो वृंदं स्वातत्तं ॥६॥ शतवंभ इषुस्तव सहस्रपर्ण एक इत्। यमिंद्र चकृषे युजे ॥७॥ तेन स्तोतृभ्य आ भर नृभ्यो नारिभ्यो अवसे। सद्यो जात ऋंभुषिर ॥८॥ एता चकानानिं ते कृता वर्पिष्ठानि परीणसा। हृदा वीड्वधारयः ॥९॥ विश्वेत्ता विष्णुराभरदुरुक्रमस्वेपितः। शतं महिषान्दीरयाकमोदनं वराहमिंद्र एसुषं ॥१०॥ तुविष्टं ते सुकृतं सूमयं धनुः साधुर्वृंदो हिरण्ययः। उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूधा ॥११॥ ३०॥

॥ ७८ ॥ १–१० कुरुसुतिः काण्वः ॥ इंद्रः ॥ १–९ गायत्री। १० पृहती ॥

॥ ७८ ॥ पुरोळाशं नो अंधस इंद्र सहसमा भर। शता च शूर

रुत्वते सुताः सोमासः अद्रिऽवः हृदा हूयन्ते उक्थिनः ॥८॥ पिबा इत् इंद्र मरुत्ऽसखा सुतं सोमं दिविष्टिषु चक्रं शिशानः ओजसा ॥९॥ उत्ऽतिष्ठन् ओजसा सह पीत्वी शिप्रे अवेपयः सोमं इंद्र चमू सुतं ॥१०॥ अनु त्वा रोदसी उभे क्रक्षमाणं अकृपेतां इंद्र यत् द्रुऽहा अभवः ॥११॥ वाचं अष्टाऽपदीं अहं नवऽस्रक्तिं ऋतऽस्पृशं इंद्रात् परि तन्वं ममे ॥१२॥२८॥

॥७७॥ जज्ञानः नु शतऽक्रतुः वि पृच्छत् इति मातरं के उग्राः के हु शृण्विरे ॥१॥ आत् ईं गवसी अब्रवीत् ऋणऽवाभं अहीशुवं ते पुचसंतु निःऽतुरः ॥२॥ सं इत् तान् वृचऽहा अखिदत् खे अरान्ऽइव खेदया प्रऽवृद्धः द्रुऽहा अभवत् ॥३॥ एकया प्रतिऽधा अपिबत् साकं सरांसि त्रिंशतं इंद्रः सोमस्य काणुका ॥४॥ अभि गंधर्वं अतृणत् अवुभ्नेषु रजःऽसु आ इंद्रः ब्रह्मऽभ्यः इत् वृधे ॥५॥२९॥ निः अविध्यत् गिरिऽभ्यः आ धारयत् पक्वं ओदनं इंद्रः चुंदं सुऽआननं ॥६॥ शतऽमंभाः इषुः नव सहस्रऽपर्णः एकः इत् यं इंद्र चकृपे युजं ॥७॥ तेन स्तोतृऽभ्यः आ भर नृऽभ्यः नारिऽभ्यः असवे सद्यः जातः ऋभुऽस्थिर ॥८॥ एता च्यौत्नानि ते कृता वर्पिष्ठानि परीणसा हृदा वीळु अधारयः ॥९॥ विश्वा इत् ता विष्णुः आ अभरत् उरुऽक्रमः त्वाऽईपितः शतं महिषान् क्षीरऽपाकं ओदनं वराहं इंद्रः एमुषं ॥१०॥ तुविऽग्रीवं ते सुऽकृतं सुऽअयं धनुः साधुः वुंदः हिरण्ययः उभा ते बाहू रण्या सुऽसंस्कृता ऋदुऽपे चित् ऋदुऽवृधा ॥११॥३०॥

॥७८॥ पुरोळाशं नः अंधसः इंद्र सहस्रं आ भर शता च शूर

गोनाँ ॥१॥ आ नो भर व्यंजनं गामश्वम्भ्यंजनं। सचा मना हिरण्यया ॥२॥ उत नः कर्णशोभना पुरूणि धृष्णवा भर। त्वं हि मंखिषे वसो ॥३॥ नकीं वृधीक इंद्र ते न सुषा न सुदा उत। नान्यस्त्वच्छूर वाघतः ॥४॥ नकीमिंदो निकर्तवे न शक्रः परिशक्तवे। विश्वं शृणोति पश्यति ॥५॥३१॥ समन्युं मन्यीनामदब्धो नि चिकीषते। पुरा निदश्चिकीषते ॥६॥ ऋत्व इत्पूर्णमुदरं तुरस्यास्ति विधतः। वृत्रघ्नः सोमपावंः ॥७॥ त्वे वसूनि संगता विश्वा च सोम सौभगा। सुदात्वपरिह्वृता ॥८॥ त्वामिद्यवयुमम कामो गव्युर्हिरण्ययुः। त्वामश्वयुरेषते ॥९॥ तवेदिंद्राहमाशसा हस्ते दात्रं चना ददे। दिनस्य वा मघवन्त्संभृतस्य वा पूर्धि यवस्य काशिना ॥१०॥३२॥

॥ ७९ ॥ १–९ कृत्नुर्भार्गवः ॥ सोमः ॥ १–८ गायत्री । ९ अनुष्टुप् ॥

॥७९॥ अयं कृत्नुरगृभीतो विश्वजिद्युद्भिदित्सोमः। ऋषिर्विप्रः काव्येन ॥१॥ अभ्यूर्णोति यन्नमं भिपक्ति विश्वं यत्तुरं। प्रेमंधः स्यन्दिः श्रोणो भूत् ॥२॥ त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः। उरु यंतासि वरूथं ॥३॥ त्वं चित्ती तव दक्षैर्दिव आ पृथिव्या चाजीपिन्। यावीरघस्य चिद्वेषः ॥४॥ अयंमो यंति चेदर्थं गच्छान्निद्दुषो रातिं। ववृज्युस्तृषंतः कामं ॥५॥३३॥ विद्यत्पूर्व्यं नष्टमुदीमृतायुमीरयत्। प्रेमायुस्तारीदतीर्णं ॥६॥ सुशेवो नो मृळयाकुरद्भन्नक्तुरवातः। भवा नः सोम शं हृदे ॥७॥ मा नः सोम सं वींविजो मा वि वींभिपया राजन्। मा नो हार्दि त्विषा वधीः ॥८॥ अव यत्ते सधस्थं देवानां दुर्मतीरीधे। राजन्नप द्विषः सेध मीढ्वो अप स्रिधः सेध ॥९॥३४॥

गोनाँ॥१॥ आ नः भर विऽअंजनं गां अश्वं अभिऽअंजनं सचा मना हिरण्ययां॥२॥ उत नः कर्णेऽशोभना पुरूणि धृष्णो आ भर त्वं हि शृण्विषे वसो॥३॥ नकीं वृधीकः इंद्र ते न सुऽसाः न सुऽदाः उत न अन्यः त्वत् शूर वाघतः॥४॥ नकीं इंद्रः निऽकर्तवे न शक्रः परिऽशक्तवे विश्वं शृणोति पश्यति॥५॥३१॥ सः मन्युं मर्त्यानां अदब्धः नि चिकीषते पुरा निदः चिकीषते॥६॥ क्रत्वः इत् पूर्णं उदरं तुरस्य अस्ति विधतः वृत्रऽघ्नः सोमऽपावा॥७॥ त्वे वसूनि संऽगता विश्वा च सोम सौभगा सुऽदातु अपरिऽह्वृता॥८॥ त्वां इत् युवऽयुः ममे कामः गव्युः हिरण्यऽयुः त्वां अश्वऽयुः आ ईषते॥९॥ तवं इत् इंद्र अहं आऽशसा हस्ते दानं च न आ ददे दिनस्य वा मघऽवन् संऽभृतस्य वा पूर्धि यवस्य काशिना॥१०॥३२॥

॥७९॥ अयं कृत्नुः अगृभीतः विश्वऽजित् उतऽअभित् इत् सोमः ऋषिः विप्रः काव्येन॥१॥ अभि ऊर्णोति यत् नमः भिषक्ति विश्वं यत् तुरं प्र इत् अंधः ख्यत् निः ष्रोणः भूत्॥२॥ त्वं सोम तनूकृतऽभ्यः द्वेषःऽभ्यः अन्यऽकृतेभ्यः उरु यंता असि वरूथं॥३॥ त्वं चित्ती तव दक्षैः दिवः आ पृथिव्याः ऋजीषिन् यावीः अघस्य चित् द्वेषः॥४॥ अर्षेनः यंतिं च इत् अर्थं गच्छान् इत् ददुषः रातिं ववृज्युः तृष्यतः कामं॥५॥३३॥ विदत् यत् पूर्व्यं नवं उत् इं ऋतऽयुं ईरयत् प्र इत् आयुः तारीत् अतीर्णं॥६॥ सुऽशेवः नः मृळयाकुः अदब्धऽक्रतुः अवातः भव नः सोम शं हृदे॥७॥ मा नः सोम सं वीविजः मा वि वीभिषथाः राजन् मा नः हार्दि त्विषा वधीः॥८॥ अवं यत् स्वे सधऽस्थे देवानां दुःऽमतीः ईक्षे राजन् अप द्विषः सेध मीढ्वः अप द्विषः सेध॥९॥३४॥

॥ ८० ॥ १–१० एकधूर्नामर्षयः ॥ १–९ इंद्रः । १० देवाः ॥ १–९ गायत्री । १० विराट् ॥

॥ ८० ॥ नह्यन्यं बळाकरं मर्डितारं शतक्रतो । त्वं नं इंद्र मृळय ॥ १ ॥ यो नः शश्वत्पुराविषामृभ्रो वाजसातयै । स त्वं नं इंद्र मृळय ॥ २ ॥ किमंग रघ्रचोदनः सुन्वानस्यावितेदसि । कुवित्स्विद्रणः शकः ॥ ३ ॥ इंद्र प्र णो रथमव पश्चाच्चित्संतमद्रिवः । पुरस्तादेनं मे कृधि ॥ ४ ॥ हंतो नु किमाससे प्रयमं नो रथं कृधि । उपमं वाजयु श्रवः ॥ ५ ॥ ३५ ॥ अवा नो वाजयुं रथं सुकरं ते किमित्परि । अस्मान्सु जिग्युषस्कृधि ॥ ६ ॥ इंद्र हव्यस्य पूरसि भद्रा ते एति निष्कृतं । इयं धीर्ऋतियावती ॥ ७ ॥ मा सीमवद्य आ भागुर्वी काष्ठा हितं धनं । अपावृक्ता अरत्नयः ॥ ८ ॥ तुरीयं नाम यद्धियं यदा कस्तदुश्मसि । आदित्पतिर्न ओहसे ॥ ९ ॥ अवीवृधद्धो अमृता अमंदीदेकद्यूर्देवा उत याश्च देवीः । तस्मा उ राधः कृणुत प्रशस्तं प्रातर्मक्षू धियावसुर्जगम्यात् ॥ १० ॥ ३६ ॥ ८ ॥

॥ ८१ ॥ १–९ कुसीदी काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥ ८१ ॥ आ तू न इंद्र क्षुमंतं चित्रं ग्राभं सं गृभाय । महाहस्ती दक्षिणेन ॥ १ ॥ विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघं । तुविमात्रमवोभिः ॥ २ ॥ नहि त्वा शूर देवा न मर्तासो दित्संतं । भीमं न गां वारयंते ॥ ३ ॥ एतो न्विंद्रं स्तवाम शोशुचानं यस्यः स्वराजं । न राधसा मर्धिषत् ॥ ४ ॥ प्र स्तोषदुषं गासिषच्छ्रुत्सामं गीयमानं । अभि राधसा जुगुरत् ॥ ५ ॥ ३७ ॥ आ नो भर दक्षिणेनाभि सव्येन प्र मृश । इंद्र मा नो वसोर्निर्भाक् ॥ ६ ॥ उप क्रमस्व भर धृषता धृष्णो जनानां । अदाभ्यस्त्वेदः ॥ ७ ॥ इंद्र यत्ते नृतो अस्ति वाजो विप्रेभिः सनितः । अस्मा-

॥८०॥ नहि अन्यं वृळा अकरं मडितारं शतऽक्रतो॰ त्वं नः इंद्र मृळय॥१॥ यः नः शश्वत् पुरा आविथ अमृधः वाजेऽसाताये सः त्वं नः इंद्र मृळय॥२॥ किं अंग रघ्रऽचोदनः सुन्वानस्य अविता इत् असि कुवित् सु इंद्र नः शकः॥३॥ इंद्र प्र नः रयं अव पथात् चित् संतं अद्रिऽवः पुरस्तात् एनं मे कृधि॥४॥ हंतो॑ नु किं आ-ससे प्रथमं नः रयं कृधि उपऽमं वाजऽयु श्रवः॥५॥३५॥ अव नः वाजऽयुं रथं सुऽकरं ते किंइत् परि अस्मान् सु जिग्युषः कृधि॥६॥ इंद्र हव्यस्व पूः असि भद्रा ते एति निःऽकृतं इयं धीः ऋतियऽवती ॥७॥ मा सीं अवद्ये आ भाक् उर्वी काष्ठा हितं धनं अपऽआवृक्ताः अरत्नयः॥८॥ तुरीयं नाम यज्ञियं यदा करः तत् उश्मसि आत् इत् पतिः नः ओहसे॥९॥ अवीवृधत् वः अमृताः अमंदीत् एकः इद्यूः देवाः उत याः च देवीः तस्मै ऊं राधः कृणुत प्रऽशस्तं मातः मघ्नु धियाऽवसुः जगम्यात्॥१०॥३६॥८॥

॥८१॥ आ तु नः इंद्र घुऽमंतं चित्रं याभं संगृभाय महाऽहस्ती दक्षिणेन॥१॥ विद्म हि त्वा तुविऽकूर्मिं तुविऽदेष्णं तुविऽमघं तुविऽमात्रं अवःऽभिः॥२॥ नहि त्वा शूर देवाः न मर्तासः दित्सेंतं भीमं न गां वारयंते॥३॥ आ इत ऊं नु इंद्रं स्तवाम ईशानं वस्वः स्वऽराजं न राधसा मघिपत् नः॥४॥ प्र स्तोषत् उप गासिषत् श्रवत् साम गीयमानं अभि राधसा जुगुरत्॥५॥३७॥ आ नः भर दक्षिणेन अभि सव्येन प्र मृश इंद्र मा नः वसोः निः भाक् ॥६॥ उप क्रमस्व आ भर धृषता धृष्णो॑ जनानां अदाशूःऽतरस्य वेदः॥७॥ इंद्र यः ऊं नु ते अस्ति वाजः विप्रेभिः सनित्वः अस्मा-

भिः सु तं संनुहि ॥८॥ सद्योजुवस्ते वाजा अस्मभ्यं विश्वश्चंद्राः। वशैश्च मक्षू जरंते ॥९॥३८॥५॥

॥ ८२ ॥ १–९ कुमीर्दी काण्वः ॥ इंद्रः ॥ गायत्री ॥

॥८२॥ आ प्र द्रव परावतोऽवावतश्च वृत्रहन्। मघवः प्रति प्रभर्मणि ॥१॥ नीवाः सोमास आ गहि सुतासो मादयिष्णवः। पिबा दधृग्यथो चिषे॥२॥ इमा मंदस्वादुते ऽरं वराय मन्यवे। भुवस्त इंद्र गोदृदे ॥३॥ आ त्वशुवा गहि न्युक्थानि च हूयसे। उपमे रोचने दिवः ॥४॥ तुभ्यायमद्रिभिः सुतो गोभिः श्रीतो मदाय कं। प्र सोम इंद्र हूयते ॥५॥१॥ इंद्र श्रुधि सु मे हवमस्मे सुतस्य गोमतः। वि पीतिं तृप्निमंशुहि ॥६॥ य इंद्र चमसेष्वा सोमश्चमूषु ते सुतः। पिबेदस्य त्वमीशिषे ॥७॥ यो अप्सु चंद्रमा इव सोमश्चमूषु दद्रंशे। पिबेदस्य त्वमीशिषे ॥८॥ यंते श्येनः पदाभरदरिरो रजांस्यस्पृतं। पिबेदस्य त्वमीशिषे ॥९॥२॥

॥ ८३ ॥ १–९ कुसीदी काण्व ॥ विश्वे देवा ॥ गायत्री ॥

॥८३॥ देवानामिदवो महत्तदा वृणीमहे वयं। वृष्णामस्मभ्यमूतये ॥१॥ ते नः संतु युजः सदा वरुणो मित्रो अर्यमा। वृधासश्च प्रचेतसः ॥२॥ अतिं नो विष्पिता पुरु नौभिरपो न पर्षथ। यूयमृतस्य रथ्यः ॥३॥ वामं नो अस्त्वर्यमन्वामं वरुण शंस्यं। वामं हि वावृणीमहे ॥४॥ वामस्य हि प्रचेतस ईशानासो रिशादसः। नेमादित्या अघस्य यत् ॥५॥३॥ वयमिद्धः सुदानवः क्षियंतो यांतो अध्वना। देवा वृधाय हूमहे ॥६॥ अधि न इंद्रैषां विष्णो सजात्यानां। इता मरुतो अश्विना ॥७॥ प्र भ्रातृत्वं सुदानवोऽध द्विता समान्या। मातुर्गर्भं भरा-

भिः सुतं सनुहि ॥८॥ सद्यः ऽजुवः ते वाजाः अस्मभ्यं विश्वऽचंद्राः वशैः च मक्षु जरंते ॥९॥३८॥५॥

॥८२॥ आ प्र द्रव परा ऽवतः अर्वा ऽवतः च वृच ऽहन् मध्वः प्रति प्र ऽभर्मणि ॥१॥ तीव्राः सोमासः आ गहि सुतासः मादयिष्णवः पिबा दधृक् यथा ओचिषे ॥२॥ इषा मंदस्व आत् ऊं ते अरं वराय मन्यवे भुवत् ते इंद्र शं हृदे ॥३॥ आ तु अशो आ गहि नि उक्थानि च हूयसे उप ऽमे रोचने दिवः ॥४॥ तुभ्यं अयं अद्रिऽभिः सुतः गोभिः श्रीतः मदाय कं प्र सोमः इंद्र हूयते ॥५॥१॥ इंद्र श्रुधि सु मे हवं अस्मे सुतस्य गोऽमंतः वि पीतिं तृप्निं अश्नुहि ॥६॥ यः इंद्र चमसेषु आ सोमः चमूषु ते सुतः पिबे इत् अस्य त्वं ईशिषे ॥७॥ यः अप्ऽसु चंद्रमाः ऽइव सोमः चमूषु दधृषे पिबे इत् अस्य त्वं ईशिषे ॥८॥ यं ते श्येनः पदा आ अभरत् तिरः रजांसि अस्पृतं पिबे इत् अस्य त्वं ईशिषे ॥९॥२॥

॥८३॥ देवानां इत् अवः महत् तत् आ वृणीमहे वयं वृष्णां अस्मभ्यं ऊतये ॥१॥ ते नः संतु युजः सदा वरुणः मित्रः अर्यमा वृधासः च प्र ऽचेतसः ॥२॥ अति नः विष्पिता पुरु नौभिः अपः न पर्षथ यूयं मातस्य रथ्यः ॥३॥ वामं नः अस्तु अर्यमन् वामं वरुण शंस्यं वामं हि आ ऽवृणीमहे ॥४॥ वामस्य हि प्र ऽचेतसः ईशानासः रिशादसः न ईं आदित्याः अभस्य यत् ॥५॥३॥ वयं इत् वः सु ऽदानवः शिपिंटासः यामंतः अध्वन् आ देवाः वृधाय हूमहे ॥६॥ अधि नः इंद्र एषां विष्णो सु ऽजात्यानां इत मरुतः अश्विना ॥७॥ प्र भातृऽत्वं सु ऽदानवः अध द्विता समान्या मातुः गर्भं भरा-

महे ॥८॥ यूयं हि ष्ठा सुदानव इंद्रज्येष्ठा अभिद्यवः। अधा चिद्व उत ब्रुवे ॥९॥४॥

॥ ८४ ॥ १–९ उशना काव्यः ॥ अग्निः ॥ गायत्री ॥

॥८४॥ प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियं। अग्निं रथं न वेद्यं ॥१॥ कविमिव प्रचेतसं यं देवासो अध द्विता। नि मर्त्येष्वादधुः ॥२॥ त्वं यविष्ठ दाशुषो नॄः पाहि शृणुधी गिरः। रक्षा तोकमुत त्मना ॥३॥ कया ते अग्ने अंगिर ऊर्जो नपादुपस्तुतिं। वराय देव मन्यवे ॥४॥ दाशेम कस्य मनसा यज्ञस्य सहसो यहो। कदु वोच इदं नमः ॥५॥५॥ अधा त्वं हि नस्करो विश्वा अस्मभ्यं सुक्षितीः। वाजद्रविणसो गिरः ॥६॥ कस्य नूनं परीणसो धियो जिन्वसि दंपते। गोपाता यस्य ते गिरः ॥७॥ तं मर्जयंत सुक्रतुं पुरोयावानमाजिषु। स्वेषु क्षयेषु वाजिनं ॥८॥ क्षेति क्षेमेभिः साधुभिर्नकिर्यं घ्नंति हंति यः। अग्ने सुवीर एधते ॥९॥६॥

॥ ८५ ॥ १–९ कृष्णः ॥ अश्विनौ ॥ गायत्री ॥

॥८५॥ आ मे हवं नासत्याश्विना गच्छतं युवं। मध्वः सोमस्य पीतये ॥१॥ इमं मे स्तोममश्विनेमं मे शृणुतं हवं। मध्वः सोमस्य पीतये ॥२॥ अयं वां कृष्णो अश्विना हवते वाजिनीवसू। मध्वः सोमस्य पीतये ॥३॥ शृणुतं जरितुर्हवं कृष्णस्य स्तुवतो नरा। मध्वः सोमस्य पीतये ॥४॥ छर्दिर्यंतमदाभ्यं विप्राय स्तुवते नरा। मध्वः सोमस्य पीतये ॥५॥७॥ गच्छतं दाशुषो गृहमित्था स्तुवतो अश्विना। मध्वः सोमस्य पीतये ॥६॥ युंजाथां रासभं रथे वीडुंगे वृषणवसू। मध्वः सोमस्य पीतये ॥७॥ चिवंधुरेण चिवृता रथेना यातमश्विना। मध्वः सोमस्य पीतये ॥८॥ नू

महे॥८॥ यूयं हि स्थ सुऽदानवः इंद्रंऽज्येष्ठाः अभिऽद्यवः अध चित् वः उत ब्रुवे॥९॥४॥

॥८४॥ प्रेषं वः अतिथिं स्तुषे मित्रंऽइव प्रियं अग्निं रथं न वेद्यं ॥१॥ कविंऽइव प्रऽचेतसं यं देवासः अध द्विता नि मर्त्येषु आऽदधुः ॥२॥ त्वं यविष्ठ दाशुषः नॄन् पाहि शृणुधि गिरः रक्षा तोकं उत त्मना॥३॥ कया ते अग्ने अंगिरः ऊर्जः नपात् उपंऽस्तुतिं वरायदेव मन्यवे॥४॥ दाशेम कस्य मनसा यज्ञस्य सहसः यहो कत् ऊं वोचे इदं नमः॥५॥५॥ अध त्वं हि नः करः विश्वाः अस्मभ्यं सुऽक्षितीः वाजंऽद्रविणसः गिरः॥६॥ कस्य नूनं परीणसः धियः जिन्वसि दंऽपते गोऽसाता यस्य ते गिरः॥७॥ तं मर्जयंत सुऽक्रतुं पुरःऽयावानं आजिषु स्वेषु क्षयेषु वाजिनं॥८॥ क्षेति क्षेमेभिः साधुऽभिः नकिः यं मंति हंति यः अग्ने सुऽवीरः एधते॥९॥६॥

॥८५॥ आ मे हवं नासत्या अश्विना गच्छतं युवं मध्वः सोमस्य पीतये॥१॥ इमं मे स्तोमं अश्विना इमं मे शृणुतं हवं मध्वः सोमस्य पीतये॥२॥ अयं वां कृष्णः अश्विना हवते वाजिनीऽवसू० मध्वः सोमस्य पीतये॥३॥ शृणुतं जरितुः हवं कृष्णस्य स्तुवतः नरा मध्वः सोमस्य पीतये॥४॥ छर्दिः यंतं अदाभ्यं विप्राय स्तुवते नरा मध्वः सोमस्य पीतये॥५॥७॥ गच्छतं दाशुषः गृहं इत्था स्तुवतः अश्विना मध्वः सोमस्य पीतये॥६॥ युंजाथां रासभं रथे वीळुऽअंगे वृषण्ऽवसू० मध्वः सोमस्य पीतये॥७॥ चिऽवंधुरेण चिऽवृता रथेन आ यातं अश्विना मध्वः सोमस्य पीतये॥८॥ नु

मे गिरो नासत्याश्विना प्रावतं युवं । मध्वः सोमस्य पीतये ॥९॥८॥

॥ ८६ ॥ १–५ कृष्णो विश्वको वा काण्वः ॥ अश्विनौ ॥ जगती ॥

॥८६॥ उभा हि दस्रा भिषजा मयोभुवोभा दक्षस्य वचसो बभूवथुः । ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या सुमोचतं ॥१॥ कथा नूनं वां विमना उपस्तवद्युवं धियं ददथुर्वस्यइष्टये । ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या सुमोचतं ॥२॥ युवं हि स्थो पुरुभुजेममेधतुं विष्णाप्वे ददथुर्वस्यइष्टये । ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या सुमोचतं ॥३॥ उत त्यं वीरं धनसामृजीषिणं दूरे चित्सन्तमवसे हवामहे । यस्य स्वादिष्ठा सुमतिः पितुर्यथा मा नो वि यौष्टं सख्या सुमोचतं ॥४॥ ऋतेन देवः सविता शमायत ऋतस्य शृंगमुर्विया वि पप्रथे । ऋतं सासाह महि चित्पृतन्यतो मा नो वि यौष्टं सख्या सुमोचतं ॥५॥९॥

॥ ८७ ॥ १–६ कृष्णो द्युतीको वा वासिष्ठः प्रियमेधो वा ॥ अश्विनौ ॥ प्रागाथं ॥

॥८७॥ द्युम्नी वां स्तोमो अश्विना क्रिविर्न सेक आ गतं । मध्वः सुतस्य स दिवि प्रियो नरा पातं गौराविवेरिणे ॥१॥ पिबतं धर्म मधुमंतमश्विना बर्हिः सीदतं नरा । ता मंदसाना मनुषो दुरोण आ नि षीदतं वेदसा वयः ॥२॥ आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत । ता वर्तिर्यातमुप वृक्तबर्हिषो जुष्टं यज्ञं दिविष्टिषु ॥३॥ पिबतं सोमं मधुमंतमश्विना बर्हिः सीदतं सुमत् । ता वावृधाना उप सुष्टुतिं दिवो गंतं गौराविवेरिणं ॥४॥ आ नूनं यातमश्विनाश्वेभिः शुचिपर्शुभिः । दस्रा हिरण्यवर्तनी शुभस्पती पातं सोम-

मे गिरः नासत्या अश्विना प्र अवतं युवं मध्वः सोमस्य पीतये ॥९॥८॥

॥८६॥ उभा हि दस्रा भिषजा मयःऽभुवा उभा दक्षस्य वचसः बभूवथुः ता वां विश्वकः हवते तनूऽकृथे मा नः वि यौष्टं सख्या मुमोचतं॥१॥ कुया नूनं वां विऽमनाः उप स्तवत् युवं धियं ददथुः वस्यःऽइष्टये ता वां विश्वकः हवते तनूऽकृथे मा नः वि यौष्टं सख्या मुमोचतं॥२॥ युवं हि स्म पुरुऽभुजा इमं एधतुं विष्ण्वे ददथुः वस्यःऽइष्टये ता वां विश्वकः हवते तनूऽकृथे मा नः वि यौष्टं सख्या मुमोचतं॥३॥ उत त्यं वीरं धनऽसां ऋजीषिणं दूरे चित् संतं अवसे हवामहे यस्य स्वादिष्ठा सुऽमतिः पितुः यथा मा नः वि यौष्टं सख्या मुमोचतं॥४॥ ऋतेन देवः सविता शंऽआयते ऋतस्य शृंगे उर्विया वि पप्रथे ऋतं ससाह महि चित् पृतन्यतः मा नः वि यौष्टं सख्या मुमोचतं॥५॥९॥

॥८७॥ द्युम्नी वां स्तोमः अश्विना क्रिविः न सेकें आ गतं मध्वः सुतस्य सः दिवि प्रियः नरा पातं गौरीऽइव इरिणे॥१॥ पिबतं घर्मं मधुऽमंतं अश्विना आ बर्हिः सीदतं नरा ता मंदसाना मनुषः दुरोणे आ नि षातं वेदसा वयः॥२॥ आ वां विश्वाभिः ऊतिऽभिः प्रियऽमेधाः अहूषत ता वर्तिः यातं उप वृक्तऽबर्हिषः जुषेयं यज्ञं दिविष्टिषु॥३॥ पिबतं सोमं मधुऽमंतं अश्विना आ बर्हिः सीदतं सुऽमत् ता चवृधानौ उप सुऽस्तुतिं दिवः गंतं गौरीऽइव इरिणं॥४॥ आ नूनं यातं अश्विना अश्वेभिः प्रुषितप्सुऽभिः दस्रा हिरण्यऽवर्तनी॰ शुभः पती पातं सोमं

मृतावृधा॥५॥ वयं हि वां हवामहे विपन्यवो विप्रासो वाजसातये। ता वल्गू दस्रा पुरुदंससा धियाश्विना श्रुष्टया गतं॥६॥१०॥

॥ ८८ ॥ १–६ गोधाः ॥ इंद्रः ॥ प्रागाथं ॥

॥८८॥ तं वो दस्ममृतीषहं वसोर्मंदानमंधसः। अभि वत्सं न स्वसरेषु धेनव इंद्रं गीर्भिर्नवामहे॥१॥ श्रुष्टिं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसं। क्षुमंतं वाजं शतिनं सहस्रिणं मक्षू गोमंतमीमहे॥२॥ न त्वा बृहंतो अद्रयो वरंत इंद्र वीळवः। यद्दित्ससि स्तुवते मावते वसु नकिष्टदा मिनाति ते॥३॥ गोष्वशि ऋत्वा शवसोत दंसना विश्वा जाताभि मज्मना। आ त्वायमर्क ऊतये ववर्तति यं गोतमा अजीजनन्॥४॥ प्र हि रिरिक्ष ओजसा दिवो अंतेभ्यस्परि। न त्वा विव्याच रज इंद्र पार्थिवमनु स्वधां ववक्षिथ॥५॥ नकिः परिष्टिर्मघवन्मघस्य ते यद्दाशुषे दशस्यसि। अस्माकं बोध्युचथस्य चोदिता संहिष्ठो वाजसातये॥६॥११॥

॥ ८९ ॥ १–७ नृमेधपुरुमेधौ ॥ इंद्रः ॥ १–४ प्रागाथं। ५.६ अनुष्टुप्। ७ बृहती॥

॥८९॥ बृहदिंद्राय गायत मरुतो वृत्रहंतमं। येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि॥१॥ अपांधमदभिशस्तीरशस्तिहाथेंद्रो द्युम्न्याभवत्। देवास्त इंद्र सख्याय येमिरे बृहद्भानो मरुद्गण॥२॥ प्र व इंद्राय बृहते मरुतो ब्रह्मार्चत। वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा॥३॥ अभि प्र भर धृषता धृषन्मन ओजिष्ठे अस्मद्बृहत्। अर्पत्वापो जवसा वि मातरो हनो वृत्रं जया स्वः॥४॥ यज्ञायेथा अपूर्व्य मघवन्वृत्रहत्याय। तत्पृथिवीमे-

ऋतऽवृधा॥५॥ वयं हि वां हवामहे विपन्यवः विप्रासः वाजऽसातये ता वल्गू दुस्रा पुरुऽदंससा धिया अश्विना श्रुष्टी आ गतं॥६॥१०॥

॥८८॥ तं वः दस्मं ऋतिऽसहं वसोः मंदानं अंधसः अभि वत्सं न स्वसरेषु धेनवः इंद्रं गीःऽभिः नवामहे॥१॥ द्युक्षं सुऽदानुं तविषीभिः आऽवृतं गिरिं न पुरुऽभोजसं क्षुमंतं वाजं शतिनं सहस्रिणं मक्षु गोऽमंतं ईमहे॥२॥ न त्वा बृहंतः अद्रयः वरंते इंद्र वीळवः यत् दित्ससि स्तुवते माऽवते वसु नकिः तत् आ मिनाति ते॥३॥ योद्धा असि क्रत्वा शवसा उत दंसना विश्वा जाता अभि मज्मना आ त्वा अयं अर्कः ऊतये ववर्तति यं गोतमाः अजीजनन्॥४॥ प्र हि रिरिक्षे ओजसा दिवः अंतेभ्यः परि न त्वा विव्याच रजः इंद्र पार्थिवं अनु स्वधां ववक्षिथ॥५॥ नकिः परिष्टिः मघऽवन् मघस्य ते यत् दाशुषे दशस्यसि अस्माकं बोधि उचथस्य चोदिता मंहिष्ठः वाजऽसातये॥६॥११॥

॥८९॥ बृहत् इंद्राय गायत मरुतः वृचक्षंऽतमं येन ज्योतिः अजनयन् ऋतऽवृधः देवं देवाय जागृवि॥१॥ अयं अधमत् अभिऽशस्तीः अशस्तिऽहा अयं इंद्रः द्युम्नी आ अभवत् देवाः ते इंद्र सख्याय येमिरे बृहत्ऽभानो° मरुत्ऽगण॥२॥ प्र वः इंद्राय बृहते मरुतः ब्रह्म अर्चत वृचं हनति वृचऽहा शतऽक्रतुः वज्रेण शतऽपर्वणा॥३॥ अभि प्र भर धृषता धृषत्ऽमनः श्रवः चित् ते असत् बृहत् अपंतु आपः जवसा वि मातरः हनः वृचं जय स्वः° ॥४॥ यत् जायथाः अपूर्व्य मघऽवन् वृचऽहत्याय तत् पृथिवीं

प्रथयस्तदस्तभ्ना उत द्यां ॥५॥ तत्ते यज्ञो अजायत तदर्क उत हस्कृतिः। तद्विश्वमभिभूरसि यज्जातं यच्च जन्त्वं ॥६॥ आ मासु पक्वमैरय आ सूर्ये रोहयो दिवि। घर्मं न सामन्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ॥७॥१२॥

॥ ९० ॥ १–६ नृमेधपुरुमेधौ ॥ इंद्रः ॥ प्रागाथं ॥

॥९०॥ आ नो विश्वासु हव्य इंद्रः समत्सु भूषतु। उप ब्रह्माणि सवनानि वृत्रहा परमज्या ऋचीषमः ॥१॥ त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत्। तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः ॥२॥ ब्रह्मा त इंद्र गिर्वणः क्रियंते अनंतिष्टुता। इमा जुषस्व हर्यश्व योजनेंद्र या ते अमंन्महि ॥३॥ त्वं हि सत्यो मघवन्ननानतो वृत्रा भूरि न्यृंजसे। स त्वं शविष्ठ वज्रहस्त दाशुषेऽवाचं रयिमा कृधि ॥४॥ त्वमिंद्र यशा असृजोषी शवसस्पते। त्वं वृत्राणि हंस्यप्रतीन्येक इदनुत्ता चर्षणीधृता ॥५॥ तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे। महीव कृत्तिः शरणा त इंद्र प्र ते सुम्ना नो अश्नवन् ॥६॥१३॥

॥ ९१ ॥ १–३ वधालाश्वेयी ॥ इंद्रः ॥ १, २ पंक्तिः । ३–३ अनुष्टुप् ॥

॥९१॥ कन्याऽवारेवायती सोममपि सुतावित्। अस्तं भरंत्यब्रवीदिंद्राय सुनवै त्वा शक्राय सुनवै त्वा ॥१॥ असौ य एषि वीरको गृहंगृहं विचाकशत्। इमं जंभसुतं पिब धानावंतं करंभिणमपूपवंतमुक्थिनं ॥२॥ आ चन त्वा चिकित्सामोऽधि चन त्वा नेमसि। शनैरिव शनकैरिवेंद्रयिंदो परि स्रव ॥३॥ कुविच्छकत्कुवित्करत्कुविन्नो वस्यसस्करत्। कुवित्पतिद्विषो यतीरिंद्रेण संगमामहै ॥४॥ इमानि चीणि

अप्रथयः तत् अस्तभ्नाः उत द्यां ॥५॥ तत् ते यज्ञः अजायत तत् अर्कः उत हस्कृतिः तत् विश्वं अभिऽभूः असि यत् जातं यत् च जंत्वं ॥६॥ आमासु पक्वं ऐरयः आ सूर्ये रोहयः दिवि धर्मं न सामन् तपत सुवृक्तिऽभिः जुष्टं गिर्वणसे बृहत् ॥७॥१२॥

॥९०॥ आ नः विश्वासु हव्यः इंद्रः समत्ऽसु भूषतु उप ब्रह्माणि सवनानि वृत्रऽहा परमऽज्याः ऋचीषमः ॥१॥ त्वं दाता प्रथमः राधसां असि असि सत्यः ईशानऽकृत् तुविऽद्युम्नस्य युज्याः आ वृणीमहे पुत्रस्य शवसः महः ॥२॥ ब्रह्म ते इंद्र गिर्वणः क्रियंते अनंतिह्रुता उमा जुषस्व हरिऽअश्व योजना इंद्र या ते अमन्महि ॥३॥ त्वं हि सत्यः मघऽवन् अनानतः वृचा भूरि निऽऋंजसे सः त्वं शविष्ठ वज्रऽहस्त दाशुषे अर्वाचं रयिं आ कृधि ॥४॥ त्वं इंद्र यशाः असि ऋजीषी शवसः पते त्वं वृत्राणि हंसि अप्रतीनि एकः इत् अनुत्ता चर्षणिऽधृता ॥५॥ तं ऊं त्वा नूनं असुर प्रऽचेतसं राधः भागंऽइव ईमहे महीऽइव कृत्तिः शरणा ते इंद्र प्र ते सुम्ना नः अश्नवन् ॥६॥१३॥

॥९१॥ कन्या वाः अवऽयती सोमं अपि सुता अविदत् अस्तं भरंती अब्रवीत् इंद्राय सुनवै त्वा शक्राय सुनवै त्वा ॥१॥ असौ यः एषि वीरकः गृहंऽगृहं विऽचाकशत् इमं जंभऽसुतं पिव धानाऽवंतं करंभिणं अपूपऽवंतं उक्थिनं ॥२॥ आ चन त्वा चिकित्साम: अधि चन त्वा न इमसि शनैःऽइव शनकैःऽइव इंद्राय इंदो परि स्रव ॥३॥ कुवित् शकत् कुवित् करत् कुवित् नः वस्यसः करत् कुवित् पतिऽहियः यतीः इंद्रेण संऽगमामहै ॥४॥ इमानि चीणि

विष्टपा तानींद्र वि रोहय। शिरस्ततस्योर्वरामादिदं म उपोदरे ॥५॥ असौ च या न उर्वरादिमां तन्वं मम। अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि ॥६॥ खे रथस्य खेऽनसः खे युगस्य शतक्रतो। अपालामिंद्र त्रिष्पूत्व्यकृणोः सूर्यत्वचं ॥७॥१४॥

॥ ९२ ॥ १–३३ श्रुतकक्षः सुकक्षो वा ॥ इंद्रः ॥ १ चतुष्टुप्। २–३३ गायत्री ॥

॥९२॥ पांतमा वो अंधस इंद्रमभि प्र गायत। विश्वासाहं शतक्रतुं महिष्ठं चर्षणीनां ॥१॥ पुरुहूतं पुरुष्टुतं गाथान्यं सनश्रुतं। इंद्र इति ब्रवीतन ॥२॥ इंद्र इद्वो महानां दाता वाजानां नृतुः। महाँ अभिज्ञ्वा यमत् ॥३॥ अपादु शिप्रांधसः सुदक्षस्य प्रहोषिणः। इंद्रोरिंद्रो यवाशिरः ॥४॥ तम्वभि प्रार्चतेंदुं सोमस्य पीतये। तदिद्धास्य वर्धनं ॥५॥१५॥ अस्य पीत्वा मदानां देवो देवस्यौजसा। विश्वाभि भुवना भुवत् ॥६॥ त्यमु वः सचासाहं विश्वासु गीर्ष्वायतं। आ च्यावयस्यूतये ॥७॥ युध्मं संतमनर्वाणं सोमपामनपच्युतं। नरमवार्यक्रतुं ॥८॥ शिक्षा ण इंद्र राय आ पुरु विद्वाँ ऋचीषम। अवा नः पार्ये धने ॥९॥ अतश्चिदिंद्र ण उपा याहि शतवाजया। इषा सहस्रवाजया ॥१०॥१६॥ अयामु धीवतो धियोऽवेंद्रः शक्र गोदरे। जयेम पृत्सु वज्रिवः ॥११॥ वयमु त्वा शतक्रतो गावो न यवसेष्पा। उक्थेषु रणयामसि ॥१२॥ विश्वा हि मर्त्यत्वनानुकामा शतक्रतो। अगन्म वज्रिन्नाशसः ॥१३॥ त्वे सु पुत्र शवसोऽवृचन्कासकातयः। न त्वामिंद्रातिं रिच्यते ॥१४॥ स नो वृषन्तसनिष्टया सं घोरया दविद्युत्वा। धियाविंद्र पुरंध्या ॥१५॥१७॥ यस्ते नूनं शतक्रतविंद्र द्युम्नितमो मदः। तेन नूनं मदे मदेः ॥१६॥ यस्ते चित्रश्र-

विष्टपा तानि इंद्र वि रोहय शिरः ततस्य उर्वरा आत् इदं मे उप उदरे॥५॥ असौ च या नः उर्वरा आत् इमां तन्वं मम अथो ततस्य यत् शिरः सर्वा ता रोमशा कृधि॥६॥ खे रथस्य खे अनसः खे युगस्य शतऽक्रतो० अपालां इंद्र त्रिः पूत्वी अकृणोः सूर्यैऽत्वचं॥७॥१४॥

॥९२॥ पांतं आ वः अंधसः इंद्रं अभि प्र गायत विश्वऽसहं शतऽक्रतुं महिष्ठं चर्षणीनां॥१॥ पुरुऽहूतं पुरुऽस्तुतं गाथान्यं सनऽश्रुतं इंद्रः इति ब्रवीतन॥२॥ इंद्रः इत् नः महान् दाता वाजानां नृतुः महान् अभिऽऋजु आ यमत्॥३॥ अपात् ऊं शिप्री अंधसः सुऽदक्षस्य प्रऽहोषिणः इंदोः इंद्रः यवऽआशिरः॥४॥ तं ऊं अभि प्र अर्चत इंद्रं सोमस्य पीतये तत् इत् हि अस्य वर्धनं॥५॥१५॥ अस्य पीत्वा मदानां देवः देवस्य ओजसा विश्वा अभि भुवना भुवत्॥६॥ त्यं ऊं वः सत्राऽसहं विश्वासु गीर्षु आऽयंतं आ च्यवयसि ऊतये॥७॥ युध्मं संतं अनर्वाणं सोमऽपां अनपऽच्युतं नरं अवार्यऽक्रतुं॥८॥ शिष्टा नः इंद्र रायः आ पुरु विद्वान् ऋचीषम् अवं नः पार्ये धने॥९॥ अतः चित् इंद्र नः उप आ याहि शतऽवाजया इषा सहस्रऽवाजया॥१०॥१६॥ अयाम धीऽवंतः धियः अर्वंतऽभिः शक्र गोऽदरे जयेम पृत्ऽसु वज्रिऽवः॥११॥ वयं ऊं त्वा शतऽक्रतो० गावः न यवसेषु आ उक्थेषु रणयामसि॥१२॥ विश्वा हि मर्त्यऽत्वना अनुऽकामा शतऽक्रतो० अगंन्म वज्रिन् आऽशसः॥१३॥ त्वे सु पुत्र शवसः अवृचन् कामऽकातयः न त्वां इंद्र अति रिच्यते॥१४॥ सः नः वृषन् सनिष्टया सं घोरया द्रविन्वा धिया अविड्ढि पुरंध्या॥१५॥१७॥ यः ते नूनं शतऽक्रतो० इंद्र द्युम्निऽतमः मदः तेन नूनं मदे मदेः०॥१६॥ यः ते चित्रश्र-

वस्तमो य इंद्र वृत्रहंतमः। य ओजोदातमो मदः॥१७॥ विद्मा हि यस्ते अद्रिवस्त्वादत्तः सत्य सोमपाः। विश्वासु दस्म कृष्टिषु॥१८॥ इंद्रायेंद्रो मद्वने सुतं परि ष्टोभंतु नो गिरः। अर्कमर्चंतु कारवः॥१९॥ यस्मिन्विश्वा अधि श्रियो रणंति सप्त संसदः। इंद्रं सुते हवामहे॥२०॥१८॥ चिकेद्धकेषु चेतनं देवासो यज्ञमाशत। तमिद्वर्धंतु नो गिरः॥२१॥ आ त्वा विशंत्विंदवः समुद्रमिव सिंधवः। न त्वामिंद्राति रिच्यते॥२२॥ विश्वक्स्वं महिना वृषन्भक्षं सोमस्य जागृवे। य इंद्र जठरेषु ते॥२३॥ अरं त इंद्र कुक्षये सोमो भवतु वृत्रहन्। अरं धामभ्य इंदवः॥२४॥ अरमश्वाय गायति श्रुतकक्षो अरं गवे। अरमिंद्रस्य धाम्ने॥२५॥ अरं हि ष्मा सुतेषु णः सोमेष्विंद्र भूषसि। अरं ते शक्र दावने॥२६॥१९॥ पराकात्ताच्चिदद्रिवस्त्वां नक्षंत नो गिरः। अरं गमाम ते वयं॥२७॥ एवा ह्यसि वीरयुरेवा शूर उत स्थिरः। एवा ते राध्यं मनः॥२८॥ एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः। अधा चिदिंद्र मे सचा॥२९॥ मो षु ब्रह्मेव तंद्रयुर्भुवो वाजानां पते। मत्स्वा सुतस्य गोमतः॥३०॥ मा नं इंद्राभ्याꣳ दिशः सूरो अक्तुषा यमन्। त्वा युजा वनेम तत्॥३१॥ त्वयेदिंद्र युजा वयं प्रति ब्रुवीमहि स्पृधः। त्वमस्माकं तव स्मसि॥३२॥ त्वामिद्धि त्वायवोऽनुनोनुवतश्चरान्। सखाय इंद्र कारवः॥३३॥२०॥

॥ ९३ ॥ १–३३ मुकथ्य ॥ १–३३ इंद्र: । ३३ इंद्र ऋभयश्च ॥ गायत्री ॥

॥ ९३ ॥ उद्वेदभि श्रुतामघं वृषभं नर्यापसं। अस्तारमेषि सूर्ये॥१॥ नव यो नवतिं पुरो बिभेद बाह्वोजसा। अहिं च वृत्रहावधीत्॥२॥ स न इंद्रः शिवः सखाश्वावन्गोमद्यवमत्। उरुधारेव दोहते॥३॥ यदद्य कच्च वृत्रहन्नु-

वःऽतमः यः इंद्र वृत्रहन्ऽतमः यः ओजःऽदातमः मदः॥१७॥ चित्रं हि यः ते अद्रिऽवः त्वाऽदत्तः सत्यसोमऽपाः विश्वासु दस्म कृष्टिषु ॥१८॥ इंद्राय मद्वने सुतं परि स्तोभंतु नः गिरः अर्कं अर्चंतु कारवः ॥१९॥ यस्मिन् विश्वाः अधि श्रियः रणंति सप्त संऽसदः इंद्रं सुते हवामहे॥२०॥१८॥ चिऽकेतुकेषु चेतनं देवासः यज्ञं अक्नत तं इत् वर्धंतु नः गिरः॥२१॥ आ त्वा विशंतु इंदवः समुद्रंऽइव सिंधवः न त्वां इंद्र अति रिच्यते॥२२॥ विश्वक्थं महिना वृषन् भूषं सोमस्य जागृवे यः इंद्र जठरेषु ते॥२३॥ अरं ते इंद्र कुक्षये सोमः भवतु वृत्रऽहन् अरं धामऽभ्यः इंदवः॥२४॥ अरं अश्वाय गायति श्रुतऽकक्षः अरं गवे अरं इंद्रस्य धाम्ने॥२५॥ अरं हि स्म सुतेषु नः सोमेषु इंद्र भूषसि अरं ते शक्र दावने॥२६॥१९॥ पराकात्नात् चित् अद्रिऽवः त्वां नक्षंत नः गिरः अरं गमाम ते वयं॥२७॥ एव हि असि वीरऽयुः एव शूरः उत स्थिरः एव ते राध्यं मनः॥२८॥ एव रातिः तुविऽमघ विश्वेभिः धायि धातृऽभिः अध चित् इंद्र मे सचा ॥२९॥ मो इति सु ब्रह्माऽइव तंद्रयुः भुवः वाजानां पते मत्स्व सुतस्य गोऽमतः॥३०॥ मा नः इंद्र अभि आऽदिशः सूरः अक्तुषु आ यमन् त्वा युजा वनेम तत्॥३१॥ त्वया इत् इंद्र युजा वयं प्रति ब्रुवीमहि स्पृधः त्वं अस्माकं तव स्मसि॥३२॥ त्वां इत् हि त्वाऽयवः अनुऽनोनुवतः चरान् सखायः इंद्र कारवः॥३३॥२०॥

॥९३॥ उत् घ इत् अभि श्रुतऽमघं वृषभं नर्यंऽअपसं अस्तारं एषि सूर्य॥१॥ नवं यः नवतिं पुरः बिभेद बाहुऽओजसा अहिं च वृत्रऽहा अवधीत्॥२॥ सः नः इंद्रः शिवः सखा अश्वऽवत् गोऽमत् यवंऽमत् उरुधाराऽइव दोहते॥३॥ यत् अद्य कत् च वृत्रऽहन्

दगां अभि सूर्ये। सर्वं तदिंद्र ते वशे ॥४॥ यद्वा प्रवृद्ध सत्पते न मरा इंति मन्यसे। उतो तत्सत्यमित्तव ॥५॥२१॥ ये सोमासः परावति ये अर्वावति सुन्विरे। सर्वांस्ताँ इंद्र गच्छसि ॥६॥ तमिंद्रं वाजयामसि महे वृत्राय हंतवे। स वृषा वृषभो भुवत् ॥७॥ इंदुः स दानंमे कृत ओजिष्ठः स मदे हितः। द्युम्नी श्लोकी स सोम्यः ॥८॥ गिरा वज्रो न संभृतः सवलो अनपच्युतः। ववक्ष ऋष्वो अस्तृतः ॥९॥ दुर्गे चिद्रः सुगं कृधि गृणान इंद्र गिर्वणः। त्वं च मघवन्वशः ॥१०॥२२॥ यस्य ते नू चिदादिशं न मिनंति स्वराज्यं। न देवो नाधिगुर्जनः ॥११॥ अधा ते अप्रतिष्कुतं देवी शुष्मं सपर्यतः। उभे सुशिप्र रोदसी ॥१२॥ त्वमेतदधारयः कृष्णासु रोहिणीषु च। परुष्णीषु रुशत्पयः ॥१३॥ वि यदहेरधि त्विषो विश्वे देवासो अक्रमुः। विदन्मृगस्य ताँ अमः ॥१४॥ आदु मे निवरो भुवद्वृत्रहादिष्ट पौंस्यं। अजातशत्रुरस्तृतः ॥१५॥२३॥ श्रुतं वो वृत्रहंतमं प्रशर्धं चर्षणीनां। आ शुषे राधसे महे ॥१६॥ अया धिया च गव्यया पुरुणामन्पुरुष्टुत। यत्सोमेसोम आभुवः ॥१७॥ वोधिन्मना इदस्तु नो वृत्रहा भूर्यासुतिः। शृणोतु शक्र आशिषं ॥१८॥ कया त्वं नं ऊत्याभि प्र मंदसे वृषन्। कया स्तोतृभ्य आ भर ॥१९॥ कस्य वृषा सुते सचा निदुत्वान्वृषभो रेवत्। वृत्रहा सोमंपीतये ॥२०॥२४॥ अभी षु णस्त्वं रयिं मंदसानः सहस्रिणं। प्रयंता बोधि दाशुषे ॥२१॥ पत्नीवंतः सुता इम उशंतो यंति वीतये। अया जग्मिर्निचुंपुणः ॥२२॥ इष्टा होत्रा असृक्षतेंद्रं वृधासो अध्वरे। अर्चावभृथमोजसा ॥२३॥ इह त्या संधमाद्या हरी हिरण्यकेश्या। वोळ्हामभि प्रयो

उत्ऽअगाःअभि सूर्यं सर्वं तत् इंद्र ते वशे ॥४॥ यत् वा मऽवृद्ध सत्ऽपते न मरे इति मन्यसे उतो तत् सत्यं इत् तव ॥५॥२१॥ ये सोमासः पराऽवति ये अर्वाऽवति सुन्विरे सर्वान् तान् इंद्र गच्छसि ॥६॥ तं इंद्रं वाजयामसि महे वृत्राय हंतवे सः वृषा वृषभः भुवत् ॥७॥ इंद्रः सः दामने कृतः ओजिष्ठः सः मदे हितः द्युम्नी श्लोकीसः सोम्यः ॥८॥ गिरा वज्रः न संऽभृतः सऽवलः अनपऽच्युतः ववक्षे वृष्णः अस्तृतः ॥९॥ दुःऽगे चित् नः सुऽगं कृधि गृणानः इंद्र गिर्वणः त्वं च मघऽवन् वशः ॥१०॥२२॥ यस्य ते नु चित् आऽदिशं न मिनंति स्वऽराज्यं न देवः न अभिऽगुः जनः ॥११॥ अध ते अप्रतिऽस्कुतं देवी शुष्मं सपर्यतः उभे सुऽशिप्र रोदसी ॥१२॥ त्वं एतत् अधारयः कृष्णासु रोहिणीषु च परुष्णीषु रुशत् पयः ॥१३॥ वि यत् अहेः अध त्विषः विश्वे देवासः अक्रमुः विदत् मृगस्य तान् अमः ॥१४॥ आत् ऊं मे निऽवरः भुवत् वृचऽहा अदिष्ट पौंस्यं अजातऽशत्रुः अस्तृतः ॥१५॥२३॥ श्रुतं वः वृत्रहन्ऽतमं प्र शर्धं चर्षणीनां आ शुषे राधसे महे ॥१६॥ अया धिया च गव्यऽया पुरुऽनामन् पुरुऽस्तुत यत् सोमेऽसोमे आ अभवः ॥१७॥ बोधित्ऽमनाः इत् अस्तु नः वृचऽहा भूरिऽआसुतिः शृणोतु शक्रः आऽशिषं ॥१८॥ कया त्वं नः ऊत्या अभि प्र मंदसे वृषन् कया स्तोतृऽभ्यः आ भर ॥१९॥ कस्य वृषा सुते सचा नियुत्वान् वृषभः रणत् वृचऽहा सोमेऽपीतये ॥२०॥२४॥ अभि सु नः त्वं रयिं मंदसानः सहस्रिणं प्रऽयंता बोधि दाशुषे ॥२१॥ यत्नीऽवंतः सुताः इमे उशंतः यंति वीतये अपां जग्मिः निऽचुंपुणः ॥२२॥ इष्टाः होचाः असृक्षत इंद्रं वृधासः अध्वरे अर्कं अवऽभृथं ओजसा ॥२३॥ इह त्या सधऽमाद्या हरी हिरण्यऽकेश्या वोळ्हां अभि प्रयः

हितं॥२४॥ तुभ्यं सोमाः सुता इमे स्तीर्णं बर्हिर्विभावसो। स्तोतृभ्य इंद्रमा वह॥२५॥२५॥ आ ते दक्षं वि रोचना दधद्रत्ना वि दाशुषे। स्तोतृभ्य इंद्रमर्चत॥२६॥ आ ते दधामींद्रियमुक्था विश्वा शतक्रतो। स्तोतृभ्य इंद्र मृळय॥२७॥ भद्रंभद्रं न आ भरेषमूर्जं शतक्रतो। यदिंद्र मृळयासि नः॥२८॥ स नो विश्वान्या भर सुवितानि शतक्रतो। यदिंद्र मृळयासि नः॥२९॥ त्वामिद्वृत्रहंतम सुतावंतो हवामहे। यदिंद्र मृळयासि नः॥३०॥२६॥ उप नो हरिभिः सुतं याहि मंदानां पते। उप नो हरिभिः सुतं॥३१॥ हिता यो वृत्रहंतमो विदइंद्रः शतक्रतुः। उप नो हरिभिः सुतं॥३२॥ त्वं हि वृत्रहन्नेषां पाता सोमानामसि। उप नो हरिभिः सुतं॥३३॥ इंद्र द्युभिर्ददातु न ऋभुक्षणमृभुं रयिं। वाजी ददातु वाजिनं॥३४॥२७॥९॥

॥ ९४ ॥ १–१२ विंदुः पूतदक्षो वा ॥ मरुतः ॥ गायत्री ॥

॥९४॥ गौर्धयति मरुतां श्रवस्युर्माता मघोनां। युक्ता वहो रथानां॥१॥ यस्यां देवा उपस्थे व्रता विश्वे धारयंते। सूर्यामासा दृशे कं॥२॥ तत्सु नो विश्वे अर्य आ सदा गृणंति कारवः। मरुतः सोमपीतये॥३॥ अस्ति सोमो अयं सुतः पिबंत्यस्य मरुतः। उत स्वराजो अश्विना॥४॥ पिबंति मित्रो अर्यमा तना पूतस्य वरुणः। विपधस्यस्य जावतः॥५॥ उतो न्वस्य जोषमाँ इंद्रः सुतस्य गोमतः। प्रातर्होतेव मत्सति॥६॥२८॥ कदत्विपंत सूरयस्तिर आपः इव स्रिधः। अपंति पूतदक्षसः॥७॥ कद्वो अद्य महानां देवानामवो वृणे। त्मना च दस्मवर्चसां॥८॥ आ ये विश्वा पार्थिवानि पप्रथन्नोचना दिवः। मरुतः सोमपीतये॥९॥ त्यान्नु पूतदक्षसो दिवो वो मरुतो हुवे। अस्य सोमस्य पी-

हितं ॥२४॥ तुभ्यं सोमाः सुताः इमे स्तीर्णं बर्हिः विभाऽवसो॰ स्तोतृऽभ्यः इंद्र आ वह ॥२५॥२५॥ आ ते दक्षं वि रोचना दधत् रत्नां वि दाशुषे स्तोतृऽभ्यः इंद्र अर्चत ॥२६॥ आ ते दधामि इंद्रियं उक्था विश्वा शतऽक्रतो॰ स्तोतृऽभ्यः इंद्र मृळय ॥२७॥ भद्रंऽभद्रं नः आ भर इषं ऊर्जं शतऽक्रतो॰ यत् इंद्र मृळयासि नः ॥२८॥ सः नः विश्वानि आ भर सुवितानि शतऽक्रतो॰ यत् इंद्र मृळयासि नः ॥२९॥ त्वां इत् वृत्रहन्ऽतम सुतऽवंतः हवामहे यत् इंद्र मृळयासि नः ॥३०॥२६॥ उप नः हरिऽभिः सुतं याहि मदानां पते उप नः हरिऽभिः सुतं ॥३१॥ द्विता यः वृत्रहन्ऽतमः विदे इंद्रः शतक्रतुः उप नः हरिऽभिः सुतं ॥३२॥ त्वं हि वृत्रऽहन् एषां पाता सोमानां असि उप नः हरिऽभिः सुतं ॥३३॥ इंद्रः इषे ददातु नः ऋभुक्षणं ऋभुं रयिं वाजी ददातु वाजिनं ॥३४॥२७॥९॥

॥९४॥ गीः धयति मरुतां श्रवस्युः माता मघोनां युक्ता वहिः रथानां ॥१॥ यस्याः देवाः उपऽस्थे व्रता विश्वे धारयंते सूर्यामासा दृशेकं ॥२॥ तत् सु नः विश्वे अर्यः आ सदा गृणंति कारवः मरुतः सोमऽपीतये ॥३॥ अस्ति सोमः अयं सुतः पिबंति अस्य मरुतः उत स्वऽराजः अश्विना ॥४॥ पिबंति मित्रः अर्यमा तना पूतस्य वरुणः चिऽसधस्थस्य जाऽवंतः ॥५॥ उतो' नु अस्य जोषं आ इंद्रः सुतस्य गोऽमंतः प्रातः होताऽइव मत्सति ॥६॥२८॥ कत् अत्रिपंत सूरयः तिरः आपः ऽइव स्रिधः अर्षंति पूतऽदक्षसः ॥७॥ कत् वः अद्य महानां देवानां अवः वृणे त्मना च दस्मऽवर्चसां ॥८॥ आ ये विश्वा पार्थिवानि पप्रथन् रोचना दिवः मरुतः सोमऽपीतये ॥९॥ त्यान् नु पूतऽदक्षसः दिवः वः मरुतः हुवे अस्य सोमस्य पी-

तये ॥१०॥ त्यान्नु ये वि रोदसी तस्तभुर्मरुतो हुवे। अस्य सोमस्य पीतये ॥११॥ त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे। अस्य सोमस्य पीतये ॥१२॥२९॥

॥ ९५ ॥ १-७ तिरश्चीः ॥ इंद्रः ॥ अनुष्टुप् ॥

॥९५॥ आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः। अभि त्वा समनूषतेंद्र वत्सं न मातरः ॥१॥ आ त्वा शुक्रा अचुच्यवुः सुतासो इंद्र गिर्वणः। पिबा त्वस्यांधसः इंद्र विश्वासु ते हितं ॥२॥ पिबा सोमं मदाय कमिंद्र श्येनाभृतं सुतं। त्वं हि शश्वतीनां पती राजा विशामसि ॥३॥ श्रुधी हवं तिरश्चया इंद्र यस्त्वा सपर्यति। सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥४॥ इंद्र यस्ते नवीयसीं गिरं मंद्रामजीजनत्। चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीं ॥५॥३०॥ तमु ष्टवाम यं गिर इंद्रमुक्थानि वावृधुः। पुरूणयस्य पौंस्या सिषासंतो वनामहे ॥६॥ एतो न्विंद्रं स्तवाम शुद्धं शुद्धेन साम्ना। शुद्धिरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु ॥७॥ इंद्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः। शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः ॥८॥ इंद्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे। शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि ॥९॥३१॥

॥ ९६ ॥ १-२१ तिरश्चीनुंतानो या मारुतः ॥ १-१४.१६-२१ इंद्रः । १५ मरुतः । १५ इंद्राबृहस्पती ॥ १-३.५-२१ त्रिष्टुप् । ४ विराट् ॥

॥९६॥ अस्मा उषास आतिरंत यामंसिंद्राय नक्तमूर्म्याः सुवाचः। अस्मा आपो मातरः सप्त तस्थुर्नृभ्यस्तराय सिंधवः सुपाराः ॥१॥ अतिविद्धा वियुरेणा चिदस्ता चिः सप्त सानु संहिता गिरीणां। न तद्देवो न मर्त्यस्तुतुर्याद्यानि प्रवृद्धो वृष्णश्चकारं ॥२॥ इंद्रस्य वज्रो श्वायसो निमिश्ल इंद्रस्य वाह्वो-

तये ॥१०॥ त्यान् नु ये वि रोदसी तस्तभुः मरुतः हुवे अस्य सोमस्य पीतये ॥११॥ त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे अस्य सोमस्य पीतये ॥१२॥२९॥

॥९५॥ आ त्वा गिरः रथीःऽइव अस्थुः सुतेषु गिर्वणः अभि त्वा सं अनूषत इंद्र वत्सं न मातरः ॥१॥ आ त्वा शुक्राः अचुच्यवुः सुतासः इंद्र गिर्वणः पिब तु अस्य अंधसः इंद्र विश्वासु ते हितं ॥२॥ पिब सोमं मदाय कं इंद्र श्येनऽआभृतं सुतं त्वं हि शश्वतीनां पतिः राजा विशां असि ॥३॥ शुधि हवं तिरश्च्याः इंद्र यः त्वा सपर्यति सुऽवीर्यस्य गोऽमतः रायः पूर्धि महान् असि ॥४॥ इंद्र यः ते नवीयसीं गिरं मंद्रां अजीजनत् चिकित्विन्ऽमनसं धियं प्रत्नां ऋतस्य पिप्युषीं ॥५॥३०॥ तं ऊं स्तवाम यं गिरः इंद्रं उक्थानि वावृधुः पुरूणि अस्य पौंस्या सिसासंतः वनामहे ॥६॥ एतो नु इंद्रं स्तवाम शुद्धं शुद्धेन साम्ना शुद्धैः उक्थैः वावृध्वांसं शुद्धः आशीःऽवान् ममत्तु ॥७॥ इंद्र शुद्धः नः आ गहि शुद्धः शुद्धाभिः ऊतिऽभिः शुद्धः रयिं नि धारय शुद्धः ममद्धि सोम्यः ॥८॥ इंद्र शुद्धः हि नः रयिं शुद्धः रत्नानि दाशुषे शुद्धः वृत्राणि जिघ्नसे शुद्धः वाजं सिसाससि ॥९॥३१॥

॥९६॥ अस्मे उषसः आ अतिरंत यामं इंद्राय नक्तं ऊर्म्याः सुऽवाचः अस्मे आपः मातरः सप्त तस्थुः नृऽभ्यः तराय सिंधवः सुऽपाराः ॥१॥ अतिऽविद्धा विपुरेण चित् अस्त्रा चिः सप्त सानु संऽहिता गिरीणां न तत् देवः न मर्त्यः तुतुर्यात् यानिं प्रऽवृद्धः वृषभः चकारं ॥२॥ इंद्रस्य वज्रः आयसः निऽमिश्लः इंद्रस्य बाह्वोः

भूयिष्ठमोजः। शीर्षन्निंद्रस्य क्रतवो निरेक आसन्नेपंत श्रुत्या उपाके ॥३॥ मन्ये त्वा यज्ञियं यज्ञियानां मन्ये त्वा च्यवनमच्युतानां। मन्ये त्वा सत्वनामिंद्र केतुं मन्ये त्वा वृषभं चर्षणीनां ॥४॥ आ यद्वज्रं बाह्वोरिंद्र धत्से मदच्युतमहये हंतवा उ। प्र पर्वता अनवंत प्र गावः प्र ब्रह्माणो अभिनक्षंत इंद्रं ॥५॥३२॥ नमु ष्टवाम य इमा जजान विश्वा जातान्यवराण्यस्मात्। इंद्रेण मित्रं दिधिषेम गीर्भिरुपो नमोभिर्वृषभं विशेम ॥६॥ वृचस्व त्वा श्वसथादीधमाणा विश्वे देवा अंजहुर्ये सखायः। मरुद्भिरिंद्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥७॥ विः पप्टिस्वा मरुतो वावृधाना उसा इव रण्यो यज्ञियासः। उप त्वेमः कृधि नो भागधेयं शुष्मै न एना हविषा विधेम ॥८॥ निग्ममायुधं मरुतामनीकं कस्त इंद्र प्रति वज्रं दधर्ष। अंनायुधासो असुरा अदेवाश्चक्रेण ताँ अप वप ऋजीषिन् ॥९॥ मह उग्राय तवसे सुवृक्तिं प्रेरय गिर्वतमाय पन्यः। गिर्वाहसे गिर इंद्राय पूर्वीर्धिहि तन्वे कुविदंग वेदत् ॥१०॥३३॥ उक्थवाहसे विभ्वे मनीषां दृणा न पारमीरया नदीनां। नि स्पृश धिया तन्वि श्रुतस्य जुष्टतरस्य कुविदंग वेदत् ॥११॥ तद्विविद्धि यत्त इंद्रो जुजोषत्स्तुहि सुष्टुतिं नमसा विवास। उप भूष जरितर्मा रुवण्यः श्रावया वाचं कुविदंग वेदत् ॥१२॥ अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः। आवत्तमिंद्रः शच्या धमंतमप स्नेहितीर्नृमणा अधत्त ॥१३॥ द्रप्समपश्यं विषुणे चरंतमुपह्वरे नद्यो अंशुमत्याः। नभो न कृष्णमवतस्थिवांसमिष्यामि वो वृषणो युध्यताजौ ॥१४॥ अध द्रप्सो अंशुमत्या उपस्थेऽधारयत्तन्वं तित्विषाणः। विशो

भूयिष्ठं ओजः शीर्षन् इंद्रस्य क्रत्वः निरेके आसन् आ ईषंत श्रुत्यै उपाके॥३॥ मन्ये त्वा यज्ञियं यज्ञियानां मन्ये त्वा च्यवनं अच्युतानां मन्ये त्वा सत्वनां इंद्र केतुं मन्ये त्वा वृषभं चर्षणीनां॥४॥ आ यत् वज्रं बाह्वोः इंद्र धत्से मदऽच्युतं अहये हंतवे ऊं प्र पर्वताः अनवंत प्र गावः प्र ब्रह्माणः अभिऽनक्षंतः इंद्रं॥५॥३२॥ तं ऊं स्तवाम यः इमा जजान विश्वा जातानि अवराणि अस्मात् इंद्रेण मित्वं दिधिषेम गीःऽभिः उपो नमःऽभिः वृषभं विशेम॥६॥ वृचस्य त्वा श्वसथात् ईषमाणाः विश्वे देवाः अजहुः ये सखायः मरुत्ऽभिः इंद्र सख्यं ते अस्तु अथ इमाः विश्वाः पृतनाः जयासि॥७॥ विः पृष्टिः त्वा मरुतः ववृधानाः उक्षाःऽइव राशयः यज्ञियासः उप त्वा आ इमः कृधि नः भागऽधेयं शुष्मं ते एना हविषा विधेम॥८॥ तिग्मं आयुधं मरुतां अनीकं कः ते इंद्र प्रति वज्रं दधर्ष अनायुधासः असुराः अदेवाः चक्रेण तान् अप वप चृजीषिन्॥९॥ महे उपायं तवसे सुऽवृक्तिं प्र ईरय शिवऽतमाय पस्वः गिर्वाहसे गिरः इंद्राय पूर्वीः धेहि तन्वे कुवित् अंग वेदत्॥१०॥३३॥ उक्थऽवाहसे विऽभ्वे मनीषां दुणां न पारं ईरय नदीनां नि स्पृश धिया तन्वि श्रुतस्य जुष्टऽतरस्य कुवित् अंग वेदत्॥११॥ तत् विविड्डि यत् ते इंद्रः जुजोषत् स्तुहि सुऽस्तुतिं नमसा आ विवासत उप भूषत जरितः मा रुवण्यः श्रवयं वाचं कुवित् अंग वेदत्॥१२॥ अवं द्रप्सः अंशुऽमतीं अतिष्ठत् इमानः कृष्णः दशऽभिः सहस्रैः आवत् तं इंद्रः शच्या धमंतं अप स्नेहितीः नृऽमनाः अधत्त॥१३॥ द्रप्सं अपश्यं विषुणे चरंतं उपऽह्वरे नद्यः अंशुऽमत्याः नभः न कृष्णं अवतस्थिऽवांसं इष्यामि वः वृषणः युध्यत आजौ॥१४॥ अधं द्रप्सः अंशुऽमत्याः उपऽस्थे अधारयत् तन्वं तित्विषाणः विशः

अदेवीरभ्या३चरंतीर्बृहस्पतिना युजेंद्रः ससाहे ॥१५॥३४॥ त्वं ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिंद्र। गूळ्हे द्यावापृथिवी अन्वविंदो विभुमद्भ्यो भुवनेभ्यो रणं धाः॥१६॥ त्वं ह त्यदप्रतिमानमोजो वज्रेण वज्रिन्भृषितो जघंथ। त्वं शुष्णस्यावातिरो वधत्रैस्त्वं गा इंद्र शच्येदविंदः॥१७॥ त्वं ह त्यदृषभ चर्षणीनां घनो वृत्राणां तविषो बभूथ। त्वं सिंधूँरसृजस्तस्तभानान् त्वमपो अजयो दासपत्नीः॥१८॥ स सुक्रतू रणिता यः सुतेष्वनुत्तमन्युर्यो अहेव रेवान्। य एक इन्नर्यपांसि कर्ता स वृत्रहा प्रतीदन्यमाहुः॥१९॥ स वृत्रहेंद्रश्चर्षणीधृत्तं सुष्टुत्या हव्यं हुवेम। स प्राविता मघवा नोऽधिवक्ता स वाजस्य श्रवस्यस्य दाता॥२०॥ स वृत्रहेंद्र ऋभुक्षाः सद्यो जज्ञानो हव्यो बभूव। कृण्वन्नपांसि नर्या पुरूणि सोमो न पीतो हव्यः सखिभ्यः॥२१॥३५॥

॥ ९७ ॥ १–१५ रेभः काश्यपः ॥ इंद्रः ॥ १–९ बृहती। १०. १२ अतिजगती। ११. १३ उपरिष्टाद्बृहती। १४ त्रिष्टुप्। १५ जगती ॥

॥ ९७ ॥ या इंद्र भुज आभरः स्वर्वाँ असुरेभ्यः। स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः॥१॥ यमिंद्र दधिषे त्वमश्वं गां भागमव्ययं। यजमाने सुन्वति दक्षिणावति तस्मिन् तं धेहि मा पणौ॥२॥ य इंद्र सत्त्यमितोऽनुधायमदेवयुः। स्वैः प एवैर्मुमुरत्पोष्यं रयिं सनुतर्धेहि तं ततः॥३॥ यच्छुक्रासि परावति यदर्वावति वृत्रहन्। अतस्त्वा गीर्भिर्द्युगदिंद्र केशिभिः सुतावाँ आ विवासति॥४॥ यद्दासि रोचने दिवः समुद्रस्याधि विष्टपि। यत्पार्थिवे सदने वृत्रहंतम यदंतरिक्ष आ गहि॥५॥३६॥ स नः सोमेषु सोम-

अदेवीः अभि आऽचरंतीः बृहस्पतिना युजा इंद्रः ससहे ॥१५॥३४॥ त्वं ह त्यत् सप्तऽभ्यः जायमानः अशत्रुऽभ्यः अभवः शचुः इंद्र गूळ्हे द्यावापृथिवी अनु अविंदः विभुमतऽभ्यः भुवनेभ्यः रणं धाः ॥१६॥ त्वं ह त्यत् अप्रतिऽमानं ओजः वज्रेण वज्रिन् धृषितः जघंथ त्वं शुष्णस्य अवं अतिरः वधत्रैः त्वं गाः इंद्र शच्या इत् अविंदः ॥१७॥ त्वं ह त्यत् वृषभ चर्षणीनां घनः वृत्राणां तविषः बभूथ त्वं सिंधून् असृजः तस्तभानान् त्वं अपः अजयः दासऽपत्नीः ॥१८॥ सः सुऽक्रतुः रणिता यः सुतेषु अनुत्तऽमन्युः यः अहाऽइव रेवान् यः एकः इत् नरि अपांसि कर्ता सः वृत्रऽहा प्रति इत् अन्यं आहुः ॥१९॥ सः वृत्रऽहा इंद्रः चर्षणिऽधृत् तं सुऽस्तुत्या हव्यं हुवेम सः प्रऽअविता मघऽवा नः अधिऽवक्ता सः वाजस्य श्रवस्यस्य दाता ॥२०॥ सः वृत्रऽहा इंद्रः ऋभुक्षाः सद्यः जज्ञानः हव्यः बभूव कृण्वन् अपांसि नर्या पुरूणि सोमः न पीतः हव्यः सखिऽभ्यः ॥२१॥३५॥

॥९७॥ याः इंद्र भुजः आ अभरः स्वःऽवान् असुरेभ्यः स्तोतारं इत् मघऽवन् अस्य वर्धय ये च त्वे वृक्तऽबर्हिषः ॥१॥ यं इंद्र दधिषे त्वं अश्वं गां भागं अथ्ययं यजमाने सुन्वति दक्षिणाऽवति तस्मिन् तं धेहि मा पणौ ॥२॥ यः इंद्र सस्ति अव्रतः अनुऽस्वापं अदेवऽयुः स्वैः सः एवैः मुमुरत् पोष्यं रयिं सनुतः धेहि तं ततः ॥३॥ यत् शक्र असि पराऽवति यत् अर्वाऽवति वृत्रऽहन् अतः त्वा गीःऽभिः द्युऽगत् इंद्र केशिऽभिः सुतऽवान् आ विवासति ॥४॥ यत् वा असि रोचने दिवः समुद्रस्य अधि विष्टपि यत् पार्थिवे सदने वृत्रहन्ऽतम यत् अंतरिक्षे आ गहि ॥५॥३६॥ सः नः सोमेषु सोमऽ-

याः सुतेषु शवसस्पते। मादयस्व राधसा सूनृतावतेंद्र राया परीणसा ॥६॥ मा नं इंद्र परा वृणग्भवा नः सधमाद्यः। त्वं न ऊती त्वमिन्न आप्यं मा नं इंद्र परा वृणक् ॥७॥ अस्मे इंद्र सचा सुते नि षंदा पीतये मधु। कृधी जरित्रे मघवन्नवो महद्स्मे इंद्र सचा सुते ॥८॥ न त्वा देवासं आशत न मर्त्यासो अद्रिवः। विश्वा जातानि शवसाभिभूरसि न त्वा देवासं आशत ॥९॥ विश्वाः पृतना अभिभूतरं नरं सजूस्ततक्षुरिंद्रं जजनुश्च राजसे। त्वा वरिष्ठं वर आसुरिमुतोग्रमोजिष्ठं तवसं तरस्विनं ॥१०॥३७॥ समी रथासो अस्वरन्निंद्रं सोमस्य पीतये। स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा समूतिभिः ॥११॥ नेमिं नमंति चक्षसा मेषं विप्रा अभिस्वरा। सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥१२॥ तमिंद्रं जोहवीमि मघवानमुग्रं सचा दधानमप्रतिष्कुतं शवांसि। मंहिष्ठो गीर्भिरा च यज्ञियो ववर्तद्राये नो विश्वा सुपथा कृणोतु वज्री ॥१३॥ त्वं पुरं इंद्र चिकिदेना व्योजसा शविष्ठ शक्र नाशयः। त्वद्विश्वानि भुवनानि वज्रिन्द्यावा रेजेते पृथिवी च भीषा ॥१४॥ तन्न ऋतमिंद्र पूर्चिच पात्वपो न वज्रिन्दुरितातिं पर्षि भूरिं। कदा नं इंद्र राय आ दशस्येर्विश्वप्स्न्यस्य स्पृहयाय्यस्य राजन् ॥१५॥३८॥६॥

॥९८॥ १–१२ नृमेधः ॥ इंद्रः ॥ १–६. ८ त्रिष्टुप्। ७. १०. १५ ककुप्। ९. १२ पुरउष्णिक् ॥

॥९८॥ इंद्राय साम गायत विप्राय बृहते बृहत्। धर्मकृते विपश्चिते पनस्यवे ॥१॥ त्वमिंद्राभिभूरसि त्वं सूर्यमरोचयः। विश्वकर्मा विश्वदेवो महाँ असि ॥२॥ विभ्राजञ्ज्योतिषा स्व१रगच्छो रोचनं दिवः। देवास्त इंद्र सख्याय येमिरे ॥३॥

ऽपाः सुतेषु शवसः पते मादयस्व राधसा सूनृताऽवता इंद्र राया परीणसा ॥६॥ मा नः इंद्र परा वृणक् भव नः सधऽमाद्यः त्वं नः ऊती त्वं इत् नः आप्यं मा नः इंद्र परा वृणक् ॥७॥ अस्मे इंद्र सचा सुते नि सद् पीतये मधु कृधि जरित्रे मघऽवन् अवः महत् अस्मे इंद्र सचा सुते ॥८॥ न त्वा देवासः आ गन न मर्त्यासः अद्रिऽवः विश्वा जातानि शवसा अभिऽभूः असि न त्वा देवासः आ गन ॥९॥ विश्वाः पृतनाः अभिऽभूतरं नरं सऽजूः ततक्षुः इंद्रं जजनुः च राजसे क्रत्वा वरिष्ठं वरे आऽसुरिं उत उग्रं ओजिष्ठं तवसं तरस्विनं ॥१०॥३१॥ सं इंद्रेभासः अस्वरन् इंद्रं सोमस्य पीतये स्वःऽपतिं यत् ईं वृधे धृतऽव्रतः हि ओजसा सं ऊतिऽभिः ॥११॥ नेमिं नमंति चक्षसा मेषं विप्राः अभिऽस्वरा सुऽदीतयः वः अदुहः अपि कर्णे तरस्विनः सं ऋक्वऽभिः ॥१२॥ तं इंद्रं जोहवीमि मघऽवानं उग्रं सत्रा दधानं अप्रतिऽस्कुतं शवांसि महिष्ठः गीःऽभिः आ च यज्ञियः ववर्तत् राये नः विश्वा सुऽपथा कृणोतु वज्री ॥१३॥ त्वं पुरः इंद्र चिकित् एनाः वि ओजसा शविष्ठ शक्र नाशयध्यै त्वत् विश्वानि भुवनानि वज्रिन् द्यावा रेजेते पृथिवी च भीषा ॥१४॥ तत् मा गृणंत इंद्र पूर चित् पातु अपः न वज्रिन् दुःऽइता अतिं पर्षि भूरिं कदा नः इंद्र रायः आ दशस्येः विश्वऽस्मात् अस्य स्पृहयाय्यस्य राजन् ॥१५॥३८॥६॥

॥ ९८ ॥ इंद्राय सामं गायत विप्राय बृहते बृहत् धर्मऽकृते विपःऽचिते पनस्यवे ॥१॥ त्वं इंद्र अभिऽभूः असि त्वं सूर्यं अरोचयः विश्वऽकर्मा विश्वऽदेवः महान् असि ॥२॥ विऽभाजन् ज्योतिषा स्वः अगच्छः रोचनं दिवः देवाः ते इंद्र सख्याय येमिरे ॥३॥

एंद्र नो गधि प्रियः सत्राजिदगोह्यः। गिरिर्न विश्वतस्पृथुः पतिर्दिवः ॥४॥ अभि हि सत्य सोमपा उभे बभूथ रोदसी। इंद्रासि सुन्वतो वृधः पतिर्दिवः॥५॥ त्वं हि शश्वतीनामिंद्र दर्ता पुरामसि। हंता दस्योर्मनोवृधः पतिर्दिवः॥६॥७॥ अधा हींद्र गिर्वण उप त्वा कामान्महः ससृज्महे। उदेव यंत उदभिः॥७॥ वार्ण त्वा यव्याभिर्वर्धंति शूर ब्रह्माणि। वावृध्वांसं चिदद्रिवो दिवेदिवे॥८॥ युंजंति हरी इषिरस्य गाथयोरौ रथ उरुयुगे। इंद्रवाहा वचोयुजा ॥९॥ त्वं न इंद्रा भरँ ओजो नृम्णं शतक्रतो विचर्षणे। आ वीरं पृतनासहं॥१०॥ त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ। अधा ते सुम्नमीमहे॥११॥ त्वां शुष्मिन्पुरुहूत वाजयंतमुप ब्रुवे शतक्रतो। स नो रास्व सुवीर्यं ॥१२॥२॥

॥ ९९ ॥ १-८ नृमेधः ॥ इंद्रः ॥ प्रागाथं ॥

॥ ९९ ॥ त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः । स इंद्र स्तोमवाहसामिह श्रुध्युप स्वसरमा गहि ॥१॥ मत्स्वा सुशिप्र हरिवस्तदीमहे त्वे आ भूषंति वेधसः । तव श्रवांस्युपमान्युक्थ्या सुतेष्विंद्र गिर्वणः ॥२॥ श्रायंत इव सूर्यं विश्वेदिंद्रस्य भक्षत । वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥३॥ अनर्शरातिं वसुदामुप स्तुहि भद्रा इंद्रस्य रातयः। सो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥४॥ त्वमिंद्र प्रतूर्तिष्वभि विश्वा असि स्पृधः। अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥५॥ अनु ते शुष्मं तुरयंतमीयतुः क्षोणी शिशुं न मातरा । विश्वास्ते स्पृधः श्नथयंत मन्यवे वृत्रं यदिंद्र तूर्वसि ॥६॥ इत ऊती वो अजरं प्रहेतारमप्रहितं । आशुं जेतारं

आ इंद्र नः गधि प्रियः सत्राऽजित् अगोह्यः गिरिः न विश्वतः पृथुः पतिः दिवः॥४॥ अभि हि सत्य सोमऽपाः उभे बभूथ रोदसी इंद्र असि सुन्वतः वृधः पतिः दिवः॥५॥ त्वं हि शण्वतीनां इंद्र दृता पुरां असि हंता दस्योः मनोः वृधः पतिः दिवः॥६॥१॥ अधं हि इंद्र गिर्वणः उपं त्वा कामान् महः ससृज्महे उदाऽइव यंतः उदऽभिः॥७॥ वाः न त्वा यव्याभिः वर्धति शूर ब्रह्माणि ववृध्वांसं चित् अद्रिऽवः दिवेऽदिवे॥८॥ युंजंति हरी इषिरस्य गाथया उरौ रथे उरुऽयुगे इंद्र ऽवाहा वचःऽयुजा॥९॥ त्वं नः इंद्र आ भर ओजः नृम्णं शतऽक्रतो विऽचर्षणे आ वीरं पृतनाऽसहं॥१०॥ त्वं हि नः पिता वसो त्वं माता शतऽक्रतो बभूविथ अधं ते सुम्नं ईमहे॥११॥ त्वां शुष्मिन् पुरुऽहूत वाजऽयंतं उपं ब्रुवे शतऽक्रतो सः नः रास्व सुऽवीर्यं॥१२॥२॥

॥९९॥ त्वां इदा ह्यः नरः अपीप्यन् वज्रिन् भूर्णयः सः इंद्र स्तोमंऽवाहसां इह श्रुधि उपं स्वसरं आ गहि॥१॥ मत्स्व सुऽशिप्र हरिऽवः तत् ईमहे त्वे आ भूषंति वेधसः तवं श्रवांसि उपऽमानि उक्थ्या सुतेषु इंद्र गिर्वणः॥२॥ श्रायंतःऽइव सूर्यं विश्वा इत् इंद्रस्य भक्षत वसूनि जाते जनमाने ओजसा प्रति भागं न दीधिम॥३॥ अनर्शऽरातिं वसुऽदां उपं स्तुहि भद्राः इंद्रस्य रातयः सः अस्य कामं विधतः न रोषति मनः दानाय चोदयन्॥४॥ त्वं इंद्र प्रऽनूर्तिषु अभि विश्वाः असि स्पृधः अशस्तिऽहा जनिता विश्वऽतूः असि त्वं तूर्य तरुष्यतः॥५॥ अनु ते शुष्मं तुरयंतं ईयतुः क्षोणी शिशुं न मातरा विश्वाः ते स्पृधः श्नथयंत मन्यवे वृत्रं यत् इंद्र तूर्वसि॥६॥ इतः ऊती वः अजरं प्रऽहेतारं अप्रऽहितं आशुं जेतारं

हेतारं रथीतममतूर्तं तुग्र्यावृधं ॥७॥ इष्कर्तारमनिष्कृतं सह-स्कृतं शतमूतिं शतक्रतुं। समानमिंद्रमवसे हवामहे वसवानं वसूजुवं ॥ ८ ॥ ३ ॥

॥ १०० ॥ १–३ ६–१२ नेमो भार्गवः। ४ ५ इंद्रः ॥ १–९. १२ इंद्रः। १०. ११ वाक् ॥ १–५. १०–१२ त्रिष्टुप्। ६ जगती। ७–९ अनुष्टुप् ॥

॥ १०० ॥ अयं त एमि तन्वा पुरस्ताद्विश्वे देवा अभि मा यंति पश्चात्। यदा मह्यं दीधरो भागमिंद्रादिन्मया कृणवो वीर्याणि ॥१॥ दधामि ते मधुनो भक्षमग्रे हितस्ते भागः सुतो अस्तु सोमः। असश्च त्वं दक्षिणतः सखा मेऽधा वृत्राणि जंघनाव भूरि ॥२॥ प्र सु स्तोमं भरत वाजयंत इंद्राय सत्यं यदि सत्यमस्ति। नेंद्रो अस्तीति नेम उ त्व आह कस्तं ददर्श कमभि ष्टवाम ॥३॥ अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि महा। ऋतस्य मा प्रदिशो वर्धयंत्यादर्दिरो भुवना दर्दरीमि ॥४॥ आ यन्मा वेना अरुहन्नृतस्यैकमासीनं हर्यतस्य पृष्ठे। मनश्चिन्मे हृद आ प्रत्यवोचदचिक्रदज्झिष्णुमंतः सखायः ॥५॥ विश्वेत्ता ते सवनेषु प्रवाच्या या चकर्थ मघवन्निंद्र सुन्वते। पारावतं यत्पुरुसंभृतं वस्वपावृणोः शरभाय ऋषिबंधवे ॥६॥४॥ प्र नूनं धावता पृथुज्रेह यो वो अवावरीत्। नि पीं वृत्रस्य मर्मणि वज्रमिंद्रो अपीपतत् ॥७॥ मनोजवा अयमान आयसीमतरत्पुरं। दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत् ॥८॥ समुद्रे अंतः शयत उद्ना वज्रो अभीवृतः। भरंत्यस्मै संयतः पुरःप्रस्रवणा बलिं ॥९॥ यद्वाग्वदंत्यविचेतनानि राष्ट्री देवानां निषसादे मंद्रा। चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम ॥१०॥ देवीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति। सा नो

हेतारं रयिऽतमं अतूंतं तुग्र्यऽवृधं ॥७॥ इष्कर्तारं अनिःऽकृतं सहःऽकृतं शतंऽऊतिं शतऽक्रतुं समानं इंद्रं अवसे हुवामहे वसंवानं वसुऽजुवं ॥८॥३॥

॥१००॥ अयंते एमि तन्वा पुरस्तात् विश्वे देवाः अभि मा यंति पश्चात् यदा मह्यं दीधरः भागं इंद्र आत् इत् मया कृणवः वीर्याणि ॥१॥ दधामि ते मधुनः भक्षं अग्रे हितः ते भागः सुतः अस्तु सोमः असः च त्वं दक्षिणतः सखा मे अधा वृत्राणि जंघनाव भूरि ॥२॥ प्रऽसु स्तोमं भरत वाजऽयंतः इंद्राय सत्यं यदि सत्यं अस्ति न इंद्रः अस्ति इति नेमः ऊं त्वः आहुः कः ईं ददर्श कं अभि स्तवाम ॥३॥ अयं अस्मि जरितः पश्य मा इह विश्वा जातानि अभि अस्मि महा ऋतस्य मा प्रऽदिशः वर्धयंति आऽददिरः भुवना दर्दरीमि ॥४॥ आ यत् मा वेनाः अरुहन् ऋतस्य एकं आसीनं हर्यतस्य पृष्ठे मनः चित् मे हृदे आ प्रति अवोचत् अचिक्रदन् शिशुऽमंतः सखायः ॥५॥ विश्वा इत् ता ते सवनेषु प्रऽवाच्या या चकर्थ मघऽवन् इंद्र सुन्वते पारावतं यत् पुरुऽसंभृतं वसु अपऽअवृणोः शरभाय ऋषिऽबंधवे ॥६॥४॥ प्र नूनं धावत पृथक् न इह यः वः अवावरीत् नि सीं वृचस्य मर्मणि वज्रं इंद्रः अपीपतत् ॥७॥ मनःऽजवाः अयमानः आयसीं अतरत् पुरं दिवं सुऽपर्णः गत्वाय सोमं वज्रिणे आ अभरत् ॥८॥ समुद्रे अंतः शयते उद्ना वज्रः अभिऽवृतः भरंति अस्मै संऽयतः पुरःऽप्रस्रवणाः बलिं ॥९॥ यत् वाक् वदंती अविऽचेतनानि राष्ट्री देवानां निऽससाद मंद्रा चतसः ऊर्जं दुदुहे पयांसि क्व स्वित् अस्याः परमं जगाम ॥१०॥ देवीं वाचं अजनयंत देवाः तां विश्वऽरूपाः पशवः वदंति सा नः

मंद्रा इषं ऊर्जं दुहाना धेनुः वाक् अस्मान् उप सुऽस्तुता आ एतु ॥११॥ सखे विष्णो विऽतरं वि क्रमस्व द्यौः देहि लोकं वज्राय विऽस्कभे हनाव वृत्रं रिणाव सिंधून् इंद्रस्य यंतु प्रऽसवे विऽसृष्टाः॥१२॥५॥

॥१०१॥ ऋधक् इत्था सः मर्त्यः शशमे देवऽओतये यः नूनं मित्रावरुणौ अभिष्टये आऽचक्रे हव्यऽदातये॥१॥ वर्धेथेऽक्षौ उरुऽचक्षसा नरा राजाना दीर्घश्रुत्ऽतमा ता बाहुता न दंसना रथ्येव तः साकं सूर्यस्य रश्मिऽभिः॥२॥ प्र यः वां मित्रावरुणा अजिरः दूतः अद्रवत् अर्यःऽशीर्षा मदेऽरघुः॥३॥ न यः संऽपृच्छे न पुनः हवीतवे न संऽवादाय रमते तस्मात् नः अद्य संऽचक्षाते उरुष्यतं बाहुऽभ्यां नः उरुष्यतं॥४॥ प्र मित्राय प्र अर्यम्णे सचथ्यै ऋतऽवसो° वरूथ्यै वरुणे छंद्यं वचः स्तोत्रं राजऽसु गायत॥५॥ ॥६॥ ते हि न्विरे अरुणं जेन्यं वसुं एकं पुत्रं तिसृणां ते धामानि अमृताः मर्त्यानां अदब्धाः अभि चक्षते॥६॥ आ मे वचांसि उत्ऽयता द्युमत्ऽतमानि कर्ता उभा यातं नासत्या सऽजोषसा प्रति हव्यानि वीतये॥७॥ रातिं यत् वां अरक्षसं हवामहे युवाभ्यां वाजिनीऽवसू° प्राचीं होचां प्रऽतिरंतौ इतं नरा गृणाना जमत्ऽअग्निना॥८॥ आ नः यज्ञं दिविऽस्पृशं वायो याहि सुमन्मंऽभिः अंतः पविचे उपरि श्रीणानः अयं शुक्रः अयामि ते॥९॥ वेति अध्वर्युः पथिऽभिः रजिष्ठैः प्रति हव्यानि वीतये अधि नियुत्वः उभयस्य नः पिब शुचिं सोमं गोऽआशिरं॥१०॥७॥ बट् महान् असि सूर्य बट् आदित्य महान् असि महः ते सतः महिमा पनस्यते अद्धा देव महान् असि॥११॥ बट् सूर्य श्रवसा महान् असि

सचा देव महाँ असि। महा देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यं॥१२॥ डुयं या नीच्यर्किणी रूपा रोहिण्या कृता। चित्रेव प्रत्यदर्श्यायत्य१ तर्दृशसु वाहुषु॥१३॥ प्रजा ह तिस्रो अत्यायमीयुर्न्य१न्या अर्कमभितो विविश्रे। बृहद्ह तस्थौ भुवनेष्वन्तः पवमानो हरित आ विवेश॥१४॥ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः। प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥१५॥ वचोविदं वाचमुदीरयन्तीं विश्वाभिर्धीभिरुपतिष्ठमानां। देवीं देवेभ्यः पर्येयुषीं गामा मावृक्त मर्त्यो दभ्रचेताः॥१६॥८॥

॥१०२॥ १–२२ प्रयोगो भार्गव अग्निर्वा पावको वाऽऽहवनीयः। स्वयमग्नौ गृहपतिर्यविष्ठो सहसः सुतो त्रयोदशान्यतः॥ अग्निः॥ गायत्री॥

॥१०२॥ त्वमग्ने बृहद्यो दधासि देव दाशुषे। कविर्गृहपतिर्युवा॥१॥ स न ईळानया सह देवाँ अग्ने दुवस्युवा। चिकित्विन्मानुषा वह॥२॥ त्वया ह स्विद्युजा वयं चोदिष्ठेन यविष्ठ्य। अभि ष्मो वाजसातये॥३॥ और्वभृगुवच्छुचिमप्नवानवदा हुवे। अग्निं समुद्रवाससं॥४॥ हुवे वातस्वनं कविं पर्जन्यक्रन्द्यं सहः। अग्निं समुद्रवाससं॥५॥९॥ आ सुवं सवितुर्यथा भगस्येव भुजिं हुवे। अग्निं समुद्रवाससं॥६॥ अग्निं वो वृधंतमध्वराणां पुरूतमं। अच्छा नप्त्रे सहस्वते॥७॥ अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या। अस्य क्रत्वा यशस्वतः॥८॥ अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते। आ वाजिरूप नो गमत्॥९॥ विश्वेषामिह स्तुहि होतॄणां यशस्तमं। अग्निं यज्ञेषु पूर्व्यं॥१०॥१०॥ शीरं पावकशोचिषं ज्येष्ठो यो दमेष्वा। दीदायं दीर्घश्रुत्तमः॥११॥ तमर्वंतं न सानसिं गृणीहि विप्र शुष्मिणं।

सत्वा देव महान् असि महा देवानां असुर्यः पुरःऽहितः विऽभु ज्योतिः अदाभ्यं ॥१२॥ इयं या नीचीं अकिनीं रूपा रोहिण्या कृता चिचाऽइव प्रतिं अदर्शि आऽयती अंतः दृशऽसुं वाहुषु ॥१३॥ प्रऽजाः हृ तिस्रः अतिऽआयं ईयुः नि अन्याः अर्कं अभितः विविष्ये बृहत् हृ तस्थौ भुवनेषु अंतः पवमानः हरितः आ विवेश ॥१४॥ माता रुद्राणां दुहिता वसूनां स्वसा आदित्यानां अमृतस्य नाभिः प्र नु वोचं चिकितुषे जनाय मा गां अनागां अदितिं वधिष्ट ॥१५॥ वचःऽविदं वाचं उत्ऽईरयंतीं विश्वाभिः धीभिः उपऽतिष्ठमानां देवीं देवेभ्यः परि आऽईयुषीं गां आ मा अवृक्त मर्त्यः दभ्रऽचेताः ॥१६॥८॥

॥१०२॥ त्वं अग्ने बृहत् वयः दधासि देव दाशुषे कविः गृहऽपतिः युवा ॥१॥ सः नः ईळानया सह देवान् अग्ने दुवस्युवा चिकित् विऽभानो° आ वह ॥२॥ त्वया हृ स्वित् युजा वयं चोदिष्ठेन यविष्ठ्य अभि स्मः वाजंऽसातये ॥३॥ और्वभृगुऽवत् शुचिं अग्निवानऽवत् आ हुवे अग्निं समुद्रऽवाससं ॥४॥ हुवे वातंऽस्वनं कविं पर्जन्यंऽक्रंदं सहः अग्निं समुद्रऽवाससं ॥५॥९॥ आ सवं सवितुः यथा भगस्यऽइव भुजिं हुवे अग्निं समुद्रऽवाससं ॥६॥ अग्निं वः वृधंतं अध्वराणां पुरुऽतमं अच्छं नप्त्रे सहस्वते ॥७॥ अयं यथा नः आऽभुवत् त्वष्टा रूपाऽइव तक्ष्यां अस्य क्रत्वा यशस्वतः ॥८॥ अयं विश्वाः अभि श्रियः अग्निः देवेषु पत्यते आ वाजैः उप नः गमत् ॥९॥ विश्वेषां इह स्तुहि होतॄणां यशःऽतमं अग्निं यज्ञेषु पूर्व्यं ॥१०॥ ॥१०॥ शीरं पावकऽशोचिषं ज्येष्ठः यः दमेषु आ दीदायं दीर्घश्रुत्ऽतमः ॥११॥ तं अर्वंतं न सानसिं गृणीहि विप्र पुष्मिणं

मित्रं न यातयज्जनं ॥१२॥ उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः। वायोरनीके अस्थिरन् ॥१३॥ यस्य त्रिधात्ववृतं बर्हिस्तस्यावसेदिनं। आपश्चिन्नि दधा पदं ॥१४॥ पदं देवस्य मीळ्हुषोऽनाधृष्टाभिरूतिभिः। भद्रा सूर्य इवोपदृक् ॥१५॥११॥ अग्ने घृतस्य धीतिभिस्तेपानो देव शोचिषा। आ देवान्वक्षि यक्षि च ॥१६॥ तं त्वाजनन्त मातरः कविं देवासो अंगिरः। हव्यवाहममर्त्यं ॥१७॥ प्रचेतसं त्वा कवेऽग्ने दूतं वरेण्यं। हव्यवाहं नि षेदिरे ॥१८॥ नहि मे अस्त्यघ्न्या न स्वधितिर्वनन्वति। अथैताद्गभरामि ते ॥१९॥ यदग्ने कानि कानि चिदा ते दारूणि दध्मसि। ता जुषस्व यविष्ठ्य ॥२०॥ यदस्युपजिह्विका यद्वमो अतिसर्पति। सर्वं तदस्तु ते घृतं ॥२१॥ अग्निमिंधानो मनसा धियं सचेत मर्त्यः। अग्निमीधे विवस्वभिः ॥२२॥१२॥

॥ १०३ ॥ १–१४ सोभरिः काण्वः ॥ १–१३ अग्निः। १४ अग्निर्मरुतश्च ॥ १–४ ६ बृहती। ५ विराड्रूपा। ७. ९. ११. १३ सतोबृहती। ८. १२ अनुष्टुप्। १० ह्रस्वापंक्तिः। १४ अनुष्टुप् ॥

॥ १०३ ॥ अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः। उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्त नो गिरः ॥१॥ प्र दैवोदासो अग्निर्देवाँ अच्छा न मज्मना। अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य सानवि ॥२॥ यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः। सहस्रसां मेधसातावि वत्मनाग्निं धीभिः समर्यत ॥३॥ प्र यं राये निनीषसि मर्तो यस्ते वसो दाशत्। स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणं ॥४॥ स इळ्हे चिद्दभिं तृणत्ति वाजमर्वता स धत्ते अक्षिति श्रवः। त्वे देवत्रा सदा पुरूवसो विश्वा वामानि धीमहि ॥५॥१३॥ यो विश्वा दयते वसु होता मन्द्रो जनानां। मधोर्न पात्रा प्रथमान्यस्मै प्र

मित्रं न यातयत्ऽजनं ॥१२॥ उपं त्वा जामयः गिरः देदिशतीः हविःऽकृतः वायोः अनीके अस्थिरन्॥१३॥ यस्य चिऽधातु अवृतं बर्हिः तस्थौ असंऽदिनं आपः चित् नि दुध पदं॥१४॥ पदं देवस्य मीळ्हुषः अनाधृष्टाभिः ऊतिऽभिः भद्रा सूर्यःऽइव उपऽदृक्॥१५॥११॥ अग्ने घृतस्य धीतिऽभिः नेपानः देव शोचिषा आ देवान् वक्षि यक्षि च॥१६॥ तं त्वा अजनंत मातरः कविं देवासः अंगिरः हव्यऽवाहं अमर्त्यं॥१७॥ प्रऽचेतसं त्वा कवे अग्ने दूतं वरेण्यं हव्यऽवाहं नि सेदिरे॥१८॥ नहि मे अस्ति अन्या न स्वऽधितिः वनन्ऽवति अथ एतादृक् भरामि ते॥१९॥ यत् अग्ने कानि कानि चित् आ ते दारूणि दध्मसि ता जुषस्व यविष्ठ्य ॥२०॥ यत् अग्निं उपऽजिह्विका यत् वपुः अतिऽसर्पति सर्वं तत् अस्तु ते घृतं॥२१॥ अग्निं इंधानः मनसा धियं सचेत मर्त्यः अग्निं ईधे विवस्वंऽभिः॥२२॥१२॥

॥१०३॥ अदर्शि गातुवित्ऽतमः यस्मिन् व्रतानि आऽदधुः उपो सु जातं आर्यस्य वर्धनं अग्निं नक्षंत नः गिरः॥१॥ प्र देवःऽदासः अग्निः देवान् अच्छं न मज्मना अनु मातरं पृथिवीं वि ववृते तस्थौ नाकस्य सानवि॥२॥ यस्मात् रेजंत कृष्टयः चर्कृत्यानि कृण्वतः सहस्रऽसां मेधसातौऽइव त्मना अग्निं धीभिः सपर्यत ॥३॥ प्र यं राये निनीषसि मर्तः यः ते वसो दाशत् सः वीरं धत्ते अग्ने उक्थऽशंसिनं त्मना सहस्रऽपोषिणं॥४॥ सः हव्हे चित् अभि तृणत्ति वाजं अवंता सः धत्ते अक्षितिं श्रवः त्वे देवऽचासदा पुरुऽवसो विश्वा वामानि धीमहि॥५॥१३॥ यः विश्वा दयते वसु होता मंद्रः जनानां मधोः न पात्रा प्रथमानि अस्मै प्र

स्तोमा यंत्यग्नये ॥६॥ अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यंते देवयवः। उभे तोके तनये दस्म विश्पते परि राधो मघोनाम् ॥७॥ प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे। उपस्तुतासो अग्नये ॥८॥ आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः। कुविन्नो अस्य सुमतिर्नवीयस्यच्छा वाजेभिरागमत् ॥९॥ प्रेष्ठमु प्रियाणां स्तुह्यासावार्तिथिं। अग्निं रथानां यमं ॥१०॥१४॥ उदिता यो निदिता वेदिता वस्वा यज्ञियो ववर्तति। दुष्टरा यस्य प्रवणे नोर्मयो धिया वाजं सिषासतः ॥११॥ मा नो हृणीतामतिथिर्वसुरग्निः पुरुप्रशस्त एवः। यः सुहोता स्वध्वरः ॥१२॥ मो ते रिषन्ये अच्छोक्तिभिर्वसोऽग्ने केभिर्धिषे देवैः। कोरिष्यद्धि त्वामीट्टे दूत्याय रातहव्यः स्वध्वरः ॥१३॥ आग्ने याहि मरुत्सखा रुद्रेभिः सोमपीतये। सोभरया उप सुष्टुतिं मादयस्व स्वर्णरे ॥१४॥१५॥१०॥८॥

॥ इत्यष्टमं मंडलं समाप्तं ॥

॥१॥ १–१० मधुच्छंदाः ॥ पवमानः सोमः ॥ गायत्री ॥

॥१॥ स्वादिष्टया मदिष्टया पवस्व सोम धारया। इंद्राय पातवे सुतः ॥१॥ रक्षोहा विश्वचर्षणिरभि योनिमयोहतं। द्रुणा सधस्थमासदत् ॥२॥ वरिवोधातमो भव मंहिष्ठो वृत्रहंतमः। परि राधो मघोनाम् ॥३॥ अभ्यर्ष महानां देवानां वीतिमंधसा। अभि वाजमुत श्रवः ॥४॥ त्वामच्छा चरामसि तदिदर्थं दिवेदिवे। इंदो त्वे न आशसः ॥५॥१६॥ पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता। वारेण शश्वता तना ॥६॥ तमीम-

स्तोमाः यंति अग्नये॥६॥ अश्वं न गीःऽभिः रथ्यं सुऽदानवः मर्मृज्यंते देवऽयवः उभे तोके तनये दस्म विश्पते पर्षि राधः मघोनां॥७॥ प्र मंहिष्ठाय गायत ऋतऽवे बृहते शुक्रऽशोचिषे उपऽस्तुतासः अग्नये॥८॥ आ वंसते मघऽवा वीरऽवत् यशः संऽइंद्धः द्युम्नी आऽहुतः कुवित् नः अस्य सुऽमतिः नवीयसी अच्छ वाजेभिः आऽगमत्॥९॥ प्रेष्ठं ऊं प्रियाणां स्तुहि आऽसावु अतिथिं अग्निं रथानां यमं॥१०॥१४॥ उत्ऽइंता यः निऽदिता वेदिता वसुं आ यज्ञियः ववर्तति दुस्तरः यस्य प्रवणे न कर्मभिः धिया वाजं सिसासतः॥११॥ मा नः दुणीतां अतिथिः वसुः अग्निः पुरुऽप्रशस्तः एषः यः सुऽहोता सुऽअध्वरः॥१२॥ मो ते रिषन् ये अच्छोक्तिऽभिः वसो अग्ने केभिः चित् एवैः कीरिः चित् हि त्वां ईट्टे दूत्याय रातऽहव्यः सुऽअध्वरः॥१३॥ आ अग्ने याहि मरुत्ऽसखा रुद्रेभिः सोमऽपीतये सोभर्याः उप सुऽस्तुतिं मादयस्व स्वःऽनरे॥१४॥१५॥१०॥८॥

॥ इत्यष्टमं मंडलं समाप्तं ॥

॥१॥ स्वादिष्टया मदिष्टया पवस्व सोम धारया इंद्राय पातवे सुतः॥१॥ रक्षोऽहा विश्वऽचर्षणिः अभि योनिं अयःऽहतं दुणा सधऽस्थं आ असदत्॥२॥ वरिवःऽधातमः भव मंहिष्ठः वृत्रहन्ऽतमः पर्षि राधः मघोनां॥३॥ अभि अर्ष महानां देवानां वीतिं अंधसा अभि वाजं उत श्रवः॥४॥ त्वां अच्छ वरामसि तत् इत् अर्य दिवेऽदिवे इंदो त्वे नः आऽशसः॥५॥१६॥ पुनाति ते परिऽस्रुतं सोमं सूर्यस्य दुहिता वारेण शश्वता तना॥६॥ तं ईं अ-

ऋषीः समये आ गृभ्णन्ति योषणो दशं। स्वसारः पार्ये दिवि ॥७॥ तमीं हिन्वन्त्यग्रुवो धमन्ति वाकुरं हितं। विधातुं वारणं मधुं ॥८॥ अभी३ ममघ्न्या उत श्रीणन्ति धेनवः शिशुं। सोममिन्द्राय पातवे ॥९॥ अस्येदिन्द्रो मदेष्वा विश्वा वृत्राणि जिघ्नते। शूरो मघा च मंहते ॥१०॥१७॥

॥ २ ॥ १–१० मेधातिथिः ॥ पवमानः सोमः ॥ गायत्री ॥

॥२॥ पवस्व देववीरति पवित्रं सोम रंह्या। इंद्रमिंदो वृषा विश ॥१॥ आ वच्यस्व महि प्सरो वृषेंदो द्युम्नवत्तमः। आ योनिं धर्णसिः सदः ॥२॥ अधुक्षत प्रियं मधु धारा सुतस्य वेधसः। अपो वसिष्ट सुक्रतुः ॥३॥ महांतं त्वा महीरन्वापो अर्षंति सिंधवः। यद्गोभिर्वासयिष्यसे ॥४॥ समुद्रो अप्सु मामृजे विष्टंभो धरुणो दिवः। सोमः पवित्रे अस्मयुः ॥५॥१८॥ अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। सं सूर्येण रोचते ॥६॥ गिरस्त इंद्र ओजसा मर्मृज्यंते अपस्युवः। याभिर्मदाय शुम्भसे ॥७॥ तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे। तव प्रशस्तयो महीः ॥८॥ अस्मभ्यमिंदविंद्रयुर्मध्वः पवस्व धारया। पर्जन्यो वृष्टिमाँ इव ॥९॥ गोया इंदो नृषा अस्यश्वसा वाजसा उत। आत्मा यज्ञस्य पूर्व्यः ॥१०॥१९॥

॥ ३ ॥ १–९ शुनःशेपः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३॥ एष देवो अमर्त्यः पर्णवीरिव दीयति। अभि द्रोणान्यासदं ॥१॥ एष देवो विपा कृतोऽभि हरांसि धावति। पवमानो अदाभ्यः ॥२॥ एष देवो विपन्युभिः पवमान ऋतायुभिः। हरिर्वाजाय मृज्यते ॥३॥ एष विश्वानि वार्या शूरो यन्निव सत्वभिः। पवमानः सिषासति ॥४॥ एष देवो रथर्यति पव-

र्णीः सऽमर्ये आ गृभ्णंति योषणः दश स्वसारः पार्ये दिवि॥७॥ तं ई हिन्वंति अपुवः धमंति वाकुरं हतिं चिऽधातु वारणं मधु ॥८॥ अभि द्रुमं अक्ष्याः उत श्रीणंति धेनवः शिप्रुं सोमं इंद्राय पातवे॥९॥ अस्य इत् इंद्रः मदेषु आ विश्वा वृत्राणि जिघ्नते शूरः मघा च मंहते॥१०॥१७॥

॥२॥ पवस्व देवऽवीः अति पविचं सोम रंह्या इंद्रं इंदो वृषा आ विश॥१॥ आ वच्यस्व महि प्सरः वृषा इंदो द्युमत्ऽतमः आ योनिं धर्णसिः सदः॥२॥ अधुक्षत प्रियं मधु धारा सुतस्य वेधसः अपः वसिष्ट सुऽक्रतुः॥३॥ महांतं त्वा महीः अनु आपः अर्षंति सिंधवः यत् गोभिः वासयिष्यसे॥४॥ समुद्रः अप्ऽसु मामृजे विष्टंभः धरुणः दिवः सोमः पविचे अस्मऽयुः॥५॥१८॥ अचिक्रदत् वृषा हरिः महान् मित्रः न दर्शतः सं सूर्येण रोचते॥६॥ गिरः ते इंदो ओजसा मर्मृज्यंते अपस्युवः याभिः मदाय शुंभसे॥७॥ तं त्वा मदाय घृष्वये ऊं लोकऽकृत्नुं ईमहे तव प्रऽशस्तयः महीः॥८॥ अस्मभ्यं इंदो इंदुऽयुः मध्वः पवस्व धारया पर्जन्यः वृष्टिमान्ऽइव॥९॥ गोऽसाः इंदो नृऽसाः असि अश्वऽसाः वाजऽसाः उत आत्मा यज्ञस्य पूर्व्यः॥१०॥१९॥

॥३॥ एषः देवः अमर्त्यः पर्णवीःऽइव दीयति अभि द्रोणानि आऽसदं॥१॥ एषः देवः विपा कृतः अति ह्वरांसि धावति पवमानः अदाभ्यः॥२॥ एषः देवः विपन्युऽभिः पवमानः ऋतयुऽभिः हरिः वाजाय मृज्यते॥३॥ एषः विश्वानि वार्या शूरः यन्ऽइव सत्वऽभिः पवमानः सिसासति॥४॥ एषः देवः रथ्यंति पव-

वमानो दशस्यति। आविष्कृणोति वग्वनुं ॥५॥२०॥ एष विप्रैरभिष्टुतोऽपो देवो वि गाहते। दधद्रत्नानि दाशुषे ॥६॥ एष दिवं वि धावति तिरो रजांसि धारया। पवमानः कनिक्रदत् ॥७॥ एष दिवं व्यासरत्तिरो रजांस्यस्पृतः। पवमानः स्वध्वरः ॥८॥ एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति ॥९॥ एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः। धारया पवते सुतः ॥१०॥२१॥

॥ ४ ॥ १–१० हिरण्यस्तूपः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४॥ सना च सोम जेषि च पवमान महि श्रवः। अथा नो वस्यसस्कृधि ॥१॥ सना ज्योतिः सना स्वर्विश्वा च सोम सौभगा। अथा नो वस्यसस्कृधि ॥२॥ सना दक्षमुत क्रतुमपं सोम मृधो जहि। अथा नो वस्यसस्कृधि ॥३॥ पवीतारः पुनीतन सोममिंद्राय पातवे। अथा नो वस्यसस्कृधि ॥४॥ त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः। अथा नो वस्यसस्कृधि ॥५॥२२॥ तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यं। अथा नो वस्यसस्कृधि ॥६॥ अभ्यर्ष स्वायुध सोमं दिवर्हसं रयिं। अथा नो वस्यसस्कृधि ॥७॥ अभ्यर्षापानपच्युतो रयिं समत्सु सासहिः। अथा नो वस्यसस्कृधि ॥८॥ त्वां यज्ञैरवीवृधन्पवमान विधर्मणि। अथा नो वस्यसस्कृधि ॥९॥ रयिं नश्चित्रमश्विनमिंदो विश्वायुमा भर। अथा नो वस्यसस्कृधि ॥१०॥२३॥

॥ ५ ॥ १–११ अत्रिः काश्यपो देवलो वा ॥ आग्नेयः ॥ १–७ गायत्री । ८–११ अनुष्टुप् ॥

॥५॥ समिंद्रो विश्वतस्पतिः पवमानो वि राजति। प्रीणन्नृषा कनिक्रदत् ॥१॥ तनूनपात्पवमानः शृंगे शिशानो अर्षति

वमानः दशस्यति आविः कृणोति वग्वनुं॥५॥२०॥ एषः विप्रैः अभिऽस्तुतः अपः देवः वि गाहते दधत् रत्नानि दाशुषे॥६॥ एषः दिवं वि धावति तिरः रजाँसि धारया पवमानः कनिक्रदत्॥७॥ एषः दिवं वि आ असरत् तिरः रजाँसि अस्मृतः पवमानः सुऽअध्वरः॥८॥ एषः प्रत्नेन जन्मना देवः देवेभ्यः सुतः हरिः पवित्रे अर्षति॥९॥ एषः कं स्यः पुरुऽव्रतः जज्ञानः जनयन् इषः धारया पवते सुतः॥१०॥२१॥

॥४॥ सनं च सोम जेषिं च पवमान महिं श्रवः अथ नः वस्यसः कृधि॥१॥ सनं ज्योतिः सनं स्वः विश्वा च सोम सौभगा अथ नः वस्यसः कृधि॥२॥ सनं दक्षं उत क्रतुं अप सोम मृधः जहि अथ नः वस्यसः कृधि॥३॥ पवितारः पुनीतनं सोमं इंद्राय पातवे अथ नः वस्यसः कृधि॥४॥ त्वं सूर्ये नः आ भज तवं क्रत्वा तवं ऊतिऽभिः अथ नः वस्यसः कृधि॥५॥२२॥ तवं क्रत्वा तवं ऊतिऽभिः ज्योक् पश्येम सूर्यं अथ नः वस्यसः कृधि॥६॥ अभि अर्ष सुऽआयुध सोम द्विऽबर्हसं रयिं अथ नः वस्यसः कृधि॥७॥ अभि अर्ष अनपऽच्युतः रयिं समत्ऽसु सासहिः अथ नः वस्यसः कृधि॥८॥ त्वां यज्ञैः अवीवृधन् पवमान विऽधर्मणि अथ नः वस्यसः कृधि॥९॥ रयिं नः चित्रं अश्विनं इंदो विश्वऽआयुं आ भर अथ नः वस्यसः कृधि॥१०॥२३॥

॥५॥ संऽइंद्धः विश्वतः पतिः पवमानः वि राजति प्रीणन् वृषा कनिक्रदत्॥१॥ तनूऽनपात् पवमानः शृंगे शिशानः अर्षति

ति। अंतरिक्षेण रारजत्॥२॥ ईळेन्यः पवमानो रयिर्वि राजति द्युमान्। मधोर्धारांभिरोजसा॥३॥ बर्हिः प्राचीनमोजसा पवमानः स्तृणन्हरिः। देवेषु देव ईयते॥४॥ उदातैर्जिहते बृहद्धारो देवीर्हिरण्ययीः। पवमानेन सुष्टुताः॥५॥२४॥ सुशिल्पे बृहती मही पवमानो वृषण्यति। नक्तोषासा न दर्शते॥६॥ उभा देवा नृचक्षसा होतारा दैव्या हुवे। पवमान इंद्रो वृषा॥७॥ भारती पवमानस्य सरस्वतीळा मही। इमं नो यज्ञमा गमन्तिस्रो देवीः सुपेशसः॥८॥ त्वष्टारमग्रजां गोपां पुरोयावानमा हुवे। इंदुरिंद्रो वृषा हरिः पवमानः प्रजापतिः॥९॥ वनस्पतिं पवमान मध्वा समंग्धि धारया। सहस्रवल्शं हरितं भ्राजमानं हिरण्ययं॥१०॥ विश्वे देवाः स्वाहाकृतिं पवमानस्या गत। वायुर्बृहस्पतिः सूर्योऽग्निरिंद्रः सजोषसः॥११॥२५॥

॥ ६ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥६॥ मंद्रया सोम धारया वृषा पवस्व देवयुः। अव्यो वारे-ष्वस्मयुः॥१॥ अभि त्यं मद्यं मदमिंदविंद्र इति क्षर। अभि वाजिनो अर्वतः॥२॥ अभि त्यं पूर्व्यं मदं सुवानो अर्ष पवित्र आ। अभि वाजमुत श्रवः॥३॥ अनु द्रप्सास इंदव आपो न प्रवतासरन्। पुनाना इंद्रमाशत॥४॥ यमत्यमिव वाजिनं मृजंति योषणो दश। वने क्रीळंतमत्यविं॥५॥२६॥ तं गोभिर्वृषणं रसं मदाय देववीतये। सुतं भराय सं सृज॥६॥ देवो देवाय धारयेंद्राय पवते सुतः। पयो यदस्य पीपयत्॥७॥ आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः। प्रत्नं नि पाति काव्यं॥८॥ एवा पुनान इंदुयुर्मदं मदिष्ठ वीतये। गुहा चिद्दधिषे गिरः॥९॥७॥

ति अंतरिक्षेण रारजत् ॥२॥ इळेन्यः पवमानः रयिः वि राजति द्युऽमान् मधोः धारांभिः ओजसा ॥३॥ बर्हिः प्राचीनं ओजसा पवमानः स्तृणन् हरिः देवेषु देवः ईयते ॥४॥ उत् अतिः जिहते बृहत् द्वारः देवीः हिरण्ययीः पवमानेन सुऽस्तुताः ॥५॥ ॥२४॥ सुऽशिल्पे॰ बृहती मही पवमानः वृणीयति नक्तोषसा न दर्शते ॥६॥ उभा देवा नृऽचक्षसा होतारा दैव्या हुवे पवमानः इंद्रः वृषा ॥७॥ भारती पवमानस्य सरस्वती इळा मही इमं नः यज्ञं आ गमन् तिस्रः देवीः सुऽपेशसः ॥८॥ त्वष्टारं अग्रऽजां गोपां पुरःऽयावानं आ हुवे इंदुः इंद्रः वृषा हरिः पवमानः प्रजाऽपतिः ॥९॥ वनस्पतिं पवमान मध्वा सं अंग्धि धारया सहस्रऽवल्शं हरितं भ्राजमानं हिरण्ययं ॥१०॥ विश्वे देवाः स्वाहाऽकृतिं पवमानस्य आ गत वायुः बृहस्पतिः सूर्यः अग्निः इंद्रः सुऽजोषसः ॥११॥२५॥

॥६॥ मंद्रया सोम धारया वृषा पवस्व देवऽयुः अव्यः वारेषु अस्मऽयुः ॥१॥ अभि त्यं मद्यं मदं इंदो इंद्रः इति क्षर अभि वाजिनः अर्वंतः ॥२॥ अभि त्यं पूर्व्यं मदं सुवानः अर्ष पवित्रे आ अभि वाजं उत श्रवः ॥३॥ अनु द्रप्सासः इंदवः आपः न प्रऽवतां असरन् पुनानाः इंद्रं आशत ॥४॥ यं अत्यंऽइव वाजिनं मृजंति योषणः दश वनें क्रीळंतं अतिऽअविं ॥५॥२६॥ तं गोभिः वृषणं रसं मदाय देवऽवीतये सुतं भराय सं सृज ॥६॥ देवः देवाय धारया इंद्राय पवते सुतः पयः यत् अस्य पीपयत् ॥७॥ आत्मा यज्ञस्य रंह्या सुऽस्वानः पवते सुतः प्रत्नं नि पाति काव्यं ॥८॥ एव पुनानः इंदुऽयुः मदं मदिष्ट वीतये गृणानः चित् दधिषे गिरः ॥९॥२७॥

॥ ७ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ ७ ॥ असृग्रमिंदवः पथा धर्मन्नृतस्य सुश्रियः । विदाना अस्य योजनं ॥ १ ॥ प्र धारा मध्वो अग्रियो महीरपो वि गाहते । हविर्हविष्षु वन्द्यः ॥ २ ॥ प्र सुजो वाचो अग्रियो वृषावं चक्रदद्वने । सद्माभि सत्यो अध्वरः ॥ ३ ॥ परि यत्काव्या कविर्नृम्णा वसानो अर्षति । स्वर्वाजी सिषासति ॥ ४ ॥ पवमानो अभि स्पृधो विशो राजेव सीदति । यदीमृण्वंति वेधसः ॥ ५ ॥ २८ ॥ अव्यो वारे परि प्रियो हरिर्वनेषु सीदति । रेभो वनुष्यते मती ॥ ६ ॥ स वायुमिंद्रमश्विना साकं मदेन गच्छति । रणा यो अस्य धर्मभिः ॥ ७ ॥ आ मित्रावरुणा भगं मध्वः पवंत ऊर्मयः । विदाना अस्य शक्मभिः ॥ ८ ॥ अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये । श्रवो वसूनि सं जितं ॥ ९ ॥ २९ ॥

॥ ८ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ ८ ॥ एते सोमा अभि प्रियमिंद्रस्य कामंमक्षरन् । वर्धंतो अस्य वीर्यं ॥ १ ॥ पुनानासश्चमूषदो गच्छंतो वायुमश्विना । ते नो धांतु सुवीर्यं ॥ २ ॥ इंद्रस्य सोम राधसे पुनानो हार्दि चोदय । ऋतस्य योनिमासदं ॥ ३ ॥ मृजंति त्वा दश क्षिपो हिन्वंति सप्त धीतयः । अनु विप्रा अमादिषुः ॥ ४ ॥ देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः । सं गोभिर्वासयामसि ॥ ५ ॥ ३० ॥ पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः । परि गव्यान्यव्यत ॥ ६ ॥ मघोन आ पवस्व नो जहि विश्वा अप द्विषः । इंदो सखायमा विश ॥ ७ ॥ वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि । सहो नः सोम पृत्सु धाः ॥ ८ ॥ नृचक्षसं त्वा वयमिंद्रपीतं स्वर्विदं । भक्षीमहि प्रजामिषं ॥ ९ ॥ ३१ ॥

॥७॥ असृग्रं इंदवः पथा धर्मन् ऋतस्य सुऽश्रियः विदानाः अस्य योजनं ॥१॥ प्र धारा मध्वः अग्रियः महीः अपः वि गाहते हविः हविष्षु वंद्यः ॥२॥ प्र युजः वाचः अग्रियः वृषा अवं चक्रदत् वने सग्मं अभि सत्यः अध्वरः ॥३॥ परि यत् काव्या कविः नृम्णा वसानः अर्षति स्वः वाजी सिसासति ॥४॥ पवमानः अभि स्पृधः विशः राजाऽइव सीदति यत् ईं ऋण्वंति वेधसः ॥५॥ २८॥ अव्यः वारे परि प्रियः हरिः वनेषु सीदति रेभः वनुष्यते मती ॥६॥ सः वायुं इंद्रं अश्विना साकं मदेन गच्छति रणा यः अस्य धर्मऽभिः ॥७॥ आ मित्रावरुणा भगं मध्वः पवंते ऊर्मयः विदानाः अस्य शक्मऽभिः ॥८॥ अस्मभ्यं रोदसी रयिं मध्वः वाजस्य सातये अवः वसूनि सं जितं ॥९॥ २९॥

॥८॥ एते सोमाः अभि प्रियं इंद्रस्य कामं अक्षरन् वर्धंतः अस्य वीर्यं ॥१॥ पुनानासः चमूऽसदः गच्छंतः वायुं अश्विना ते नः धांतु सुऽवीर्यं ॥२॥ इंद्रस्य सोम राधसे पुनानः हार्दि चोदय ऋतस्य योनिं आऽसदं ॥३॥ मृजंति त्वा दश क्षिपः हिन्वंति सप्त धीतयः अनुं विप्राः अमादिषुः ॥४॥ देवेभ्यः त्वा मदाय कं सृजानं अति मेष्यः सं गोभिः वासयामसि ॥५॥ ३०॥ पुनानः कलशेषु आ वस्त्राणि अरुषः हरिः परि गव्यानि अव्यत ॥६॥ मघोनः आ पवस्व नः जहि विश्वाः अप द्विषः इंदो सखायं आ विश ॥७॥ वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्याः अधि सहः नः सोम पृत्ऽसु धाः ॥८॥ नृऽचक्षसं त्वा वयं इंद्रऽपीतं स्वःऽविदं भक्षीमहि प्रऽजां इषं ॥९॥ ३१॥

॥ ९ ॥ १–९ ऋषिः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ ९ ॥ परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः। सुवानो याति कविक्रतुः ॥१॥ प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे। वीत्यर्षं चनिष्ठया ॥२॥ स सूनुर्मातरा शुचिर्जातो जाते अरोचयत्। महान्मही ऋतावृधा ॥३॥ स सप्त धीतिभिर्हितो नद्यो अजिन्वदद्रुहः। या एकमक्षिं वावृधुः ॥४॥ ता अभि संतमस्तृतं महे युवानमा दधुः। इंदुमिंद्र तवं व्रते ॥५॥ ३२॥ अभि वह्निरमर्त्यः सप्त पश्यति वावहिः। क्रिविर्दूवीरतर्पयत् ॥६॥ अवा कल्पेषु नः पुमस्तमांसि सोम योध्या। तानि पुनान जंघनः ॥७॥ नू नव्यसे नवीयसे सूक्ताय साधया पथः। प्रत्नवद्रोचया रुचः ॥८॥ पवमान महि श्रवो गामश्वं रासि वीरवत्। सना मेधां सना स्वः ॥९॥ ३३॥

॥ १० ॥ १–९ ऋषिः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ १० ॥ प्र स्वानासो रथा इवार्वंतो न श्रवस्यवः। सोमासो राये अक्रमुः ॥१॥ हिन्वानासो रथा इव दधन्विरे गभस्त्योः। भरासः कारिणामिव ॥२॥ राजानो न प्रशस्तिभिः सोमासो गोभिरंजते। यज्ञो न सप्त धातृभिः ॥३॥ परि सुवानास इंदवो मदाय बर्हणा गिरा। सुता अर्षंति धारया ॥४॥ आ यानासो विवस्वतो जनंत उषसो भगं। सूरा अण्वं वि तन्वते ॥५॥ ३४॥ अप द्वारा मतीनां प्रत्ना ऋण्वंति कारवः। वृणो हरस आयवः ॥६॥ समीचीनास आसते होतारः सप्तजामयः। पदमेकस्य पिप्रतः ॥७॥ नाभा नाभिं न आ ददे चक्षुश्चित्सूर्ये सचा। कवेरपत्यमा दुहे ॥८॥ अभि प्रिया दिवस्पदमध्वर्युभिर्गुहा हितं। सूरः पश्यति चक्षसा ॥९॥ ३५॥

॥९॥ परि प्रिया दिवः कविः वयांसि नप्त्योः हितः सुवानः याति कविऽक्रतुः॥१॥ प्रऽप्र क्षयाय पन्यसे जनाय जुष्टः अदुह्यः वीती अर्ष चनिष्ठया॥२॥ सः सूनुः मातरा शुचिः जातः जाते अरोचयत् महान् मही चृतऽवृधा॥३॥ सः सप्त धीतिऽभिः हितः नद्यः अजिन्वत् अद्रुहः याः एकं अक्षिं वावृधुः॥४॥ ताः अभि संतं अस्तृतं महे युवानं आ दधुः इंदुं इंद्राय नवे घते॥५॥३२॥ अभि वह्निः अमर्त्यः सप्त पश्यति वावहिः क्रिविः देवीः अतर्पयत्॥६॥ अव कल्पेषु नः पुमः तमांसि सोम योध्या तानि पुनान जंघनः॥७॥ नु नव्यसे नवीयसे सूऽउक्थाय साधय पथः प्रत्नऽवत् रोचय रुचः॥८॥ पवमान महि श्रवः गां अश्वं रासि वीरऽवत् सनं मेधां सनं स्वः०॥९॥३३॥

॥१०॥ प्र स्वानासः रथाःऽइव अर्वंतः न श्रवस्यवः सोमासः राये अक्रमुः॥१॥ हिन्वानासः रथाःऽइव दधन्विरे गभस्त्योः भरासः कारिणांऽइव॥२॥ राजानः न प्रशस्तिऽभिः सोमासः गोभिः अंजते यज्ञः न सप्त धातृऽभिः॥३॥ परि सुवानासः इंदवः मदाय बर्हणा गिरा सुताः अर्षंति धारया॥४॥ आ पवानासः विवस्वतः जनंतः उषसः भगं सूराः अण्वं वि तन्वते॥५॥३४॥ अप द्वारा मतीनां प्रत्नाः ऋण्वंति कारवः वृष्णः हरसे आयवः॥६॥ सं ऽईचीनासः आसते होतारः सप्तऽजामयः पदं एकस्य पिप्रतः॥७॥ नाभा नाभिं नः आ ददे चक्षुः चित् सूर्ये सचा कवेः अपत्यं आ दुहे॥८॥ अभि प्रिया दिवः पदं अध्वर्युऽभिः गुहा हितं सूरः पश्यति चक्षसा॥९॥३५॥

॥ ११ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ ११ ॥ उपास्मै गायता नरः पवमानायेंदवे । अभि देवाँ इयक्षते ॥ १ ॥ अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः । देवं देवाय देवयु ॥ २ ॥ स नः पवस्व शं गवे शं जनाय शमर्वते । शं राजन्नोषधीभ्यः ॥ ३ ॥ बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे । सोमाय गाथमर्चत ॥ ४ ॥ हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन । मधावा धावता मधु ॥ ५ ॥ ३६ ॥ नमसेदुप सीदत दभ्नेदभि श्रीणीतन । इंदुमिंद्रे दधातन ॥ ६ ॥ अभिवहा विचर्षणिः पवस्व सोम शं गवे । देवेभ्यो अनुकामकृत् ॥ ७ ॥ इंद्राय सोम पातवे मदाय परि षिच्यसे । मनश्चिन्मनसस्पतिः ॥ ८ ॥ पवमान सुवीर्यं रयिं सोम रिरीहि नः । इंदविंद्रेण नो युजा ॥ ९ ॥ ३७ ॥

॥ १२ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ १२ ॥ सोमा असृग्रमिंदवः सुता ऋतस्य सादने । इंद्राय मधुमत्तमाः ॥ १ ॥ अभि विप्रा अनूषत गावो वत्सं न मातरः । इंद्रं सोमस्य पीतये ॥ २ ॥ मदच्युत्क्षेति सादने सिंधोरूर्मा विपश्चित् । सोमो गौरी अधि श्रितः ॥ ३ ॥ दिवो नाभा विचक्षणोऽव्यो वारे महीयते । सोमो यः सुक्रतुः कविः ॥ ४ ॥ यः सोमः कलशेष्वाँ अंतः पवित्र आहितः । तमिंदुः परि षस्वजे ॥ ५ ॥ ३८ ॥ प्र वाचमिंदुरिष्यति समुद्रस्याधि विष्टपि । जिन्वन्कोशं मधुश्चुतं ॥ ६ ॥ नित्यस्तोत्रो वनस्पतिर्धीनामंतः सचदुर्यः । हिन्वानो मानुषा युगा ॥ ७ ॥ अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति । विप्रस्य धारया कविः ॥ ८ ॥ आ पवमान धारय रयिं सहस्रवर्चसं । अस्मे इंदो स्वाभुवं ॥ ९ ॥ ३९ ॥ ७ ॥

॥११॥ उप॑ अस्मै॒ गाय॑त॒ नरः॑ पव॑मानाय॒ इंद॑वे॒ अभि॑ दे॒वान्॑ इ॒यक्ष॑ते॥१॥ अ॒भि ते॒ मधु॑ना॒ पयः॑ अथर्वाणः॒ अशि॑श्रयुः दे॒वं दे॒-वाय॑देव॒ऽयु॥२॥ सः नः॒ प॒व॒स्व॒ शं॒ग॒वे॒ शं॒ज॒ना॒य॒ शं अ॒र्व॒ते॒ शं रा॒-ज॒न्॒ ओष॑धीभ्यः॥३॥ व॒भ्र॒वे॒ नु स्वऽत॑वसे॒ अरु॑णाय॒ दि॒वि॒ऽस्पृशे॑ सोमा॑य॒ गाथं॑ अ॒र्च॒त॒॥४॥ हस्ते॑ऽच्युतेभिः॒ अद्रि॑ऽभिः सु॒तं सोमं॑ पुनीतन॒ मधौ॑ आ धा॒व॒त॒ मधु॑॥५॥३६॥ नम॑सा इत्॒ उप॑ सीदत॒ द॒क्षा इत्॒ अ॒भि श्री॒णी॒त॒न॒ इंदुं॒ इंद्रे॑ दधातन॒॥६॥ अ॒मि॒च्ऽहा वि॒-ऽचर्ष॑णिः पव॑स्व॒ सोम॒ शं॒ग॒वे॒ दे॒वेभ्यः॑ अनु॑कामऽकृत्॥७॥ इंद्रा॑य सो॒म॒ पा॒त॒वे॒ मदा॑य॒ परि॑ सि॒च्य॒से॒ म॒नः॒ऽचित्॒ मन॑सः॒ पति॑॥८॥ पव॑मान सु॒ऽवी॒र्यं॑ र॒यिं सो॒म॒ रि॒री॒हि॒ नः॒ इंदो॑॑ इंद्रे॑ण नः॒ युजा॑॥९॥३७॥

॥१२॥ सोमा॑ः असृ॒ग्रं॑ इंद॑वः सु॒ताः ऋ॒तस्य॑ सद॑ने इंद्रा॑य मधु॒-मत्॒ऽत॑माः॥१॥ अ॒भि विप्रा॑ः अ॒नू॒ष॒त॒ गाव॑ः व॒त्सं न मा॒तरः॑ इंद्रं॒ सोम॑स्य पी॒तये॑॥२॥ मद॒ऽच्युत्॒ क्षे॑ति॒ सद॑ने॒ सिंधो॑ः ऊ॒र्मा वि॒पः॒-ऽचित्॒ सोमः॑ गौ॒री॑॑ अधि॑ श्रि॒तः॥३॥ दि॒वः नाभा॑ वि॒ऽचक्ष॑णः अ॒व्यः वारे॑ म॒ही॒य॒ते॒ सोमः॑ यः सु॒ऽऋ॑तुः क॒विः॥४॥ यः सोमः॑ क॒-लशे॑षु॒ आ अ॒न्तः॑॑ प॒वि॒त्रे॑ आऽहि॑तः तं इंदुः॑ परि॑ स॒स्व॒जे॒॥५॥३८॥ प्र वा॒चं इंदुः॑ इ॒ष्य॒ति॒ समु॒द्रस्य॑ अधि॑ वि॒ष्टपि॑ जिन्वन्॒ कोशं॑ मधु॒-ऽश्चुतं॑॥६॥ नित्यऽस्तोत्रः॑ वन॒स्प॒तिः॑ धी॒नां अ॒न्तः॑॑ स॒बः॒ऽदुघः॑ हि॒न्वा॒नः मानु॑षा॒ युगा॑॥७॥ अ॒भि प्रि॒या दि॒वः प॒दा सोमः॑ हि॒-न्वा॒नः अ॒र्ष॒ति॒ विप्र॑स्य धार॑या॒ क॒विः॥८॥ आ प॒व॒मा॒न॒ धा॒र॒य॒ र॒यिं स॒हस्र॑ऽवर्चसं अ॒स्मे॑॑ इंदो॑॑ सु॒ऽअ॒भ्व॑॑॥९॥३९॥७॥

॥ १३ ॥ १–९ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ १३ ॥ सोमः पुनानो अर्षति सहस्रधारो अत्यविः। वायोरिंद्रस्य निष्कृतं ॥ १ ॥ पवमानमवस्यवो विप्रमभि प्र गायत। सुष्वाणं देववीतये ॥ २ ॥ पवते वाजसातये सोमः सहस्रपाजसः। गृणाना देववीतये ॥ ३ ॥ उत नो वाजसातये पवस्व बृहतीरिषः। द्युमदिंदो सुवीर्यं ॥ ४ ॥ ते नः सहस्रिणं रयिं पवंतामा सुवीर्यं। सुवाना देवास इंदवः ॥ ५ ॥ १ ॥ अत्यो हियाना न हेतृभिरसृग्रं वाजसातये। वि वारमव्यमाशवः ॥ ६ ॥ वाश्रा अर्षंतींदवोऽभि वत्सं न धेनवः। दधन्विरे गभस्त्योः ॥ ७ ॥ जुष्ट इंद्राय मत्सरः पवमान कनिक्रदत्। विश्वा अप द्विषो जहि ॥ ८ ॥ अपघ्नंतो अराव्णः पवमानाः स्वर्दृशः। योनावृतस्य सीदत ॥ ९ ॥ २ ॥

॥ १४ ॥ १–८ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ १४ ॥ परि प्रासिष्यदत्कविः सिंधोरूर्मावधि श्रितः। कारं बिभ्रत्पुरुस्पृहं ॥ १ ॥ गिरा यदी सबंधवः पंच व्राता अपस्यवः। परिष्कृण्वंति धर्णसिं ॥ २ ॥ आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत। यदी गोभिर्वसायते ॥ ३ ॥ निरिणानो वि धावति जहच्छर्याणि तान्वा। अचा सं जिग्मते युजा ॥ ४ ॥ नप्तीभिर्यो विवस्वतः शुभ्रो न मामृजे युवा। गाः कृण्वानो न निर्णिजं ॥ ५ ॥ ३ ॥ अतिं श्रितो तिरश्चतो गव्या जिगात्यण्व्या। वसुर्मर्यांत्ते ये विदे ॥ ६ ॥ अभि क्षिपः समग्मत मर्जयंतीरिषस्पतिं। पृष्ठा गृभ्णत वाजिनं ॥ ७ ॥ परि दिव्यानि मर्मृशद्विश्वानि सोम पार्थिवा। वसूनि याह्यस्मयुः ॥ ८ ॥ ४ ॥

॥ १५ ॥ १–८ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥ १५ ॥ एष धिया यात्यण्व्या शूरो रथेभिराशुभिः।

॥१३॥ सोमः पुनानः अर्षति सहस्रऽधारः अतिऽअविः वायोः इंद्रस्य निःऽकृतं॥१॥ पवमानं अवस्यवः विप्रं अभि प्र गायत सुस्वानं देवऽवीतये॥२॥ पवंते वाजंऽसातये सोमाः सहस्रऽपाजसः गृणानाः देवऽवीतये॥३॥ उत नः वाजंऽसातये पवस्व बृहतीः इषः द्युऽमत् इंदो सुऽवीर्यं॥४॥ ते नः सहस्रिणं रयिं पवंतां आ सुऽवीर्यं सुवानाः देवासः इंदवः॥५॥१॥ अत्याः हियानाः न हेतृऽभिः असृग्रं वाजंऽसातये वि वारं अव्यं आशवः॥६॥ वाश्राः अर्षंति इंदवः अभि वत्सं न धेनवः दधन्विरे गभस्त्योः॥७॥ जुष्टः इंद्राय मत्सरः पवमान कनिक्रदत् विश्वाः अप द्विषः जहि॥८॥ अपऽघ्नंतः अराव्णः पवमानाः स्वःऽदृशः योनौ ऋतस्य सीदत॥९॥२॥

॥१४॥ परि प्र असिस्यदत् कविः सिंधोः ऊर्मौ अधि ष्नितः कारं बिभ्रत् पुरुऽस्पृहं॥१॥ गिरा यदि सऽबंधवः पंच व्राताः अपस्यवः परिऽकृण्वंति धर्णसिं॥२॥ आत् अस्य शुष्मिणः रसे विश्वे देवाः अमत्सत यदि गोभिः वसायते॥३॥ निऽरिणानः वि धावति जहत् शर्याणि तान्वा अचं सं जिघ्नते युजा॥४॥ नप्तीभिः यः विवस्वतः शुभ्रः न मामृजे युवा गाः कृण्वानः न निःऽनिजं॥५॥३॥ अतिं ष्नितीं तिरश्चतां गव्या जिगाति अण्यां वसुं इयर्ति यं विदे॥६॥ अभि क्षिपः सं अग्मत मर्जयंतीः इषः पतिं पृष्ठा गृभ्णत वाजिनः॥७॥ परि दिव्यानि मर्मृशत् विश्वानि सोम पार्थिवा वसूनि याहि अस्मऽयुः॥८॥४॥

॥१५॥ एषः धिया याति अण्यां शूरः रथेभिः आशुऽभिः

गच्छन्निंद्रस्य निष्कृतं ॥१॥ एष पुरू धियायते बृहते देवतातये। यदासृतासु आसते ॥२॥ एष हितो वि नीयतेऽंतः शुभ्रावता पथा। यदीं तुंजंति भूर्णयः ॥३॥ एष शृंगाणि दोधुवच्छिशीते यूथ्यो३ वृषा। नृम्णा दधान ओजसा ॥४॥ एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः। पतिः सिंधूनां भवन् ॥५॥ एष वसूनि पिब्दना परुषा ययिवाँ अति। अव शादेषु गच्छति ॥६॥ एतं मृजंति मर्ज्यमुप द्रोणेष्वायवः। प्रचक्राणं महीरिषः ॥७॥ एतमु त्यं दश क्षिपो मृजंति सप्त धीतयः। स्वायुधं मदिंतमं ॥८॥४॥

॥ १६ ॥ १–८ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१६॥ प्र तें सोतार ओण्यो३ रसं मदाय घृष्वये। सर्गो न तिक्तये-तवे ॥१॥ क्रत्वा दक्षस्य रथ्यमपो वसानमंधसा। गोषामण्वेषु सश्चिम ॥२॥ अनंशमप्सु दुष्टरं सोमं पवित्र आ सृज। पुनीहींद्राय पातवे ॥३॥ प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति। क्रत्वा सधस्थमासदत् ॥४॥ प्र त्वा नमोभिरिंदव इंदु सोमा असृक्षत। महे भराय कारिणः ॥५॥ पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः। शूरो न गोषु तिष्ठति ॥६॥ दिवो न सानु पिप्युषी धारा सुतस्य वेधसः। वृथा पवित्रे अर्षति ॥७॥ त्वं सोम विपश्चितं तनां पुनान आयुषु। अव्यो वारं वि धावसि ॥८॥६॥

॥ १७ ॥ १–८ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१७॥ प्र निम्नेनेव सिंधवो घ्नंतो वृत्राणि भूर्णयः। सोमा असृग्रमाशवः ॥१॥ अभि सुवानास इंदवो वृष्टयः पृथिवीमिव। इंद्रं सोमासो अक्षरन् ॥२॥ अत्यूर्मिर्मत्सरो मदः सोमः प-

गच्छन् इंद्रस्य निःऽकृतं॥१॥ एषः पुरु धियाऽयते बृहते देवऽजा-तये यत्र अमृतासः आसते॥२॥ एषः हितः वि नीयते अंतः शु-भ्रऽवता पथा यदि तुंजंति भूर्णयः॥३॥ एषः शृंगाणि दोधुवत् शिशीते यूथ्यः वृषा नृम्णा दधानः ओजसा॥४॥ एषः रुक्मिऽभिः ईयते वाजी शुभ्रेभिः अंशुऽभिः पतिः सिंधूनां भवन्॥५॥ एषः वसूनि पिब्दना परुषा ययिऽवान् असिं अवं शर्दःषु गच्छति ॥६॥ एतं मृजंति मर्ज्यं उपं द्रोणेषु आयवः प्रऽचक्राणं महीः इषः ॥७॥ एतं ऊं त्यं दश क्षिपः मृजंति सप्त धीतयः सुऽआयुधं मदिन्-ऽतमं॥८॥५॥

॥१६॥ प्रते सोतारः ओण्योः रसं मदाय घृष्वये सर्गः न तक्ति एतशः॥१॥ क्रत्वा दक्षस्य रथ्यं अपः वसानं अंधसा गोऽसां अ-र्वेषु सश्चिम॥२॥ अनंम्रं अप्ऽसु दुस्तरं सोमं पवित्रे आ सृज पु-नीहि इंद्राय पातवे॥३॥ प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति क्रत्वा सधऽस्थं आ असदत्॥४॥ प्र त्वा नमःऽभिः इंदवः इंद्र सोमाः असृक्षत महे भराय कारिणः॥५॥ पुनानः रूपे अव्ययें विश्वाः अर्षन् अभि श्रियः शूरः न गोषु तिष्ठति॥६॥ दिवः न सानुं पिप्युषीं धारा सुतस्य वेधसः वृथा पवित्रे अर्षति॥७॥ त्वं सोम विपःऽचितं तना पुनानः आयुषु अव्यः वारं वि धावसि ॥८॥६॥

॥१७॥ प्रं निम्नेनऽइव सिंधवः मदंतः वृत्राणि भूर्णयः सोमाः असृग्रं आशवः॥१॥ अभि सुवानासः इंदवः वृष्टयः पृथिवींऽइव इंद्रं सोमासः अक्षरन्॥२॥ अतिऽऊर्मिः मत्सरः मदः सोमः प-

विचे अर्षति। विघ्नन्रक्षाँसि देवयुः ॥३॥ आ कलशेषु धावति पवित्रे परि षिच्यते। उक्थैर्यज्ञेषु वर्धते ॥४॥ अति ह्री सोम रोचना रोहन्भाजसे दिवं। इष्णन्त्सूर्ये न चोदयः ॥५॥ अभि विप्रा अनूषत मूर्धन्यज्ञस्य कारवः। दधानास्त्वक्षसि प्रियं ॥६॥ तमु त्वा वाजिनं नरो धीभिर्विप्रा अवस्यवः। मृजन्ति देवतातये ॥७॥ मधोर्धारा-मनु क्षर तीव्रः सधस्थमासदः। चारुर्ऋतायं पीतये ॥८॥७॥

॥ १८ ॥ १–७ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१८॥ परि सुवानो गिरिष्टाः पवित्रे सोमो अक्षाः। मदेषु सर्वधा असि ॥१॥ त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः। मदेषु सर्वधा असि ॥२॥ तव विश्वे सजोषसो देवासः पीतिमाशत। मदेषु सर्वधा असि ॥३॥ आ यो विश्वानि वार्या वसूनि हस्तयोर्दधे। मदेषु सर्वधा असि ॥४॥ य इमे रोदसी मही सं मातरेव दोहते। मदेषु सर्वधा असि ॥५॥ परि यो रोदसी उभे सद्यो वाजेभिरर्षति। मदेषु सर्वधा असि ॥६॥ स शुष्मी कलशेष्वा पुनानो अचिक्रदत्। मदेषु सर्वधा असि ॥७॥८॥

॥ १९ ॥ १–७ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥१९॥ यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु। तन्नः पुनान आ भर ॥१॥ युवं हि स्थः स्वर्पती इन्द्रश्च सोम गोपती। ईशाना पिप्यतं धियः ॥२॥ वृषा पुनान आयुषु स्तनयन्नधि बर्हिषि। हरिः सन्योनिमासदत् ॥३॥ अवावशन्त धीतयो वृषभस्याधि रेतसि। सूनोर्वत्सस्य मातरः ॥४॥ कुविद्वृषण्यन्तीभ्यः पुनानो गर्भमादधत्। याः शुक्रं दुदुहे पयः ॥५॥ उप शिक्षापतस्थुषो भियसमा धेहि शचीपते। पवमान विदा रयिं ॥६॥

विचे अर्षति विऽघ्नन् रक्षांसि देवऽयुः॥३॥ आ कलशेषु धावति पविचे परि सिच्यते उक्थैः यज्ञेषु वर्धते॥४॥ अति ची सोम रोचना रोहन् न भ्राजसे दिवं इष्णन् सूर्यं न चोदयः॥५॥ अभि विप्राः अनूषत मूर्धन् यज्ञस्य कारवः दधानाः चक्षसि प्रियं॥६॥ तं ऊं त्वा वाजिनं नरः धीभिः विप्राः अवस्यवः मृजंति देवऽतातये॥७॥ मधोः धारां अनु क्षर तीव्रः सधऽस्थे आ असदः चारुः ऋतायं पीतये॥८॥७॥

॥ १८ ॥ परि सुवानः गिरिऽस्याः पविचे सोमः अक्षाः मदेषु सर्वऽधाः असि॥१॥ त्वं विप्रः त्वं कविः मधु प्र जातं अंधसः मदेषु सर्वऽधाः असि॥२॥ तवं विश्वे सऽजोषसः देवासः पीतिं आशत मदेषु सर्वऽधाः असि॥३॥ आ यः विश्वानि वार्या वसूनि हस्तयोः दधे मदेषु सर्वऽधाः असि॥४॥ यः इमे रोदसी महीं सं मातराऽइव दोहते मदेषु सर्वऽधाः असि॥५॥ परि यः रोदसी उभे सद्यः वाजेभिः अर्षति मदेषु सर्वऽधाः असि॥६॥ सः भुष्मी कलशेषु आ पुनानः अचिक्रदत् मदेषु सर्वऽधाः असि॥७॥८॥

॥ १९ ॥ यत् सोम चित्रं उक्थ्यं दिव्यं पार्थिवं वसु तत् नः पुनानः आ भर॥१॥ युवं हि स्थः स्वःऽपती इंद्रः च सोम गोऽपती ईशाना पिप्यतं धियः॥२॥ वृषा पुनानः आयुषु स्तनयन् अधि बर्हिषि हरिः सन् योनिं आ असदत्॥३॥ अवावशंत धीतयः वृषभस्य अधि रेतसि सूनोः वत्सस्य मातरः॥४॥ कुवित् वृषण्यंतीभ्यः पुनानः गर्भं आऽदधत् याः शुक्रं दुहते पयः॥५॥ उप शिक्ष अप ऽतस्थुषः भियसं आ धेहि शतऽपुष पवमान विदाः रयिं॥६॥

नि शचोः सोम वृष्ण्यं नि शुष्मं नि वयस्तिर। दूरे वा सतो अंति वा ॥७॥९॥

॥ २० ॥ १–७ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥२०॥ प्र कविर्देववीतयेऽव्यो वारेभिरर्षति। साह्वान्विश्वा अभि स्पृधः ॥१॥ स हि ष्मा जरितृभ्य आ वाजं गोमंतमिन्वति। पवमानः सहस्रिणं ॥२॥ परि विश्वानि चेतसा मृशसे पवसे मती। स नः सोम श्रवो विदः ॥३॥ अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिं। इषं स्तोतृभ्य आ भर ॥४॥ त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ। पुनानो वह्ने अद्भुत ॥५॥ स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः। सोमश्चमूषु सीदति ॥६॥ क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि। दधत्स्तोत्रे सुवीर्यं ॥७॥१०॥

॥ २१ ॥ १–७ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥२१॥ एते धावंतीदवः सोमा इंद्राय घृष्वयः। मत्सरासस्तुविर्दवः ॥१॥ प्रवृणंतो अभियुजः सुष्वये वरिवोविदः। स्वर्स्तोत्रे वयस्कृतः ॥२॥ वृथा क्रीळंत इंदवः सधस्थमभ्येकमित्। सिंधोरूर्मा व्यक्षरन् ॥३॥ एते विश्वानि वार्या पवमानास आ शत। हिता न सप्तयो रथे ॥४॥ आस्मिन्मिञ्जंगमिंदवो दधात वेनमादिशे। यो अस्मभ्यमरावा ॥५॥ चमूषु रथ्यं नवं दधात केतमादिशे। शुक्राः पवध्वमंशवे ॥६॥ एत उ त्ये अवीवशन्काष्ठां वाजिनो अक्रत। सतः प्रासाविषुर्मतिं ॥७॥११॥

॥ २२ ॥ १–७ असितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥२२॥ एते सोमास आशवो रथा इव प्र वाजिनः। सर्गाः

नि शचोः सोम वृष्ण्यं नि ष्णुष्मं नि वयः तिर् दूरे वा सतः अंति वा ॥७॥९॥

॥२०॥ प्र कविः देवऽवीतये अव्यः वारेभिः अर्षति सद्मान् विश्वाः अभि स्पृधः॥१॥ सः हि स्म जरितृऽभ्यः आ वाजं गोऽमंतं इन्वति पवमानः सहस्रिणं॥२॥ परि विश्वानि चेतसा मृशसे पवसे मती सः नः सोम श्रवः विदः॥३॥ अभि अर्ष बृहत् यशः मघवत्ऽभ्यः ध्रुवं रयिं इषं स्तोतृऽभ्यः आ भर ॥४॥ त्वं राजाऽइव सुऽव्रतः गिरः सोम आ विवेशिथ पुनानः वहे अद्भुत ॥५॥ सः वह्निः अप्ऽसु दुस्तरः मृज्यमानः गभस्त्योः सोमः चमूषु सीदति ॥६॥ क्रीळुः मखः न मंहयुः पवित्रं सोम गच्छसि दधत् स्तोत्रे सुऽवीर्यं॥७॥१०॥

॥२१॥ एते धावंति इंदवः सोमाः इंद्राय घृष्वयः मत्सरासः स्वःऽविदः॥१॥ प्रऽवृणंतः अभिऽयुजः सुस्वये वरिवःऽविदः स्वयं स्तोत्रे वयःऽकृतः॥२॥ वृषा क्रीळंतः इंदवः मधऽस्थे अभि एकं इत् सिंधोः ऊर्मा वि अक्षरन्॥३॥ एते विश्वानि वार्या पवमानासः आशत हिताः न सप्तयः रथे ॥४॥ आ अस्मिन् पिशंगं इंदवः दधात वेनं आऽदिशे यः अस्मभ्यं अरावा॥५॥ ऋभुः न रथ्यं नवं दधात केतं आऽदिशे शुक्राः पवध्वं अर्णसा ॥६॥ एते ऊं त्ये अवीवशन् काष्ठां वाजिनः अक्रत सतः प्र असावि पुः मतिं॥७॥११॥

॥२२॥ एते सोमासः आशवः रथाःऽइव प्र वाजिनः सर्गाः

सृष्टा अहेषत ॥१॥ एते वातां इवोरवः पर्जन्यस्येव वृष्टयः। अग्नेरिव भ्रमा वृथा ॥२॥ एते पूता विपश्चितः सोमासो दध्याशिरः। विपा व्यानशुर्धियः ॥३॥ एते मृष्टा अमर्त्याः ससृवांसो न शंश्रमुः। इयक्षंतः पथो रजः ॥४॥ एते पृष्टासि रोदसोर्विप्रयंतो व्यानशुः। उतेदमुत्तमं रजः ॥५॥ ततुं तन्वानमुत्तममनुं प्रवत आशत। उतेदमुत्तमायैं ॥६॥ त्वं सोम पणिभ्य आ वसु गव्यानि धारयः। ततं ततुंमचिक्रदः ॥७॥१२॥

॥ २३ ॥ १–७ त्रसितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥२३॥ सोमा असृग्रमाशवो मधोर्मदस्य धारया। अभि विश्वानि काव्या ॥१॥ अनुं प्रत्नासं आयवः पदं नवीयो अक्रमुः। रुचे जनंत सूर्यं ॥२॥ आ पवमान नो भरार्यो अदाभ्यो गयं। कृधि प्रजावंतीरिषः ॥३॥ अभि सोमास आयवः पवंते मद्यं मदं। अभि कोशं मधुश्चुतं ॥४॥ सोमो अर्षति धर्णसिर्दधान इंद्रियं रसं। सुवीरो अभिशस्तिपाः ॥५॥ इंद्राय सोम पवसे देवेभ्यः सधमाद्यः। इंदो वाजं सिषाससि ॥६॥ अस्य पीत्वा मदानामिंद्रो वृत्राण्यप्रति। जघानं जघनच्च नु ॥७॥१३॥

॥ २४ ॥ १–७ त्रसितः काश्यपो देवलो वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥२४॥ प्र सोमासो अधन्विषुः पवमानास इंदवः। श्रीणाना अप्सु मृंजत ॥१॥ अभि गावो अधन्विषुरापो न प्रवता यतीः। पुनाना इंद्रमाशत ॥२॥ प्र पवमान धन्वसि सोमेंद्राय पातवे। नृभिर्यतो वि नीयसे ॥३॥ त्वं सोम नृमादनः पवस्व चर्षणीसहे। सस्निर्यो अनुमाद्यः ॥४॥ इंदो यदद्रिभिः सुतः पवित्रं परिधावसि। अरंमिंद्रस्य धाम्ने ॥५॥ पवस्व वृत्रहंतमः

सृष्टाः अहेषत॥१॥ एते वातोऽइव ऊरवः पर्जन्यस्यऽइव वृष्टयः अग्नेःऽइव भ्रमाः वृथा॥२॥ एते पूताः विपःऽचितः सोमासः दधिऽआशिरः विपा वि आनशुः धियः॥३॥ एते मृष्टाः अमर्त्याः ससृऽवांसः न शश्रमुः इयक्षंतः पयः रजः॥४॥ एते पृष्ठानि रोदसोः विऽप्रयंतः वि आनशुः उत इदं उत्ऽतमं रजः॥५॥ तंतुं तन्वानं उत्ऽतमं अनु प्रऽवतः आशत उत इदं उत्तमाय्यं॥६॥ त्वं सोम पणिऽभ्यः आ वसु गव्यानि धारयः ततं तंतुं अचिक्रदः॥७॥१२॥

॥२३॥ सोमाः असृग्रं आशवः मधोः मदस्य धारया अभि विश्वानि काव्या॥१॥ अनु प्रत्नासः आयवः पदं नवीयः अक्रमुः रुचे जनंत सूर्यं॥२॥ आ पवमान नः भर अर्यः अदाशुषः गयं कृधि प्रजाऽवतीः इषः॥३॥ अभि सोमासः आयवः पवंते मद्यं मदं अभि कोशं मधुऽश्चुतं॥४॥ सोमः अर्षति धर्णसिः दधानः इंद्रियं रसं सुऽवीरः अभिशस्तिऽपाः॥५॥ इंद्राय सोम पवसे देवेभ्यः सधऽमाद्यः इंदो वाजं सिसाससि॥६॥ अस्य पीत्वा मदानां इंद्रः वृत्राणि अप्रति जघानं जघनत् च नु॥७॥१३॥

॥२४॥ प्र सोमासः अधन्विषुः पवमानासः इंदवः श्रीणानाः अप्ऽसु मृंजत॥१॥ अभि गावः अधन्विषुः आपः न प्रऽवतां यतीः पुनानाः इंद्रं आशत॥२॥ प्र पवमान धन्वसि सोम इंद्राय पातवे नृऽभिः यतः वि नीयसे॥३॥ त्वं सोम नृऽमादनः पवस्व चर्षणिऽसहे सस्निः यः अनुऽमाद्यः॥४॥ इंदो यत् अद्रिऽभिः सुतः पवित्रे परिऽधावसि अरं इंद्रस्य धाम्ने॥५॥ पवस्व वृत्रहन्-

तमोक्थेभिरनुमाद्यः। शुचिः पावको अद्भुतः॥६॥ शुचिः पावक उच्यते सोमः सुतस्य मध्वः। देवावीरघशंसहा॥७॥१४॥१॥

॥ २५ ॥ १–६ दृढच्युत आगस्त्यः ॥ पवमानः सोमः ॥ गायत्री ॥

॥२५॥ पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः॥१॥ पवमान धिया हितोऽभि योनिं कनिक्रदत्। धर्मणा वायुमा विश॥२॥ सं देवैः शोभते वृषा कविर्योनावधि प्रियः। वृत्रहा देववीतमः॥३॥ विश्वा रूपाण्याविशन्पुनानो याति हर्यतः। यत्रामृतास आसते॥४॥ अरुषो जनयन्गिरः सोमः पवत आयुषक्। इंद्रं गच्छन्कविक्रतुः॥५॥ आ पवस्व मदिंतम पवित्रं धारया कवे। अर्कस्य योनिमासदं॥६॥१५॥

॥ २६ ॥ १–६ उशनाहो दाढीच्युतः ॥ पवमानः सोमः ॥ गायत्री ॥

॥२६॥ तमंमृक्षंत वाजिनंमुपस्थे अदितेरधि। विप्रासो अण्व्या धिया॥१॥ तं गावो अभ्यनूषत सहस्रधारमक्षितं। इंदुं धर्तारमा दिवः॥२॥ तं वेधां मेधयाह्यन्पवमानमधि द्यवि। धर्णसिं भूरिधायसं॥३॥ तमह्यन्भुरिजोर्धिया संवसानं विवस्वतः। पतिं वाचो अदाभ्यं॥४॥ तं सानावधि जामयो हरिं हिन्वंत्यद्रिभिः। हर्यतं भूरिचक्षसं॥५॥ तं त्वा हिन्वंति वेधसः पवमान गिरावृधं। इंदविंद्राय मत्सरं॥६॥१६॥

॥ २७ ॥ १–६ नृमेधः ॥ पवमानः सोमः ॥ गायत्री ॥

॥२७॥ एष कविरभिष्टुतः पवित्रे अधि तोशते। पुनानो घ्नन्नप स्रिधः॥१॥ एष इंद्राय वायवे स्वर्जित्परि षिच्यते। पवित्रे दक्षसाधनः॥२॥ एष नृभिर्वि नीयते दिवो मूर्धा

ऽत्तम् उक्थेभिः अनुऽमाद्यः शुचिः पावकः अद्भुतः ॥६॥ शुचिः पावकः उच्यते सोमः सुतस्य मध्यः देवऽअवीः अघऽशंसऽहा ॥७॥१४॥१॥

॥२५॥ पवस्व दक्षऽसाधनः देवेभ्यः पीतये हरे मरुत्ऽभ्यः वायवे मदः ॥१॥ पवमान धिया हितः अभि योनिं कनिक्रदत् धर्मणा वायुं आ विश ॥२॥ सं देवैः शोभते वृषा कविः योनौ अधि प्रियः वृषऽहा देवऽवीतमः ॥३॥ विश्वा रूपाणि आऽविशन् पुनानः याति हर्यतः यत्र अमृतासः आसते ॥४॥ अरुषः जनयन् गिरः सोमः पवते आयुपक् इंद्रं गच्छन् कविऽक्रतुः ॥५॥ आ पवस्व मदिन्ऽतम पवित्रं धारया कवे अर्कस्य योनिं आऽसदं ॥६॥१५॥

॥२६॥ तं अमृक्षंत वाजिनं उपऽस्थे अदितेः अधि विप्रासः अण्व्या धिया ॥१॥ तं गावः अभि अनूषत सहस्रंऽधारं अक्षितं इंदुं धर्तारं आ दिवः ॥२॥ तं वेधां मेधया अह्यन् पवमानं अधि द्यवि धर्णसिं भूरिऽधायसं ॥३॥ तं अह्यन् भुरिजोः धिया संऽवसानं विवस्वतः पतिं वाचः अदाभ्यं ॥४॥ तं सानौ अधि जामयः हरिं हिन्वंति अद्रिऽभिः हर्यतं भूरिऽचक्षसं ॥५॥ तं त्वा हिन्वंति वेधसः पवमान गिराऽवृधं इंदो इंद्राय मत्सरं ॥६॥१६॥

॥२७॥ एषः कविः अभिऽस्तुतः पवित्रे अधि तोशते पुनानः मन्द्रऽयुः सिंधुः ॥१॥ एषः इंद्राय वायवे स्वःऽजित् परि सिच्यते पवित्रे दक्षऽसाधनः ॥२॥ एषः नृऽभिः वि नीयते दिवः मूर्धा

वृषा सुतः। सोमो वनेषु विश्ववित् ॥३॥ एष गव्युरचिक्रदत्पवमानो हिरण्ययुः। इंदुः सत्राजिदस्तृतः ॥४॥ एष सूर्येण हासते पवमानो अधि द्यवि। पवित्रे मत्सरो मदः ॥५॥ एष शुष्म्यसिष्यदत्दंतरिक्षे वृषा हरिः। पुनान इंदुरिंद्रमा ॥६॥१७॥

॥ २८ ॥ १–६ प्रियमेधः ॥ पवमानः सोमः ॥ गायत्री ॥

॥२८॥ एष वाजी हितो नृभिर्विश्ववित्मनसस्पतिः। अभ्यो वारं वि धावति ॥१॥ एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः। विश्वा धामान्याविशन् ॥२॥ एष देवः शुभायतेऽधि योनावमर्त्यः। वृत्रहा देववीतमः ॥३॥ एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः। अभि द्रोणानि धावति ॥४॥ एष सूर्येमरोचयत्पवमानो विचर्षणिः। विश्वा धामानि विश्ववित् ॥५॥ एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति। देवावीरघशंसहा ॥६॥१८॥

॥ २९ ॥ १–६ नृमेधः ॥ पवमानः सोमः ॥ गायत्री ॥

॥२९॥ प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसा। देवाँ अनु प्रभूषतः ॥१॥ सप्तिं मृजंति वेधसो गृणंतः कारवो गिरा। ज्योतिर्जज्ञानमुक्थ्यं ॥२॥ सृपहा सोम तानि ते पुनानाय प्रभूवसो। वर्धा समुद्रमुक्थ्यं ॥३॥ विश्वा वसूनि संजयन्पवस्व सोम धारया। इन्दो द्वेषांसि सुध्यक् ॥४॥ रक्षा सु नो अरुरुषः स्वनात्समस्य कस्य चित्। निदो यत्र मुमुच्महे ॥५॥ एंदो पार्थिवं रयिं दिव्यं पवस्व धारया। द्युमंतं शुष्ममा भर ॥६॥१९॥

॥ ३० ॥ १–६ विंदुः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३०॥ प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन्। पुनानो

वृषा सुतः सोमः वनेषु विष्वऽवित्॥३॥ एषः गव्युः अचिक्रदत् पवमानः हिरण्यऽयुः इंदुः सत्राऽजित् अस्तृतः ॥४॥ एषः सूर्येण हासते पवमानः अधि द्यवि पविचे मत्सरः मदः॥५॥ एषः शुष्मी असिस्यदत् अंतरिक्षे वृषा हरिः पुनानः इंदुः इंद्रे आ ॥६॥१७॥

॥२८॥ एषः वाजी हितः नृऽभिः विष्वऽवित् मनसः पतिः अव्यः वारे वि धावति ॥१॥ एषः पविचे अक्षरत् सोमः देवेभ्यः सुतः विश्वा धामानि आऽविशन्॥२॥ एषः देवः शुभायते अधि योनौ अमर्त्यः वृत्रऽहा देवऽवीतमः॥३॥ एषः वृषा कनिक्रदत् दशऽभिः जामिऽभिः यतः अभि द्रोणानि धावति ॥४॥ एषः सूर्ये अरोचयत् पवमानः विऽचर्षणिः विश्वा धामानि विष्वऽवित् ॥५॥ एषः शुष्मी अदाभ्यः सोमः पुनानः अर्षति देवऽअवीः अघशंसऽहा ॥६॥१८॥

॥२९॥ प्र अस्य धाराः अक्षरन् वृष्णः सुतस्य ओजसा देवान् अनु प्रऽभूषतः ॥१॥ सम्मिं मृजंति वेधसः गृणंतः कारवः गिरा ज्योतिः जज्ञानं उक्थ्यं॥२॥ सुऽसहा सोम तानिं ते पुनानाय प्रभुऽवसो वर्धं समुद्रं उक्थ्यं॥३॥ विश्वा वसूनि संऽजयन् पवस्व सोम धारया इनु द्वेषांसि सध्र्यक्॥४॥ रक्षा सु नः अरंरुषः स्वनात् समस्य कस्य चित् निदः यत्र मुमुच्महे॥५॥ आ इंदो पार्थिवं रयिं दिव्यं पवस्व धारया द्युऽमंतं शुष्मं आ भर ॥६॥१९॥

॥३०॥ प्र धाराः अस्य शुष्मिणः वृषा पविचे अक्षरन् पुनानः

वाचंमिष्यति ॥१॥ इंदुर्हियानः सोतृभिर्मृज्यमानः कनिक्रदत्। इयंर्ति वग्गुमिंद्रियं॥२॥ आ नः शुष्मं नृपाह्यं वीरवंतं पुरुस्पृहं। पवस्व सोम धारया॥३॥ प्र सोमो अति धारया पवमानो असिष्यदत्। अभि द्रोणान्यासदं॥४॥ अप्सुत्वा मधुमत्तमं हरिं हिन्वंत्यद्रिभिः। इंदुविंद्राय पीतयें॥५॥ सुनोता मधुमत्तमं सोमंमिंद्राय वज्रिणें। चारुं शर्धाय मत्सरं॥६॥२०॥

॥ ३१ ॥ १–६ गोतमः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३१॥ प्र सोमासः स्वाध्यः पवमानासो अक्रमुः। रयिं कृण्वंति चेतनं॥१॥ दिवस्पृथिव्या अधि भवेंदो द्युम्नवर्धनः। भवा वाजानां पतिः॥२॥ तुभ्यं वाता अभिप्रियस्तुभ्यमर्षंति सिंधवः। सोम वर्धंति ते महः॥३॥ आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं। भवा वाजस्य संगथे॥४॥ तुभ्यं गावो घृतं पयो बभ्रो दुदुह्रे अक्षितं। वर्पिष्ठे अधि सानवि॥५॥ स्वायुधस्य ते सुतो भुवनस्य पते वयं। इंदो सखित्वमुश्मसि॥६॥२१॥

॥ ३२ ॥ १–६ प्रयाप्याश्च ॥ पवमान सोमः ॥ गायत्री ॥

॥३२॥ प्र सोमासो मदच्युतः श्रवसे नो मघोनः। सुता विदथें अक्रमुः॥१॥ आदीं चितस्य योषणो हरिं हिन्वंत्यद्रिभिः। इंदुमिंद्राय पीतयें॥२॥ आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिं। अत्यो न गोभिरज्यते॥३॥ उभे सोमावचाकशन्मृगो न तक्तो अर्षसि। सीदन्नृतस्य योनिमा॥४॥ अभि गावो अनूषत योषा जारमिव प्रियं। अगन्नाजिं यथा हितं॥५॥ अस्मे धेहि द्युमद्यशो मघवन्त्सोम मह्यं च। सनिं मेधामुत श्रवः॥६॥२२॥

वाचं इष्यति ॥१॥ इंदुः हियानः सोतृऽभिः मृज्यमानः कनिक्रदत् इयर्ति वग्नुं इंद्रियं ॥२॥ आ नः भुम्मं नृऽसहं वीरऽवंतं पुरुऽस्पृहं पवस्व सोम धारया ॥३॥ प्र सोमः अति धारया पवमानः असिस्यदत् अभि द्रोणानि आऽसदं ॥४॥ अप्ऽसु त्वा मधुमत्ऽतमं हरिं हिन्वंति अद्रिऽभिः इंदो इंद्राय पीतये ॥५॥ सुनोत मधुमत्ऽतमं सोमं इंद्राय वज्रिणे चारुं शर्धाय मत्सरं ॥६॥ २०॥

॥ ३१ ॥ प्र सोमासः सुऽआध्यः पवमानासः अक्रमुः रयिं कृण्वंति चेतनं ॥१॥ दिवः पृथिव्याः अधि भव इंदो द्युम्नऽवर्धनः भव वाजानां पतिः ॥२॥ तुभ्यं वाताः अभिऽप्रियः तुभ्यं अर्षंति सिंधवः सोम वर्धंति ते महः ॥३॥ आ प्यायस्व सं एतु ते विश्वतः सोम वृष्ण्यं भव वाजस्य संऽगथे ॥४॥ तुभ्यं गावः घृतं पयः वभ्रो दुदुह्रे अक्षितं वर्पिष्ठे अधि सानवि ॥५॥ सुऽआयुधस्य ते सतः भुवनस्य पते वयं इंदो सखिऽत्वं उश्मसि ॥६॥ २१॥

॥ ३२ ॥ प्र सोमासः मदऽच्युतः श्रवसे नः मघोनः सुताः विदथे अक्रमुः ॥१॥ आत् ईं चितस्य योषणः हरिं हिन्वंति अद्रिऽभिः इंदुं इंद्राय पीतये ॥२॥ आत् ईं हंसः यथा गणं विश्वस्य अवीवशत् मतिं अत्यः न गोभिः अज्यते ॥३॥ उभे सोम अवऽचाकशत् मृगः न तक्षः अर्षसि सीदन् ऋतस्य योनिं आ ॥४॥ अभि गावः अनूषत योषां जारंऽइव प्रियं अगंन् आजिं यथा हितं ॥५॥ अस्मे धेहि द्युऽमत् यशः मघवत्ऽभ्यः च मह्यं च सनिं मेधां उत श्रवः ॥६॥ २२॥

॥ ३३ ॥ १–६ चितः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३३॥ प्र सोमासो विपश्चितोऽपां न यन्त्यूर्मयः। वनानि महिषा इव ॥१॥ अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया। वाजं गोमन्तमक्षरन् ॥२॥ सुता इंद्राय वायवे वरुणाय मरुद्भ्यः। सोमा अर्षन्ति विष्णवे ॥३॥ तिस्रो वाच उदीरते गावो मिमन्ति धेनवः। हरिरेति कनिक्रदत् ॥४॥ अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः। मर्मृज्यन्ते दिवः शिशुं ॥५॥ रायः समुद्रांश्चतुरोऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणः ॥६॥२३॥

॥ ३४ ॥ १–६ चितः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३४॥ प्र सुवानो धारया तनेंदुर्हिन्वानो अर्षति। रुजद्दळ्हा व्योजसा ॥१॥ सुत इंद्राय वायवे वरुणाय मरुद्भ्यः। सोमो अर्षति विष्णवे ॥२॥ वृषाणं वृषभिर्यतं सुन्वन्ति सोममद्रिभिः। दुहन्ति शक्मना पयः ॥३॥ भुवच्चितस्य मज्मो भुवदिंद्राय मत्सरः। सं रूपैरज्यते हरिः ॥४॥ अभीमृतस्य विष्टपं दुहते पृश्निमातरः। चारुं प्रियतमं हविः ॥५॥ समेनमह्ता इमा गिरो अर्षति सुष्टुतः। धेनूर्वाश्रो अवीवशत् ॥६॥२४॥

॥ ३५ ॥ १–६ प्रभूवसुः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३५॥ आ नः पवस्व धारया पवमान रयिं पृथुं। यया ज्योतिर्विदासि नः ॥१॥ इंदो समुद्रमीखय पवस्व विश्वमेजय। रायो धर्ता न ओजसा ॥२॥ त्वया वीरेण वीरवोऽभि ष्याम पृतन्यतः। क्षरा णो अभि वार्यं ॥३॥ प्र वाजमिंदुरिष्यति सिषासन्वाजसा ऋषिः। व्रता विदान आयुधा ॥४॥ नं गीर्भिर्वीचमीखयं पुनानं वासयामसि। सोमं जनस्य गोपतिं ॥५॥ विश्वो यस्यं व्रते जनो दाधार धर्मणस्पतेः। पुनानस्य प्रभूवसोः ॥६॥२५॥

॥३३॥ प्रसोमासः विपःऽचितः अपां न यंति ऊर्मयः वनानि महिषाःऽइव ॥१॥ अभि द्रोणानि बभ्रवः शुक्राः ऋतस्य धारया वाजं गोऽमंतं अक्षरन् ॥२॥ सुताः इंद्राय वायवे वरुणाय मरुत्ऽभ्यः सोमाः अर्षंति विष्णवे ॥३॥ तिस्रः वाचः उत् ईरते गावः मिमंति धेनवः हरिः एति कनिक्रदत् ॥४॥ अभि ब्रह्मीः अनूषत यह्वीः ऋतस्य मातरः मर्मृज्यंते दिवः शिशुं ॥५॥ रायः समुद्रान् चतुरः अस्मभ्यं सोम विश्वतः आ पवस्व सहस्रिणः ॥६॥ ॥२३॥

॥३४॥ प्र सुवानः धारया तना इंदुः हिन्वानः अर्षति रुजत् दृळ्हा वि ओजसा ॥१॥ सुतः इंद्राय वायवे वरुणाय मरुत्ऽभ्यः सोमः अर्षति विष्णवे ॥२॥ वृषाणं वृषंऽभिः युतं सुन्वंति सोमं अद्रिऽभिः दुहंति शक्मना पयः ॥३॥ भुवत् चितस्य मज्मंऽभुवत् इंद्राय मत्सरः सं रूपैः अज्यते हरिः ॥४॥ अभि द्रुं ऋतस्य विष्टपं दुहते पृश्निऽमातरः चारुं प्रियऽतमं हविः ॥५॥ सं एनं अहूताः इमाः गिरः अर्षंति सऽसुतेः धेनूः वाश्रः अवीवशत् ॥६॥२४॥

॥३५॥ आ नः पवस्व धारया पवमान रयिं पृथुं यया ज्योतिः विदासि नः ॥१॥ इंदो समुद्रंऽईखय पवस्व विश्वंऽएजय रायः धर्ता नः ओजसा ॥२॥ तया वीरेण वीरऽवः अभि स्याम पृतन्यतः क्षरं नः अभि वायं ॥३॥ प्र वाजं इंदुः इष्यति सिसासन् वाजऽसाः ऋषिः व्रता विदानः आयुधा ॥४॥ तं गोऽभिः वाचंऽईखयं पुनानं वासयामसि सोमं जनस्य गोऽपतिं ॥५॥ विश्वः यस्य व्रते जनः दाधारे धर्मणः पतेः पुनानस्य प्रभुऽवसोः ॥६॥२५॥

॥ ३६ ॥ १–६ प्रभूवसुः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३६॥ असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः। कार्ष्मन्वाजी न्यक्रमीत्॥१॥ स वह्निः सोम जागृविः पवस्व देववीरति। अभि कोशं मधुश्चुतम्॥२॥ स नो ज्योतींषि पूर्व्य पवमान वि रोचय। क्रत्वे दक्षाय नो हिनु॥३॥ शुम्भमान ऋतायुभिर्मृज्यमानो गभस्त्योः। पवते वारे अव्यये॥४॥ स विश्वा दाशुषे वसु सोमो दिव्यानि पार्थिवा। पवतामान्तरिक्ष्या॥५॥ आ दिवस्पृष्ठमश्वयुर्गव्ययुः सोम रोहसि। वीरयुः शवसस्पते॥६॥२६॥

॥ ३७ ॥ १–६ रहूगणः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३७॥ ससुतः पीतये वृषा सोमः पवित्रे अर्षति। विघ्नन्रक्षाँसि देवयुः॥१॥ स पवित्रे विचक्षणो हरिरर्षति धर्णसिः। अभि योनिं कनिक्रदत्॥२॥ स वाजी रोचना दिवः पवमानो वि धावति। रक्षोहा वारमव्ययम्॥३॥ स चित्रस्याधि सानवि पवमानो अरोचयत्। जामिभिः सूर्यं सह॥४॥ स वृत्रहा वृषा सुतो वरिवोविद्दाभ्यः। सोमो वाजमिवासरत्॥५॥ स देवः कविनेषितो ऽभि द्रोणानि धावति। इन्दुरिन्द्राय मंहना॥६॥२७॥

॥ ३८ ॥ १–६ रहूगणः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३८॥ एष उ स्य वृषा रथो ऽव्यो वारेभिरर्षति। गच्छन्वाजं सहस्रिणम्॥१॥ एतं चितस्य योषणो हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये॥२॥ एतं त्यं हरितो दशं मर्मृज्यन्ते अपस्युवः। याभिर्मदाय शुम्भते॥३॥ एष स्य मानुषीष्वा श्येनो न विक्षु सीदति। गच्छञ्जारो न योषितम्॥४॥ एष स्य मद्यो रसो ऽवं चष्टे दिवः शिशुः। य इन्दुर्वारमाविशत्॥५॥ एष स्य पीतये सुतो हरिरर्षति धर्णसिः। क्रन्दन्योनिमभि प्रियं॥६॥२८॥

॥३६॥ असर्जि रथ्यः यथा पवित्रे चम्वोः सुतः कार्ष्मन् वाजी नि अक्रमीत् ॥१॥ सः वह्निः सोम जगृविः पवस्व देवऽवीः अति अभि कोशं मधुऽश्चुतं ॥२॥ सः नः ज्योतींषि पूर्व्य पवमान वि रोचय क्रत्वे दक्षाय नः हिनु ॥३॥ शुंभमानः ऋतयुऽभिः मृज्यमानः गभस्त्योः पवते वारे अव्यये ॥४॥ सः विश्वा दाशुषे वसु सोमः दिव्यानि पार्थिवा पवतां आ अंतरिक्ष्या ॥५॥ आ दिवः पृष्ठं अश्वऽयुः गव्यऽयुः सोम रोहसि वीरऽयुः शवसः पते ॥६॥२६॥

॥३७॥ सः सुतः पीतये वृषा सोमः पवित्रे अर्षति विऽघ्नन् रक्षांसि देवऽयुः ॥१॥ सः पवित्रे विऽचक्षणः हरिः अर्षति धर्णसिः अभि योनिं कनिक्रदत् ॥२॥ सः वाजी रोचना दिवः पवमानः वि धावति रक्षःऽहा वारे अव्यये ॥३॥ सः चित्रस्य अधि सानवि पवमानः अरोचयत् जामिऽभिः सूर्येसह ॥४॥ सः वृत्रऽहा वृषा सुतः वरिवःऽवित् अदाभ्यः सोमः वाजंऽइव असरत् ॥५॥ सः देवः कविना इषितः अभि द्रोणानि धावति इंदुः इंद्राय मंहना ॥६॥२७॥

॥३८॥ एषः उं स्यः वृषा रथः अव्यः वारेभिः अर्षति गच्छन् वाजं सहस्रिणं ॥१॥ एतं चित्रस्य योषणः हरिं हिन्वंति अद्रिऽभिः इंदुं इंद्राय पीतये ॥२॥ एतं त्यं हरितः दश मर्मृज्यंते अपस्युवः याभिः मदाय शुंभते ॥३॥ एषः स्यः मानुषीषु आ श्येनः न विक्षु सीदति गच्छन् जारः न योषितं ॥४॥ एषः स्यः मद्यः रसः अवं चष्टे दिवः शिशुः यः इंदुः वारं आ अविशत् ॥५॥ एषः स्यः पीतये सुतः हरिः अर्षति धर्णसिः क्रंदन् योनिं अभि प्रियं ॥६॥२८॥

॥ ३९ ॥ १–६ बृहन्मतिः ॥ पवमानः सोमः ॥ गायत्री ॥

॥३९॥ आप्सुरप्सं बृहन्मते परि प्रियेण धाम्ना। यत्र देवा इति ब्रुवन्॥१॥ परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः। वृष्टिं दिवः परि स्रव॥२॥ सुत एति पवित्र आ त्विषिं दधान ओजसा। विचक्षाणो विरोचयन्॥३॥ अयं स यो दिवस्परि रघुयामा पवित्र आ। सिंधोरूर्मा व्यक्षरत्॥४॥ आविवासन्परावतो अथो अर्वावतः सुतः। इंद्राय सिच्यते मधु॥५॥ समीचीना अनूषत हरिं हिन्वंत्यद्रिभिः। योनावृतस्य सीदत॥६॥२९॥

॥ ४० ॥ १–६ बृहन्मतिः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४०॥ पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुंभंति विप्रं धीतिभिः॥१॥ आ योनिमरुणो रुहद्गमदिंद्रं वृषा सुतः। ध्रुवे सदसि सीदति॥२॥ नू नो रयिं महामिंदोऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणं॥३॥ विश्वा सोम पवमान द्युम्नानींदवा भर। विदाः सहस्रिणीरिषः॥४॥ स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यं। जरितुर्वर्धया गिरः॥५॥ पुनान इंदवा भर सोम द्विबर्हसं रयिं। वृषन्निंदो न ऊर्ज्यं॥६॥३०॥

॥ ४१ ॥ १–६ मेध्यातिथिः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४१॥ प्र ये गावो न भूर्णयश्चेषा अयासो अक्रमुः। घ्नंतः कृष्णामप त्वचं॥१॥ सुवितस्य मनामहेऽति सेतुं दुरार्यं। साह्वांसो दस्युमव्रतं॥२॥ शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः। चरंति विद्युतो दिवि॥३॥ आ पवस्व महीमिषं गोमंदिंदो हिरण्यवत्। अश्वावद्गोमदुक्थ्यं॥४॥ स पवस्व विचर्षण आ मही रोदसी पृण। उषाः सूर्यो न रश्मिभिः॥५॥

॥ ३९ ॥ आ॒शुः अ॒र्षं बृ॒हत्ऽम॑ते॒ परि॑ प्रि॒येण॑ धाम्ना॑ यच्च॑ दे॒वाः इति॑ ब्रुवन्॥१॥ प॒रि॒ऽकृ॒ण्वन् अ॑नि॒ःऽकृ॑तं जना॑य या॒तय॑न् इ॒षः वृ॒ष्टिं दि॒वः परि॑ स्रव॥२॥ सु॒तः ए॒ति॒ प॒वि॒त्रे आ त्वि॒षिं दधा॑नः ओज॑सा वि॒ऽच॒क्षा॒णः वि॒ऽरो॒च॒य॒न्॥३॥ अ॒यं सः यः दि॒वः परि॑ र॒घुऽया॑मा प॒वि॒त्रे आ सिंधोः ऊ॒र्मा वि अ॑क्षरत्॥४॥ आऽवि॑वासन् परा॒ऽव॒तः अथो॑ अ॒र्वा॒ऽव॒तः सु॒तः इंद्रा॑य सि॒च्य॒ते मधु॥५॥ सं॒ऽई॒ची॒नाः अ॒नू॒प॒त॒ हरिं॑ हि॒न्व॒न्ति॒ अद्रि॑ऽभिः योनौ॑ ऋ॒तस्य॑ सीदत॥६॥२९॥

॥ ४० ॥ पु॒ना॒नः अ॒क्र॒मी॒त् अ॒भि विश्वा॑ः मृधः॑ विऽच॑र्षणिः शुं॒भंति॑ विप्रं॑ धी॒ति॒ऽभिः॥१॥ आ योनिं॑ अरु॒णः रु॒ह॒त् गम॑त् इंद्रं॑ वृषा॑ सुतः॑ ध्रुवे सदं॑सि सीदति॥२॥ नु नः॒ र॒यिं म॒हां इं॒दो॒ अ॒स्मभ्यं॑ सोम॑ विश्वतः॑ आ प॒व॒स्व॒ स॒हस्रि॑णं॥३॥ विश्वा॑ सोम॑ प॒व॒मा॒न॒ द्यु॒म्नानि॑ इंदो॑ आ भ॒र॒ वि॒दाः स॒हस्रि॑णीः इ॒षः॥४॥ सः नः॒ पु॒ना॒नः आ भ॒र॒ र॒यिं स्तो॒चे सु॒ऽवीर्यं॑ ज॒रि॒तुः व॒र्धय॑ गिरः॑॥५॥ पु॒ना॒नः इं॒दो॒ आ भ॒र॒ सोमं॑ द्वि॒ऽब॒र्हसं॑ र॒यिं वृष॑न् इंदो॑ नः॒ उ॒क्थ्यं॑॥६॥३०॥

॥ ४१ ॥ प्र ये गावः॑ न भू॒र्णयः॑ त्वे॒षाः अ॒यासः॑ अ॒क्र॒मुः॒ मंतः॑ कृ॒ष्णां अ॒पऽत्व॑चं॥१॥ सु॒वि॒तस्य॑ मना॒म॒हे॒ अति॑ सेतुं दुः॒ऽआ॒व्यं॑ सद्मांसः॑ दस्यु॑ अव्र॒तं॥२॥ भृ॒ष्टे॒ वृ॒ष्टेः॒ऽइ॒व॒ स्व॒नः॒ प॒व॒मा॒न॒स्य॒ शु॒ष्मिणः॑ चरंति॑ वि॒ऽद्युतः॑ दि॒वि॥३॥ आ प॒व॒स्व॒ म॒हीं इ॒षं॑ गो॒ऽम॒त् इंदो॑ हिरण्य॒ऽव॒त् अश्व॑ऽवत् वाज॒ऽव॒त् सु॒तः॥४॥ सः प॒व॒स्व॒ वि॒ऽच॒र्ष॒णे॒ आ म॒ही रोद॑सी पृण॒ उ॒षाः सूर्यः॑ न र॒श्मिऽभिः॑॥५॥

परि॑ णः शर्म॒यंत्या॒ धार॑या सोम विश्व॒तः। सरा॑ र॒सेव॑ वि॒ष्टप॑म् ॥६॥३१॥

॥ ४२ ॥ १–६ मेध्यातिथिः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४२॥ ज॒नय॑न्नोच॒ना दि॒वो ज॒नय॑न्न॒प्सु सूर्य॑म्। वसा॑नो॒ गा अ॒यो हरिः॑ ॥१॥ ए॒ष प्र॒त्नेन॒ मन्म॑ना दे॒वो दे॒वेभ्य॒स्परि॑। धार॑या पवते सु॒तः ॥२॥ वा॒वृ॒धा॒नाय॒ तूर्व॑ये॒ पव॑ते वाज॒सात॑ये। सोमाः॑ सहस्र॒पाज॑सः ॥३॥ दु॒हा॒नः प्र॒त्नमित्पयः॑ प॒वित्रे॒ परि॑ षिच्यते। क्रंद॑न्दे॒वाँ अ॑जीजनत् ॥४॥ अ॒भि विश्वा॑नि॒ वार्या॒भि दे॒वाँ ऋ॑तावृधः। सोमः॑ पुना॒नो अ॑र्षति ॥५॥ गोम॑न्नः सोम वी॒रव॒दश्व॑व॒द्धाज॑वत्सुतः। पव॑स्व बृह॒तीरिषः॑ ॥६॥३२॥

॥ ४३ ॥ १–६ मेध्यातिथिः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४३॥ यो अ॒त्यइ॑व मृ॒ज्यते॒ गोभि॒र्मदा॑य हर्य॒तः। तं गी॒र्भिर्वा॑सयामसि ॥१॥ तं नो॒ विश्वा॑ अवस्यु॒वो॒ गिरः॑ शुंभंति पू॒र्वथा॑। इंदु॒मिंद्रा॑य पी॒तये॑ ॥२॥ पु॒ना॒नो याति॑ हर्य॒तः सोमो॑ गी॒र्भिः प॒रिष्कृ॑तः। विप्र॑स्य॒ मेध्या॑तिथेः ॥३॥ पवमान वि॒दा र॒यिम॒स्मभ्यं॑ सोम सु॒श्रिय॑म्। इंदो॑ सहस्र॒वर्च॑सं ॥४॥ इंदु॑र॒त्यो॒ न वा॑ज॒सृत्क॑नि॒क्रंति॑ प॒वित्र॒ आ। यदी॒ गार्ति॑ दे॒वयुः॑ ॥५॥ पव॑स्व॒ वाज॑सातये॒ विप्र॑स्य गृ॒णतो॑ वृधे। सोम॒ रास्व॑ सु॒वीर्य॑म् ॥६॥३३॥८॥६॥

॥ ४४ ॥ १–६ प्रयास्यः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४४॥ प्र णं॑ इंदो महे॒ तन॑ ऊ॒र्मिं न बिभ्र॑दर्षसि। अ॒भि दे॒वाँ अ॑यास्यः ॥१॥ म॒ती जु॒ष्टो धि॒या हि॒तः सोमो॑ हिन्वे परा॒वति॑। विप्र॑स्य॒ धार॑या क॒विः ॥२॥ अ॒यं दे॒वेषु॑ जागृ॒विः सु॒त ए॑ति प॒वित्र॒ आ। सोमो॑ याति॒ विच॑र्षणिः ॥३॥ स नः॑ पवस्व वा-

परि नः शर्मऽयंत्या धारया सोम विश्वतः सर रसाऽइंव विष्टपं ॥ ६ ॥ ३१ ॥

॥ ४२ ॥ जनयन् रोचना दिवः जनयन् अप्ऽसु सूर्यं वसानः गाः अपः हरिः ॥ १ ॥ एषः प्रत्नेन मन्मना देवः देवेभ्यः परि धारया पवते सुतः ॥ २ ॥ ववृधानाय नूर्वये पवंते वाजऽसातये सोमाः सहस्रऽपाजसः ॥ ३ ॥ दुहानः प्रत्नं इत् पयः पवित्रे परि सिच्यते क्रंदन् देवान् अजीजनत् ॥ ४ ॥ अभि विश्वानि वार्या अभि देवान् ऋतऽवृधः सोमः पुनानः अर्षति ॥ ५ ॥ गोऽमत् नः सोम वीरऽवत् अश्वऽवत् वाजऽवत् सुतः पवस्व बृहतीः इषः ॥ ६ ॥ ३२ ॥

॥ ४३ ॥ यः अत्यःऽइव मृज्यते गोभिः मदाय हर्यतः तं गीःऽभिः वासयामसि ॥ १ ॥ तं नः विश्वाः अवस्युवः गिरः शुंभंति पूर्वऽथा इंदुं इंद्राय पीतये ॥ २ ॥ पुनानः याति हर्यतः सोमः गोःऽभिः परिऽकृतः विप्रस्य मेध्यऽअतिथेः ॥ ३ ॥ पवमान विदाः रयिं अस्मभ्यं सोम सुऽश्रियं इंदो सहस्रऽवर्चसं ॥ ४ ॥ इंदुः अत्यः न वाजऽसृत् कनिक्रंति पवित्रे आ यत् अक्षाः अतिं देवऽयुः ॥ ५ ॥ पवस्व वाजऽसातये विप्रस्य गृणतः वृधे सोम रास्व सुऽवीर्यं ॥ ६ ॥ ३३ ॥ ८ ॥ ६ ॥

॥ ४४ ॥ प्र नः इंदो महे तने ऊर्मिं न बिभ्रत् अर्षसि अभि देवान् अयास्यः ॥ १ ॥ मती जुष्टः धिया हितः सोमः हिन्वे परिऽअतिं विप्रस्य धारया कविः ॥ २ ॥ अयं देवेषु जागृविः सुतः एति पवित्रे आ सोमः याति विऽचर्षणिः ॥ ३ ॥ सः नः पवस्व वा-

जुयुर्ध्वक्राणश्चारुमध्वरं। बर्हिष्माँ आ विवासति॥४॥ स नो भगाय वायवे विप्रवीरः सदावृधः। सोमो देवेष्वा यमत्॥५॥ स नो अद्य वसुत्तये क्रतुविन्नातुवित्तमः। वाजं जेषि श्रवो बृहत्॥६॥१॥

॥ ४५ ॥ १–६ अयास्यः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४५॥ स पवस्व मदाय कं नृचक्षा देववीतये। इंदविंद्राय पीतये॥१॥ स नो अर्षाभि दूत्यं१ त्वमिंद्राय तोशसे। देवांतसखिभ्य आ वरं॥२॥ उत त्वामरुणं वयं गोभिरंज्मो मदाय कं। वि नो राये दुरो वृधि॥३॥ अत्यू पविंत्रमक्रमीद्वाजी धुरं न याम्नि। इंदुर्देवेषु पत्यते॥४॥ समी सखायो अस्वरन्वने क्रीळंतमत्यविं। इंदुं नावा अनूषत॥५॥ तया पवस्व धारया यया पीतो विचक्षसे। इंदो स्तोत्रे सुवीर्यं॥६॥२॥

॥ ४६ ॥ १–६ अयास्य ॥ पवमानः सोमः ॥ गायत्री ॥

॥४६॥ असृग्रन्देववीतयेऽत्यासः कृत्व्या इव। क्षरंतः पर्वतावृधः॥१॥ परिष्कृतास इंदवो योषेव पित्र्यावती। वायुं सोमा असृक्षत॥२॥ एते सोमास इंदवः प्रयस्वंतश्चमू सुताः। इंद्रं वर्धंति कर्मभिः॥३॥ आ धावता सुहस्त्यः शुक्रा गृभ्णीत मंथिना। गोभिः श्रीणीत मत्सरं॥४॥ स पवस्व धनंजय प्रयंता राधसो महः। अस्मभ्यं सोम गातुवित्॥५॥ एतं मृजंति मर्ज्यं पवमानं दशक्षिपः। इंद्राय मत्सरं मदं॥६॥३॥

जऽयुः चक्राणः चारुं अध्वरं बर्हिष्मान् आ विवासति ॥४॥ सः नः भगाय वायवे विम्रऽवीरः सदाऽवृधः सोमः देवेषु आ यमत् ॥५॥ सः नः अद्य वसुत्तये क्रतुऽवित् गातुवित्ऽतमः वाजं जेषि श्रवः बृहत् ॥६॥१॥

॥४५॥ सः पवस्व मदाय कं नृऽचक्षाः देवऽवीतये इंदो' इंद्राय पीतये॥१॥ सः नः अर्ष अभि दूत्यं त्वं इंद्राय तोशसे देवान् सखिंऽभ्यः आ वरं॥२॥ उत त्वां अरुणं वयं गोभिः अंज्मः मदाय कं वि नः राये दुरः वृधि॥३॥ अति ऊं' पविं अक्रमीत् वाजी धुरं न यामनि इंदुः देवेषु पत्यते ॥४॥ सं ई' सखायः अस्वरन् वने क्रीळंतं अतिऽअविं इंदुं नावाः अनूषत॥५॥ तया पवस्व धारया यया पीतः विऽचक्षसे इंदो' स्तोत्रे सुऽवीर्यं ॥६॥२॥

॥४६॥ असृग्रन् देवऽवीतये अत्यासः कृत्व्याःऽइव क्षरंतः पर्वतऽवृधः ॥१॥ परिऽकृतासः इंदवः योपाऽइव पित्र्यऽवती वायुं सोमाः असृक्षत ॥२॥ एते सोमासः इंदवः प्रयस्वंतः चमू' सुताः इंदुं वर्धंति कर्मंऽभिः ॥३॥ आ धावत सुऽहस्त्यः शुक्रा गृभ्णीत मंथिना गोभिः श्रीणीत मत्सरं॥४॥ सः पवस्व धनंऽजय प्रऽयंता राधसः महः अस्मभ्यं सोम गातुऽवित् ॥५॥ एतं मृजंति मर्ज्यं पवमानं दश क्षिपः इंद्राय मत्सरं मदं॥६॥३॥

॥४७॥ अया सोमः सुऽकृत्यया महः चित् अभि अवर्धत मंदानः उत वृषऽयते॥१॥ कृतानि इत् अस्य कर्वी चेतंते दस्युऽतर्हे-

णा। ऋणा च धृष्णुर्यते ॥२॥ आत्सोमं इंद्रियो रसो वज्रः सहस्रसा भुवत्। उक्थं यदस्य जायते ॥३॥ स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति। यदीं मर्मृज्यते धियः ॥४॥ सिषासतू रयीणां वाजेष्वर्वतामिव। भरेषु जिग्युषामसि ॥५॥४॥

॥ ४८ ॥ १–५ ऋषिर्भार्गवः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४८॥ तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः। चारुं सुकृत्ययेमहे ॥१॥ सं वृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदं। शतं पुरो रुरुक्षणिं ॥२॥ अतस्त्वा रयिमभि राजानं सुक्रतो दिवः। सुपर्णो अव्यथिर्भरत् ॥३॥ विश्वस्मा इत्स्वर्दृशे साधारणं रजस्तुरं। गोपामृतस्य विर्भरत् ॥४॥ अधा हिन्वान इंद्रियं ज्यायो महित्वमानशे। अभिष्टिकृद्विचर्षणिः ॥५॥५॥

॥ ४९ ॥ १–५ ऋषिर्भार्गवः ॥ पवमानः सोमः ॥ गायत्री ॥

॥४९॥ पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि। अयक्ष्मा बृहतीरिषः ॥१॥ तया पवस्व धारया यया गावं इहागमन्। जन्यासु उप नो गृहं ॥२॥ घृतं पवस्व धारया यज्ञेषु देववीतमः। अस्मभ्यं वृष्टिमा पव ॥३॥ स नं ऊर्जे व्यव्ययं पवित्रं धाव धारया। देवासः शृणवन्हि कं ॥४॥ पवमानो असिष्यदद्रक्षांस्यपजंघनत्। प्रत्नवद्रोचयन्रुचः ॥५॥६॥

॥ ५० ॥ १–५ उचथ्य ॥ पवमानः सोमः ॥ गायत्री ॥

॥५०॥ उत शुष्मास ईरते सिंधोरूर्मेरिव स्वनः। वाणस्य चोदया पविं ॥१॥ प्रस्वे तु उदीरते तिस्रो वाचो मखस्युवः। यदव्य एषि सानवि ॥२॥ अव्यो वारे परि प्रियं हरिं हिन्वंत्यद्रिभिः। पवमानं मधुश्चुतं ॥३॥ आ पवस्व मदिं-

णा ऋणा च धृष्णुः चयते ॥२॥ आत् सोमः इंद्रियः रसः वज्रः सहस्रऽसाः भुवत् उक्थं यत् अस्य जायते ॥३॥ स्वयं कविः विऽधर्तरि विप्राय रत्नं इच्छति यदि मर्मृज्यते धियः ॥४॥ सिसासतुः रयीणां वाजेषु अर्वतांऽइव भरेषु जिग्युषां असि ॥५॥४॥

॥४८॥ तं त्वा नृम्णानि बिभ्रतं सधऽस्थेषु महः दिवः चारुं सुऽकृत्यया ईमहे ॥१॥ संवृक्तऽधृष्णुं उक्थ्यं महाऽमहिव्रतं मदं शतं पुरः रुरुक्षणिं ॥२॥ अतः त्वा रयिं अभि राजानं सुऽक्रतो॰ दिवः सुऽपर्णः अव्यथिः भरत् ॥३॥ विश्वस्मै इत् स्वः दृशे साधारणं रजःऽतुरं गोपां ऋतस्य विः भरत् ॥४॥ अधं हिन्वानः इंद्रियं ज्यायः महिऽत्वं आनशे अभिष्टिऽकृत् विऽचर्षणिः ॥५॥५॥

॥४९॥ पवस्व वृष्टिं आ सु नः अपां ऊर्मिं दिवः परि अयक्ष्माः बृहतीः इषः ॥१॥ तया पवस्व धारया यया गावः इह आऽगमन् जन्यासः उप नः गृहं ॥२॥ घृतं पवस्व धारया यज्ञेषु देवऽवीतमः अस्मभ्यं वृष्टिं आ पव ॥३॥ सः नः ऊर्जे वि अव्ययं पवित्रं धाव धारया देवासः शृणवन् हि कं ॥४॥ पवमानः असिस्यदत् रक्षांसि अपऽजंघनत् प्रऽनुऽवत् रोचयन् रुचः ॥५॥६॥

॥५०॥ उत् ते शुष्मासः ईरते सिंधोः ऊर्मेःऽइव स्वनः वाणस्य चोदय पविं ॥१॥ प्रऽसवे ते उत् ईरते तिस्रः वाचः मखस्युवः यत् अव्ये एषि सानवि ॥२॥ अव्यः वारे परि प्रियं हरिं हिन्वंति अद्रिऽभिः पवमानं मधुऽश्चुतं ॥३॥ आ पवस्व मदिन्-

तम पवित्रं धारया कवे। अर्कस्य योनिमासदं॥४॥ स पवस्व मदिंतम् गोभिरंजानो अक्तुभिः। इंदविंद्राय पीतये॥५॥७॥

॥ ५१ ॥ १-५ उचथ्यः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५१॥ अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ सृज। पुनीहींद्राय पातवे॥१॥ दिवः पीयूषमुत्तमं सोममिंद्राय वज्रिणे। सुनोता मधुमत्तमं॥२॥ तव त्य इंदो अंधसो देवा मधोर्व्यश्नते। पवमानस्य मरुतः॥३॥ त्वं हि सोम वर्धयंत्सुतो मदाय भूर्णये। वृषंस्तोतारमूतये॥४॥ अभ्यर्ष विचक्षण पवित्रं धारया सुतः। अभि वाजमुत श्रवः॥५॥८॥

॥ ५२ ॥ १-५ उचथ्यः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५२॥ परि द्युक्षः सनद्रयिर्भरद्वाजे नो अंधसा। सुवानो अर्ष पवित्र आ॥१॥ तव प्रत्नेभिरध्वभिरव्यो वारे परि प्रियः। सहस्रधारो याति नाम्॥२॥ चरुर्न यस्तमीङ्खयेंदो न दानमीङ्खय। वृषेवंधस्वमीङ्खय॥३॥ नि शुष्ममिंदवेषां पुरूहूत जनानां। यो अस्माँ आदिदेशति॥४॥ शतं नो इंद ऊतिभिः सहस्रं वा शुचीनां। पवस्व मंहयद्रयिः॥५॥९॥

॥ ५३ ॥ १-४ अवत्सारः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५३॥ उत्ते शुष्मासो अस्थू रक्षो भिंदंतो अद्रिवः। नुदस्व याः परिस्पृधः॥१॥ अया निजघ्निरोजसा रथसंगे धने हिते। स्तवा अविभ्युषा हृदा॥२॥ अस्य व्रतानि नाधृषे पवमानस्य दूड्या। रुज यस्त्वा मृतन्यति॥३॥ तं हिन्वंति मदच्युतं हरिं नदीषु वाजिनं। इंदुमिंद्राय मत्सरं॥४॥१०॥

ऽतम् पविचे धारया कवे अर्कस्य योनिं आऽसदं॥४॥ सः पव-स्व मदिन्ऽतम् गोभिः अंजानः अक्तुऽभिः इंदो' इंद्राय पीतये ॥५॥७॥

॥५१॥ अध्वर्यो' अद्रिऽभिः सुतं सोमं पविचे आ सृज पुनीहि इंद्राय पातवे॥१॥ दिवः पीयूषं उत्ऽतमं सोमं इंद्राय वज्रिणे सुनोत मधुमत्ऽतमं॥२॥ तवं त्ये इंदो' अंधसः देवाः मधोः वि अश्नते पवमानस्य मरुतः॥३॥ त्वं हि सोम वर्धयन् सुतः मदाय भूर्णये वृषन् स्तोतारं ऊतये॥४॥ अभि अर्षं विऽचक्षण पविचे धारया सुतः अभि वाजं उत श्रवः॥५॥८॥

॥५२॥ परि द्युक्षः सनत्ऽरयिः भरत् वाजं नः अंधसा सुवानः अर्ष पविचे आ॥१॥ तवं प्रत्नेभिः अध्वऽभिः अव्यः वारे परि प्रियः सहस्रंऽधारः याति तना॥२॥ चरुः न यः ते ईखय इंदो' न दानं ईखय वधैः वधऽस्नो° ईखय॥३॥ नि शुष्मं इंदो' एषां पुरुऽहूत जनानां यः अस्मान् आऽदिदेशति॥४॥ शतं नः इंदो' ऊतिऽभिः सहस्रं वा शुचीनां पवस्व मंहयत्ऽरयिः॥५॥९॥

॥५३॥ उत ते शुष्मासः अस्युः रक्षः भिंदंतः अद्रिऽवः नुदस्व याः परिऽस्मृधः॥१॥ अया निऽजघ्निः ओजसा रथऽसंगे धनेहिते स्तवै अबिभ्युषा हृदा॥२॥ अस्य व्रतानि न आऽधृषे पवमानस्य दुःऽध्यां रज यः त्वा पृतन्यति॥३॥ तं हिन्वंति मदऽच्युतं हरिं नदीषु वाजिनं इंदुं इंद्राय मत्सरं॥४॥१०॥

॥ ५४ ॥ १–४ अवत्सारः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५४॥ अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः। पयः सहस्र-सामृषिं ॥१॥ अयं सूर्य इवोपदृगयं सरांसि धावति। सप्त प्रवत आ दिवं॥२॥ अयं विश्वानि तिष्ठति पुनानो भुवनोपरि। सोमो देवो न सूर्यः ॥३॥ परि णो देववीतये वाजाँ अर्षसि गोमतः। पुनान इंदविंदुयुः ॥४॥११॥

॥ ५५ ॥ १–४ अवत्सारः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५५॥ यवंयवं नो अंधसा पुष्टंपुष्टं परि स्रव। सोम विश्वा च सौभगा॥१॥ इंदो यथा तव स्तवो यथा ते जातमंधसः। नि बर्हिषि प्रिये सदः ॥२॥ उत नो गोविदश्ववित्पवस्व सोमांधसा। मक्षू-तमेभिरहभिः ॥३॥ यो जिनाति न जीयते हंति शत्रुमभीत्य। स पवस्व सहस्रजित् ॥४॥१२॥

॥ ५६ ॥ १–४ अवत्सारः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५६॥ परि सोम ऋतं बृहदाशुः पवित्रे अर्षति। विघ्नन्रक्षाँ-सि देवयुः ॥१॥ यत्सोमो वाजमर्षति शतं धारा अपस्युवः। इंद्रस्य सख्यमाविशन् ॥२॥ अभि त्वा योषणो दश जारं न कन्यानूषत। मृज्यसे सोम सातये ॥३॥ त्वमिंद्राय विष्णवे स्वादुरिंदो परि स्रव। नृत्स्तोतृन्पाह्यंहसः ॥४॥१३॥

॥ ५७ ॥ १–४ अवत्सारः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५७॥ प्र ते धारा असश्चतो दिवो न यंति वृष्टयः। अच्छा वाजं सहस्रिणं ॥१॥ अभि प्रियाणि काव्या विश्वा चक्षाणो अ-र्षति। हरिस्तुंजान आयुधा ॥२॥ स मर्मृजान आयुभिरिभो राजेव सुव्रतः। शर्येनो न वंसु षीदति ॥३॥ स नो विश्वा दिवो वसूतो पृथिव्या अधि। पुनान इंदवा भर ॥४॥१४॥

॥५४॥ अस्य मत्सां अनु द्युतं शुक्र दुदुह्रे अह्रयः पयः सहस्रऽसां ऋषिं ॥१॥ अयं सूर्यःऽइव उपऽदृक् अयं सरांसि धावति सप्त प्रऽवतः आ दिवं ॥२॥ अयं विश्वानि तिष्ठति पुनानः भुवना उपरि सोमः देवः न सूर्यः ॥३॥ परि नः देवऽवीतये वाजान् अर्षसि गोऽमतः पुनानः इंदो इंद्रऽयुः ॥४॥११॥

॥५५॥ यवंऽयवं नः अंधसा पुष्टंऽपुष्टं परि स्रव सोम विश्वा च सौभगा ॥१॥ इंदो यथा तव स्तवः यथा ते जातं अंधसः नि बर्हिषि प्रिये सदः ॥२॥ उत नः गोऽवित् अश्वऽवित् पवस्व सोम अंधसा मक्षुऽतमेभिः अहंऽभिः ॥३॥ यः जिनाति न जीयते हंति शत्रुं अभिऽइत्यं सः पवस्व सहस्रऽजित् ॥४॥१२॥

॥५६॥ परि सोमः ऋतं बृहत् आप्नुः पवित्रे अर्षति विऽघ्नन् रक्षांसि देवऽयुः ॥१॥ यत् सोमः वाजं अर्षति शतं धाराः अपस्युवः इंद्रस्य सख्यं आऽविशन् ॥२॥ अभि त्वा योषणः दश जारं न कन्या अनूषत मृज्यसे सोम सातये ॥३॥ त्वं इंद्राय विष्णवे स्वादुः इंदो परि स्रव नृन् स्तोतॄन् पाहि अंहसः ॥४॥१३॥

॥५७॥ प्र ते धाराः असश्चतः दिवः न यंति वृष्टयः अच्छ वाजं सहस्रिणं ॥१॥ अभि प्रियाणि काव्या विश्वा चक्षाणः अर्षति हरिः तुंजानः आयुधा ॥२॥ सः मर्मृजानः आयुऽभिः इभः राजाऽइव सुऽव्रतः श्येनः न वंसु सीदति ॥३॥ सः नः विश्वा दिवः वसु उतो पृथिव्याः अधि पुनानः इंदो आ भर ॥४॥१४॥

॥ ५८ ॥ १-४ वसिष्ठः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५८॥ तरत्स मंदी धावति धारा सुतस्यांधसः। तरत्स मंदी धावति॥१॥ उता वैत् वसूनां मर्तस्य देव्यवसः। तरत्स मंदी धावति॥२॥ द्व्यसयोः पुरुपंत्योरा सहस्राणि दद्महे। तरत्स मंदी धावति॥३॥ आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे। तरत्स मंदी धावति॥४॥१५॥

॥ ५९ ॥ १-४ वसिष्ठः ॥ पवमानः सोमः ॥ गायत्री ॥

॥५९॥ पवस्व गोजिदश्वजिद्धिरण्यजित्सोम रण्यजित्। प्रजावद्रत्नमा भर॥१॥ पवस्वाग्नेरदाभ्यः पवस्वौषधीभ्यः। पवस्व धिषणाभ्यः॥२॥ त्वं सोम पवमानो विश्वानि दुरिता तर। कविः सीद नि बर्हिषि॥३॥ पवमान स्वर्विदो जायमानोऽभवो महान्। इंदो विश्वाँ अभीदसि॥४॥१६॥

॥ ६० ॥ १-४ वसिष्ठः ॥ पवमानः सोमः ॥ १, २, ४ गायत्री । ३ पुरउष्णिक् ॥

॥६०॥ प्र गायनेषं गायत पवमानं विचर्षणिं। इंदुं सहस्रचक्षसं॥१॥ तं त्वा सहस्रचक्षसमयो सहस्रभर्णसं। अति वारमपाविषुः॥२॥ अति वारान्पवमानो असिष्यदत्कलशाँ अभि धावति। इंद्रस्य हार्दाविशन्॥३॥ इंद्रस्य सोम राधसे शं पवस्व विचर्षणे। प्रजावदेतु रा भर॥४॥१७॥२॥

॥ ६१ ॥ १-३ वसिष्ठः ॥ पवमानः सोमः ॥ गायत्री ॥

॥६१॥ अया वीती परि स्रव यस्मं इंदो मदेष्टवा। अयास्मवंतीनयं॥१॥ पुरः सद्य इत्थाधिये दिवोदासाय शंबरं। अध त्यं तुर्वशं यदुं॥२॥ परि णो अश्वमश्वविन्नोमदिंदो हिरण्यवत्। वरं सहस्रिणीरिषः॥३॥ पवमानस्य ते वयं पवित्रमं-

॥५८॥ तरत्सः मंदी धावति धारा सुतस्य अंधसः तरत्सः मंदी धावति॥१॥ उस्रा वेद वसूनां मर्तस्य देवी अवसः तरत्सः मंदी धावति॥२॥ ध्वसयोः पुरुऽसंत्योः आ सहस्राणि दद्महे तरत्सः मंदी धावति॥३॥ आ ययोः चिंशतं तना सहस्राणि च दद्महे तरत्सः मंदी धावति॥४॥१५॥

॥५९॥ पवस्व गोऽजित् अश्वऽजित् विश्वऽजित् सोम रण्यऽजित् प्रजाऽवत् रत्नं आ भर॥१॥ पवस्व अत्ऽभ्यः अद्भ्यः पवस्व ओषधीभ्यः पवस्व धिषणाभ्यः॥२॥ त्वं सोम पवमानः विश्वानि दुःऽइता तर कविः सीद नि बर्हिषि॥३॥ पवमान स्वः विदः जायमानः अभवः महान् इंदो विश्वान् अभि इत् असि॥४॥१६॥

॥६०॥ प्र गायत्रेण गायत पवमानं विऽचर्षणिं इंदुं सहस्रंऽचक्षसं॥१॥ तं त्वा सहस्रंऽचक्षसं अथो सहस्रंऽभर्णसं अतिं वारं अपाविषुः॥२॥ अतिं वारान् पवमानः असिस्यदत् कलशान् अभि धावति इंद्रस्य हार्दिं आऽविशन्॥३॥ इंद्रस्य सोम राधसे शं पवस्व विऽचर्षणे प्रजाऽवत् रतः आ भर॥४॥१७॥२॥

॥६१॥ अया वीती परि स्रव यः ते इंदो मदेषु आ अवऽअहन् नवतीः नव॥१॥ पुरः सद्यः इत्याऽधिये दिवःऽदासाय शंबरं अध त्यं तुर्वशं यदुं॥२॥ परि नः अश्वं अश्वऽवित् गोऽमंत इंदो हिरण्यऽवत् क्षरं सहस्रिणीः इषः॥३॥ पवमानस्य ते वयं पवित्रं

भ्युंदतः। सखित्वमा वृणीमहे ॥४॥ ये ते पवित्रमूर्मयोऽभि-क्षरंति धारया। तेभिर्नः सोम मृळय ॥५॥१८॥ स नः पुनान आ भर रयिं वीरवतीमिषं। ईशानः सोम विश्वतः ॥६॥ एतमु त्यं दश क्षिपो मृजंति सिंधुमातरं। समादित्येभिरख्यत ॥७॥ समिंद्रेणोत वायुना सुत एति पवित्र आ। सं सूर्यस्य रश्मिभिः ॥८॥ स नो भगाय वायवे पूष्णे पवस्व मधुमान्। चारुर्मित्रे वरुणे च ॥९॥ उच्चा ते जातमंधसो दिवि षंड्नूम्या ददे। उग्रं शर्म महि श्रवः ॥१०॥१९॥ एना विश्वान्यर्य आ द्युम्नानि मानुषाणां। सिषासंतो वनामहे ॥११॥ स न इंद्राय यज्यवे वरुणाय मरुद्भ्यः। वरिवोवित्परि स्रव ॥१२॥ उपो षु जातमप्तुरं गोभिर्भंगं परिष्कृतं। इंदुं देवा अयासिषुः ॥१३॥ तमिद्वर्धंतु नो गिरो वत्सं संशिश्वरीरिव। य इंद्रस्य हृदंसनिः ॥१४॥ अर्षा णः सोम शं गवे धुक्षस्व पिप्युषीमिषं। वर्धा समुद्रमुक्थ्यं ॥१५॥२०॥ पवमानो अजीजनद्दिवश्चित्रं न तन्यतुं। ज्योतिर्वैश्वानरं बृहत् ॥१६॥ पवमानस्य ते रसो मदो राजन्नदुच्छुनः। वि वारमव्यमर्षति ॥१७॥ पवमान रसस्तव दक्षो वि राजति द्युमान्। ज्योतिर्विश्वं स्वर्दृशे ॥१८॥ यस्ते मदो वरेण्यस्तेना पवस्वांधसा। देवावीरघशंसहा ॥१९॥ जनिर्वृत्रमभिचियं सस्निर्वाजं दिवेदिवे। गोषा उ अश्वसा असि ॥२०॥२१॥ संमिश्लो अरुषो भव सूपस्थाभिर्न धेनुभिः। सीदञ्छ्येनो न योनिमा ॥२१॥ स पवस्व य आविथेंद्रं वृत्राय हंतवे। वृत्रिवांसं महीरपः ॥२२॥ सुवीरासो वयं धना जयेम सोम मीढ्वः। पुनानो वंध नो गिरः ॥२३॥ तीव्रांसस्तवावसा स्याम वन्वंतं आमुरः। सोम वृतेषु जागृहि ॥२४॥ अपघ्नन्प-

अभि ऽउंदतः सखि ऽत्वं आ वृणीमहे॥४॥ येते पविंचे ऊर्मयः अभि ऽक्षरंन्ति धारया ते भिः नः सोम मृळय॥५॥१८॥ सः नः पुनानः आ भर रयिं वीरऽवंन्तीं इषं ईशानः सोम विश्वतः॥६॥ एतं ऊं त्यं दश क्षिपः मृजंन्ति सिंधुऽमातरं सं आदित्येभिः अख्यत॥७॥ सं इंद्रेण उत वायुना सुतः एति पविंचे आ सं सूर्यस्य रश्मिऽभिः॥८॥ सः नः भगाय वायवे पूष्णे पवस्व मधुऽमान् चारुः मित्रे वरुणे च॥९॥ उच्चा ते जातं अंधसः दिवि सत् भूमिः आ ददे उग्रं शर्म महि श्रवः॥१०॥१९॥ एना विश्वानि अर्यः आ द्युम्नानि मानुषाणां सिसासंतः वनामहे॥११॥ सः नः इंद्राय यज्यवे वरुणाय मरुत्ऽभ्यः वरिवःऽवित् परि स्रव॥१२॥ उषोंऽ सु जातं अप्ऽतुरं गोभिः भंगं परिऽकृतं इंदुं देवाः अयासिषुः॥१३॥ त इत् वर्धंतु नः गिरः वत्सं संशिश्वरीःऽइव यः इंद्रस्य हृदंऽसनिः॥१४॥ अषंन्नः सोम शंगवे धुक्षस्व पिप्युषीं इषं वर्धं समुद्रं उक्थ्यं॥१५॥२०॥ पवमानः अजीजनत् दिवः चित्रं न तन्यतुं ज्योतिः वैश्वानरं बृहत्॥१६॥ पवमानस्य ते रसः मदः राजन् अदुच्छुनः वि वारं अव्यं अर्षति॥१७॥ पवमान रसः तव दक्षः वि राजति द्युऽमान् ज्योतिः विश्वं स्वः दृशे॥१८॥ यः ते मदः वरेण्यः तेन पवस्व अंधसा देवऽअवीः अघशंसऽहा॥१९॥ जन्मंः वृत्रं अभि-चियं सक्षंः वाजं दिवेऽदिवे गोऽसाः ऊं अश्वऽसाः असि॥२०॥ ॥२१॥ संऽमिश्लः अरुषः भव सुऽउपस्थाभिः न धेनुऽभिः सीदन् श्येनः न योनिं आ॥२१॥ सः पवस्व यः आविंथ इंद्रं वृत्राय हंतवे वज्रिऽवांसं महीः अपः॥२२॥ सुऽवीरांसः वयं धनां जयेम सोम मीढ्वः पुनानः वर्धं नः गिरः॥२३॥ त्वाऽऊंतासः तव अवंसा स्याम वन्वंतः आऽमुरः सोम व्रतेषु जागृहि॥२४॥ अपऽघ्नन् प-

वते मृधोऽप सोमो अरांव्णः। गच्छन्निंद्रस्य निष्कृतं॥२५॥२२॥ महो नो राय आ भर पवमान जही मृधः। रास्वेंदो वीरवद्यशः॥२६॥ न त्वा शतं चन हूतो राधो दित्संतमा मिनन्। यत्पुनानो मखस्यसे॥२७॥ पवस्वेंदो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषो जहि॥२८॥ अस्य ते सख्ये वयं तवेंदो द्युम्न उत्तमे। सासह्याम पृतन्यतः॥२९॥ या ते भीमान्यायुधा तिग्मानि संति धूर्वणे। रक्षा समस्य नो निदः॥३०॥२३॥

॥ ६२ ॥ १-३० जमदग्निः ॥ पवमानः सोमः ॥ गायत्री ॥

॥६२॥ एते असृग्रमिंदवस्तिरः पवित्रमाशवः। विघ्नंतो दुरिता पुरु सुगा तोकाय वाजिनः। तना कृण्वंतो अर्वते॥२॥ कृण्वंतो वरिवो गवेऽभ्यर्षंति सुष्टुतिं। इळामस्मभ्यं संयतं॥३॥ असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः। श्येनो न योनिमासदत्॥४॥ शुभ्रमंधो देववातमप्सु धूतो नृभिः सुतः। स्वदंति गावः पयोभिः॥५॥२४॥ आदीमश्वं न हेतारोऽशूशुभन्मृताय। मध्वो रसं सधमादे॥६॥ यास्ते धारा मधुश्चुतोऽसृग्रमिंद ऊतये। ताभिः पवित्रमासदः॥७॥ सो अर्षेंद्राय पीतये तिरो रोमाण्यव्यया। सीदन्योना वनेष्वा॥८॥ त्वमिंदो परि स्रव स्वादिष्ठो अंगिरोभ्यः। वरिवोविद्घृतं पयः॥९॥ अयं विचर्षणिर्हितः पवमानः स चेतति। हिन्वान आप्यं बृहत्॥१०॥२५॥ एष वृषा वृषव्रतः पवमानो अशस्तिहा। करद्वसूनि दाशुषे॥११॥ आ पवस्व सहस्रिणं रयिं गोमंतमश्विनं। पुरुधेदं पुरुस्पृहं॥१२॥ एष स्य परि षिच्यते मर्मृज्यमान आयुभिः। उरुगायः कविक्रतुः॥१३॥ सहस्रोतिः शतामघो विमानो रजसः

वृते मृधः अप सोमः अरांण्णः गच्छन् इंद्रस्य निःऽकृतं ॥२५॥ ॥२२॥ महः नः रायः आ भर पवमान जहि मृधः रास्व इंदो वीरऽवत् यशः ॥२६॥ न त्वा शतं चन हुतः राधः दित्संतं आ मिनन् यत् पुनानः मघऽस्यसे ॥२७॥ पवस्व इंदो वृषा सुतः कृधि नः यशसः जने विश्वाः अप द्विषः जहि ॥२८॥ अस्यं ते सख्ये वयं तवं इंदो द्युम्ने उत्ऽतमे ससस्यामं पृतन्यतः ॥२९॥ या ते भीमानि आयुधा तिग्मानि संति धूर्वणे रक्षा समस्य नः निदः ॥३०॥२३॥

॥६२॥ एते असृग्रं इंदवः तिरः पविचं आशवः विश्वानि अभि सौभगा ॥१॥ विऽघ्नंतः दुःऽइता पुरु सुऽगा तोकाय वाजिनः तना कृण्वंतः अर्वते ॥२॥ कृण्वंतः वरिवः गवे अभि अर्षंति सुऽस्तुतिं इळां अस्मभ्यं संऽयतं ॥३॥ असाविं अंशुः मदाय अप्ऽसु दक्षः गिरिऽस्थाः श्येनः न योनिं आ असदत् ॥४॥ शुभ्रं अंधः देवऽवातं अप्ऽसु धूतः नृऽभिः सुतः स्वदंति गावः पयःऽभिः ॥५॥२४॥ आत् ईं अश्वं न हेतारः अमृण्वन् अमृताय मध्वः रसं मधुऽमादे ॥६॥ याः ते धाराः मधुऽश्चुतः असृग्रं इंदो ऊतये ताभिः पविचं आ असदः ॥७॥ सः अप इंद्राय पीतये तिरः रोमाणि अव्यया सीदन् योना वनेषु आ ॥८॥ त्वं इंदो परि स्रव स्वादिष्ठः अंगिरःऽभ्यः वरिवःऽवित् घृतं पयः ॥९॥ अयं विऽचर्षणिः हितः पवमानः सः चेतति हिन्वानः आप्यं बृहत् ॥१०॥२५॥ एषः वृषा वृषऽव्रतः पवमानः अशस्तिऽहा करत् वसूनि दाशुषे ॥११॥ आ पवस्व सहस्रिणं रयिं गोऽमंतं अश्विनं पुरुऽचंद्रं पुरुऽस्पृहं ॥१२॥ एषः स्यः परि सिच्यते मर्मृज्यमानः आयुऽभिः उरुऽगायः कविऽक्रतुः ॥१३॥ सहस्रंऽऊतिः शतऽधारः विऽधानः रजसः

कविः। इंद्राय पवते मदः॥१४॥ गिरा जात इह स्तुत इंदुरिंद्राय धीयते। वियोनां वसताविव॥१५॥२६॥ पवमानः सुतो नृभिः सोमो वाजमिवासरत्। चमूषु शक्मनासदत्॥१६॥ तं चिंपृष्ठे चिंवंधुरे रथे युंजंति यातवे। ऋषीणां सप्त धीतिभिः॥१७॥ तं सोंतारो धनस्पृतमाशुं वाजाय यातवे। हरिं हिनोत वाजिनं॥१८॥ आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः। शूरो न गोषु तिष्ठति॥१९॥ आ तं इंदो मदाय कं पयो दुहंत्यायवः। देवा देवेभ्यो मधु॥२०॥२७॥ आ नः सोमं पवित्र आ सृजता मधुमत्तमं। देवेभ्यो देवश्रुत्तमं॥२१॥ एते सोमा असृक्षत गृणानाः श्रवसे महे। मदिंतमस्य धारया॥२२॥ अभि गव्यानि वीतयें नृम्णा पुनानो अर्षसि। सनद्वाजः परिं स्रव॥२३॥ उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः। गृणानो जमदग्निना॥२४॥ पवस्व वाचो अंग्रियः सोमं चित्राभिरूतिभिः। अभि विश्वानि काव्या॥२५॥ ॥२८॥ त्वं समुद्रियां अपोऽग्रियो वाचं ईरयन्। पवस्व विश्वमेजय॥२६॥ तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे। तुभ्यमर्षंति सिंधवः॥२७॥ प्र तें दिवो न वृष्टयो धारा यंत्यसश्चतः। अभि शुक्रामुपस्तिरं॥२८॥ इंद्रायेंदो पुनीतनोग्रं दक्षाय साधनं। द्युमंतं वीतिरांधसं॥२९॥ पवमान ऋतः कविः सोमः पवित्रमासदत्। दधत्स्तोत्रे सुवीर्यं॥३०॥२९॥

॥ ६३ ॥ १–३० निधुविः काश्यपः ॥ पवमानः सोमः ॥ गायत्री ॥

॥६३॥ आ पवस्व सहस्रिणं रयिं सोम सुवीर्यं। अस्मे श्रवांसि धारय॥१॥ इषमूर्जं च पिन्वस इंद्राय मत्सरिंतमः। चमूष्वा नि षीदसि॥२॥ सुत इंद्राय विष्णवे सोमः कलशें अक्षरत्।

कविः इंद्राय पवते मदः ॥१४॥ गिरा जातः इह स्तुतः इंदुः इंद्राय धीयते विः योनां वसतौऽइव ॥१५॥२६॥ पवमानः सुतः नृऽभिः सोमः वाजंऽइव असरत् चमूषु शक्मना आऽसदं ॥१६॥ तं चिऽअष्टे विऽवंधुरे रथे युंजंति यातवे ऋषीणां सप्त धीतिऽभिः ॥१७॥ तं सोतारः धनऽस्पृतं आशुं वाजाय यातवे हरिं हिनोत वाजिनं ॥१८॥ आऽविशन् कलशं सुतः विश्वाः अर्षन् अभि श्रियः शूरः न गोषु तिष्ठति ॥१९॥ आ ते इंदो मदाय कं पयः दुहंति आयवः देवाः देवेभ्यः मधु ॥२०॥२७॥ आ नः सोम पवित्रे आ सृजत मधुमत्ऽतमं देवेभ्यः देवश्रुत्ऽतमं ॥२१॥ एते सोमाः असृक्षत गृणानाः अर्वसे महे मदिन्ऽतमस्य धारया ॥२२॥ अभि गव्यानि वीतये नृम्णा पुनानः अर्षसि सनत्ऽवाजः परि स्रव ॥२३॥ उत नः गोऽमतीः इषः विश्वाः अर्ष परिऽस्रुतः गृणानः जमत्ऽअग्निना ॥२४॥ पवस्व वाचः अग्रियः सोम चित्राभिः ऊतिऽभिः अभि विश्वानि काव्या ॥२५॥२८॥ त्वं समुद्रियाः अपः अग्रियः वाचः ईरयन् पवस्व विश्वंऽएजय ॥२६॥ तुभ्य इमा भुवना कवे महिम्ने सोम तस्थिरे तुभ्यं अर्षंति सिंधवः ॥२७॥ प्रते दिवः न वृष्टयः धाराः यंति असश्चतः अभि शुक्रां उपऽस्तिरं ॥२८॥ इंद्राय इंदो पुनीतन उर्वं दक्षाय साधनं ईशानं वीतिऽराधसं ॥२९॥ पवमानः ऋतः कविः सोमः पवित्रे आ असदत् दधत् स्तोत्रे सुऽवीर्यं ॥३०॥२९॥

॥६३॥ आ पवस्व सहस्रिणं रयिं सोम सुऽवीर्यं अस्मे श्रवांसि धारय ॥१॥ इषं ऊर्जं च पिन्वसे इंद्राय मत्सरिन्ऽतमः चमूषु आ नि सीदसि ॥२॥ सुतः इंद्राय विष्णवे सोमः कलशे अक्षरत्

मधुमाँ अस्तु वायवे ॥३॥ एते असृग्रमाशवोऽति ह्वरांसि बभ्रवः। सोमा ऋतस्य धारया ॥४॥ इंद्रं वर्धंतो अप्तुरः कृण्वंतो विश्वमार्यं। अपघ्नंतो अराव्णः ॥५॥३०॥ सुता अनु स्वमा रजोऽभ्यर्षंति बभ्रवः। इंद्रं गच्छंत इंदवः ॥६॥ अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मानुषीरपः ॥७॥ अयुक्त सूर एतशं पवमानो मनावधि। अंतरिक्षेण यातवे ॥८॥ उत त्या हरितो दश सूरो अयुक्त यातवे। इंदुरिंद्र इति ब्रुवन् ॥९॥ परीतो वायवे सुतं गिर इंद्राय मत्सरं। अव्यो वारेषु सिंचत ॥१०॥ ॥३१॥ पवमान विदा रयिमस्मभ्यं सोम दुष्टरं। न्यो दूणाशो वनुष्यता ॥११॥ अभ्यर्ष सहस्रिणं रयिं गोमंतमश्विनं। अभि वाजमुत श्रवः ॥१२॥ सोमो देवो न सूर्योऽद्रिभिः पवते सुतः। दधानः कलशे रसं ॥१३॥ एते धामान्यार्या शुक्रा ऋतस्य धारया। वाजं गोमंतमक्षरन् ॥१४॥ सुता इंद्राय वज्रिणे सोमासो दध्याशिरः। पवित्रमत्यक्षरन् ॥१५॥३२॥ प्र सोम मधुमत्तमो राये अर्ष पवित्र आ। मदो यो देववीतमः ॥१६॥ तमीं मृजंत्यायवो हरिं नदीषु वाजिनं। इंदुमिंद्राय मत्सरं ॥१७॥ आ पवस्व हिरण्यवदश्वावत्सोम वीरवत्। वाजं गोमंतमा भर ॥१८॥ परि वाजे न वाजयुमव्यो वारेषु सिंचत। इंद्राय मधुमत्तमं ॥१९॥ कविं मृजंति मर्ज्यं धीभिर्विप्रा अवस्यवः। वृषा कनिक्रदर्षति ॥२०॥३३॥ वृषणं धीभिरप्तुरं सोममृतस्य धारया। मती विप्राः समस्वरन् ॥२१॥ पवस्व देवायुषगिंद्रं गच्छतु ते मदः। वायुमा रोह धर्मणा ॥२२॥ पवमान नि तोशसे रयिं सोम श्रवाय्यं। प्रियः समुद्रमा विश ॥२३॥ अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः। नुदस्वादेवयुं जनं ॥२४॥

मधुऽमान् अस्तु वायवे ॥३॥ एते असृग्रं आशवः अत्यं हरांसि बभ्रवः सोमाः ऋतस्य धारया ॥४॥ इंद्रं वर्धंतः अप्ऽतुरः कृण्वंतः विश्वं आर्यं अपऽघ्नंतः अराव्णः ॥५॥३०॥ सुताः अनु स्वं आ रजः अभि अर्षंति बभ्रवः इंद्रं गच्छंतः इंदवः ॥६॥ अया पवस्व धार-या यया सूर्यं अरोचयः हिन्वानः मानुषीः अपः ॥७॥ अयुक्त सूरः एतशं पवमानः मनौ अधि अंतरिक्षेण यातवे ॥८॥ उत त्याः हरितः दश सूरः अयुक्त यातवे इंदुः इंद्रः इति ब्रुवन् ॥९॥ परि इतः वायवे सुतं गिरः इंद्राय मत्सरं अव्यः वारेषु सिंचत ॥१०॥ ॥३१॥ पवमान विदाः रयिं अस्मभ्यं सोम दुस्तरं यः दुःऽनशः वनुष्यता ॥११॥ अभि अर्ष सहस्रिणं रयिं गोऽमंतं अश्विनं अभि वाजं उत श्रवः ॥१२॥ सोमः देवः न सूर्यः अद्रिऽभिः पवते सुतः दधानः कलशे रसं ॥१३॥ एते धामानि आर्या शुक्राः ऋतस्य धारया वाजं गोऽमंतं अक्षरन् ॥१४॥ सुताः इंद्राय वज्रिणे सो-मासः दधिऽआशिरः पवित्रं अति अक्षरन् ॥१५॥३२॥ प्र सोम मधुमत्ऽतमः राये अर्ष पवित्रे आ मदः यः देवऽवीतमः ॥१६॥ तं ईं मृजंति आयवः हरिं नदीषु वाजिनं इंदुं इंद्राय मत्सरं ॥१७॥ आ पवस्व हिरण्यऽवत् अश्वऽवत् सोम वीरऽवत् वाजं गोऽमंतं आ भर ॥१८॥ परि वाजे न वाजऽयुं अव्यः वारेषु सिंचत इंद्राय मधुमत्ऽतमं ॥१९॥ कविं मृजंति मज्ये धीभिः विप्राः अवस्यवः वृषा कनिक्रत् अर्षति ॥२०॥३३॥ वृषणं धीभिः अप्ऽतुरं सोमं ऋतस्य धारया मती विप्राः सं अस्वरन् ॥२१॥ पवस्व देव आ-युषक् इंदो गृष्टिमुने मदः वायुं आ रोह धर्मणा ॥२२॥ पवमान नि तोशसे रयिं सोम श्रवाय्यं प्रियः समुद्रं आ विश ॥२३॥ अपऽघ्न् पवसे मृधः क्रतुऽवित् सोम मत्सरः नुदस्व अदेवऽयुं जनं ॥२४॥

पवमाना असृक्षत सोमाः शुक्रास इंदवः। अभि विश्वानि काव्या ॥२५॥३४॥ पवमानास आशवः शुभ्रा असृग्रमिंदवः। घ्नंतो विघ्ना अप द्विषः॥२६॥ पवमाना दिवस्पर्यंतरिक्षादसृक्षत। पृथिव्या अधि सानवि ॥२७॥ पुनानः सोम धारयेंदो विश्वा अप स्रिधः। जहि रक्षांसि सुक्रतो॥२८॥ अपघ्नन्सोम रक्षसोऽभ्यर्षा कनिक्रदत्। द्युमंतं शुष्ममुत्तमं॥२९॥ अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा। इंदो विश्वानि वार्या ॥३०॥३५॥

॥ ६४ ॥ १–३० कश्यपः ॥ पवमानः सोमः ॥ गायत्री ॥

॥ ६४ ॥ वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः। वृषा धर्माणि दधिषे ॥१॥ वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा मदः। सत्यं वृषन्वृषेदसि ॥२॥ अश्वो न चक्रदो वृषा सं गा इंदो समर्वतः। वि नो राये दुरो वृधि ॥३॥ असृक्षत प्र वाजिनो गव्या सोमासो अश्वया। शुक्रासो वीर्याशवः ॥४॥ शुंभमाना ऋतायुभिर्मृज्यमाना गभस्त्योः। पवंते वारे अव्यये ॥५॥३६॥ ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा। पवंतामांतरिक्ष्या ॥६॥ पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत। सूर्यस्येव न रश्मयः ॥७॥ केतुं कृण्वन्दिवस्परि विश्वा रूपाभ्यर्षसि। समुद्रः सोम पिन्वसे॥८॥ हिन्वानो वाचमिष्यसि पवमान विधर्मणि। अक्रान्देवो न सूर्यः ॥९॥ इंदुः पविष्ट चेतनः प्रियः कवीनां मती। सृजदश्वं रथीरिव ॥१०॥३७॥ ऊर्मिर्यस्ते पवित्र आ देवावीः पर्यक्षरत्। सीदन्नृतस्य योनिमा ॥११॥ स नो अर्ष पवित्र आ मदो यो देववीतमः। इंदविंद्राय पीतये ॥१२॥ दुषे पवस्व धारया मृज्यमानो मनीषिभिः। इंदो

पवमानाः असृक्षत सोमाः शुक्रासः इंदवः अभि विश्वानि काव्या ॥२५॥३४॥ पवमानासः आशवः शुभ्राः असृग्रं इंदवः मंतः विश्वाः अप द्विषः ॥२६॥ पवमानाः दिवः परि अंतरिक्षात् असृक्षत पृथिव्याः अधि सानवि ॥२७॥ पुनानः सोम धारया इंदो विश्वाः अप स्रिधः जहि रक्षाँसि सुऽक्रतो° ॥२८॥ अपऽघ्नन् सोम रक्षसः अभि अर्षं कनिक्रदत् हुऽमंतं शुष्मं उत्ऽतमं ॥२९॥ अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा इंदो विश्वानि वार्या ॥३०॥३५॥

॥ ६४ ॥ वृषा सोम द्युऽमान् असि वृषा देव वृषऽव्रतः वृषा धर्माणि दधिषे ॥१॥ वृष्णः ते वृष्ण्यं शवः वृषा वनं वृषा मदः सत्यं वृषन् वृषा इत् असि ॥२॥ अश्वः न चक्रदः वृषा सं गाः इंदो सं अर्वंतः वि नः राये दुरः वृधि ॥३॥ असृक्षत प्र वाजिनः गव्या सोमासः अश्वऽया शुक्रासः वीरऽया आशवः ॥४॥ शुंभमानाः ऋतयुऽभिः मृज्यमानाः गभस्त्योः पवंते वारे अव्यये ॥५॥३६॥ ते विश्वा दाशुषे वसु सोमाः दिव्यानि पार्थिवा पवंतां आ अंतरिक्ष्या ॥६॥ पवमानस्य विष्ऽवित् प्र ते सर्गाः असृक्षत सूर्यस्यऽइव न रश्मयः ॥७॥ केतुं कृण्वन् दिवः परि विश्वा रूपा अभि अर्षसि समुद्रः सोम पिन्वसे ॥८॥ हिन्वानः वाचं इषसि पवमान विऽधर्मणि अक्रान् देवः न सूर्यः ॥९॥ इंदुः पविष्ट चेतनः प्रियः कवीनां मती सुजत् अश्वं रथीःऽइव ॥१०॥३७॥ ऊर्मिः यः ते पविचे आ देवऽअवीः परिऽअक्षरत् सीदन् ऋतस्य योनिं आ ॥११॥ सः नः अर्षे पविचे आ मदः यः देवऽवीतमः इंदो इंद्राय पीतये ॥१२॥ इषे पवस्व धारया मृज्यमानः मनीषिऽभिः इंदो

रुचाभि गा इहि ॥१३॥ पुनानो वरिवस्कृध्यूर्जे जनाय गिर्वणः। हरे सृजान आशिरं ॥१४॥ पुनानो देववीतय इंद्रस्य याहि निष्कृतं। द्युतानो वाजिभिर्यतः ॥१५॥३८॥ प्र हिन्वानास इंदवोऽच्छा समुद्रमाशवः। धिया जूता असृक्षत ॥१६॥ मृजानास आयवो वृथा समुद्रमिंदवः। अग्मन्नृतस्य योनिमा ॥१७॥ परि णो याह्यस्मयुर्विश्वा वसून्योजसा। पाहि नः शर्म वीरवत् ॥१८॥ मिमाति वह्निरेतशः पदं युजान ऋक्वभिः। प्र यत्समुद्र आहितः ॥१९॥ आ यद्योनिं हिरण्ययमाशुर्ऋतस्य सीदति। जहात्यप्रचेतसः ॥२०॥३९॥ अभि वेना अनूषतेयक्षंति प्रचेतसः। मज्जंत्यविचेतसः ॥२१॥ इंद्रायेंदो मरुत्वते पवस्व मधुमत्तमः। ऋतस्य योनिमासदं ॥२२॥ तं त्वा विप्रा वचोविदः परिष्कृण्वंति वेधसः। सं त्वा मृजंत्यायवः ॥२३॥ रसं ते मित्रो अर्यमा पिबंति वरुणः कवे। पवमानस्य मरुतः ॥२४॥ त्वं सोम विपश्चितं पुनानो वाचमिष्यसि। इंदो सहस्रभर्णसं ॥२५॥४०॥ उतो सहस्रभर्णसं वाचं सोम मखस्युवं। पुनान इंदवा भर ॥२६॥ पुनान इंदवेषां पुरुहूत जनानां। प्रियः समुद्रमा विश ॥२७॥ दविद्युतत्या रुचा परिष्टोभंत्या कृपा। सोमाः शुक्रा गवाशिरः ॥२८॥ हिन्वानो हेतृभिर्यत आ वाजं वाज्यक्रमीत्। सीदंतो वनुषो यथा ॥२९॥ ऋधक्सोम स्वस्तये संजग्मानो दिवः कविः। पवस्व सूर्यो दृशे ॥३०॥४१॥१॥

॥ ६५ ॥ १-३० भृगुर्वारुणिर्जमदग्निर्वा ॥ पवमानः सोमः ॥ गायत्री ॥

॥६५॥ हिन्वंति सूरमुस्रयः स्वसारो जामयस्पतिं। महामिंदुं महीयुवः ॥१॥ पवमान रुचारुचा देवो देवेभ्यस्परि। विश्वा

रुचा अभि गाः इहि ॥१३॥ पुनानः वरिवः कृधि ऊर्जं जनाय गिर्वणः हरे सृजानः आऽशिरं॥१४॥ पुनानः देवऽवीतये इंद्रस्य याहि निःऽकृतं द्युतानः वाजिऽभिः यतः॥१५॥३८॥ प्र हिन्वानासः इंदवः अच्छ समुद्रं आशवः धिया जूताः असृक्षत ॥१६॥ मर्मृजानासः आयवः वृथा समुद्रं इंदवः अग्मन् ऋतस्य योनिं आ॥१७॥ परि नः याहि अस्मऽयुः विश्वा वसूनि ओजसा पाहि नः शर्म वीरऽवत् ॥१८॥ मिमाति वहिः एतशः पदं युजानः अर्कऽभिः प्र यत् समुद्रे आऽहितः॥१९॥ आ यत् योनिं हिरण्ययं आशुः ऋतस्य सीदति जहाति अप्रऽचेतसः ॥२०॥३९॥ अभि वेनाः अनूषत इयक्षंति प्रऽचेतसः मज्जंति अविऽचेतसः॥२१॥ इंद्राय इंदो मरुत्वते परिस्व मधुमत्ऽतमः ऋतस्य योनिं आऽसदं॥२२॥ तं त्वा विप्राः वचःऽविदः परि कृण्वंति वेधसः सं त्वा मृजंति आयवः॥२३॥ रसं ते मित्रः अर्यमा पिबंति वरुणः कवे परिमानस्य मरुतः॥२४॥ त्वं सोम विपःऽचितं पुनानः वाचं इष्यसि इंदो सहस्रऽभर्णसं ॥२५॥४०॥ उतो सहस्रऽभर्णसं वाचं सोम मखस्युवं पुनानः इंदो आ भर॥२६॥ पुनानः इंदो एषां पुरुऽहूत जनानां प्रियः समुद्रं आ विश॥२७॥ दविद्युतत्या रुचा परिऽस्तोभंत्या कृपा सोमाः शुक्राः गोऽआशिरः॥२८॥ हिन्वानः हेतृऽभिः यतः आ वाजं वाजी अक्रमीत् सीदतः वनुषः यथा ॥२९॥ वृधक् सोम स्वस्तये संऽजग्मानः दिवः कविः पवस्व सूर्यः दृशे॥३०॥४१॥ १॥

॥६५॥ हिन्वंति सूरं उषसः स्वसारः जामयः पतिं महां इंदुं महीयुवः॥१॥ पवमान रुचाऽरुचा देवः देवेभ्यः परि विश्वा

वसून्या विंश ॥२॥ आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः। इषे पवस्व संयतं ॥३॥ वृषा ह्यसि भानुना द्युमंतं त्वा हवामहे। पवमान स्वाध्यः ॥४॥ आ पवस्व सुवीर्यं मंदमानः स्वायुध। इहो ष्विंद्वा गहि ॥५॥१॥ यदद्भिः परिषिच्यसे मृज्यमानो गभस्त्योः। द्रुणा सधस्थमश्नुषे ॥६॥ प्र सोमाय व्यश्ववत्पवमानाय गायत। महे सहस्रचक्षसे ॥७॥ यस्य वर्णं मधुश्चुतं हरिं हिन्वंत्यद्रिभिः। इंदुमिंद्राय पीतये ॥८॥ तस्य ते वाजिनो वयं विश्वा धनानि जिग्युषः। सखित्वमा वृणीमहे ॥९॥ वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा ॥१०॥२॥ तं त्वा धर्तारमोण्योः पवमान स्वर्दृशं। हिन्वे वाजेषु वाजिनं ॥११॥ अया चित्तो विपानया हरिः पवस्व धारया। युजं वाजेषु चोदय ॥१२॥ आ नं इंदो महीमिषं पवस्व विश्वदर्शतः। अस्मभ्यं सोम गातुवित् ॥१३॥ आ कलशं अनूषतेंदो धाराभिरोजसा। एंद्रस्य पीतये विश ॥१४॥ यस्य ते मद्यं रसं तीव्रं दुहंत्यद्रिभिः। स पवस्वाभिमातिहा ॥१५॥३॥ राजा मेधाभिरीयते पवमानो मनावधि। अंतरिक्षेण यातवे ॥१६॥ आ नं इंदो शतग्विनं गवां पोषं स्वश्व्यं। वहा भगत्तिमूतये ॥१७॥ आ नः सोम सहो जुवो रूपं न वर्चसे भर। सुष्वाणो देववीतये ॥१८॥ अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्। सीदन्योनो न योनिमा ॥१९॥ अप्सा इंद्राय वायवे वरुणाय मरुद्भ्यः। सोमो अर्षति विष्णवे ॥२०॥४॥ इषे नो काय नो दधदस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणं ॥२१॥ ये सोमासः परावति ये अर्वावति सुन्विरे। ये वादः शर्यणावति ॥२२॥ य आजीकेषु कृत्वसु ये मध्ये पस्त्यानां। ये वा जनेषु पंचसु ॥२३॥

वसूनि आ विश ॥२॥ आ पवमान सुऽस्तुतिं वृष्टिं देवेभ्यः दुवः इषे पवस्व संऽयतं॥३॥ वृषा हि असि भानुना द्युऽमंतं त्वा हवामहे पवमान सुऽअभ्यः॥४॥ आ पवस्व सुऽवीर्यं मंदमानः सुऽआयुधः इहो सु इंदो आ गहि॥५॥१॥ यत् अतऽभिः परिऽसिच्यसे मृज्यमानः गभस्त्योः द्रुणा सधऽस्थं अश्नुषे॥६॥ प्र सोमाय व्यश्वऽवत् पवमानाय गायत महे सहस्रंऽचक्षसे॥७॥ यस्य वर्णं मधुऽश्चुतं हरिं हिन्वंति अद्रिऽभिः इंदुं इंद्राय पीतये॥८॥ तस्य ते वाजिनः वयं विश्वा धनानि जिग्युषः सखिऽत्वं आ वृणीमहे॥९॥ वृषा पवस्व धारया मरुत्वते च मत्सरः विश्वा दधानः ओजसा ॥१०॥२॥ तं त्वा धर्तारं ओण्योः पवमान स्वःऽदृशं हिन्वे वाजेषु वाजिनं॥११॥ अया चित्तः विषा अनया हरिः पवस्व धारया युजं वाजेषु चोदय॥१२॥ आ नः इंदो महीं इषं पवस्व विश्वऽदर्शतः अस्मभ्यं सोम गातुऽवित्॥१३॥ आ कलशाः अनूषत इंदो धाराभिः ओजसा आ इंद्रस्य पीतये विश॥१४॥ यस्य ते मद्यं रसं तीव्रं दुहंति अद्रिऽभिः सः पवस्व अभिमातिऽहा॥१५॥३॥ राजा मेधाभिः ईयते पवमानः मनौ अधि अंतरिक्षेण यातवे॥१६॥ आ नः इंदो शतऽग्विनं गवां पोषं सुऽअभ्यं वह भगत्तिं ऊतये ॥१७॥ आ नः सोम सहः जुवः रूपं न वर्चसे भर सुऽअवानः देवऽवीतये॥१८॥ अपं सोम द्युमत्ऽतमः अभि द्रोणानि रोरुवत् सीदन् योनः न योनिं आ॥१९॥ अप्साः इंद्राय वायवे वरुणाय मरुत्ऽभ्यः सोमः अर्षति विष्णवे॥२०॥४॥ इषं तोकाय नः दधत् अस्मभ्यं सोम विश्वतः आ पवस्व सहस्रिणं॥२१॥ ये सोमासः परऽवति ये अर्वाऽवति सुन्विरे ये वा सदः समुद्रऽवति॥२२॥ ये आजिं कृषुं कृत्वऽसु ये मध्ये पस्त्यानां ये वा जनेषु पंचऽसु॥२३॥

ते नो वृष्टिं दिवस्परि पवंतामा सुवीर्यं। सुवाना देवास इंदवः ॥२४॥ पवंते हर्यतो हरिर्गृणानो जमदग्निना। हिन्वानो गोरधि त्वचि ॥२५॥५॥ प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः। श्रीणाना अप्सु मृंजत ॥२६॥ तं त्वा सुतेष्वाभुवो हिन्विरे देवतातये। स पवस्वानया रुचा ॥२७॥ आ ते दक्षं मयोभुवं वहिष्ठमद्या वृणीमहे। पांतमा पुरुस्पृहं ॥२८॥ आ मंद्रमा वरेण्यमा विप्रमा मनीषिणं। पांतमा पुरुस्पृहं ॥२९॥ आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा। पांतमा पुरुस्पृहं ॥३०॥६॥

॥६६॥ १–३० शत वैखानसाः ॥ १–१८ २२–३० पवमानः सोमः। १९–२१ अग्निः ॥ १–१७ १९–३० गायत्री। १८ अनुष्टुप् ॥

॥६६॥ पवस्व विश्वचर्षणेऽभि विश्वानि काव्या। सखा सखिभ्य ईड्यः ॥१॥ ताभ्यां विश्वस्य राजसि ये पवमान धामनी। प्रतीची सोम तस्थतुः ॥२॥ परि धामानि यानिं ते त्वं सोमासि विश्वतः। पवमान ऋतुभिः कवे ॥३॥ पवस्व जनयन्निषोऽभि विश्वानि वार्या। सखा सखिभ्य ऊतये ॥४॥ तवं शुक्रासो अर्चयो दिवस्पृष्ठे वि तन्वते। पवित्रं सोम धामभिः ॥५॥७॥ तवेमे सप्त सिंधवः प्रशिषं सोम सिस्रते। तुभ्यं धावंति धेनवः ॥६॥ प्र सोम याहि धारया सुत इंद्राय मत्सरः। दधानो अक्षिति श्रवः ॥७॥ ससुं त्वा धीभिरस्वरन्हिन्वतीः सप्त जामयः। विप्रमाजा विवस्वतः ॥८॥ मृजंति त्वा समग्युवोऽव्ये जीरावधि ग्रणि। रेभो यदुज्यसे वनं ॥९॥ पवमानस्य ते कवे वाजिन्सर्गा असृक्षत। अर्वंतो न श्रवस्यवः ॥१०॥८॥ अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये। अवावशंत धीतयः ॥११॥ अच्छा समुद्रमिंदवोऽस्तं गावो न धेनवः। अग्मन्नृतस्य योनिमा ॥१२॥ प्र णं इंदो महे रण

ते नः वृष्टिं दिवः परि पवंतां आ सुऽवीर्यं सुवानाः देवासः इंदवः ॥२४॥ पवंते हर्यतः हरिः गृणानः जमत्ऽअग्निना हिन्वानः गोः अधि त्वचि ॥२५॥५॥ प्र पुनानासः वयःऽजुवः हिन्वानासः न सप्तयः श्रीणानाः अप्ऽसु मृंजत ॥२६॥ तं त्वा सुतेषु आऽभुवः हिन्विरे देवऽतातये सः पवस्व अनया रुचा ॥२७॥ आ ते दक्षं मयःऽभुवं वहिं अद्य वृणीमहे पांतं आ पुरुऽस्पृहं ॥२८॥ आ मंद्रं आ वरेण्यं आ विप्रं आ मनीषिणं पांतं आ पुरुऽस्पृहं ॥२९॥ आ रयिं आ सुऽचेतुनं आ सुऽक्रतो॰ तनूषु आ पांतं आ पुरुऽस्पृहं ॥३०॥६॥

॥ ६६ ॥ पवस्व विश्वऽचर्षणे अभि विश्वानि काव्या सखा सखिऽभ्यः ईड्यः ॥१॥ ताभ्यां विश्वस्य राजसि ये पवमान धामनो प्रतीची सोम तस्थतुः ॥२॥ परि धामानि यानिं ते त्वं सोम असि विश्वतः पवमान ऋतुऽभिः कवे ॥३॥ पवस्व जनयन् इषः अभि विश्वानि वार्या सखा सखिऽभ्यः ऊतये ॥४॥ तव पुनासः अर्चयः दिवः पृष्ठे वि तन्वते पवित्रं सोम धामऽभिः ॥५॥७॥ तव इमे सप्त सिंधवः प्रऽशिषं सोम सिस्रते तुभ्यं धावंति धेनवः ॥६॥ प्र सोम याहि धारया सुतः इंद्राय मत्सरः दधानः अक्षिति श्रवः ॥७॥ सं ऊं त्वा धीभिः अस्वरन् हिन्वतीः सप्त जामयः विप्रं आजा विऽवस्वतः ॥८॥ मृजंति त्वा सं अयुवः अश्वं जीरौ अधि स्वनिं रेभः यत् अज्यसे वने ॥९॥ पवमानस्य ते कवे वाजिन् सर्गाः असृक्षत अर्वंतः न श्रवस्यवः ॥१०॥८॥ अच्छं कोशं मधुऽश्चुतं असृग्रं वारे अव्यये अवावशंत धीतयः ॥११॥ अच्छं समुद्रं इंदवः अस्तं गावः न धेनवः अग्मन् ऋतस्य योनिं आ ॥१२॥ प्र नः इंदो महे रणे

आपो॒ अर्षंति॒ सिंधवः। यत्रो॒भिवा॑सयि॒ष्यसे॑ ॥१३॥ अस्य॑ ते सख्ये॒ वयमिय॑क्षंतस्त्वोतयः। इंदो॑ सखि॒त्वमु॑श्मसि ॥१४॥ आ प॑वस्व॒ गवि॑ष्टये म॒हे सो॑म नृचक्ष॒से। एंद्र॑स्य ज॒ठरे॑ विश ॥१५॥९॥ महाँ॑ असि सोम॒ ज्येष्ठ॑ उ॒ग्राणा॑मिंद॒ ओजि॑ष्ठः। युध्वा॒ सञ्छश्व॑ज्जिगेथ ॥१६॥ य उ॒ग्रेभ्य॑श्चि॒दोजी॑याञ्छू॒रेभ्य॑श्चिच्छू॒रत॑रः। भूरि॑दाभ्यश्चिन्म॒हीया॑न् ॥१७॥ त्वं सो॑म॒ सूर्.एर्यस्तो॒कस्य॑ सा॒ता त॒नूना॑। वृणी॑महे सख्या॒य वृणी॑महे यु॒ज्याय ॥१८॥ अग्न॒ आयूं॑षि पवस॒ आ सु॒वोर्ज॒मिषं॑ च नः। आरे॑ बाधस्व दुच्छुना॑ ॥१९॥ अग्निर्ऋषिः॑ पवमा॒नः पां॑चजन्यः॒ पुरो॑हितः। तमी॑महे महाग॒यं ॥२०॥१०॥ अग्ने॒ पव॑स्व॒ स्वपा॑ अ॒स्मे व॒र्चः॑ सु॒वीर्यं॑। दधद्र॒यिं मयि॒ पोषं॑ ॥२१॥ पव॑मानो॒ अति॒ स्रिधो॒ऽभ्यर्षति॒ सुष्टु॑तिं। सूरो॒ न वि॒श्वदं॑शतः ॥२२॥ स मं॑मृजा॒न आ॒युभिः॒ प्रय॑स्वा॒न्प्रय॑से हि॒तः। इंदु॑रत्यो॒ विच॑क्षणः ॥२३॥ पव॑मान ऋ॒तं बृ॒हच्छु॒क्रं ज्योति॑रजीजनत्। कृ॒ष्णा तमां॑सि॒ जंघ॑नत् ॥२४॥ पव॑मानस्य॒ जंघ्न॑तो॒ हरे॑श्चंद्रा॒ अस॑ृक्षत। जी॒रा अ॑जि॒रशो॑चिषः ॥२५॥११॥ पव॑मानो॒ रथी॑तमः॒ शुभ्रे॑भिः॒ शुभ्र॑शस्तमः। हरि॑श्चंद्रो म॒रुत्व॑णः ॥२६॥ पव॑मानो॒ व्यश्ववद्गो॒मंतं॑ वाज॒सात॑मः। द॒धत्स्तो॒त्रे सु॒वीर्यं॑ ॥२७॥ प्र सु॑वा॒न इंदु॑रक्षाः प॒वित्र॑मत्य॒व्ययं॑। पु॒ना॒न इंदु॑रिंद्र॒मा ॥२८॥ ए॒ष सो॑मो॒ अधि॒ त्वचि॑ गवां क्रीळ॒त्यद्रि॑भिः। इंदुं॒ मदा॑य॒ जोहु॑वत् ॥२९॥ यस्य॑ ते॒ द्युम्न॑वत्पयः॒ पव॑मानाभृ॒तं दि॒वः। तेन॑ नो मृळ जी॒वसे॑ ॥३०॥१२॥

आपः अर्षन्ति सिंधवः यत् गोभिः वासयिष्यसे ॥ १३ ॥ अस्य ते सख्ये वयं इंद्रियन्तः त्वाऽऊतयः इंदो सखिऽत्वं उश्मसि ॥ १४ ॥ आ पवस्व गोऽइष्टये महे सोम नृऽचक्षसे आ इंद्रस्य जठरे विश ॥ १५ ॥ ९ ॥ महान् असि सोम ज्येष्ठः उग्राणां इंदो ओजिष्ठः युध्वा सन् शश्वत् जिगेथ ॥ १६ ॥ यः उग्रेभ्यः चित् ओजीयान् शूरेभ्यः चित् शूरऽतरः भूरिऽदाभ्यः चित् मंहीयान् ॥ १७ ॥ त्वं सोम सूरः आ इयर्षि तोकस्य साता तनूनां वृणीमहे सख्याय वृणीमहे युज्याय ॥ १८ ॥ अग्ने आयूंषि पवसे आ सुव ऊर्जं इषं च नः आरे बाधस्व दुच्छुनां ॥ १९ ॥ अग्निः ऋषिः पवमानः पांचऽजन्यः पुरःऽहितः तं ईमहे महाऽगयं ॥ २० ॥ १० ॥ अग्ने पवस्व सुऽअपाः अस्मे वर्चः सुऽवीर्यं दधत् रयिं मयि पोषं ॥ २१ ॥ पवमानः अति स्रिधः अभि अर्षति सुऽस्तुतिं सूरः न विश्वऽदर्शतः ॥ २२ ॥ सः मर्मृजानः आयुऽभिः प्रयस्वान् प्रयसे हितः इंदुः अत्यः विऽचक्षणः ॥ २३ ॥ पवमानः ऋतं बृहत् शुक्रं ज्योतिः अजीजनत् कृष्णा तमांसि जंघनत् ॥ २४ ॥ पवमानस्य जंघ्नतः हरेः चंद्राः असृक्षत जीराः अजिरऽशोचिषः ॥ २५ ॥ ११ ॥ पवमानः रयिऽतमः शुभ्रेभिः शुभ्रशंऽतमः हरिऽचंद्रः मरुत्ऽगणः ॥ २६ ॥ पवमानः वि अश्नवत् रश्मिऽभिः वाजऽसातमः दधत् स्तोत्रे सुऽवीर्यं ॥ २७ ॥ प्र सुवानः इंदुः अक्षाः पवित्रं अति अव्ययं पुनानः इंदुः इंद्रं आ ॥ २८ ॥ एषः सोमः अधि त्वचि गवां क्रीळति अद्रिऽभिः इंद्रं मदाय जोहुवत् ॥ २९ ॥ यस्य ते द्युम्नऽवत् पयः पवमान आऽभृतं रिषः तेन नः मृळ जीवसे ॥ ३० ॥ १२ ॥

॥ ६७ ॥ १–३ भरद्वाजः । ४–६ कश्यपः । ७–९ गोतमः । १०–१२ अत्रिः । १३–१५ विश्वामित्रः । १६–१८ जमदग्निः । १९–२१ वसिष्ठः । २२–३२ पवित्रो वसिष्ठो वोभौ वा ॥ १–९. १३–२२. २८–३० पवमानः सोमः । १०–१२ पवमानः सोमः पूषा वा । २३. २४ अग्निः । २५ अग्निः सविता वा । २६ अग्निरग्निर्वा सविता च । २७ अग्निर्विश्वे देवा वा । ३१. ३२ पावमान्यश्चेतृसुतिः ॥ १–१५. १९–२६. २८ २९ गायत्री । १६–१८ द्विपदा गायत्री । २७. ३१. ३२ अनुष्टुप् । ३० पुरउष्णिक् ॥

॥ ६७ ॥ त्वं सोमासि धार्युर्मन्द्र ओजिष्ठो अध्वरे । पवस्व मंहयद्रयिः ॥ १ ॥ त्वं सुतो नृमादनो दध्न्वान्मत्सरिंतमः । इंद्राय सूरिरंधसा ॥ २ ॥ त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत् । द्युमंतं शुष्ममुत्तमं ॥ ३ ॥ इंदुर्हिन्वानो अर्षति तिरो वारांण्यव्यया । हरिर्वाजमचिक्रदत् ॥ ४ ॥ इंदो व्यव्यमर्षसि वि श्रवांसि वि सौभगा । वि वाजान्सोम गोमंतः ॥ ५ ॥ १३ ॥ आ नं इंदो शतग्विनं रयिं गोमंतमश्विनं । भरा सोम सहस्रिणं ॥ ६ ॥ पवमानास इंदवस्तिरः पवित्रमाशवः । इंद्रं यामेभिराशत ॥ ७ ॥ ककुहः सोम्यो रस इंदुरिंद्राय पूर्व्यः । आयुः पवत आयवे ॥ ८ ॥ हिन्वंति सूरसुस्रयः पवमानं मधुश्चुतं । अभि गिरा समस्वरन् ॥ ९ ॥ अविता नो अजाश्वः पूषा यामनियामनि । आ भक्षात्कन्यासु नः ॥ १० ॥ १४ ॥ अयं सोमः कपर्दिनें घृतं न पवते मधु । आ भक्षात्कन्यासु नः ॥ ११ ॥ अयं त आघृणे सुतो घृतं न पवते शुचिं । आ भक्षात्कन्यासु नः ॥ १२ ॥ वाचो जंतुः कवीनां पवस्व सोम धारया । देवेषु रत्नधा असि ॥ १३ ॥ आ कलशेषु धावति पवित्रे परि षिच्यते । उक्थैर्यज्ञेषु वर्धते ॥ १४ ॥ परि प्र सोम ते रसोऽसर्जि कलशे सुतः । श्येनो न तक्तो अर्षति ॥ १५ ॥ १५ ॥ पवस्व सोम मंदयन्निंद्राय मधुमत्तमः ॥ १६ ॥ असृग्रन्देववीतये वाजयंतो रथा इव ॥ १७ ॥ ते सुतासो मदिंतमाः शुक्रा वायुमसृक्षत ॥ १८ ॥ याश्चेषा तुन्वो अभिष्टुतः पवित्रं सोम गच्छसि । दधत्स्तोत्रे सुवीर्यं ॥ १९ ॥

॥ ६७ ॥ त्वं सोम असि धारयुः मंद्रः ओजिष्ठः अध्वरे पवस्व मंहयत्ऽरयिः ॥१॥ त्वं सुतः नृऽमादनः दधन्वान् मत्सरिन्ऽतमः इंद्राय सूरिः अंधसा ॥२॥ त्वं सुस्वानः अद्रिऽभिः अभि अर्षं कनिक्रदत् द्युऽमंतं शुष्मं उत्ऽनमं ॥३॥ इंदुः हिन्वानः अर्षति तिरः वारांणि अव्यया हरिः वाजं अचिक्रदत् ॥४॥ इंदो वि अव्यं अर्षसि वि श्रवांसि वि सौभगा वि वाजान् सोम गोऽमंतः ॥५॥१३॥ आ नः इंदो शतऽग्विनं रयिं गोऽमंतं अश्विनं भरं सोम सहस्रिणं ॥६॥ पवमानासः इंदवः तिरः पविचं आशवः इंद्रं यामेभिः आशत ॥७॥ ककुहः सोम्यः रसः इंदुः इंद्राय पूर्व्यः आयुः पवते आयवे ॥८॥ हिन्वंति सूरं उस्रयः पवमानं मधुऽश्चुतं अभि गिरा सं अस्वरन् ॥९॥ अविता नः अजऽअश्वः पूषा यामंनिऽयामनि आ भक्षत् कन्यासु नः ॥१०॥१४॥ अयं सोमः कपर्दिने घृतं न पवते मधु आ भक्षत् कन्यासु नः ॥११॥ अयं ते आघृणे सुतः घृतं न पवते शुचिं आ भक्षत् कन्यासु नः ॥१२॥ वाचः जंतुः कवीनां पवस्व सोम धारया देवेषु रत्नऽधाः असि ॥१३॥ आ कलशेषु धावति श्येनः वर्मं वि गाहते अभि द्रोणा कनिक्रदत् ॥१४॥ परि प्र सोम ते रसः असर्जि कलशे सुतः श्येनः न तक्तः अर्षति ॥१५॥ ॥१५॥ पवस्व सोम मंदयन् इंद्राय मधुमत्ऽतमः ॥१६॥ असृग्रन् देवऽवीतये वाजऽयंतः रथाःऽइव ॥१७॥ ते सुतासः मदिन्ऽतमाः शुक्राः वायुं असृक्षत ॥१८॥ यावणा तुग्रः अभिऽस्तुतः पविचं सोम गच्छसि दधत् स्तोत्रे सुऽवीर्यं ॥१९॥

एष तुच्यो अभिष्टुतः पवित्रमति गाहते । रक्षोहा वारमव्ययं ॥२०॥१६॥ यदंति यच्च दूरके भयं विंदति मामिह । पवमान वि तज्जहि ॥२१॥ पवमानः सो अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु नः ॥२२॥ यत्ते पवित्रमर्चिष्यग्ने वितततमंतरा । ब्रह्म तेन पुनीहि नः ॥२३॥ यत्ते पवित्रमर्चिष्वदग्ने तेन पुनीहि नः । ब्रह्मसवैः पुनीहि नः ॥२४॥ उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥२५॥१७॥ त्रिभिष्ट्वं देव सवितर्वसुभिः सोम धामभिः । अग्ने दक्षैः पुनीहि नः ॥२६॥ पुनंतु मा देवजनाः पुनंतु वसवो धिया । विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा ॥२७॥ प्र प्यायस्व प्र स्यंदस्व सोम विश्वेभिरंशुभिः । देवेभ्य उत्तमं हविः ॥२८॥ उप प्रियं पनिप्नतं युवानमाहुतीवृधं । अगन्म बिभ्रतो नमः ॥२९॥ अलाय्यस्य परशुर्ननाश तमा यवस्व देव सोम । आखुं चिदेव देव सोम ॥३०॥ यः पावमानीरध्येत्यृषिभिः संभृतं रसं । सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥३१॥ पावमानीर्यो अध्येत्यृषिभिः संभृतं रसं । तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकं ॥३२॥१८॥३॥

॥ ६८ ॥ १–१० वत्सप्रिभालंदनः ॥ पवमानः सोमः ॥ १–९ जगती । १० त्रिष्टुप् ॥

॥६८॥ प्र देवमच्छा मधुमंत इंदवोऽसिष्यदंत गाव आ न धेनवः । वर्हिषदो वचनावंत ऊर्धभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥१॥ स रोरुवदुभि पूर्वीरृचिक्रददुपारुहः शतयंन्त्स्वादते हरिः । तिरः पवित्रं परियन्नुरु ज्रयो नि शर्याणि दधते देव आ वरं ॥२॥ वि यो ममे यम्या संयती मदः साकंवृधा पयसा पिन्वदक्षिता । मही अपारे रजसी

एषः तुन्नः अभिऽस्तुतः पविऽत्रं अति गाहते रक्षःऽहा वारं अव्ययं॥२०॥१६॥ यत् अंति यत् च दूरके भयं विंदति मां इह पवमानं वि तत् जहि ॥२१॥ पवमानः सः अद्य नः पविऽत्रेण विचर्षणिः यः पोता सः पुनातु नः ॥२२॥ यत् ते पविऽत्रं अर्चिषि अग्ने विऽततं अंतः आ ब्रह्म तेन पुनीहि नः॥२३॥ यत् ते पविऽत्रं अर्चिऽअत् अग्ने तेन पुनीहि नः ब्रह्मऽअसवैः पुनीहि नः॥२४॥ उभाभ्यां देव सवितः पविऽत्रेण सवेन च मां पुनीहि विश्वतः॥२५॥ ॥१७॥ चिऽभिः त्वं देव सवितः वरिष्ठैः सोम धामऽभिः अग्ने दक्षैः पुनीहि नः॥२६॥ पुनंतु मां देवऽजनाः पुनंतु वसवः धिया विश्वे देवाः पुनीत मा जातऽवेदः पुनीहि मा॥२७॥ प्र प्यायस्व प्र स्यंदस्व सोम विश्वेभिः अंशुऽभिः देवेभ्यः उत्ऽतमं हविः॥२८॥ उप प्रियं पनिप्नतं युवानं आहुतिऽवृधं अगन्म बिभ्रतः नमः॥२९॥ अलाय्यस्य परशुः ननाश तं आ पवस्व देव सोम आखुं चित् एव देव सोम॥३०॥ यः पावमानीः अधिऽएति ऋषिऽभिः संऽभृतं रसं सर्वं सः पूतं अश्नाति स्वदितं मातरिश्वना॥३१॥ पावमानीः यः अधिऽएति ऋषिऽभिः संऽभृतं रसं तस्मै सरस्वती दुहे क्षीरं सर्पिः मधु उदकं॥३२॥१८॥३॥

॥६८॥ प्र देवं अच्छ मधुऽमंतः इंदवः असिस्यदंत गावः आ न धेनवः वर्हिऽसदः वचनाऽवंतः ऊधऽभिः परिऽसुतं उस्रियाः निःऽनिजं धिरे॥१॥ सः रोरुवत् अभि पूर्वीः अचिक्रदत् उपऽआरुहः व्ययमन् स्वादते हरिः तिरः पविऽत्रं परिऽयन् उरु ज्रयः नि शर्याणि दधते देवः आ वरं॥२॥ वि यः ममे यम्या संऽयती मदः साकंऽवृधा पयसा पिन्वत् अक्षिता मही अपारे रजसी

विवेविदद्भिर्व्रजन्नधितं पाज आ ददे॥३॥ स मातरा विचरन्वाजयन्नपः प्र मेधिरः स्वधया पिन्वते पदं। अंशुर्यवेन पिपिशे यतो नृभिः सं जामिभिर्नसते रक्षते शिरः॥४॥ सं दक्षेण मनसा जायते कविश्चेतस्य गर्भो निहितो यमा परः। यूना ह सन्ता प्रथमं वि जज्ञतुर्गुहा हितं जनिम नेममुद्यतं॥५॥१९॥ मंद्रस्य रूपं विविदुर्मनीषिणः श्येनो यदधो अभरत्परावतः। तं मर्जयन्त सुवृधं नदीष्वाँ उशंतमंशुं परियंतमृग्मियं॥६॥ त्वां मृजंति दश योषणः सुतं सोम ऋषिभिर्मतिभिर्धीतिभिर्हितं। अव्यो वारेभिरुत देवहूतिभिर्नृभिर्यतो वाजमा दर्षि सातये॥७॥ परिप्रयंतं वय्यं सुषंसदं सोमं मनीषा अभ्यनूषत स्तुभः। यो धारया मधुमाँ ऊर्मिणा दिव इयर्ति वाचं रयिषाळमर्त्यः॥८॥ अयं दिव इयर्ति विश्वमा रजः सोमः पुनानः कलशेषु सीदति। अद्भिर्गोभिर्मृज्यते अद्रिभिः सुतः पुनान इंदुर्वरिवो विदत्पियं॥९॥ एवा नः सोम परिषिच्यमानो वयो दधच्चित्रतमं पवस्व। अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरं॥१०॥२०॥

॥ ६९ ॥ १–१० हिरण्यस्तूपः ॥ पवमानः सोमः ॥ १–८ जगती । ९. १० त्रिष्टुप् ॥

॥६९॥ इषुर्न धन्वन्प्रति धीयते मतिर्वत्सो न मातुरुप सर्ज्यूधनि । उरुधारेव दुहे अग्र आयत्यस्य व्रतेष्वपि सोम इष्यते॥१॥ उपो मतिः पृच्यते सिच्यते मधु मंद्राजनी चोदते अंतरासनि । पवमानः संतनिः प्रघ्नतामिव मधुमान्द्रप्सः परि वारमर्षति॥२॥ अग्रे वधूयुः पवते परि त्वचि श्रथ्नीते नप्तीरदितेर्ऋतं यते । हरिरक्रान्यजतः सँयतो मदो नृम्णा शिशानो महिषो न शोभते॥३॥ उक्षा मिमाति प्रति यंति धेनवो

विऽवेविदत् अभिऽअर्जन् अस्थितं पाजः आ ददे॥३॥ सः मातरा विऽचरन् वाजयन् अपः प्र मेधिरः स्वधया पिन्वते पदं अंशुः यवेन पिपिशे यतः नृऽभिः सं जामिऽभिः नसते रक्षते शिरः ॥४॥ सं दक्षेण मनसा जायते कविः ऋतस्य गर्भः निऽहितः यमा परः यूना ह संता प्रथमं वि जज्ञतुः गुहा हितं जनिम नेमं उत्ऽअयते॥५॥१९॥ मंद्रस्य रूपं विविदुः मनीषिणः श्येनः यत् अंधः अभरत् पराऽवतः तं मृजंयंत सुऽवृधं नदीषु आ उशंतं अंशुं परिऽअयंतं ऊर्मिऽयं॥६॥ त्वां मृजंति दश योषणः सुतं सोमं ऋषिऽभिः मतिऽभिः धीतिऽभिः हितं अर्व्यः वारेभिः उत देवहूतिऽभिः नृऽभिः यतः वाजं आ दर्षि सातये॥७॥ परिऽप्रयंतं वय्यं सुऽसंसदं सोमं मनीषाः अभि अनूषत स्तुभः यः धारया मधुऽमान् ऊर्मिणा दिवः इयर्ति वाचं रयिपाट् अमर्त्यः॥८॥ अयं दिवः इयर्ति विश्वं आ रजः सोमः पुनानः कलशेषु सीदति अतऽभिः गोभिः मृज्यते अद्रिऽभिः सुतः पुनानः इंदुः वरिवः विदत् प्रियं॥९॥ एव नः सोम परिऽसिच्यमानः वयः दधत् चित्रऽतमं पवस्व अद्वेषे द्यावापृथिवी हुवेम देवाः धत्त रयिं अस्मे सुऽवीरं॥१०॥२०॥

॥६९॥ इयुः न धन्वन् प्रति धीयते मतिः वत्सः न मातुः उधनि ऊर्जि ऊधनि उरुधाराऽइव दुहे अह्यं आऽयती अस्य व्रते षु अपि सोमः इष्यते॥१॥ उपो मतिः पृच्यते सिच्यते मधु मंद्रऽअजनी चोदते अंतः आसनि पवमानः संऽअनिः प्रऽमतांऽइव मधुऽमान् द्रप्सः परि वारं अर्षति॥२॥ अर्ष वधूऽयुः पवते परि त्वचि अधीते नप्तीः अदितेः ऋतं यते हरिः अक्रान् यजतः संऽयतः मदः नृम्णा शिशानः महिषः न शोभते॥३॥ उक्षा मिमाति प्रति यंति धेनवः

देवस्य देवीरुषसो यंति निष्कृतं। अत्यंक्रमीद्दुर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत॥४॥ अमृक्तेन रुशता वासंसा हरिरमर्त्यो निर्णिजानः परि व्यत। दिवस्पृष्ठं बृहणा निर्णिजे कृतोपस्तरणं चम्वोर्नभस्मयं॥५॥२१॥ सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुपः साकमीरते। तंतुं ततं परि सर्गास आशवो नेंद्राहते पवते धाम किं चन॥६॥ सिंधोरिव प्रवणे निम्न आशवो वृषच्युता मदासो गातुमाशत। शं नो निवेशे द्विपदे चतुष्पदेऽस्मे वाजाः सोम तिष्ठंतु कृष्टयः॥७॥ आ नः पवस्व वसुमद्धिरण्यवद्दस्रावक्षोमद्यवमत्सुवीर्यं। यूयं हि सोम पितरो मम स्थन दिवो मूर्धानः प्रस्थिता वयस्कृतः॥८॥ एते सोमाः पवमानास इंद्रं रथा इव प्र यंयुः सातिमच्छं। सुताः पवित्रमति यंत्यव्यं हित्वी वयिं हरितो वृष्टिमच्छं॥९॥ इंदविंद्राय बृहते पवस्व सुमृळीको अनवद्यो रिशादाः। भरा चंद्राणि गृणते वसूनि देवद्यावापृथिवी आवतं नः॥१०॥२२॥

॥ ७० ॥ १–१० रेणुर्वैश्वामित्रः ॥ पवमानः सोमः ॥ १–९ भगती । १० त्रिष्टुप् ॥

॥ ७० ॥ चिरंस्मे सन्न धेनवो दुदुह्रे सत्यामाशिरं पूर्व्ये व्योमनि। चत्वार्येन्या भुवनानि निर्णिजे चारूणि चक्रे यहतिरवर्धत॥१॥ स भिद्यमाणो अमृतस्य चारुणो उभे द्यावा काव्येना वि शश्रये। तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः॥२॥ ते अस्य संतु केतवोऽमृत्यवोऽदाभ्यासो अनुपीं उभे अनु। येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत॥३॥ स मृज्यमानो दशभिः सुकर्मभिः प्र मध्यमासु मातृषु प्रमे सचा। घृतानि पानो अमृतस्य

देवस्य देवीः उप यंति निःऽकृतं अतिं अक्रमीत् अर्जुनं वारं अव्ययं अत्कं न निक्तं परि सोमः अव्यत ॥४॥ अमृक्तेन रुशता वासंसा हरिः अमर्त्यः निःऽनिजानः परि व्यत दिवः पृष्ठं बर्हणा निःऽनिजे कृत उपऽस्तरणं चम्वोः नभस्मयं ॥५॥ २१॥ सूर्यस्यऽइव रश्मयः द्रवयित्नवः मत्सरासः प्रऽसुपः साकं ईरते तंतुं ततं परि सर्गासः आशवः न इंद्रात् ऋते पवते धाम किं चन ॥६॥ सिंधोःऽइव प्रवणे निम्ने आशवः वृषऽच्युताः मदासः गातुं आशत शं नः निऽवेशे द्विऽपदे चतुःऽपदे अस्मे वाजाः सोम तिष्ठंतु कृष्टयः ॥७॥ आ नः पवस्व वसुंऽमत् हिरण्यऽवत् अश्वंऽवत् गोऽमंत् यवंऽमत् सुऽवीर्यं यूयं हि सोम पितरः मम स्थन दिवः मूर्धानः प्रऽस्थिताः वयःऽकृतः ॥८॥ एते सोमाः पवमानासः इंद्रे रथाःऽइव प्र ययुः सातिं अच्छ सुताः पवित्रं अतिं यंति अव्यं हित्वी वव्रिं हरितः वृषिं अच्छ ॥९॥ इंदो इंद्राय बृहते पवस्व सुऽमृळीकः अनवद्यः रिशादाः भरं चंद्राणि गृणते वसूनि देवैः द्यावापृथिवी प्र श्रवतं नः ॥१०॥ २२॥

॥ ७० ॥ त्रिः अस्मै सप्त धेनवः दुदुह्रे सत्यां आऽशिरं पूर्वे विऽओमनि चत्वारि अन्या भुवनानि निःऽनिजे चारूणि चक्रे यत् ऋतैः अवर्धत ॥१॥ सः भिक्षमाणः अमृतस्य चारुणः उभे द्यावा काव्येन वि शश्रथे तेजिष्ठाः अपः मंहना परि व्यत यदि देवस्य श्रवसा सदः विदुः ॥२॥ ते अस्य संतु केतवः अमृत्यवः अदाभ्यासः जनुषी उभे अनु येभिः नृम्णा च दैव्या च पुनते आत् इत् राजानं मनना अगृभ्णत ॥३॥ सः मृज्यमानः दशऽभिः सुकर्मेऽभिः प्र मध्यमासु मातृषु प्रऽमे सचा मतानि पानः अमृतस्य

चारुरग्ने मुखे नृचक्षा अनु पश्यते विशे॥४॥ स मर्मृजान ईंद्रियाय धायसे शोभे अंता रोदसी हर्यते हितः। वृषा शुष्मेण बाधते वि दुर्मतीरदेदिशानः शर्यहेव शुरुधः॥५॥२३॥ स मातरा न ददृशान उस्रियो नानदेति मरुतामिव स्वनः। जानन्नृतं प्रथमं यत्स्वर्णरं प्रशस्तये कमवृणीत सुक्रतुः॥६॥ स्वतवाँ भीमो वृषभस्तविष्यया भृगे शिशानो हरिणी विचक्षणः। आ योनिं सोमः सुकृतं नि षीदति गव्ययी त्वग्भवति निर्णिगव्ययी॥७॥ शुचिः पुनानस्तन्वमरेपसमव्ये हरिर्न्यधाविष्ट सानवि। जुष्टो मित्राय वरुणाय वायवे विधातु मधु क्रियते सुकर्मभिः॥८॥ पवस्व सोम देववीतये वृषेंद्रस्य हार्दि सोमधानमा विश। पुरा नो बाधादुरितादि पारय क्षेत्रविद्धि दिश आहा विपृच्छते॥९॥ हितो न सप्तिरभि वाजमर्षेंद्रस्येंदो जठरमा पवस्व। नावा न सिंधुमति पर्षि विद्वाञ्छूरो न युध्यन्नव नो निदः स्पः॥१०॥२४॥

॥ ७१ ॥ १–९ शुष्मी वैश्वामित्रः ॥ पवमानः सोमः ॥ १–८ जगती । ९ त्रिष्टुप् ॥

॥ ७१ ॥ आ दक्षिणा सृज्यते शुष्म्या३ सदं वेति द्रुहो रक्षसः पाति जागृविः। हरिरोपशं कृणुते नभस्यय उपस्तिरे चम्वो३र्वेल निर्णिजे॥१॥ मकृष्टिहेव शूप एति रोरुवदसुर्यं३ वर्ण निरिणीते अस्य तं। जहाति वव्रिं पितुरेति निष्कृतमुपप्रुतं कृणुते निर्णिजं तना॥२॥ अद्रिभिः सुतः पवते गभस्त्योर्वृषायते नभसा वेपते मती। स मोदते नसते साधते गिरा नेनिक्ते अप्सु यजते परीमणि॥३॥ परि द्युक्षं सहसः पवितावृधं मर्ज्यः सिंचंति हर्म्यस्य सद्मणि। आ यस्मिन्गावः सुहुताद्

चारुणः उभे नृऽचक्षाः अनु पश्यते विशौ ॥४॥ सः मर्मृजानः तन्वि१ऽया धायसे आ उभे अन्तः रोदसी हुवेते हितः वृषा शुष्मेण बाधते वि दुःऽमतीः आ ऽदेदिशानः शूरयेहाऽइव श्रुधः ॥५॥ ॥२३॥ सः मातरा न ददृशानः उस्रियः नानदत् एति मरुताँऽइव स्वनः जानन् व्रतं प्रथमं यत् स्वःऽनरं प्रऽशंसन्ति कं अवृणीत सुऽक्रतुः ॥६॥ रुवति भीमः वृषभः तविष्यया भृमिं शिशानः हरिणी विऽचक्षणः आ योनिं सोमः सुऽकृतं नि षीदति गव्ययी त्वक् भवति निःऽनिक् अव्ययी ॥७॥ शुचिः पुनानः तन्वे ऽरेपसे अव्ये हरिः नि अधाविष्ट मानवि जुष्टः मित्राय वरुणाय वायवे विऽधातु मधु क्रियते सुकर्मऽभिः ॥८॥ पवस्व सोम देवऽवीतये वृषा इंद्रस्य हार्दि सोमऽधाने आ विश पुरा नः बाधात् दुःऽइता अति पारय क्षेचऽवित् हि दिशः आहा विऽपृच्छते ॥९॥ हितः न सप्तिः अभि वाजं अर्ष इंद्रस्य इंदो जठरे आ पवस्व नावा न सिंधुं अति पर्षि विद्वान् शूरः न युध्यन् अव नः निदः स्यः ॥१०॥२४॥

॥७१॥ आ दक्षिणा सृज्यते शुष्मी आऽसदं वेति दुहः रक्षसः पाति जागृविः हरिः ओपशं कृणुते नभः पयः उपऽस्तिरे चम्वोः अप्सा निःऽनिजे ॥१॥ प्र कृष्टिहाऽइव शूषः एति रोरुवत् असुर्यं वर्णं नि रिणीते अस्य तं जहाति चविं पितुः एति निःऽकृतं उपऽप्रुतं कृणुते निःऽनिजे तना ॥२॥ अद्रिऽभिः सुतः पवते गभस्त्योः वृषाऽयते नभसा वेपते मती सः मोदते नसते साधते गिरा नेनिक्ते अप्सु यजते परीमणि ॥३॥ परि द्युक्षं सहसः पर्वतऽवृधं मधोः सिंचंति हर्म्यस्य सद्मनि आ यस्मिन् गावः सुहुतऽअदः

ऊर्धनि मूर्धञ्छ्रीणंत्यग्रियं चरीमभिः॥४॥ समी रथं न भुरिजो-रहेषत दश स्वसारो अदितेरुपस्थ आ। जिगादुप्वं जयति गोरपीच्यं पदं यदस्य मतुथा अजीजनन्॥५॥२५॥ श्येनो न योनिं सदनं धिया कृतं हिरण्ययमासदं देव एषति। आ रिणंति बर्हिषि प्रियं गिराश्वो न देवाँ अयेति यज्ञियः॥६॥ परा वक्षी असुपो दिवः कविर्वृषा चिपृष्टो अनविष्ट गा अभि। सहस्रणीतिर्यतिः परायती रेभो न पूर्वीरुषसो वि राजति॥७॥ त्वेषं रूपं कृणुते वर्णो अस्य स यत्राशयत्समृता सेधति स्रिधः। अप्सा याति स्वधया दैव्यं जनं सं सुष्टुती नसते सं गोअग्रया॥८॥ उक्षेव यूथा परियन्नरावीदधि त्विपीरधित सूर्यस्य। दिव्यः सुपर्णोऽव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः॥९॥२६॥

॥७२॥ १-९ हरिमंतः ॥ पवमानः सोमः ॥ जगती ॥

॥७२॥ हरिं मृजन्त्यरुपो न युज्यते सं धेनुभिः कलशे सोमो अज्यते। उद्वाचमीरयन्ति हिन्वते मती पुरुष्टुतस्य कति चित्परिप्रियः॥१॥ साकं वदन्ति बहवो मनीषिण इन्द्रस्य सोमं जठरे यदादुहुः। यदीं मृजन्ति सुगभस्तयो नरः सनीळाभिर्दशभिः काम्यं मधु॥२॥ अरममाणो अत्येति गा अभि सूर्यस्य प्रियं दुहितुस्तिरो रवं। अन्वस्मै जोषमभरद्विनंगृसः सं दध्रीभिः स्वसृभिः क्षेति जामिभिः॥३॥ नृधूतो अद्रिषुतो बर्हिषि प्रियः पतिर्गवां प्रदिव इन्दुरर्षति। पुरंधिवान्मनुषो यज्ञसाधनः शुचिर्धिया पवते सोम इन्द्र ते॥४॥ नृवाहुभ्यां चोदितो धारया सुतोऽनुष्वधं पवते सोम इन्द्र ते। आप्राः क्रतून्समजैरध्वरे मतीर्वेर्न द्रुषच्वम्वो अरा-

ऊर्धनि मूर्धन् श्रीणंति अप्रियं वरीमऽभिः॥४॥ सं ईं रथं न भुरिजोः अहेषत दशं स्वसारः अदितेः उपऽस्थे आ जिगात् उप जयति गोः अपीच्यं पदं यत् अस्य मातुथाः अजीजनन्॥५॥२५॥ श्येनः न योनिं सदनं धिया कृतं हिरण्ययं आऽसदं देवः आ ईयते आ ईं हिरण्यति बर्हिषि प्रियं गिरा अश्वः न देवान् अपि एति यज्ञियः॥६॥ परा विऽअक्तः अरुषः दिवः कविः वृषा चिऽपृष्टः अनुविष्ट गाः अभि सहस्रऽनीतिः यतिः पराऽयतिः रेभः न पूर्वीः उषसः वि राजति॥७॥ त्वेषं रूपं कृणुते वर्णः अस्य सः यत्र अशयत् संऽऋता सेधति स्रिधः अप्साः याति स्वधया दैव्यं जनं सं सुऽस्तुती नसते सं गोऽअयया॥८॥ उक्षाऽइव यूथा परिऽयन् अरावीत् अधि त्विषीः अधित सूर्यस्य दिवः सुऽपर्णः अव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः॥९॥२६॥

॥७२॥ हरिं मृजंति अरुषः न युज्यते सं धेनुऽभिः कलशे सोमः अज्यते उत् वाचं ईरयति हिन्वते मती पुरुऽस्तुतस्य कति चित् परिऽप्रियः॥१॥ साकं वदंति बहवः मनीषिणः इंद्रस्य सोमं जठरे यत् आऽदुहुः यदि मृजंति सुऽगभस्तयः नरः सऽनीळाभिः दृशऽभिः काम्यं मधु॥२॥ अरंममाणः अति एति गाः अभि सूर्यस्य प्रियं दुहितुः तिरः रवं अनु अस्मै जोषं अभरत् विनंऽगृसः सं द्वयीभिः स्वसृऽभिः क्षेति जामिऽभिः॥३॥ नृऽधूतः अद्रिऽसुतः बर्हिषि प्रियः पतिः गवां प्रऽदिवः इंदुः ऋत्वियः पुरंधिऽवान् मनुषः यज्ञऽसाधनः शुचिः धिया पवते सोमः इंद्र ते॥४॥ नृवाहुऽभ्यां चोदितः धारया सुतः अनुऽस्वधं पवते सोमः इंद्र ते आ अप्राः क्रतून् सं अजैः अध्वरे मतीः वेः न द्रुऽसत् चम्वोः आ अ-

संदृङ्गरिः॥५॥२७॥ अंशुं दुहंति स्तनयंतमक्षितं कविं कवयोऽप-सो मनीषिणः। समी गावो मतयो यंति संयतं ऋतस्य योना सदने पुनर्भुवः॥६॥ नाभा पृथिव्या धरुणो महो दिवो ३ऽपामूर्मौ सिंधुषूंतरक्षितः। इंद्रस्य वज्रो वृषभो विभूवसुः सोमो हृदे पवते चारु मत्सरः॥७॥ स तू पवस्व परि पार्थिवं रजः स्तोचे शिक्षन्नाधून्वते च सुक्रतो। मा नो निभाग्वसुनः सादनस्पृशो रयिं पिशंगं बहुलं वसीमहि॥८॥ आ तू न इंदो शतदात्वश्व्यं सहस्रदातु पशुमद्धिरण्यवत्। उप मास्व बृहती रेवतीरिषोऽधि स्तोत्रस्य पवमान नो गहि॥९॥२८॥

॥ ७३ ॥ १–९ पवित्रः ॥ पवमानः सोमः ॥ जगती ॥

॥ ७३ ॥ सक्वं ट्रप्सस्य धमंतः समस्वरन्नृतस्य योना समरंत नाभयः। चीन्तस मूर्भो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरन्॥१॥ सम्यक् सम्यंचो महिषा अहेषत सिंधोरूमावधि वेना अवीविपन्। मधोर्धारामिज्जनयंतो अर्कमित्प्रियामिंद्रस्य तन्वमवीवृधन्॥२॥ पवित्रवंतः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतं। महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुधरुणेष्वारभे॥३॥ सहस्रधारेऽव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतः। अस्य स्पशो न नि मिषंति भूर्णयः पदेपदे पाशिनः संति सेतवः॥४॥ पितुर्मातुरध्या ये समस्वरन्ऋचा शोचंतः संदहंतो अव्रतान्। इंद्रद्विष्टामप धमंति मायया त्वचमसिक्नीं भूम्नो दिवस्परि॥५॥२९॥ प्रत्नान्मानादध्या ये समस्वरञ्छ्लोकयंत्रासो रभसस्य मंतवः। अपानक्षासो वधिरा अहासत ऋतस्य पंथां न तरंति दुष्कृतः॥६॥ सहस्रधारे वितते पवित्र आ वाचं पु-

सदृत् हरिः॥५॥२७॥ अंशुं दुहंन्ति स्तनयंन्तं अक्षितं कविं कवयः अपसः मनीषिणः सं ईं गावः मतयः यंन्ति संऽयतः घृतस्य योनां सदंने पुनःऽभुवः॥६॥ नाभां पृथिव्याः धरुणः महः दिवः अपां ऊर्मौ सिंधुषु अंन्तः उक्षितः इंद्रस्य वज्रः वृषभः विभुऽवसुः सोमः हृदे पवते चारुः मत्सरः॥७॥ सः तु पवस्व परि पार्थिवं रजः स्तोचे शिक्षन् आऽधून्वते च सुऽक्रतो॰ मा नः निः भाक् वसुनः सदनऽस्पृशः रयिं पिशंगं बहुलं वसीमहि॥८॥ आ तु नः इंदो शतऽदातु अश्व्यं सहस्रंऽदातु पशुऽमत् हिरण्यऽवत् उप मास्व बृहतीः रेवतीः इषः अधि स्तोचस्य पवमान नः गहि॥९॥२८॥

॥७३॥ सप्त क्षरंन्ति दृप्तस्य धर्मतः सं अस्वरन् घृतस्य योनां सं अरंत नाभयः चीन् सः मूर्धः असुरः चक्रे आऽरभे सत्यस्य नावः सुऽकृतं अपीपरन्॥१॥ सम्यक् सम्यंचः महिषाः अहेषत सिंधोः ऊर्मौ अधि वेनाः अवीविपन् मधोः धारांभिः जनयंतः अर्कं इत् प्रियां इंद्रस्य तन्वं अवीवृधन्॥२॥ पविचंऽवंतः परि वाचं आसते पिता एषां प्रत्नः अभि रक्षति व्रतं महः समुद्रं वरुणः तिरः दधे धीराः इत् शेकुः धरुणेषु आऽरभे॥३॥ सहस्रंऽधारे अवते सं अस्वरन् दिवः नाके मधुऽजिह्वाः असश्चतः अस्य स्पशः न नि मिषंति भूर्णयः पदेऽपदे पाशिनः संति सेतवः॥४॥ पितुः मातुः अधि आ ये संऽअस्वरन् ऋचा शोचंतः संऽदहंतः अव्रतान् इंद्रंऽद्विष्टां अप धमंति मायया त्वचं असिक्नीं भूमनः दिवः परि॥५॥ ॥२९॥ प्रत्नात् मानात् अधि आ ये संऽअस्वरन् श्लोकंऽयंचासः रभसस्य मंतवः अप अव्रतासः वधिराः अहासत घृतस्य पंथां न तरंति दुःऽकृतः॥६॥ सहस्रंऽधारे विऽतते पवित्रे आ वाचं पु-

संदृग्हरिः॥५॥२७॥ अंशुं दुहंति स्तनयंतमक्षितं कविं कवयोऽप-सो मनीषिणः। समी गावो मतयो यंति संयतं ऋतस्य योना सदने पुनर्भुवः॥६॥ नाभा पृथिव्या धरुणो महो दिवो ३ऽपामूर्मौ सिंधुषूंतरक्षितः। इंद्रस्य वज्रो वृषभो विभूवसुः सोमो हृदे पवते चारु मत्सरः॥७॥ स तू पवस्व परि पार्थिवं रजः स्तोत्रे शिक्षन्नाधून्वते च सुक्रतो। मा नो निर्भाग्वसुनः सादनस्पृशो रयिं पिशंगं बहुलं वसीमहि॥८॥ आ तू न इंदो शतदात्वश्व्यं सहस्रदातु पशुमद्धिरण्यवत्। उप मास्व बृहती रेवतीरिषोऽधि स्तोत्रस्य पवमान नो गहि॥९॥२८॥

॥ ७३ ॥ १–९ पवित्रः ॥ पवमानः सोमः ॥ जगती ॥

॥ ७३ ॥ सखे द्रप्सस्य धमंतः समस्वरन्ऋतस्य योना समरंत नाभयः। चीन्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरन्॥१॥ सम्यक् सम्यंचो महिषा अहेषत सिंधोरूर्मावधि वेना अवीविपन्। मधोर्धारामभि जनयंतो अर्कमिंद्रियायेंद्रस्य तन्वमवीवृधन्॥२॥ पवित्रवंतः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतं। महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुधरुणेष्वारभे॥३॥ सहस्रधारेऽव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतः। अस्य स्पशो न नि मिषंति भूर्णयः पदेपदे पाशिनः संति सेतवः॥४॥ पितुर्मातुरध्या ये समस्वरन्ऋचा शोचंतः संदहंतो अव्रतान्। इंद्रद्विष्टामप धमंति मायया त्वचमसिक्नीं भूम्नो दिवस्परि॥५॥२९॥ प्रत्नान्मानादध्या ये समस्वरञ्छ्लोकयंत्रासो रभसस्य मंतवः। अयासश्चासो वयिरा अहासत ऋतस्य पंथां न तरंति दुष्कृतः॥६॥ सहस्रधारे वितते पवित्र आ वाचं पु-

सदत् हरिः॥५॥२७॥ अंशुं दुहंन्ति स्तनयंन्तं अक्षितं कविं कवयः अपसः मनीषिणः सं इंन्द्गावः मतयः यंन्ति संऽयतः चृतस्य योनां सदने पुनःऽभुवः॥६॥ नाभा पृथिव्याः धरुणः महः दिवः अपां ऊर्मौ सिंधुषु अंतः उक्षितः इंद्रस्य वज्रः वृषभः विभुऽवसुः सोमः हृदे पवते चारुः मत्सरः॥७॥ सः तु पवस्व परि पार्थिवं रजः स्तोत्रे शिक्षन् आऽधून्वते च सुऽक्रतो॰ मा नः निः भाक् वसुनः सदनऽस्पृशः रयिं पिशंगं बहुलं वसीमहि॥८॥ आ तु नः इंदो शतऽदातु अप्यं सहस्रऽदातु पशुऽमत् हिरण्यऽवत् उप मास्व बृहतीः रेवतीः इषः अधि स्तोत्रस्य पवमान नः गहि॥९॥२८॥

॥७३॥ सप्तं क्रीलस्य धमंतः सं अस्वरन् चृतस्य योनां सं अरंत नाभयः चीन् सः मूर्धः असुरः चक्रे आऽरभे सत्यस्य नावः सुऽकृतं अपीपरन्॥१॥ सम्यक् सम्यंचः महिषाः अहेषत सिंधोः ऊर्मौ अधि वेनाः अवीविपन् मधोः धाराभिः जनयंतः अर्कं इत् प्रियां इंद्रस्य तन्वं अवीवृधन्॥२॥ पविचंऽवंतः परि वाचं आसते पिता एषां प्रत्नः अभि रक्षति व्रतं महः समुद्रं वरुणः तिरः दधे धीराः इत् शेकुः धरुणेषु आऽरभे॥३॥ सहस्रंऽधारे अवंते सं अस्वरन् दिवः नाकें मधुऽजिह्वाः असश्चतः अस्य स्पशः न नि मिषंति भूर्णयः पदेऽपदे पाशिनः संति सेतवः॥४॥ पितुः मातुः अधि आ ये संऽअस्वरन् ऋचा शोचंतः संऽदहंतः अव्रतान् इंद्रंऽद्विष्टां अप धमंति मायया त्वचं असिक्नीं भूमनः दिवः परि॥५॥ ॥२९॥ प्रत्नात् मानात् अधि आ ये संऽअस्वरन् श्लोकंऽयंचासः रभसस्य मंतवः अप अनष्टासः वधिराः अहासत चृतस्य पंथां न तरंति दुःऽकृतः॥६॥ सहस्रंऽधारे विऽततंते पवित्रे आ वाचं पु-

नंति कवयो मनीषिणः। रुद्रासं एषामिषिरासो अद्रुहः स्वगूः स्वंचः सुदृशो नृचक्षसः॥७॥ ऋतस्य गोपा न दभाय सुक्रतुस्त्री ष पवित्रा हृद्यं१नरा दधे। विद्वान्त्स विश्वा भुवनाभि पश्यत्यवाजुष्टान्विध्यति कर्ते अव्रतान्॥८॥ ऋतस्य तंतुर्वितंतः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया। धीरोश्चित्तत्समिनक्षंत आशुताचा कर्तमव पदात्यप्रभुः॥९॥३०॥

॥ ७४ ॥ १–९ कक्षीवान् ॥ पवमानः सोमः ॥ १–७.९ जगती। ८ विष्टुप् ॥

॥७४॥ शिशुर्न जातोऽव चक्रदद्वने स्वर्१यद्वाज्यरुषः सिषासति। दिवो रेतसा सचते पयोवृधा तमीमहे सुमती शर्मन्त्सप्रथः॥१॥ दिवो यः स्कंभो धरुणः स्वातत आपूर्णो अंशुः पर्येति विश्वतः। सेमे मही रोदसी यक्षदावृता समीचीने दाधार समिषः कविः॥२॥ महि स्ररः सुकृतं सोम्यं मधूर्वी गव्यूतिरदितेर्ऋतं यते। ईशे यो वृष्टेरित उस्रियो वृषापां नेता य इतऊतिर्ऋग्मियः॥३॥ आत्मन्वन्नभो दुहते घृतं पयः ऋतस्य नाभिरमृतं वि जायते। समीचीनाः सुदानवः प्रीणंति तं नरो हितमव मेहंति पेरवः॥४॥ अरावीदंशुः सचमान ऊर्मिणा देवाव्यं१मनुषे पिन्वति त्वचं। दधाति गर्भमदितेरुपस्थ आ येन तोकं च तनयं च धामहे॥५॥३१॥ सहस्रधारेऽव ता असश्चतस्तृतीये संतु रजसि प्रजावतीः। चतस्रो नाभो निहिता अवो दिवो हविर्भिरत्यमृतं घृतश्चुतः॥६॥ श्वेतं रूपं कृणुते यत्सिषासति सोमो मीढ्वां असुरो वेद भूमनः। धिया शमी सचते सेमभि प्रवद्दिवस्कबंधमव दर्षदुद्रिणं॥७॥ अध श्वेतं कलशं गोभिरक्तं कार्ष्मन्ना वाज्यक्र-

नंति कवयः मनीषिणः रुद्रासः एषां इषिरासः अद्रुहः स्पशः सु-ऽअंचः सुऽहशः नृऽचक्षसः ॥७॥ ऋतस्य गोपाः न दभाय सु-ऽक्रतुः ची सः पविचा हृदि अंतः आ दधे विद्वान् सः विश्वा भुव-ना अभि पश्यति अवं अजुष्टान् विध्यति कर्ते अव्रतान् ॥८॥ ऋतस्य तंतुः विऽततः पविचे आ जिह्वायाः अग्रे वरुणस्य मा-यया धीराः चित् तत् संऽइनक्षंतः आशत अवं कर्ते अव पदाति अप्रंऽभुः ॥९॥३०॥

॥७४॥ शिप्रुः न जातः अवं चक्रदत् वने स्वः यत् वाजी अरुषः सिषासति दिवः रेतसा सचते पयः ऽवृधान ईमहे सुऽमती शर्मं स-ऽप्रथः ॥१॥ दिवः यः स्कंभः धरुणः सुऽआततः आऽपूर्णः अंशुः परिऽएति विश्वतः सः इमे मही रोदसी यक्षत् आऽवृता सं-ऽईचीने दाधार सं दृशे कविः ॥२॥ महि स्परः सुऽकृतं सोम्यं मधु उर्वी गव्यूतिः अदितेः ऋतं यते ईशे यः वृष्टेः इतः उस्रियः वृषा अपां नेता यः इतः ऽऊतिः ऋग्मियः ॥३॥ आत्मन् ऽवत् नभः दुह्यते घृतं पयः ऋतस्य नाभिः अमृतं वि जायते संऽईचीनाः सु-ऽदानवः प्रीणंति तं नरः हितं अवं मेहंति पेरवः ॥४॥ अरावीत् अंशुः सचमानः ऊर्मिणा देवऽअयं मनुषे पिन्वति त्वचं दधाति गर्भं अदितेः उपऽस्थे आ येन तोकं च तनयं च धामहे ॥५॥३१॥ स-हस्रऽधारे अवं ताः असश्चतः तृतीये संतु रजसि प्रजाऽवतीः च-तस्रः नाभेः निऽहिताः अवः दिवः हविः भरंति अमृतं घृतऽश्चुतः ॥६॥ श्वेतं रूपं कृणुते यत् सिषासति सोमः मीढ्वान् असुरः वेदभू-मनः धिया शमी सचते सः ईं अभि प्रऽवत् दिवः कवंधं अवं दर्षत् उद्रिणं ॥७॥ अध श्वेतं कलशं गोभिः अक्तं कार्ष्मन् आ वाजी अक्र-

मीत्ससुवान्। आ हिन्विरे मनसा देवयंतः कक्षीवते शतहिमाय गोनाँ ॥ ८ ॥ अद्भिः सोम पपृचानस्य ते रसोऽव्यो वारं वि पवमान धावति। स मृज्यमानः कविभिर्मदिंतम् स्वदस्वेंद्राय पवमान पीतये ॥ ९ ॥ ३२ ॥

॥ ७५ ॥ १-५ कविः ॥ पवमानः सोमः ॥ जगती ॥

॥ ७५ ॥ अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते। आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वंचमरुहद्विचक्षणः ॥ १ ॥ ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः। दधाति पुत्रः पित्रोरपीच्यं१नाम तृतीयमधि रोचने दिवः ॥ २ ॥ अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमानः कोश आ हिरण्ययें। अभीमृतस्य दोहना अनूषतादि चिपृष्ठ उपसो वि राजति ॥ ३ ॥ अद्रिभिः सुतो मतिभिश्चनोहितः प्रत्नोचयन्नोदसी मातरा शुचिः। रोमाण्यव्या समया वि धावति मधोर्धारा पिन्वमाना दिवेदिवे ॥ ४ ॥ परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरं। ये ते मदा आह्नसो विहायसस्तेभिरिंद्रं चोदय दातवे मघं ॥ ५ ॥ ३३ ॥ २ ॥

॥ ७६ ॥ १-५ कविः ॥ पवमानः सोमः ॥ जगती ॥

॥ ७६ ॥ धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः। हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुते नदीष्वा ॥ १ ॥ शूरो न धत्त आयुधा गभस्त्योः स्वर्षाःसिषासन्नधिरो गविष्टिषु। इंद्रस्य शुष्ममीरयन्नपस्युभिरिंदुर्हिन्वानो अज्यते मनीषिभिः ॥ २ ॥ इंद्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश। प्र णः पिन्व विद्युदभ्रेव रोदसी

मीत्ससऽवान् आ हिन्विरे मनसा देवऽयंतः कक्षीवते शतऽहिमाय गोनां ॥८॥ अतऽभिः सोम पपृचानस्य ते रसः अव्यः वारं वि पवमान धावति सः मृज्यमानः कविऽभिः मदिन्ऽतमः स्वदस्व इंद्राय पवमान पीतये ॥९॥३२॥

॥७५॥ अभि प्रियाणि पवते चनःऽहितः नामानि यह्वः अधि येषु वर्धते आ सूर्यस्य बृहतः बृहन् अधि रथं विष्वंचं अरुहत् विऽचक्षणः ॥१॥ ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिः धियः अस्याः अदाभ्यः दधाति पुरः पित्रोः अप्रीच्यं नाम तृतीयं अधि रोचने दिवः ॥२॥ अव द्युतानः कलशान् अचिक्रदत् नृऽभिः येमानः कोशे आ हिरण्यये अभि द्रोणा ऋतस्य दोहनाः अनूषत अधि चिऽपृष्ठः उपसः वि राजति ॥३॥ अद्रिऽभिः सुतः मतिऽभिः चनःऽहितः प्रऽरोचयन् रोदसी मातरा शुचिः रोमाणि अव्या समया वि धावति मधोः धारा पिन्वमाना दिवेऽदिवे ॥४॥ परि सोम प्र धन्व स्वस्तये नृऽभिः पुनानः अभि वासय आऽशिरं ये ते मदाः आऽहनसः विऽहायसः तेभिः इंद्रं चोदय दानवे मघं ॥५॥३३॥२॥

॥७६॥ धर्ता दिवः पवते कृत्व्यः रसः दक्षः देवानां अनुऽमाद्यः नृऽभिः हरिः सृजानः अत्यः न सत्वऽभिः वृथा पाजांसि कृणुते नदीषु आ ॥१॥ शूरः न धत्ते आयुधा गभस्त्योः स्वः० सिसासन् रयिऽरोऽइंदुषु इंद्रस्य शुष्मं ईरयन् अपस्युऽभिः इंदुः हिन्वानः अज्यते मनीषिऽभिः ॥२॥ इंद्रस्य सोम पवमानः ऊर्मिणा तविष्यमाणः जठरेषु आ विश प्र नः पिन्व विऽद्युत अभाऽइव रोदसी

धिया न वाजाँ उप मासि शश्वतः ॥३॥ विश्वस्य राजा पवते स्वर्दृशं ऋतस्य धीतिमृषिषाळवीवशत्। यः सूर्यस्यासिरेण मृज्यते पिता मतीनामसमष्टकाव्यः ॥४॥ वृषेव यूथा परि कोशमर्षस्यपामुपस्थे वृषभः कनिक्रदत्। स इंद्राय पवसे मत्सरिंतमो यथा जेषाम समिथे त्वोतयः ॥५॥१॥

॥ ७७ ॥ १-५ कविः ॥ पवमानः सोमः ॥ जगती ॥

॥७७॥ एष प्र कोशे मधुमाँ अचिक्रददिंद्रस्य वज्रो वपुषो वपुष्टरः। अभीमृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षंति पयसेव धेनवः ॥१॥ स पूर्व्यः पवते यं दिवस्परि श्येनो मथायदिषितस्तिरो रजः। स मध्व आ युवते वेविजान इत्कृशानोरस्तुर्मनसाहं बिभ्युषा ॥२॥ ते नः पूर्वीस उषसः इंदवो महे वाजाय धन्वंतु गोमते। ईक्षेण्यासो अह्यो३न चारवो ब्रह्मब्रह्मे जुंजुषुर्हविर्हविः ॥३॥ अयं नो विद्वान्वनवद्वनुष्यत इंदुः सत्राचा मनसा पुरुष्टुतः। इनस्य यः सदने गर्भमाद्धे गवामुरुक्षमभ्यर्षति व्रजं ॥४॥ चक्रिर्दिवः पवते कृत्व्यो रसो महाँ अदब्धो वरुणो दुरुच्यते। असर्जि मित्रो वृजनेषु यज्ञियोऽत्यो न यूथे वृषयुः कनिक्रदत् ॥५॥२॥

॥ ७८ ॥ १-५ कविः ॥ पवमानः सोमः ॥ जगती ॥

॥७८॥ प्र राजा वाचं जनयन्नसिष्यदद्रुपो वसानो अभि गा इयक्षति। गृभ्णाति रिप्रमविरस्य ताम्वा शुद्धो देवानामुप याति निष्कृतं ॥१॥ इंद्राय सोम परि षिच्यसे नृभिर्नृचक्षा ऊर्मिः कविरंशुष्टे वने। पूर्वीहि ते सुतयः संति यातवे सहस्रमश्वा हरयश्चमूषदः ॥२॥ समुद्रियो अप्सरसो मनीषिणमासीना अंतरभि सोममक्षरन्। ता ईं हिन्वंति हर्म्यस्य सद्मा-

धिया न वाजान् उप मासि शश्वतः ॥३॥ विश्वस्य राजा पवते स्वःऽदृशः ऋतस्य धीतिं ऋषिषाट् अवीवशत् यः सूर्यस्य असिरेण मृज्यते पिता मतीनां असंमृष्टऽकाव्यः ॥४॥ वृषाऽइव यूथा परि कोशं अर्षसि अपां उपऽस्थे वृषभः कनिक्रदत् सः इंद्राय पवसे मत्सरिन्ऽतमः यथा जेषाम संऽइधे त्वाऽऊतयः ॥५॥१॥

॥७७॥ एषः प्रकोशे मधुऽमान् अचिक्रदत् इंद्रस्य वज्रः वपुषः वपुःऽतरः अभि ईं ऋतस्य सुऽदुघाः घृतऽश्चुतः वाश्राः अर्षंति पयसाऽइव धेनवः ॥१॥ सः पूर्व्यः पवते यं दिवः परि श्येनः मथायत इषितः तिरः रजः सः मध्वः आ युवते वेविजानः इत् कृशानोः अस्तुः मनसा अहं विभ्युषा ॥२॥ ते नः पूवीसः उपरासः इंदवः महे वाजाय धन्वंतु गोऽमंते ईक्षेण्यासः अह्यः न चारवः ब्रह्मऽब्रह्म ये जुजुषुः हविःऽहविः ॥३॥ अयं नः विद्वान् वनवत् वनुष्यतः इंदुः सत्राचा मनसा पुरुऽस्तुतः इनस्य यः सदने गर्भं आऽदधे गवां उरुब्जं अभि अर्षति व्रजं ॥४॥ चक्रिः दिवः पवते कृत्व्यः रसः महान् अदब्धः वरुणः दुरुक्यते असावि मित्रः वृजनेषु यज्ञियः अत्यः न यूथे वृषऽयुः कनिक्रदत् ॥५॥२॥

॥७८॥ प्र राजा वाचं जनयन् असिस्यदत् अपः वसानः अभि गाः इयक्षति गृभ्णाति रिप्रं अविः अस्य तान्वा शुद्धः देवानां उप याति निःऽकृतं ॥१॥ इंद्राय सोम परि सिच्यसे नृऽभिः नृऽचक्षाः ऊर्मिः कविः अज्यसे वने पवीः हि ते सुऽकृतयः संति यातवे सहस्रं अश्वाः हरयः चमूऽसदः ॥२॥ समुद्रियाः अप्सरसः मनीषिणः आसीनाः अंतः अभि सोमं अक्षरन् ताः ईं हिन्वंति हर्म्यस्य सक्ष-

णिं याचते सुम्नं पवमानमक्षितं ॥ ३ ॥ गोजिन्नः सोमो रथ-
जिद्धिरण्यजित्स्वर्जिदप्जित्पवते सहस्रजित् । यं देवासश्चक्रिरे
पीतये मदं स्वादिष्ठं दृप्समरुणं मयोभुवं ॥ ४ ॥ एतानि सोम
पवमानो अस्मयुः सत्यानि कृण्वन्द्रविणान्यर्षसि । जहि शत्रु-
मंतिके दूरके च य उर्वीं गव्यूतिमभयं च नस्कृधि ॥ ५ ॥ ३ ॥

॥ ७९ ॥ १-५ कविः ॥ पवमानः सोम. ॥ जगती ॥

॥ ७९ ॥ अचोदसो नो धन्वंत्विंदवः प्र सुवानासो बृहद्दिवेषु
हर्यः । वि च नशन्न इषो अरातयोऽर्यो नशंत सनिषंत नो
धियः ॥ १ ॥ प्र णो धन्वंत्विंदवो मदच्युतो धना वा येभिरर्वतो
जुनीमसि । तिरो मर्तस्य कस्य चित्परिह्वृतिं वयं धनानि वि-
श्वधा भरेमहि ॥ २ ॥ उत स्वस्या अरात्या अरिर्हि ष उतान्य-
स्या अरात्या वृको हि षः । धन्वन्न तृष्णा समरीत ताँ अभि
सोम जहि पवमान दुराध्यः ॥ ३ ॥ दिवि ते नाभा परमो य आददे पृथिव्यास्ते रुरुहुः सानवि क्षिपः । अद्रयस्त्वा बप्सति
गोरधि त्वचि प्सु त्वा हस्तिंदुदुहुर्मनीषिणः ॥ ४ ॥ एवा त इंदो
सुभ्वं सुपेशसं रसं तुंजंति प्रथमा अभिश्रियः । निदंनिदं पव-
मान नि तारिष आविस्ते शुष्मो भवतु प्रियो मदः ॥ ५ ॥ ४ ॥

॥ ८० ॥ १-५ वसुर्भारद्वाज ॥ पवमानः सोमः ॥ जगती ॥

॥ ८० ॥ सोमस्य धारा पवते नृचक्षस ऋतेन देवान्हवते दि-
वस्परि । बृहस्पतेर्वयुनेना वि दिद्युते समुद्रासो न सवनानि
विव्यचुः ॥ १ ॥ यं त्वा वाजिन्नभ्या अभ्यनूषतायोहतं योनि-
मा रोहसि द्युमान् । मघोनामायुः प्रतिरन्महि श्रव इंद्राय
सोम पवसे वृषा मदः ॥ २ ॥ एंद्रस्य कुक्षा पवते मदिंतम

र्णिं याचते सुम्नं पवमानं अक्षितं ॥३॥ गोऽजित् नः सोमः रथ-ऽजित् हिरण्यऽजित् स्वःऽजित् अप्ऽजित् पवते सहस्रऽजित् यं देवासः चक्रिरे पीतये मदं स्वादिष्ठं दुष्टरं अरुणं मयःऽभुवं ॥४॥ एतानि सोम पवमानः अस्मऽयुः सत्यानि कृण्वन् द्रविणानि अर्षसि जहि शर्धं अंतिके दूरके च यः उर्वीं गव्यूतिं अभयं च नः कृधि ॥५॥३॥

॥७९॥ अचोदसः नः धन्वंतु इंदवः प्रसुवानासः बृहतऽदिवेषु हरयः वि चनशन् नः इषः अरातयः अर्यः नशंत सनिषंत नः धियः ॥१॥ प्र नः धन्वंतु इंदवः मदऽच्युतः धना वा येभिः अर्वतः जुनीमसि तिरः मर्तस्य कस्य चित् परिऽह्रुतिं वयं धनानि विश्वधा भरेमहि ॥२॥ उत स्वस्याः अरात्याः अरिः हि सः उत अन्यस्याः अरात्याः वृकः हि सः धन्वन् न तृष्णा सं अरीत तान् अभि सोम जहि पवमान दुःऽआध्यः ॥३॥ दिवि ते नाभा परमः यः आऽददे पृथिव्याः ते रुरुहुः सानवि क्षिपः अद्रयः त्वा बप्सति गोः अधि त्वचि अप्ऽसु त्वा हस्तैः दुदुहुः मनीषिणः ॥४॥ एव ते इंदो सुऽभ्वं सुऽपेशसं रसं तुंजंति प्रयसाः अभिऽश्रियः निदंऽनिदं पवमान नि तारिषुः आविः ते शुष्मः भवतु प्रियः मदः ॥५॥४॥

॥८०॥ सोमस्य धारा पवते नृऽचक्षसः ऋतेन देवान् हवते दिवःपरि बृहस्पतेः रवथेन वि द्युते समुद्रासः नसवनानि विव्यचुः ॥१॥ यं त्वा वाजिन् अभ्याः अभि अनूषत अयःऽहतं योनिं आ रोहसि द्युऽमान् मघोनां आयुः प्रऽतिरन् महि श्रवः इंद्राय सोम पवसे वृषा मदः ॥२॥ आ इंद्रस्य कुक्षा पवते मदिनऽतमः

ऊर्जं वसानः प्रवसे सुमंगलः। प्रत्यङ् स विश्वा भुवनाभि पंप्रथे क्रीळन्हरित्यः स्यदते वृषा ॥३॥ तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः। नृभिः सोम प्रच्युतो गोवभिः सुतो विश्वान्देवाँ आ पवस्वा सहस्रजित ॥४॥ तं त्वा हस्तिनो मधुमंतमद्रिभिर्दुहंत्यप्सु वृषभं दश क्षिपः। इंद्रं सोम मादयन्दैव्यं जनं सिंधोरिवोर्मिः पवमानो अर्षसि ॥५॥५॥

॥ ८१ ॥ १-५ वसुर्भारद्वाजः ॥ पवमानः सोमः ॥ १-४ जगती। ५ त्रिष्टुप् ॥

॥८१॥ प्र सोमस्य पवमानस्योर्मय इंद्रस्य यंति जठरं सुपेशसः। दधा यदीमुन्नीता यशसा गवां दानाय शूरमुदमंदिषुः सुताः ॥१॥ अच्छा हि सोमः कलशाँ असिष्यदत्यो न वोळ्हा रघुवर्तनिर्वृषा। अथा देवानामुभयस्य जन्मनो विद्वाँ अश्नोत्यमुत इतश्च यत् ॥२॥ आ नः सोम पवमानः किरा वस्विंदो भव मघवा राधसो महः। शिक्षा वयोधो वसवे सु चेतुना मा नो गयमारे अस्मत्परा सिचः ॥३॥ आ नः पूषा पवमानः सुरातयो मित्रो गच्छंतु वरुणः सजोषसः। बृहस्पतिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती ॥४॥ उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता। भगो नृशंस उर्वंतरिक्षं विश्वे देवाः पवमानं जुषंत ॥५॥६॥

॥ ८२ ॥ १-५ वसुर्भारद्वाज. ॥ पवमानः सोमः ॥ १-४ जगती। ५ त्रिष्टुप् ॥

॥८२॥ असावि सोमो अरुषो वृषा हरी राजेव दस्रो अभि गा अचिक्रदत्। पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवंतमासदं ॥१॥ कविर्वेधस्या परीपि माहिनमत्यो न मृष्टो अभि वाजमर्षसि। अपसेधन्दुरिता सोम मृळय घृतं

ऊर्जं वसानः पयसे सुऽमंगलः प्रत्यङ् सः विश्वा भुवना अभि
प्रऽप्रये क्रीळन् हरिः ऋत्यः स्यंदते वृषा ॥३॥ तं त्वा देवेभ्यः मधुमत्-
ऽतमं नरः सहस्रऽधारं दुहते दश क्षिपः नृऽभिः सोम प्रऽच्युतः
पावऽभिः सुतः विश्वान् देवान् आ पवस्व सहस्रऽजित् ॥४॥ तं
त्वा हस्तिनः मधुऽमंतं अद्रिऽभिः दुहंति अप्ऽसु वृषभं दश क्षिपः
इंद्रं सोम मादयन् दिव्यं जनं सिंधोःऽइव ऊर्मिः पवमानः अर्षसि
॥ ५ ॥ ५ ॥

॥८१॥ प्र सोमस्य पवमानस्य ऊर्मयः इंद्रस्य यंति जठरं सुऽपेशसः दधाना यत् ईं उतऽनीताः यशसा गवां दानाय शूरः उतऽअसंदिषुः सुताः ॥१॥ अच्छ हि सोमः कलशान् असिस्यदत् अत्यः न वोळ्हा रघुऽवर्तनिः वृषा अश्वं देवानां उभयस्य जन्मनः विद्वान् अश्नोति अमुतः इतः च यत् ॥२॥ आ नः सोम पवमानः किरा वसु इंदो भव मघऽवा राधसः महः शिष्टा वयःऽधः वसवे सु चेतुना मा नः गयं आरे अस्मत् परा सिचः ॥३॥ आ नः पूषा पवमानः सुऽअतयः मित्रः गच्छंतु वरुणः सऽजोषसः बृहस्पतिः मरुतः वायुः अश्विना त्वष्टा सविता सुऽयमा सरस्वती ॥४॥ उभे द्यावापृथिवी विश्वंऽइन्वे अर्यमा देवः अदितिः विऽधाता भगः नृऽशंसः उरु अंतरिक्षं विश्वे देवाः पवमानं जुषंत ॥ ५ ॥ ६ ॥

॥८२॥ असावि सोमः अरुषः वृषा हरिः राजाऽइव दस्मः अभि
गाः अचिक्रदत् पुनानः वारं परि एति अव्ययं श्येनः न योनिं घृ-
तऽवंतं आऽसदं ॥१॥ कविः वेधस्या परि एषि माहिनं अत्यः न
मृष्टः अभि वाजं अर्षसि अपऽसेधन् दुःऽइता सोम मृळय घृतं

वसानः परि यासि निर्णिजं ॥ २ ॥ पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे । स्वसार आपो अभि गा उतासरन्त्सं मावंभिर्नसते वीते अध्वरे ॥ ३ ॥ जायेव पत्यावधि शेव मंहसे पज्रांया गर्भ मृणुहि ब्रवीमि ते । अंतर्वाणीषु प्र चरा सु जीवसेऽनिंद्यो वृजने सोम जागृहि ॥ ४ ॥ यथा पूर्वेभ्यः शतसा अमृध्रः सहस्रसाः पर्यया वाजमिंदो । एवा पवस्व सुवितायु नव्यसे तवं व्रतमन्वापः सचंते ॥ ५ ॥ ७ ॥

॥ ८३ ॥ १-५ पवित्रः ॥ पवमानः सोमः ॥ जगती ॥

॥ ८३ ॥ पवित्रं ते वितंतं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहंतस्तत्समाशत ॥ १ ॥ तपोष्पवित्रं वितंतं दिवस्पदे शोचंतो अस्य तंतवो व्यस्थिरन् । अवंत्यस्य पवीतारमाशवो दिवस्पृष्ठमधि तिष्ठंति चेतसा ॥ २ ॥ अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः । मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥ ३ ॥ गंधर्वो इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः । गृष्णाति रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशत ॥ ४ ॥ हविर्हविष्मो महि सद्म दैव्यं नभो वसानः परि यास्यध्वरं । राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत् ॥ ५ ॥ ८ ॥

॥ ८४ ॥ १-५ प्रजापतिर्वाच्यः ॥ पवमानः सोमः ॥ जगती ॥

॥ ८४ ॥ पवस्व देवमादनो विचर्षणिरप्सा इंद्राय वरुणाय वायवे । कृधी नो अद्य वरिवः स्वस्तिमदुरुक्षितौ गृणीहि दैव्यं जनं ॥ १ ॥ आ यस्त्स्थौ भुवनान्यमर्त्यो विश्वानि सोमः परि तान्यर्षति । कृण्वन्संचृतं विचृतमभिष्टय इंदुः

वसानः परियासि निःऽनिजं॥२॥पर्जन्यः पिता महिपस्य पर्णिनः नाभा पृथिव्याः गिरिषु क्षयं दधे स्वसारः आपः अभिगाः उत अ-सरन् संयावऽभिः नसते वीते अध्वरे॥३॥जायाऽइव पत्यौ अधि शेवं मंहसे पज्रायाः गर्भे शृणुहि ब्रवीमि ते अंतः वाणीषु प्र चर सुजीवसे अनिंद्यः वृजने सोम जागृहि॥४॥यथा पूर्वेभ्यः शतऽसाः अमृध्रः सहस्रऽसाः परिऽअयाः वाजं इंदो एव पवस्व सुविताय नव्यसे तव व्रतं अनु आपः सचंते ॥ ५ ॥ ७ ॥

॥८३॥ पविचं ते विऽततं ब्रह्मणः पते प्रऽभुः गात्राणि परिऽएषि विश्वतः अतप्ऽअतनूः न तत् आमः अश्नुते शृतासः इत् वहंतः तत् सं आशत॥१॥तपोः पविचं विऽततं दिवः पदे गोचंतः अस्य तंतवः वि अस्यिन् अवंति अस्य पवितारः आशवः दिवः पृष्ठं अधि तिष्ठंति चेतसा॥२॥ अरूरुचत् उषसः पृश्निः अग्रियः उक्षा विभर्ति भुवनानि वाजऽयुः मायाऽविनः ममिरे अस्य मायया नृऽचक्षसः पितरः गर्भे आ दधुः॥३॥ गंधर्वः इत्था पदं अस्य रक्षति पाति देवानांजनिमानि अद्भुतः गृभ्णाति रिपुं निऽधया निधाऽपतिः सुकृतऽतमाः मधुनः भक्षं आशत॥४॥ हविः हविष्मः महि सद्म दैव्यं नभः वसानः परियासि अध्वरं राजा पविचऽरथः वाजं आ अरुहः सहस्रऽभृष्टिः जयसि श्रवः बृहत् ॥ ५ ॥ ८ ॥

॥८४॥ पवस्व देवऽमादनः विऽचर्षणिः अप्साः इंद्राय वरुणाय वायवे कृधि नः अद्य वरिवः स्वस्तिऽमत् उरुऽक्षितौ गृणीहि दैव्यं जनं॥१॥ आ यः नस्पौ भुवनानि अमर्त्यः विश्वानि सोमः परि तानि अर्षति कृण्वन् संऽचृतं विऽचृतं अभिष्टये इंदुः

सिषक्त्युपसं न सूर्यः ॥२॥ आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः । आ विद्युता पवते धारया सुत इंद्रं सोमो मादयन्दैव्यं जनं ॥३॥ एष स्य सोमः पवते सहस्रजिद्विन्वानो वाचमिषिरामुपर्बुधं । इंदुः समुद्रमुदियर्ति वायुभिरेंद्रस्य हार्दि कलशेषु सीदति ॥४॥ अभि त्यं गावः पयसा पयोवृधं सोमं श्रीणंति मतिभिः स्वर्विदं । धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः ॥५॥९॥

॥ ८५ ॥ १-१२ वेनो भार्गवः ॥ पवमानः सोमः ॥ १-१० जगती । ११.१२ त्रिष्टुप् ॥

॥८५॥ इंद्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह । मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वंत इह संत्विंदवः ॥१॥ अस्मान्त्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः । जहि शर्धूरुषा भंदनायतः पिवेंद्र सोममवं नो मृधो जहि ॥२॥ अदंब्ध इंदो पवसे महित्तम आत्मेंद्रस्य भवसि धासिरुत्तमः । अभि स्वरंति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते ॥३॥ सहस्रणीथः शतधारो अद्भुत इंद्रायेंदुः पवते काम्यं मधु । जयन्क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ॥४॥ कनिक्रदत्कलशे गोभिरज्यसे व्य१व्ययं समया वारमर्षसि । ममृज्यमानो अत्यो न सानसिरिंद्रस्य सोम जठरे समक्षरः ॥५॥ स्वादुः पवस्व दिव्याय जन्मने स्वादुरिंद्राय सुहवीतुनाम्ने । स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः ॥६॥१०॥ अत्यं मृजंति कलशे दश क्षिपः प्र विप्राणां मतयो वाचं ईरते । पवमाना अभ्यर्षंति सुष्टुतिमेंद्रं विशंति मदिरास इंदवः ॥७॥ पवमानो अभ्यर्षा सुवीर्यमुरुं गव्यूतिं महि शर्म सप्रथः । माकिर्नो अस्य परि-

सिसक्ति उपसा न सूर्यः॥२॥ आ यः गोभिः मृज्यते ओषधीषु आ देवानां सुम्ने इषयन् उपऽवसुः आ विऽद्युता पवते धारया सुतः इंद्रं सोमः मादयन् दैव्यं जनं॥३॥ एषः स्यः सोमः पवते सहस्रऽजित् हिन्वानः वाचं इषिरां उपःऽबुधं इंदुः समुद्रं उत् इयर्ति वायुऽभिः आ इंद्रस्य हार्दि कलशेषु सीदति॥४॥ अभि त्यं गावः पयसा पयःऽवृधं सोमं श्रीणंति मतिऽभिः स्वःऽविदं धनंऽजयः पवते कृत्व्यः रसः विप्रः कविः काव्येन स्वःऽचनाः॥५॥९॥

॥८५॥ इंद्राय सोम सुऽसुतः परि स्रव अप अमीवा भवतु रक्षसा सह मा ते रसस्य मत्सत द्रुयाविनः द्रविणस्वंतः इह संतु इंदवः॥१॥ अस्मान् सऽमर्ये पवमान चोदय दक्षः देवानां असि हि प्रियः मदः जहि शत्रून् अभि आ भंदनाऽयतः पिब इंद्र सोमं अव नः मृधः जहि॥२॥ अदब्धः इंदो पवसे मदिन्ऽतमः आत्मा इंद्रस्य भवसि धासिः उत्ऽतमः अभि स्वरंति बहवः मनीषिणः राजानं अस्य भुवनस्य निंसते॥३॥ सहस्रऽनीथः शतऽधारः अद्रुतः इंद्राय इंदुः पवते काम्यं मधु जयन् क्षेत्रं अभि अर्ष जयन् अपः उरुं नः गातुं कृणु सोम मीढुः॥४॥ कनिक्रदत् कलशे गोभिः अज्यसे वि अव्ययं समया वारं अर्षसि मर्मृज्यमानः अत्यःऽन सानसिः इंद्रस्य सोम जठरे सं अक्षरः॥५॥ स्वादुः पवस्व दिव्याय जन्मने स्वादुः इंद्राय सुहवीतुऽनाम्ने स्वादुः मित्राय वरुणाय वायवे बृहस्पतये मधुऽमान् अदाभ्यः॥६॥१०॥ अत्यं मृजंति कलशे दश क्षिपः प्र विप्राणां मतयः वाचः ईरते पवमानाः अभि अर्षंति सुऽस्तुतिं आ इंद्रं विशंति मदिरासः इंदवः॥७॥ पवमानः अभि अर्ष सुऽवीर्यं उर्वीं गव्यूतिं महि शर्म सऽप्रथः माकिः नः अस्य परि-

पूतिरीशतेंदो जयेम त्वया धनंधनं॥८॥ अधि द्यामस्थाद्वृषभो वि-चक्षणोऽरूरुचद्वि दिवो रोचना कविः। राजा पवित्रमत्येति रोरुवद्विवः पीयूषं दुहते नृचक्षसः॥९॥ दिवो नाके मधुजिह्वा असश्चतो वेना दुहंत्युक्षणं गिरिष्ठां। अप्सु द्रप्सं वावृधानं समुद्र आ सिंधोरूर्मा मधुमंतं पवित्र आ॥१०॥ नाके सुपर्णमुपपप्तिवांसं गिरो वेनानामकृपंत पूर्वीः। शिशुं रिहंति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्यां॥११॥ ऊर्ध्वो गंधर्वो अधि नाके अस्थाद्विश्वा रूपा प्रतिचक्षाणो अस्य। भानुः शुक्रेण शोचिषा व्यद्यौन्मारूरुचद्रोदसी मातरा शुचिः॥१२॥११॥४॥

॥ ८६ ॥ १-१० भालन्दना ऋषयः। ११-२० सिकता निवावरी। २१-३० पृश्नयो-ऽजाः। ३१-४० चय ऋषिगणाः। ४१-४५ अत्रिः। ४६-४८ गृत्समदः॥ पवमानः सोमः॥ जगती॥

॥८६॥ प्र ते आशवः पवमान धीजवो मदा अर्षंति रघुजा इव त्मना। दिव्याः सुपर्णा मधुमंत इंदवो मदिंतमासः परि कोशमासते॥१॥ प्र ते मदासो मदिरास आशवोऽसृक्षत रथ्यासो यथा पृथक्। धेनुर्न वत्सं पयसाभि वज्रिणमिंद्रमिंदवो मधुमंत ऊर्मयः॥२॥ अत्यो न हियानो अभि वाजमर्ष स्वर्वित्कोशं दिवो अद्रिमातरं। वृषा पवित्रे अधि सानो अव्यये सोमः पुनान इंद्रियाय धायसे॥३॥ प्र न आश्विनीः पवमान धीजुवो दिव्या असृग्रन्पयसा धरीमणि। प्रांतर्ऋषयः स्याविरीरसृक्षत ये त्वा मृजंत्यृषिषाण वेधसः॥४॥ विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यंति केतवः। व्यानशिः पवसे सोम धर्मभिः पतिर्विश्वस्य भुवनस्य राजसि॥५॥१२॥ उभयतः पवमानस्य रश्मयो ध्रुवस्यैसतः परियंति केतवः। यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योनां कलशेषु सीदति॥६॥

ऽसूतिः ईशत इंदो जयेम त्वया धनंऽधनं॥८॥ अधि द्यां अस्थात् वृषभः विऽचक्षणः अरूरुचत् वि दिवः रोचना कविः राजा पविचे अतिं एति रोरुवत दिवः पीयूषं दुहते नृऽचक्षसः॥९॥ दिवः नाके मधुऽजिह्वाः असश्चतः वेनाः दुहंति उक्षणं गिरिऽस्थां अपऽसु द्रप्सं ववृधानं समुद्रे आ सिंधोः ऊर्मा मधुऽमंतं पविचे आ॥१०॥ नाके सुऽपर्णं उपपप्तिऽवांसं गिरः वेनानां अकृपंत पूर्वीः शिशुं रिहंति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणिस्यां॥११॥ ऊर्ध्वः गंधर्वः अधि नाके अस्थात् विश्वा रूपा प्रतिऽचक्षाणः अस्य भानुः शुक्रेण शोचिषा विऽअद्यौत् प्र अरूरुचत् रोदसी मातरा शुचिः॥१२॥११॥४॥

॥८६॥ प्र ते आशवः पवमान धीऽजवः मदाः अर्षंति रघुजाःऽइव त्मना दिव्याः सुऽपर्णाः मधुऽमंतः इंदवः मदिन्ऽतमासः परि कोशं आसते॥१॥ प्र ते मदासः मदिरासः आशवः असृक्षत रथ्यासः यथा पृथक् धेनुः न वत्सं पयसा अभि वज्रिणं इंद्रं इंदवः मधुऽमंतः ऊर्मयः॥२॥ अत्यःन हियानः अभि वाजं अर्ष स्वःऽवित् कोशं दिवः अद्रिऽमातरं वृषा पविचे अधि सानौ अव्यये सोमः पुनानः इंद्रियाय धायसे॥३॥ प्र ते आश्विनीः पवमान धीऽजुवः दिव्याः असृग्रन् पयसा धरीमणि प्र अंतः ऋषयः स्याविरीः असृक्षत येत्वा मृजंति ऋषिऽसान वेधसः॥४॥ विश्वा धामानि विश्वऽचक्षुः ऋभ्वसः प्रऽभोः ते सतः परि यंति केतवः विऽआनशिः पवसे सोम धर्मऽभिः पतिः विश्वस्य भुवनस्य राजसि॥५॥१२॥ उभयतः पवमानस्य रश्मयः ध्रुवस्य सतः परि यंति केतवः यदिं पविचे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति॥६॥

यज्ञस्य केतुः पवते स्वध्वरः सोमो देवानामुपं याति निष्कृतं। सहस्रधारः परि कोशमर्षति वृषा पवित्रमत्येति रोरुवत् ॥७॥ राजा समुद्रं नद्यो३ वि गाहतेऽपामूर्मिं संचते सिंधुषु श्रितः। अर्ष्यस्यास्तानू पवमानो अव्ययं नाभा पृथिव्या धरुणो म-हो दिवः ॥८॥ दिवो न सानुं स्तनयंन्नचिक्रद्द्यौश्च यस्य पृथिवी च धर्मभिः। इंद्रस्य सख्यं पवते विवेविदत्सोमः पुना-नः कलशेषु सीदति ॥९॥ ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः। दधाति रत्नं स्वधयोरपीच्यं मदिं-तमो मत्सर इंद्रियो रसः ॥१०॥१३॥ अभिक्रंदन्कलशं वाज्य-र्षति पतिर्दिवः शतधारो विचक्षणः। हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिंधुभिर्वृषा ॥११॥ अग्ने सिंधूनां पवमानो अर्षत्यग्ने वाचो अग्रियो गोषु गच्छति। अग्ने वाजस्य भजते महाधनं स्वायुधः सोतृभिः पूयते वृषा ॥१२॥ अयं मतवाञ्छकुनो यथा हितोऽध्यै ससार पवमान ऊर्मिणा। तव क्रत्वा रोदसी अंतरा कवे शुचिर्धिया पवते सोम इंद्र ते ॥१३॥ द्रापिं वसानो यजतो दिविस्पृशमंतरिक्षप्रा भुवनेष्वर्षितः। स्वर्जज्ञानो नभसाभ्यक्रमीत्प्रत्नमस्य पितर-मा विवासति ॥१४॥ सो अस्य विशे महि शर्म यच्छति यो अस्य धाम प्रथमं व्यानशे। पदं यदस्य परमे व्योमन्यतो विश्वा अभि सं याति संयतः ॥१५॥१४॥ प्रो अयासीदिंदुरिंद्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरं। मर्य इव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा ॥१६॥ प्र वो धियो मंदृमुपो विपन्युवः पनस्युवः संवसनेष्वक्रमुः। सोमं मनीषा अभ्यनूषत स्तुभोऽभि धेनवः पयसेमशिश्रयुः ॥१७॥ आ नः सोम

यज्ञस्य केतुः पवते सुऽअध्वरः सोमः देवानाँ उपं याति निःऽकृतं सहस्रंऽधारः परि कोशं अर्षति वृषा पविंत्रे अति एति रोरुवत् ॥७॥ राजा समुद्रं नद्यः वि गाहते अपां ऊर्मिं सचते सिंधुषु श्रितः अधि अस्थात् सानु पवमानः अव्ययं नाभा पृथिव्याः धरुणः महः दिवः ॥८॥ दिवः न सानु स्तनयन् अचिक्रदत् द्यौः च यस्य पृथिवी च धर्मंऽभिः इंद्रस्य सख्यं पवते विऽवेविदत् सोमः पुनानः कलशेषु सीदति ॥९॥ ज्योतिः यज्ञस्य पवते मधु प्रियं पिता देवानाँ जनिता विभुऽवसुः दधाति रत्नं स्वधयोः अपीच्यं मदिन्ऽतमः मत्सरः इंद्रियः रसः ॥१०॥१३॥ अभिऽक्रंदन् कलशे वाजी अर्षति पतिः दिवः शतऽधारः विऽचक्षणः हरिः मित्रस्य सदनेषु सीदति मर्मृजानः अविंऽभिः सिंधुऽभिः वृषा ॥११॥ अयं सिंधूनां पवमानः अर्षति अयं वाचः अग्रियः गोषु गच्छति अयं वाजस्य भजते महाऽधनं सुऽआयुधः सोतृऽभिः पूयते वृषा ॥१२॥ अयं मतऽवान् शकुनः यथा हितः अव्ये ससार पवमानः ऊर्मिणा तवं क्रत्वा रोदसी अंतरा कवे शुचिः धिया पवते सोमः इंद्र ते ॥१३॥ द्रापिं वसानः यजतः दिविऽस्पृशं अंतरिक्षऽप्राः भुवनेषु अर्पितः स्वः जज्ञानः नभसा अभि अक्रमीत् प्रत्नं अस्य पितरं आ विवासति ॥१४॥ सः अस्य विशे महि शर्म यच्छति यः अस्य धाम प्रथमं विऽआनशे पदं यत् अस्य परमे विऽओमनि अतः विश्वाः अभि सं याति संऽयतः ॥१५॥१४॥ प्रो अयासीत् इंदुः इंद्रस्य निःऽकृतं सखा सख्युः न प्र मिनाति संऽगिरं मयः ऽइव युवतिऽभिः सं अर्षति सोमः कलशे शतऽयामा पथा ॥१६॥ प्र वः धियः मंदुऽयुवः विपन्युवः पनस्युवः संऽवसनेषु अक्रमुः सोमं मनीषाः अभि अनूषत स्तुभः अभि धेनवः पयसा ईं अशिश्रयुः ॥१७॥ आ नः सोम

संयतं पिप्युषीमिषमिंदो पवस्व पवमानो अस्रिधं । या नो दोहते त्रिरह्नन्त्सप्तधेनुका स्वदाजंयन्मधुमत्सुवीर्यं ॥१८॥ वृषा मतीनां पवते विचक्षणः सोमो अहः प्रतरीतोषसो दिवः । क्राणा सिंधूनां कलशाँ अवीवशदिंद्रस्य हार्द्याविशन्मनीषिभिः ॥१९॥ मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ अचिक्रदत् । चितस्य नामं जनयन्मधु क्षरदिंद्रस्य वायोः सख्याय कर्तवे ॥२०॥१५॥ अयं पुनान उषसो वि रोचयदयं सिंधुभ्यो अभवदु लोककृत् । अयं चिः सत्य दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥२१॥ पवस्व सोम दिव्येषु धामसु सृजान इंदो कलशे पवित्र आ । सीदन्निंद्रस्य जठरे कनिक्रदन्नृभिर्यतः सूर्यमारोहयो दिवि ॥२२॥ अद्रिभिः सुतः पवसे पवित्र आँ इंदविंद्रस्य जठरेष्वाविशन् । त्वं नृचक्षा अभवो विचक्षण सोम गोत्रमंगिरोभ्योऽवृणोरपः ॥२३॥ त्वां सोम पवमानं स्वाध्योऽनु विप्रासो अमदन्नवस्यवः । त्वां सुपर्ण आभरदिव्यस्परीदो विश्वाभिर्मतिभिः परिष्कृतं ॥२४॥ अयं पुनानं परि वार ऊर्मिणा हरिं नवंते अभि सप्त धेनवः । अपामुपस्थे अध्यायवः कविमृतस्य योनां महिषा अहेषत ॥२५॥१६॥ इंदुः पुनानो अति गाहते मृधो विश्वानि कृण्वन्त्सुपथानि यज्यवे । गाः कृण्वानो निर्णिजं हर्यतः कविरत्यो न क्रीळन्परि वारमर्षति ॥२६॥ असश्चतः शतधारा अभिश्रियो हरिं नवंतेऽव ता उदन्युवः । शिप्रां मृजंति परि गोभिरावृतं तृतीये पृष्ठे अधि रोचने दिवः ॥२७॥ तवेमाः प्रजा दिव्यस्य रेतसस्त्वं विश्वस्य भुवनस्य राजसि । अयेदं विश्वं पवमान ते वशे त्वमिंदो प्रथमो धामधा असि ॥२८॥

सं॒ऽयतं॑ पि॒प्युषी॒मिष॒मिंदो॑ पवस्व पवमानः अ॒स्मिध॑ या नः॒ दोह॑ते चि॒त्रऽअ॑ह्नः असश्चु॒षी क्षु॒ऽमत् वाज॑ऽवत् मधु॒ऽमत् सु॒ऽवीर्य॑म्॥१८॥ वृषा॑ म॒तीना॑ पवते॒ विऽच॑क्षणः सोमः॒ अह्नः॑ प्र॒ऽत॒रीता॒ उप॑सः दि॒वः का॒रा सिंधू॑नां कल॒शान्॑ अवीवशत् इंद्र॑स्य हार्दि॒ आऽवि॑शन् म॒नी॒षिऽभिः॥१९॥ म॒नी॒षिऽभिः॑ पवते॒ पूर्व्यः॑ क॒विः नृऽभिः॑ यतः॑ परि॑ कोशा॑न् अचिक्रदत् चि॒तस्य॑ नाम॑ जनयन् मधु॑ क्षरत् इंद्र॑स्य वा॒योः स॒ख्याय॑ कर्त॑वे॥२०॥१५॥ अ॒यं पु॒ना॒नः उ॒प॒सः वि रो॒च॒य॒त॒ अ॒यं सिंधु॑ऽभ्यः अभवत् ऊं॒ लोक॑ऽकृत् अ॒यं चि॒त्रः स॒न्न दु॒ऽदु॒हा॒नः आऽशिरं॑ सोमः॒ हृ॒दे प॒व॒ते॒ चा॒रु॒ऽम॒त्सरः॑॥२१॥ पव॑स्व सोम दि॒व्येषु॑ धाम॑ऽसु सृजा॒नः इंदो॑ क॒लशे॑ प॒वि॒त्रे॒ आ सी॑दन् इंद्र॑स्य ज॒ठरे॑ कनिक्रदत् नृऽभिः॑ यतः॑ सूर्य॑ आ॒ रो॒ह॒यः॑ दि॒वि॥२२॥ अद्रि॑ऽभिः सुतः॑ पव॒से॒ प॒वि॒त्रे॒ आ इंदो॑ इंद्र॑स्य ज॒ठरे॑षु॒ आऽवि॑शन् त्वं नृऽच॑क्षाः॑ अभवः॒ विऽच॑क्षणः सोम॑ गो॒वं अं॑गिरः॑ऽभ्यः॑ अ॒वृ॒णोः॑ अप॑॥२३॥ त्वां सो॒म॒ प॒व॒मा॒नं सु॒ऽआ॒र्य॑ः अनु॑ विप्रा॑सः अमदन् अ॒व॒स्य॒वः॑ त्वां सु॒ऽप॒र्णः॑ आ अ॒भ॒र॒त् दि॒वः परि॑ इंदो॑ विश्वा॑भिः म॒तिऽभिः॑ परि॑ऽकृतं॑॥२४॥ अ॒ग्नेः पु॒ना॒नं परि॑ वा॒रे॒ ऊ॒र्मिणा॑ हरिं॑ न॒व॒ते॒ अ॒भि॒ऽस॒न्न॒ धे॒न॒वः॒ अ॒पां उप॑ऽस्थे अधि॑ आ॒य॒वः॒ क॒विं ऋ॒तस्य॑ योना॑ महि॒याः॒ अ॒हे॒य॒त॒॥२५॥१६॥ इंदुः॑ पुना॒नः अति॑ गाहते मृधः॑ विश्वा॑नि कृण्वन् सु॒ऽप॒था॑नि॒ यज्ये॑वे गाः॑ कृ॒ण्वा॒नः नि॒ःऽ निर्जै॑ हर्यतः॑ क॒विः अत्यः॑ न क्री॒ळन् परि॑ वारं॑ अर्षति॥२६॥ अ॒स॒श्च॒तः॑ श॒तऽधा॑राः॒ अ॒भि॒ऽस्थि॒यः॑ हरिं॑ न॒व॒ते॒ अव॑ ताः॑ उ॒दन्यु॑वः क्षि॒पः॑ मृ॒ज॒न्ति॒ परि॑ गो॒भिः॑ आऽवृ॑तं नृ॒तीये॑ पृ॒ष्ठे अधि॑ रो॒च॒ने॒ दि॒वः॥२७॥ न॒वेदमाः॑ प्र॒ऽजाः॑ दि॒व्यस्येरतेः॑ त्वं विश्व॑स्य भुवनस्य राजसि॒ अथ॑ इदं॑ विश्वं॑ पवमान ते॒ वशे॑ त्वं इंदो॑ प्रथमः॑ धाम॑ऽधाः॑ असि॥२८॥

त्वं समुद्रो असि विश्ववित्कवे तवेमाः पंच प्रदिशो विधर्मणि। त्वं द्यां च पृथिवीं चातिं जभ्रिषे तव ज्योतींषि पवमान सूर्यः ॥२९॥ त्वं पवित्रे रजसो विधर्मणि देवेभ्यः सोम पवमान पूयसे। त्वामुशिजः प्रथमा अगृभ्णत तुभ्येमा विश्वा भुवनानि येमिरे ॥३०॥१७॥ प्र रेभ एत्यति वारमव्ययं वृषा वनेष्ववं चक्रदद्धरिः। सं धीतयो वावशाना अनूषत शिशुं रिहंति मतयः पनिप्नतं ॥३१॥ स सूर्यस्य रश्मिभिः परि व्यत तंतुं तन्वानस्त्रिवृतं यथा विदे। नयन्नृतस्य प्रशिषो नवीयसीः पतिर्जनीनामुप याति निष्कृतं ॥३२॥ राजा सिंधूनां पवते पतिर्दिव ऋतस्य याति पथिभिः कनिक्रदत्। सहस्रधारः परि पिच्यते हरिः पुनानो वाचं जनयन्नुपावसुः ॥३३॥ पवमान मह्यर्णो वि धावसि सूरो न चित्रो अर्यमानि पत्यया। गभस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्याय धन्वसि ॥३४॥ इषमूर्जं पवमानाभ्यर्षसि श्येनो न वंसु कलशेषु सीदसि। इंद्राय मद्वा मद्यो मदः सुतो दिवो विष्टंभ उपमो विचक्षणः ॥३५॥१८॥ सप्त स्वसारो अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपश्चितं। अपां गंधर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे ॥३६॥ ईशान इमा भुवनानि वीयसे युजान इंदो हरितो गाहते मृधो स्तेषरंतु मधुमद्घृतं पयस्तवं मते सोम धिः कृण्वानो निर्णिजं नृचक्षा असि सोम विश्वतः पवमानस्पेति ॥३७॥ असश्चतः स नः पवस्व वसुमद्धिरण्यवद्वयं गव्य ता उदन्युवः। शिप्रो मृगोवित्पवस्व वसुविद्धिरण्यविष्टे अधि रोचने दिवः ॥३८॥ त्वं सुवीरो असि सोम विश्व विश्वस्य भुवनस्य राजसि। अस्मासते ॥३९॥ उन्मध्व ऊमिंदो प्रथमो धामधा असि ॥४०॥

त्वं समुद्रः असि विश्वऽवित् कवे तवं इमाः पंच प्रऽदिशः विऽधर्मणि त्वं द्यां च पृथिवीं च अति जभ्रिषे तवं ज्योतींषि पवमान सूर्यः ॥२९॥ त्वं पवित्रे रजसः विऽधर्मणि देवेभ्यः सोम पवमान मूयसे त्वां उशिजः प्रथमाः अगृभ्णत तुभ्यं इमा विश्वा भुवनानि येमिरे ॥३०॥१७॥ प्रऽएभिः एति अति वारं अव्ययं वृषा वनेषु अवं चक्रदत् हरिः संधीतयः वाजयमानाः अनूषत शिशुं रिहंति मतयः पनिप्नतं ॥३१॥ सः सूर्यस्य रश्मिऽभिः परि व्यत तंतुं तन्वानः चिऽवृतं यथा विदे नयन ऋतस्य प्रऽशिषः नवीयसीः पतिः जनीनां उप याति निःऽकृतं ॥३२॥ राजा सिंधूनां पवते पतिः दिवः ऋतस्य याति पथिऽभिः कनिक्रदत् सहस्रऽधारः परि सिच्यते हरिः पुनानः वाचं जनयन् उपऽवसुः ॥३३॥ पवमान महि श्रवः विधावसि सूरः न चित्रः अव्ययानि पव्यया गभस्तिऽपूतः नृऽभिः अद्रिऽभिः सुतः महे वाजाय धन्याय धन्वसि ॥३४॥ इषे ऊर्जे पवमान अभि श्रवः सि श्येनः न वंसु कलशेषु सीदसि इंद्राय मद्वा मदिः मदः सुतः दिवः विष्टंभः उपऽमः विऽचक्षणः ॥३५॥ १८॥ सप्त स्वसारः अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपःऽचितं अपां गंधर्वं दिव्यं नृऽचक्षसं सोमं विश्वस्य भुवनस्य राजसे ॥३६॥ ईशानः इमा योनां महिषाः ऋे युजानः इंदो हरितः सुऽपर्णयः ताः ते क्षरंतु विश्वानि कृण्वन् सुऽते सोम तिष्ठंतु कृष्टयः ॥३७॥ त्वं नृऽचक्षाः हर्यतः कविः अत्यः न क्रीळ वृषभ ता वि धावसि सः नः पवस्व शतऽधाराः अभिऽश्रियः हिन्वानः देव वीतये ॥३८॥ गोऽवित् जंति परि गोभिः आऽवृतं तृतः नःऽधाः इंदो भुवनेषु अर्पितः तवं इमाः प्रऽजाः दिव्यस्य रेतसः तं त्वा विप्राः उप गिरा इमे इदं विश्वं पवमान ते वशे त्वं इंदो अति स्रिधः अपः वसा-

नो महिषो वि गाहते। राजा पवित्रमेषो वाजमारुहत्सहस्रभृष्टिर्जयति श्रवो बृहत् ॥४०॥१९॥ स भंदना उदियर्ति प्रजावतीर्विश्वायुर्विश्वाः सुभगा अहंदिवि। ब्रह्म प्रजावद्रयिमश्वपस्त्यं पीत इंदविंद्रमस्मभ्यं याचतात् ॥४१॥ सो अग्ने अह्नां हरिर्हितो मदः प्र चेतसा चेतयते अनु द्युभिः। द्वा जना यातयन्नंतरीयते नरा च शंस दैव्या च धर्तरि ॥४२॥ अंजते व्यंजते समंजते क्रतुं रिहंति मध्नाभ्यंजते। सिंधोरुच्छ्वासे पतयंतमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते ॥४३॥ विपश्चिते पवमानाय गायत महीं न धारामंधो अर्षति। अहिर्न जूर्णामतिं सर्पति त्वचमत्यो न क्रीळन्नसरद्वृषा हरिः ॥४४॥ अग्रेगो राजाप्यस्तविष्पते विमानो अह्नां भुवनेष्वर्पितः। हरिर्धृतस्रुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥४५॥२०॥ असर्जि स्कंभो दिव उद्यतो मदः परि चिधातुर्भुवनान्यर्षति। अंशुं रिहंति मतयः पनिप्नतं गिरा यदिं निर्णिजमृग्मिणो ययुः ॥४६॥ प्र ते धारा असश्चतो दिवो न यंति रंहयः। पुनानस्य संयतो यंति रंहयः। यत्रोभिरिंदो चम्वोः समज्यस आ सुवानः सोम कलशेषु सीदसि ॥४७॥ पवस्व सोम क्रतुविन्न उक्थ्योऽव्यो वारे परि धाव मधु प्रियं। जहि विश्वान्रक्षस इंदो अद्रिणो बृहद्वदेम विदथे सुवीराः ॥४८॥२१॥

॥ ८७ ॥ १-९ उशनाः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥८७॥ प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष। अश्वं न त्वा वाजिनं मर्जयंतोऽच्छा बर्ही रशनाभिर्नयंति ॥१॥ स्वायुधः पवते देव इंदुरशस्तिहा वृजनं रक्षमाणः। पिता देवानां जनिता सुदक्षो विष्टंभो दिवो धरुणः पृथिव्याः ॥२॥

नः महिषः वि गाहते राजा पविचऽरथः वाजं आ अरुहत् सहस्रेऽभृष्टिः जयति श्रवः बृहत् ॥४०॥१९॥ सः भंदनाः उत् इयर्ति प्रजाऽवतीः विश्वऽआयुः विश्वाः सुऽभराः अहंऽदिवि यत्र प्रजाऽवत् रयिं अश्वऽपस्त्यं पीतः इंदो इंद्रं अस्मभ्यं याचतात् ॥४१॥ सः अर्षे अहाँ हरिः हर्यतः मदः प्र चेतसा चेतयते अनु द्युऽभिः द्वा जनां यातयन् अंतः ईयते नराशंसं च दैव्यं च धर्तरि ॥४२॥ अंजते वि अंजते सं अंजते क्रतुं रिहंति मधुना अभि अंजते सिंधोः उत्ऽआसे पतयंतं उक्षणं हिरण्यऽपावाः पशुं आसु गृभ्णते ॥४३॥ विपःऽचिते पवमानाय गायत महीं न धारां अति अर्षति अहिः न जूर्णां अति सर्पति त्वचं अत्यः न क्रीळन् असरत् वृषा हरिः ॥४४॥ अयेऽगः राजा अर्यः तविष्यते विऽमानः अहाँ भुवनेषु अर्पितः हरिः घृतऽस्नुः सुऽदृशीकः अर्णवः ज्योतिःऽरथः पवते राये ओक्यः ॥४५॥२०॥ असर्जि स्कंभः दिवः उत्ऽयतः मदः परि चिऽधातुः भुवनानि अर्षति अंशुं रिहंति मतयः पनिप्नतं गिरा यदि निःऽनिजं ऋग्मिणः ययुः ॥४६॥ प्र ते धाराः अति अर्षंति अर्णवं मेष्यः पुनानस्य संऽयतः यंति रंहयः यत् गोभिः इंदो चम्वोः संऽअज्यसे आ सुवानः सोम कलशेषु सीदसि ॥४७॥ पवस्व सोम क्रतुऽवित नः उक्थ्यः अव्यः वारेपरिधावसि मधुप्रियं जहि विश्वान् रक्षसः इंदो अचिणः बृहत् वदेम विदथे सुऽवीराः ॥४८॥२१॥

॥८७॥ प्र तुदत्व परि कोशं नि सीद नृऽभिः पुनानः अभि वाजं अर्ष अश्वं न त्वा वाजिनं मर्जयंतः अच्छं वहिः रशनाभिः नयंति ॥१॥ सुऽआयुधः पवते देवः इंदुः अशस्तिऽहा वृजनं रक्षमाणः पिता देवानां जनिता सुऽदक्षः विष्टंभः दिवः धरुणः पृथिव्याः ॥२॥

ऋषिर्विप्रः पुरएता जनानामृभुर्धीरः उशना काव्येन । स चिन्द्विवेद् निहितं यदासामपीच्यं१गुह्यं नाम गोनाम् ॥३॥ एष स्य ते मधुमाँ इंदू सोमो वृषा वृष्णे परि पवित्रे अक्षाः । सहस्रसाः शतसा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥४॥ एते सोमा अभि गव्या सहस्रा महे वाजायामृताय श्रवांसि । पवित्रेभिः पवमाना असृग्रञ्छ्रवस्यवो न पृतनाजो अत्याः ॥५॥२२॥ परि हि ष्मा पुरुहूतो जनानां विश्वासद्रोजना पूयमानः । अथा भर श्येनभृत प्रयांसि रयिं तुंजानो अभि वाजमर्ष ॥६॥ एष सुवानः परि सोमः पवित्रे सर्गो न सृष्टो अदधावदर्वा । तिग्मे शिशानो महिषो न शृंगे गा गव्यन्नभि शूरो न सत्वा ॥७॥ एषा यया परमादंतरद्रेः कूचित्सतीरूर्वे गा विवेद । दिवो न विद्युत्स्तनयंत्यभ्रैः सोमस्य ते पवत इंदू धारा ॥८॥ उत सं राशिं परि यासि गोनामिंद्रेण सोम सरथं पुनानः । पूर्वीरिषो बृहतीर्जीरदानो शिक्षा शचीवस्तव ता उपष्टुत् ॥९॥२३॥

॥ ८८ ॥ १-८ उशनाः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥८८॥ अयं सोम इंद्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि । त्वं ह यं चकृषे त्वं ववृष इंदुं मदाय युज्याय सोमं ॥१॥ स ईं रथो न भुरिषाळयोजि महः पुरूणि सातये वसूनि । आदीं विश्वा नहुष्याणि जाता स्वर्षाता वनं ऊर्ध्वा नवंत ॥२॥ वायुने यो नियुतो दक्षयाम्ना नासत्येव हव आ शंभविष्ठः । विश्ववारो दविणोदा इव त्मन्पूषेव धीजवनोऽसि सोम ॥३॥ इंद्रो न यो महा कर्माणि चक्रिर्हता वृत्राणामसि सोम पूर्भित् । पिप्रो न हि त्वमहिनामसि हंता विश्वस्यासि सोम दस्योः ॥४॥ अग्निने

ऋषिः विप्रः पुरःऽएता जनानां ऋभुः धीरः उशना काव्येन सः चित् विवेद् निऽहितं यत् आसां अपीच्यं गुह्यं नाम गोनां॥३॥ एषः स्यः ते मधुऽमान् इंद्र सोमः वृषा वृष्णे परि पविचे अक्षाः सहस्रऽसाः शतऽसाः भूरिऽदावा शश्वत्ऽतमं बर्हिः आ वाजी अस्थात्॥४॥ एते सोमाः अभि गव्या सहस्रा महे वाजाय अमृतांय श्रवांसि पविचेभिः पवमानाः असृक्षत श्रवस्यवः न पृतनाजः अत्याः॥५॥२२॥ परिहि स्म पुरुऽहूतः जनानां विश्वा असरत् भोजना पूयमानः अर्षं आ भर् श्येनऽभृत् प्रयांसि रयिं तुंजानः अभि वाजं अर्ष॥६॥ एषः सुवानः परिसोमः पविचे सर्गः न सृष्टः अदुधावत् अवीं तिग्मे शिशानः महिषः न शृंगे गाः गव्यन् अभि शूरः न सत्वा॥७॥ एषा आ ययौ परमात् अंतः अद्रेः कूऽचित् सतीः ऊर्वे गाः विवेद् दिवः न विऽद्युत् स्तनयती अभ्रैः सोमस्य ते पवते इंद्र धारा॥८॥ उत स्म राशिं परि यासि गोनां इंद्रेण सोम् सऽरथं पुनानः पूर्वीः इषः बृहतीः जीरऽदानो शिप्रं शचीऽवः तव ताः उपऽस्तुत ॥ ९ ॥ २३ ॥

॥८८॥ अयं सोमः इंद्र तुभ्यं सुन्वे तुभ्यं पवते त्वं अस्य पाहि त्वं हृयं चकृषे त्वं ववृषे इंदो मदाय युज्याय सोम॥१॥ सः ईं रथः न भुरिषाट् अयोजि महः पुरूणि सातये वसूनि आत ईं विश्वा नहुष्याणि जाता स्वःऽसाता वने ऊर्धा नवंत॥२॥ वायुः न यः नियुत्वान् इष्टऽयामा नासत्याऽइव हवे आ शंऽभविष्ठः विश्वऽवारः द्रविणोदाः ऽइव त्मन् पूषाऽइव धीऽजवनः असि सोम॥३॥ इंद्रः न यः महा कर्माणि चक्रिं हंता वृचाणां असि सोम पूः अभित् पित्रः न हि त्वं अहिंऽनाम्नां हंता विश्वस्य असि सोम दस्योः॥४॥ अग्निः न

यो वन आ सृज्यमानो वृथा पाजांसि कृणुते नदीषु । जनो न युध्वा महत उपब्दिरियर्ति सोमः पवमान ऊर्मिं ॥५॥ एते सोमा अति वाराण्यव्या दिव्या न कोशासो अभ्रवर्षाः । वृथा समुद्रं सिंधवो न नीचीः सुतासो अभि कलशाँ असृयन ॥६॥ शुभ्रो शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् । आपो न मक्षू सुमतिर्भवा नः सहस्रापाः पृतनाषाण्न यज्ञः ॥७॥ राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम । शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥८॥२४॥

॥ ८९ ॥ १-७ उशनाः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥८९॥ प्रो स्य वहिः पथ्याभिरस्यान्दिवो न वृष्टिः पवमानो अक्षाः । सहस्रधारो असदद्व्ये सेमातुरुपस्थे वन आ च सोमः ॥१॥ राजा सिंधूनामवसिष्ट वास ऋतस्य नावमारुहद्रजिष्ठां । अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर्जाः ॥२॥ सिंहं नसंत मध्वो अयासं हरिमरुषं दिवो अस्य पतिं । पूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युष्णा ॥३॥ मधुपृष्ठं घोरमयासमश्वं रथे युंजंत्युरुचक्र ऋष्वं । स्वसार ईं जामयो मर्जयंति सनाभयो वाजिनमूर्जयंति ॥४॥ चतस्र ईं घृतदुहः सचंते समाने अंतर्धरुणे निषत्ताः । ता ईमर्षंति नमसा पुनानास्ता ईं विश्वतः परि षंति पूर्वीः ॥५॥ विष्टंभो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य । असंत उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत ईंद्रियायं ॥६॥ वन्वन्नवातो अभि देववीतिमिंद्राय सोम वृषहा पवस्व । शग्धि महः पुरुष्टुतस्य रायः सुवीर्यस्य पतयः स्याम ॥७॥२५॥

यः वने आ सृज्यमानः वृथा पाजांसि कृणुते नदीषु जनः न युध्वा महतः उपब्दिः इयर्ति सोमः पवमानः ऊर्मिं ॥५॥ एते सोमाः अति वाराणि अव्या दिव्याः न कोशासः अभ्रऽवर्षाः वृथा समुद्रं सिंधवः न नीचीः सुतासः अभि कलशान् असृयन्॥६॥ शुष्मी शर्धः न मारुतं पवस्व अनभिऽशस्ता दिव्या यथा विट् आपः न मद्धु सुऽमतिः भवनः सहस्रऽअप्साः पृतनाषाट् न यज्ञः॥७॥ राज्ञः नु ते वरुणस्य व्रतानि बृहत् गभीरं तव सोम धाम शुचिः त्वं असि प्रियः न मित्रः दक्षाय्यः अर्यमाऽइव असि सोम ॥८॥२४॥

॥८९॥ प्रो स्यः वह्निः पथ्याभिः अस्यान् दिवः न वृष्टिः पवमानः अक्षाः सहस्रऽधारः असदत् नि असे मातुः उपऽस्थे वने आ च सोमः॥१॥ राजा सिंधूनां अवसिष्ट वासः ऋतस्य नावं आ अरुहत् रजिष्ठां अप्ऽसु द्रप्सः ववृधे श्येनऽजूतः दुहे ईं पिता दुहे ईं पितुः जां॥२॥ सिंहं नसंत मध्वः अयासं हरिं अरुषं दिवः अस्य पतिं पूरुः युतऽसु प्रथमः पृच्छते गाः अस्य चक्षसा परि पाति उक्षा ॥३॥ मधुऽपृष्ठं घोरं अयासं अश्वं रथे युंजंति उरुऽचक्रे ऋष्वं स्वसारः ईं जामयः मर्जयंति सऽनाभयः वाजिनं ऊर्जयंति ॥४॥ चतसः ईं घृतऽदुहः सचंते समाने अंतः धरुणे निऽसत्ताः ताः ईं अर्षंति नमसा पुनानाः ताः ईं विश्वतः परि संति पूर्वीः ॥५॥ विष्टंभः दिवः धरुणः पृथिव्याः विश्वाः उत क्षितयः हस्ते अस्य असंत ते उत्सः गृणते नियुत्वान् मध्वः अंशुः पवते इंद्रियाय ॥६॥ वन्वन् अवातः अभि देवऽवीतिं इंद्राय सोम वृषऽहा पवस्व शग्धि महः पुरुऽचंद्रस्य रायः सुऽवीर्यस्य पतयः स्याम ॥७॥२५॥

॥ ९० ॥ १-६ वसिष्ठः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥ ९० ॥ प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिष्यन्नयासीत् । इंद्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ॥ १ ॥ अभि चिंपृष्ठं वृषणं वयोधामाँगूषाणामवावशंत वाणीः । वना वसानो वरुणो न सिंधून्वि रत्नधा दयते वार्याणि ॥ २ ॥ शूरयामः सवनेवीः सहावाञ्जेता पवस्व सनिता धनानि । तिग्मायुधः क्षिप्रधन्वा समत्स्वपाङ्हः साह्वान्पृतनासु शत्रून् ॥ ३ ॥ उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरंधी । अपः सिषासन्नुषसः स्व१र्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥ ४ ॥ मत्सि सोम वरुणं मत्सि मित्रं मत्सीद्रमिंदो पवमान विष्णुं । मत्सि शर्धो मारुतं मत्सि देवान्मत्सि महामिंद्रमिंदो मदाय ॥ ५ ॥ एवा राजेव ऋतुमाँ अमेन विश्वा धनिंघ्नदुरिता पवस्व । इंदो सूक्ताय वचसे वयो धा यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥ २६ ॥ ३ ॥

॥ ९१ ॥ १-६ काश्यप ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥ ९१ ॥ असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो मनीषी । दश स्वसारो अधि सानो अव्येऽजंति वह्निं सदनान्यच्छ ॥ १ ॥ वीती जनस्य दिव्यस्य कवेरधि सुवानो मंहुष्येभिरिंदुः । प्र यो नृभिरमृतो मर्त्येभिर्मृजानोऽविभिर्गोभिरद्भिः ॥ २ ॥ वृषा वृष्णे रोरुवदंशुरस्मे पवमानो रुशदीतं पयो गोः । सहस्रमृक्वा पथिभिर्वचोविदध्वस्मभिः सूरो अणं वि यांति ॥ ३ ॥ रुजा दृळ्हा चिद्दक्षसः सदांसि पुनान इंद ऊर्णुहि वि वाजान् । वृष्णोपरिष्टात्तुजता वधेन ये अंति दूरादुपनायमेषां ॥ ४ ॥ स प्रत्नवन्नव्यसे विश्ववार सूक्तायं पथः कृणुहि प्राचः । ये दुःघहासो वनुषां वृहंतस्तांस्ते अश्याम

॥ ९० ॥ प्र हिन्वानः जनिता रोदस्योः रथः न वाजं सनिष्यन् अयासीत् इंद्रं गच्छन् आयुधा संऽशिशानः विश्वा वसु हस्तयोः आऽदधानः ॥ १ ॥ अभि चिऽपृष्ठं वृषणं वयःऽधां आंगूषाणां अवावशंत वाणीः वना वसानः वरुणः न सिंधून् वि रत्नऽधाः दयते वार्याणि ॥ २ ॥ शूरऽयामः सर्वऽवीरः सहावान् जेता पवस्व सनिता धनानि तिग्मऽआयुधः क्षिप्रऽधन्वा समतऽसु अषाळ्हः सह्वान् पृतनासु शत्रून् ॥ ३ ॥ उरुऽगव्यूतिः अभयानि कृण्वन् संऽईचीनेः आ पवस्व पुरुऽधीः अपः सिसासन् उषसः स्वः गाः सं चित्रऽदुः महः अस्मभ्यं वाजान् ॥ ४ ॥ मत्सि सोम वरुणं मत्सि मित्रं मत्सि इंद्रं इंदो पवमान विष्णुं मत्सि शर्धीः मारुतं मत्सि देवान् मत्सि महां इंद्रं इंदो मदाय ॥ ५ ॥ एव राजाऽइव ऋतुऽमान् अमेन विश्वा घनिघ्नत् दुःऽइता पवस्व इंदो सुऽउक्ताय वचसे वयःधाः यूयं पात स्वस्तिऽभिः सदा नः ॥ ६ ॥ २६ ॥ ३ ॥

॥ ९१ ॥ असर्जि वक्वा रथ्ये यथा आजौ धिया मनोता प्रथमः मनीषी दश स्वसारः अधि सानौ अव्ये अजंति वह्निं सदनानि अच्छ ॥ १ ॥ वीती जनस्य दिव्यस्य कव्यैः अधि सुवानः नहुषेभिः इंदुः प्र यः नृऽभिः अमृतः मर्त्येभिः मर्मृजानः अविऽभिः गोऽभिः अतऽभिः ॥ २ ॥ वृषा वृष्णे रोरुवत् अंशुः अस्मै पवमानः रुशत् इर्ते पयः गोः सहस्रं ऋक्वा पथिऽभिः वचःऽवित् अध्वसऽभिः सूरः अर्णं वि याति ॥ ३ ॥ रुज दृळ्हा चित् रक्षसः सदांसि पुनानः इंदो ऊर्णुहि वि वाजान् वृष्ण उपरिष्टात् तुजता वधेन ये अंति दूरात् उपऽनायं एषां ॥ ४ ॥ सः मन्युऽवत् नव्यसे विश्वऽवारः सुऽउक्ताय पथः कृणुहि प्राचः ये दुःऽसहासः वनुषां बृहंतः तान् ते अश्याम्

पुरुकृत्पुरुक्षो ॥५॥ एवा पुनानो अपः स्व१र्गा अस्मभ्यं तोका तनयानि भूरि। शं नः क्षेचमुरु ज्योतींषि सोम ज्योङ्नः सूर्ये दृशये रिरीहि ॥ ६ ॥ १ ॥

॥ ९२ ॥ १-६ काश्यपः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥ ९२ ॥ परि सुवानो हरिरंशुः पवित्रे रथो न सज्जि सनये हियानः। आपच्छ्लोकमिंद्रियं पूयमानः प्रति देवाँ अंजुषत प्रयोभिः ॥१॥ अच्छा नृचक्षा असरत्पवित्रे नाम दधानः कविरस्य योनौ। सीदन्होतेव सदने चमूपूपेमग्मन्नृषयः सप्त विप्राः ॥ २ ॥ प्र सुमेधा गातुविद्विश्वदेवः सोमः पुनानः सदं एति नित्यं। भुवद्विश्वेषु काव्येषु रंतानु जनान्यतते पंच धीरः ॥ ३ ॥ तव त्ये सोम पवमान निण्ये विश्वे देवास्त्रय एकादशासः। दशं स्वधाभिरधि सानो अव्ये मृजंति त्वा नद्यः सप्त यह्वीः ॥४॥ तन्नु सत्यं पवमानस्यास्तु यत्र विश्वे कारवः संनसंत। ज्योतिर्यदह्रे अकृणोदु लोकं प्रावन्मनुं दस्यवे करभीकं ॥५॥ परि सप्तेव पशुमांति होता राजा न सत्यः समितीरियानः। सोमः पुनानः कलशाँ अयासीत्सीदन्मृगो न महिषो वनेषु ॥ ६ ॥ २ ॥

॥ ९३ ॥ १-५ गोधाः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥९३॥ साकमुक्षो मर्जयंत स्वसारो दश धीरस्य धीतयो धनुचीः। हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥१॥ सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः। मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलशे उस्रियाभिः ॥२॥ उत प्र पिप्य ऊधरस्यायां इंदुर्धाराभिः सचते सुमेधाः। मूर्धानं गावः पयसा चमूष्वभि श्रीणंति वसुभिर्न निक्तैः

पुरुऽकृत् पुरुऽक्षो॑॥५॥एव पुनानः अपः स्वः गाः अस्मभ्यं तोका तनयानि भूरि शं नः क्षेचं उरु ज्योतीं॑षि सोम ज्योक् नः सूर्यं दृशये रिरीहि ॥ ६ ॥ १ ॥

॥९२॥ परि सुवानः हरिः अंशुः पविचे अर्षः न सर्जि सनये हियानः आ मंत्र ओकं इंद्रियं यूयमानः प्रति देवान् अजुषत प्रयःऽभिः ॥१॥ अच्छं नृऽचक्षाः असरत् पविचे नामं दधानः कविः अस्य योनौ सीदन् होताऽइव सदने चमूषु उप ईं अग्मन् ऋतुऽपयः सप्त विप्राः॥२॥ प्र सुऽमेधाः गातुऽवित् विश्वऽदेवः सोमः पुनानः सदः एति नित्यं भुवत् विश्वेषु काव्येषु रंता अनु जनान् यतते पंच धीरः॥३॥ तवं त्ये सोम पवमान नि॒ण्ये विश्वे देवाः चयः एकादशासः दश स्वधाभिः अधि सानौ अव्ये मृजंति त्वा नद्यः सप्त यह्वीः ॥४॥ तत् नु सत्यं पवमानस्य अस्तु यत् विश्वे कारवः संऽनसंत ज्योतिः यत् अहे अकृणोत् ऊं लोकं प्र आवत् मनुं दस्यवे कः अभीकं॥५॥ परि सद्मंऽइव पशुऽमंति होता राजा न सत्यः संऽइंतीः इयानः सोमः पुनानः कलशान् अयासीत् सीदत् मृगः न महिषः वनेषु ॥ ६ ॥ २ ॥

॥९३॥ साकंऽउक्षः मर्जयंत स्वसारः दश धीः अस्य धीतयः धनुंचीः हरिः परि अद्रवत् जाः सूर्यस्य द्रोणं ननक्षे अत्यः न वाजी॥१॥ सं मातृऽभिः न शिशुः वावशानः वृषा दधन्वे पुरुऽवारः अतऽभिः मर्यैः न योषां अभि निःऽकृतं मन् सं गच्छते कलशे उस्रियाभिः ॥२॥ उत प्र पिप्ये ऊधः अघ्न्यायाः इंदुः धाराभिः सचते सुऽमेधाः मूर्धानं गावः पयसा चमूषु अभि श्रीणंति वसुऽभिः न निक्तैः

॥३॥ सः नः देवेभिः पवमानः इदुं इंदो रयिं अश्विनं वावशानः रथिरायतां उशती पुरंधिः अस्मध्यक् आ दावने वसूनां ॥४॥ नु नः रयिं उप मास्व नृवंतं पुनानः वाताप्यं विश्वऽचंद्रं प्र चंदितुः इंदो तारि आयुः प्रातः मक्षु धियाऽवसुः जगम्यात् ॥५॥३॥

॥९४॥ अधि यत् अस्मिन् वाजिनिऽइव शुभः स्पर्धंते धियः सूर्ये न विशः अपः वृणानः पवते कविऽयन् व्रजं न पशुऽवर्धनाय मन्म ॥१॥ द्विता विऽऊर्वन् अमृतस्य धामं स्वःऽविदं भुवनानि प्रथंत धियः पिन्वानाः स्वसरेन गावः ऋतऽयंतीः अभि वावश्रे इंदुं ॥२॥ परि यत् कविः काव्या भरते शूरः न रथः भुवनानि विश्वा देवेषु यशः मतीय भूषन् दक्षाय रायः पुरुऽभूषु नव्यः ॥३॥ श्रिये जातः श्रिये आ निःऽइयाय श्रियं वयः जरितृऽभ्यः दधाति श्रियं वसानाः अमृतऽत्वं आयन् भवंति सत्या समंऽइधा मितऽद्रौ ॥४॥ इषं ऊर्जं अभि अर्ष अश्वं गां उरु ज्योतिः कृणुहि मत्सि देवान् विश्वानि हि सुऽसहा तानि तुभ्यं पवमान वाधसे सोम शत्रून् ॥५॥४॥

॥९५॥ कनिक्रंति हरिः आ सृज्यमानः सीदन् वनस्य जठरे पुनानः नृऽभिः यतः कृणुते निःऽनिजं गाः अतः मतीः जनयत स्वधाभिः ॥१॥ हरिः सृजानः पथ्यां ऋतस्य इयर्ति वाचं अरिताऽइव नावं देवः देवानां गुह्यानि नामं आविः कृणोति बर्हिषि प्रऽवाचे ॥२॥ अपांऽइव इत् ऊर्मयः ततुराणाः प्र मनीषाः ईरते सोमं अच्छ नमस्यंतीः उप च यंति सं च आ च विशंति उशतीः उशंतं ॥३॥ तं मर्मृजानं महियं न सानौ अपां दुहंति उक्षणं गि-

रिष्टां। तं वांवशानं मतयः सचंते चितो विभर्ति वरुणं समुद्रे ॥४॥ इत्यन्वाचमुपवक्तेव होतुः पुनान इंदो वि षां मनीषां। इंद्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥५॥५॥

॥ ९६ ॥ १–२४ प्रतर्दनो दैवोदासिः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥९६॥ प्र सेनानीः शूरो अग्ने रथानां गव्यन्नेति हर्षते अस्य सेना। भद्रान्कृण्वन्निंद्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥१॥ समस्य हरिं हर्यो मृजंत्यश्वहयैरनिशितं नमोभिः। आ तिष्ठति रथमिंद्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ ॥२॥ स नो देव देवतांते पवस्व महे सोम परस इंद्रपानः। कृण्वन्वपो वर्षयन्द्यामुतेमामुरोरा नो वरिवस्या पुनानः ॥३॥ अजीतयेऽहंतये पवस्व स्वस्तये सर्वतातये वृहते। तदुशंति विश्व इमे सखायस्तद्हं वंश्मि पवमान सोम ॥४॥ सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः। जनिताग्नेर्जनिता सूर्यस्य जनितेंद्रस्य जनितोत विष्णोः ॥५॥६॥ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां। श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥६॥ प्रावीविपद्वाच ऊर्मिं न सिंधुर्गिरः सोमः पवमानो मनीषाः। अंतः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥७॥ स मंत्सरः पृत्सु वन्वन्नवांतः सहस्रेता अभि वाजमर्ष। इंद्रायेंदो पवमानो मनीषयांशोरूर्मिमीर्य गा इंषण्यन् ॥८॥ परि प्रियः कलशे देववांत इंद्राय सोमो रण्यो मदाय। सहस्रधारः शतवाज इंदुर्वाजी न सप्तिः समना जिगाति ॥९॥ स पूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ। अभिगृणन्निषा भुवनस्य राजा विद्वान्तं

रिऽस्यां तं वावशानं मतयः सचंते चितः विभर्ति वरुणं समुद्रे ॥४॥ इयंन वाचं उपवक्ताऽइवहोतुः पुनानः इंदो वि स्य मनीषां इंद्रः च यत् क्षयथः सौभगाय सुऽवीर्यस्य पतयः स्याम ॥५॥५॥

॥९६॥ प्र सेनाऽनीः शूरः अर्षे रथानां गव्यन् एति हर्षते अस्य सेना भद्रान् कृण्वन् इंद्रऽहुवान् सखिऽभ्यः आ सोमः वस्त्रा रभसानि दत्ते ॥१॥ सं अस्य हरिः हरयः मृजंति अप्सुऽहुयैः अनिऽशितं नमःऽभिः आ तिष्ठति रथं इंद्रस्य सखा विद्वान् एन सुऽमतिं याति अच्छ ॥२॥ सः नः देव देवऽतांते पवस्व महे सोम परसे इंद्रऽपानः कृण्वन् अपः वर्षयन् द्यां उत इमां उरोः आ नः वरिवस्य पुनानः ॥३॥ अजीतये अहंतये पवस्व स्वस्तये सर्वऽतातये बृहते तत् उशंति विश्वे इमे सखायः तत् अहं वश्मि पवमान सोम ॥४॥ सोमः पवते जनिता मतीनां जनिता दिवः जनिता पृथिव्याः जनिता अग्नेः जनिता सूर्यस्य जनिता इंद्रस्य जनिता उत विष्णोः ॥५॥६॥ ब्रह्मा देवानां पदऽवीः कवीनां ऋषिः विप्राणां महिषः मृगाणां श्येनः गृध्राणां स्वऽधितिः वनानां सोमः पवित्रं अति एति रेभन् ॥६॥ प्र अवी विपत वाचः ऊर्मिं न सिंधुः गिरः सोमः पवमानः मनीषाः अंतः पश्यन वृजनां इमा अवराणि आ तिष्ठति वृषभः गोषु जानन ॥७॥ सः मत्सरः पृतऽसु वन्वन अवातः सहस्रऽरेताः अभि वाजं अर्ष इंद्राय इंदो पवमानः मनीषी अंशोः ऊर्मिं ईरय गाः इषण्यन ॥८॥ परि प्रियः कलशे देवऽवातः इंद्राय सोमः रण्यः मदाय सहस्रऽधारः शतऽवाजः इंदुः वाजी न सप्तिः समना जिगाति ॥९॥ सः पूर्व्यः वसुऽवित् जायमानः मृजानः अप्ऽसु दुदुहानः अद्रौ अभिशस्तिऽपाः भुवनस्य राजा विदत् गातुं

ब्रह्मणे पूयमानः ॥१०॥७॥ त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः । वन्वन्नवातः परिधीरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥११॥ यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्वरिष्मान् । एवा पवस्व द्रविणं दधान इंदो सं तिष्ठ जनयायुधानि ॥१२॥ पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये । अव द्रोणानि घृतवांति सीद मदिंतमो मत्सर इंद्रपानः ॥१३॥ वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर्देववीतौ । सं सिंधुभिः कलशे वावशानः समुस्रियाभिः प्रतिरन्न आयुः ॥१४॥ एष स्य सोमो मतिभिः पुनानोऽत्यो न वाजी तरतीदरातीः । पयो न दुग्धमदितेरिषिरमुर्विव गातुः सुयमो न वोळ्हा ॥१५॥८॥ स्वायुधः सोतृभिः पूयमानोऽभ्यर्ष गुह्यं चारु नाम । अभि वाजं सप्तिरिव श्रवस्याभि वायुमभि गा देव सोम ॥१६॥ शिशुं जज्ञानं हर्यतं मृजंति शुंभंति वह्निं मरुतो गणेन । कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन् ॥१७॥ ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रणीथः पदवीः कवीनां । तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ॥१८॥ चमूषच्छ्येनः शकुनो विभृत्वा गोविंदुर्द्रप्स आयुधानि बिभ्रत् । अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥१९॥ मर्यो न शुभ्रस्तन्वं मृजानोऽत्यो न सृत्वा सनये धनानां । वृषेव यूथा परि कोशमर्षन्कनिक्रदद्भ्वो३रा विवेश ॥२०॥९॥ पवस्वेंदो पवमानो महोभिः कनिक्रदत्परि वाराण्यर्ष । क्रीळन्भ्वो३रा विश पूयमान इंद्रं ते रसो मदिरो ममत्तु ॥२१॥ प्रास्य धारा बृहतीरसृग्रन्वृको गोभिः

ब्रह्मणे पूयमानः॥१०॥७॥ त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः। वन्वन् अवातः परिधीन् अप ऊर्णु वीरिभिः अश्वैः मघऽवा भवा नः॥११॥ यथा अपवथाः मनवे वयःऽधाः अमित्रऽहा वरिवःऽवित् हुविष्मान् एव पवस्व द्रविणं दधानः इंद्रे सं तिष्ठ जनयं आयुधानि॥१२॥ पवस्व सोम मधुऽमान् ऋतऽवा अपः वसानः अधि सानौ अव्ये अव द्रोणानि घृतऽवंति सीद मदिन्ऽतमः मत्सरः इंद्रुऽपानः॥१३॥ वृष्टिं दिवः शतऽधारः पवस्व सहस्रऽसाः वाजऽयुः देवऽवीतौ सं सिंधुऽभिः कलशे वावशानः सं उस्रियाभिः प्रऽतिरन् नः आयुः॥१४॥ एषः स्यः सोमः मतिऽभिः पुनानः अत्यः न वाजी तरति इत् अरातीः पयः न दुग्धं अदितेः इषिरं उरुऽइव गातुः सुऽयमः न वोळ्हा॥१५॥८॥ सुऽआयुधः सोतृऽभिः पूयमानः अभि अर्ष गुह्यं चारु नाम अभि वाजं सप्तिःऽइव श्रवस्या अभि वायुं अभि गाः देव सोम॥१६॥ शिशुं जज्ञानं हर्यतं मृजंति शुंभंति वह्निं मरुतः गणेन कविः गीःऽभिः काव्येन कविः सन् सोमः पवित्रं अति एति रेभन्॥१७॥ ऋषिऽमनाः यः ऋषिऽकृत् स्वःऽसाः सहस्रऽनीथः पदऽवीः कवीनां तृतीयं धाम महिषः सिसासन् सोमः विऽराजं अनु राजति स्तुप्॥१८॥ चमूऽसत् श्येनः शकुनः विऽभृत्वा गोऽविदुः द्रप्सः आयुधानि बिभ्रत् अपां ऊर्मिं सचमानः समुद्रं तुरीयं धाम महिषः विवक्ति॥१९॥ मयैः न शुभ्रः तन्वं मृजानः अत्यः न सृत्वा सनये धनानां वृषाऽइव यूथा परि कोशं अर्षन् कनिक्रदत् चम्वोः आ विवेश॥२०॥९॥ पवस्व इंदो पवमानः महःऽभिः कनिक्रदत् परि वाराणि अर्ष क्रीळन् चम्वोः आ विश पूयमानः इंद्रं ते रसः मदिरः ममत्तु॥२१॥ प्र अस्य धाराः बृहतीः असृग्रन् अक्तः गोभिः

कलशाँ आ विवेश। सामं कृण्वन्त्सामन्यो विपश्चित्क्रन्दन्नेत्यभि सख्युर्न जामिं ॥२२॥ अप्घ्नन्नेपि पवमान शत्रून्प्रियां न जारो अभिगीत इंदुः। सीदन्वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता ॥२३॥ आ ते रुचः पवमानस्य सोम योषेव यंति सुदुघाः सुधाराः। हरिरानीतः पुरुवारो अप्स्वचिक्रदत्कलशे देवयूनां ॥२४॥१०॥५॥

॥ ९७ ॥ १-३ वसिष्ठः । ४-६ इंद्रप्रमतिर्वासिष्ठः । ७-९ पृषगणो वासिष्ठः । १०-१२ मन्युर्वासिष्ठः । १३-१५ उपमन्युर्वासिष्ठः । १६-१८ व्याघ्रपाद्वासिष्ठः । १९-२१ शक्तिर्वासिष्ठः । २२-२४ कर्णश्रुद्वासिष्ठः । २५-२७ मृळीको वासिष्ठः । २८-३० वसुक्रो वासिष्ठः । ३१-४४ पराशरः । ४५-५८ कुत्सः ॥ पवमानः सोमः ॥ त्रिष्टुप् ॥

॥९७॥ अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्तरसं। सुतः पवित्रं पर्येति रेभन्मितेव मंद्रं पशुमांति होता ॥१॥ भद्रा वस्त्रा समन्याववसानो महान्कविर्नि वचनानि शंसन्। आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥२॥ ममृज्यो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे। अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ॥३॥ प्र गायताभ्यर्चाम देवान्सोमं हिनोत महते धनाय। स्वादुः पवाते अति वारमव्यमा मीताति कलशे देवयुनैः ॥४॥ इंदुर्देवानामुप सख्यमायन्त्सहस्रधारः पवते मदाय। नृभिः सतो नि षसादा सनुधा मूर्धन्यज्ञस्य दिवि पाजो अश्रेत् महते सोमयागाय ॥५॥१३॥ सोमो रयिं हरिरा पुनानइंदुं सदो गच्छतु ते भरायं। देवासोहि मरुतो राधो अच्छा यूयं पात स्वस्तिभिः सदा नः ॥६॥ प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति। महिव्रतः शुचिबंधुः पावकः पदा वराहो अभ्येति रेभन् ॥७॥ प्र इंसासस्तृपलं मन्युमच्छामादस्तं वृषगणा अयासुः। अग्रियं पर्व-

कलशान् आ विवेश सामं कृण्वन् सामन्यः विपःऽचित् क्रन्दन् एति अभि सख्युः न जामिं ॥२२॥ अपऽघ्नन् एषि पवमान शत्रून् प्रियां न जारः अभिऽगीतः इंदुः सीदन् वनेषु शकुनः न पत्वा सोमः पुनानः कलशेषु सत्ता ॥२३॥ आ ते रुचः पवमानस्य सोम योषाऽइव यंति सुऽदुघाः सुऽधाराः हरिः आऽनीतः पुरुऽवारः अप्ऽसु अचिक्रदत् कलशे देवऽयूनां ॥२४॥१०॥५॥

॥९७॥ अस्य प्रेषा हेमना पूयमानः देवः देवेभिः सं अपृक्त रसं सुतः पवित्रे परि एति रेभन् मिताऽइव सद्म पशुऽमंति होता ॥१॥ भद्रा वस्त्रा समन्या वसानः महान् कविः निऽवचनानि शंसन् आ वच्यस्व चम्वोः पूयमानः विऽचक्षणः जागृविः देवऽवीतौ ॥२॥ सं ऊं प्रियः मृज्यते सानौ अव्ये यशःऽतरः यशसां क्षैतः असे अभि स्वर धन्व पूयमानः यूयं पात स्वस्तिभिः सदा नः ॥३॥ प्र गायत अभि अर्चाम देवान् सोमं हिनोत महते धनाय स्वादुः पवाते अति वारं अव्यं आ सीदाति कलशे देवऽयुः नः ॥४॥ इंदुः देवानां उप सख्यं आऽयन् सहस्रऽधारः पवते मदाय नृऽभिः स्तवानः अनु धाम पूर्वं अगन् इंद्रं महते सौभगाय ॥५॥११॥ स्तोत्रे राये हरिः अर्ष पुनानः इंद्रं मदः गच्छतु ते भराय देवैः याहि सऽरथं राधः अच्छ यूयं पात स्वस्तिभिः सदा नः ॥६॥ प्र काव्यं उशनाऽइव ब्रुवाणः देवः देवानां जनिमा विवक्ति महिऽव्रतः शुचिऽबंधुः पावकः पदा वराहः अभि एति रेभन् ॥७॥ प्र हंसासः नृपतिं मन्युं अच्छ अमात अस्तं वृषऽगणाः अयासुः आंगूषं पव-

मानं सखायो दुर्मदं साकं प्र वदंति वाणं ॥८॥ स रंहत उरुगायस्य जूतिं वृथा क्रीळंतं मिमते न गावः। परीणसं कृणुते तिग्मशृंगो दिवा हरिर्ददृशे नक्तमृज्रः ॥९॥ इंदुर्वाजी पवते गोन्योघा इंद्रे सोमः सह इन्वन्मदाय। हंति रक्षो बाधते पर्यरातीर्वरिवः कृण्वन्वृजनस्य राजा ॥१०॥१२॥ अध धारया मध्वा पृचानस्तिरो रोमं पवते अद्रिदुग्धः। इंदुरिंद्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥११॥ अभि प्रियाणि पवते पुनानो देवो देवान्त्सेन रसेन पृंचन्। इंदुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥१२॥ वृषा शोणो अभिकनिक्रदद्गा नदयन्नेति पृथिवीमुत द्यां। इंद्रस्येव वग्नुरा शृण्व आजौ प्रचेतयन्नर्षति वाचमेमां ॥१३॥ रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमंतमंशुं। पवमानः संतनिमेषि कृण्वन्निंद्राय सोम परिषिच्यमानः ॥१४॥ एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नैः। परि वर्णं भरमाणो रुशंतं गव्युनो अर्ष परि सोम सिक्तः ॥१५॥१३॥ जुष्टी नं इंदो सुपथा सुगान्युरू पवस्व वरिवांसि कृण्वन्। घनेव विष्वग्दुरितानि विघ्नन्नधि ष्णुना धन्व सानो अव्ये ॥१६॥ वृष्टिं नो अर्ष दिव्यां जिगत्नुमिळावंतीं शंगयीं जीरदानुं। स्तुकेव वीता धन्वा विचिन्वन्दुर्मतिमाँ अवयाँ इंदो वायून् ॥१७॥ यंथिं न वि ष्य ग्रथितं पुनान ऋजुं च गातुं वृजिनं च सोम। अत्यो न क्रंदो हरिरा सृजानो मर्यो देव धन्व पस्त्यावान् ॥१८॥ जुष्टो मदाय देवतात इंदो परि ष्णुना धन्व सानो अव्ये। सहस्रधारः सुरभिरदब्धः परि स्रव वाजसाता नृषह्ये ॥१९॥ अरुषमानो येऽरुषा अयुक्षाताऽत्यासो न संसृजानासो आजौ।

मानं सखायः दुःऽमर्षं साकं प्र वदंति वाणं ॥८॥ सः रंहते उरुऽगायस्य जूतिं वृथा क्रीळंतं मिमते न गावः परीणसं कृणुते तिग्मऽशृंगः दिवा हरिः ददृशे नक्तं चृज्रः ॥९॥ इंदुः वाजी पवते गोऽन्योघाः इंद्रे सोमः सहः इन्वन् मदाय हंति रक्षः वार्धते परि अरातीः वरिवः कृण्वन् वृजनस्य राजा ॥१०॥१२॥ अध धारया मध्वा पृचानः तिरः रोमं पवते अद्रिंऽदुग्धः इंदुः इंद्रस्य सख्यं जुषाणः देवः देवस्य मत्सरः मदाय ॥११॥ अभि प्रियाणि पवते पुनानः देवः देवान् स्वेन रसेन पृंचन् इंदुः धर्माणि ऋतुऽथा वसानः दशऽक्षिपः अव्यत सानौ अव्ये ॥१२॥ वृषा शोणः अभिऽक्रनिक्रदत् गाः नदयन् एति पृथिवीं उत द्यां इंद्रस्यऽइव वग्नुः आ शृण्वे आजौ प्रऽचेतयन् अर्षति वाचं आऽइमां ॥१३॥ रसाय्यः पयसा पिन्वमानः ईरयन् एषि मधुऽमंतं अंशुं पवमानः संऽतनिं एषि कृण्वन् इंद्राय सोम परिऽसिच्यमानः ॥१४॥ एव पवस्व मदिरः मदाय उद्ऽयाभस्य नमयन् वधऽस्नैः परि वर्णं भरमाणः रुशंतं गव्युः नः अर्ष परि सोम सिक्तः ॥१५॥१३॥ जुष्टी नः इंदो सुऽपथा सुऽगानि उरौ पवस्व वरिवांसि कृण्वन् घनाऽइव विष्वंक् दुःऽइतानि विऽघ्नन् अधि स्नुना धन्व सानौ अव्ये ॥१६॥ वृष्टिं नः अर्ष दिव्यां जिगत्नुं इळांऽवतीं शंऽगयीं जीरऽदानुं स्तुकांऽइव वीता धन्व विऽचिन्वन् बंधून् इमान् अवरान् इंदो वायून् ॥१७॥ ग्रंथिं न वि स्य ग्रथितं पुनानः ऋजुं च गातुं वृजिनं च सोम अत्यः न क्रदुः हरिः आ सृजानः मर्यः देव धन्व पस्त्यऽवान् ॥१८॥ जुष्टः मदाय देवऽतांते इंदो परि स्नुना धन्व सानौ अव्ये सहस्रंऽधारः सुऽभिः अदब्धः परि स्रव वाजंऽसाती नृऽसह्ये ॥१९॥ अरुषमानः ये अरुषाः अयुक्ताः अत्यासः न समृजानासः आजौ

एते शुक्रासो धन्वंति सोमा देवांसस्ताँ उप याता पिबध्यै ॥२०॥१४॥ एवा नं इंदो अभि देववींतिं परि स्रव नभो अर्णश्चमूषु। सोमो अस्मभ्यं काम्यं बृहंतं रयिं ददातु वीरवंतमुग्रं ॥२१॥ तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य वा धर्मणि क्षोरनीके। आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव इंदुं ॥२२॥ प्र दानुदो दिव्यो दानुपिन्व ऋतमृताय पवते सुमेधाः। धर्मा भुवद्वृजन्यस्य राजा प्र रश्मिभिर्दशभिर्भारि भूम ॥२३॥ पविवेभिः पवमानो नृचक्षा राजा देवानामुत मर्त्यानां। हिता भुवद्रयिपती रयीणामृतं भरत्सुभृतं चार्विदुः ॥२४॥ अर्वाँ इव श्रवसे सातिमच्छेंद्रस्य वायोरभि वीतिमर्ष। स नः सहस्रा बृहतीरिषो दा भवा सोम द्रविणोवित्पुनानः ॥२५॥१५॥ देवाव्यो नः परिषिच्यमानाः क्षयं सुवीरं धन्वंतु सोमाः। आयुन्यवः सुमतिं विश्ववारा होतारो न दिवियजो मंद्रतमाः ॥२६॥ एवा देव देवतांते पवस्व महे सोम प्सरसे देवपानः। महश्चिद्धि प्रसितिं हितासे मर्याँ कृधि मुष्टाने रोदसी पुनानः ॥२७॥ अश्वो न क्रंदो वृषभिर्युजानः सिंहो न भीमो मनसो जवीयान्। अवाचीनैः पथिभिर्ये रजिष्ठा आ पवस्व सौमनसं नं इंदो ॥२८॥ शतं धारा देवजाता असृग्रन्सहस्रमेनाः कवयो मृजंति। इंदो सनित्रं दिव आ पवस्व पुरएतासि महतो धनस्य ॥२९॥ दिवो न सर्गा असृग्रमह्नां राजा न मित्रं प्र मिनाति धीरः। पितुर्न पुत्रः क्रतुभिर्यतान आ पवस्व विशे अस्या अजीतिं ॥३०॥१६॥ प्र ते धारा मधुमतीरसृग्रन्वाराण्यत्पूतो अत्येष्यव्यान्। पवमान पवसे धाम गोनां जज्ञानः सूर्यमपिन्वो अर्कैः ॥३१॥ कनिक्रदद्वृषभो जीरदानुं

एते शुक्रासः धन्वंति सोमाः देवासः तान उप यात पिबध्ये ॥२०॥१४॥ एव नः इंदो अभि देवऽवीतिं परि स्रव नभः अर्णः चमूषु सोमः अस्मभ्यं काम्यं बृहंतं रयिं ददातु वीरऽवंतं उपं॥२१॥ तष्टांत यदि मनसः वेनंतः वाक् ज्येष्ठस्य वा धर्मणि क्षोः अनीके आत् ईं आयन् वरं आ वावशानाः जुष्टं पतिं कलशे गावः इंदुं ॥२२॥ प्र दानुऽदः दिव्यः दानुऽपिन्वः ऋतं ऋतायं पवते सुऽमेधाः धर्मा भुवत् वृजन्यस्य राजा प्र रश्मिऽभिः दशऽभिः भारि भूमं ॥२३॥ पविंऽचेभिः पवमानः नृऽचक्षाः राजा देवानां उत मर्त्यानां हिता भुवत् रयिऽपतिः रयीणां ऋतं भरत् सुऽभृतं चारु इंदुः ॥२४॥ अर्वांनऽइव श्रवसे सातिं अच्छ इंद्रस्य वायोः अभि वीतिं अर्ष सः नः सहस्रा बृहतीः इषः दाः भव सोम द्रविणःऽवित् पुनानः॥२५॥१५॥ देवऽअस्यः नः परिऽसिच्यमानाः क्षयं सुऽवीरं धन्वंतु सोमाः आऽयज्यवः सुऽमतिं विश्वऽवाराः होतारः न दिविऽयजः मंद्रऽतमाः॥२६॥ एव देव देवऽतांते पवस्व महे सोम प्सरसे देवऽपानः महः चित् हि ससिं हिताः सऽमर्ये कृधि सुऽस्थाने॰ रोदसी पुनानः॥२७॥ अश्वः न क्रदः वृषऽभिः युजानः सिंहः न भीमः मनसः जवीयान् अर्वाचीनैः पथिऽभिः ये रजिष्ठाः आ पवस्व सौमनसं नः इंदो ॥२८॥ शतं धाराः देवऽजाताः असृग्रन सहस्रं एनाः कवयः मृजंति इंदो सनिचं दिवः आ पवस्व पुरुऽएता असि महतः धनस्य॥२९॥ दिवः न सर्गाः असृक्षत अह्नां राजा न मित्रं प्र मिनाति धीरः पितुः न पुचः क्रतुऽभिः यतानः आ पवस्व विशे अस्यै अजीतिं॥३०॥१६॥ प्र ते धाराः मधुऽमतीः असृग्रन् वारान् यत् पूतः अत्यिं एषि अव्यान् पवमान पवसे धाम गोनां जज्ञानः सूर्यं अपिन्वः अर्कैः॥३१॥ कनिक्रदत् अनु पंथां

मृतस्य शुक्रो वि भास्यमृतस्य धामं । स इंद्राय पवसे मत्स-
रवान्हिन्वानो वाचं मतिभिः कवीनां ॥३२॥ दिव्यः सुपर्णो-
ऽव चक्षि सोम पिन्वन्धाराः कर्मणा देववीतौ । एंदो विश
कलशं सोमधानं ऋंदन्निहि सूर्यस्योप रश्मिं ॥३३॥ तिस्रो
वाचं ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषां । गावो
यंति गोपतिं पृच्छमानाः सोमं यंति मतयो वावशानाः॥३४॥
सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छ-
मानाः । सोमः सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं
नवंते ॥३५॥१७॥ एवा नः सोम परिषिच्यमान आ पवस्व
पूयमानः स्वस्ति । इंद्रमा विश बृहता रवेण वर्धया वाचं
जनया पुरंधिं ॥३६॥ आ जागृविर्विप्र ऋता मतीनां सोमः
पुनानो असदच्चमूषु । सपंति यं मिथुनासो निकामा अध्व-
र्यवो रथिरासः सुहस्ताः ॥३७॥ स पुनान उप सूरे न धातोभे
अप्रा रोदसी वि ष आवः । प्रिया चिद्यस्य प्रियसास ऊती स
तू धनं कारिणे न प्र यंसत् ॥३८॥ स वर्धिता वर्धनः पूयमानः
सोमो मीढ्वाँ अभि नो ज्योतिषावीत् । येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमुष्णन् ॥३९॥ अक्रान्त्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा । वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इंदुः ॥४०॥१८॥ महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् । अदधादिंद्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिंदुः ॥४१॥ मत्सि वायुमिष्टये राधसे च मत्सि मित्रावरुणा पूयमानः । मत्सि शर्धो मारुतं मत्सि देव-
न्मत्सि द्यावापृथिवी देव सोम॥४२॥ ऋजुः पवस्व वृजिनस्य
हंतापामीवां बाधमानो मृधश्च । अभिश्रीणन्पयः पयसाभि

ऋतस्य शुक्रः विभासि अमृतस्य धामं सः इंद्राय पवसे मत्सरऽवान् हिन्वानः वाचं मतिऽभिः कवीनां॥३२॥ दिव्यः सुऽपर्णः अवचक्षि सोम पिन्वन् धाराः कर्मणा देवऽवीतौ आ इंदो विश कलशं सोमऽधानं क्रंदन् इहि सूर्यस्य उप रश्मिं॥३३॥ तिस्रः वाचः ईरयति प्र वह्निः ऋतस्य धीतिं ब्रह्मणः मनीषां गावः यंति गोऽपतिं पृच्छमानाः सोमं यंति मतयः वावशानाः॥३४॥ सोमं गावः धेनवः वावशानाः सोमं विप्राः मतिऽभिः पृच्छमानाः सोमः सुतः पूयते अज्यमानः सोमे अर्काः चिऽस्तुभः सं नवंते ॥३५॥१७॥ एव नः सोम परिऽसिच्यमानः आ पवस्व पूयमानः स्वस्ति इंद्रं आ विश बृहता रवेण वर्धयं वाचं जनयं पुरंऽधिं॥३६॥ आ जागृविः विप्रः ऋता मतीनां सोमः पुनानः असदत् चमूषु सपंति यं मिथुनासः निऽकामाः अध्वर्यवः रथिरासः सुऽहस्ताः ॥३७॥ सः पुनानः उप सूरे न धातां आ उभे अप्राः रोदसी विसः आवः प्रिया चित् यस्य प्रियसासः ऊती सः तु धनं कारिणे न प्र यंसत्॥३८॥ सः वर्धिता वर्धनः पूयमानः सोमः मीढ्वान् अभि नः ज्योतिषा आवीत् येन नः पूर्वे पितरः पदज्ञाः स्वःऽविदः अभि गाः अद्रिं उष्णन्॥३९॥ अक्रान् समुद्रः प्रथमे विऽधर्मन् जनयन् प्रऽजाः भुवनस्य राजा वृषा पवित्रे अधि सानौ अव्ये बृहत् सोमः ववृधे सुवानः इंदुः॥४०॥१८॥ महत् तत् सोमः महिषः चकार अपां यत् गर्भः अवृणीत देवान् अदधात् इंद्रे पवमानः ओजः अजनयत् सूर्ये ज्योतिः इंदुः॥४१॥ मत्सि वायुं इष्टये राधसे च मत्सि मित्रावरुणा पूयमानः मत्सि शर्धः मारुतं मत्सि देवान् मत्सि द्यावापृथिवी देव सोम॥४२॥ ऋजुः पवस्व वृजिनस्य हंता अप अमीवां बाधमानः मृधः च अभिऽश्रीणन् पयः पयसा अभि

गोनामिंद्रस्य त्वं तवं वयं सखायः ॥४३॥ मध्वः सूदं पवस्व वस्व उस्रं वीरं च नु आ पवस्वा भगं च। स्वदस्वेंद्राय पवमान इंदो रयिं च न आ पवस्वा समुद्रात् ॥४४॥ सोमः सुतो धारयात्यो न हित्वा सिंधुर्न निम्नमभि वाज्यक्षाः। आ योनिं वन्यमसदत्पुनानः समिंदुर्गोभिरसरत्समद्भिः ॥४५॥१९॥ एष स्य तें पवत इंद्र सोमश्चमूषु धीर उशते तवस्वान्। स्वंचक्षा रथिरः सत्यशुष्मः कामो न यो देवयतामसर्जि ॥४६॥ एष प्रत्नेन वयसा पुनानस्तिरो वपींसि दुहितुर्दधानः। वसानः शर्म त्रिवरूथमप्सु होतेव याति समनेषु रेभन् ॥४७॥ नू नस्त्वं रथिरो देव सोम परि स्रव चम्वोः पूयमानः। अप्सु स्वादिष्ठो मधुमाँ ऋतावा देवो न यः सविता सत्यमन्मा ॥४८॥ अभि वायुं वीत्यर्षा गृणानोऽभि मित्रावरुणा पूयमानः। अभी नरं धीजवनं रथेष्ठामभीद्रं वृषणं वज्रबाहुं ॥४९॥ अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः। अभि चंद्रा भर्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम ॥५०॥२०॥ अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः। अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः ॥५१॥ अया पवा पवस्वैना वसूनि मांश्चत्व इंदो सरसि प्र धन्व। ब्रध्नश्चिदत्र वातो न जूतः पुरुमेधश्चित्तकवे नरं दात ॥५२॥ उत नं एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे। पृषिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय ॥५३॥ महीमे अस्य वृषनाम शूषे मांश्चत्वे वा पृशने वा वधत्रे। अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः ॥५४॥ सं चो पविचा विततान्येष्यन्वेकं धावसि पूयमानः। असि भगो असि दावस्य दा-

गोनां इंद्रस्य त्वं तवं वयं सखायः॥४३॥ मध्वः सूदं पवस्व वस्वः उत्सं वीरं च नः आ पवस्व भगं च स्वदस्व इंद्राय पवमानः इंदो रयिं च नः आ पवस्व समुद्रात्॥४४॥ सोमः सुतः धारया अत्यः न हित्वा सिंधुः न निम्नं अभि वाजी अक्षाः आ योनिं वन्यं असदत् पुनानः सं इंदुः गोभिः असरत् सं अद्भिः॥४५॥१९॥ एषः स्यः ते पवते इंद्र सोमः चमूषु धीरः उशते तवस्वान् स्वः चक्षाः रथिरः सत्यः शुष्मः कामः न यः देवः अयतां असर्जि॥४६॥ एषः प्रत्नेन वयसा पुनानः तिरः वर्पांसि दुहितुः दधानः वसानः शर्म चिः वरूथं अप्सु होता इव याति समनेषु रेभन्॥४७॥ नु नः त्वं रथिरः देव सोम परि स्रव चम्वोः पूयमानः अप्सु स्वादिष्ठः मधुमान् ऋतः वा देवः न यः सविता सत्यः मन्मा॥४८॥ अभि वायुं वीती अर्ष गृणानः अभि मित्रावरुणा पूयमानः अभि नरं धीः जवनं रथेः स्यां अभि इंद्रं वृषणं वज्रः बाहुं॥४९॥ अभि वस्वां सुः वसुनानि अर्ष अभि धेनूः सुः दुघाः पूयमानः अभि चंद्रा भर्तवे नः हिरण्या अभि अश्वान् रथिनः देव सोम॥५०॥२०॥ अभि नः अर्ष दिव्या वसूनि अभि विश्वा पार्थिवा पूयमानः अभि येन द्रविणं अश्नवामः अभि आर्षेयं जमदग्निः वतनुः॥५१॥ अया पवा पवस्व एना वसूनि मांश्चत्वे इंदो सरसि प्र धन्व व्रजः चित् अचं वातः न जूतः पुरुः मेधः चित् तकवे नरं दात्॥५२॥ उत नः एना पवया पवस्व अधि श्रुते श्रवाय्यस्य तीर्थे पवित्रं सहस्रा नि गुतः वसूनि वृष्टिं न पक्षं धूनवत् रणाय॥५३॥ महिं द्रुमे अस्य वृषनाम शूषे मांश्चत्वे वा पृशने वा वधत्रे अस्वापयत् निः गुतः स्नेहयत् च अपः अमिचान् अपः अचितः अच द्रुतः॥५४॥ सं ची पवित्रा विः ततानि एषि अनु एकं धावसि पूयमानः असि भगः असि दात्रस्य दा-

तासि मघवा मघवन्न इंदो॥५५॥२१॥ एष विश्वविंत्पवते मनीषी सोमो विश्वस्य भुवनस्य राजा। दृळ्हाँ इरयन्विदथेष्विंदुर्वि वारं मव्यंसमयातिं याति॥५६॥ इंदुं रिहंति महिषा अदंब्धाः पदे रेभंति कवयो न गृध्राः। हिन्वंति धीरा दशभिः क्षिपाभिः समंजते रूपमपां रसेन॥५७॥ त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत्। तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः॥५८॥२२॥

॥ ९८ ॥ १-१२ अंबरीष ऋजिश्वा च ॥ पवमानः सोमः ॥ १-१०, १२ अनुष्टुप्। ११ बृहती ॥

॥९८॥ अभि नो वाजसातमं रयिमर्ष पुरुस्पृहं। इंदो सहस्रभर्णसं तुविद्युम्नं विभ्वासहं॥१॥ परि ष्य सुवानो अव्ययं रयेि न वर्मोव्यत। इंदुरभि द्रुणा हितो हियानो धारांभिरक्षाः॥२॥ परि ष्य सुवानो अक्षा इंदुरव्ये मदच्युतः। धारा य ऊर्ध्वो अध्वरे भ्राजा नैति गव्ययुः॥३॥ स हि त्वं देव शश्वते वसु मर्ताय दाशुषे। इंदो सहस्रिणं रयिं शतात्मानं विवाससि॥४॥ वयं ते अस्य वृत्रहन्वसो वस्वः पुरुस्पृहः। नि नेदिष्टतमा इषः स्याम सुम्नस्याध्रिगो॥५॥ इयं पंच स्वयशसं स्वसारो अद्रिसंहतं। प्रियमिंद्रस्य काम्यं प्रस्नापयंत्यूर्मिणं॥६॥२३॥ परि त्यं हर्यतं हरिं बभ्रुं पुनंति वारेण। यो देवान्विश्वाँ इत्परि मदेन सह गच्छति॥७॥ अस्य वो ह्यवसा पांतो दक्षसाधनं। यः सूरिषु श्रवो बृहद्बधे स्व१र्णो हर्यतः॥८॥ स वां यज्ञेषु मानवी इंदुर्जनिष्ट रोदसी। देवो देवी गिरिष्ठा अस्मेधन्तं तुविष्वणिं॥९॥ इंद्राय सोम पातवे वृत्रघ्ने परि षिच्यसे। नरं च दक्षिणावते देवाय सदनासदे॥१०॥ ते प्रत्नासो व्युष्टिषु सोमाः पवित्रे अक्षरन्। अपप्रोथंतः सनुतर्युधंतः प्रातस्ताँ अप्रचेतसः॥११॥

ता असि मघऽवा मघवत्ऽभ्यः इंदो ॥५५॥२१॥ एषः विश्वऽवित् पवते मनीषी सोमः विश्वस्य भुवनस्य राजा दृप्सान् ईरयन् विदथेषु इंदुः वि वारं अव्यं समया अति याति ॥५६॥ इंदुं रिहंति महिषाः अदब्धाः पदे रेभंति कवयः न गृध्राः हिन्वंति धीराः दशऽभिः क्षिपांभिः सं अंजते रूपं अपां रसेन ॥५७॥ त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् तत् नः मित्रः वरुणः ममहंतां अदितिः सिंधुः पृथिवी उत द्यौः ॥५८॥२२॥

॥९८॥ अभि नः वाजऽसातमं रयिं अर्ष पुरुऽस्पृहं इंदो सहस्रंऽभर्णसं तुविऽद्युम्नं विश्वऽसहं ॥१॥ परि स्यः सुवानः अव्ययं रवेण न वर्मं अव्यत इंदुः अभि द्रोणा हितः हियानः धाराभिः अक्षाः ॥२॥ परि स्यः सुवानः अक्षाः इंदुः अव्ये मदऽच्युतः धारा यः ऊर्ध्वः अध्वरे भाजा न एति गव्यऽयुः ॥३॥ सः हि त्वं देव शश्वते वसु मर्ताय दाशुषे इंदो सहस्रिणं रयिं शतऽआत्मानं विवाससि ॥४॥ वयं ते अस्य वृत्रऽहन् वसो वस्वः पुरुऽस्पृहः नि नेदिष्ठऽतमाः इषः स्याम सुम्नस्य अध्रिऽगो ॥५॥ द्विः यं पंच स्वऽयशसं स्वसारः अद्रिऽसंहतं प्रियं इंद्रस्य काम्यं प्रऽस्नापयंति ऊर्मिणं ॥६॥२३॥ परि त्यं हर्यतं हरिं बभ्रुं पुनंति वारेण यः देवान् विश्वान् इत् परि मदेन सह गच्छति ॥७॥ अस्य वः हि अवसा पांतः दक्षऽसाधनं यः सूरिषु श्रवः बृहत् दधे स्वः न हर्यतः ॥८॥ सः वां यज्ञेषु मानवी इंदुः जनिष्ट रोदसी देवः देवी गिरिऽष्ठाः असेधन तं तुविऽस्वनिं ॥९॥ इंद्राय सोम पातवे वृत्रऽघ्ने परि सिच्यसे नरे च दक्षिणाऽवते देवायं सदनऽसदे ॥१०॥ ते प्रत्नासः विऽउष्टिषु सोमाः पवित्रे अक्षरन् अपऽप्रोथंतः सनुतः हुरःऽचितः प्रातः तान् अग्रंऽचेतसः ॥११॥

तं संखायः पुरोरुचं यूयं वयं च सूरयः। अश्याम वाजगंध्यं सनेम वाजपस्त्यं ॥ १२ ॥ २४ ॥

॥ ९९ ॥ १-८ रेभसूनू काश्यपौ ॥ पवमानः सोमः ॥ १ बृहती । २-८ अनुष्टुप् ॥

॥९९॥ आ हर्यताय धृष्णवे धनुस्तन्वंति पौंस्यं। शुक्रां वयंत्यसुराय निर्णिजं विपामग्रे महीयुवः ॥१॥ अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहते। यदी विवस्वतो धियो हरिं हिन्वंति यातवे ॥२॥ तमंस्य मर्जयामसि मदो य इंद्रपातमः। यं गावं आसभिर्दधुः पुरा नूनं च सूरयः ॥३॥ तं गाथया पुराण्या पुनानमभ्यनूषत। उतो कृपंत धीतयो देवानां नाम बिभ्रतीः ॥४॥ तमुक्षमाणमव्यये वारे पुनंति धर्णसिं। दूतं न पूर्वचित्तय आ शासते मनीषिणः ॥५॥ २५ ॥ स पुनानो मदिंतमः सोमश्चमूषु सीदति। पशौ न रेत आदधत्पतिर्वचस्यते धियः ॥६॥ स मृज्यते सुकर्मभिर्देवो देवेभ्यः सुतः। विदे यदासु संदृग्हीरपो वि गाहते ॥७॥ सुत इंदो पवित्र आ नृभिर्यतो वि नीयसे। इंद्राय मत्सरिंतमश्चमूष्वा नि षीदसि ॥८॥ २६ ॥

॥ १०० ॥ १-९ रेभसूनू काश्यपौ ॥ पवमानः सोमः ॥ अनुष्टुप् ॥

॥१००॥ अभी नवंते अद्रुहः प्रियमिंद्रस्य काम्यं। वत्सं न पूर्व आयुनि जातं रिहंति मातरः ॥१॥ पुनान इंदवा भर सोमं दिव्यहंसं रयिं। त्वं वसूनि पुष्यसि विश्वानि दाशुषो गृहे ॥२॥ त्वं धियं मनोयुजं सृजा वृष्टिं न तन्यतुः। त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि ॥३॥ परिते जिग्युषो यथा धारा सुतस्य धावति। रंहमाणा व्यव्ययं वारं वाजीव सानसिः ॥४॥ क्रत्वे दक्षाय नः कवे पवस्व सोम धारया। इंद्राय पातवे सुतो मित्राय वरुणाय च ॥५॥ २७ ॥ पवस्व वाजसातमः पवित्रे धारया सुतः। इंद्राय सोम विष्णवे

तं सखायः पुरःऽरुचं यूयं वयं च सूरयः अश्यामं वाजंऽगंध्यं सनेमं वाजंऽपस्त्यं ॥ १२ ॥ २४ ॥

॥९९॥ आ हर्यताय धृष्णवे धनुः तन्वंति पौंस्यं शुक्रां वयंति असुराय निःऽनिजं विपां अग्रे महीयुवः ॥१॥ अध क्षपा परिऽकृतः वाजान् अभि प्रगाहते यदि विवस्वतः धियः हरिं हिन्वंति यातवे ॥२॥ तं अस्य मर्जयामसि मदः यः इंद्रऽपातमः यं गावः आसऽभिः दधुः पुरा नूनं च सूरयः ॥३॥ तं गाथया पुराण्या पुनानं अभि अनूषत उतो कृपंत धीतयः देवानां नाम बिभ्रतीः ॥४॥ तं उक्थमार्ण अर्ण्यं वारे पुनंति धर्णसिं दूतं न पूर्वऽचित्तये आ शासते मनीषिणः ॥५॥ २५ ॥ सः पुनानः मदिनऽतमः सोमः चमूषु सीदति पशौ न रेतः आऽदधत् पतिः वचस्यते धियः ॥६॥ सः मृज्यते सुकर्मऽभिः देवः देवेभ्यः सुतः विदे यत् आसु संऽदृदिः महीः अपः विगाहते ॥७॥ सुतः इंदो पविचे आ नृऽभिः यतः विनीयसे इंद्राय मत्सरिनऽतमः चमूषु आ नि सीदसि ॥ ८ ॥ २६ ॥

॥१००॥ अभि नवंते अद्रुहः प्रियं इंद्रस्य काम्यं वत्सं न पूर्वे आयुनि जातं रिहंति मातरः ॥१॥ पुनानः इंदो आ भर सोमं इंऽवहंसं रयिं त्वं वसूनि पुष्यसि विश्वानि दाशुषः गृहे ॥२॥ त्वं धियं मनोऽयुजं सृज वृष्टिं न तन्यतुः त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि ॥३॥ परि ते जिग्युषः यथा धारा सुतस्य धावति रंहमाणा विअव्ययं वारं वाजीऽइव सानसिः ॥४॥ ऋत्वे दक्षाय नः कवे पवस्व सोम धारया इंद्राय पातवे सुतः मित्राय वरुणाय च ॥५॥ २७ ॥ पवस्व वाजऽसातमः पविचे धारया सुतः इंद्राय सोम विष्णवे

देवेभ्यो मधुमत्तमः ॥६॥ त्वां रिहंति मातरो हरिं पवित्रे अद्रुहः। वत्सं जातं न धेनवः पवमान विधर्मणि ॥७॥ पवमान महि श्रवश्चित्रेभिर्यासि रश्मिभिः। शर्धन्तमांसि जिघ्नसे विश्वानि दाशुषो गृहे ॥८॥ त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे। प्रति द्रापिममुंचथाः पवमान महित्वना ॥ ९ ॥ २८ ॥ ४ ॥

॥ १०१ ॥ १-३ अंधीगुः श्यावाश्विः। ४-६ ययातिर्नाहुषः। ७-९ नहुषो मानवः। १०-१२ मनुः सावरणिः। १३-१६ प्रजापतिः ॥ पवमानः सोमः ॥ १. ४-१६ अनुष्टुप्। २.३ गायत्री ॥

॥ १०१ ॥ पुरोजितीवोऽवसः सुतायं मादयित्नवे। अप श्वानं श्नथिष्टन सखायो दीर्घजिह्वयं ॥१॥ यो धारया पावकया परिप्रस्यंदते सुतः। इंदुरश्वो न कृत्व्यः ॥२॥ तं दुरोषमभी नरः सोमं विश्वाच्या धिया। यज्ञं हिन्वंत्यद्रिभिः ॥३॥ सुतासो मधुमत्तमाः सोमा इंद्राय मंदिनः। पवित्रवंतो अक्षरन्देवान्गच्छंतु वो मदाः ॥४॥ इंदुरिंद्राय पवत इति देवासो अब्रुवन्। वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ॥५॥ १॥ सहस्रधारः पवते समुद्रो वाचमीङ्खयः। सोमः पतीं रयीणां सखेंद्रस्य दिवेदिवे ॥६॥ अयं पूषा रयिर्भगः सोमः पुनानो अर्षति। पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥७॥ समु प्रिया अनूषत गावो मदाय घृष्वयः। सोमासः कृण्वते पथः पवमानास इंदवः ॥८॥ य ओजिष्ठस्तमा भर पवमान श्रवाय्यं। यः पंच चर्षणीरभि रयिं येन वनामहै ॥९॥ सोमाः पवंत इंदवोऽस्मभ्यं गातुवित्तमाः। मित्राः सुवाना अरेपसः स्वार्क्षः स्वर्विदः ॥१०॥ २॥ सुष्वाणासो व्यद्रिभिश्चितानो गोरधि त्वचि। इषमस्मभ्यमभितः समस्वरन्वसुविदः ॥११॥ एते पूता विपश्चितः सोमासो दध्याशिरः। सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥१२॥ प्र सुन्वानस्यांधसो मर्तो न वृत तद्वचः। अप

देवेभ्यः मधुमत्ऽतमः॥६॥ त्वां रिहंति मातरः हरिं पविचे अद्रुहः वत्सं जातं न धेनवः पवमान विऽधर्मणि॥७॥ पवमान महि श्रवः चित्रेभिः यासि रश्मिऽभिः शर्धन् तमांसि जिघ्नसे विश्वानि दाशुषः गृहे॥८॥ त्वं द्यां च महिऽव्रत पृथिवीं च अति जभिषे प्रति द्रापिं अमुंचथाः पवमान महिऽत्वना ॥ ९ ॥ २८ ॥ ४ ॥

॥१०१॥ पुरःऽजिती वः अंधसः सुताय मादयित्नवे अपः वायवे अर्षत सखायः दीर्घऽजिह्वी॥१॥ यः धारया पावकया परिऽप्रस्यंदते सुतः इंदुः अश्वः न कृत्व्यः॥२॥ तं दुरोषं अभि नरः सोमं विश्वाच्या धिया यज्ञं हिन्वंति अद्रिऽभिः॥३॥ सुतासः मधुमत्ऽतमाः सोमाः इंद्राय मंदिनः पविचऽवंतः अक्षरन् देवान् गच्छंतु वः मदाः॥४॥ इंदुः इंद्राय पवते इति देवासः अब्रुवन् वाचः पतिः मखस्यते विश्वस्य ईशानः ओजसा ॥५॥१॥ सहस्रऽधारः पवते समुद्रः वाचंऽईखयः सोमः पतिः रयीणां सखा इंद्रस्य दिवेऽदिवे॥६॥ अयं पूषा रयिः भगः सोमः पुनानः अर्षति पतिः विश्वस्य भूमनः वि राजति रोदसी उभे ॥७॥ सं ऊं प्रियाः अनूषत गावः मदाय घृष्वयः सोमासः कृण्वते पथः पवमानासः इंदवः ॥८॥ यः ओजिष्ठः तं आ भर पवमान श्रवाय्यं यः पंच चर्षणीः अभि रयिं येन वनामहे ॥९॥ सोमाः पवंते इंदवः अस्मभ्यं गातुवित्ऽतमाः मित्राः सुवानाः अरेपसः सुऽआप्यः स्वःऽविदः॥१०॥२॥ सुऽस्वानासः वि अद्रिऽभिः चितानाः गोः अधि त्वचि इषं अस्मभ्यं अभितः सं अस्वरन् वसुऽविदः॥११॥ एते पूताः विपःऽचितः सोमासः दधिऽआशिरः सूर्यासः न दृशतासः जिगत्नवः ध्रुवाः घृते॥१२॥ प्र सुन्वानस्य अंधसः मतिः न वृत तत् वचः अपः

स्थानंसराधसं हुता मुखं न भृगवः ॥१३॥ आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः। सरज्जारो न योषणां वरो न योनिमासदं ॥१४॥ स वीरो दक्षसाधनो वि यस्तस्तंभ रोदसी। हरिः पवित्रे अव्यत वेधा न योनिमासदं ॥१५॥ अग्रो वारेभिः पवते सोमो गव्ये अधि त्वचि। कनिक्रदद्वृषा हरिरिंद्रस्याभ्येति निष्कृतं ॥१६॥ ३॥

॥ १०२ ॥ १-८ वितः ॥ पवमानः सोमः ॥ उष्णिक् ॥

॥ १०२ ॥ क्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिं। विश्वा परि प्रिया भुवदध द्विता ॥१॥ उपं वितस्य पाथो ऽरभंक्त यज्ञहां पदं। यज्ञस्य सप्त धामभिरध प्रियं ॥२॥ त्रीणि वितस्य धारया पृष्ठेष्वेरया रयिं। मिमीते अस्य योजना वि सुक्रतुः ॥३॥ जज्ञानं सप्त मातरो वेधामशासत श्रिये। अयं ध्रुवो रयीणां चिकेत यत् ॥४॥ अस्य व्रते सजोषसो विश्वे देवासो अदुहः। स्पार्हा भवंति रंतयो जुषंत यत् ॥५॥४॥ यमी गर्भमृतावृधो दृशे चारुमजीजनन्। कविं मंहिष्ठमध्वरे पुरुस्पृहं ॥६॥ समीचीने अभि त्मना यह्वी ऋतस्य मातरा। तन्वाना यज्ञमानुषग्यदंजते ॥७॥ ऋत्वा शुक्रेभिरक्षभिर्ऋणोरपं व्रजं दिवः। हिन्वन्नृतस्य दीधितिं प्राध्वरे ॥८॥ ५॥

॥ १०३ ॥ १-६ द्वित आप्त्यः ॥ पवमानः सोमः ॥ उष्णिक् ॥

॥१०३॥ प्र पुनानाय वेधसे सोमाय वच उद्यतं। भृतिं न भरा मतिभिर्जुजोषते ॥१॥ परि वारण्यव्यया गोभिरंजानो अर्षति। अरुषो वृषभस्यां पुनानः कृणुते हरिः ॥२॥ परि कोशं मधुश्चुतमव्यये वारे अर्षति। अभि वाणीरृषीणां सप्त

श्वानैं अराधसं हुत मुखं न भृगवः॥१३॥ आ जामिः अत्के अव्यत भुजे न पुचः ओण्योः सरत् जारः न योषणां वरः न योनिं आऽसदं ॥१४॥ सः वीरः दक्षऽसाधनः वि यः तस्तंभ रोदसी हरिः पविचे अव्यत वेधाः न योनिं आऽसदं॥१५॥ अव्यः वारेभिः पवते सोमः गव्ये अधित्वचि कनिक्रदत् वृषा हरिः इंद्रस्य अभि एति निःऽकृतं ॥ १६ ॥ ३ ॥

॥ १०२ ॥ क्राणा शिशुः महीनां हिन्वन् ऋतस्य दीधितिं विश्वा परि प्रिया भुवत् अध द्विता ॥१॥ उप चितस्य पाथोः अमंक्त यत् गुहा पदं यज्ञस्य सप्त धामंऽभिः अध प्रियं ॥२॥ चीर्णिं चितस्य धारया पृष्ठेषु आ ईरय रयिं मिमीते अस्य योजना वि सुऽक्रतुः ॥ ३ ॥ जज्ञानं सप्त मातरः वेधां अशासत श्रिये अयं ध्रुवः रयीणां चिकेत यत् ॥४॥ अस्य व्रते सुऽजोषसः विश्वे देवासः अदुहः स्याहाः भवंति रंतयः जुषंत यत् ॥५॥४॥ यं ईं गर्भं ऋतऽवृधः दृशे चारुं अजीजनन् कविं मंहिष्ठं अध्वरे पुरुऽस्पृहं ॥ ६ ॥ संऽईचीने अभि त्मना यह्वी ऋतस्य मातरा तन्वानाः यज्ञं आनुषक् यत् अंजते ॥७॥ क्रत्वा मुक्तेभिः अक्षऽभिः ऋणोः अपं व्रजं दिवः हिन्वन् ऋतस्य दीधितिं प्र अध्वरे ॥ ८ ॥ ५ ॥

॥१०३॥ प्र पुनानाय वेधसे सोमाय वचः उतऽयतं भृतिं न भर मतिऽभिः जुजोषते ॥१॥ परि वारेण्य अव्यया गोभिः अंजानः अर्षति वी सधऽस्थां पुनानः कृणुते हरिः॥२॥ परि कोशं मधुऽश्चुतं अव्ययं वारे अर्षति अभि वाणीः ऋषीणां सप्त

नूषत ॥३॥ परि णेता मतीनां विश्वदेवो अदाभ्यः। सोमः पुनानश्चम्वोर्विशद्धरिः ॥४॥ परि दिवीरनु स्वधा इन्द्रेण याहि सरथं। पुनानो वाघद्वाघद्भिरभ्यः ॥५॥ परि सप्तिर्न वाजयुर्देवो देवेभ्यः सुतः। व्यानशिः पवमानो वि धावति ॥६॥६॥६॥

॥ १०४ ॥ १-६ पर्वतनारदौ द्वे शिखण्डिन्यौ वा काश्यपावप्सरसौ ॥ पवमानः सोमः ॥ उष्णिक् ॥

॥१०४॥ सखाय आ नि षीदत पुनानाय प्र गायत। शिशुं न यज्ञैः परि भूषत श्रिये ॥१॥ समी वत्सं न मातृभिः सृजता गयसाधनं। देवाव्यं मदमभि द्विशवसं ॥२॥ पुनाता दक्षसाधनं यथा शर्धाय वीतये। यथा मित्राय वरुणाय शंतमः ॥३॥ अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत। गोभिष्टे वर्णमभि वासयामसि ॥४॥ स नो मदानां पत इंदो देवप्सरा असि। सखेव सख्ये गातुवित्तमो भव ॥५॥ सनेमि कृध्यस्मदा रक्षसः कं चिदृचिषे। अपादेवं द्वयुमंहो युयोधि नः ॥६॥७॥

॥ १०५ ॥ १-६ पर्वतनारदौ ॥ पवमानः सोमः ॥ उष्णिक् ॥

॥१०५॥ तं वः सखायो मदाय पुनानमभि गायत। शिशुं न यज्ञैः स्वदयंत गूर्तिभिः ॥१॥ सं वत्स इव मातृभिरिदुह्यानो अज्यते। देववीर्मदो मतिभिः परिष्कृतः ॥२॥ अयं दक्षाय साधनोऽयं शर्धाय वीतये। अयं देवेभ्यो मधुमत्तमः सुतः ॥३॥ गोमन्न इंदो अश्ववत्सुतः सुदक्ष धन्व। शुचिं ते वर्णमधि गोषु दीधरं ॥४॥ स नो हरीणां पत इंदो देवप्सरस्तमः। सखेव सख्ये नर्यो रुचे भव ॥५॥ सनेमि त्वमस्मदाँ अदेवं कं चिदृचिषे। साह्वाँ इंदो परि वाधो अप द्वयुं ॥६॥८॥

नूषत् ॥३॥ परि नेता मतीनां विश्वऽदेवः अदाभ्यः सोमः पुनानः चम्वोः विशत् हरिः ॥४॥ परि देवीः अनु स्वधाः इन्द्रेण याहि सऽरथं पुनानः वाघत् वाघतऽभिः अमर्त्यः ॥५॥ परि सप्तिः न वाजऽयुः देवः देवेभ्यः सुतः विऽआनशिः पवमानः वि धावति ॥६॥६॥६॥

॥१०४॥ सखायः आ नि षीदत पुनानाय प्र गायत शिशुं न यज्ञैः परि भूषत श्रिये ॥१॥ सं ईं वत्सं न मातृऽभिः सृजत गयऽसाधनं देवऽअव्यं मदं अभि द्विऽशवसं ॥२॥ पुनानं दक्षऽसाधनं यथा शर्धाय वीतये यथा मित्राय वरुणाय शंऽतमः ॥३॥ अस्मभ्यं त्वा वसुऽविदं अभि वाणीः अनूषत गोभिः ते वर्णं अभि वासयामसि ॥४॥ सः नः मदानां पते इंदो देवऽइंद्रः असि सखाऽइव सख्ये गातुवित्ऽतमः भव ॥५॥ सनेमि कृधि अस्मत् आ रक्षसं कं चित् अचिण्णं अप अदेवं द्वयुं अंहः युयोधि नः ॥६॥७॥

॥१०५॥ तं वः सखायः मदाय पुनानं अभि गायत शिशुं न यज्ञैः स्वदयंत गूर्तिऽभिः ॥१॥ सं वत्सःऽइव मातृऽभिः इंदुः हिन्वानः अज्यते देवऽअवीः मदः मतिऽभिः परिऽकृतः ॥२॥ अयं दक्षाय साधनः अयं शर्धाय वीतये अयं देवेभ्यः मधुमत्ऽतमः सुतः ॥३॥ गोऽमत् नः इंदो अश्वऽवत् सुतः सुऽदक्ष धन्व पुचिं ते वर्णं अधि गोषुं दीधरं ॥४॥ सः नः हरीणां पते इंदो देवेंद्रःऽतमः सखाऽइव सख्ये नर्यः रुचे भव ॥५॥ सनेमि त्वं अस्मत् आ अदेवं कं चित् अचिण्णं सह्वान् इंदो परि वाधः अप द्वयुं ॥६॥८॥

॥ १०६ ॥ १-३ अग्निश्चाक्षुषः । ४-६ चक्षुर्मानवः । ७-९ मनुरापसवः । १०-१४ ऋषिः ॥ पवमानः सोमः ॥ उष्णिक् ॥

॥१०६॥ इंदुमिंद्रं सुता इमे वृषणं यंतु हरयः। धुक्षी जातास इंदवः स्वर्विदः॥१॥ अयं भराय सानसिरिंद्राय पवते सुतः। सोमो जैत्रस्य चेतति यथा विदे॥२॥ अस्येदिंद्रो मदेष्वा ग्राभं गृभ्णीत सानसिं। वज्रं च वृषणं भरत्समंसुजित्॥३॥ प्र धन्वा सोम जागृविरिंद्रायेंदो परि स्रव। द्युमंतं शुष्ममा भर स्वर्विदं॥४॥ इंद्राय वृषणं मदं पवस्व विश्वदर्शतः। सहस्रयामा पथिकृद्विचक्षणः॥५॥ अस्मभ्यं गातुवित्तमो देवेभ्यो मधुमत्तमः। सहस्रं याहि पथिभिः कनिक्रदत्॥६॥ पवस्व देववीतय इंदो धाराभिरोजसा। आ कलशं मधुमान्त्सोम नः सदः॥७॥ तवं द्रप्सा उदप्रुत इंद्रं मदाय वावृधुः। त्वां देवासो अमृताय कं पपुः॥८॥ आ नः सुतास इंदवः पुनाना धावता रयिं। वृष्टिद्यावो रीत्यापः स्वर्विदः॥९॥ सोमः पुनान ऊर्मिणाव्यो वारं वि धावति। अग्रे वाचः पवमानः कनिक्रदत्॥१०॥१०॥ धीभिर्हिन्वंति वाजिनं वने क्रीळंतमत्यविं। अभि त्रिपृष्ठं मतयः समस्वरन्॥११॥ असर्जि कलशाँ अभि मीळ्हे सप्तिर्न वाजयुः। पुनानो वाचं जनयन्नसिष्यदत्॥१२॥ पवंते हर्यतो हरिरति ह्वरांसि रंह्या। अभ्यर्षन्त्स्तोतृभ्यो वीरवद्यशः॥१३॥ अया पवस्व देवयुर्मधोर्धारा असृक्षत। रेभन्नविं पर्येषि विश्वतः॥१४॥११॥

॥ १०७ ॥ १-२६ सप्तर्षयः ॥ पवमानः सोमः ॥ १. ४. ६. ८-१०. १२. १४. १७. १९. २१. २३. २५. बृहती । २. ५. ७. ११. १३. १५. १८. २०. २२. २४. २६ सतोबृहती । ३. १६ द्विपदा ॥

॥ १०७ ॥ परीतो षिंचता सुतं सोमो य उत्तमं हविः । दधन्वाँ यो नर्यो अप्स्वंतरा सुषाव सोममद्रिभिः ॥ १ ॥ नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिंतरः । सुते

॥१०६॥ इंद्रं अच्छ सुताः इमे वृषणं यंतु हरयः शुष्टी जातासः इंदवः स्वःऽविदः ॥१॥ अयं भराय सानसिः इंद्राय पवते सुतः सोमः जैत्रस्य चेतति यथा विदे ॥२॥ अस्य इत् इंद्रः मदेषु आ यामं गृभ्णीत सानसिं वज्रं च वृषणं भरत् सं अप्सुऽजित् ॥३॥ प्र धन्व सोम जागृविः इंद्राय इंदो परि स्रव द्युऽमंतं शुष्मं आ भर स्वःऽविदं ॥४॥ इंद्राय वृषणं मदं पवस्व विश्वऽदर्शतः सहस्रंऽयामा पथिऽकृत् विऽचक्षणः ॥५॥९॥ अस्मभ्यं गातुवित्ऽतमः देवेभ्यः मधुमत्ऽतमः सहस्रं याहि पथिऽभिः कनिक्रदत् ॥६॥ पवस्व देवऽवीतये इंदो धाराभिः ओजसा आ कलशं मधुऽमान् सोम नः सदः ॥७॥ तव द्रप्साः उदऽप्रुतः इंद्रं मदाय ववृधुः त्वां देवासः अमृताय कं पपुः ॥८॥ आ नः सुतासः इंदवः पुनानाः धावत रयिं वृष्टिऽद्यावः रीतिऽअपः स्वःऽविदः ॥९॥ सोमः पुनानः ऊर्मिणा अव्यः वारं वि धावति अग्रे वाचः पवमानः कनिक्रदत् ॥१०॥१०॥ धीभिः हिन्वंति वाजिनं वने क्रीळंतं अतिऽअविं अभि चिऽपृष्ठं मतयः सं अस्वरन् ॥११॥ असर्जि कलशान् अभि मीळ्हे सप्तिः न वाजऽयुः पुनानः वाचं जनयन् असिस्यदत् ॥१२॥ पवते हर्यतः हरिः अति ह्वरांसि रंह्या अभिऽअर्षन् स्तोतृऽभ्यः वीरऽवत् यशः ॥१३॥ अया पवस्व देवऽयुः मधोः धाराः असृक्षत रेभन् पवित्रं परि एषि विश्वतः ॥१४॥११॥

॥१०७॥ परि इतः सिंचत सुतं सोमः यः उतऽतमं हविः दधन्वान् यः नर्यः अप्सु अंतः आ सुसाव सोमं अद्रिऽभिः ॥१॥ नूनं पुनानः अविऽभिः परि स्रव अदब्धः सुरभिऽतरः सुते

चिन्वास्यु मंदामो अंधसा धीणंतो गोभिरुत्तरं ॥२॥ परि सुवानश्चक्षसे देवमादनः क्रतुरिंदुर्विचक्षणः ॥३॥ पुनानः सोम धारयापो वसानो अर्षसि । आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्ययः ॥४॥ दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् । आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धूतो विचक्षणः ॥५॥१२॥ पुनानः सोम जागृविर्व्यो वारे परि प्रियः । त्वं विप्रो अभवोऽङ्गिरस्तमो मध्वा यज्ञं मिमिक्ष नः ॥६॥ सोमो मीढ्वान्वते गातुवित्तम ऋषिर्विप्रो विचक्षणः । त्वं कविरभवो देववीतम आ सूर्यं रोहयो दिवि ॥७॥ सोम उ षुवाणः सोतृभिरधि ष्णुभिरवीनां । अश्वयेव हरितां याति धारया मंद्रया याति धारया ॥८॥ अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः । समुद्रं न संवरणान्यग्मन्मंदी मदाय तोशते ॥९॥ आ सोम सुवानो अद्रिभिस्तिरो वाराण्यव्यया । जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दधिषे ॥१०॥१३॥ स मामृजे तिरो अण्वानि मेष्यो मीळ्हे सप्तिर्न वाजयुः । अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर्ऋक्वभिः ॥११॥ प्र सोम देववीतये सिंधुर्न पिप्ये अर्णसा । अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतं ॥१२॥ आ हर्यतो अर्जुने अत्के अव्यत प्रियः सूनुर्न मर्ज्यः । तमीं हिन्वंत्यपसो यथा रथं नदीष्वा गभस्त्योः ॥१३॥ अभि सोमास आयवः पवंते मद्यं मदं । समुद्रस्याधि विष्टपि मनीषिणो मत्सरासः स्वर्विदः ॥१४॥ तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् । अर्षन्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥१५॥१४॥ नृभिर्यमानो हर्यतो विचक्षणो राजा देवः समुद्रियः ॥१६॥

चित् त्वा अप्ऽसु मदामः अंधसा शूरंतः गोभिः उतऽतरं॥२॥ परि सुवानः चक्षसे देवऽमादनः ऋतुः इंदुः विऽचक्षणः॥३॥ पुनानः सोम धारया अपः वसानः अर्षसि आ रत्नऽधाः योनिं ऋतस्य सीदसि उत्सः देव हिरण्ययः॥४॥ दुहानः ऊधः दिव्यं मधु प्रियं प्रत्नं सधऽस्थं आ असदत् आऽपृच्छ्यं धरुणं वाजी अर्षति

[illegible]

नः॥६॥ सोमः मीढ्वान् पवते गातुवित्ऽतमः ऋषिः विप्रः विऽचक्षणः त्वं कविः अभवः देवऽवीतमः आ सूर्यं रोहयः दिवि॥७॥ सोमः ऊं सुवानः सोतृऽभिः अधि स्नुऽभिः अवीनां अश्वयाऽइव हरिता याति धारया मंद्रया याति धारया॥८॥ अनूपे गोऽमान् गोभिः अक्षाः सोमः दुग्धाभिः अक्षाः समुद्रं न संऽवरणानि अग्मन् मंदी मदाय तोशते॥९॥ आ सोम सुवानः अद्रिऽभिः तिरः वाराणि अव्यया जनः न पुरि चम्वोः विशत् हरिः सदः वनेषु दधिषे॥१०॥१३॥ सः ममृजे तिरः अण्वानि मेष्यः मीळ्हे सप्तिः न वाजऽयुः अनुऽमाद्यः पवमानः मनीषिऽभिः सोमः विप्रेभिः ऋक्वऽभिः॥११॥ प्र सोम देवऽवीतये सिंधुः न पिप्ये अर्णसा अंशोः पयसा मदिरः न जागृविः अच्छ कोशं मधुऽश्चुतं॥१२॥ आ हर्यतः अर्जुने अत्के अव्यत प्रियः सूनुः न मर्ज्यः तं ईं हिन्वंति अपसः यथा रथं नदीषु आ गभस्त्योः॥१३॥ अभि सोमासः आयवः पवंते मद्यं मदं समुद्रस्य अधि विष्टपि मनीषिणः मत्सरासः स्वःऽविदः॥१४॥ तरत् समुद्रं पवमानः ऊर्मिणा राजा देवः ऋतं बृहत् अर्षन् मित्रस्य वरुणस्य धर्मणा प्र हिन्वानः ऋतं बृहत्॥१५॥१४॥ नृऽभिः येमानः हर्यतः विऽचक्षणः राजा देवः समुद्रियः॥१६॥

इंद्राय पवते मदः सोमो मरुत्वते सुतः। सहस्रधारो अत्यव्यमर्षति तमीं मृजंत्यायवः ॥१७॥ पुनानश्चमू जनयन्मतिं कविः सोमो देवेषु रण्यति। अपो वसानः परि गोभिरुष्णुषः सीदन्वनेष्वव्यत ॥१८॥ तवाहं सोम रारण सख्य इंदो दिवेदिवे। पुरूणि वभ्रो नि चरंति मामव परिधीरति ताँ इहि ॥१९॥ उताहं नक्तमुत सोम ते दिवा सख्याय वभ्र ऊधनि। घृणा तपंतमति सूर्यं परः शंकुना इव पस्निम ॥२०॥१५॥ मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि। रयिं पिशंगं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥२१॥ मृजानो वारे पवमानो अव्यये वृषावं चक्रदो वने। देवानां सोम पवमान निष्कृतं गोभिरंजानो अर्षसि ॥२२॥ पवस्व वाजसातयेऽभि विश्वानि काव्या। त्वं समुद्रं प्रथमो वि धारयो देवेभ्यः सोम मत्सरः ॥२३॥ स नू पवस्व परि पार्थिवं रजो दिव्या च सोम धर्मभिः। त्वां विप्रासो मतिभिर्विचक्षण शुभ्रं हिन्वंति धीतिभिः ॥२४॥ पवमाना असृक्षत पवित्रमति धारया। मरुत्वंतो मत्सरा इंद्रिया हयां मेधामभि प्रयांसि च ॥२५॥ अपो वसानः परि कोशमर्षतीर्दुर्हियानः सोतृभिः। जनयज्ज्योतिर्मदनो अवीवशन्नाः कृण्वानो न निर्णिजं ॥२६॥१६॥

॥ १०८ ॥ १. २ गौरिवीतिः । ३. १५–१६ शक्तिः । ४. ५ ऊरुः । ६. ७ चाक्रियाः । ८. ९ ऊर्धसद्मा । १०. ११ कृतयशाः । १२. १३ ऋणंचयः ॥ पवमानः सोमः ॥ १. ३. ५. ७. ९. ११. १५ ककुप् । २. ४. ६. ८. १०. १२. १४. १६ सतोबृहती । १३ गायत्री यवमध्या ॥

॥ १०८ ॥ पवस्व मधुमत्तम इंद्राय सोम क्रतुवित्तमो मदः । महि द्युक्षत्तमो मदः ॥ १ ॥ यस्य ते पीत्वा वृषभो वृषायते ऽस्य पीता स्वर्विदः । स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ॥ २ ॥ त्वं ह्यंग दैव्या पवमान जनिमानि द्यु-

इंद्राय पवते मदः सोमः मरुत्वते सुतः सहस्रऽधारः अति अव्यं अर्षति तं ईं मृजंति आयवः ॥१७॥ पुनानः चमू जनयन् मतिं कविः सोमः देवेषु रण्यति अपः वसानः परि गोभिः उतऽतरः सीदन् वनेषु अव्यत ॥१८॥ तवं अहं सोम रण्य सख्ये इंदो दिवेऽदिवे पुरूणि बभ्रो नि चरंति मां अव परिऽधीन् अति तान् इहि ॥१९॥ उत अहं नक्तं उत सोम ते दिवा सख्याय बभ्रो ऊधनि घृणा तपंतं अति सूर्यं परः शकुनाःऽइव पप्तिम ॥२०॥१५॥ मृज्यमानः सुऽहस्त्य समुद्रे वाचं इन्वसि रयिं पिशंगं बहुलं पुरुऽस्पृहं पवमान अभि अर्षसि ॥२१॥ मृजानः वारे पवमानः अव्यये वृषा अव चक्रदः वने देवानां सोम पवमान निःऽकृतं गोभिः श्रीणानः अर्षसि ॥२२॥ पवस्व वाजऽसातये अभि विश्वानि काव्या त्वं समुद्रं प्रथमः वि धारयः देवेभ्यः सोम मत्सरः ॥२३॥ सः तु पवस्व परि पार्थिवं रजः दिव्या च सोम धर्मऽभिः त्वां विप्रासः मतिऽभिः विऽचक्षण भृभ्रं हिन्वंति धीतिऽभिः ॥२४॥ पवमानाः असृक्षत पवित्रं अति धारया मरुत्वंतः मत्सराः इंद्रियाः हयाः मेधां अभि प्रयांसि च ॥२५॥ अपः वसानः परि कोशं अर्षति इंदुः हियानः सोतृऽभिः जनयन् ज्योतिः मंदनाः अवीवशत् गाः कृण्वानः न निःऽनिजं ॥२६॥१६॥

॥१०८॥ पवस्व मधुमतऽतमः इंद्राय सोम क्रतुवित्ऽतमः मदः महि द्युक्षऽतमः मदः ॥१॥ यस्य ते पीत्वा वृषभः वृषऽयते शुष्य पीता स्वःऽविदः सःसुऽप्रकेतः अभि अक्रमीत् इषः अच्छ वाजं न एतशः ॥२॥ त्वं हि अंग दैव्या पवमान जनिमानि द्यु-

मत्तमः। अमृतत्वाय घोषयः ॥३॥ येना नवग्वो दध्यङ्पोर्णुते येन विप्रास आपिरे। देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्यानशुः ॥४॥ एष स्य धारया सुतोऽव्यो वारेभिः पवते मदिंतमः। क्रीळन्नूर्मिरपामिव ॥५॥१७॥ य उस्रिया अप्या अंतरश्मनो निर्गा अकृंतदोजसा। अभि व्रजं तत्निषे गव्यमश्वं वर्मीव धृष्णवा रुज ॥६॥ आ सोता परि षिंचताश्वं न स्तोममप्नुरं रजस्तुरं। वनक्रक्षमुदप्रुतं ॥७॥ सहस्रधारं वृषभं पयोवृधं प्रियं देवाय जन्मने। ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ॥८॥ अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुः। वि कोशं मध्यमं युव ॥९॥ आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्ने विश्पतिः। वृष्टिं दिवः पवस्व रीतिमपां जिन्वा गविष्टये धियः ॥१०॥१८॥ एतमु त्यं मदच्युतं सहस्रधारं वृषभं दिवो दुहुः। विश्वा वसूनि बिभ्रतं ॥११॥ वृषा वि जज्ञे जनयन्नमर्त्यः प्रतपञ्ज्योतिषा तमः। स सुष्टुतः कविभिर्निर्णिजं दधे विधात्वस्य दंससा ॥१२॥ स सुन्वे यो वसूनां यो रायामानेता य इळानां। सोमो यः सुक्षितीनां ॥१३॥ यस्य न इंद्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः। आ येन मित्रावरुणा करामह एंद्रमवसे महे ॥१४॥ इंद्राय सोम पातवे नृभिर्यतः स्वायुधो मदिंतमः। पवस्व मधुमत्तमः ॥१५॥ इंद्रस्य हार्दि सोमधानमा विश समुद्रमिव सिंधवः। जुष्टो मित्राय वरुणाय वायवे दिवो विष्टंभ उत्तमः ॥१६॥१९॥

॥ १०९ ॥ १-२२ अमयो धिष्ण्या ऋषयः ॥ पवमानः सोमः ॥ द्विपदा ॥

॥१०९॥ परि प्र धन्वेंद्राय सोम स्वादुर्मित्राय पूष्णे भगाय

मतऽतमः अमृतऽत्वाय घोषयः ॥३॥ येन नवऽग्वः दध्यङ् अपऽउरुणुते येन विप्रासः आपिरे देवानां सुम्ने अमृतस्य चारुणः येन अर्वांसि आनशुः ॥४॥ एषः स्यः धारया सुतः अव्यः वारेभिः पवते मदिनऽतमः क्रीळन् ऊर्मिः अपांऽइव ॥५॥१७॥ यः उस्रियाः अप्याः अंतः अश्मनः निः गाः अकृंतत् ओजसा अभि व्रजं तन्निषे गव्यं अश्व्यं वर्मीऽइव धृष्णो आ रुज ॥६॥ आ सोत परि सिंचत अश्वं न स्तोमं अप्ऽतुरं रजःऽतुरं वनऽऊर्दं उदऽमुतं ॥७॥ सहस्रंऽधारं वृषभं पयःऽवृधं प्रियं देवाय जन्मने ऋतेन यः ऋतऽजातः विऽववृधे राजा देवः ऋतं बृहत् ॥८॥ अभि द्युम्नं बृहत् यशः इषः पते दिदीहि देव देवऽयुः वि कोशं मध्यमं युव ॥९॥ आ वच्यस्व सुऽदक्ष चम्वोः सुतः विशां वह्निः न विश्पतिः वृष्टिं दिवः पवस्व रीतिं अपां जिन्व गोऽइष्टये धियः ॥१०॥१८॥ एतं ऊं त्यं मदऽच्युतं सहस्रंऽधारं वृषभं दिवः दुहुः विश्वा वसूनि बिभ्रतं ॥११॥ वृषा वि जज्ञे जनयन् अमर्त्यः प्रऽतपन् ज्योतिषा तमः सः सुऽस्तुतः कविऽभिः निःऽनिजं दधे चिऽधातु अस्य दंससा ॥१२॥ सः सुन्वे यः वसूनां यः रायां आऽनेता यः इळानां सोमः यः सुऽक्षितीनां ॥१३॥ यस्य नः इंद्रः पिबात् यस्य मरुतः यस्य वा अर्यमणा भगः आ येन मित्रावरुणा करामहे आ इंद्रं अवसे महे ॥१४॥ इंद्राय सोम पातवे नृऽभिः यतः सुऽआयुधः मदिनऽतमः पवस्व मधुमत्ऽतमः ॥१५॥ इंद्रस्य हार्दि सोमऽधानं आ विश समुद्रंऽइव सिंधवः जुष्टः मित्राय वरुणाय वायवे दिवः विष्टंभः उतऽतमः ॥१६॥१९॥

॥१०९॥ परि प्र धन्व इंद्राय सोम स्वादुः मित्राय पूष्णे भगाय

॥१॥ इंद्रस्ते सोम सुतस्य पेयाः क्रत्वे दक्षाय विष्वे च देवाः ॥२॥ एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥३॥ पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम॥४॥ शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजायै॥५॥ दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ॥६॥ पवस्व सोम द्युम्नी सुधारो महामवीनामनु पूर्व्यः ॥७॥ नृभिर्येमानो जज्ञानः पूतः क्षरद्विश्वानि मंद्रः स्वर्वित् ॥८॥ इंदुः पुनानः प्रजामुराणः करद्विश्वानि द्रविणानि नः ॥९॥ पवस्व सोम क्रत्वे दक्षायाश्वो न निक्तो वाजी धनाय ॥१०॥२०॥ तं तें सोतारो रसं मदाय पुनंति सोमं महे द्युम्नाय ॥११॥ शिशुं जज्ञानं हरिं मृजंति पवित्रे सोमं देवेभ्य इंदुं ॥१२॥ इंदुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ॥ १३ ॥ विभर्ति चार्विंद्रस्य नाम येन विश्वानि वृत्रा जघान ॥१४॥ पिबंत्यस्य विष्वे देवासो गोभिः श्रीतस्य नृभिः सुतस्य ॥१५॥ प्र सुवानो अक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यं ॥१६॥ स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः ॥१७॥ प्र सोम याहींद्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः॥१८॥ असर्जि वाजी तिरः पवित्रमिंद्राय सोमः सहस्रधारः ॥१९॥ अंजंत्येनं मध्वो रसेनेंद्राय वृष्ण इंदुं मदाय ॥२०॥ देवेभ्यस्त्वा वृथा पाजसेऽपो वसानं हरिं मृजंति ॥ २१ ॥ इंदुरिंद्राय तोशते नि तोशते श्रीणन्नपो रिणन्नपः ॥ २२ ॥ २१ ॥

॥ ११० ॥ १-१२ ऋणञ्चयदृषयः ॥ पवमानः सोमः ॥ १-३ अनुष्टुप्पिपीलिकमध्या । ४-९ ऊर्ध्वबृहती । १०-१२ विराट् ॥

॥११०॥ परि प्रधन्व वाजसातये परि वृत्राणि सक्षणिः। द्विषस्तरध्या ऋणया न ईयसे ॥१॥ अनु हि त्वा सुतं सोम मदामसि

॥१॥ इंद्रः ते सोम सुतस्य पेयाः ऋतेन दक्षाय विश्वे च देवाः ॥२॥ एव अमृताय महे क्षयाय सः शुक्रः अर्ष दिव्यः पीयूषः ॥३॥ पवस्व सोम महान् समुद्रः पिता देवानां विश्वा अभि धाम ॥४॥ शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रऽजायै ॥५॥ दिवः धर्ता असि शुक्रः पीयूषः सत्ये विऽधर्मन् वाजी पवस्व ॥६॥ पवस्व सोम द्युम्नी सुऽधारः महां अवीनां अनु पूर्व्यः ॥७॥ नृऽभिः येमानः जज्ञानः पूतः क्षरत विश्वानि मंद्रः स्वःऽवित् ॥८॥ इंदुः पुनानः प्रऽजां उराणः करत् विश्वानि द्रविणानि नः ॥९॥ पवस्व सोम ऋतवे दक्षाय अश्वः न निक्तः वाजी धनाय ॥१०॥२०॥ तं ते सोतारः रसं मदाय पुनंति सोम महे द्युम्नाय ॥११॥ शिशुं जज्ञानं हरिं मृजंति पवित्रे सोमं देवेभ्यः इंदुं ॥१२॥ इंदुः पविष्ट चारुः मदाय अपां उपऽस्थे कविः भगाय ॥१३॥ विभर्ति चारु इंद्रस्य नाम येन विश्वानि वृत्रा जघान ॥१४॥ पिबंति अस्य विश्वे देवासः गोभिः श्रीतस्य नृऽभिः सुतस्य ॥१५॥ प्र सुवानः अक्षाः सहस्रऽधारः तिरः पवित्रं वि वारं अव्यं ॥१६॥ सः वाजी अक्षाः सहस्रऽरेताः अतऽभिः मृजानः गोभिः श्रीणानः ॥१७॥ प्र सोम याहि इंद्रस्य कुक्षा नृऽभिः येमानः अद्रिऽभिः सुतः ॥१८॥ असर्जि वाजी तिरः पवित्रं इंद्राय सोमः सहस्रऽधारः ॥१९॥ अंजंति एनं मध्वः रसेन इंद्राय वृष्णे इंदुं मदाय ॥२०॥ देवेभ्यः त्वा वृथा पाजसे अपः वसानं हरिं मृजंति ॥२१॥ इंदुः इंद्राय नोशते नि तोशते श्रीणन् उपः रिणन् अपः ॥ २२ ॥ २१ ॥

॥११०॥ परि ऊं सु प्र धन्व वाजऽसातये परि वृत्राणि सक्षणिः द्विषः तरध्यै ऋणऽयाः नः ईयसे ॥१॥ अनु हि त्वा सुतं सोम मदाम-

सि महे संमर्यराज्ये । वाजाँ अभि पवमान प्र गाहसे ॥ २ ॥ अजीजनो हि पवमान सूर्यं विधारे शकमना पयः । गोजीरया रंहमाणः पुरंध्या ॥३॥ अजीजनो अमृत मर्त्येष्वाँ ऋतस्य धर्मन्नमृतस्य चारुणः । सदासरो वाजमच्छा सनिष्यदत् ॥ ४ ॥ अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितं । शयोभिर्न भरमाणो गभस्त्योः ॥५॥ आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत । वारं न देवः सविता व्यूर्णुते ॥६॥२२॥ त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः । स त्वं नो वीर वीर्याय चोदय ॥ ७ ॥ दिवः पीयूषं पूर्व्यं यदुक्थ्यं महो गाहादिव आ निरधुक्षत । इंद्रमभि जायमानं समस्वरन् ॥८॥ अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना । यूथे न निष्ठा वृषभो वि तिष्ठसे ॥९॥ सोमः पुनानो अव्यये वारे शिश्रीत क्रीळन्पवमानो अक्षाः । सहस्रधारः शतवाज इंदुः ॥१०॥ एष पुनानो मधुमाँ ऋतावेंद्रायेंदुः पवते स्वादुरूर्मिः । वाजसनिर्वरिवोविद्वयोधाः ॥११॥ स पवस्व सहमानः पृतन्यून्सेधन्रक्षांस्यप दुर्गहाणि । स्वायुधः सासह्वान्सोम शत्रून् ॥ १२ ॥ २३ ॥

॥ ११११ ॥ १-३ अनागतः पारुच्छेपिः ॥ पवमानः सोमः ॥ आर्षटुभः ॥

॥१११॥ अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः सूरो न स्वयुग्वभिः । धारा सुतस्य रोचते पुनानो अरुषो हरिः । विश्वा यदूपा परियात्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ॥१॥ त्वं त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स आ दृळ्हं ऋतस्य धीतिभिर्दमे । परावतो न साम तद्या रणंति धीतयः । विधातृभिरुपीभिर्वयो दधे रोचमानो वयो दधे ॥२॥

सिमहेसमर्यऽराज्ये वाजान् अभि पवमान प्र गाहसे॥२॥ अजीजनः हि पवमान सूर्यं विऽधारे शक्मना पयः गोऽजीरया रंहमाणः पुरंऽध्या॥३॥ अजीजनः अमृत मर्त्येषु आ ऋतस्य धर्मन् अमृतस्य चारुणः सदं अस्रः वाजं अर्षसनिस्यदत्॥४॥ अभिऽअभि हि श्रवसा ततर्दिथ उत्सं न कं चित् जनऽपानं अक्षितं शयीभिः नभरंमाणः गभस्त्योः॥५॥ आत् ईं के चित् पश्यमानासः आप्यं वसुऽरुचः दिव्याः अभि अनूषत वारं न देवः सविता वि ऊर्णुते॥६॥२२॥ त्वे सोम प्रथमाः वृक्तऽबर्हिषः महे वाजाय श्रवसे धियं दधुः सः त्वं नः वीर वीर्याय चोदय॥७॥ दिवः पीयूषं पूर्व्य यत् उक्थ्यं महः गाहात् दिवः आ निः अधुक्षत् इंद्रं अभि जायमानं सं अस्वरन्॥८॥ अधं यत् इमे पवमान रोदसी इमा च विश्वा भुवना अभि मज्मना यूथे न निःऽस्याः वृषभः वि तिष्ठसे॥९॥ सोमः पुनानः अव्ययं वारे शिश्नुः न क्रीळन् पवमानः अक्षाः सहस्रऽधारः शतऽवाजः इंदुः॥१०॥ एषः पुनानः मधुऽमान् ऋतऽवा इंद्राय इंदुः पवते स्वादुः ऊर्मिः वाजऽसनिः वरिवःऽवित् वयःऽधाः॥११॥ सः पवस्व सहमानः पृतन्यून् सेधन् रक्षांसि अप दुःऽगहानि सुऽआयुधः ससह्वान् सोम शत्रून्॥१२॥२३॥

॥१११॥ अया रुचा हरिण्या पुनानः विश्वा द्वेषांसि तरति स्वयुग्वऽभिः सूरः न स्वयुग्वऽभिः धारा सुतस्य रोचते पुनानः अरुषः हरिः विश्वा यत् रूपा परिऽयाति ऋक्वऽभिः सप्तऽआस्येभिः ऋक्वऽभिः॥१॥ त्वं त्यत् पणीनां विदः वसु सं मातृऽभिः मर्जयसि स्वे आ दमे ऋतस्य धीतिऽभिः दमे पराऽवतः नसामं तत् यत् चरंति धीतयः चिधातुऽभिः अरुषीभिः वयः दधे रोचमानः वयः दधे॥२॥

सिमहे समर्यऽराज्ये वाजान् अभि पवमान प्रगाहसे॥२॥ अजीजनः हि पवमान सूर्यं विऽधारे शक्मना पयः गोऽजीरया रंहमाणः पुरंऽध्या॥३॥ अजीजनः अमृत मर्त्येषु आ ऋतस्य धर्मन् अमृतस्य चारुणः सदं अस्रः वाजं अर्षसि निस्यदत्॥४॥ अभिऽअभि हि श्रवसा ततर्दिथ उत्सं न कं चित् जनऽपानं अक्षितं शयोभिः नभरमाणः गभस्त्योः॥५॥ आत् ईं के चित् पश्यमानासः आप्यं वसुऽरुचः दिव्याः अभि अनूषत वारं न देवः सविता वि ऊर्णुते॥६॥२२॥ त्वे सोम प्रथमाः वृक्तऽबर्हिषः महे वाजाय श्रवसे धियं दधुः सः त्वं नः वीर वीर्याय चोदय॥७॥ दिवः पीयूषं पूर्व्यं यत् उक्थ्यं महः गाहात् दिवः आ निः अधुक्षत् इंद्रं अभि जायमानं सं अस्वरन्॥८॥ अधं यत् इमे पवमान रोदसी इमा च विश्वा भुवना अभि मज्मना यूथे न निःऽस्याः वृषभः वि तिष्ठसे॥९॥ सोमः पुनानः अव्यये वारे शिश्युः न क्रीळन् पवमानः अक्षाः सहस्रऽधारः शतऽवाजः इंदुः॥१०॥ एषः पुनानः मधुऽमान् ऋतऽवा इंद्राय इंदुः पवते स्वादुः ऊर्मिः वाजऽसनिः वरिवःऽवित् वयःऽधाः॥११॥ सः पवस्व सहमानः पृतन्यून् सेधन् रक्षांसि अप दुःऽगहानि सुऽआयुधः ससह्वान् सोम शत्रून्॥१२॥२३॥

॥१११॥ अया रुचा हरिण्या पुनानः विश्वा द्वेषांसि तरति स्वयुग्वऽभिः सूरः न स्वयुग्वऽभिः धारा सुतस्य रोचते पुनानः अरुषः हरिः विश्वा दृतरूपा परिऽयाति ऋक्वऽभिः सप्तऽआस्येभिः ऋक्वऽभिः॥१॥ त्वं त्यत् पणीनां विदः वसु सं मातृऽभिः मर्जयसि स्वे आ दमे ऋतस्य धीतिऽभिः दमे पराऽवतः नसामन्ता यत् चरणंति धीतयः विधातुऽभिः अरुषीभिः वयः दधे रोचमानः वयः दधे॥२॥

पूर्वामनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः। अग्मन्नुक्थानि पौंस्येंद्रं जैत्राय हर्षयन्। वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता ॥३॥२४॥

॥ ११२ ॥ १-४ शिशुः ॥ पवमानः सोमः ॥ पंक्तिः ॥

॥११२॥ नानानं वा उ नो धियो वि व्रतानि जनानां। तक्षा रिष्टं रुतं भिषग्ब्रह्मा सुन्वंतमिच्छतींद्रायेंदो परि स्रव ॥१॥ जरंतीभिरोषधीभिः पर्णेभिः शकुनानां। कामारो अश्मभिर्द्युभिर्हिरण्ययंतमिच्छतींद्रायेंदो परि स्रव ॥२॥ कारुरहं ततो भिषगुपलप्रक्षिणी नना। नानाधियो वसूयवोऽनु गा इव तस्थिमेंद्रायेंदो परि स्रव ॥३॥ अश्वो वोळ्हा सुखं रथं हसनामुपमंचिषत्। शेपो रोमण्वंतो भेदो वारिन्मंडूक इच्छतींद्रायेंदो परि स्रव ॥४॥२५॥

॥ ११३ ॥ १-११ कश्यपः ॥ पवमानः सोमः ॥ पंक्तिः ॥

॥११३॥ गर्यणावंति सोममिंद्रः पिबतु वृत्रहा। बलं दधान आत्मनि करिष्यन्वीर्यं महदिंद्रायेंदो परि स्रव ॥१॥ आ पवस्व दिशां पत आर्जीकात्सोम मीढ्वः। ऋतवाकेन सत्येन श्रद्धया तपसा सुत इंद्रायेंदो परि स्रव ॥२॥ पर्जन्यं वृद्धं महिषं तं सूर्यस्य दुहितोभरत्। तं गंधर्वाः प्रत्यगृभ्णन्त सोमे रसमादधुरिंद्रायेंदो परि स्रव ॥३॥ ऋतं वदन्नृतद्युम्न सत्यं वदन्त्सत्यकर्मन्। श्रद्धां वदन्त्सोम राजन्धात्रा सोम परिष्कृत इंद्रायेंदो परि स्रव ॥४॥ सत्यमुग्रस्य बृहतः सं संवंति संसवाः। सं यंति रसिनो रसाः पुनानो ब्रह्मणा हर इंद्रायेंदो परि स्रव ॥५॥२६॥ यत्र ब्रह्मा पवमान छंदस्यां वाचं वदन्। यात्रा सोमः

पूर्वी अनु प्रऽदिशं याति चेकितत् सं रश्मिऽभिः यतते दर्शतः रथः दैव्यः दर्शतः रथः अग्मन् उक्थानि पौंस्या इंद्रं जैचाय हर्षयन् वज्रः च यत् भवथः अनपऽच्युता सुमतऽसु अनपऽच्युता ॥ ३ ॥ २४ ॥

॥११२॥ नानानं वै जं नः धियः वि व्रतानि जनानां तक्षा रिष्टं रुतं भिषक् ब्रह्मा सुन्वंतं इच्छति इंद्राय इंदो परि स्रव ॥१॥ जरंतीभिः ओषधीभिः पर्णेभिः शकुनानां कार्मारः अश्मऽभिः द्युऽभिः हिरण्यऽवंतं इच्छति इंद्राय इंदो परि स्रव ॥२॥ कारुः अहं ततः भिषक् उपलऽप्रक्षिणी नना नानाऽधियः वसुऽयवः अनु गाःऽइव तस्थिम इंद्राय इंदो परि स्रव ॥३॥ अश्वः वोढा सुऽखं रथं हसनां उपऽमंचिणः शेपः रोमण्ऽवंतो भेदो वाः इत् मंडूकः इच्छति इंद्राय इंदो परि स्रव ॥ ४ ॥ २५ ॥

॥११३॥ शर्यणाऽवति सोमं इंद्रः पिबतु वृचऽहा बलं दधानः आत्मनि करिष्यन् वीर्यं महत इंद्राय इंदो परि स्रव ॥१॥ आ पवस्व दिशां पते आज्रीकात् सोम मीढुः ऋतऽवाकेन सत्येन श्रद्धया तपसा सुतः इंद्राय इंदो परि स्रव ॥२॥ पर्जन्यऽवृद्धं महिषं तं सूर्यस्य दुहिता आ अभरत् तं गंधर्वाः प्रति अगृभ्णन् तं सोमे रसं आ अदधुः इंद्राय इंदो परि स्रव ॥३॥ ऋतं वदन् ऋतऽद्युम्न सत्यं वदन् सत्यऽकर्मन् श्रद्धां वदन् सोम राजन् धाचा सोम परिऽकृतः इंद्राय इंदो परि स्रव ॥४॥ सत्यंऽउंयस्य बृहतः संस्रवंति संऽस्रवाः सं यंति रसिनः रसाः पुनानः ब्रह्मणा हरे इंद्राय इंदो परि स्रव ॥५॥ २६ ॥ यत् ब्रह्मा पवमान छंदस्यां वाचं वदन् याव्णा सोमे

महीयते सोमेनानंदं जनयन्निंद्रायेंदो परि स्रव ॥ ६ ॥ यत्र ज्योतिरजस्रं यस्मिंल्लोके स्वर्हितं । तस्मिन्मां धेहि पवमानामृते लोके अक्षित इंद्रायेंदो परि स्रव ॥ ७ ॥ यत्र राजा वैवस्वतो यत्रावरोधनं दिवः । यत्रामूर्यृह्वतीरापस्तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥ ८ ॥ यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः । लोका यत्र ज्योतिष्मंतस्तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥ ९ ॥ यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपं । स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥ १० ॥ यत्रानंदाश्च मोदाश्च मुदः प्रमुद आसते । कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधींद्रायेंदो परि स्रव ॥ ११ ॥ २७ ॥

॥ ११४ ॥ १-४ कश्यप. ॥ पवमानः सोमः ॥ पंक्तिः ॥

॥ ११४ ॥ य इंदोः पवमानस्यानु धामान्यक्रमीत् । तमाहुः सुप्रजा इति यस्ते सोमाविधन्मन इंद्रायेंदो परि स्रव ॥ १ ॥ ऋषे मंत्रकृतां स्तोमैः कश्यपोद्वर्धयन्गिरः । सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिरिंद्रायेंदो परि स्रव ॥ २ ॥ सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः । देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष न इंद्रायेंदो परि स्रव ॥ ३ ॥ यत्ते राजञ्छृतं हविस्तेन सोमाभि रक्ष नः । अरातीवा मा नस्तारीन्मो च नः किं चनाममदिंद्रायेंदो परि स्रव ॥ ४ ॥ २८ ॥ ७ ॥ ९ ॥

॥ इति नवमं मंडलं समाप्तं ॥

महीयते सोमेन आऽनंदं जनयन् इंद्राय इंदो परि स्रव ॥६॥ यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितं तस्मिन् मां धेहि पवमान अमृते लोके अक्षिते इंद्राय इंदो परि स्रव ॥७॥ यत्र राजा वैवस्वतः यत्र अवऽरोधनं दिवः यत्र अमूः यह्वतीः आपः तत्र मां अमृतं कृधि इंद्राय इंदो परि स्रव ॥८॥ यत्र अनुऽकामं चरणं त्रिऽनाके त्रिऽदिवे दिवः लोकाः यत्र ज्योतिष्मंतः तत्र मां अमृतं कृधि इंद्राय इंदो परि स्रव ॥९॥ यत्र कामाः निऽकामाः च यत्र ब्रध्नस्य विष्टपं स्वधा च यत्र तृप्तिः च तत्र मां अमृतं कृधि इंद्राय इंदो परि स्रव ॥१०॥ यत्र आऽनंदाः च मोदाः च मुदः प्रऽमुदः आसते कामस्य यत्र आप्ताः कामाः तत्र मां अमृतं कृधि इंद्राय इंदो परि स्रव ॥ ११ ॥ २७ ॥

॥११४॥ यः इंदोः पवमानस्य अनुधामानि अक्रमीत् तं आहुः सुऽप्रजाः इति यः ते सोम अविधत् मनः इंद्राय इंदो परि स्रव ॥१॥ ऋषे मंत्रऽकृतां स्तोमैः कश्यप उत्ऽवर्धयन् गिरः सोमं नमस्य राजानं यः जज्ञे वीरुधां पतिः इंद्राय इंदो परि स्रव ॥२॥ सप्त दिशः नानाऽसूर्याः सप्त होतारः ऋत्विजः देवाः आदित्याः ये सप्त तेभिः सोम अभि रक्ष नः इंद्राय इंदो परि स्रव ॥३॥ यत् ते राजन् शृतं हविः तेन सोम अभि रक्ष नः अरातिऽवा मा नः तारीत् मो च नः किं चन आममत् इंद्राय इंदो परि स्रव ॥४॥ २८ ॥ ७ ॥ ९ ॥

॥ इति नवमं मंडलं समाप्तं ॥

॥ १ ॥ १–७ चितः ॥ अग्निः ॥ विष्टुप् ॥

॥१॥ अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान्तमसो ज्योतिषागात्। अग्निर्भानुना रुशता स्वंग आ जातो विश्वा सद्मान्यप्राः ॥१॥ स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु। चित्रः शिशुः परि तमांस्यक्तून्प्र मातृभ्यो अधि कनिक्रदज्जाः ॥ २ ॥ विष्णुरित्था परममस्य विद्वाञ्जातो बृहन्नभि पाति नृतीयं। आसा यदस्य पयो अक्रत स्वं सचेतसो अभ्यंचीत्यत्र ॥३॥ अत उत्वा पितुभृतो जनित्रीरत्यावृधं प्रति चरन्त्यत्नैः। ता ईं प्रत्येषि पुनरन्यरूपा असि त्वं विक्षु मानुषीषु होता ॥४॥ होतारं चित्ररथमध्वरस्य यज्ञस्ययज्ञस्य केतुं रुशन्तं। प्रत्यर्धि देवस्यदेवस्य महा श्रिया त्वेषमतिथिं जनानां ॥ ५ ॥ स तु वस्त्राण्यध पेशनानि वसानो अग्निर्नाभा पृथिव्याः। अरुषो जातः पद इळायाः पुरोहितो राजन्यश्चीह देवान् ॥ ६ ॥ आ हि द्यावापृथिवी अग्न उभे सदा पुत्रो न मातरा ततंथ। प्र याह्यच्छोशुतो यविष्ठाथा वह सहस्येह देवान् ॥ ७ ॥ २९ ॥

॥ २ ॥ १–७ चितः ॥ अग्निः ॥ विष्टुप् ॥

॥२॥ प्रेमीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँरृतुपते यजेह। ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्यायजिष्ठः ॥१॥ वेषिं होत्रमुत पोत्रं जनानां मंधातासि द्रविणोदा ऋतावा। स्वाहा वयं कृणवामा हवींषि देवो देवान्यजत्वग्निरर्हन ॥ २ ॥ आ देवानामपि पंथामगन्म यच्छक्नवाम तदनु प्रवोळ्हुं। अग्निर्विद्वान्स यजात्सेदु होता सो अध्वरान्स ऋतून्कल्पयाति ॥ ३ ॥ यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः। अग्निष्टद्विश्वमा पृणाति विद्वान्येषां

॥१॥ अयं बृहन् उपसां ऊर्ध्वः अस्थात् निःऽजगन्वान् तमसः ज्योतिषा आ अगात् अग्निः भानुना रुशता सुऽअंगः आ जातः विश्वा सद्मानि अप्राः ॥१॥ सः जातः गर्भः असि रोदस्योः अग्ने चारुः विऽभृतः ओषधीषु चित्रः शिशुः परि तमांसि अक्तून् प्र मातृऽभ्यः अधि कनिक्रदत् गाः॥२॥ विष्णोः इत्या परमं अस्य विद्वान् जातः बृहन् अभि पाति तृतीयं आसा यत् अस्य पयः अक्रत स्वं सऽचेतसः अभि अर्चन्ति अर्चं ॥३॥ अतः ऊं त्वा पितुऽभृतः जनिचीः अनुऽवृधं प्रति चरन्ति अन्नैः ताः ईं प्रति एषि पुनः अन्यऽरूपाः असिं त्वं विष्टु मानुषीषु होता ॥४॥ होतारं चित्रऽरथं अध्वरस्य यज्ञस्यऽयज्ञस्य केतुं रुशन्तं प्रतिऽअर्धि देवस्यऽदेवस्य महा श्रिया तु अग्निं अतिथिं जनानां॥५॥ सः तु वस्त्राणि अध पेशनानि वसानः अग्निः नाभा पृथिव्याः अरुषः जातः पदे इळायाः पुरःऽहितः राजन् यक्षि इह देवान् ॥६॥ आ हि द्यावापृथिवी अग्ने उभे सदा पुचः न मातरा ततंथ प्र याहि अच्छ उशतः यविष्ठ अथ आ वह सहस्य इह देवान् ॥ ७ ॥ २९ ॥

॥२॥ पिप्रीहि देवान् उशतः यविष्ठ विद्वान् ऋतून् ऋतुऽपते यज इह ये दैव्याः ऋत्विजः तेभिः अग्ने त्वं होतॄणां असि आऽयजिष्ठः॥१॥ वेषि होत्रं उत पोत्रं जनानां मंधाता असि द्रविणःऽदाः ऋतऽवा स्वाहा वयं कृणवाम हवींषि देवः देवान् यजतु अग्निः अहैन॥२॥ आ देवानां अपि पंथां अगन्म यत् शक्नवाम तत् अनु प्रऽवोळ्हुं अग्निः विद्वान् सः यजात् सः इत् ऊं होता सः अध्वरान् सः ऋतून् कल्पयाति॥३॥ यत् वः वयं प्रऽमिनाम व्रतानि विदुषां देवाः अविदुःऽतरासः अग्निः तत् विश्वं आ पृणाति विद्वान् ये-

भिर्देवाँ ऋतुभिः कल्पयाति ॥४॥ यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्त्यासः । अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाँ ऋतशो यजाति ॥५॥ विश्वेषां ह्यध्वराणामनीकं चित्रं केतुं जनिता त्वा जजान । स आ यजस्व नृवतीरनु क्षाः स्याहा इषः सुमतीर्विश्वजन्याः ॥६॥ यं त्वा द्यावापृथिवी यं त्वापस्त्वष्टा यं त्वा सुजनिमा जजान । यंयामनुं प्रविद्वान्पितृयाणं द्युमदग्ने समिधानो वि भाहि ॥ ७ ॥ ३० ॥

॥ ३ ॥ १-७ चितः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥३॥ इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषूमाँ अदर्शि । चिकित्रि भाति भासा बृहतासिक्नीमेति रुशतीमपाजन् ॥१॥ कृष्णां यदेनीमभि वर्पसा भूज्जनयन्योषां बृहतः पितुर्जाः । ऊर्ध्वं भानुं सूर्यस्य स्तभायन्दिवो वसुभिररतिर्वि भाति ॥२॥ भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् । सुप्रकेतैद्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभि राममस्थात् ॥३॥ अस्य यामासो बृहतो न वग्नूनिंधाना अग्नेः सख्युः शिवस्य । ईड्यस्य वृष्णो बृहतः स्वासो भामासो यामन्नक्रवंश्चिकित्रे ॥४॥ स्वना न यस्य भामासः पवन्ते रोचमानस्य बृहतः सुदिवः । ज्येष्ठेभिर्यस्ते जिह्वाभिः क्रीळुमद्भिर्वपिष्टेभिर्भानुभिर्नर्ञ्जति द्याम् ॥५॥ अस्य शुष्मासो ददृशानपवेर्जेहमानस्य स्वनयन्नियुद्भिः । प्रत्नेभिर्यो रुशद्भिर्देवतमो वि रोभद्भिररतिर्भाति विभ्वा ॥६॥ स आ वक्षि महि नु आ च सत्सि दिवस्पृथिव्योररतिर्युवत्योः । अग्निः सुतुकः सुतुकेभिरश्वैः रभस्वन्नो रभस्वाँ इह गम्याः ॥ ७ ॥ ३१ ॥

भिः देवान् ऋतुऽभिः कल्पयाति ॥४॥ यत् पाकऽचा मनसा दीनऽदक्षाः न यज्ञस्य मन्वते मर्त्यासः अग्निः तत् होता क्रतुऽवित् विऽजानन् यजिष्ठः देवान् ऋतुऽशः यजाति ॥५॥ विश्वेषां हि अध्वराणां अनीकं चित्रं केतुं जनिता त्वा जजान सः आ यजस्व नृऽवतीः अनु क्षाः स्वाहाः इषः क्षुऽमतीः विश्वऽजन्याः ॥६॥ यं त्वा द्यावापृथिवी यं त्वा आपः त्वष्टा यं त्वा सुऽजनिमा जजान यंयां अनु प्रऽविद्वान् पितृऽयानं द्युऽमत् अग्ने संऽइद्धानः वि भाहि ॥७॥३०॥

॥३॥ इनः राजन् अरतिः संऽइद्धः रौद्रः दक्षाय सुषुऽमान् अदर्शि चिकित् विभाति भासा बृहता असिक्नीं एति रुशंती अपऽअजन् ॥१॥ कृष्णां यत् एनीं अभि वर्पसा भूत् जनयन् योषां बृहतः पितुः जां ऊर्ध्वं भानुं सूर्यस्य स्तभायन् दिवः वसुऽभिः अरतिः वि भाति ॥२॥ भद्रः भद्रया सचमानः आ अगात् स्वसारं जारः अभि एति पश्चात् सुऽप्रकेतैः द्युऽभिः अग्निः विऽतिष्ठन् रुशत्ऽभिः वर्णैः अभि रामं अस्थात् ॥३॥ अस्य यामासः बृहतः न वयून् इंधानाः अग्नेः सख्युः शिवस्य ईड्यस्य वृष्णः बृहतः सुऽआसः भामासः यामन् अक्तवः चिकित्रे ॥४॥ स्वनाः न यस्य भामासः पवंते रोचमानस्य बृहतः सुऽदिवः ज्येष्ठेभिः यः तेजिष्ठैः क्रीळुमत्ऽभिः वर्षिष्ठेभिः भानुऽभिः नक्षति द्यां ॥५॥ अस्य शुष्मासः ददृशानऽपवेः जेहमानस्य स्वनयन् नियुत्ऽभिः प्रत्नेभिः यः रुशत्ऽभिः देवऽतमः विरोकत्ऽभिः अरतिः भाति विऽभ्वा ॥६॥ सः आ वक्षि महिं नः आ च सत्सि दिवः पृथिव्योः अरतिः युवत्योः अग्निः सुऽतुकः सुऽतुकेभिः अश्वैः रभस्वत्ऽभिः रभस्वान् आ इह गम्याः ॥७॥३१॥

॥ ४ ॥ १–७ वितः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥४॥ प्र ते॑ यक्षि॒ प्र त॑ इयर्मि॒ मन्म॑ भुवो॒ यथा॑ वंद्यो नो॒ हवे॑षु। धन्वन्नि॑व प्रपा अ॑सि॒ त्वम॑ग्न इयक्षवे॒ पूर॑वे प्रत्न राजन्॥१॥ यंत्वा॒ जना॑सो अ॒भि सं॒चर॑न्ति॒ गाव॑ उ॒ष्णमि॑व व्र॒जं यवि॑ष्ठ। दू॒तो दे॒वाना॑मसि॒ मर्त्या॑नामं॒तर्म॒हाँश्च॑रसि रोचने॒ना॥२॥ शि॒शुं न त्वा॒ जेन्यं॑ व॒र्ध॒यं॒ती मा॒ता बि॑भर्ति॒ सच॑नस्यमाना। धनो॑रधि प्रवता॑ यासि॒ हर्य॑न्ज॒िगी॑षसे पशु॒रि॒वाव॑सृष्टः॥३॥ मू॒रा अ॑मूर॒ न व॒यं चि॑कित्वो महि॒त्वम॑ग्ने॒ त्वम॑ंग वित्से। शये॑ व॒व्रिश्च॑रति जि॒ह्वया॒दन्ने॑ऱिह्यते॑ युव॒तिं वि॒श्पति॑ःसन्॥४॥ कू॒चि॑ज्जायते॒ सन॑यासु॒ नव्यो॒ वने॑ तस्थौ॒ पलि॒तो धू॒मके॑तुः। अ॒क्ता॒तापो॑ वृ॒षभो॒ न प्र॑वेति॒ सचे॑तसो॒ यं प्र॒णय॑ंत॒ मर्ता॑ः॥५॥ तनू॒त्यजे॑व॒ तस्क॑रा॒ वन॑र्गू॒ रेष॑णाभि॒र्दे॒शभि॑र॒भ्यधी॑ता॑म्। इ॒यं ते॑ अग्ने॒ नव्यसी॒ मनी॑षा यु॒क्ष्वा रथं॒ न शुच॑यद्भि॒रेगैः॥६॥ व्रक्षं॑ च॒ ते जातवेदो॒ नमश्चे॒यं च॒ गीः सद॒मिद्धे॑नी॒ भूत्। रक्षा॑ णो अग्ने॒ तन॑याानि॒ तोका॒ रक्षो॑त॒ नस्त॒न्वो॒३॒ अप्र॑युच्छन्॥ ७ ॥ ३२ ॥

॥ ५ ॥ १–७ वितः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥५॥ एकः॑ समु॒द्रो ध॒रुणो॑ र॒यीणा॒मस॑दृ॒दो भूरि॑जन्मा॒ वि च॑ष्टे। सिष्क्यू॒धनि॑न्नि॒ण्योरु॒पस्थ॒ उत्सस्य॒ मध्ये॒ निहि॑तं प॒दं वेः॥१॥ स॒मा॒नं नी॒ळं वृ॑ष॒णो॒ वसा॑नाः॒ सं ज॑ग्मिरे महि॒षा अ॑वे॒तीभिः। ऋ॒तस्य॑ प॒दं क॒वयो॒ नि पा॑॑ति॒ गुहा॒ नामा॑नि दधिरे॒ पराणि॑॥२॥ ऋ॒तायिनी॑ मा॒यिनी॒ सं द॑धाते मि॒त्वा शि॒शुं॑ जज्ञतु॒र्वर्ध॑यं॒ती। विश्व॑स्य॒ नाभिं॑ चरतो ध्रु॒वस्य॑ क॒वेश्चि॒त्तंतुं॒ मन॑सा॒ वि॒यंतः॥३॥ ऋ॒तस्य॒ हि व॒र्त॒नयः॑ सु॒जा॒तमि॒षो वाजा॑य प्र॒दिव॒ः सच॑ंते। अधी॒वासं॑ रोद॒सी वा॒वसा॒ने घृ॒तैरन्नै॑र्वावृधाते॒ मधू॑नां॥४॥ स॒प्त स्वसॄ॑रू॒पीर्वा॒वश॒नो वि॒द्वान्मध्व॒

॥४॥ प्र ते यक्षि प्र ते इयर्मि मन्मभुवः यथा वंद्यः नः हवेषु धन्वनऽइव प्रऽपा असि त्वं अग्ने इयक्षवे पूरवे प्रान राजन्॥१॥ यं त्वा जनासः अभि संऽचरंति गावः उष्णंऽइव व्रजं यविष्ठ दूतः देवानां असि मर्त्यानां अंतः महान् चरसि रोचनेन॥२॥ शिप्रीं न त्वा जेन्यं वर्धयंती माता बिभर्ति सचनस्यमाना धनोः अधि प्रऽवतां यासि हर्यन् जिगीषसे पशुःऽइव अवंऽसृष्टः॥३॥ मूराः अमूरन वयं चिकित्वः महिऽत्वं अग्ने त्वं अंग वित्से शर्ये वव्रिः चरंति जिह्वया अदन् रक्षसे युवतिं विश्पतिः सन्॥४॥ कूऽचित् जायते सनयासु नव्यः वने तस्थौ पलितः धूमऽकेतुः अक्षाता. आयः वृषभः न प्र वेति सऽचेतसः यं प्रऽनयंत मर्तासः॥५॥ तनूनपात्ऽइव तस्करा वनर्गू रणनाभिः दृशऽभिः अभि अधीतां इयं ते अग्ने नव्यसी मनीषा युष्मे रयिं न सुचयंतऽभिः अर्गैः॥६॥ ब्रह्म च ते जातऽवेदः नमः च इयं च गीः सदं इत् वर्धनी भूत् रक्षा नः अग्ने तनयानि तोका रक्ष उत नः तन्वः अप्रऽयुच्छन्॥७॥३२॥

॥५॥ एकः समुद्रः धरुणः रयीणां असत् हृदः भूरिऽजन्मा वि चष्टे सिसक्ति ऊधः निऽणयोः उपऽस्थे उत्सस्य मध्ये निऽहितं पदं वेः॥१॥ समानं नीळं वृषणः वसानाः सं जग्मिरे महिषाः अवंतीभिः ऋतस्य पदं कवयः नि पांति गुहा नामानि दधिरे परांसि॥२॥ ऋतऽयिनीः मायिनी सं दधाते मित्वा शिप्रीं जनुषा वर्धयंती विश्वस्य नाभिं चरतः ध्रुवस्य कवेः चित् तंतुं मनसा विऽयंतः॥३॥ ऋतस्य हि वर्तनयः सुऽजातं इषः वाजाय प्रऽदिवः सचंते अधीवासं रोदसी वसाने घृतैः अन्नैः ववृधाते मधूनां॥४॥ सप्त स्वसॄः अरुषीः वावशानः विद्वान् मध्वः

उज्जभारा दृशे कं। अंतर्येमे अंतरिक्षे पुराजा इच्छन्वव्रिमंविदत्पूपणस्य ॥५॥ सन्न मर्यादाः कवयस्ततक्षुस्तासामेकामिद्भ्यंहुरो गात्। आयोर्ह स्कंभ उपमस्य नीळे पथां विसर्गे धरुणेषु तस्थौ ॥६॥ असच्च सच्च परमे व्योमन्दक्षस्य जन्मन्नदितेरुपस्थे। अग्निर्ह नः प्रथमजा ऋतस्य पूर्वे आयुनि वृषभश्च धेनुः ॥७॥३३॥५॥

॥ ६ ॥ १-७ वितः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥६॥ अयं स यस्य शर्मन्नवोभिर्ग्नेरेधते जरिताभिष्टौ। ज्येष्ठेभिर्यो भानुभिर्ऋषूणां पर्येति परिवीतो विभावा ॥१॥ यो भानुभिर्विभावा विभात्यग्निर्देवेभिर्ऋतावाजसः। आ यो विवाय सख्या सखिभ्योऽपरिह्वृतो अत्यो न सप्तिः ॥२॥ ईशे यो विश्वस्या देववीतेरीशे विश्वायुरुषसो व्युष्टौ। आ यस्मिन्मना हवींष्यावरिष्टरथः स्कभ्नाति शूषैः ॥३॥ शूषेभिर्वृधो जुषाणो अर्केर्देवाँ अच्छा रघुपत्वा जिगाति। मंद्रो होता स जुह्वा३ यजिष्ठः संमिश्लो अग्निरा जिघर्ति देवान् ॥४॥ तमु ष्टामिंद्रं न रेजमानमग्निं गीर्भिर्नमोभिरा कृणुध्वं। आ यं विप्रासो मतिभिर्गृणंति जातवेदसं जुह्वं सहानां ॥५॥ सं यस्मिन्विश्वा वसूनि जग्मुर्वाजे नाश्वाः सप्तीवंत एवैः। अस्मे ऊतीरिंद्रवाततमा अर्वाचीना अग्न आ कृणुष्व ॥६॥ अधा ह्यग्ने महो निपद्यो सद्यो जज्ञानो हव्यो बभूथ। तं ते देवासो अनु केतमायन्नधावर्धत प्रथमास ऊमाः ॥७॥१॥

॥ ७ ॥ १-७ वितः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥७॥ स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव। सचेमहि तव दस्म प्रकेतैरुरुष्या णो उरुभिर्देव शंसैः

उत जभारद्दशे कं अंतः येमे अंतरिक्षे पुराऽजाः दृंहन् बिभेद अविदत् पूषणस्य ॥५॥ सप्त मर्यादाः कवयः ततक्षुः तासां एकां इत् अभि अंहुरः गात् आयोः ह स्कंभः उपऽमस्य नीळे पथां विऽसर्गे धरुणेषु तस्थौ ॥६॥ असत् च सत् च परमे विऽओमन् दक्षस्य जन्मन् अदितेः उपऽस्थे अग्निः ह नः प्रथमऽजाः ऋतस्य पूर्वे आयुनि वृषभः च धेनुः ॥ ७ ॥ ३३ ॥ ५ ॥

॥६॥ अयं सः यस्य शर्मन् अवःऽभिः अग्नेः एधते जरिता अभिष्टौ ज्येष्ठेभिः यः भानुऽभिः ऋतूणां परिऽएति परिऽवीतः विभाऽवा ॥१॥ यः भानुऽभिः विभाऽवा विऽभाति अग्निः देवेभिः ऋतऽवा अजस्रः आ यः विवाय सख्या सखिऽभ्यः अपरिऽह्वृतः अत्यः न सप्तिः ॥२॥ ईशे यः विश्वस्याः देवऽवीतेः ईशे विश्वऽआयुः उपसः विऽउष्टौ आ यस्मिन् मना हवींषि अग्नौ अरिष्टऽरथः स्कभ्नाति शूषैः ॥३॥ शूषेभिः वृधः जुषाणः अर्कैः देवान् अच्छ रघुऽपत्वा जिगाति मंद्रः होता सः जुह्वा यजिष्ठः संऽमिश्लः अग्निः आ जिघर्ति देवान् ॥४॥ तं उक्षां इंद्रं न रेजमानं अग्निं गीःऽभिः नमःऽभिः आ कृणुध्वं आ यं विप्रासः मतिऽभिः गृणंति जातऽवेदसं जुह्वं सहानां ॥५॥ सं यस्मिन् विश्वा वसूनि जग्मुः वाजे न अश्वाः सप्तिऽवंतः एवैः अस्मे ऊतीः इंद्रवातऽतमाः अर्वाचीनाः अग्ने आ कृणुष्व ॥६॥ अध हि अग्ने महा निऽसद्य सद्यः जज्ञानः हव्यः बभूथ तं ते देवासः अनु केतं आयन् अध अवर्धत प्रथमासः ऊमाः ॥७॥१॥

॥७॥ स्वस्ति नः दिवः अग्ने पृथिव्याः विश्वऽआयुः धेहि यजथाय देव सचेमहि तव दस्म प्रऽकेतैः उरुष्य नः उरुऽभिः देव शंसैः

॥१॥ इमा अग्ने मतयस्तुभ्यं जाता गोभिरश्वैरभि गृणंति राधः। यदा ते मर्तो अनु भोगमानड्वसो दधानो मतिभिः सुजात ॥२॥ अग्निं मन्ये पितरमग्निमापिमग्निं भ्रातरं सदमित्सखायं। अग्नेरनीकं बृहतः संपर्यं दिवि शुक्रं यजतं सूर्यस्य ॥३॥ सिधा अग्ने धियो असे सनुचीर्य चायसे दम आ नित्यहोता। ऋतावा स रोहिदश्वः पुरुक्षुर्द्युभिरस्मा अहभिर्वाममस्तु ॥४॥ द्युभिर्हितं मित्रमिव प्रयोगं प्रत्नमृत्विजमध्वरस्य जारं। बाहुभ्यामग्निमायवोऽजनंत विश्पतिं होतारं न्यसादयंत ॥५॥ स्वयं यजस्व दिवि देव देवान्किं ते पाकः कृणवदप्रचेताः। यथायजं ऋतुभिर्देव देवानेवा यजस्व तन्वं सुजात ॥६॥ भवा नो अग्नेऽवितोत गोपा भवा वयस्कृदुत नो वयोधाः। रास्वा च नः सुमहो हव्यदातिं चास्योत नस्तन्वोऽप्रयुच्छन् ॥७॥२॥

॥ ८ ॥ १-९ विश्वामित्रस्त्वाष्ट्रः ॥ १-६ अग्निः। ७-९ इंद्रः ॥ त्रिष्टुप् ॥

॥ ८ ॥ प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति। दिवश्चिदंताँ उपमाँ उदानळपामुपस्थे महिषो ववर्ध ॥१॥ सुमोद् गभौ वृषभः ककुद्मानसेमा वत्सः शिमीवाँ अरावीत्। स देवतात्युद्यतानि कृण्वन्त्स्वेषु क्षयेषु प्रथमो जिगाति ॥२॥ आ यो मूर्धानं पित्रोरजभ्य न्यध्वरे दधिरे सूरो अर्णः। अस्य पत्मन्नरुषीरश्वबुध्ना ऋतस्य योनौ तन्वो जुषंत ॥३॥ उपउपो हि वसो अयमेपि त्वं यमयोरभवो विभावा। ऋतायं सप्त दधिषे पदानि जनयन्मित्रं तन्वे स्वायै ॥४॥ भुवश्चक्षुर्महः ऋतस्य गोपा भुवो वरुणो यद्धताय वेषि। भुवो अपां नपाज्जातवेदो भुवो दूतो यस्य हव्यं जुजोषः ॥५॥३॥ भुवो

॥१॥ इमाः अग्ने मतयः तुभ्यं जाताः गोभिः अश्वैः अभि गृणंति राधः यदा ते मर्तः अनुभोगं आनट् वसो दधानः मतिऽभिः सुऽजात ॥२॥ अग्निं मन्ये पितरं अग्निं आपिं अग्निं भ्रातरं सदं इत् सखायं अग्नेः अनीकं बृहतः सपर्यं दिवि शुक्रं यजतं सूर्यस्य ॥३॥ सिध्राः अग्ने धियः असे सनुचीः यं वायसे दमे आ नित्यऽहोता ऋतऽवा सः रोहितऽअश्वः पुरुऽक्षुः द्युऽभिः अस्मे अहंऽभिः वामं अस्तु ॥४॥ द्युऽभिः हितं मित्रंऽइव प्रऽयोगं प्रत्नं ऋत्विजं अध्वरस्य जारं बाहुऽभ्यां अग्निं आयवः अजनंत विक्षु होतारं निऽसादयंत ॥५॥ स्वयं यजस्व दिवि देव देवान् किं ते पाकः कृणवत् अप्रंऽचेताः यथा अयजः ऋतुऽभिः देव देवान् एव यजस्व तन्वं सुऽजात ॥६॥ भव नः अग्ने अविता उत गोपाः भव वयःऽकृत् उत नः वयःऽधाः रास्व च नः सुऽमहः हव्यऽदातिं च आस्व उत नः तन्वः अप्रंऽयुच्छन् ॥ ७ ॥ २ ॥

॥८॥ प्र केतुना बृहता याति अग्निः आ रोदसी वृषभः रोरवीति दिवः चित् अंतान् उपऽमान् उत आनट् अपां उपऽस्थे महिषः ववर्ध ॥१॥ सुमोदगभिः वृषभः ककुतऽमान् अस्रेमा वत्सः शिमीऽवान् अरावीत् सः देवऽतातिं उतऽयतानि कृणवन् स्वेषु क्षयेषु प्रथमः जिगाति ॥२॥ आ यः मूर्धानं पित्रोः अरब्ध नि अध्वरे दधिरे सूरः अर्णीः अस्य पत्मन् अरुषीः अश्वऽबुध्नाः ऋतस्य योनौ तन्वः जुषंत ॥३॥ उपःऽउपः हि वसो अयं एषि त्वं यमयोः अभवः विभाऽवा ऋताय सप्त दधिषे पदानि जनयन् मित्रं तन्वे स्वायै ॥४॥ भुवः चक्षुः महः ऋतस्य गोपाः भुवः वरुणः यत् ऋतायते अपिः भुवः अपां नपात् जातऽवेदः भुवः दूतः यस्य हव्यं जुजोषः ॥५॥३॥ भुवः

यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः । दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहं ॥ ६ ॥ अस्य वितः क्रतुना वव्रे अन्तरिच्छन्धीतिं पितुरेवैः परस्य । सचस्यमानः पित्रोरुपस्थे जामि ब्रुवाण आयुधानि वेति ॥ ७ ॥ स पित्र्याण्यायुधानि विद्वानिंद्रेषित आप्यो अभ्ययुध्यत । त्रिशीर्षाणं सप्तरश्मिं जघन्वान्त्वाष्ट्रस्य चिन्निः ससृजे त्रितो गाः ॥ ८ ॥ भूरीदिंद्र उदिनक्षंतमोजोऽवाभिनत्सत्यमिंत्वमानं । त्वाष्ट्रस्य चिद्विश्वरूपस्य गोनामाचक्राणस्त्रीणि शीर्षा परा वर्क् ॥ ९ ॥ ४ ॥

॥ ९ ॥ १-९ विश्विरात्त्वाष्ट्रः सिंधुद्वीपो वाम्बरीषः ॥ आपः ॥ १-४, ६ गायत्री । ५ वर्धमाना । ७ प्रतिष्ठा । ८-९ अनुष्टुप् ॥

॥ ९ ॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ १ ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥ २ ॥ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा चनः ॥ ३ ॥ शं नो देवीरभिष्टय आपो भवंतु पीतये । शं योरभि स्रवंतु नः ॥ ४ ॥ ईशाना वार्याणां क्षयंतीश्चर्षणीनां । अपो याचामि भेषजं ॥ ५ ॥ अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा । अग्निं च विश्वशंभुवं ॥ ६ ॥ आपः पृणीत भेषजं वरूथं तन्वे३ मम । ज्योक्च सूर्यं दृशे ॥ ७ ॥ इदमापः प्र वहत यत्किं च दुरितं मयि । यद्वाहमभिदुद्रोह यद्वा शेष उतानृतं ॥ ८ ॥ आपो अद्यान्वचारिषं रसेन समगस्महि । पयस्वानग्न आ गहि तं मा सं सृज वर्चसा ॥ ९ ॥ ५ ॥

॥ १० ॥ १, ३ ५-७, ११ १३ यमी वैवस्वती । २ ४, ८-१०, १२ १४ यमो वैवस्वतः ॥ १, ३, ५-७, ११, १३ यमो वैवस्वत. । २ ४, ८-१० १२, १४ यमी वैवस्वती ॥ त्रिष्टुप् ॥

॥ १० ॥ ओ चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान् । पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दी-

यज्ञस्यं रजसः च नेता यत्रं नियुतऽभिः सचसे शिवाभिः दिवि मूर्धानं दधिषे स्वःऽसां जिह्वां अग्ने चकृषे हव्यऽवाहं ॥६॥ अस्य चितः क्रतुना वव्रे अंतः इच्छन् धीतिं पितुः एवैः परस्य सचस्यमानः पित्र्योः उपऽस्थे जामि ब्रुवाणः आयुधानि वेति ॥७॥ सः पित्र्याणि आयुधानि विद्वान् इंद्रेऽइषितः आप्त्यः अभि अयुध्यत् त्विऽशीपाणः सप्तऽरश्मिं जघन्वान् त्वाष्ट्रस्य चित् निः ससृजे चितः गाः ॥८॥ भूरिं इत् इंद्रः उतऽइत् दधंतं ओजः अवं अभिनत् सत्यऽपतिः मन्यमानं त्वाष्ट्रस्य चित् विश्वऽरूपस्य गोनां आऽचक्राणः चीर्णिं शीर्षा परा वर्क् ॥ ९ ॥ ४ ॥

॥ ९ ॥ आपः हि स्थ मयःऽभुवः ताः नः ऊर्जे दधातन महे रणाय चक्षसे ॥१॥ यः वः शिवऽतमः रसः तस्य भाजयत इह नः उशतीःऽइव मातरः ॥२॥ तस्मै अरं गमाम वः यस्य क्षयाय जिन्वथ आपः जनयथ च नः ॥३॥ शं नः देवीः अभिष्टये आपः भवंतु पीतये शं योः अभि स्रवंतु नः ॥४॥ ईशानाः वार्यांणां क्षयंतीः चर्षणीनां अपः याचामि भेषजं ॥५॥ अपऽसु मे सोमः अब्रवीत् अंतः विश्वानि भेषजा अग्निं च विश्वऽशंभुवं ॥६॥ आपः पृणीत भेषजं वरूथं तन्वे मम ज्योक् च सूर्यं दृशे ॥७॥ इदं आपः प्र वहत यत् किं च दुःऽइतं मयि यत् वा अहं अभिऽदुद्रोह यत् वा शेपे उत अनृतं ॥८॥ आपः अद्य अनु अचारिषं रसेन सं अगस्महि पयस्वान् अग्ने आ गहि तं मा सं सृज वर्चसा ॥ ९ ॥ ५ ॥

॥ १० ॥ द्यौः चित् सखायं सख्या ववृत्यां तिरः पुरु चित् अर्णवं जगन्वान् पितुः नमीतं आ दधीत वेधाः अधि क्षमि प्रऽतरं दी-

यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः। दिवि मूर्धानं दधिषे स्वर्षा जिह्वामग्ने चकृषे हव्यवाहं ॥६॥ अस्य वितः क्रतुना वृत्रे अन्तरिच्छन्धीतिं पितुरेवैः परस्य। सचस्यमानः पित्रोरुपस्थे जामि ब्रुवाण आयुधानि वेति ॥७॥ स पित्र्याण्यायुधानि विद्वानिन्द्रेषित आप्त्यो अभ्ययुध्यत्। त्रिशीर्षाणं सप्तरश्मिं जघन्वान्त्वाष्ट्रस्य चिन्निः ससृजे त्रितो गाः ॥८॥ भूरीदिन्द्र उदिनक्षन्तमोजोऽवाभिनत्सत्यमिर्मन्यमानं। त्वाष्ट्रस्य चिद्विश्वरूपस्य गोनामाचक्राणस्त्रीणि शीर्षा परा वर्क् ॥९॥४॥

॥ ९ ॥ १-९ त्रिशिरास्त्वाष्ट्रः सिंधुद्वीपो वाबरीषः ॥ आपः ॥ १-४. ६ गायत्री। ५ वर्धमाना। ७ प्रतिष्ठा। ८. ९ अनुष्टुप् ॥

॥९॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे ॥१॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः ॥२॥ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा चनः ॥३॥ शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः ॥४॥ ईशाना वार्याणां क्षयन्तीश्चर्षणीनां। अपो याचामि भेषजं ॥५॥ अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निं च विश्वशंभुवं ॥६॥ आपः पृणीत भेषजं वरूथं तन्वे३ मम। ज्योक्च सूर्यं दृशे ॥७॥ इदमापः प्र वहत यत्किं च दुरितं मयि। यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं ॥८॥ आपो अद्यान्वचारिषं रसेन समगस्महि। पयस्वानग्न आ गहि तं मा सं सृज वर्चसा ॥९॥५॥

॥ १० ॥ १. ३ ५-७. ११ १३ यमी वैवस्वती। २ ४. ८-१० १२. १४ यमो वैवस्वतः ॥ १. ३. ५-७. ११. १३ यमो वैवस्वतः। २ ४. ८-१० १२. १४ यमी वैवस्वती ॥ त्रिष्टुप् ॥

॥ १० ॥ ओ चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान्। पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दी-

यज्ञस्यं रजसः च नेता यत्रं नियुतऽभिः सचसे शिवाभिः दिवि मूर्धानं दधिषे स्वःऽसां जिह्वां अग्ने चकृषे हव्यऽवाहं ॥६॥ अस्य चितः क्रतुना वर्धे अंतः इच्छन् धीतिं पितुः एवैः परस्य सचस्यमानः पित्रोः उपऽस्थे जामि ब्रुवाणः आयुधानि वेति ॥७॥ सः पित्र्याणि आयुधानि विद्वान् इंद्रेऽइषितः आप्त्यः अभि अयुध्यत् चिऽशीर्षाणं सप्तऽरश्मिं जघन्वान् त्वाष्ट्रस्यं चित् निः ससृजे चितः गाः ॥८॥ भूरिऽइत् इंद्रः उतऽइत् नंक्षंतं ओजः अवं अभिनत् सतऽपतिः मन्यमानं त्वाष्ट्रस्यं चित् विश्वऽरूपस्य गोनां आऽचक्राणः चीर्णिं शीर्षा परा वर्क् ॥ ९ ॥ ४ ॥

॥ ९ ॥ आपः हि स्थ मयःऽभुवः ताः नः ऊर्जे दधातन महे रणाय चक्षसे ॥१॥ यः वः शिवऽतमः रसः तस्य भाजयत इह नः उशतीःऽइव मातरः ॥२॥ तस्मै अरं गमाम वः यस्य क्षयाय जिन्वथ आपः जनयथ च नः ॥३॥ शं नः देवीः अभिष्टये आपः भवंतु पीतये शं योः अभि स्रवंतु नः ॥४॥ ईशानाः वार्याणां क्षयंतीः चर्षणीनां अपः याचामि भेषजं ॥५॥ अपःऽसु मे सोमः अब्रवीत् अंतः विश्वानि भेषजा अग्निं च विश्वऽशंभुवं ॥६॥ आपः पृणीत भेषजं वरूथं तन्वे मम ज्योक् च सूर्यं दृशे ॥७॥ इदं आपः प्र वहत यत् किं च दुरितं मयि यत् वा अहं अभिऽदुद्रोह यत् वा शेपे उत अनृतं वाऽदेवी अग्नेः अहं अनु अचारिषं रसेन सं अगस्महि तन्वा सं पृक्षत त्वचा तं मा सं सृज वर्चसा ॥ ९ ॥ ५ ॥

ध्यानः ॥१॥ न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भवाति। महस्पुत्रासो असुरस्य वीरा दिवो धर्तारं उर्विया परि ख्यन् ॥२॥ उशंति घा ते अमृतास एतदेकस्य चित्त्यजसं मर्त्यस्य। नि ते मनो मनसि धाय्यसे जन्युः पतिस्तन्वमा विविश्याः ॥३॥ न यत्पुरा चकृमा कद्ध नूनमृता वदंतो अनृतं रपेम। गंधर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि तन्नौ ॥४॥ गर्भे नु नौ जनिता दंपती कर्देवस्त्वष्टा सविता विश्वरूपः। नकिरस्य प्र मिनंति व्रतानि वेद नावस्य पृथिवी उत द्यौः ॥५॥६॥ को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत्। बृहन्मित्रस्य वरुणस्य धाम कदु ब्रव आहनो वीच्या नॄन् ॥६॥ यमस्य मा यम्यं१ काम आगन्त्समाने योनौ सहशेय्याय। जायेव पत्ये तन्वं रिरिच्यां वि चिद्वृहेव रथ्येव चक्रा ॥७॥ न तिष्ठंति न नि मिषंत्येते देवानां स्पश इह ये चरंति। अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा ॥८॥ रात्रीभिरस्मा अहभिर्दशस्येत्सूर्यस्य चक्षुर्मुहुरुन्मिमीयात्। दिवा पृथिव्या मिथुना सबंधू यमीर्यमस्य विभृयादजामि ॥९॥ आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि। उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ॥१०॥७॥ किं भ्रातासद्यदनाथं भवाति किमु स्वसा यन्निर्ऋतिर्निगच्छात्। काममूता बह्वेतद्रपामि तन्वा मे तन्वं१ सं पिपृग्धि ॥११॥ न वा उ ते तन्वा तन्वं१ सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात्। अन्येन मत्प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ॥१२॥ वतो वतासि यम नैव ते मनो हृदयं चाविदाम। अन्या किल त्वां कक्ष्येव

ध्यानः॥१॥ न ते सखा सख्यं वष्टि एतत् सऽलक्ष्मा यत् विषुऽरूपा भवाति महः पुत्रासः असुरस्य वीराः दिवः धर्तारः उर्विया परि ख्यन् ॥२॥ उशंति घ ते अमृतासः एतत् एकस्य चित् त्यजसं मर्त्यस्य नि ते मनः मनसि धायि अस्से जन्युः पतिः तन्वं आ विविश्याः॥३॥ न यत् पुरा चकृम कत् ह नूनं ऋता वदंतः अनृतं रपेम गंधर्वः अप्सु अप्या च योषा सा नः नाभिः परमं जामि तत् नौ॥४॥ गर्भे नु नौ जनिता दंपती कः देवः त्वष्टा सविता विश्वऽरूपः नकिः अस्य प्र मिनंति व्रतानि वेद नौ अस्य पृथिवी उत द्यौः॥५॥६॥ कः अस्य वेद प्रथमस्य अह्नः कः ईं ददर्श कः इह प्र वोचत् बृहत् मित्रस्य वरुणस्य धाम कत् ऊं ब्रुवः आहनः वीच्या नॄन् ॥६॥ यमस्य मा यम्यं कामः आ अगन् समाने योनौ सहऽशेय्याय जायाऽइव पत्ये तन्वं रिरिच्यां वि चित् वृहेव रथ्याऽइव चक्रा॥७॥ न तिष्ठंति न नि मिषंति एते देवानां स्पशः इह ये चरंति अन्येन मत् आहनः याहि तूयं तेन वि वृह रथ्याऽइव चक्रा॥८॥ रात्रीभिः अस्मे अहऽभिः दशस्येत् सूर्यस्य चक्षुः मुहुः उत मिमीयात् दिवा पृथिव्या मिथुना सऽबंधू यमीः यमस्य विभृयात् अजामि॥९॥ आ घ ता गच्छान् उतऽतरा युगानि यत्र जामयः कृणवन् अजामि उप बर्बृहि वृषभाय बाहुं अन्यं इच्छस्व सुऽभगे पतिं मत्॥१०॥७॥ किं भ्रातासत् यत् अनाथं भवाति किं ऊं स्वसा यत् निःऽऋतिः निऽगच्छात् कामंऽमूता बह्वे एतत् रपामि तन्वा मे तन्वं सं पिपृग्धि॥११॥ न वै ऊं ते तन्वा तन्वं सं पपृच्यां पापं आहुः यः स्वसारं निऽगच्छात् अन्येनं मत् प्रऽमुदः कल्पयस्व न ते भ्राता सुऽभगे वष्टि एतत्॥१२॥ वतः वत सि यमन एव ते मनः हृदयं च अविदाम अन्या किल त्वां कक्ष्याऽइव

युक्तं परि ष्वजाते लिबुजेव वृक्षं ॥१३॥ अन्यमू षु त्वं यंम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षं । तस्यं वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्रां ॥ १४ ॥ ८ ॥

॥ ११ ॥ १-९ हविर्धान आंगिः ॥ ऋषिः ॥ १-६ जगती । ७-९ त्रिष्टुप् ॥

॥ ११ ॥ वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदांभ्यः । विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजतु यज्ञियाँ ऋतून ॥१॥ रपन्नंधवीरिण्या च योषणा नदस्य नादे परि पातु मे मनः । इष्टस्य मध्ये अदितिर्नि धातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति ॥२॥ सो चिन्नु भद्रा क्षुमती यशस्त्युषा उवास मनवे स्वर्वती । यदीमुशंतमुशतामनु क्रतुमग्निं होतारं विदथाय जीजनन् ॥३॥ अध त्यं दूतं विभ्वं विचक्षणं विराभरदिषितः श्येनो अध्वरे । यदी विशो वृणते दस्ममार्यो अग्निं होतारमध धीरजायत ॥४॥ सदांसि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः । विप्रस्य वा यच्छशमान उक्थ्यं१वाजं सस्वाँ उपयासि भूरिभिः ॥५॥९॥ उदीरय पितरा जार आ भगमियक्षति हयतो हूत इष्यति । विवक्ति वह्निः स्वपस्यते मखस्त्विषते असुरो वेपते मती ॥ ६ ॥ यस्ते अग्ने सुमतिं मर्तो अक्षत्सहसः सूनो अति स प्र शृण्वे । इषं दधानो वहमानो अश्विरा स द्युमाँ अमवान्भूषति द्यून ॥ ७ ॥ यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र । रत्ना च यद्विभजासि स्वधावो भागं नो अत्र वसुमंतं वीतात ॥ ८ ॥ श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रविलुं । आ नो वह रोदसी देवपुत्रे माकिर्देवानामपभूरिह स्याः ॥ ९ ॥ १० ॥

युक्तं परि स्वजाते लिबुजाऽइव वृक्षं॥१३॥ अन्यं जुं सु त्वं यमि अन्यः जुं त्वां परि स्वजाते लिबुजाऽइव वृक्षं तस्य वा त्वं मनः इच्छ सः वा तवं अधं कृणुष्व संऽविदं सुऽभद्रां॥१४॥८॥

॥११॥ वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वः अदितेः अदाभ्यः विश्वं सः वेद वरुणः यथा धिया सः यज्ञियः यजतु यज्ञियान् ऋतून॥१॥ रयंत गंधर्वीः अप्सां च योषंणा नदस्य नादे परि पातु मे मनः इष्टस्य मध्ये अदितिः नि धातु नः भ्राता नः ज्येष्ठः प्रथमः वि वोचति॥२॥ सो चित नु भद्रा क्षुऽमती यशस्वती उषाः उवास मनवे स्वःऽवती यत ईं उशंतं उशतां अनु क्रतुं अग्निं होतारं विदथाय जीजनन॥३॥ अधं त्यं दूसं विऽभ्वं विऽचक्षणं विः आ अभरत इषितः श्येनः अध्वरे यदि विशेः वृणते दसं आर्यः अग्निं होतारं अध धीः अजायत॥४॥ सदां असि रण्वः यवसाऽइव पुष्यते होत्राभिः अग्ने मनुषः सुऽअध्वरः विप्रस्य वा यत शशमानः उक्थ्यं वाजं ससऽवान उपऽयासि भूरिऽभिः॥५॥९॥ उत ईरय पितरा जारः आ भगं इयक्षति हुयेतः हृत्तः इष्यति विवक्ति वह्निः सुऽअपस्यते मखः तविष्यते असुरः वेपते मती॥६॥ यः ते अग्ने सुऽमतिं मतेः अक्षत सहसः सूनो अति सः मर्तान् पृणे इषं दधानः वहमानः अश्वैः आ सः क्षुऽमान् अमऽवान भूषति द्यून॥७॥ यत अग्ने एषा संऽइतिः भवाति देवी देवेषु यजता यजत्र ऋता च यत विऽभजासि स्वधाऽवः भागं नः अत्र वसुऽमंतं वीतात॥८॥ क्षुधि नः अग्ने सदने सुऽअस्मे युक्ष्व रथे अमृतस्य द्रविलुं आ नः वह रोदसी देवऽपुत्रे मा किः देवानां अप भूः इह स्याः॥९॥१०॥

॥ १२ ॥ १-९ हविर्धान आंगिः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥१२॥ द्यावा ह क्षामा प्रथमे ऋतेनाभिश्रावे भवतः सत्यवाचा। देवो यन्मर्तान्यजथाय कृण्वन्त्सीदद्धोता मन्द्रः स्वमसुं यन् ॥१॥ देवो देवान्परिभूर्ऋतेन वहा नो हव्यं प्रथमश्चिकित्वान्। धूमकेतुः समिधा भाऋजीको मन्द्रो होता नित्यो वाचा यजीयान्॥२॥ स्वावृग्देवस्यामृतं यदी गोरतो जातासो धारयंत उर्वी। विश्वे देवा अनु तत्ते यजुर्गुर्दुहे यदेनी दिव्यं घृतं वाः ॥३॥ अचोमि वां वर्धायापो घृतस्नू द्यावाभूमी शृणुतं रोदसी मे। अहा यद्वावोऽसुनीतिमयन्मध्वा नो अत्र पितरा शिशीतां ॥४॥ किं स्विन्नो राजा जगृहे कदस्यातिं व्रतं चकृमा को वि वेद। मित्रश्चिद्धि ष्मा जुहुराणो देवाञ्छ्लोको न यातामपि वाजो अस्ति ॥५॥११॥ दुर्मन्वत्रामृतस्य नाम सलक्ष्मा यद्विषुरूपा भवाति। समस्य यो मनवते सुमंतये तमृष्व पाह्यप्रयुच्छन् ॥६॥ यस्मिन्देवा विदथे मादयंते विवस्वतः सदने धारयंते। सूर्ये ज्योतिरदधुर्मास्य१कून्परि द्योतनिं चरतो अजस्रा ॥७॥ यस्मिन्देवा मन्मनि संचरण्यपीच्ये३न वयमस्य विद्म। मित्रो नो अत्रादितिरनागान्त्सविता देवो वरुणाय वोचत् ॥८॥ शुधी नो अग्ने सदने सधस्थे युक्ष्वा रथमृतस्य द्रवित्नुं। आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥९॥१२॥

॥ १३ ॥ १-५ विश्वसादित्यः ॥ हविर्धाने ॥ १-४ त्रिष्टुप्। ५ जगती ॥

॥१३॥ युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः। शृण्वंतु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥१॥ यमे इव यतमाने यदैतं प्र वां भरन्मानुषा देवयंतः। आ सीदतं स्वमु लोकं विदाने स्वास्त्ये भवतमिंदवे नः

॥१२॥ द्यावा॑ ह॒ द्यामा॑ प्रथ॒मे॑ ऋ॒तेन॑ अ॒भि॒ऽश्रा॒वे भ॑वतः सत्य॒-ऽवा॑चा॒ दे॒वः यत् मर्ता॑न् य॒ज॒था॒य कृ॒ण॒न् सीद॑त् होता॑ प्र॒त्यङ् स्वं अस॑दं॒ यन्॥१॥ दे॒वः दे॒वान् प॒रि॒ऽभूः ऋ॒तेन॑ वह॑ नः॒ ह॒व्यं प्र॒थ॒मः चि॒-कि॒त्वान् धू॒मऽके॑तुः सं॒ऽइ॒धा॒ भा॒ऽऋ॑ञ्जीकः मं॒द्रः होता॑ नित्यः वा॒चा यजी॑यान्॥२॥ स्वावृ॑क् दे॒वस्य॑ अ॒मृत॑ं यदिं गोः ऋ॒तः जा॒-ना॒सः धा॒र॒य॒न्ते॒ उ॒र्वी॑ विश्वे॑ दे॒वाः अनु॑ तत् ते॒ य॒जुः॒ गुः दु॒हे॒ यत् एनी॑ दि॒व्यं घृ॒तं वाः॰॥३॥ अर्चा॑मि वां॒ वर्धा॑य अ॒पः घृ॒तऽस्नू॰ द्यावा॑भूमी॑ शृ॒णु॒तं॒ रो॒द॒सी॑ मे॒ अहा॑ यत् द्यावः॑ अस॑ुऽनीतिं॒ अय॑न् मध्वा॑ नः॒ अत्रं॑ पितरा॑ शि॒शी॒ता॒॥४॥ किं स्वि॑त् नः॒ राजा॑ जगृहे॒ कत् अ॒स्य॒ अति॑ व्र॒तं च॒कृ॒म॒ कः वि वे॒द॒ मि॒त्रः चि॒त् हि स्म॒ जु॒हु॒रा॒णः दे॒वान् ष्ठोकः॑ न या॒तां अपि॑ वाजः॑ अस्ति॑॥५॥११॥ दुः॒ऽमंतु॑ अत्र॑ अ॒मृत॑स्य नाम॑ स॒ऽलक्ष्मा॑ यत् वि॒षु॒ऽरूपा॑ भवा॑ति॒ यु॒मस्य॑ यः म॒न॒वते॑ सु॒ऽमंतु॑ अ॒ग्ने॒ तं ऋ॒ष्व॒ पा॒हि॒ अप्र॑ऽयुच्छन्॥६॥ यस्मि॑न् दे॒वाः वि॒दथे॑ मा॒द॒यं॒ते॒ वि॒वस्व॑तः सद॑ने धा॒र॒यं॒ते॒ सूर्ये॑ ज्योतिः॑ अ॒द॒धुः॒ मा॒सि॒ अक्तू॑न् परि॑ द्योत॒निं॒ च॒र॒तः॒ अज॑स्रा॥७॥ यस्मि॑न् दे॒वाः मन्म॑नि सं॒ऽच॒रं॒ति॒ अ॒पी॒च्ये॑ न वयं॑ अ॒स्य॒ वि॒द्म॒ मि॒त्रः नः॒ अत्र॑ अदितिः॑ अ॒ना॒गान् स॒विता॑ दे॒वः व॒रु॒णा॒य॒ वो॒च॒त॒॥८॥ शृ॒धि नः॒ अ॒ग्ने॒ सद॑ने सध॒ऽस्थे॑ यु॒क्ष्व॒ रथं॑ अ॒मृत॑स्य द्रवि॒त्नुं॒ आ नः॒ व॒ह॒ रो॒द॒सी॑ दे॒व॒ऽपु॒त्रे॰ मा॒किः॒ दे॒वाना॑ं अप॑ भूः इ॒ह स्याः॑॥९॥१२॥

॥१३॥ युजे॑ वां॒ ब्रह्म॑ पू॒र्व्यं॒ नमः॑ऽभिः॒ वि श्लो॑कः॑ ए॒तु॒ प॒थ्या॑ऽइव॒ सूरेः॑ शृ॒ण्वंतु॑ विश्वे॑ अ॒मृत॑स्य पु॒त्राः॒ आ ये धामा॑नि दि॒व्यानि॑ त॒स्थुः॒॥१॥ यमे॑ऽइव॰ यत॑माने॑ यत् ऐतं॑ प्र वां॑ भ॒र॒न् मानु॑षाः दे॒व॒ऽय॒तः॒ आ सी॒द॒तं॒ स्वं॑ ऊं॒ लो॒कं॒ विदा॑ने॑ सु॒ऽआ॒स॒स्थे॰ भ॒व॒तं॒ इं॒दवे॑ नः॒

॥२॥ पंचं पदानि रुपो अन्वरोहं चतुष्पदीमन्वेमि व्रतेन। अक्षरेण प्रति मिम एतामृतस्य नाभावधि सं पुनामि॥३॥ देवेभ्यः कम्-वृणीत मृत्युं प्रजायै कममृतं नावृणीत। बृहस्पतिं यज्ञमकृण्वत ऋषिं प्रियां यमस्तन्वं१प्रारिरेचीत्॥४॥ सप्त क्षरंति शिशवे मरुत्वते पित्रे पुत्रासो अप्यवीवतन्नृतं। उभे इदस्योभयस्य राजत उभे यंतेते उभयस्य पुष्यतः॥५॥१३॥

॥१४॥१-१६ यम.॥ १-५.१३-१६ यमः। ६ लिंगोक्तदेवताः। ७-९ लिंगोक्तदेवताः पितरो वा। १०-१२ त्र्यानी॥ १-१२ त्रिष्टुप्। १३ १४.१६ अनुष्टुप्। १५ बृहती॥

॥१४॥ परेयिवांसं प्रवतो महीरनु बहुभ्यः पंथामनुपस्पशानं। वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य॥१॥ यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ। यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्याऽअनु स्वाः॥२॥ मातली कव्यैर्यमो अंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः। यांश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदंति॥३॥ इमं यम प्रस्तरमा हि सीदांगिरोभिः पितृभिः संविदानः। आ त्वा मंत्राः कविशस्ता वहंत्वेना राजन्हविषा मादयस्व॥४॥ अंगिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व। विवस्वंतं हुवे यः पिता तेऽस्मिन्यज्ञे बर्हिष्या निषद्य॥५॥१४॥ अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः। तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम॥६॥ प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेयुः। उभा राजाना स्वधया मदंता यमं पश्यासि वरुणं च देवं॥७॥ सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन्। हित्वायावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चाः

॥ २ ॥ पंचं पदानि रुपः अनु आरोहं चतुंःऽपदी अनु एमि व्रतेनं अक्षरेण प्रति मिमे एतां ऋतस्य नाभौ अधि सं पुनामि ॥ ३ ॥ देवेभ्यः कं अवृणीत मृत्युं प्रऽजायै कं अमृतं न अवृणीत बृहस्पतिं यज्ञं अकृण्वत ऋषिं प्रियां यमः तन्वं प्र अरिरिचीत ॥४॥ सप्त क्षरंति शिशवे मरुत्वते पित्रे पुत्रासः अपि अवीवतन् क्षतं उभे इति अस्य उभयस्य राजतः उभे यतेते उभयस्य पुष्यतः ॥ ५ ॥ १३ ॥

॥१४॥ परेयिऽवांसं प्रऽवतः महीः अनु बहुऽभ्यः पंथां अनुऽपस्पशानं वैवस्वतं संऽगमनं जनानां यमं राजानं हविषा दुवस्य ॥१॥ यमः नः गातुं प्रथमः विवेद नैषा गव्यूतिः अपऽभर्तवै ऊं यत्र नः पूर्वे पितरः पराऽईयुः एना जज्ञानाः पथ्याः अनु स्वाः ॥२॥ मातली कव्यैः यमः अंगिरःऽभिः बृहस्पतिः ऋक्वऽभिः ववृधानः यान् च देवाः ववृधुः ये च देवान् स्वाहा अन्ये स्वधया अन्ये मदंति ॥३॥ इमं यम प्रऽस्तरं आ हि सीद अंगिरःऽभिः पितृऽभिः संऽविदानः आ त्वा मंत्राः कविऽशस्ताः वहंतु एना राजन् हविषा मादयस्व ॥४॥ अंगिरःऽभिः आ गहि यज्ञियेभिः यमं वैरूपैः इह मादयस्व विवस्वंतं हुवे यः पिता ते अस्मिन् यज्ञे बर्हिषि आ निऽसद्य ॥५॥१४॥ अंगिरसः नः पितरः नवऽग्वाः अथर्वाणः भृगवः सोम्यासः तेषां वयं सुऽमतौ यज्ञियानां अपि भद्रे सौमनसे स्याम ॥६॥ प्रऽइहि प्रऽइहि पथिऽभिः पूर्वेभिः यत्र नः पूर्वे पितरः पराऽईयुः उभा राजाना स्वधया मदंता यमं पश्यासि वरुणं च देवं ॥७॥ सं गच्छस्व पितृऽभिः संयमेन इष्टापूर्तेन परमे विऽओमन् हित्वाय अवद्यं पुनः अस्तं आ इहि सं गच्छस्व तन्वा सुऽवर्चाः

॥ ८ ॥ अपेत॒ वीत॒ वि च॑ सर्पतातो॒ऽस्मा ए॒तं पि॒तरो॑ लो॒क-मक्र॑न । अहो॑भिर॒द्भिर॒क्तुभि॒र्व्यक्तं॑ यमो॑ ददा॒त्यव॒सानम॑स्मै ॥ ९ ॥ अति॑ द्रव सारमेयौ श्वानौ॑ चतुर॒क्षौ श॒बलौ॑ साधु॒ना प॒था। अथा॑ पितॄ॒न्त्सुवि॒दत्राँ॑ उपेहि य॒मेन॒ ये स॑ध॒मादं॒ मद॑न्ति ॥ १० ॥ १५ ॥ यौ ते॒ श्वानौ॑ यम रक्षि॒तारौ॑ चतुर॒क्षौ प॑थि॒रक्षी॑ नृ॒चक्ष॑सौ । ताभ्या॑मेनं॒ परि॑ देहि राजन्स्व॒स्ति चा॑स्मा अ-नमी॒वं च॑ धेहि ॥ ११ ॥ उरू॒णसावसुतृपा॑ उदुंब॒लौ य॒मस्य॑ दू॒तौ च॑रतो॒ जना॑ँ अनु । ताव॒स्मभ्यं॑ दृ॒शये॒ सूर्या॑य॒ पुनर्दा॑ता-मसु॒मद्ये॑ह भ॒द्रं ॥ १२ ॥ य॒माय॒ सोमं॑ सुनुत य॒माय॑ जुहुता ह॒विः । यमं ह॑ य॒ज्ञो ग॑च्छत्य॒ग्निदू॑तो॒ अरं॑कृतः ॥ १३ ॥ य॒माय॑ घृ॒तव॑द्ध॒विर्जु॑होत॒ प्र च॑ तिष्ठत । स नो॑ दे॒वेष्वा य॑मद्दी॒र्घमायुः॑ प्र जी॒वसे॑ ॥ १४ ॥ य॒माय॒ मधु॑मत्तमं॒ राज्ञे॑ ह॒व्यं जु॑होतन । इदं नम॒ ऋषि॑भ्यः पू॒र्वजे॑भ्यः पू॒र्वेभ्यः प॑थि॒कृद्भ्यः॑ ॥ १५ ॥ चि॒र्क॒दुके॑भिः पतति॒ पक्व॑मी॒रय॑मिद्गृहत्। चि॒ष्टुग्गा॑य॒त्री छंदां॑सि॒ सर्वा॒ ता य॒म आहि॑ता ॥ १६ ॥ १६ ॥

॥ १५ ॥ १-१४ श्वानौ यामायनः ॥ पितरः ॥ १-१०, १२-१४ त्रिष्टुप् । ११ जगती ॥

॥ १५ ॥ उदी॑रतामवर॒ उत्परा॑स॒ उन्म॑ध्य॒माः पि॒तरः॑ सो-म्यासः॑ । असुं॑ य ई॒युर॑वृ॒का ऋ॑तज्ञास्ते नो॑ऽवन्तु पि॒तरो॒ हवे॑षु ॥ १ ॥ इ॒दं पि॒तृभ्यो॒ नमो॑ अस्त्व॒द्य ये पूर्वा॑सो॒ य उप॑रास ई॒युः । ये पार्थि॑वे॒ रज॑स्या नि॒षत्ता॒ ये वा॑ नू॒नं सु॑वृ॒जना॑सु वि॒क्षु ॥ २ ॥ आहं पि॒तॄन्त्सुवि॒दत्राँ॑ अवित्सि॒ नपा॑तं च वि॒क्रम॑णं च॒ विष्णोः॑ । ब॒र्हि॒षदो॒ ये स्व॒धया॑ सु॒तस्य॒ भज॑न्त पि॒त्वस्त इ॑हाग-मिष्ठाः ॥ ३ ॥ बर्हिषदः पितर ऊत्य॒र्वागि॒मा वो॑ ह॒व्या च॑कृमा जुषध्वं । त आ ग॒ताव॑सा॒ शंत॑मे॒नाथा॑ नः॒ शं योर॑पो दधात

॥८॥ अपं इत् वि इत् वि च सर्पत अतः अस्मै एतं पितरः लोकं अक्रन् अहःऽभिः अक्तुऽभिः विऽअक्तं यमः ददाति अवऽसानं अस्मै ॥९॥ अति द्रव सारमेयौ श्वानौ चतुःऽअक्षौ शबलौ साधुना पथा अथ पितॄन् सुऽविदत्रान् उप इहि यमेन ये सधऽमादं मदन्ति ॥१०॥१५॥ यौ ते श्वानौ यम रक्षितारौ चतुःऽअक्षौ पथिऽरक्षी॰ नृऽचक्षसौ ताभ्यां एनं परि देहि राजन् स्वस्ति च अस्मै अनमीवं च धेहि॥११॥ उरुऽनसौ असुऽतृपौ उदुंबलौ यमस्य दूतौ चरतः जनान् अनु तौ अस्मभ्यं दृशये सूर्याय पुनः दातां असुं अद्य इह भद्रं॥१२॥ यमाय सोमं सुनुत यमाय जुहुत हविः यमं ह यज्ञः गच्छति अग्निऽदूतः अरंऽकृतः॥१३॥ यमाय घृतऽवत् हविः जुहोत प्र च तिष्ठत सः नः देवेषु आ यमत् दीर्घं आयुः प्र जीवसे॥१४॥ यमाय मधुमतऽतमं राज्ञे हव्यं जुहोतन इदं नमः ऋषिऽभ्यः पूर्वऽजेभ्यः पूर्वेभ्यः पथिकृत्ऽभ्यः॥१५॥ चिऽकित्वे मनीषा काऽमेभ्यः पतति पर्उवीः एकं इत् बृहत् चिऽस्तुप् गायत्री छंदांसि सर्वा ता यमे आऽहिता ॥ १६ ॥ १६ ॥

॥१५॥ उत ईरतां अवरे उत परासः उत मध्यमाः पितरः सोम्यासः असुं ये ईयुः अवृकाः ऋतऽज्ञाः ते नः अवंतु पितरः हवेषु ॥१॥ इदं पितृऽभ्यः नमः अस्तु अद्य ये पूर्वासः ये उपरासः ईयुः ये पार्थिवे रजसि आ निऽसत्ताः ये वा नूनं सुऽवृजनासु विक्षु॥२॥ आ अहं पितॄन् सुऽविदत्रान् अवित्सि नपातं च विऽक्रमणं च विष्णोः बर्हिऽसदः ये स्वधया सुतस्य भजंत पितरः ते इह आऽगमिष्ठाः॥३॥ बर्हिऽसदः पितरः ऊती अवाक् इमा वः हव्या चकृम जुषध्वं ते आ गत अवसा शंतमेन अथ नः शं योः अरपः दधात

॥ ४ ॥ उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु । त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥५॥१७॥ आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे । मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता करांम ॥ ६ ॥ आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय । पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥७॥ ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः । तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥८॥ ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः । आग्ने याहि सुविदत्रेभिरर्वाङ् सत्यैः कव्यैः पितृभिर्घर्मसद्भिः ॥९॥ ये सत्यासो हविरदो हविष्पा इंद्रेण देवैः सरथं दधानाः । अग्ने याहि सहस्रं देववंदैः परैः पूर्वैः पितृभिर्घर्मसद्भिः ॥१०॥१८॥ अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः । अत्ता हवींषि प्रयतानि बर्हिषि किं रयिं सर्ववीरं दधातन ॥११॥ त्वमंग ईळितो जातवेदोऽवाड्व्यानि सुरभीणि कृत्वी । प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥१२॥ ये चेह पितरो ये च नेह यांश्च विद्म याँ उ च न प्रविद्म । त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व ॥१३॥ ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयंते । तेभिः स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयस्व ॥ १४ ॥ १९ ॥

॥ १६ ॥ १–१४ दमनो यामायनः ॥ अग्निः ॥ १–१० त्रिष्टुप् । ११–१४ अनुष्टुप् ॥

॥१६॥ मैनमग्ने वि दहो माभि शोचो मास्य त्वचं चिक्षिपो मा शरीरं । यदा शृतं कृणवो जातवेदोऽथेमेनं प्र हिणु-

॥४॥ उपऽहूताः पितरः सोम्यासः बर्हिष्येषु निऽधिषु प्रियेषु ते आ गमन्तु ते इह श्रुवन्तु अधि ब्रुवन्तु ते अवन्तु अस्मान् ॥५॥१७॥ आऽअच्या जानु दक्षिणतः निऽसद्य इमं यज्ञं अभि गृणीत विश्वे मा हिंसिष्ट पितरः केन चित् नः यत् वः आगः पुरुषता करम ॥६॥ आसीनासः अरुणीनाम् उपऽस्थे रयिं धत्त दाशुषे मर्त्याय पुत्रेभ्यः पितरः तस्य वस्वः प्र यच्छत त इह ऊर्जं दधात ॥७॥ ये नः पूर्वे पितरः सोम्यासः अनुऽऊहिरे सोमऽपीथं वसिष्ठाः तेभिः यमः संऽरराणः हवींषि उशन् उशतऽभिः प्रतिऽकामं अत्तु ॥८॥ ये तत्तृषुः देवऽत्रा जेहमानाः होत्राऽविदः स्तोमऽतष्टासः अर्कैः आ अग्ने याहि सुऽविदत्रेभिः अर्वाङ् सत्यैः कव्यैः पितृऽभिः घर्मसत्ऽभिः ॥९॥ ये सत्यासः हविःऽअदः हविःऽपाः इन्द्रेण देवैः सऽरथं दधानाः आ अग्ने याहि सहस्रं देवऽवन्दैः परैः पूर्वैः पितृऽभिः घर्मसत्ऽभिः ॥१०॥१८॥ अग्निऽस्वात्ताः पितरः आ इह गच्छत सदःऽसदः सदत सुऽप्रनीतयः अत्त हवींषि प्रऽयतानि बर्हिषि अथ रयिं सर्वऽवीरं दधातन ॥११॥ त्वं अग्ने ईळितः जातऽवेदः अवाट् हव्यानि सुरभीणि कृत्वी प्र अदाः पितृऽभ्यः स्वधया ते अक्षन् अद्धि त्वं देव प्रऽयता हवींषि ॥१२॥ ये च इह पितरः ये च न इह यान् च विद्म यान् उ च न प्रऽविद्म त्वं वेत्थ यति ते जातऽवेदः स्वधाभिः यज्ञं सुऽकृतं जुषस्व ॥१३॥ ये अग्निऽदग्धाः ये अनग्निऽदग्धाः मध्ये दिवः स्वधया मादयन्ते तेभिः स्वऽराट् असुंऽनीतिं एतां यथाऽवशं तन्वं कल्पयस्व ॥१४॥१९॥

॥१६॥ मा एनं अग्ने वि दहः मा अभि शोचः मा अस्य त्वचं चिक्षिपः मा शरीरं यदा शृतं कृणवः जातऽवेदः अथ ईं एनं प्र हिणु-

तात्पितृभ्यः ॥१॥ घृतं यदा करंसि जातवेदोऽधेमेनं परि दत्तात्पितृभ्यः। यदा गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति ॥२॥ सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा। अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रति तिष्ठा शरीरैः ॥३॥ अजो भागस्तपसा तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः। यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकं ॥४॥ अवं सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः। आयुर्वसान उप यातु शेषः सं गच्छतां तन्वा जातवेदः ॥५॥२०॥ यत्ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः। अग्निष्टद्विश्वादगदं कृणोतु सोमश्च यो ब्राह्मणाँ आविवेश ॥६॥ अग्नेर्वर्म परि गोभिर्व्ययस्व सं प्रोर्णुष्व पीवसा मेदसा च। नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधृग्विधक्ष्यन्परियासमाते ॥७॥ इमममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानां। एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ते ॥८॥ क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः। इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥९॥ यो अग्निः क्रव्यात्प्रविवेश यो गृहमिमं पशून्वितरं जातवेदसं। तं हरामि पितृयज्ञाय देवं स धर्ममिन्वात्परमे सधस्थे ॥१०॥२१॥ यो अग्निः क्रव्यवाहनः पितॄन्यक्षदृतावृधः। प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥११॥ उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि। उशन्नुशत आ वह पितॄन्हविषे अत्तवे ॥१२॥ यं त्वमग्ने समदहस्तमु निर्वापया पुनः। कियांश्चिद्धोहतु माकृतं वज्ञत्कणा ॥१३॥ शीतिके

तात् पितृऽभ्यः ॥१॥ घृतं यदा करसि जातऽवेदः अथ ईं एनं परि दत्तात् पितृऽभ्यः यदा गच्छात्ति असुंऽनीतिं एतां अथ देवानां वशऽनीःभवाति॥२॥ सूर्यं चक्षुःगच्छतु वातं आत्मा द्यां च गच्छ पृथिवीं च धर्मणा अपः वा गच्छ यदि तत्रं ते हितं ओषधीषु प्रतिं तिष्ठ शरीरैः ॥३॥ अजः भागः तपसा तं तपस्व तं ते शोचिः तपतु तं ते अर्चिः याः ते शिवाः तन्वः जातऽवेदः ताभिः वह एनं सुऽकृतां ऊं लोकं॥४॥ अवं सृज पुनः अग्ने पितृऽभ्यः यः ते आऽहुतः चरति स्वधाभिः आयुः वसानः उप वेतु शेषः सं गच्छतां तन्वा जातऽवेदः ॥५॥२०॥ यत् ते कृष्णः शकुनः आऽततोद पिपीलः सर्पः उत वा श्वापदः अग्निः तत् विश्वऽअत् अगदं कृणोतु सोमः च यः ब्राह्मणान् आऽविवेश॥६॥ अग्नेः वर्म परि गोभिः व्ययस्व सं प्र ऊर्णुष्व पीवसा मेदसा च न इत् त्वा धृष्णुः हरसा जर्हृषाणः दधृक् विऽधक्ष्यन् परिऽअंखयाते ॥७॥ इमं अग्ने चमसं मा वि जिह्वरः प्रियः देवानां उत सोम्यानां एषः यः चमसः देवऽपानः तस्मिन् देवाः अमृताः मादयंते ॥८॥ क्रव्यऽअदं अग्निं प्र हिणोमि दूरं यमऽराज्ञः गच्छतु रिप्रऽवाहः इह एव अयं इतरः जातऽवेदाः देवेभ्यः हव्यं वहतु प्रऽजानन्॥९॥ यः अग्निः क्रव्यऽअत् प्रऽविवेश वः गृहं इमं पश्यन् इतरं जातऽवेदसं तं हरामि पितृऽयज्ञाय देवं सः घर्मं इन्वात् परमे सधऽस्थे॥१०॥२१॥ यः अग्निः क्रव्यऽवाहनः पितॄन यक्षत् ऋतऽवृधः प्र इत् ऊं हव्यानि वोचति देवेभ्यः च पितृऽभ्यः आ॥११॥ उशंतः त्वा नि धीमहि उशंतः सं इधीमहि उशन् उशतः आ वह पितॄन् हविषे अत्तवे ॥१२॥ यं त्वं अग्ने समऽअदहः तं ऊं निः वापय पुनः कियांबुं अव रोहतु पाकऽदूर्वा विऽरुल्कशा ॥१३॥ शीतिके

शीतिकावति ह्लादिके ह्लादिकावति । मंडूक्या३सु सं गम इमं स्व१ग्निं हर्षय ॥१४॥२२॥१॥

॥१७॥ १-१४ देवश्रवा यामायनः ॥ १. २ सरण्यूः । ३-६ पूषा । ७-९ सरस्वती । १०.१४ आपः । ११-१३ आपः सोमो वा ॥ १-१२ त्रिष्टुप् । १३ अनुष्टुप्पुरस्ताद्बृहती वा । १४ अनुष्टुप् ॥

॥१७॥ त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति । यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥१॥ अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामददुर्विवस्वते । उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः ॥२॥ पूषा त्वेतश्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः । स त्वेतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥३॥ आयुर्विश्वायुः परि पासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात् । यदास्ते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ॥४॥ पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत् । स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रजानन् ॥५॥२३॥ प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः । उभे अभि प्रियतमे सधस्थे आ च परा च चरति प्रजानन् ॥६॥ सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने । सरस्वतीं सुकृतो अह्वयन्त सरस्वती दाशुषे वार्यं दात् ॥७॥ सरस्वति या सरथं ययाथ स्वधाभिर्देवि पितृभिर्मदन्ती । सहस्रार्घमिळो अत्र भागं रायस्पोषं यजमानेषु धेहि ॥९॥ आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वं हि रिप्रं प्रवहन्ति

शीतिकाऽवति ह्लादिके ह्लादिकाऽवति मंडूक्यां सुसंगमः इमं सु अग्निं हर्षय ॥१४॥२२॥१॥

॥१७॥ त्वष्टा दुहित्रे वहतुं कृणोति इति इदं विश्वं भुवनं सं एति यमस्य माता परिऽउह्यमाना महः जाया विवस्वतः ननाश ॥१॥ अपं अगूहन् अमृतां मर्त्येभ्यः कृत्वी सऽवर्णा अददुः विवस्वते उत अश्विनौ अभरत् यत् तत् आसीत् अजहात् ऊं इति मिथुना सरण्यूः ॥२॥ पूषा त्वा इतः च्यवयतु प्र विद्वान् अनष्टऽपशुः भुवनस्य गोपाः सः त्वा एतेभ्यः परि ददत् पितृऽभ्यः अग्निः देवेभ्यः सुऽविदत्रियेभ्यः ॥३॥ आयुः विश्वऽआयुः परि पासति त्वा पूषा त्वा पातु प्रऽपथे पुरस्तात् यत्रं आसते सुऽकृतः यत्रं ते ययुः तत्रं त्वा देवः सविता दधातु ॥४॥ पूषा इमाः आशाः अनु वेद सर्वाः सः अस्मान् अभयऽतमेन नेषत् स्वस्तिऽदाः आघृणिः सर्वऽवीरः अप्रऽयुच्छन् पुरः एतु प्रऽजानन् ॥५॥२३॥ प्रऽपथे पथां अजनिष्ट पूषा प्रऽपथे दिवः प्रऽपथे पृथिव्याः उभे अभि प्रियऽतमे० सधऽस्थे० आ च परा च चरति प्रऽजानन् ॥६॥ सरस्वतीं देवऽयंतः हवंते सरस्वतीं अध्वरे तायमाने सरस्वतीं सुऽकृतः अह्वयंत सरस्वती दाशुषे वार्यं दात् ॥७॥ सरस्वति या सऽरथं ययाथ स्वधाभिः देवि पितृऽभिः मदंती आऽसद्यं अस्मिन् बर्हिषि मादयस्व अनमीवाः इषः आ धेहि अस्मे ॥८॥ सरस्वतीं यां पितरः हवंते दक्षिणा यज्ञं अभिऽनक्षमाणाः सहस्रऽअर्घं इळः अत्रं भागं रायः पोषं यजमानेषु धेहि ॥९॥ आपः अस्मान् मातरः शुंधयंतु घृतेन नः घृतऽप्वः पुनंतु विश्वं हि रिप्रं प्रऽवहंति

देवीरुदिदाभ्यः शुचिरा पूत एमि ॥१०॥२४॥ द्रप्सश्चस्कंद प्रथमाँ अनु द्यूनिमं च योनिमनु यश्च पूर्वः। समानं योनिमनु संचरंतं द्रप्सं जुहोम्यनु सप्त होत्राः ॥११॥ यस्ते द्रप्सः स्कंदति यस्ते अंशुर्वाहुच्युतो धिषणाया उपस्थात्। अध्वर्योर्वा परि वा यः पविचात्तं ते जुहोमि मनसा वषट्कृतं ॥१२॥ यस्ते द्रप्सः स्कन्दो यस्ते अंशुरवश्च यः परः सुचा। अयं देवो बृहस्पतिः संतं सिंचतु राधसे ॥१३॥ पयस्वतीरोषधयः पयस्वन्मामकं वचः। अपां पयस्वदित्पयस्तेन मा सह शुंधत ॥१४॥२५॥

॥ १८ ॥ १–१४ संकुसुको यामायनः ॥ १–४ मृत्युः । ५ धाता । ६ त्वष्टा । ७–१३ पितृमेधः । १४ पितृमेधः प्रजापतिर्वा ॥ १–१०. १२ त्रिष्टुप् । ११ प्रस्तारपंक्तिः । १३ जगती । १४ अनुष्टुप् ॥

॥१८॥ परं मृत्यो अनु परेहि पंथां यस्ते स्व इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥१॥ मृत्योः पदं योपयंतो यदेत द्राघीय आयुः प्रतरं दधानाः। आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवत यज्ञियासः ॥२॥ इमे जीवा वि मृतैराववृत्रन्नभूद्भद्रा देवहूतिर्नो अद्य। प्रांचो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधानाः ॥३॥ इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतं। शतं जीवंतु शरदः पुरूचीरंतर्मृत्युं दधतां पर्वतेन ॥४॥ यथाहान्यनुपूर्वं भवंति यथ ऋतव ऋतुभिर्यंति साधु। यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषां ॥५॥२६॥ आ रोहतायुर्जरसे वृणाना अनुपूर्वं यतमाना यति ष्ठ। इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करति जीवसे वः ॥६॥ इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा सं विशंतु। अनश्रवोऽनमीवाः सुरत्ना आ रोहंतु जनयो योनि-

देवीः उत इत् आभ्यः शुचिः आ पूतः एमि॥१०॥२४॥ दृप्सः चस्कंद मथ्यमान अनु द्यून् इमं च योनिं अनु यः च पूर्वः समानं योनिं अनु संऽचरंतं दृप्सं जुहोमि अनु सप्त होत्राः ॥११॥ यः ते दृप्सः स्कंदति यः ते अंशुः बाहुऽच्युतः धिषणायाः उपऽस्थात् अध्वर्योः वा परि वा यः पवित्रात् तं ते जुहोमि मनसा वषट्ऽकृतं ॥१२॥ यः ते दृप्सः स्कन्दः यः ते अंशुः अवः च यः मरः सुचा अयं देवः बृहस्पतिः सं तं सिंचतु राधसे ॥१३॥ पयस्वतीः ओषधयः पयस्वत् मामकं वचः अपां पयस्वत् इत् पयः तेन मा सह शुंधत ॥१४॥२५॥

॥१८॥ परैः मृत्यो अनु परा इहि पंथां यः ते स्वः इतरः देवऽयानात् चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रऽजां रिरिषः मा उत वीरान्॥१॥ मृत्योः पदं योपयंतः यत् एतं द्राघीयः आयुः प्रऽतरं दधानाः आऽप्यायमानाः प्रऽजया धनेन शुद्धाः पूताः भवत यज्ञियासः॥२॥ इमे जीवाः वि मृतैः आ अववृत्रन् अभूत भद्रा देवऽहूतिः नः अद्य प्राचैः अगाम नृतये हसाय द्राघीयः आयुः प्रऽतरं दधानाः॥३॥ इमं जीवेभ्यः परिऽधिं दधामि मा एषां नु गात् अपरः अर्थं एतं शतं जीवंतु शरदः पुरूचीः अंतः मृत्युं दधतां पर्वतेन ॥४॥ यथा अहानि अनुऽपूर्वं भवंति यथा ऋतवः ऋतुऽभिः यंति साधु यथा न पूर्वं अपरः जहाति एव धातः आयूंषि कल्पय एषां ॥५॥२६॥ आ रोहत आयुः जरसे वृणानाः अनुऽपूर्वं यतमानाः यतिं स्थ इह वयः सुऽजनिमा सऽजोषाः दीर्घं आयुः करति जीवसे वः॥६॥ इमाः नारीः अविधवाः सुऽपत्नीः आऽअंजनेन सर्पिषा सं विशंतु अनश्रवः अनमीवाः सुऽरत्नाः आ रोहंतु जनयः योनिं

मये ॥७॥ उदीर्ष्वे नार्येभि जीवलोकं गतासुमेतमुप शेष एहि। हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥८॥ धनुर्हस्तादाददानो मृतस्यासे क्षत्राय वर्चसे बलाय। अत्रैव त्वमिह वयं सुवीरा विश्वाः स्पृधो अभिमातीर्जयेम ॥९॥ उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवां। ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात् ॥१०॥२७॥ उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपवञ्चना। माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥११॥ उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम्। ते गृहासो घृतश्चुतो भवन्तु विश्वाहास्मै शरणाः सन्त्वत्र ॥१२॥ उत्ते स्तभ्नामि पृथिवी त्वत्परीमं लोगं निदधन्मो अहं रिषं। एतां स्थूणां पितरो धारयन्तु तेऽत्रा यमः सादना ते मिनोतु ॥१३॥ प्रतीचीने मामहनीष्वाः पर्णमिवा दधुः। प्रतीचीं जघ्नुषो वाचमग्वै रशनया यथा ॥१४॥ २८॥ ६॥

॥ १९ ॥ १–८ मथितो यामायनो भृगुर्वा वार्षणिर्व्यवनो वा भार्गवः ॥ १, २–८ आपो गावो वा। १२, अग्नीषोमौ ॥ १–५, ७, ८, अनुष्टुप्। ६ गायत्री ॥

॥ १९ ॥ नि वर्तध्वं मानु गातासानिसंपक्व रेवतीः। अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिं ॥१॥ पुनरेना नि वर्तय पुनरेना न्या कुरु। इन्द्रं एणा नि यच्छत्वग्निरेना उपाजतु ॥२॥ पुनरेता नि वर्ततामस्मिन्पुष्यंतु गोपती। इहैवाग्ने नि धारयेह तिष्ठतु या रयिः ॥३॥ यन्निर्यानं न्यर्यनं संज्ञानं यत्पुरायणं। आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ॥४॥ य उदानड्व्यर्यनं य उदानट्पुरायणं। आवर्तनं निवर्तनमपि गोपा नि वर्तताम् ॥५॥

अयें॥ ७॥ उत् द्रप्व् नारि अभि जीवऽलोकं गतऽअसुं एतं उप शेपेऽआ इहि हस्तऽग्राभस्य दिधिषोः तवं इदं पत्युः जनिऽत्वं अभि संबभूथ॥ ८॥ धनुः हस्तात् आऽददानः मृतस्य असे क्षत्राय वर्चसे बलाय अत्रं एव त्वं इह वयं सुऽवीराः विश्वाः स्पृधः अभिऽमातीः जयेम॥ ९॥ उप सर्प मातरं भूमिं एतां उरुऽव्यचसं पृथिवीं सुऽशेवां ऊर्णऽम्रदाः युवतिः दक्षिणाऽवते एषा त्वा पातु निःऽऋतेः उपऽस्थात्॥ १०॥ २७॥ उत् स्तभ्नामि पृथिवि मा नि बाधथाः सुऽउपायना अस्मि भव सुऽउपवंचना माता पुत्रं यथा सिचा अभि एनं भूमे ऊर्णुहि॥ ११॥ उतऽस्तभ्नामाना पृथिवी सु निष्टतु सहस्रं मितः उप हि श्रयंतां ते गृहासः घृतऽश्चुतः भवंतु विश्वाहा अस्मै शरणाः संतु अत्रं॥ १२॥ उत् ते स्तभ्नामि पृथिवीं त्वत् परि इमं लोगं निऽदधत् मो अहं रिषं एतां स्यूणां पितरः धारयंतु ते अत्रं यमः सदना ते मिनोतु॥ १३॥ प्रतीचीनं मां अहं निऽद्ध्वाः पर्णऽइव आ दधुः प्रतीचीं जयभ्वाचं अश्वं रथ्यनयां यथा॥ १४॥ २८॥ ६॥

॥ १९॥ नि वर्तध्वं मा अनु गात अस्मान् सिसक्त रेवतीः अमीयोमा पुनःऽवसू अस्मे धारयतं रयिं॥ १॥ पुनः एनाः नि वर्तय पुनः एनाः नि आ कुरु इंद्रः एनाः नि यच्छतु अग्निः एनाः उपऽअजंतु॥ २॥ पुनः एताः नि वर्तंतां अस्मिन् पुष्यंतु गोऽपतौ इह एव अग्ने नि धारय इह तिष्टतु या रयिः॥ ३॥ यत् निऽयानं निऽअयनं संऽज्ञानं यत् पराऽअयनं आऽवर्तनं निऽवर्तनं यः गोपाः अपि तं हुवे॥ ४॥ यः उतऽआनद् विऽअयनं यः उतऽआनद् पराऽअयनं आऽवर्तनं निऽवर्तनं अपि गोपाः नि वर्तंतां॥ ५॥

आ निवर्त नि वर्तय पुनर्नो इंद्र गा देहि। जीवाभिर्भुनजामहै ॥६॥ परि वो विश्वतो दध ऊर्जा घृतेन पयसा। ये देवाः के च यज्ञियास्ते रय्या सं सृजंतु नः॥७॥ आ निवर्तन वर्तय नि निवर्तन वर्तय। भूम्याश्चतस्रः प्रदिशस्ताभ्यं एना नि वर्तय ॥८॥१॥

॥ २० ॥ १-१० विमद ऐंद्रः प्राजापत्यो वा वसुश्रुद्वा वासुक्रः॥ अग्निः॥ १ एकपदा (पाद एव वा शांत्यर्थः)। २ अनुष्टुप्। ३-८ गायत्री। ९ विराट्। १० त्रिष्टुप्॥

॥२०॥ भद्रं नो अपि वातय मनः॥१॥ अग्निमीळे भुजां यविष्ठं शासा मिचं दुधरीतुं। यस्य धर्मन्त्स पेरेनीः सपर्यति मातुरूधः ॥२॥ यमासा कृपनीळं भासाकेतुं वर्धयंति। भ्राजंते अर्णिंदन् ॥३॥ अर्यो विणां गातुरेति प्र यदानड्वो अंतान्। कविरभ्रं दीद्यानः॥४॥ जुषद्व्या मानुषस्योर्ध्वस्तस्यावृभ्वां यज्ञे। मिन्वन्त्सप्त पुर एति ॥५॥ स हि क्षेमो हविर्यज्ञः श्रुष्टीदस्य गातुरेति। अग्निं देवा वासीमंतं ॥६॥२॥ यज्ञासाहं दुव इंऽग्निं पूर्वस्य शेवस्य। अद्रेः सूनुमायुमाहुः ॥७॥ नरो ये के चास्मदा विश्वेत्ते वाम आ स्युः। अग्निं हविषा वर्धतः ॥८॥ कृष्णः श्वेतोऽरुषो यामो अस्य ब्रध्न ऋज्र उत शोणो यशस्वान्। हिरण्यरूपं जनिता जजान ॥९॥ एवा ते अग्ने विमदो मनीषामूर्जो नपादमृतेभिः सजोषाः। गिर आ वक्षत्सुमतीरियान इषमूर्जं सुक्षितिं विश्वमाभाः ॥१०॥३॥

॥ २१ ॥ १-८ विमद ऐंद्रः प्राजापत्यो वा वसुश्रुद्वा वासुक्रः॥ अग्निः॥ आस्तारपंक्तिः॥

॥२१॥ आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे। यज्ञायं स्तीर्णबर्हिषे वि वो मदे शीरं पावकशोचिषं विवक्षसे ॥१॥ त्वामु ते स्वाभुवः शुंभंत्यध्वराधसः। वेति त्वामुपसेचनी वि वो मद ऋजीतिरग्न आहुतिर्विवक्षसे ॥२॥ त्वे धर्माण आ-

आ निऽवर्ते नि वर्तय पुनः नः इंद्र गाः देहि जीवाभिः भुनजामहै ॥६॥ परि वः विश्वतः दधे ऊर्जा घृतेन पयसा ये देवाः के च यज्ञियाः ते रय्या सं सृजंतु नः ॥७॥ आ निऽवर्तन वर्तय नि निऽवर्तन वर्तय भूम्याः चतसृऽदिशः ताभ्यः एनाः नि वर्तय ॥ ८ ॥ १ ॥

॥२०॥ भद्रं नः अपि वातय मनः॥१॥ अग्निं ईळे भुजां यविष्ठं शासा मित्रं दुःऽधरीतुं यस्य धर्मन् स्वःएनीः सपर्यंति मातुः ऊधः ॥२॥ यं आसा कृपऽनीळं भासाऽकेतुं वर्धयंति भाजंते थेणिऽदन् ॥३॥ अर्यः विशां गातुः एति प्र यत् आनट् दिवः अंतान् कविः अभं दीद्यानः॥४॥ जुषत् हव्या मानुषस्य ऊर्ध्वः तस्थौ ऋभ्वा यज्ञे मिन्वन् सप्त पुरः एति॥५॥ सः हि क्षेमः हविः यज्ञः थ्रुष्टी इत् अस्य गातुः एति अग्निं देवाः वाशीऽमंतं॥६॥२॥ यज्ञऽसहं दुवःऽइये अग्निं पूर्वस्य शेवस्य अद्रेः सूनुं आयुं आहुः॥७॥ नरः ये के च अस्मत् आ विश्वा इत ते वामे आ स्युः० अग्निं हविषा वर्धंतः॥८॥ कृष्णः श्वेतःअरुषःयामःअस्य ब्रध्नः ऋजुःउत शोणःयशस्वान हिरण्यऽरूपं जनिता जजान॥९॥ एव ते अग्ने विऽमदः मनीषां ऊर्जः नपात् अमृतेभिः सऽजोषाः गिरः आ वक्षत् सुऽमतीः इयानः इषं ऊर्जं सुऽक्षितिं विश्वं आ अभाः० ॥ १० ॥ ३ ॥

॥२१॥ आ अग्निं न स्ववृक्तिऽभिः होतारं त्वा वृणीमहे यज्ञाय स्तीर्णऽबर्हिषे वि वः मदे शोरं पावकऽशोचिषं विवक्षसे॥१॥ त्वां ऊं ते सुऽआभुवः शुंभंति अश्वऽराधसः वेति त्वां उपऽसेचनी वि वः मदे ऋजीतिः अग्ने आऽहुतिः विवक्षसे॥२॥ त्वे धर्माणः आ-

सते जुह्वभिः सिंचतीरिव। कृष्णा रूपाण्यर्जुना वि वो मदे वि-श्वा अधि श्रियो धिषे विवक्षसे ॥३॥ यमग्ने मर्त्यस्त्रयिं सहं-सावन्नमर्त्य। तमा नो वाजसातये वि वो मदे यज्ञेषु चित्रमा भरा विवक्षसे॥४॥ अग्निर्जातो अथर्वणा विदद्विश्वानि काव्या। भुवद्दूतो विवस्वतो वि वो मदे प्रियो यमस्य काम्यो विवक्षसे ॥५॥४॥ त्वां यज्ञेष्वीळतेऽग्ने प्रयत्यध्वरे। त्वं वसूनि काम्या वि वो मदे विश्वा दधासि दाशुषे विवक्षसे॥६॥ त्वां यज्ञेष्वृत्विजं चारु-मग्ने नि षेदिरे। घृतप्रतीकं मनुषो वि वो मदे शुक्रं चेतिष्ठमक्ष-भिर्विवक्षसे॥७॥ अग्ने शुक्रेण शोचिषोरु प्रथयसे बृहत्। अभि-क्रन्दन्वृषायसे वि वो मदे गर्भं दधासि जामिषु विवक्षसे॥८॥५॥

॥ २२ ॥ १-१५ विमद ऐंद्रः प्राजापत्यो वा वसुश्रुद्वा सामुकः ॥ इंद्रः ॥ १-४ ६. ८ १०-१४ पुरस्ताद्बृहती । ५ ७. ९ अनुष्टुप् । १५ त्रिष्टुप् ॥

॥२२॥ कुह श्रुत इंद्रः कस्मिन्नद्य जने मित्रो न शूयते। ऋषी-णां वा यः क्षये गुहा वा चकृपे गिरा ॥१॥ इह श्रुत इंद्रो अस्मे अद्य स्तवे वज्रभृतीपमः। मित्रो न यो जनेष्वा यशश्चक्रे असाम्या ॥२॥ महो यस्पतिः शवसो असाम्या महो नृम्णस्य तूतुजिः। भर्ता वज्रस्य धृष्णोः पिता पुत्रमिव प्रियं ॥३॥ युजानो अश्वा वातस्य धुनी देवो देवस्य वज्रिवः। स्यंता पथा विरुक्म-ता सृजानः स्तोपध्वनः ॥४॥ त्वं त्या चिद्वातस्याश्वागा ऋज्रा त्मना वहध्ये। ययोर्दिवो न मर्त्यो यंता नकिर्विदार्यः ॥५॥६॥ अध ग्मंतोशना पृच्छते वां कदर्था न आ गृहं। आ जग्मथुः पराकाद्दिवश्च ग्मश्च मर्त्य ॥६॥ आ नं इंद्र पृक्षसेऽस्माकं बलोद्यतं। तत्त्वा याचामहेऽवः शुष्णं यदन्नमानुषं ॥७॥ अ-कर्मा दस्युरभि नो अमंतुरन्यव्रतो अमानुषः। त्वं तस्या-

सते जुहूभिः सिंचतीऽइव कृष्णा रूपाणि अर्जुना वि वः मदे वि-श्वाः अधि श्रियः धिषे विवक्षसे॥३॥ यं अग्ने मन्यसे रयिं सहसा-ऽवन् अमर्त्य तं आ नः वाजेऽसातये वि वः मदे यज्ञेषु चित्रं आ भर विवक्षसे॥४॥ अग्निः जातः अथर्वणा विदत् विश्वानि काव्या भुवत् दूतः विवस्वतः वि वः मदे प्रियः यमस्य काम्यः विवक्षसे ॥५॥४॥ त्वां यज्ञेषु ईळते अग्ने प्रऽयति अध्वरे त्वं वसूनि काम्या वि वः मदे विश्वा दधासि दाशुषे विवक्षसे॥६॥ त्वां यज्ञेषु ऋत्विजं चारुं अग्ने नि सेदिरे घृतऽप्रतीकं मनुषः वि वः मदे शुक्रं चेतिष्ठं अतिथिं विवक्षसे॥७॥ अग्ने शुक्रेण शोचिषा उरुप्रथयसे बृहत् अभिऽक्रंदन् वृषऽयसे वि वः मदे गर्भं दधासि जामिषु विवक्षसे ॥ ८ ॥ ५ ॥

॥२२॥ कुहं श्रुतः इंद्रः कस्मिन् अद्य जने मित्रः न शूयते ऋषीणां वा यः क्षये गुहा वा चकृपे गिरा॥१॥ इह श्रुतः इंद्रः अस्मे अद्य स्तवे वज्री ऋचीषमः मित्रः न यः जनेषु आ यशः चक्रे असामि आ॥२॥ महः यः पतिः शवसः असामि आ महः नृम्णस्य तूतुजिः भर्ता वज्रस्य धृष्णोः पिता पुत्रःऽइव प्रियं॥३॥ युजानः अश्वा वा-तस्य धुनी देवः देवस्य वाजिऽवः स्यंता पथा विरुक्मता सृजानः स्तोपिऽअध्वनः॥४॥ त्वं त्या चित् वातस्य अश्वा आ अगाः ऋजा त्मना वहध्यै ययोः देवः न मर्त्यः यंता नकिः विदाय्यः॥५॥६॥ अधं गमंता उशना पृच्छते वां कतऽअर्था नः आ गृहं आ जग्मथुः परा-कात् दिवः च ग्मः च मर्त्यं॥६॥ आ नः इंद्र पृक्षसे अस्माकं ब्रह्म उतऽयंतं तत् त्वा याचामहे शवः शुष्णं यत् हन् असानुषं॥७॥ अकर्मा दस्युः अभि नः अमंतुः अन्यऽव्रतः अमानुषः त्वं तस्य अ-

मित्रहन्वधर्दासस्य दंभय ॥८॥ त्वं नं इंद्र भूर भूरिष्ठ त्वोतांसो बर्हिणा। पुरुत्रा ते वि पूतयो नवंत क्षोणयो यथा ॥९॥ त्वं तान्वृत्रहत्ये चोदयो नृन्काँपाणे शूर वज्रिवः। गुहा यदीं कवीनां विणां नक्षंत्रशवसां ॥१०॥७॥ मक्षू ता ते इंद्र दानाम्नस आक्षाणे शूर वज्रिवः। यद्व शुष्णस्य दंभयो जातं विश्वं सयावभिः ॥११॥ माकुर्ध्यगिंद्र शूर वस्वीरस्मे भूवन्नभिष्टयः। वयंवयं त आसां सुवे स्याम वज्रिवः ॥१२॥ अस्मे ता ते इंद्र संतु सत्याहिंसंतीरुपस्पृशः। विद्याम यासां भुजो धेनूनां न वज्रिवः ॥१३॥ अहस्ता यद्पदी वर्धत क्षाः शचीभिर्वेद्यानां। शुष्णं परि प्रदक्षिणिद्विश्वायवे नि शिश्नथः ॥१४॥ पिबापिबेदिंद्र शूर सोमं मा रिषण्यो वसवान वसुः सन्। उत चायस्व गृणतो मघोनो महश्च रायो रेवतस्कृधी नः ॥१५॥८॥

॥ २३ ॥ १-७ विमद ऐंद्रः प्राजापत्यो वा वसुश्रुद्वामुक्रः ॥ इंद्रः ॥ १. ७ त्रिष्टुप्। २-४. ६ जगती। ५ अभिसारिणी ॥

॥२३॥ यजामह इंद्रं वज्रदक्षिणं हरीणां रथ्यं विव्रतानां। प्र श्मश्रु दोधुवदूर्ध्वथा भूद्धि सेनाभिर्दयमानो वि राधसा ॥१॥ हरी नु वस्य या वनेऽविदे वस्विंद्रो मघैर्मघवा वृत्रहा भुजत्। ऋभुर्वाजं ऋभुक्षाः पंत्यते शवोऽव क्ष्णौमि दासस्य नाम चित् ॥२॥ यदा वज्रं हिरण्यमिदया रथं हरी यमस्य वहतो वि सूरिभिः। आ तिष्ठति मघवा सनश्रुत इंद्रो वाजस्य दीर्घश्रवस्पतिः ॥३॥ सो चिन्नु वृष्टिर्यूथ्या३ स्वा सचाँ इंद्रः श्मश्रूणि हरिताभि मृण्यते। अव वेति सुक्षयं सुते मधूदिद्धूनोति वातो यथा वनं ॥४॥ यो वाचा विवाचो मृध्रवाचः पुरू सहस्राशिवा जघान। तन्नेदस्य पौंस्यं गृणीमसि पितेव

मिन्द्रऽहन् वधः दासस्य दंभय ॥८॥ त्वं नः इंद्र शूर शूरैः उत त्वाऽऊतासः वर्हणा पुरूऽचा ते विं पूर्तयः नवंत द्यौणयः यथा ॥९॥ त्वं तान् वृचऽहत्ये चोदयः नृन् कार्पाणे शूर वज्रिऽवः गुहा यदिं कवीनां विशं नक्षंचऽशवसां ॥१०॥७॥ मक्षु ता ते इंद्र दानऽअंमसः आक्षाणे शूर वज्रिऽवः यत् हु शुष्णस्य दंभयः जातं विश्वं सयावंऽभिः ॥११॥ मा अकुर्यक् इंद्र शूर वस्वीः अस्मे भूवन् अभिष्टयः वयंऽवयं ते आसां सुम्ने स्याम वज्रिऽवः ॥१२॥ अस्मे ता ते इंद्र संतु सत्या अहिंसंतीः उपऽस्तृणः विद्याम यासां भुजः धेनूनां न वज्रिऽवः ॥१३॥ अहस्ता यत् अमदीं वर्धत द्याः शचीभिः वेद्यानां शुष्णं परिं मऽदक्षिणित् विश्वऽआयवे नि शिश्नथः ॥१४॥ पिबंऽपिब इत् इंद्र शूर सोमं मा रिषण्यः वसुवान् वसुः सन् उत चायस्व गृणतः मघोनः महः च राय रेवतः कृधि नः ॥१५॥८॥

॥२३॥ यजामहे इंद्रं वज्रंऽदक्षिणं हरीणां रथ्यं विऽवंतानां प्र श्मश्रु दोधुवत् ऊर्ध्वऽशा भूत् वि सेनाभिः दयमानः वि राधसा ॥१॥ हरीं नु अस्य या वनें विदे वसुं इंद्रः मघैः मघऽवा वृचऽहा भुवत् ऋभुः वाजः ऋभुक्षाः मत्यंते शवः अवं द्रुणोमि दासस्य नामं चित् ॥२॥ यदा वज्रं हिरण्यं इत् अथ रथं हरीं यं अस्य वहतः वि सूरिऽभिः आ तिष्ठति मघऽवा सनंऽश्रुतः इंद्रः वाजस्य दीर्घऽश्रवसः पतिः ॥३॥ सो चित् नु वृष्टिः यूथ्या स्वा सचा इंद्रः श्मश्रूणि हरिता अभि प्रुष्णुते अवं वेति सुऽक्षयं मुते मधु उत इत धूनोति वातः यथा वनं ॥४॥ यः वाचा विऽवाचः मृध्रऽवाचः पुरुऽसहस्रा अशिवा जघानं ततऽतंत इत् अस्य पौंस्यं गृणीमसि पिताऽइव

यस्तविषी वावृधे शवः ॥५॥ स्तोमं त इंद्र विमदा अजीजनन्नपूर्व्य पुरुतमं सुदानवे । विश्वा ह्यस्य भोजनमिनस्य यदा पशुं न गोपाः करामहे ॥ ६ ॥ माकिर्न एना सख्या वि यौषुस्तवं चेंद्र विमदस्य च ऋषेः । विश्वा हि ते प्रमतिं देव जामिवदस्मे तें संतु सख्या शिवानि ॥ ७ ॥ ९ ॥

॥ २४ ॥ विमद ऐंद्रः प्राजापत्यो वा वसुश्रुद्वा वासुक्रः ॥ १-३ ऐंद्रः । ४-६ अश्विनौ ॥ १-३ आस्तारपंक्तिः । ४-६ अनुष्टुप् ॥

॥२४॥ इंद्र सोममिमं पिब मधुमंतं चमू सुतं । अस्से रयिं नि धारय वि वो मदे सहस्रिणं पुरुवसो विवक्षसे ॥१॥ त्वां यज्ञेभिरुक्थियरुपं हव्येभिरीमहे । शचीपते शचीनां वि वो मदे श्रेष्ठं नो धेहि वार्य विवक्षसे ॥२॥ यस्पतिर्वार्याणामसि रध्रस्य चोदिता । इंद्र स्तोतृणामविता वि वो मदे द्विषो नः पाह्यंहसो विवक्षसे ॥३॥ युवं शक्रा मायाविना समीची निरमंथतं । विमदेन यदीळिता नासत्या निरमंथतं ॥४॥ विश्वेदेवा अकृपंत समीच्योर्निष्पर्तंत्योः । नासत्यावब्रुवन्देवाः पुनरा वहतादिति ॥५॥ मधुमन्मे परायणं मधुमत्पुनरायनं । ता नो देवा देवतया युवं मधुमतस्कृतं ॥६॥१०॥

॥ २५ ॥ १-११ विमद ऐंद्रः प्राजापत्यो वा वसुश्रुद्वा वासुक्रः ॥ सोमः ॥ आस्तारपंक्तिः ॥

॥२५॥ भद्रं नो अपि वातय मनो दक्षमुत क्रतुं । अधा ते सख्ये अंधसो वि वो मदे रणन्गावो न यवसे विवक्षसे ॥१॥ हृदिस्पृशंस्त आसते विश्वेषु सोम धामसु । अधा कामा दुमे मम वि वो मदे वि तिष्ठते वसूयवो विवक्षसे ॥२॥ उत व्रतानि सोम ते प्राहं मिनामि पाक्या । अधा पितेव सूनवे वि वो मदे मृळा नो अभि चिद्वधाद्विवक्षसे ॥३॥ समु प्र यंति धीतयः सर्गासोऽव-

यः तविषी ववृधे शवः ॥ ५ ॥ स्तोमं ते इंद्र विडमदाः अजीजनन् अपूर्व्य पुरुतमं सुऽदानवे विद्म हि अस्य भोजनं इनस्य यत् आ पशुं न गोपाः करामहे ॥ ६ ॥ माकिः नः एना सख्या वि योषुः तवं च इंद्र विडमदस्य च ऋषेः विद्म हि ते प्रऽमंतिं देव जामिऽवत् अस्मे ते संतु सख्या शिवानि ॥ ७ ॥ ९ ॥

॥ २४ ॥ इंद्रं सोमं इमं पिव मधुऽमंतं चमू सुतं अस्मे रयिं नि धारय वि वः मदे सहस्रिणं पुरुऽवसो विवक्षसे ॥ १ ॥ त्वां यज्ञेभिः उक्थैः उप हव्येभिः ईमहे शचीऽपते शचीनां वि वः मदे श्रेष्ठं नः धेहि वार्यं विवक्षसे ॥ २ ॥ यः पतिः वार्याणां असि रध्रस्य चोदिता इंद्र स्तोतॄणां अविता वि वः मदे द्विषः नः पाहि अंहसः विवक्षसे ॥ ३ ॥ युवं शक्रा मायाऽविना सं ऽईची निः अमंथतं विडमदेन यत् ईळिता नासत्या निः ऽअमंथतं ॥ ४ ॥ विश्वे देवाः अकृपंत सं ऽईच्योः निः ऽपतंत्योः नासत्यौ अब्रुवन् देवाः पुनः आ वहतात् इति ॥ ५ ॥ मधुऽमत् मे परा ऽअयनं मधुऽमत् पुनः आ ऽअयनं ता नः देवा देवतया युवं मधुऽमतः कृतं ॥ ६ ॥ १० ॥

॥ २५ ॥ भद्रं नः अपि वातय मनः दक्षं उत क्रतुं अध ते सख्ये अंधसः वि वः मदे रणन् गावः न यवसे विवक्षसे ॥ १ ॥ हृदिऽस्पृशः ते आसते विश्वेषु सोम धामऽसु अध कामाः इमे मम वि वः मदे वि तिष्ठंते वसुऽयवः विवक्षसे ॥ २ ॥ उत व्रतानि सोम ते प्र अहं मिनामि पाक्या अध पिताऽइव सूनवे वि वः मदे मृळ नः अभि चित् वधात् विवक्षसे ॥ ३ ॥ सं ऊं इति प्र यंति धीतयः सगोसः अव-

ताँइव।ऋतुंनःसोम जीवसे वि वो मदे धारया चमूसाँइव वि-
वक्षसे॥४॥ तव त्ये सोम शक्तिभिर्निकामासो व्यृण्विरे। गृत्सस्य
धीरास्तवसो वि वो मदे व्रजं गोमन्तमश्विनं विवक्षसे॥५॥११॥
पशुं नःसोम रक्षसि पुरुत्रा विष्ठितं जगत्। समाकृणोषि जी-
वसे वि वो मदे विश्वा संपश्यन्भुवना विवक्षसे॥६॥ त्वं नःसोम
विश्वतोगोपा अदाभ्यो भव। सेधा राजन्नप स्रिधो वि वो मदे मा
नो दुःशंस ईशता विवक्षसे॥७॥ त्वं नः सोम सुक्रतुर्वयोधेयाय
जागृहि। द्योचदित्तरो मनुषो वि वो मदे द्रुहो नः पाह्यंहसो विव-
क्षसे॥८॥ त्वं नो वृत्रहन्तमेंद्रस्येंदो शिवःसखा। यस्ते हवंते समिषे
वि वो मदे युध्यमानास्तोकसातौ विवक्षसे॥९॥ अयं घ स तुरो
मद इंद्रस्य वर्धत प्रियः। अयं कक्षीवंतो महो वि वो मदे मतिं वि-
प्रस्य वर्धयद्विवक्षसे॥१०॥ अयं विप्राय दाशुषे वाजाँइयर्ति गो-
मतः। अयं सप्तभ्य आ वरं वि वो मदे प्रांधं श्रोणं च तारिषद्विव-
क्षसे॥११॥१२॥

॥ २६ ॥ १-९ विमद ऐंद्रः प्राजापत्यो वा वसुरुद्रा वासुक्रः ॥ पूषा ॥ १. ४. उष्णिक्। २. ३. ५-९ अनुष्टुप् ॥

॥२६॥ प्र सद्यो जात ओषधीभिरिंद्रे ददिर्यज्ञियो नाम्न्यो गाः।
प्र दस्रा नि-
युद्रथः पूषा अविष्टु माहिनः॥१॥ यस्य त्यन्महित्वं वातापर्य-
मयं जनः। विप्र आ वंसद्धीतिभिश्चिकेत सुष्टुतीनां॥२॥ स
वेद सुष्टुतीनामिंदुर्न पूषा वृषा। अभि प्सुरः प्रपायति व्रजं
न आ प्रपायति॥३॥ मंसीमहि त्वा वयमस्माकं देव पूषन्।
मतीनां च साधनं विप्राणां चाधवं॥४॥ प्रत्यर्धिर्यज्ञानामा-
ग्रहुवो रथानां। ऋषिः स यो मनुर्हितो विप्रस्य यावयत्सखः
॥५॥१३॥ आघृणेपमाणायाः पतिः शुचायाश्च शुचस्य च। वा-
सोवायोऽवीनामा वासांसि मर्मृजत्॥६॥ इनो वाजानां प-

तान्ऽइव क्रतुं नः सोम जीवसे वि वः मदे धारयं चमसान्ऽइव विवक्षसे ॥४॥ तवत्ये सोम शक्तिऽभिः निऽकामासः वि चरन्ति रे गृत्सस्य धीराः नवसः वि वः मदे व्रजं गोऽमन्तं अश्विनं विवक्षसे ॥५॥११॥ पवस्व नः सोम रक्षसि पुरुऽचा विऽस्थितं जगत् संऽआ कृणोषि जीवसे वि वः मदे विश्वा संऽपश्यन् भुवना विवक्षसे ॥६॥ त्वं नः सोम विश्वतः गोपाः अदाभ्यः भव सेधा राजन् अप स्रिधः वि वः मदे मा नः दुःऽशंसः ईशत विवक्षसे ॥७॥ त्वं नः सोम सुऽक्रतुः वयःऽधेयाय जागृहि द्योचवित्ऽतरः मनुषः वि वः मदे द्रुहः नः पाहि अंहसः विवक्षसे ॥८॥ त्वं नः वृचहन्ऽतम इंद्रस्य इंदो शिवः सखा यत् सीं हवंते संऽउषे वि वः मदे युध्यमानाः तोकऽसातौ विवक्षसे ॥९॥ अयं घ सः तुरः मदः इंद्रस्य वर्धत प्रियः अयं कक्षीवंतः महः वि वः मदे मतिं विप्रस्य वर्धयत् विवक्षसे ॥१०॥ अयं विप्राय दाशुषे वाजान् इयर्ति गोऽमतः अयं सप्तऽभ्यः आ वरं वि वः मदे प्र अंधं श्रोणं च तारिषत् विवक्षसे ॥ ११ ॥ १२ ॥

॥२६॥ प्र हि अच्छ मनीषाः स्पार्हाः यंति निऽयुतः प्र दस्रा निऽयुतऽरथः पूषा अविष्टु माहिनः ॥१॥ यस्य त्यत् महिऽत्वं वातार्यं अयं जनः विप्रः आ वसत् धीतिऽभिः चिकेत सुऽस्तुतीनां ॥२॥ सः वेद सुऽस्तुतीनां इंदुः न पूषा वृषा अभि स्रुवः प्रुषायति व्रजं नः आ प्रुषायति ॥३॥ मंसीमहि त्वा वयं अस्माकं देव पूषन् मतीनां च साधनं विप्राणां च आऽधवं ॥४॥ प्रतिऽअर्धिः यज्ञानां अश्वऽहयः रथानां ऋषिः सः यः मनुःऽहितः विप्रस्य यवयत्ऽअसवः ॥५॥१३॥ आऽधीयमाणायाः पतिः शुचायाः च शुचस्य च वासःऽवायः अवीनां आ वासांसि ममृजत् ॥६॥ इनः वाजानां प-

तिंनिः पुंष्टीनां सखा। प्र यमश्वं हर्यतो दूंधोषि वृधा यो अदांभ्यः॥७॥ आ ते रथस्य पूषन्नजा धुरं ववृत्युः। विश्वस्यार्थिनः सखा सनोजा अनपच्युतः॥८॥ अस्माकमूर्जा रथं पूषा अविष्टु माहिनः। भुवद्वाजानां वृध इमं नः शृणवद्धवं॥९॥१४॥

॥ २७ ॥ १–२४ वसुक ऐंद्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ २७ ॥ असत्सु मे जरितः साभिवेगो यत्सुन्वते यजमानाय शिक्षं। अनाशीर्दामहमंस्मि प्रहंता सत्यध्वृतं वृजिनायंतमाभुं॥१॥ यदीदहं युधये संनयान्येदेवयून्तन्वा३ शूशुजानान्। अमा ते तुमं वृषभं पचानि तीव्रं सुतं पंचदशं नि षिंचं॥२॥ नाहं तं वेद य इति ब्रवीत्यदेवयून्त्समरणे जघन्वान्। यदावाख्यत्समरणमृधावदादिद्धं मे वृषभा प्र ब्रुवंति॥३॥ यदज्ञातिषु वृजनेष्वासं विष्वे सतो मघवानो म आसन्। जिनामि वेत्सोम आ संतमाभुं प्र तं क्षिणां पर्वते पादगृह्य॥४॥ न वा उ मां वृजने वारयंते न पर्वतासो यदहं मनस्ये। मम स्वनात्क्रुधुकर्णो भयात एवेदनु द्यून्किरणः समेजात॥५॥१५॥ दर्शन्वचं शृतपाँ अनिंद्रान्वाहृक्षदः शरवे पत्यमानान्। घृषुं वा ये निंनिदुः सखायमध्वन्वेषु पवयो ववृत्युः॥६॥ अभूवौक्षीण्यु१ आयुरानदुर्पन्नु पूर्वो अयरे नु दर्षत्। ते यवस्ते यदि तं न भूतो यो अस्य पारे रजसो विवेष॥७॥ गावो यवं प्रयुता अर्यो अक्षन्ता अपश्यं सहगोपाश्चरंतीः। हवा इदर्यो अभितः समायन्कियदासु स्वपतिरिंदमाते॥८॥ सं यद्यवं यवसादो जनानामहं युवादं उर्वजे अंतः। अचा युक्तोऽवसातारमिच्छादधो अर्युक्तं युनजद्यवन्वान्॥९॥ अचेदु मे मंससे

तिंः इनः पुष्टीनां सखा प्रश्मश्रुं हर्यतः दूधोत् वि वृषा यः अदाभ्यः ॥७॥ आ ते रथस्य पूषन् अजाः धुरं ववृत्युः विश्वस्य अर्थिनः सखा सनः अजाः अनंपऽच्युतः ॥८॥ अस्माकं ऊर्जा रथं पूषा अविष्टु माहिनः भुवत् वाजानां वृधः इमं नः शृणवत् हवं ॥९॥१४॥

॥२७॥ असत् सु मे जरितः सः अभिऽवेगः यत् सुन्वते यजमानाय शिक्षं अनाशीःऽदां अहं अस्मि प्रऽहंता सत्यऽध्वृतं वृजिनऽयंतं आभुं॥१॥ यदिं इत् अहं युधये संऽनयानि अदेवऽयून् तन्वां शूशुंजानान् अमा ते तुम्र वृषभं पचानि तीव्रं सुतं पंचऽदशं नि सिंचं॥२॥ न अहं तं वेद यः इति ब्रवीति अदेवऽयून् संऽअरणे जघन्वान् यदा अवऽअख्यत् संऽअरणं ऋघावत् आत् इत् ह मे वृषभा प्र ब्रुवंति॥३॥ यत् अञ्जाते पुरुजनेषु आसु विश्वे सतः मयऽवानः मे आसन् जिनामि वा इत् क्षेमे आसंतं आभुं प्रतं क्षिणां पर्वते पादऽगृभ्यं॥४॥ न वै ऊं मां वृजने वारयंते न पर्वतासः यत् अहं मनस्ये ममं स्वनात् कृधुऽकर्णः भयाते एव इत् अनु द्यून् किरणः संऽएजात्॥५॥१५॥ दर्शन नु अत्रं शृतऽपान् अनिंद्रान् वाहुऽक्षदः शरवे पत्यमानान् घृषुं वा ये निनिदुः सखायं अधिं ऊं नु एषु पवयः ववृत्युः॥६॥ अभूः ऊं औक्षीः वि ऊं आयुं आनट् दर्षत् नु पूर्वः अपरः नु दर्षत् वे पवस्ते परि तंनभूतः यः अस्य पारे रजसः विवेष॥७॥ गावः यवं प्रऽयुताः अर्यः अक्षन् ताः अपश्यं सहऽगोपाः चरंतीः हवाः इत् अर्यः अभितः सं आयन् किं एत् आसु स्वऽपतिः छंदयाते॥८॥ सं यत् वयं यवसऽअदः जनानां अहं यवऽअदः उरुऽअजे अंतः अत्रं युक्तः अवऽसातारं इच्छात् अथो अयुक्तं युनजत् ववन्वान्॥९॥ अत्रं इत् ऊं मे मंससे

सत्यमुक्तं द्विपाच्च यच्चतुष्पात्संसृजानि। स्त्रीभिर्यो अत्र वृषणं पृतन्यादयुद्धो अस्य वि भजानि वेदः ॥१०॥१६॥ यस्यानष्टा दुहिता जात्वास कस्ताँ विद्वाँ अभि मन्याते अंधां। कतरो मेनिं प्रति तं मुचाते य ईं वहाते य ईं वा वरेयात् ॥११॥ कियंती योषा मर्यतो वधूयोः परिप्रीता पन्यसा वार्येण। भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा मित्रं वनुते जने चित् ॥१२॥ पत्नी जगार प्रत्यंचमत्ति शीर्षा शिरः प्रति दधौ वरूथं। आसीन ऊर्ध्वामुपसि क्षिणाति न्यंङ्ङ्ताना मन्वेति भूमिं ॥१३॥ बृहन्नच्छायो अपलाशो अर्वा तस्थौ माता विपितो अत्ति गर्भः। अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः ॥१४॥ सप्त वीरासो अधरादुदायन्नष्टोत्तरात्तात्समजग्मिरन्ते। नवं पश्चात्तास्थिविमंत आयन्दश प्रावसानु वितिरंत्यघ्नः ॥१५॥१७॥ दशानामेकं कपिलं समानं तं हिन्वंति क्रतवे पायीय। गर्भं माता सुधितं वक्षणास्वेनंतं तुपयंती बिभर्ति ॥१६॥ पीवानं मेषमपचंत वीरा न्युप्ता अक्षा अनु दीव आसन्। द्वा धनुं बृहतीमप्स्वंतः पविचंवंता चरतः पुनंता ॥१७॥ वि क्रोशनासो विष्वंच आयन्पचाति नेमो नहि पक्षदूधः। अयं मे देवः सविता तदाह त्वन्न इद्वनवत्सर्पिरन्नः ॥१८॥ अपश्यं यामं वहमानमारादचक्रया स्वधया वर्तमानं। सिषक्त्यूधः प्र युगा जनानां सद्यः शिश्ना प्रमिनानो नवीयान् ॥१९॥ एतौ मे गावौ प्रमरस्य युक्तौ मो षु प्र सेधीर्मुहुरिन्ममंधि। आपश्चिदस्य वि नशंत्यर्थं सूरश्च मर्क उपरो बभूवान् ॥२०॥१८॥ अयं यो वज्रः पुरुधा विवृत्तोऽवः सूर्यस्य बृहतः पुरीषात्। अव इदेना परो अन्यदस्तु तदंव्य-

सत्यं उक्तं द्विऽपात् च यत् चतुःऽपात् संऽसृजानि स्त्रीभिः यः अत्यं वृषणं पृतन्यात् अर्युद्यः अस्य वि भजानि वेदः ॥१०॥१६॥ यस्य अनक्षा दुहिता जातु आस कः तां विद्वान् अभि मन्यात् ते अंधां कतरः मेनिं प्रति तं मुचाते यः ईं वहाते यः ईं वा वरेऽयात् ॥११॥ कियती योषा मर्यतः वधूऽयोः परिऽप्रीता पन्यसा वार्येण भद्रा वधूः भवति यत् सुऽपेशाः स्वयं सा मित्रं वनुते जने चित् ॥१२॥ पक्षः जगार प्रत्यंचं अत्ति शीर्ष्णा शिरः प्रति दधौ वरूथं आसीनः ऊर्ध्वा उपसि क्षिणाति न्यङ् उत्तानां अनु एति भूमिं ॥१३॥ बृहन् अच्छायः अपलागः अवीं तस्यौ माता विऽसितः अत्ति गर्भः अन्यस्याः वासं ह्रिती मिमाय कया भुवा नि दधे धेनुः ऊधः ॥१४॥ सप्त वीरासः अधरात् उत् आयन् अष्ट उत्तरात् नात् सं अजग्मिरन् ते नवं पश्चात् नात् स्यि विऽमंतः आयन् दश प्राक् सानुं वि तिरंति अश्नः ॥१५॥१७॥ दशानां एकं कपिलं समानं तं हिन्वंति क्रतवे पायीय गर्भं माता सुऽधितं वक्षणासु अवेनंतं तुपयंती बिभर्ति ॥१६॥ पीवानं मेषं अपचंत वीराः निऽउप्ताः अक्षाः अनु दीवे आसन् द्वा धनुं बृहतीं अप्ऽसु अंतः पविचंऽवंता चरतः पुनंता ॥१७॥ वि क्रोशनासः विष्वंचः आयन् पचाति नेमः नहि पक्षत् अर्धः अयं मे देवः सविता तत् आह दुऽअंचः इत् वनवत् सर्पिः-ऽअंचः ॥१८॥ अपश्यं यामं वहमानं आरात् अचक्रया स्वधया वर्तमानं सिसक्ति अर्यः प्र युगा जनानां सद्यः शिष्ठा प्रऽमिनानः नवीयान् ॥१९॥ एतो मे गावौ प्रऽमरस्य युक्तौ मो सु प्र सेधीः मुहुः इत् ममंधि आपः चित् अस्य वि नशंति अर्थं सूरः च मर्कः उपरः बभूवान् ॥२०॥१८॥ अयं यः वज्रः पुरुधा विऽवृक्तः अवः सूर्यस्य बृहतः पुरीषात् यवः इत् एना परः अन्यत् अस्ति तत् अव्य-

थी जरितर्माणस्तरंति ॥२१॥ वृक्षे वृक्षे नियता मीमयद्गौस्ततो वयः प्र पंतान्पूरुषादः। अथेदं विश्वं भुवनं भयात इंद्राय सुन्वदृषये च शिक्षत ॥२२॥ देवानां मानें प्रथमा अतिष्ठन्कृंतस्य दिषामुपस्था उदायन्। चयस्तपंति पृथिवीमनूपा इदा वृधूंकं वहतः पुरीषं ॥२३॥ सा ते जीवातुरुत तस्य विद्धि मा सैंताङ्गपं गूहः समर्ये। आविः स्वः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुंचते ॥२४॥१९॥

॥ २८ ॥ १–१२ इंद्रवसुकयोः संवाद ऐंद्र (१ इंद्रस्य स्तुपा परोधवादद्रमाह) ॥ त्रिष्टुप् ॥

॥ २८ ॥ विष्वो ह्यन्यो अरिराजगाम ममेदहु श्वशुरो ना जगाम । जक्षीयाद्धाना उत सोमं पपीयात्स्वाशितः पुनरस्तं जगायात् ॥ १ ॥ स रोरुवद्वृषभस्तिग्मशृंगो वर्ष्मन्तस्थौ वरिमन्ना पृथिव्याः । विश्वेष्वेनं वृजनेषु पामि यो मे कुक्षी सुतसोमः पपाति ॥ २ ॥ अद्रिणा ते मंदिन इंद्र तूयान्त्सुन्वंति सोमान्पिबसि त्वमेषां । पचंति ते वृषभाँ अत्सि तेषां पृक्षेण यन्मघवन्हूयमानः ॥ ३ ॥ इदं सु मे जरितरा चिकिद्धि प्रतीपं शापं नद्यो वहंति । लोपाशः सिंहं प्रत्यंचमत्साः क्रोष्टा वराहं निरतक्त कक्षात् ॥ ४ ॥ कुवा ते एतदहमा चिकेतं गृत्सस्य पाकस्तवसो मनीषां । त्वं नो विद्वाँ ऋतुथा वि वोचो यमधं ते मघवन्क्षेम्या धूः ॥ ५ ॥ एवा हि मां तवसं वर्धयंति दिवश्चिन्मे बृहत उत्तरा धूः । पुरू सहस्रा नि शिशामि साकमशत्रुं हि मा जनिता जजान ॥ ६ ॥ २० ॥ एवा हि मां तवसं जज्ञुरुग्रं कर्मन्कर्मन्वृषणमिंद्र देवाः । वधीं वृत्रं वज्रेण मंदसानोऽपं व्रजं महिना दाशुषे वं ॥ ७ ॥ देवासः शायन्परशूँरबिभ्रन्वना वृश्चंतो अभि विड्भिरायन् । नि सुद्यं दधतो वक्षणासु यचा कृ-

षीजरिमाणंःनरंति॥२१॥ वृष्टेऽवृष्टे निऽयंता मीमयत् गौःनतंः वयंः प्र पतान् पुरुपऽअदंः अथ इदं विश्वं भुवनं भयाते इंद्राय सुन्वत् ऋपये च शिक्षत॥२२॥ देवानां माने प्रथमाः अतिष्ठन् कृंतत्रांत् एषां उपराः उत् आयन् चयंःतपंति पृथिवीं अनूपाः द्वा वृबूकं वहतुः पुरीषं॥२३॥ सा ते जोयातुः उत तस्यं विद्धि मा स्म एताहक् अपं गूहः सऽमर्ये आविः स्वंः॰ कृणुते गूहते बुसं सः पादुः अस्य निःऽनिजंः न मुच्यते ॥ २४ ॥ १९ ॥

॥२८॥ विश्वंःहि अन्यः अरिः आऽजगामं ममं इत् अहं श्वपुंरः न आ जगाम जक्षीयात् धानाः उत सोमं पपीयात् सुऽआंशितः पुनंः अस्तं जगायात्॥१॥ सः रोरुवत् वृषभः तिग्मऽशृंगः वर्ष्मन् तस्थौ वरिमन् आ पृथिव्याः विश्वेषु एनं वृजनेषु पामि यः मे कुक्षी सुतऽसोमः पृणातिं ॥२॥ अद्रिणा ते मंदिनः इंद्र तूयान् सुन्वंति सोमान् पिबसि त्वं एषां पचंति ते वृषभान् अत्सि तेषां पृक्षेण यत् मघऽवन् हूयमानः॥३॥ इदं सु मे जरितः आ चिकिद्धि प्रतिऽइदं शापं नद्यः वहंति लोपाशः सिंहं प्रत्यंचं अत्साः क्रोष्टा वराहं निःअतक्त कक्षात्॥४॥ कथा ते एतत् अहं आ चिकेतं गृत्सस्य पाकंः तवसः मनीषां त्वं नः विद्वान् ऋतुऽथा वि वोचः यं अर्धं ते मघऽवन् क्षेम्याधूः॥५॥ एव हि मां तवसं वर्धयंति दिवः चित् मे बृहतः उत्ऽतराधूः पुरुसहस्रा नि शिशामि साकं अशुं हिमाजनिंता जजानं॥६॥२०॥ एव हि मां तवसं जज्ञुः उग्रं कर्मन्ऽकर्मन् वृषणं इंद्र देवाः वधीं वृत्रं वज्रेण मंदसानः अहं व्रजं महिना दाशुषे वं॥७॥ देवासः आयन् परशून् अबिभ्रन् वना वृश्चंतः अभि विट्ऽभिः आयन् नि सुऽद्रुं दधतः वक्षणासु यत्र कृ-

पीटमनु तद्हंति ॥८॥ शशः क्षुरं प्रत्यंचं जगारार्दिं लोगेन व्यभेदमारात् । वृहंतं चिद्हते रंधयानि वयद्त्सो वृषभं शूशुवानः ॥९॥ सुपर्ण इत्था नखमा सिषायावरुद्धः परिपदं न सिंहः । निरुद्धश्चिन्महिषस्तर्ष्यावान्गोधा तस्मा अयथं कर्पदेतत् ॥१०॥ तेभ्यो गोधा अयथं कर्पदेतद्ये ब्रह्मणः प्रतिपीयंत्यन्नैः । सिम उष्णोऽवसृष्टाँ अदंति स्वयं बलानि तन्वः शृणानाः ॥११॥ एते शमीभिः सुशमी अभूवन्ये हिन्विरे तन्वः सोमं उक्थैः । नृवद्वदन्नुप नो माहि वाजान्दिवि श्रवो दधिषे नाम वीरः ॥१२॥२१॥

॥ २९ ॥ १-८ वसुक्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥२९॥ वने न वा यो न्यधायि चाकन्छुचिर्वां स्तोमो भुरण्यवजीगः । यस्येदिंद्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान् ॥१॥ प्र तें अस्या उषसः प्रापरस्या नृतौ स्याम नृतमस्य नृणां । अनु त्रिशोकः शतमावहन्नृकुसेन रथो यो असत्सत्वान् ॥२॥ कस्ते मद इंद्र रंत्यो भूद्धरी गिरो अभ्युद्यो वि धावं । कदाहो अवागुप मा मनीषा आ त्वा शक्यामुपमं राधो अन्नैः ॥३॥ कदु द्युम्नमिंद्र त्वावतो नृन्कया धिया करसे कच्च आगंन । मिचो न सत्य उरुगाय भृत्या अन्ने समस्य यदसत्सनीयाः ॥४॥ प्रेरय सूरो अर्थं न पारं ये अस्य कामं जनिधा इव ग्मन् । गिरश्च ये ते तुविजात पूर्वीर्नरं इंद्र प्रतिशिक्षंत्यन्नैः ॥५॥२२॥ माता नु ते सुमिते इंद्र पूर्वी द्यौर्मज्मना पृथिवी काव्येन । वरांय ते घृतवंतः सुतासः स्वादंन्भवंतु पीतये मधूनि ॥६॥ आ मध्वो अस्मा असिचन्नमंचमिंद्राय पूर्णं स हि सत्यराधाः । स वावृधे वरिमन्ना पृथिव्या अभि

पीटं अनु तत् दृंहति ॥८॥ शशः क्षुरं प्रत्यंचं जगार अद्रिं लोगेन वि अभेदं आरात् बृहंतं चित् ऋहते रंधयानि वयंत् वत्सः वृषभं शूशुवानः ॥९॥ सुऽपर्णः इत्था नखं आ सिसाय अवंऽरुद्धः परिऽपदैं न सिंहः निऽरुद्धः चित् महिषः तर्षाऽवान् गोधा तस्मैं अयथं कर्षत् एतत् ॥१०॥ तेभ्यः गोधा अयथं कर्षत् एतत् ये ब्रह्मणः प्रतिऽपीयंति अन्नैः सिमः उक्षणः अवऽसृष्टान् अदंति स्वयं बलानि तन्वः शृणानाः ॥११॥ एते शमीभिः सुऽशमी अभूवन् ये हिन्विरे तन्वः सोमे उक्थैः नृऽवत् वदंन उपं नः माहि वाजान् दिविऽयवः दधिऽपे नामं वीरः ॥१२॥२१॥

॥२९॥ वनें न वा यः नि धायि चाकन् शुचिः वां स्तोमः भुरणौ अजीगः यस्य इत् इंद्रः पुरुऽदिनेषु होता नृणां नर्यः नृऽतमः क्षपाऽवान् ॥१॥ प्र ते अस्याः उषसः प्र अपरस्याः नृतौ स्याम नृऽतमस्य नृणां अनु चित् शोकः शतं आ अवहत् नृन् कुत्सेन रथः यः असंत् ससऽवान् ॥२॥ कः ते मदः इंद्र रंत्यः भूत् दुरः गिरः अभि उग्रः वि धाव् कत् वाहः अर्वाक् उपं मा मनीषा आ त्वा शक्यां उपऽमं राधः अन्नैः ॥३॥ कत् ऊं इति द्युम्नं इंद्र त्राऽवंतः नृन् कया धिया करसे कत् नः आ अगन् मित्रः न सत्यः उरुऽगाय भृत्यै अन्नैं समस्य यत् असन् मनीषाः ॥४॥ प्र ईरय सूरः अर्थं न पारं ये अस्य कामं जनिधाः इव ग्मन् गिरः च ये ते तुविऽजात पूर्वीः नरः इंद्र प्रतिऽशिक्षंति अन्नैः ॥५॥२२॥ माचें नु ते सुऽमितें इंद्र पूर्वी द्यौः मज्मना पृथिवी काव्येन वरायं ते घृतऽवंतः सुतासः स्वाद्मन् भवंतु पीतये मधूनि ॥६॥ आ मध्वः अस्मे असिचन् अमंचं इंद्राय पूर्णं सः हि सत्यऽराधाः सः ववृधे वरिमन् आ पृथिव्याः अभि

क्रत्वा नर्यः पौंस्यैश्च ॥७॥ व्यानळिंद्रः पृतनाः स्वोजा आसैं यतंते सख्यायं पूर्वीः। आ स्मा रथं न पृतनासु तिष्ठ यं भद्रया सुमत्या चोदयासे ॥ ८ ॥ २३ ॥ २ ॥

॥ ३० ॥ १–१५ क्षवप ऐलूषः ॥ आप अपांनपाद्वा ॥ त्रिष्टुप् ॥

॥३०॥ प्र देवत्रा ब्रह्मणे गातुरेत्वपो अच्छा मनसो न प्रयुक्ति। महीं मित्रस्य वरुणस्य धासिं पृथुज्रयसे रीरधा सुवृक्तिं ॥ १ ॥ अध्वर्यवो हविष्मंतो हि भूताच्छाप इतोशतीरुशंतः। अव याथ्वेटं अरुणः सुपर्णस्तमास्यध्वमूर्मिमद्या सुहस्ताः ॥२॥ अध्वर्यवोऽप इता समुद्रमपां नपातं हविषा यजध्वं। स वो ददूर्मिमद्या सुपूतं तस्मै सोमं मधुमंतं सुनोत ॥३॥ यो अग्निध्मो दीदयदप्स्वंतर्यं विप्रास ईळते अध्वरेषु। अपां नपान्मधुमतीरपो दा याभिरिंद्रो वावृधे वीर्याय ॥ ४ ॥ याभिः सोमो मोदते हर्षते च कल्याणीभिर्युवतिभिर्न मर्यः। ता अध्वर्यो अपो अच्छा परेहि यदासिंचा ओषधीभिः पुनीतात ॥ ५ ॥ २४ ॥ एवेद्यूने युवतयो नमंत यदीमुशन्नुशतीरेत्यच्छ। सं जानते मनसा सं चिकित्रेऽध्वर्यवो धिषणापश्च देवीः ॥ ६ ॥ यो वो वृताभ्यो अकृणोदु लोकं यो वो मह्या अभिशस्तेरमुंचत। तस्मा इंद्राय मधुमंतमूर्मिं देवमादनं प्र हिणोतनापः ॥ ७ ॥ प्रास्मै हिनोत मधुमंतमूर्मिं गर्भो यो वः सिंधवो मध्व उत्सः। घृतपृष्ठमीड्यमध्वरेष्वापो रेवतीः शृणुता हवं मे ॥ ८ ॥ तं सिंधवो मत्सरमिंद्रपानंमूर्मिं प्र हेत य उभे इयर्ति। मदच्युतमौशनं नभोजां परि चितंतुं विचरंतमुत्सं ॥ ९ ॥ आववृत्तंतीरनु दिधारां गोपुयुधो न नियवं चरंतीः। ऋषे जनित्रीर्भुवनस्य पत्नीरपो वंदस्व सुवृधः सयोनीः

ऋत्वा नयैः पौंस्यैः च ॥७॥ वि आनट् इंद्रः पृतनाः सुऽओजाः आ अस्मे यतंते सख्याय पूर्वीः आ स्म रथं न पृतनासु तिष्ठ यं भद्रया सुऽमत्या चोदयासे ॥ ८ ॥ २३ ॥ २ ॥

॥३०॥ प्र देवऽचा ब्रह्मणे गातुः एतु अपः अच्छ मनसः न प्रऽयुक्ति महीं मित्रस्य वरुणस्य धासिं पृथुऽज्रयसे रीरधसुऽवृक्तिं॥१॥ अध्वर्यवः हविष्मंतः हि भूत अच्छ अपः इत उशतीः उशंतः अवं याः चष्टे अरुणः सुऽपर्णः तं आ अस्यध्वं ऊर्मिं अद्य सुऽहस्ताः॥२॥ अध्वर्यवः अपः इत समुद्रं अपां नपातं हविषा यजध्वं सः वः ददत् ऊर्मिं अद्य सुऽपूतं तस्मै सोमं मधुऽमंतं सुनोत॥३॥ यः अग्निध्मः दीदयत् अप्ऽसु अंतः यं विप्रासः ईळते अध्वरेषु अपां नपात् मधुऽमतीः अपः दाः याभिः इंद्रः ववृधे वीर्याय॥४॥ याभिः सोमः मोदते हर्षते च कल्याणीभिः युवतिऽभिः न मर्यैः ताः अध्वर्यो अपः अच्छ परा इहि यत आऽसिंचाः ओषधीभिः पुनीतात् ॥५॥२४॥ एव इत् यूने युवतयः नमंत यत् ई उशन् उशतीः एति अच्छ सं जानते मनसा सं चिकित्रे अध्वर्यवः धिषणा आपः च देवीः॥६॥ यः वः वृताभ्यः अकृणोत् लोकं यः वः महीभ्यः अभिऽशस्तेः अमुंचत् तस्मै इंद्राय मधुऽमंतं ऊर्मिं देवऽमादनं प्र हिणोतन आपः ॥७॥ प्र अस्मे हिनोत मधुऽमंतं ऊर्मिं गर्भः यः वः सिंधवः मध्वः उत्सः घृतऽपृष्ठं ईड्यं अध्वरेषु आपः रेवतीः शृणुत हवं मे॥८॥ तं सिंधवः मत्सरं इंदुऽपानं ऊर्मिं प्र हेत यः उभे इयर्ति मदुऽच्युतं श्रीणानं नभःऽजां परि विऽतंतुं विऽचरंतं उत्सं॥९॥ आऽववृत्ततीः अध नु द्विऽधाराः गोषुऽयुधः न निऽयवं चरंतीः पृषे जनिंचीः भुवनस्य पत्नीः अपः वंदस्व सऽवृधः सऽयोनीः

॥१०॥२५॥ हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानां । ऋतस्य योगे वि ष्यध्वमूधः श्रुष्टीवरीर्भूतनासम्यंमापः ॥११॥ आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च । रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद्गृणते वयो धात् ॥१२॥ प्रति यदापो अदृश्रमायतीघृतं पयांसि बिभ्रतीर्मधूनि । अध्वर्युभिर्मनसा संविदाना इंद्राय सोमं सुषुतं भरंतीः ॥१३॥ एमा अग्मन्रेवतीर्जीवधन्या अध्वर्यवः सादयता सखायः । नि बर्हिषि धत्तन सोम्यासोऽपां नप्त्रा संविदानासं एनाः ॥१४॥ आग्मन्नापं उशतीर्बर्हिरेदं न्यध्वरे असदन्देवयंतीः । अध्वर्यवः सुनुतेंद्राय सोममभूदु वः सुशका देवयज्या ॥१५॥२६॥

॥ ३१ ॥ १-११ कवष ऐलूषः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥३१॥ आ नो देवानामुप वेतु शंसो विश्वेभिस्तुरैरवसे यजत्रः । तेभिर्वयं सुप्रजायो भवेम तरंतो विश्वा दुरिता स्याम ॥१॥ परि चिन्मर्तो द्रविणं ममन्याद्ऋतस्य पथा नमसा विवासेत् । उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात् ॥२॥ अधायि धीतिरसमृषमंगास्तीर्थे न दस्ममुप यंत्यूमाः । अभ्यानग्म सुविताय नव्यसो अमृतानामभूम ॥३॥ नित्यश्चाकन्यात्स्वपतिर्दमूना यस्मा उ देवः सविता जजानं । भगो वा गोभिर्यमेमनज्यात्सो अस्मे चारुर्हृदयदुत स्यात् ॥४॥ इयं सा भूया उपसामिव क्षा यद्द्रुमंतः शकुनासो अक्रन् । अस्य स्तुतिं जरितुर्भिक्षमाणा आ नः शग्मास उप यंतु वाजाः ॥५॥२७॥ अस्येदेषा सुमतिः पंप्रथानाभवत्पूर्व्या भूमना गीः । अस्य सनीळा असुरस्य योनौ समान आ भरणे

॥१०॥२५॥ हिनोत नः अध्वरं देवऽयज्या हिनोत ब्रह्म सनये धनानां ऋतस्य योगे वि स्यध्वं ऊधः पृष्टीऽवरीः भूतन अस्मभ्यं आपः ॥११॥ आपः रेवतीः क्षयथ हि वस्वः क्रतुं च भद्रं बिभृथ अमृतं च रायः च स्थ सुऽअपत्यस्य पत्नीः सरस्वती तत् गृणते वयः धात् ॥१२॥ प्रति यत् आपः अदृश्रं आऽयतीः घृतं पयांसि बिभ्रतीः मधूनि अध्वर्युऽभिः मनसा संऽविदानाः इंद्राय सोमं सुऽसुतं भरंतीः ॥१३॥ आ इमाः अग्मन् रेवतीः जीवऽधन्याः अध्वर्यवः सादयत सखायः नि बर्हिषि धत्तन सोम्यासः अपां नप्त्रा संऽविदानासः एनाः ॥१४॥ आ अग्मन् आपः उशतीः बर्हिः आ इदं नि अध्वरे असदन् देवऽयंतीः अध्वर्यवः सुनुत इंद्राय सोमं अभूत् ऊं वः सुऽशकाः देवऽयज्या ॥ १५ ॥ २६ ॥

॥३१॥ आ नः देवानां उप वेतु शंसः विश्वेभिः नृऽभिः अवसे यजत्रः तेभिः वयं सुऽसखायः भवेम तरंतः विश्वा दुःऽइता स्याम ॥१॥ परि चित् मतेः द्रविणं ममन्यात् ऋतस्य पथा नमसा आ विवासेत् उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात् ॥२॥ अधा यथा नितिः असमृग्ण ओजः तीर्थे न दस्मं उप यंति ऊमाः अभि आनश्म सुविताय पूषं नवेदसः अमृतानां अभूम ॥३॥ नित्यः चाकन्यात् स्वऽपतिः दमूनाः यस्मै ऊं देवः सविता जजान भगः वाजेभिः अर्यमा इंद्र अनज्यात् सः असि चारुः छदयत् उत स्यात् ॥४॥ इयं सा भूयाः उपसाऽइव क्षाः यत् ह क्षुऽमंतः शवसा संऽआयन् अस्य स्तुतिं जरितुः भिक्षमाणाः आ नः अग्मासः उभयं यंतु वाजाः ॥५॥२७॥ अस्य इत् एषा सुऽमतिः पप्रथाना अभवत् पूर्व्या भूमना गौः अस्य सऽनीळाः असुरस्य योनौ समाने आ भरणे

विभ्रमाणाः ॥६॥ किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः । संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरन्त ॥७॥ नेतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी विभर्ति । त्वचं पवित्रं कृणुत स्वधावान्यदी सूर्यं न हरितो वहन्ति ॥८॥ स्तेगो न क्षामन्येति पृथ्वी मिहं न वातो वि ह वाति भूम । मित्रो यत्र वरुणो अज्यमानोऽग्निर्वने न व्यसृष्ट शोकै ॥९॥ स्तरीर्यसूत सद्यो अज्यमाना व्यधिरव्यथीः कृणुत स्वगोपा । पुत्रो यत्पूर्वः पितोर्जनिष्ट शम्यां गौजेगार यद्ध पृच्छान ॥१०॥ उत कण्वं नृषदः पुत्रमाहुरुत श्यावो धनमादत्त वाजी । प्र कृष्णाय रुशदपिन्वतोधक्षीतमव नकिरस्मा अपीपेत् ॥११॥२८॥

॥ ३२ ॥ १-९ कवष ऐलूषः ॥ विश्वे देवाः ॥ १-५ जगती । ६-९ त्रिष्टुप् ॥

॥३२॥ प्र सु ग्मंता धियसानस्य सक्षणिं वरेभिर्वराँ अभि पु प्रसीदतः । अस्माकमिंद्रं उभयं जुजोषति यत्सोम्यस्यांधसो बुबोधति ॥१॥ वींद्र यासि दिव्यानि रोचना वि पार्थिवानि रजसा पुरुष्टुत । ये त्वा वहन्ति मुहुरध्वराँ उप ते सु वन्वंतु वग्वनाँ अराधसः ॥२॥ तदिन्मे छंत्सद्यपुपो वपुष्टरं पुत्रो यज्जानं पितोरधीयति । जाया पतिं वहति वसुना सुमत्पुंस इन्द्रो वंहतुः परिष्कृतः ॥३॥ तदित्सधस्थमभि चारु दीधय गावो यत्छासन्वहतुं न धेनवः । माता यत्मंतुर्यूथस्य पूर्व्याभि वाणस्य सप्रथांतुरिज्जनः ॥४॥ प्र वोऽच्छा रिरिचे देवयुष्पदमेकों रुद्रेभिर्यांति तुर्वणिः । जरा वा येष्वमृतेषु दावने परि व ऊमेभ्यः सिंचता मधु ॥५॥२९॥ निधीयमानमपगूळ्हमप्सु प्र मे देवानां व्रतपा उवाच । इंद्रो विद्वाँ अनु

विभ्रमाणाः॥६॥ किं स्वित् वनं कः उ सः वृक्षः आस यतः द्यावा-पृथिवी निः ऽततक्षुः संऽतस्थाने अजरे इतः ऽऊती अहानि पूर्वीः उषसः जरन्त॥७॥ न एतावत् एना परः अन्यत् अस्ति उक्षा सः द्यावापृथिवी विभर्ति त्वचं पवित्रं कृणुत स्वधाऽवान् यत् ईं सूर्येण हरितः वहन्ति॥८॥ स्तेगः न क्षां अति एति पृश्निः मिहं न वातः वि ह वाति भूम मित्रः यत्र वरुणः अज्यमानः अग्निः वने न वि अमृष्ट शोकै॥९॥ स्तरीः यत् सूनं सहः अज्यमाना व्यथिः अव्यथीः कृणुत स्वऽगोपा पुत्रः यत् पूर्वैः पित्रोः जनिष्ट शम्यां गौः जगार यत् ह पृच्छान्॥१०॥ उत कण्वं नृऽसदः पुत्रं आहुः उत श्यावः धनं आ अदत्त वाजी प्र कृष्णाय रुशत् अपिन्वत् ऊधः ऋतं अत्र नकिः अस्मै अपीपेत॥ ११॥ २८॥

॥३२॥ प्र सु ग्मंता धियसानस्य सक्षणिं वरेभिः वरान् अभि सु प्रऽसीदतः अस्माकं इंद्रः उभयं जुजोषति यत् सोम्यस्य अंधसः बुबोधति॥१॥ वि इंद्र यासि दिव्यानि रोचना वि पार्थिवानि रजसा पुरुऽस्तुत ये त्वा वहन्ति मुहुः अध्वरान उप ते सु वन्वंतु वग्वनान् अराधसः॥२॥ तत् इत् मे छंत्सत् वपुषः वपुःऽतरं पुत्रः यत् जानं पित्रोः अधिऽइयति जाया पतिं वहति वपुषा सुऽअत् पुंसः इत् भद्रः वहतुः परिऽकृतः॥३॥ तत् इत् सधऽस्थं अभि चारु दीधयुः गावः यत् शासन् वहतुं न धेनवः माता यत् मंतुः यूथस्य पूर्व्या अभि वाणस्य सप्तऽधातुः इत् जनः॥४॥ प्र वः अच्छं रिरिचे देवऽयुः पदं एकः रुद्रेभिः याति तुर्वणिः जरा वा येषु अमृतेषु दावने परि वः ऊमेभ्यः सिंचत मधु॥५॥ २९॥ निऽधीयमानं अपऽगूळ्हं अप्ऽसु प्र मे देवानां व्रतऽपाः उवाच इंद्रः विद्वान् अनु

हित्वां चचक्षुतेनाहमग्ने अनुशिष्ट आगां ॥६॥ अक्षेचवित्क्षेच-
विद्ह्यप्राट् स प्रेतिं क्षेचविदानुशिष्टः। एतद्वै भद्रमनुशासन-
स्योत स्तुतिं विंदत्यंजसीनां ॥७॥ अद्येदु प्राणीदमंमन्निमाहा-
पींवृतोअधयन्मातुरूधः।एमेनमाप जरिमा युवानमहेळन्वसुः
सुमना बभूव ॥८॥ एतानिं भद्रा कलश क्रियाम् कुरुश्रवण
ददतो मघानिं। दान इद्वो मघवानः सो अस्त्वयं च सोमो हृदि
यं विभर्मि ॥९॥३०॥७॥

॥ ३३ ॥ १-९ कवष ऐलूष. ॥ १ विश्वे देवाः । २.३ इंद्रः । ४.५ कुरुश्रवणस्य चासदस्यवस्य दानस्तुतिः । ६-९ उपमश्रवा मिवातिथिपुत्रः ॥ १ त्रिष्टुप् । २ बृहती । ३ सतोबृहती । ४-९ गायत्री ॥

॥३३॥ प्र मा युयुज्रे प्रयुजो जनानां वहामि स्म पूषणमंतरेण।
विश्वेदेवासो अधमामरक्षन्दुःशासुरागादितिं घोषंआसीत्॥१॥
संमा तपंत्यभितःसपत्नीरिव पशवः।नि वांधते अमंतिर्नग्रता
जसुर्वेर्नवेवीयते मतिः॥२॥ मूषो न शिश्ना व्यदंति माध्यः स्तोतारं
ते शतक्रतो। सकृत्सु नो मघवन्निंद्र मृळयाधा पितेव नो भव
॥३॥ कुरुश्रवणमावृणि राजानं चासदस्यवं। मंहिष्ठं वाघता-
मृषिं ॥४॥ यस्य मा हरितो रथे तिस्रो वहंति साधुया। स्तवै
सहस्रदक्षिणे॥५॥१॥ यस्य प्रस्वादसो गिरं उपमश्रवसः पितुः।
क्षेवं न रण्वमूचुषे ॥६॥ अधि पुचोपमश्रवो नपान्नेचाति-
थेरिहि। पितुष्टे अस्सि वंदिता ॥७॥ यदीशीयामृतानामुत
वा मर्त्यानां। जीवेदिन्मघवा ममं ॥८॥ न देवानामतिं व्रतं
शतात्मा चन जीवति। तथा युजा वि वावृते ॥९॥२॥

॥ ३४ ॥ १-१४ कवष ऐलूष अग्नी वा मीळ्हवान् ॥ १. ७. ९ १२. १३ अघकृत्वि-प्रशंसा । २-६. ८ १० ११. १४ अघकृतवनिंदा ॥ १-६. ८-१४ त्रिष्टुप् । ७ जगती ॥

॥३४॥ प्रवेपा मा बृहतो मादयंति प्रवातेजा इरिणे ववृ-

हित्वा चचक्षं नेनं अहं अग्ने अनुऽशिष्टः आ अगां॥६॥ अधेचऽवित् धेचऽविदं हि अप्राट् सः प्र एति धेचऽविदा अनुऽशिष्टः एतत् वै भद्रं अनुऽशासनस्य उत स्तुतिं विंदति अंजसीनां॥७॥ अद्य इत् ऊं प्र शंसानीत् अमंमन् इमा अहां अपिऽवृतः अधयत मातुः ऊधः आ ईं एनं आप जरिमा युवानं अहेळन् वसुः सुऽमनाः बभूव॥८॥ एतानि भद्रा कलश क्रियाम कुरुऽश्रवण ददतः मघानि दानः इत् वः मघऽवानः सः अस्तु अयं च सोमः हृदि यं बिभर्मि॥९॥३०॥७॥

॥३३॥ प्र मा युयुज्रे प्रऽयुजः जनानां वहामि स्म पूषणं अंतरेण विश्वे देवासः अध मा अरक्षन् दुःऽशासुः आ अगात् इति घोषः आसीत्॥१॥ सं मा तपंति अभितः सपत्नीःऽइव पशेवः नि वाधते अमतिः नग्नता जसुः वेः न वेवीयते मतिः॥२॥ मूषः न शिश्ना वि अदंति मा आऽध्यः स्तोतारं ते शतऽक्रतो॰ सकृत् सु नः मघऽवन् इंद्र मृळय अध पिताऽइव नः भव॥३॥ कुरुऽश्रवणं अवृणि राजानं चासदस्यवं मंहिष्ठं वाघतां ऋषिः॥४॥ यस्य मा हरितः रथे तिस्रः वहंति साधुऽया स्तवै सहस्रऽदक्षिणे॥५॥१॥ यस्य प्रऽस्वादसः गिरः उपमऽश्रवसः पितुः धेचैन रणं ऊचुषे॥६॥ अधि पुचः उपमऽश्रवः नपात् मित्रऽअतिथेः इहि पितुः ते अस्मि वंदिता॥७॥ यत् ईशीय अमृतानां उत वा मर्त्यानां जीवेत् इत् मघऽवा ममं॥८॥ न देवानां अतिऽव्रतं शतऽआत्मा चन जीवति तथा युजा वि वृते॥९॥२॥

॥३४॥ प्र वेपाः मा बृहतः मादयंति प्रऽवातेऽजाः इरिणे ववृ-

नानाः। सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान् ॥१॥ न मा मिमेथ न जिहीळ एषा शिवा सखिभ्य उत मह्यमासीत्। अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधं ॥२॥ द्वेष्टि श्वश्रूरप जाया रुणद्धि न नाथितो विंदते मर्डितारं। अश्वस्येव जरतो वस्त्यस्य नाहं विंदामि कितवस्य भोगं ॥३॥ अन्ये जायां परि मृशंत्यस्य यस्यागृधद्वेदने वाज्यक्षः। पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतं ॥४॥ यदादीध्ये न दविषाण्येभिः परायद्भ्योऽवं हीये सखिभ्यः। न्युप्ताश्च बभ्रवो वाचमक्रतँ एमीदेषां निष्कृतं जारिणीव ॥५॥३॥ सभामेति कितवः पृच्छमानो जेष्यामीति तन्वा शूशुजानः। अक्षासो अस्य वि तिरंति कामं प्रतिदीव्ने दधत आ कृतानि ॥६॥ अक्षास इदंकुशिनो नितोदिनो निकृत्वानस्तपनास्तापयिष्णवः। कुमारदेष्णा जयंतः पुनर्हणो मध्वा संपृक्ताः कितवस्य बर्हणा ॥७॥ त्रिपंचाशः क्रीळति व्रात एषां देव इव सविता सत्यधर्मा। उग्रस्य चिन्मन्यवे ना नमंते राजा चिदेभ्यो नम इत्कृणोति ॥८॥ नीचा वर्तंत उपरि स्फुरंत्यहस्तासो हस्तवंतं सहंते। दिव्या अंगारा इरिणे न्युप्ताः शीताः संतो हृदयं निर्दहंति ॥९॥ जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित्। ऋणावा बिभ्यदधनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥१०॥४॥ स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिं। पूर्वाह्णे अश्वान्युयुजे हि बभ्रून्सो अग्नेरंते वृषलः पपाद ॥११॥ यो वः सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव। तस्मै कृणोमि न धना रुणध्मि दशाहं प्राचीस्तदृतं वदामि ॥१२॥ अक्षै-

तानाः सोमस्यऽइव मौजऽवतस्य भक्षः विऽभीदकः जागृविः महाँ अच्छान॥१॥ न मा मिमेथ न जिहीळे एषा शिवा सखिऽभ्यः उत महाँ आसीत् अक्षस्य अहं एकऽपरस्य हेतोः अनुऽव्रतां अप जायां अरोधं॥२॥ द्वेष्टि श्वश्रूः अप जाया रुणद्धि न नाथितः विंदते मर्डितारं अश्वस्यऽइव जरतः वस्यस्य न अहं विंदामि कितवस्य भोगं॥३॥ अन्ये जायां परि मृशंति अस्य यस्य अगृधत् वेदने वाजी अक्षः पिता माता भ्रातरः एनं आहुः न जानीमः नयत बद्धं एतं॥४॥ यत् आऽदीध्ये नदविषाणि एभिः परायतऽभ्यः अवऽहीये सखिभ्यः निऽउप्नाः च बभ्रवः वाचं अक्रत एमिं इत् एषां निःऽकृतं जारिणीऽइव॥५॥३॥ सभां एति कितवः पृच्छमानः जेष्यामि इति तन्वा शूशुजानः अक्षासः अस्य वि तिरंति कामं प्रतिऽदीव्ने दधतः आ कृतानिं॥६॥ अक्षासः इत् अंकुशिनः निऽतोदिनः निऽकृत्वानः तपनाः तापयिष्णवः कुमारऽदेष्णाः जयंतः पुनःऽहनः मध्वा संऽपृक्ताः कितवस्य बर्हणा॥७॥ त्रिऽपंचाशः क्रीळति व्रातः एषां देवःऽइव सविता सत्यऽधर्मा उग्रस्य चित् मन्यवे न नमंते राजा चित् एभ्यः नमः इत् कृणोति॥८॥ नीचा वर्तते उपरिं स्फुरंति अहस्तासः हस्तऽवंतं सहंते दिव्याः अंगाराः इरिणे निऽउप्नाः शीताः संतः हृदयं निःदहंति॥९॥ जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् ऋणऽवा बिभर्ति धनं इच्छमानः अन्येषां अस्तं उपनक्तं एति॥१०॥४॥ स्त्रियं दृष्ट्वाय कितवं ततापऽ अन्येषां जायां सुऽकृतं च योनिं पूर्वाह्णे अश्वान् युयुजे हि बभ्रून् सः अग्नेः अंते वृषलः पपाद॥११॥ यः वः सेनाऽनीः महतः गणस्य राजा व्रातस्य प्रथमः बभूव तस्मै कृणोमि नमधनाय रुणध्मि दशं अहं प्राचीं तत ऋतं वदामि॥१२॥ अक्षैः

मो दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः । तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः ॥१३॥ मित्रं कृणुध्वं खलु मृळता नो मा नो घोरेण चरताभि धृष्णु । नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु ॥१४॥५॥

॥ ३५ ॥ १–१४ नृषदो धानाकः ॥ विश्वे देवाः ॥ १-१२ जगती । १३. १४ त्रिष्टुप् ॥

॥ ३५ ॥ अवुंध्रमु त्य इंद्रवंतो अग्नयो ज्योतिर्भरंत उषसो व्युष्टिषु । मही द्यावापृथिवी चेततामपोऽद्या देवानामव आ वृणीमहे ॥१॥ दिवस्पृथिव्योरव आ वृणीमहे मातृन्त्संधून्पितॄञ्छर्यणावतः । अनागास्त्वं सूर्यमुपासंमीमहे भद्रं सोमः सुवानो अद्या कृणोतु नः ॥२॥ द्यावा नो अद्य पृथिवी अनागसो मही चायेतां सुविताय मातरा । उषा उच्छंत्यप बाधतामघं स्वस्त्यग्निं समिधानमीमहे ॥३॥ इयं न उषा प्रथमा सुदेव्यं रेवत्सनिभ्यो रेवती व्युच्छतु । आरे मन्युं दुर्विदत्रस्य धीमहि स्वस्त्यग्निं समिधानमीमहे ॥४॥ प्र याः सिस्रते सूर्यस्य रश्मिभिर्ज्योतिर्भरंतीरुषसो व्युष्टिषु । भद्रा नो अद्य पर्वसे व्युच्छत स्वस्त्यग्निं समिधानमीमहे ॥५॥६॥ अनमीवा उपस आ चरंतु न उदग्नयो जिहतां ज्योतिषा बृहत् । आयुद्धाताममृधिना तनूजिं रथं स्वस्त्यग्निं समिधानमीमहे ॥६॥ श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमा सुव स हि रत्नधा असि । रायो जनित्रीं धिषणामुप ब्रुवे स्वस्त्यग्निं समिधानमीमहे ॥७॥ पिपर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुषाꣳअमन्महि । विषा द्रुहाः स्मदुतेति सूर्यः स्वस्त्यग्निं समिधानमीमहे ॥८॥ अद्वेषो अद्य बर्हिषः स्तरीमणि यावाणा योगे मन्मनः साधदिमहे । आदित्यानां शर्मणि स्था भुरण्यसि स्वस्त्यग्निं समि-

मा दीव्यः कृषिं इत् कृषस्व वित्ते रमस्व बहु मन्यमानः तत्र गावः कितव तत्र जाया तत् मे वि चष्टे सविता अयं अर्यः॥१३॥ मित्रं कृणुध्वं खलु मृळत नः मा नः घोरेण चरत अभि घृणिना वः नु मन्युः विशतां अरातिः अन्यः बभ्रूणां प्रऽसितौ नु अस्तु॥१४॥५॥

॥३५॥ अर्वाङ् ऊं षु ये इंद्रंऽवंतः अग्नयः ज्योतिः भरंतः उपसः विऽउष्टिषु मही द्यावापृथिवी चेततां अपः अद्य देवानां अवः आ वृणीमहे॥१॥ दिवःपृथिव्योः अवः आ वृणीमहे मातृन् सिंधून पर्वतान् शर्यणाऽवतः अनागाःऽत्वं सूर्यं उषसं ईमहे भद्रं सोमः सुवानः अद्य कृणोतु नः॥२॥ द्यावा नः अद्य पृथिवी अनागसः मही चायेतां सुविताय मातरा उषाःउच्छंती अपं बाधतां अघं स्वस्ति अग्निं संऽइधानं ईमहे॥३॥ इयं नः उषा प्रथमा सुऽदेव्यं रेवत् मनिऽभ्यः रेवती वि उच्छतु आरे मन्युं दुःऽविदत्रस्य धीमहि स्वस्ति अग्निं संऽइधानं ईमहे॥४॥ प्र याः सिसते सूर्यस्य रश्मिऽभिः ज्योतिः भरंतीः उषसः विऽउष्टिषु भद्राः नः अद्य श्रवसे वि उच्छत स्वस्ति अग्निं संऽइधानं ईमहे॥५॥६॥ अनमीवाः उषसः आ चरंतु नः उत अग्नयः जिहतां ज्योतिषा बृहत अयुक्षातां अश्विना तूतुजिं रथं स्वस्ति अग्निं संऽइधानं ईमहे॥६॥ येषं नः अद्य सवितः वरेण्यं भागं आ सुव सः हि रत्नऽधाः असि रायः जनिता धिषणां उप ब्रुवे स्वस्ति अग्निं संऽइधानं ईमहे॥७॥ पिपर्तु मा तत् ऋतस्य प्रऽवाचनं देवानां यत् मनुष्याः अमंन्महि विश्वाः इत् उषाः स्पृत् उत् एति सूर्यः स्वस्ति अग्निं संऽइधानं ईमहे॥८॥ अद्येषः अद्य बर्हिषः स्तरीमणि याच्ञां योगे मन्मनः साधं ईमहे आदित्यानां शर्मणि स्याः भुरण्यसि स्वस्ति अग्निं संऽइ-

धानमीमहे ॥९॥ आ नो बर्हिः सधमादे बृहद्दिवि देवाँ ईळे सादया सप्त होतॄन्। इंद्रं मित्रं वरुणं सातये भगं स्वस्त्यग्निं समिधानमीमहे ॥१०॥७॥ त आदित्या आ गता सुवीर्तांतये वृधे नो यज्ञमवता सजोषसः। बृहस्पतिं पूषणमश्विना भगं स्वस्त्यग्निं समिधानमीमहे ॥११॥ तन्नो देवा यच्छत सुप्रवाचनं क्षयदीरादित्याः सुभरं नृपाय्यं। पक्षे तोकाय तनयाय जीवसे स्वस्त्यग्निं समिधानमीमहे ॥१२॥ विश्वे अद्य मरुतो विश्व ऊती विश्वे भवंत्वग्नयः समिद्धाः। विश्वे नो देवा अवसा गमंतु विश्वमस्तु द्रविणं वाजो अस्मे ॥१३॥ यं देवासोऽवथ वाजसातौ यं शायध्वे यं पिपृथात्यंहः। यो वो गोपीथे न भयस्य वेद ते स्याम देववीतये तुरासः ॥१४॥८॥

॥ ३६ ॥ १-१४ भृगो धानाकः ॥ विश्वे देवाः ॥ १-१२ जगती। १३ १४ त्रिष्टुप् ॥

॥३६॥ उपासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा। इंद्रं हुवे मरुतः पर्वतान्अप आदित्यान्द्यावापृथिवी अपः स्वः ॥१॥ द्यौष्ट्व नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसो रिषः। मा दुर्विदत्रा निर्ऋतिर्नो ईशत तद्देवानामवो अद्या वृणीमहे ॥२॥ विश्वेसान्नो अदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः। स्वर्वज्ज्योतिरवृकं नशीमहि तद्देवानामवो अद्या वृणीमहे ॥३॥ यावा वदन्नप रक्षाँसि सेधतु दुःष्वप्न्यं निर्ऋतिं विश्वमत्रिणं। आदित्यं शर्म मरुतामशीमहि तद्देवानामवो अद्या वृणीमहे ॥४॥ एंद्रो बर्हिः सीदतु पिन्वतामिळा बृहस्पतिः सामभिर्ऋक्वो अर्चतु। सुप्रकेतं जीवसे मन्म धीमहि तद्देवानामवो अद्या वृणीमहे ॥५॥९॥ दिविस्पृशं यज्ञमस्माकमश्विना जीराध्वरं कृणुतं

धानं ईमहे ॥९॥ आ नः बर्हिः सधऽमादे बृहत् दिवि देवान् ईळे सादयं सप्त होतॄन् इंद्रं मित्रं वरुणं सातये भगं स्वस्ति अग्निं संऽइधानं ईमहे ॥१०॥७॥ ते आदित्याः आ गत सर्वतातये वृधे नः यज्ञं अवत सऽजोषसः बृहस्पतिं पूषणं अश्विना भगं स्वस्ति अग्निं संऽइधानं ईमहे ॥११॥ तत् नः देवाः यच्छत सुऽप्रवाचनं द्यौः आदित्याः सुऽभरं नृऽपाय्यं पस्त्ये तोकाय तनयाय जीवसे स्वस्ति अग्निं संऽइधानं ईमहे ॥१२॥ विश्वे अद्य मरुतः विश्वे ऊती विश्वे भवंतु अग्नयः संऽइद्धाः विश्वे नः देवाः अवसा आ गमंतु विश्वं अस्तु द्रविणं वाजः अस्मे ॥१३॥ यं देवासः अवथ वाजऽसातौ यं चायध्ये यं पिपृथ अतिं अंहः यः वः गोऽपीथे नभयस्य वेदत् ते स्याम देवऽवीतये तुरासः ॥१४॥८॥

॥३६॥ उपसानक्ता बृहती सुऽपेशसा द्यावाक्षामा वरुणः मित्रः अर्यमा इंद्रं हुवे मरुतः पर्वतान् अपः आदित्यान् द्यावापृथिवी अपः स्वः ॥१॥ द्यौः च नः पृथिवी च प्रऽचेतसा ऋतऽवरी रक्षातां अंहसः रिषः मा दुःऽविदत्रा निःऽऋतिः नः ईशत तत् देवानां अवः अद्य वृणीमहे ॥२॥ विश्वसात् नः अदितिः पातु अंहसः माता मित्रस्य वरुणस्य रेवतः स्वःऽवत् ज्योतिः अवृकं नशीमहि तत् देवानां अवः अद्य वृणीमहे ॥३॥ यावा वदन्न अप रक्षांसि सेधतु दुःऽस्वप्न्यं निःऽऋतिं विश्वं अचिर्णं आदित्यं शर्म मरुतां अशीमहि तत् देवानां अवः अद्य वृणीमहे ॥४॥ आ इंद्रः बर्हिः सीदतु पिन्वतां इळा बृहस्पतिः सामऽभिः ऋक्षः अर्चतु सुऽप्रकेतं जीवसे मन्म धीमहि तत् देवानां अवः अद्य वृणीमहे ॥५॥९॥ दिविऽस्पृशं यज्ञं अस्माकं अश्विना जीराऽध्वरं कृणुतं

सुम्नमिष्टये। प्राचीनरश्मिमाहुतं घृतेन तद्देवानामवो अद्या वृणीमहे ॥ ६ ॥ उप ह्वये सुहवं मारुतं गणं पावकमृष्वं सख्याय शंभुवं। रायस्पोषं सौश्रवसाय धीमहि तद्देवानामवो अद्या वृणीमहे ॥ ७ ॥ अपां पेरुं जीवधन्यं भरामहे देवाव्यं सुहवंमध्वरश्रियै। सुरश्मिं सोममिंद्रियं यमीमहि तद्देवानामवो अद्या वृणीमहे ॥ ८ ॥ सनेम तत्सुसनितां सनित्वभिर्वयं जीवा जीवपुत्रा अनागसः। ब्रह्मद्विषो विष्वगेनो भरेरत तद्देवानामवो अद्या वृणीमहे ॥ ९ ॥ ये स्था मनोर्यज्ञियास्ते शृणोतन यद्वो देवा ईमहे तद्दातन। जैत्रं क्रतुं रयिमद्वीरवद्यशस्तद्देवानामवो अद्या वृणीमहे ॥ १० ॥ १० ॥ महद्यक्ष्मा वृणीमहेऽवो देवानां बृहतामनर्वणां। यथा वसु वीरजातं नशामहै तद्देवानामवो अद्या वृणीमहे ॥ ११ ॥ महो अग्नेः समिधानस्य शर्मण्यनेहसो मित्रे वरुणे स्वस्तये। अश्वे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ॥ १२ ॥ ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः। ते सौभगं वीरवद्गोमदग्नो दधातन द्रविणं चित्रमस्मे ॥ १३ ॥ सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरादात्। सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥ १४ ॥ ११ ॥

॥ ३७ ॥ १-१२ अभितपाः सौर्यः ॥ सूर्यः ॥ १-९ ११. १२ जगती। १० विष्टुप् ॥

॥ ३७ ॥ नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत। दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत ॥ १ ॥ सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र ततनन्नहानि च। विश्वमन्यन्नि विशते यदेजति विश्वाहापो

सुम्नंऽइत्ये प्राचीनंऽरश्मिं आऽहुंतं घृतेनं तत् देवानाँ अवंः अद्य वृणीमहे॥६॥ उपंऽहूये सुऽहवंमारुतं गणं पावकं ऋष्वं सख्यायं शंऽभुवं रायः पोषं सौश्रवसाय धीमहि तत् देवानाँ अवंः अद्य वृणीमहे॥७॥ अपां पेरुं जीवऽधन्यं भरामहे देवऽअव्यं सुऽहवं अध्वरऽश्रियं सुऽरश्मिं सोमं इंद्रियं यमीमहि तत् देवानाँ अवंः अद्य वृणीमहे॥८॥ सनेमं तत् सुऽसनितां सनित्वंऽभिः वयं जीवाः जीवऽपुंचाः अनांगसः ब्रह्मऽद्विषः विष्वंक् एनंः भरेरत तत् देवानाँ अवंः अद्य वृणीमहे॥९॥ ये स्थ मनोंः यज्ञियाः ते शृणोतन यत् वः देवाः ईमहे तत् ददातन जैवं ऋतुं रयिमत् वीरऽवंत यशंः तत् देवानाँ अवंः अद्य वृणीमहे॥१०॥१०॥ महत् अद्य महतां आ वृणीमहे अवंः देवानाँ बृहतां अनर्वणां यथा वसुं वीरऽजातं नशामहै तत् देवानाँ अवंः अद्य वृणीमहे॥११॥ महः अग्नेः संऽइधानस्य शर्मणि अनांगाः मित्रे वरुणे स्वस्तये श्रेष्ठे स्याम सवितुः सवींमनि तत् देवानाँ अवंः अद्य वृणीमहे॥१२॥ ये सवितुः सत्यऽसंवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः ते सौभगं वीरऽवंत गोऽमंत अग्नेः दधातन द्रविणं चित्रं अस्मे॥१३॥ सविता पश्चातात् सविता पुरस्तात् सविता उत्तरात्तात् सविता अधरात्तात् सविता नः सुवतु सर्वऽतातिं सविता नः रासतां दीर्घं आयुः॥१४॥११॥

॥३७॥ नमः मित्रस्य वरुणस्य चक्षसे महः देवाय तत् ऋतं सपर्यत दूरेऽदृशे देवऽजाताय केतवे दिवः पुत्राय सूर्याय शंसत॥१॥ सा मा सत्यऽउक्तिः परिपातु विश्वतः द्यावा च यत्र ततनन् अहानि च विश्वे अन्यत् नि विशन्ते यत् एजति विश्वाहा आपः

विश्वाहोदेति सूर्यः ॥२॥ न ते अदेवः प्रदिवो नि वांसते यदेतशेभिः पतरे रंयुर्यसि । प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य ॥३॥ येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना । तेनास्मद्विश्वामनिरामनाहुतिमपामीवामपं दुःष्वप्न्यं सुव ॥४॥ विश्वस्य हि प्रेषितो रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु । यद्य त्वा सूर्योपब्रुवामहे तं नो देवा अनु मंसीरत क्रतुं ॥५॥ तं नो द्यावापृथिवी तन्न आप इंद्रः शृण्वंतु मरुतो हवं वचः । मा शूने भूम सूर्यस्य संदृशि भद्रं जीवंतो जरणामशीमहि ॥६॥१२॥ विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावंतो अनमीवा अनागसः । उद्यंतं त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्रति पश्येम सूर्य ॥७॥ महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वंतं चक्षुषेचक्षुषे मयः । आरोहंतं बृहतः पाजसस्परि वयं जीवाः प्रति पश्येम सूर्य ॥८॥ यस्य ते विश्वा भुवनानि केतुना प्र चेरते नि च विशंते अक्तुभिः । अनागास्त्वेन हरिकेश सूर्याहाहा नो वस्यसावस्यसोदिहि ॥९॥ शं नो भव चक्षसा शं नो अह्ना शं भानुना शं हिमा शं घृणेन । यथा शमध्वञ्छमसद्दुरोणे तत्सूर्य द्रविणं धेहि चित्रं ॥१०॥ अस्माकं देवा उभयाय जन्मने शर्म यच्छत द्विपदे चतुष्पदे । अदत्पिबद्जीर्यमानमा-

विश्वाहा उत एति सूर्यः॥२॥ न ते अदेवः प्रऽदिवः नि वासते यत् एतशेभिः पतरैः रथर्यसि प्राचीनं अन्यत् अनु वर्तते रजः उत् अन्येन ज्योतिषा यासि सूर्य॥३॥ येन सूर्य ज्योतिषा बाधसे तमः जगत् च विश्वं उतऽइयर्षि भानुना तेन असत् विश्वा अनिरा अनाहुतिं अप अमीवां अप दुःऽस्वप्न्यं सुव॥४॥ विश्वस्य हि प्रऽइषितः रक्षांसि व्रतं अहेळयन् उतऽचरसि स्वधाः अनु यत् अद्य त्वा सूर्य उपऽब्रुवामहे तं नः देवाः अनु मंसीरत क्रतुं॥५॥ तं नः द्यावापृथिवी तत् नः आपः इंद्रः शृण्वंतु मरुतः हवं वचः मा भूम सूर्यस्य संऽदृशि भद्रं जीवंतः जरणां अशीमहि॥६॥१२॥ विश्वाहा त्वा सुऽमनसः सुऽचक्षसः प्रजाऽवंतः अनमीवाः अनागसः उतऽयंतं त्वा मित्रऽमहः दिवेऽदिवे ज्योक् जीवाः प्रति पश्येम सूर्य॥७॥ महि ज्योतिः बिभ्रतं त्वा विऽचक्षण भास्वंतं चक्षुषेऽचक्षुषे मयः आऽरोहंतं बृहतः पाजसः परि वयं जीवाः प्रति पश्येम सूर्य॥८॥ यस्य ते विश्वा भुवनानि केतुना प्र चऽईरते नि च विशंते अक्तुऽभिः अनागाःऽत्वेन हरिऽकेश सूर्य अहाऽअहा नः वस्यसाऽवस्यसा उत् इहि॥९॥ शं नः भव चक्षसा शं नः अह्नां शं भानुना शं हिमा शं घृणेन यथा शं अध्वन् शं असत् दुरोणे तत् सूर्य द्रविणं धेहि चित्रं॥१०॥ अस्माकं देवाः उभयाय जन्मने शर्म यच्छत द्विऽपदे चतुःऽपदे अदत् पिबत् ऊर्जयमानं आगितं तत् असे शं योः अरपः दधातन॥११॥ यत् वः देवाः चकृम जिह्वया गुरु मनसः वा प्रऽयुती देवऽहेळनं अरावा यः नः अभि दुच्छुनऽयते तस्मिन् तत् एनः वसवः नि धेतन॥१२॥१३॥

॥३८॥ अस्मिन नः इंद्र पृत्सुतौ यशस्वति शिमीऽवति क्रंदसि

प्रावं सातये । यत्र गोषातौ धृषितेषु खादिषु विष्वक्पतंति दिद्यवो नृपाह्ये ॥१॥ स नः क्षुमंतं सदने व्यूर्णुहि गोअर्णसं रयिमिंद्र श्रवाय्यं । स्यामं ते जयंतः शक्र मेदिनो यथा वयमुश्मसि तद्वसो कृधि ॥२॥ यो नो दास आर्यो वा पुरुष्टुतादेव इंद्र युधये चिकेतति । अस्माभिष्टे सुषहाः संतु शत्रवस्त्वया वयं तान्वनुयाम संगमे ॥३॥ यो दभ्रेभिर्हव्यो यश्च भूरिभिर्यो अभीके वरिवो विन्नृपाह्ये । तं विखादे सख्यमद्य श्रुतं नरमर्वाचमिंद्रमवसे करामहे ॥४॥ स्तवृत्रं हि त्वामहमिंद्र शुश्रवानानुदं वृषभ रथचोदनं । प्र मुंचस्व परि कुत्सादिहा गहि किमु त्वावान्मुष्कयोर्बद्ध आसते ॥५॥१४॥

॥ ३९ ॥ १-१४ घोषा काक्षीवती ॥ अश्विनौ ॥ १-१३ जगती । १४ विष्टुप् ॥

॥३९॥ यो वां परिज्मा सुवृदश्विना रथो दोषामुषासो हव्यो हविष्मता । शश्वत्तमासस्तमु वामिदं वयं पितुर्न नाम सुहवं हवामहे ॥१॥ चोदयंतं सूनृताः पिन्वंतं धिय उत्पुरंधीरीरयंतं तदुश्मसि । यशसं भागं कृणुतं नो अश्विना सोमं न चारुं मघवत्सु नस्कृतं ॥२॥ अमाजुरश्विद्भवथो युवं भगोऽनाशोश्विदवितारापमस्य चित् । अंधस्य चिन्नासत्या कृशस्य चिद्युवामिदाहुर्भिषजा रुतस्य चित् ॥३॥ युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः । निष्टौग्र्यमूहथुरद्भ्यस्परि विश्वेत्ता वां सवनेषु प्रवाच्या ॥४॥ पुराणा वां वीर्या३प्र ब्रवा जनेऽथो हासघुर्भिषजा मयोभुवा । ता वां नु नव्यावसे करामहेऽयं नासत्या शृदरियेषा दधत् ॥५॥१५॥ इयं चामह्ये सृणुतं मे अश्विना पुचायेव पितरा मह्यं शिक्षतं । अनांपिरज्रा ससजात्यामंतिः पुरा तस्या अ-

प्रऽअव सातये यत् गोऽसाता धृषितेषु खादिषु विष्वक् पतंति दिद्यवः नृऽसह्ये ॥१॥ सः नः स्तुऽमंतं सदने वि ऊर्णुहि गोऽअर्णसं रयिं इंद्र श्रवाय्यं स्याम ते जयतः शक्र मेदिनः यथा वयं उश्मसि तत् वसो कृधि ॥२॥ यः नः दासः आर्यः वा पुरुऽस्तुत अदेवः इंद्र युधये चिकेतति अस्माभिः ते सुऽसहाः संतु शत्रवः त्वया वयं तान् वनुयाम संऽगमे ॥३॥ यः द्वेभिः हव्यः यः च भूरिऽभिः यः अभीके वरिवः ऽवित् नृऽसह्ये तं विऽखादे सस्मिं अद्य श्रुतं नरं अर्वाचं इंद्रं अवसे करामहे ॥४॥ स्वऽवृजं हित्वां अहं इंद्र शुश्रव अननुऽदं वृषभ रध्रऽचोदनं प्रमुंचस्व परिऽकुत्सात इह आ गहि किं ऊं त्वाऽवान् मुष्कयोः बद्धः आसते ॥ ५ ॥ १४ ॥

॥३९॥ यः वां परिऽज्मा सुऽवृत् अश्विना रथः दोषा उपसः हव्यः हविष्मता श्श्वतऽतमासः तं ऊं वां इदं वयं पितुः न नाम सुऽहवं हवामहे ॥१॥ चोदयंतं सूनृताः पिन्वंतं धियः उत् पुरंऽधीः ईरयंतं तत् उश्मसि यशसं भागं कृणुतं नः अश्विना सोमं न चारुं मघवत्ऽसु नः कृतं ॥२॥ अमाऽजुरः चित् भवथः युवं भगः अनाशोः चित् अवितारा अपमस्य चित् अंधस्य चित् नासत्या कृशस्य चित् युवां इत् आहुः भिषजा रुतस्य चित् ॥३॥ युवं च्यवानं सनयं यथा रथं पुनः युवानं चरथाय तक्षथुः निः तौग्र्यं ऊहथुः अत्ऽभ्यः परि विश्वा इत् ता वां सवनेषु प्रऽवाच्या ॥४॥ पुराणा वां वीर्या प्रऽव्रवजने अथो ह आसथुः भिषजा मयःऽभुवा ता वां नु नव्यौ अवसे करामहे अयं नासत्या शत् अरिः यथा दधत् ॥५॥१५॥ इयं वां अह्वे शृणुतं मे अश्विना पुचायंऽइव पितरा महे शिक्षतं अनापिः अज्ञाः असुजात्या अमतिः पुरा तस्याः अ-

भिश्शस्तेरवं स्पृतं ॥ ६ ॥ युवं रथेन विमदाय शुंध्युवं न्यूहथुः पुरुमित्रस्य योषणां । युवं हवै वध्रिमत्या अगच्छतं युवं सुषुंतिं चक्रथुः पुरंधये ॥ ७ ॥ युवं विप्रस्य जरणामुपेयुषः पुनः कलेरकृणुतं युवद्वयः । युवं वंदनमृश्यदादुदूपथुर्युवं सद्यो विश्पलामेतवे कृथः ॥ ८ ॥ युवं ह रेभं वृषणा गुहा हितमुदीरयतं ममृवांसमश्विना । युवमृवीसमुत तप्तमत्रय ओमन्वंतं चक्रथुः सप्तवध्रये ॥ ९ ॥ युवं श्वेतं पेदवेऽश्विनाश्वं नवभिर्वाजिनैवती च वाजिनं । चर्कृत्यं ददथुर्द्रोवयत्सखं भगं न नृभ्यो हव्यं मयोभुवं ॥ १० ॥ १६ ॥ न तं राजानावदिते कुतश्चन नांहो अश्नोति दुरितं नकिर्भयं । यमश्विना सुहवा रुद्रवर्तनी पुरोरथं कृणुथः पत्या सह ॥ ११ ॥ आ तेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना । यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः ॥ १२ ॥ ता वर्तिर्यातं जयुषा विपर्वतमपिन्वतं शयवे धेनुमश्विना । वृकस्य चिद्वर्तिकामंतरास्यादुवं शचीभिर्यस्तितामसुंचतं ॥ १३ ॥ एतं वां स्तोममश्विनावकर्मातक्षाम भृगवो न रथं । न्यमृक्षाम योषणां न मर्ये नित्यं न सूनुं तनयं दधानाः ॥ १४ ॥ १७ ॥

॥ ४० ॥ १-१४ घोषा काक्षीवती ॥ अश्विनौ ॥ जगती ॥

॥ ४० ॥ रथं यांतं कुह को ह वां नरा प्रति द्युमंतं सुवितायं भूषति । प्रातर्यावाणं विभ्वं विशेविशे वस्तोर्वस्तोर्वहमानं धिया शमि ॥ १ ॥ कुह स्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः । को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ ॥ २ ॥ प्रातर्जरेथे जरणेव कापया वस्तोर्वस्तोर्यजता गंतथो गृहं । कस्य ष्वसा भवथः कस्य वा

भिऽशस्तेः अवस्पृतं॥६॥ युवं रथेन विऽमदाय शुंध्युवं नि ऊहथुः पुरुऽमित्रस्य योषणां युवं हवं वध्रिऽमत्याः अगच्छतं युवं सुऽसुंतिं चक्रथुः पुरंऽधये॥७॥ युवं विप्रस्य जरणां उपऽईयुषः पुनः कलेः अकृणुतं युवत् वयः युवं वंदनं ऋश्यऽदात् उत ऊपथुः युवं सद्यः विश्पलां एतवे कृथः॥८॥ युवं हरेभं वृषणा गुहा हितं उत ऐरयतं ममृऽवांसं अश्विना युवं ऋबीसं उत तप्तं अत्रये क्षोमन्ऽवंतं चक्रथुः सप्तऽवंध्रये॥९॥ युवं श्वेतं पेदवे अश्विना अश्वं नवऽभिः वाजैः नवती च वाजिनं चकृत्यं दद्थुः द्रुवयतऽसखं भगं न नृऽभ्यः हव्यं मयःऽभुवं॥१०॥१६॥ न तं राजानौ अदिते कुतः चन नंहः अश्नोति दुःऽइतं नकिः भयं यं अश्विना सुऽहवा रुद्रऽवर्तनी पुरःऽरथं कृणुथः मर्त्या सह॥११॥ आ तेने यातं मनसः जवीयसा रथं यं वां ऋभवः चक्रुः अश्विना यस्य योगे दुहिता जायते दिवः उभे अहनी सुऽदिने विवस्वतः॥१२॥ ता वर्तिः यातं जयुषा वि पर्वतं अपिन्वतं शयवे धेनुं अश्विना वृकस्य चित् वर्तिकां अंतः आस्यात् युवं शचीभिः यसितां अमुंचतं॥१३॥ एतं वां स्तोमं अश्विनौ अकर्म अतक्षाम भृगवः न रथं नि अमृक्षाम योषणां न मर्यं नित्यं न सूनुं तनयं दधानाः॥१४॥१७॥

॥४०॥ रथं यांतं कुहं कः ह वां नरा प्रति द्युऽमंतं सुवितायं भूषति प्रातःऽयावानं विऽभ्वं विशेऽविशे वस्तोःऽवस्तोः वहमानं धिया शमिं॥१॥ कुह स्वित् दोषा कुह वस्तोः अश्विना कुह अभिऽपित्वं करतः कुह ऊपतुः कः वां शयुऽचा विधवांऽइव देवरं मर्यं न योषा कृणुते सधऽस्थ आ॥२॥ प्रातः जरेथे जरणाऽइव कापया वस्तोःऽवस्तोः यजता गच्छथः गृहं कस्य ध्वस्रा भवथः कस्य वा

नरा राजपुत्रेव सवनावं गच्छथः ॥३॥ युवां मृगेव वारणा मृगण्यवो दोषा वस्तोर्हविषा नि ह्वयामहे। युवं होत्रामृतुथा जुह्वते नरेषं जनाय वहथः शुभस्पती ॥४॥ युवां ह घोषा पर्यश्विना यती राज्ञ ऊचे दुहिता पृच्छे वां नरा। भूतं मे अह्न उत भूतमक्तवेऽश्वावते रथिने शक्तमर्वते ॥५॥१८॥ युवं कवी ष्टः पर्यश्विना रयं विशो न कुत्सो जरितुर्नशायथः। युवोर्ह मक्षा पर्यश्विना मध्वासा भरत निष्कृतं न योषणा ॥६॥ युवं ह भुज्युं युवमश्विना वशं युवं शिंजारमुशनामुपारयुः। युवो रथावा परि सख्यमासते युवोरहमवसा सुम्नमा चके ॥७॥ युवं ह कृशं युवमश्विना शयुं युवं विधंतं विधवामुरुष्यथः। युवं सनिभ्यः स्तनयंतमश्विनापं व्रजमूर्णुथः सप्तास्यं ॥८॥ जनिष्ट योषा पतयत्कनीनको वि चारुहन्वीरुधो दंसना अनु। आसैरीयंते निवनेव सिंधवोऽस्मा अह्ने भवति तत्पतित्वनं ॥९॥ जीवं रुदंति वि मयंते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः। वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥१०॥१९॥ न तस्य विद्म तदु षु प्र वोचत युवा ह यद्युवत्याः क्षेति योनिषु। प्रियो सियस्य वृषभस्य रेतिनो गृहं गमेमाश्विना तदुश्मसि ॥११॥ आ वामगन्त्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामा अयंसत। अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्याँ अशीमहि ॥१२॥ ता मंदसाना मनुषो दुरोण आ धत्तं रयिं सहवीरं वचस्यवे। कृतं नो यज्ञं सुप्रयाणं शुभस्पती स्याणं पथेष्ठामप दुर्मतिं हतं ॥१३॥ क्व स्विदद्य कतमास्वश्विना वितो दस्रा मादयेते शुभस्पती। क ईं नि येमे कतमस्य जग्मतुर्विप्रस्य वा यजमानस्य वा गृहं ॥१४॥२०॥

नरा राजपुत्राऽइव सर्वना अव गच्छथः ॥३॥ युवां मृगाऽइव वारणा मृगण्यवः दोषा वस्तोः हविषा नि ह्वयामहे युवं होत्रां ऋतुऽथा जुह्वते नरा इषे जनाय वहथः शुभः पती ॥४॥ युवां ह घोषा परिऽअश्विना यती राज्ञः ऊचे दुहिता पृच्छे वां नरा भूतं मे अहे उत भूतं अक्तवे अश्वाऽवते रथिने शक्तं अवते ॥५॥१८॥ युवं कवी स्यः परिऽअश्विना रथं विशः न कुत्सः जरितुः नशायथः युवोः ह मक्षा परिऽअश्विना मधु आसा भरत निःऽकृतं न योषणा ॥६॥ युवं ह भुज्युं युवं अश्विना वशं युवं शिंजारं उशनां उपऽआरथुः युवोः ररांवा परिऽसख्यं आसते युवोः अहं अवसा सुम्नं आ चके ॥७॥ युवं ह कृशं युवं अश्विना शयुं युवं विधंतं विधवां उरुष्यथः युवं सनिऽभ्यः स्तनयंतं अश्विना अपव्रजं ऊर्णुथः सप्तऽआस्यं ॥८॥ जनिष्ट योषा पतयंत् कनीनकः वि च अरुहन् वीरुधः दंसनाः अनु आ अस्थिरीयंते निवनाऽइव सिंधवः अस्से अहे भवति तत् पतिऽत्वनं ॥९॥ जीवं रुदंति विमयंते अध्वरे दीर्घां अनु प्रऽसितिं दीधियुः नरः वामं पितृऽभ्यः येऽइदं संऽएरिरे मयः पतिऽभ्यः जनयः परिऽस्वजे ॥१०॥१९॥ न तस्य विद्म तत् ऊं सु प्र वोचत युवा ह यत् युवत्याः क्षेति योनिषु प्रियऽउसियस्य वृषभस्य रेतिनः गृहं गमेम अश्विना तत उत्ऽमसि ॥११॥ आ वां अगन् सुऽमतिः वाजिनीऽवसू० नि अश्विना हृतऽसु कामाः अयंसत अभूतं गोपा मिथुना शुभः पती प्रियाः अर्यम्णः दुर्यान् अशीमहि ॥१२॥ ता मंदसाना मनुषः दुरोणे आ धत्तं रयिं सहऽवीरं वचस्यवे कृतं नीर्थं सुऽप्रपानं शुभः पती स्थाणुं पथेऽस्यां अप दुःऽमतिं हतं ॥१३॥ क्व स्वित् अद्य कतमासु अश्विना विक्षु दस्रा मादयेते शुभः पती कः ईं नि येमे कतमस्य जग्मतुः विप्रस्य वा यजमानस्य वा गृहं ॥१४॥२०॥

॥ ४१ ॥ १-३ सुहस्त्यो पौंषेयः ॥ अश्विनौ ॥ जगती ॥

॥४१॥ स॒मा॒नमु॒ त्यं पु॑रुहू॒तमु॒क्थ्यं१॒॑ रथं॑ चिचक्रं॒ सर्व॑ना॒ गनि॑ग्मतं। परि॒ज्मानं॑ वि॒दथ्यं॑ सुवृ॒क्तिभि॑र्वि॒प्रा उ॒पसो॑ हवामहे ॥१॥ प्रा॒तर्यु॒जं नास॑त्याधि॒ तिष्ठ॑थः प्रा॒तर्यावा॑णं मधु॒वाह॑नं॒ रथं॑। विशो॒ येन॑ गच्छथो॒ यज्व॑रीर्नरा की॒रिञ्चि॒द्धव्यं॑ होतृ॒मंत॑मश्विना ॥२॥ अ॒ध्व॒र्यु वा॒ मधु॑पाणिं सुहस्त्यं॒ग्निधं॑ वा धृ॒तद॑क्षं॒ दमू॑नसं। विप्र॑स्य वा॒ यत्सव॑नानि॒ गच्छ॑थोऽत्रा॒ या॑तं मधु॒पेय॑मश्विना ॥३॥२१॥

॥ ४२ ॥ १-११ कृष्णः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥४२॥ अ॒स्ते॒व॒ सु प्र॑त॒रं ला॒यम॑स्यन्भू॒पन्नि॑व॒ प्र भ॑रा॒ स्तोम॑मस्मै। वा॒चा वि॑प्रास्तरत॒ वाच॑मर्यो॒ नि रा॑मय जरितः सो॒म इं॑द्रं ॥१॥ दोहे॑न गामुप॒ शिक्षा॒ सखा॑यं॒ प्र बो॑धय जरितर्जा॒र मिं॑द्रं। कोशं॒ न पू॒र्ण व॑सु॒ना न्यृ॑ष्टमा॒ च्यावय मघवे॒यायु॒ शूरं॑ ॥२॥ किम॑ङ्ग त्वा मघवन्भो॒जमा॑हुः शिशी॒हि मा॑ शिश्वयं॒ त्वा शृ॑णोमि। अप्न॑स्वती॒ मम॑ धी॒रस्तु॑ शक्र वसु॒विदं॒ भगमिं॒द्रा भ॑रा नः ॥३॥ त्वां जना॑ ममस॒त्येष्विंद्र॒ संत॑स्पा॒ना वि ह्व॑यंते समी॒के। अचा॒ युजं॑ कृणुते॒ यो ह॒विष्मा॒न्नास॑त्या॒भ्यां व॑हते॒ सख्यं॑ शू॒रः ॥४॥ धनं॒ न स्यं॒दं व॑हु॒लं यो अ॑स्मै॒ तीव्रा॑न्त्सो॒माँ आसु॑नोति॒ प्रय॑स्वान्। तस्मै॒ शचू॑न्त्सुतु॒काम्पा॑तरह्वो॒ नि स्वष्ट्रा॑न्युवति॒ हंति॑ वृ॒त्रं ॥५॥२२॥ यस्मि॑न्व॒यं दधि॒मा शंस॒मिंद्रे॒ यः शि॒ष्राय॑ मघवा॒ काम॑मस्मे। आरा॑च्चित्सन्भयतामस्य॒ शचु॑र्न्यस्मे॒ द्युना॒ जन्या॑ नमंतां ॥६॥ आरा॑च्छत्रुमप॑ बाधस्व दू॒रमु॒ग्रो यः शंवः पुरुहूत॒ तेन॑। अ॒स्मे धे॑हि॒ यव॑मद्गोम॒दिंद्र॑ कृ॒धी धि॒यं ज॑रि॒त्रे वाज॑रत्नां ॥७॥ प्र यम॑ंत॒वृप॑सवासो॒ अग्म॑न्नी॒प्राः सोमा॑ बहु॒लांतां॑स॒ इंद्रं॑। नाहं दा॒मानं॑ म॒घवा॒ नि यं॑सते॒ यं सु॑न्व॒ते व॑हति॒

॥४१॥ समानं ऊं त्यं पुरुऽहूतं उक्थ्यं रथं विऽचक्रं सवना गनिग्मतं परिऽज्मानं विद्थ्यं सुवृक्तिऽभिः वयं विऽउष्टौ उपसः हुवामहे ॥१॥ प्रातःऽयुजं नासत्या अधि तिष्ठथः प्रातःऽयावानं मधुऽवाहनं रथं विशः येन गच्छथः यज्वरीः नरा कीरेः चित् यज्ञं होतृऽमंतं अश्विना॥२॥ अध्वर्यु वा मधुऽपाणिं सुऽहस्त्यं अग्निधं वा धृतऽदक्षं दमूनसं विप्रस्य वा यत् सवनानि गच्छथः अतः आ यातं मधुऽपेयं अश्विना ॥ ३ ॥ २१ ॥

॥४२॥ अस्ताऽइव सु प्रऽतरं लायं अस्यन् भूषन्ऽइव प्र भरस्तोमं अस्मै वाचा विप्राः तरत वाचं अर्यः निरमयन् जरितः सोमं इंद्रं॥१॥ दोहेन गां उप शिक्ष सखायं प्र बोधय जरितः जारं इंद्रं कोशं न पूर्णं वसुना निऽहितं आ च्यवयं मघऽदेयाय शूरं॥२॥ किं अंग त्वा मघऽवन् भोजं आहुः शिशीहि मा शिश्वयं त्वा शृणोमि अप्रस्वती मम धीः अस्तु शक्र वसुऽविदं भगं इंद्र आ भर नः॥३॥ त्वां जनाः ममऽसत्येषु इंद्र संऽतस्थानाः वि ह्वयंते संऽईके अत्र युजं कृणुते यः हविष्मान् न अस्मिन्वता सख्यं वष्टि शूरः॥४॥ धनं न स्यंद्रं बहुलं यः अस्मै तीव्रान् सोमान् आऽसुनोति प्रयस्वान् तस्मै शचीन् सुऽतुकान् प्रातःअह्नः नि सुऽअश्वान् युवति हंति वृत्रं ॥५॥ २२॥ यस्मिन् वयं दधिम शंसं इंद्रे यः शिष्राय मघऽवा कामं अस्मे आरात् चित् सन् भयतां अस्य शत्रुः नि अस्मै द्युम्ना जन्या नमंतां॥६॥ आरात् शत्रुं अप बाधस्व दूरं उप्रः यः गंबः पुरुऽहूत तेन अस्मे धेहि यवऽमत् गोऽमत् इंद्र कृधि धियं जरित्रे वाजऽरत्नां॥७॥ प्रयंऽतः वृषऽसवासः अग्मन् तीव्राः सोमाः बहुलऽअंतासः इंद्रं न अह्ने दामानं मघऽवानं नियंसत् नि सुन्वते वहति

भूरिं वामं ॥ ८ ॥ उत प्रहामतिदीव्या जयाति कृतं यच्छ्वघ्नी विचिनोतिं काले । यो देवकामो न धना रुणद्धि समित्तं रा-या सृजति स्वधावान् ॥ ९ ॥ गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वां । वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥ १० ॥ बृहस्पतिर्नः परिं पातु पश्चादुतोत्तरस्मादधरादघायोः । इंद्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ ११ ॥ २३ ॥ ३ ॥

॥ ४३ ॥ १-११ कृष्णः ॥ इंद्रः ॥ १-९ जगती । १०, ११ त्रिष्टुप् ॥

॥ ४३ ॥ अच्छा म इंद्रं मतयः स्वर्विदः सध्रीचीर्विश्वा उशतीरनूषत । परिं ष्वजंते जनयो यथा पतिं मर्यं न शुंध्युं मघवानमूतयें ॥ १ ॥ न घा त्वद्रिगप वेति मे मनस्त्वे इत्कामं पुरुहूत शिश्रय । राजेव दस्म नि षदोऽधि बर्हिष्यस्मिन्त्सु सोमेऽवपानमस्तु ते ॥ २ ॥ विषूवृदिंद्रो अमतेरुत क्षुधः स इद्रायो मघवा वस्व ईशते । तस्येदिमे प्रवणे सप्त सिंधवो वयो वर्धंति वृषभस्य शुष्मिणः ॥ ३ ॥ वयो न वृक्षं सुपलाशमासदन्त्सोमांस इंद्रं मंदिनस्थमूषदः । प्रेषामनीकं शवसा दविद्युतदिदस्व१न्मनवे ज्योतिरार्यं ॥ ४ ॥ कृतं न श्वघ्नी वि चिनोति देवने संवर्गं यन्मघवा सूर्यं जयत् । न तत्ते अन्यो अनु वीर्यं शकन्न पुराणो मघवन्नोत नूतनः ॥ ५ ॥ २४ ॥ विशंविशं मघवा पर्येशायत जनानां धेना अवचाकशद्वृषा । यस्याहं शक्रः सवनेषु रण्यति स तीव्रैः सोमैः सहते पृतन्यतः ॥ ६ ॥ आपो न सिंधुमभि यत्समक्षरन्त्सोमास इंद्रं कुल्या इव ह्रदं । वर्धंति विप्रा महो अस्य सादने यवं न वृष्टिर्दिव्येन दानुना ॥ ७ ॥ वृषा न क्रुद्धः पतयद्रजस्वा यो अर्यपत्नीरकृणोदिमा अपः ।

भूरि वामं॥८॥ उत प्रऽहा अतिऽदीर्घं जयाति कृतं यत् श्वऽघ्नी विऽचिनोति काले यः देवऽकामः न धना रुणद्धि समित् तं राया सृजति स्वधाऽवान्॥९॥ गोभिः तरेम अमतिं दुःऽएवां यवेन क्षुधं पुरुऽहूत विश्वां वयं राजऽभिः प्रथमाः धनानि अस्माकेन वृजनेन जयेम॥१०॥ बृहस्पतिः नः परि पातु पश्चात् उत उतऽनरस्मात् अधरात् अघऽयोः इंद्रः पुरस्तात् उत मध्यतः नः सखा सखिऽभ्यः वरिवः कृणोतु॥११॥२३॥३॥

॥४३॥ अर्छ मे इंद्रं मतयः स्वःऽविदः सध्रीचीः विश्वाः उशतीः अनूषत परि स्वजंते जनयः यथा पतिं मर्यं न शुंध्युं मघऽवानं ऊतये॥१॥ न यत् इंद्रिक् अपं वेति मे मनः ले इत कामं पुरुऽहूत शिष्टये राजाऽइव दस्म नि षदः अधि बर्हिषि अस्मिन् सु सोमे अवऽपानं अस्तु ते॥२॥ विषुऽवृत इंद्रः अमतेः उत क्षुधः सः इत रायः मघऽवा वस्वः ईशते तस्य इत् इमे प्रऽवणे सप्त सिंधवः वयः वर्धंति वृषभस्य पुष्मिणः॥३॥ वयं न वृष्टिं सुऽपलाशं आ असदन् सोमासः इंद्रं मंदिनः चमूऽसदः प्रऽएषां अनीकं शवसा दविद्युतत् विदत् स्वः मनवे ज्योतिः आर्यं॥४॥ कृतं न श्वऽघ्नी वि चिनोति देवने संऽवर्गं यत् मघऽवा सूर्यं जयत् न तत् ते अन्यः अनु वीर्यं शकत् न पुराणः मघऽवन् न उत नूतनः॥५॥२४॥ विशंऽविशं मघऽवा परि अशायत जनानां धेनोः अवऽचाकशत् वृषा यस्य अह शक्रः सवनेषु रण्यति सः तीव्रैः सोमैः सहते पृतन्यतः॥६॥ आपः न सिंधुं अभियत संऽअक्षरन् सोमासः इंद्रं कुल्याःऽइव हृदं वर्धंति विप्राः महः अस्य सदने यवं न वृष्टिः दिव्येन दानुना॥७॥ वृषा न क्रुद्धः पतयत् रजःऽसु आ यः अर्यः अर्यंतीः अकृणोत् इमाः अपः

स सुन्वते मघवा जीरदानवेऽविंदज्ज्योतिर्मनवे हविष्मते ॥ ८ ॥ उज्जायतां परशुर्ज्योतिषा सह भूया ऋतस्य सुदुघा पुराण-वत् । वि रोचतामरुषो भानुना शुचिः स्व१र्ण शुक्रं शंशुचीत सत्पतिः ॥ ९ ॥ गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वां । वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥ १० ॥ बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः । इंद्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ ११ ॥ २५ ॥

॥ ४४ ॥ १-११ कृष्णः ॥ इंद्रः ॥ १-३. १० ११ त्रिष्टुप् । ४-९ जगती ॥

॥ ४४ ॥ आ यात्विंद्रः स्वपतिर्मदाय यो धर्मणा तूतुजान-स्तुविष्मान् । प्रत्वक्षाणो अति विश्वा सहांस्यपारेण महता वृष्णेयेन ॥ १ ॥ सुष्टामा रथः सुयमा हरी ते मिम्यक्ष वज्रो नृ-पते गभस्तौ । शीभं राजन्सुपथा याह्यर्वाङ् वर्धाम ते पपुषो वृष्ण्यानि ॥ २ ॥ एंद्रवाहो नृपतिं वज्रबाहुमुग्रमुग्रासस्तविषास एनं । प्रत्वक्षसं वृषभं सत्यशुष्ममेमस्मत्रा सधमादो वहंतु ॥ ३ ॥ एवा पतिं द्रोणसाचं सचेतसमूर्जः स्कंभं धरुण आ वृषायसे । ओजः कृष्व सं गृभाय त्वे अपसो यथा केनिपानामिनो वृधे ॥ ४ ॥ गमन्नस्मे वसूत्या हि शंसिषं स्वाशिषं भरमा याहि सोमिनः । त्मन्मीशिषे सास्मिन्वा सत्सि बर्हिष्यनाधृष्या तव पात्रांणि धर्मणा ॥ ५ ॥ २६ ॥ पृथक् प्रायन्प्रथमा देवहूतयोऽकृण्वत श्रवस्यानि दुष्टरा । न ये शेकुर्यज्ञियां नावमारुहमीर्मेव ते न्यविशंत केपयः ॥ ६ ॥ एवावापागपरे संतु दूढ्योऽश्वा येषां दुर्युज आयुयुज्रे । इत्या ये प्रागुपरे संति दावने पुरूणि यत्र वयुनानि भोजना

सःसुन्वते मघऽवा जीरऽदानवे अविंदत् ज्योतिःमनवे हविष्मते ॥८॥ उत् जायतां परशुः ज्योतिषा सह भूयाः ऋतस्य सुऽदुघा पुराणऽवत् वि रोचतां अरुषः भानुना शुचिः स्वः न शुक्रं शशुचीत सतऽपतिः ॥९॥ गोभिः तरेम् अमतिं दुःऽएवां यवेन क्षुधं पुरुऽहूत विश्वां वयं राजऽभिः प्रथमाः धनानि अस्माकेन वृजनेन जयेम ॥१०॥ बृहस्पतिःनः परिपातु पश्चात् उत उत्ऽतरस्मात् अधरात् अघऽयोः दंद्रः पुरस्तात् उत मध्यतः नः सखा सखिऽभ्यः वरिवः कृणोतु ॥ ११ ॥ २५ ॥

॥४४॥ आ यातु इंद्रः स्वऽपतिः मदाय यः धर्मणा तूतुजानः तुविष्मान् प्रऽतक्वाणः अति विश्वा सहांसि अपारेण महता वृष्ण्येन ॥१॥ सुऽस्यामा रथः सुऽयमा हरी ते मिम्यक्षं वज्रः नृऽपते गभस्तौ शीभं राजन् सुऽपथा आ याहि अर्वाङ् वर्धाम ते पपुषः वृष्ण्यानि ॥२॥ आ इंद्रऽवाहः नृऽपतिं वज्रऽबाहुं उयं उयासः तविषासः एनं प्रऽतक्वसं वृषभं सत्यऽशुष्मं आ द्यं अस्मऽचा सधऽमादः वहंतु ॥३॥ एव पतिं द्रोणऽसाचं सऽचेतसं ऊर्जः स्कंभं धरुणे आ वृषऽयसे ओजः कृष्व सं गृभाय त्वे अपि अंसः यथा केऽनिपानाय इनः वृधे ॥४॥ गमन् अस्मे वसूनि आ हि शंसिषं सुऽआशिषं भरं आ याहि सोमिनः तं ईशिषे सः अस्मिन् आ सत्सि बर्हिषि अनाधृष्या तव पात्राणि धर्मणा ॥५॥ २६ ॥ पृथक् प्र आयन् प्रथमाः देवऽहूतयः अकृण्वत श्रवस्यानि दुष्टरा न ये शेकुः यज्ञियां नावं आऽरुहं ईर्मा एव ते नि अविशंत केपयः ॥६॥ एव एव अपाक् अपरे संतु दुःऽध्यः अश्वाः येषां दुःऽयुजः आऽयुयुजे इत्था ये प्राक् उपरे संति दावने पुरूणि यत्र वयुनानि भोजना

॥७॥ गिरीँरजान्रेजमानाँ अधारयद्द्यौः क्रन्दद॒न्तरि॑क्षाणि कोपयत्। स॒मी॒ची॒ने धि॒षणे॒ वि ष्क॑भायति॒ वृष्णः॑ पी॒त्वा मद॑ उ॒क्थानि॑ शंसति ॥८॥ इ॒मं वि॑भर्मि॒ सुकृ॑तं ते अंकु॒शं येनार॒जासि॑ मघवञ्छफा॒रुजः॑। अ॒स्मिन्त्सु ते॒ सव॑ने अस्त्वो॒क्यं॑ सु॒त इ॒ष्टौ म॑घवन्बोध्याभगः ॥९॥ गोभि॑ष्टरेमामति॑तिं दुरे॒वां यवे॑न क्षु॒धं पु॑रुहूत विश्वा॑। व॒यं राज॑भिः प्रथ॒मा धना॑न्य॒स्माके॑न वृ॒जने॑ना जयेम ॥१०॥ बृह॒स्पति॑र्नः॒ परि॑ पातु प॒श्चादु॒तोत्त॒रस्मा॒दध॑रादघा॒योः। इंद्रः॑ पु॒रस्ता॑दुत मध्य॒तो नः॒ सखा॒ सखि॑भ्यो॒ वरि॑वः कृणोतु ॥११॥ २७ ॥

॥ ४५ ॥ १-१२ वत्सप्रिः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥४५॥ दि॒वस्परि॑ प्रथ॒मं ज॑ज्ञे अ॒ग्निर॒स्मद्द्वि॒तीयं॒ परि॑ जा॒तवे॑दाः। तृ॒तीय॑म॒प्सु नृ॒मणा॒ अज॑स्र॒मिंधा॑न एनं जरते स्वा॒धीः ॥१॥ विभ्रा॑ ते॒ अग्ने॒ बृहा॑ भ॒याणि॑ वि॒भ्रा ते॒ धाम॑ विभृ॒ता पु॑रु॒त्रा। वि॒भ्रा ते॒ नाम॑ परमं गु॒हा॒ यद्वि॒भ्रा त॒मुत्सं॒ यत॑ आजगंथ ॥२॥ स॒मु॒द्रे त्वा॑ नृ॒मणा॑ अप्स्व॑१॑न्तर्नृ॒चक्षा॑ ईधे दि॒वो अ॑ग्न ऊ॒धन्। तृ॒तीये॑ त्वा॒ रज॑सि तस्थि॒वांस॒मपा॑मुपस्थे महि॒षा अ॑वर्धन ॥३॥ अक्रं॑दद॒ग्निः स्त॒नय॑न्नि॒व द्यौः क्षामा॒ रेरि॑हद्वी॒रुधः॑ सम॒ञ्जन्। स॒द्यो ज॑ज्ञा॒नो वि ही॒मिद्धो॑ अख्यदा रोदसी भा॒नुना॑ भात्यं॒तः ॥४॥ श्रीणा॒मुदा॑रो ध॒रुणो॑ र॒यीणां॑ मनी॒षाणां॑ प्रार्प॒णः सोम॑गोपाः। वसुः॑ सू॒नुः सह॑सो अ॒प्सु राजा॒ वि भा॑त्य॒क्तुभि॑रु॒षस॑मिधा॒नः ॥५॥ विश्व॑स्य के॒तुर्भुव॑नस्य॒ गर्भ॒ आ रोद॑सी अपृणाज्जायमानः। वी॒ळुं चि॒दद्रिं॑ अभिनत्परा॒यञ्जना॒ यद॒ग्निमय॑जंत॒ पंच॑ ॥६॥ २८ ॥ उ॒शिक्पा॑वको अरतिः सु॒मे॒धा मर्ते॑ष्व॒ग्निर॒मृतो॒ नि धा॑यि। इय॑र्ति धू॒ममरु॑षं भरि॒-

॥७॥ गिरीन् अजान् रेजमानान् अधारयत् द्यौः क्रन्दत् अन्तरिक्षाणि कोपयत् संऽईचीने॰ धिषणे॑ वि स्कभायति वृष्णः पीत्वा मदे॑ उक्थानि शंसति॥८॥ इमं बिभर्मि सुऽकृतं ते अंकुशं येन आऽऊजासि मघऽवन् शफऽआरुजः अस्मिन् सु ते सवने अस्तु ओक्यं सुते दधिष्टो मघऽवन् वोधि आऽभगः॥९॥ गोभिः तरेम अमतिं दुःऽएवां यवेन क्षुधं पुरुऽहूत विश्वां वयं राजऽभिः प्रथमाः धनानि अस्माकेन वृजनेन जयेम॥१०॥ बृहस्पतिः नः परि पातु पश्चात् उत उत्ऽतरस्मात् अधरात् अघऽयोः इंद्रः पुरस्तात् उत मध्यतः नः सखा सखिऽभ्यः वरिवः कृणोतु॥ ११॥ २७॥

॥४५॥ दिवः परि प्रथमं जज्ञे अग्निः अस्मत् द्वितीयं परि जातऽवेदाः तृतीयं अप्ऽसु नृऽमनाः अजस्रं इंधानः एनं जरते सुऽआधीः॥१॥ विन्न ते अग्ने वेधा चयाणि विन्न ते धामं विऽभृता पुरुऽत्रा विन्न ते नामं परमं गुहा यत् विन्न तं उत्सं यतः आऽजगंथ॥२॥ समुद्रे त्वा नृऽमनाः अप्ऽसु अंतः नृऽचक्षाः ईधे दिवः अग्ने ऊधन् तृतीये त्वा रजसि तस्थिऽवांसं अपां उपऽस्थे महिषाः अवर्धन्॥३॥ अक्रंदत् अग्निः स्तनयन्ऽइव द्यौः क्षामरेरिहत वीरुधः संऽअंजन समञ्जानः वि हि ईं इद्धः अख्यत् आ रोदसी॑ भानुना भाति अंतः॥४॥ स्त्रीणां उतऽआरः धरुणः रयीणां मनीषाणां प्रऽअर्पणः सोमऽगोपाः वसुः सूनुः सहसः अप्ऽसु राजा वि भाति अग्ने उषसां इधानः॥५॥ विश्वस्य केतुः भुवनस्य गर्भः आ रोदसी॑ अपृणात् जायमानः वीळुं चित् अद्रिं अभिनत् पराऽयन् जनाः यत् अग्निं अयजंत पंच॥६॥ २८॥ उशिक् पावकः अरतिः सुऽमेधाः मर्तेषु अग्निः अमृतः नि धायि इयर्ति धूमं अरुषं भरिं-

भदुच्छुक्रेण शोचिषा द्यामिनक्षन्॥७॥ दृशानो रुक्म उर्विया व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः। अग्निरमृतो अभवद्वयोभि-र्यदेनं द्यौर्जनयत्सुरेताः॥८॥ यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने। प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देव-भक्तं यविष्ठ॥९॥ आ तं भज सौश्रवसेष्वग्न उक्थऽउक्थ आ भज शस्यमाने। प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भि-नदुज्जनित्वैः॥१०॥ त्वामग्ने यजमाना अनु द्यून्विश्वा वसु दधिरे वार्याणि। त्वया सह द्रविणमिच्छमाना व्रजं गोमन्त-मुशिजो वि वव्रुः॥११॥ अस्तोष्यग्निर्नरां सुशेवो वैश्वानर ऋषिभिः सोमगोपाः। अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरं॥१२॥२९॥८॥७॥

भत् उत् शुक्रेण शोचिषा द्यां इनक्षन्॥७॥ दृशानः रुक्मः उर्विया वि अद्यौत् दुःऽमर्षं आयुः श्रिये रुचानः अग्निः अमृतः अभवत् वयःऽभिः यत् एनं द्यौः जनयत् सुऽरेताः॥८॥ यः ते अद्य कृणवत् भद्रऽशोचे अपूपं देव घृतऽवन्तं अग्ने प्र तं नय प्रऽतरं वस्यः अच्छ अभि सुम्नं देवऽभक्तं यविष्ठ॥९॥ आ तं भज सौश्रवसेषु अग्ने उक्थेऽउक्थे आ भज शस्यमाने प्रियः सूर्ये प्रियः अग्ना भवति उत् जातेन भिनदत् उत् जनिंऽत्वैः॥१०॥ त्वां अग्ने यजमानाः अनु द्यून् विश्वा वसु दधिरे वार्याणि त्वया सह द्रविणं इच्छमानाः व्रजंगोऽमंतं उशिजः वि वव्रुः॥११॥ अस्ता वि अग्निः नरां सुऽशेवः वैश्वानरः ऋषिंऽभिः सोमंऽगोपाः अद्वेषे द्यावापृथिवी हुवेम देवाः धत्त रयिं अस्मे सुऽवीरं॥१२॥२९॥८॥७॥

॥ ४६ ॥ १–१० वासिष्ठः ॥ अग्निः ॥ त्रिष्टुप् ॥

॥४६॥ प्र होता जातो महान्नभो॒विन्नृषद्वा॑ सीदद्पामुपस्थे॑। दधि॒र्यो धायि॑स ते॒ वयां॑सि यंता वसू॒नि विध॒ते त॑नूपाः ॥१॥ इ॒मं विधंतो॒ अपां स॒धस्थे॑ प॒शुं न न॒ष्टं प॒दैरनु॑ ग्मन्। गुहा॒ चतं॑तमु॒शिजो॒ नमो॑भिरि॒च्छंतो॒ धीरा॒ भृग॑वोऽविंदन् ॥२॥ इ॒मं चि॒तो भूर्यवि॑दद्दि॒च्छन्वै॑भूव॒सो मू॒र्धन्यघ्न्या॑यायाः। स शे॑वृधो जा॒त आ ह॒र्म्येषु॒ नाभि॒र्युवा॑ भवति रोच॒नस्य॑ ॥३॥ मंद्रं॒ होता॑रमु॒शिजो॒ नमो॑भिः प्रांचं॒ यज्ञं॑ ने॒तार॑मध्व॒राणां॑। वि॒शाम॑कृण्वन्नर॒तिं पा॑व॒कं ह॑व्य॒वाह॑ं दधतो॒ मानु॑षेषु ॥४॥ प्र भूर्ज॑यंतं म॒हां वि॑पो॒धां मू॒रा अ॑मू॒रं पु॒रां द॒मा॑णां। नयं॑तो॒ गर्भं॑ व॒नां धि॒यं धु॒हिरि॑श्मश्रुं॒ नार्वा॑णं॒ धनं॑चै॥५॥१॥ नि पस्त्या॑सु चि॒तः स्त॑भूयन्परि॒वीतो॒ यो॑नौ॑ सीदद॒न्तः। अतः॑ सं॒गृभ्या॒ वि॒शां द॒मूना॒ विध॑र्मणायं॒चरी॑यते॒ नृन् ॥६॥ अ॒स्याज॑रासो॒ दु॒मा॒मरि॑त्रा॒ अ॒र्चद्धू॑मासो अ॒ग्र॒यः पा॑व॒काः। श्वि॒ती॒चय॑ः श्वा॒त्रासो॑ भु॒रण्यवो॑ वन॒र्षदो॑ वा॒यवो॒ न सोमाः॑ ॥७॥ प्र जि॒ह्वया॑ भरते॒ वेप॑ो अ॒ग्निः प्र व॒युना॑नि॒ चेत॑सा पृथि॒व्याः। तमा॒यवः॑ शुचय॑ंतं पावक॒ मंद्रं॒ होता॑रं दधिरे॒ यजि॑ष्ठं ॥८॥ द्यावा॒ यम॒ग्निं पृ॑थि॒वी ज॒नि॑ष्टा॒मापस्त्वष्टा॒ भृग॑वो॒ यं सहो॑भिः। ईळे॒न्यं प्रथ॑मं मा॒त॒रिश्वा॑ दे॒वास्त॑तक्षुर्मनवे॒ यजं॑चं ॥९॥ यं त्वा॑ दे॒वा द॑धिरे॒ह॒व्य॒वाहं॑ पुरुस्पृहो॒ मानु॑षासो॒ यजं॑चं। स याम॑न्नग्ने स्तुव॒ते वयो॑ धाः प्र दे॑व॒यन्य॑शसः सं हि पू॒र्वीः ॥१०॥२॥

॥ ४७ ॥ १–८ सप्तगुः ॥ इंद्रो वैकुंठः ॥ त्रिष्टुप् ॥

॥४७॥ जगृ॑भ्मा ते॒ दक्षि॑णमिंद्र॒ हस्तं॑ वसू॒यवो॑ वसुपते॒ वसू॑नां। विभ्रा॑ हि त्वा॒ गोप॑तिं शूर॒ गोना॑मस्म॒भ्यं चि॒त्रं वृष॑णं र॒यिं

॥४६॥ प्र होता॑ जा॒तः म॒हान् न॒भः॒ऽवित् नृ॒ऽसद्मा॑ सीदत् अ॒पां उ॒प॒ऽस्थे दधिः॒ यः धायि॑ सः ते॒ वयां॑सि यं॒ता वसू॑नि वि॒धते॑ तनू॒ऽपाः॥१॥ इ॒मं वि॒धंतः॒ अ॒पां स॒धऽस्थे॑ प॒शुं न नष्टं प॒दैः अ॒नु॒ग्मन् गुहा॑ चतंतं उ॒शिजः॑ नमः॒ऽभिः इ॒च्छंतः॑ धीराः॑ भृ॒गवः॒ अ॒वि॒ंदन्॥२॥ इ॒मं चि॒तः भूरि॑ अ॒वि॒ंदत् इ॒च्छन् वे॒भु॒ऽवसः॑ मू॒र्धनि॑ अ॒घ्न्यायाः॑ सः शे॒ऽवृधः॑ जा॒तः आ ह॒र्म्ये॑षु नाभिः॑ युवा॑ भवति॒ रो॒च॒नस्य॑॥३॥ मं॒द्रं होता॑रं उ॒शिजः॑ नमः॒ऽभिः प्रांचं॑ य॒ज्ञं ने॒तार॑ं अ॒ध्व॒राणां॑ वि॒शां अ॒कृ॒ण्व॒न् अ॒र॒तिं पा॒व॒कं हु॒व्य॒ऽवाह॑ं दधतः मानु॒षेषु॥४॥ प्र भूः॒ जयं॑तं म॒हां वि॒पः॒ऽधां मू॒राः अ॒मूरं॑ पु॒रां द॒र्माणं॑ नयंतः॒ गर्भे॑ व॒नां धियं॑ धुः॒ हिरि॑ऽश्मश्रुं॒ न अ॒र्वाणं॑ धन॑ऽअर्चं॑॥५॥१॥ नि पस्त्या॑सु त्रि॒तः स्त॒भु॒ऽयन् परि॑ऽवीतः योनौ॑ सीदत् अं॒तः॑ ऋ॒तः सं॒ऽगृभ्य॑ वि॒शां द॒मू॒नाः॒ वि॒ऽअ॒र्य॒मणा॑ अ॒यं॒चैः ई॒यते॑ नॄन्॥६॥ अ॒स्य अ॒जरा॑सः द॒मां अ॒रि॒षाः॒ अ॒चे॒त्ऽधू॒मासः॒ अ॒ग्नयः॑ पा॒व॒काः॒ श्वि॒ती॒चयः॑ श्वा॒चासः॑ भु॒रण्य॑वः॒ व॒न॒ऽसदः॑ वा॒यवः॑ न सोमाः॑॥७॥ प्र जि॒ह्वया॑ भरते॒ वेप॑ः अ॒ग्निः प्र व॒युना॑नि चेतसा पृथि॒व्याः॑ तं आ॒यवः॑ शु॒चय॑ंतं पा॒व॒कं मं॒द्रं होता॑रं दधिरे॒ यजि॑ष्ठं॥८॥ द्यावा॑ यं अ॒ग्निं पृथि॒वी॑ जनि॑ष्टां आपः॑ त्वष्टा॑ भृ॒गवः॑ यं सहः॒॑ऽभिः ई॒ळेन्यं॑ प्रथ॒मं मा॒त॒रिश्वा॑ देवाः॑ त॒त॒क्षुः॑ मन॑वे॒ यज॑त्रं॥९॥ यं त्वा॑ देवाः॑ दधिरे॒ हु॒व्य॒ऽवाह॑ं पुरु॒ऽस्पृहः॑ मानु॒षासः॑ यज॑त्रं सः याम॑न् अग्ने॒ स्तु॒व॒ते॒ वयः॑ धाः॑ प्र दे॒व॒ऽयन् य॒ग्मसः॑ सं हि पू॒र्वीः॑॥१०॥२॥

॥४७॥ ज॒गृ॒भ्म ते॒ दक्षि॑णं इंद्र॒ हस्त॑ं व॒सु॒ऽयवः॑ व॒सु॒ऽपते॒ वसू॑नां वि॒द्म हि त्वा॑ गो॒ऽप॒तिं शू॑र॒ गोना॑ं अ॒स्मभ्यं॒ चित्रं॑ वृषणं र॒यिं

दाः ॥१॥ स्वायुधं स्ववसं सुनीथं चतुःसमुद्रं धरुणं रयीणां। चर्कृत्यं शंस्यं भूरिवारमस्मभ्यं चित्रं वृषणं रयिं दाः॥२॥ सुब्रह्माणं देववन्तं बृहन्तमुरुं गभीरं पृथुबुध्नमिन्द्र। श्रुतऋषिमुग्रमभिमातिषाहमस्मभ्यं चित्रं वृषणं रयिं दाः॥३॥ सनद्वाजं विप्रवीरं तरुत्रं धनस्पृतं शूशुवांसं सुदक्षं। दस्युहनं पूर्भिदमिन्द्र सत्यमस्मभ्यं चित्रं वृषणं रयिं दाः ॥४॥ अश्वावन्तं रथिनं वीरवन्तं सहस्रिणं शतिनं वाजमिन्द्र। भद्रवातं विप्रवीरं स्वर्षामस्मभ्यं चित्रं वृषणं रयिं दाः॥५॥३॥ प्र सप्रगुमृतधीतिं सुमेधां बृहस्पतिं मतिरच्छा जिगाति। य आङ्गिरसो नमसोपसद्यो ऽस्मभ्यं चित्रं वृषणं रयिं दाः॥६॥ वनीवानो मम दूतास इन्द्रं स्तोमाश्चरन्ति सुमतीरियानाः। हृदिस्पृशो मनसा वच्यमाना अस्मभ्यं चित्रं वृषणं रयिं दाः ॥७॥ यच्चा यामि दधि तत्त इन्द्र बृहन्तं क्षयमसमं जनानां। अभि तद्यावापृथिवी गृणीतामस्मभ्यं चित्रं वृषणं रयिं दाः॥८॥४॥

॥ ४८ ॥ १–११ इन्द्रो वैकुंठः ॥ इन्द्रो वैकुंठः ॥ १–६, ८, ९ जगती । ७, १०, ११ त्रिष्टुप् ॥

॥ ४८ ॥ अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि सं जयामि शश्वतः। मां हवन्ते पितरं न जन्तवो ऽहं दाशुषे वि भजामि भोजनं ॥१॥ अहमिन्द्रो रोधो वक्षो अथर्वणस्तिताय गा अजनयमहेरधि। अहं दस्युभ्यः परि नृम्णमा ददे गोत्रा शिक्षन् दधीचे मातरिश्वने॥२॥ मह्यं त्वष्टा वज्रमतक्षदायसं मयि देवासो ऽवृजन्नपि क्रतुं । ममानीकं सूर्यस्येव दुष्टरं मामायंति कृतेन कर्वेन च॥३॥ अहमेतं गव्ययमश्व्यं पशुं पुरीषिणं सायकेना हिरण्ययं। पुरू सहस्रा नि शिशामि दाशुषे यन्मा सोमास उक्थिनो अमंदिषुः॥४॥ अहमिन्द्रो न परा जिग्य इद्धनं न

दाः॥१॥ सुऽआयुधं सुऽअवसं सुऽनीथं चतुःऽसमुद्रं धरुणं रयीणां चर्कृत्यं शंस्यं भूरिऽवारं अस्मभ्यं चित्रं वृषणं रयिं दाः॥२॥ सुऽवस्त्राणं देवऽवंतं बृहंतं उरुं गभीरं पृथुऽबुध्नं इंद्र श्रुतऽऋषिं उग्रं अभिमातिऽसहं अस्मभ्यं चित्रं वृषणं रयिं दाः॥३॥ सुनत्ऽवाजं विप्रऽवीरं तरुत्रं धनऽस्पृतं शूशुऽवांसं सुऽदक्षं दस्युऽहनं पूःऽभिदं इंद्र सत्यं अस्मभ्यं चित्रं वृषणं रयिं दाः॥४॥ अश्वऽवंतं रथिनं वीरऽवंतं सहस्रिणं शतिनं वाजं इंद्र भद्रऽग्रावतं विप्रऽवीरं स्वःऽसां अस्मभ्यं चित्रं वृषणं रयिं दाः॥५॥३॥ प्र सप्तऽगुं ऋतऽधीतिं सुऽमेधां बृहस्पतिं मतिः अच्छ जिगाति यः आंगिरसः नमसा उपऽसद्यः अस्मभ्यं चित्रं वृषणं रयिं दाः॥६॥ वनीवानः ममं दूतासः इंद्रं स्तोमाः चरंति सुऽमतीः इयानाः हृदिऽस्पृशः मनसा वच्यमानाः अस्मभ्यं चित्रं वृषणं रयिं दाः॥७॥ यत् त्वा यामि दुधि तत् नः इंद्र बृहंतं क्षयं असमं जनानां अभि तत् द्यावापृथिवी गृणीतां अस्मभ्यं चित्रं वृषणं रयिं दाः॥८॥४॥

॥४८॥ अहं भुवं वसुनः पूर्व्यः पतिः अहं धनानि सं जयामि शश्वतः मां हवंते पितरं न जंतवः अहं दाशुषे विभजामि भोजनं॥१॥ अहं इंद्रः रोधः वक्षः अथर्वणः चितायं गाः अजनयं अहेः अधि अहं दस्युऽभ्यः परि नृम्णं आ ददे गोचा शिक्षन् दधीचे मातरिश्वने॥२॥ महीं त्वष्टा वज्रं अतक्षत् आयसं मयि देवासः अवृजन् अपि क्रतुं मम अनीकं सूर्यस्यऽइव दुस्तरं मां आयंति कृतनं कर्त्वेन च॥३॥ अहं एतं गव्ययं अश्व्यं पशुं पुरीषिणं सायकेन हिरण्ययं पुरु सहस्रा नि शिशामि दाशुषे यत् मा सोमासः उक्थिनः अमंदिषुः॥४॥ अहं इंद्रः न परा जिग्ये इत् धनं न

मृत्यवेऽवतस्थे कदा चनं। सोममिन्मा सुन्वंतो याचता वसु न मे पूरवः सख्ये रिषाथन ॥५॥५॥ अहमेताञ्छाश्वसतो द्वाद्वेंद्ये वज्रं युधयेऽकृणवत। आहव्यमानाँ अव हन्मनाहनं हळ्हा वदन्नन-मस्युनेमस्विनः ॥६॥ अभी३दमेकमेको अस्मि निष्पाळभी द्वा किमु चयः करंति। खले न पर्षान् प्रति हन्मि भूरि किं मा निंदंति शवसो अनिंद्राः ॥७॥ अहं गुंगुभ्यो अतिथिग्वमिष्कर्मिषं न वृंचतुरं विष्णु धारयं। यत्पर्णयग्न उत वा करंजहे प्राहं महे वृंचहत्य अंशुध्रवि ॥८॥ प्र मे नमीसाप इषे भुजे भूद्वामेपे सख्या कृणुत द्विता। दिद्युं यदस्य समिथेषु मंहयमादिदेनं शंस्यमुक्थ्यं करं ॥९॥ प्र नेमस्मिन्दहशे सोमो अंतर्गोपा नेमंमाविरस्था कृणोति। स तिग्मशृंगं वृषभं युयुत्सन् दुहस्तस्यौ बहुले बद्धो अंतः ॥१०॥ आदित्यानां वसूनां रुद्रियाणां देवो देवानां न मिनामि धामं। ते मा भद्राय शवसे ततक्षुरपराजितमस्तृतमषाळ्हं ॥११॥६॥

॥ ४९ ॥ १–११ इंद्रो वैकुंठः ॥ इंद्रो वैकुंठः ॥ १.३–१० जगतौ। २.११ त्रिष्टुप् ॥

॥४९॥ अहं दां गृणते पूर्व्य वस्वहं ब्रह्म कृणवं मह्य वर्धनं। अहं भुवं यजमानस्य चोदितायज्वनः साक्षि विश्वस्मिन्भरे ॥१॥ मां धुरिंद्रं नामं देवता दिवश्च ग्मश्चापां च जंतवः। अहं हरी वृषणा विव्रता रघू अहं वज्रं शवसे धृष्णवा ददे ॥२॥ अहमत्कं कवये शिश्नथं हथैरहं कुत्समावमाभिरूतिभिः। अहं शुष्णस्य श्नथिता वधर्यमं न यो रर आर्याय नाम दस्यवे ॥३॥ अहं पितेव वेतसूँरभिष्टये तुग्रं कुत्साय स्मदिभं च रंधयं। अहं भुवं यजमानस्य राजनि प्र यद्भरे तुजये न प्रियाधृषे ॥४॥ अहं रंधयं मृगयं श्रुतर्वणे यन्माजिहीत वयुना चना-

मृत्यवे अव तस्ये कदा चन सोमे इत् मा सुन्वंतः याचत वसु न मे पूरवः सख्ये रिषाथन ॥५॥५॥ अहं एतान् शार्धसतः द्वाऽद्वा इंद्रे ये वज्रं युधये अकृण्वत आऽह्वयमानान् अव हन्मना अहनं हव्हा वदन् अनमस्युः नमस्विनः ॥६॥ अभि इदं एकं एकः अस्मि निष्पाट् अभि द्वा किं ऊं चयः करंति खले न पर्षान् प्रति हन्मि भूरि किं मा निंदंति शर्वयः अनिंद्राः ॥७॥ अहं गुंगुऽभ्यः अतिथिऽग्वं इष्करं इषे न वृचऽतुरं विष्टु धारयं यत् पर्णयऽग्ने उत वा करंजऽहे प्र अहं महे वृचऽहत्ये अशुंश्रवि ॥८॥ प्र मे नमी साप्यः इषे भुजे भूत् गवां एषे सख्या कृणुत द्विता दिद्युं यत् अस्य संऽइथेषुं मंहयं आत् इत् एनं शंस्यं उक्थ्यं करं ॥९॥ प्र नेमस्मिन् दृहशे सोमः अंतः गोपाः नेमं आविः अस्था कृणोति सः तिग्मऽशृंगं वृषभं युयुत्सन् दुहः तस्थौ बहुले बुद्धः अंतः ॥१०॥ आदित्यानां वसूनां रुद्रियाणां देवः देवानां न मिनामि धामं ते मा भद्राय शर्वसे ततक्षुः अमराऽजितं अस्तृतं अपाव्हं ॥११॥६॥

॥४९॥ अहं दां गृणते पूर्व्यं वसु अहं ब्रह्म कृणवं महे वधे अहं भुवं यजमानस्य चोदिता अयज्वनः साक्षि विश्वस्मिन् भरे ॥१॥ मां धुः इंद्रं नाम देवता दिवः च ग्मः च अपां च जंतवः अहं हरी वृषणा विऽव्रता रघू अहं वज्रं शवसे धृष्णु आ ददे ॥२॥ अहं अत्कं कवये शिश्न्यं हथैः अहं कुत्सं आवं आभिः ऊतिऽभिः अहं शुष्णस्य श्नथिता वधः यमं न यः रे आर्यं नाम दस्यवे ॥३॥ अहं पिताऽइव वेतसून् अभिष्टये तुर्यं कुत्साय स्मत्ऽइभं च रंधयं अहं भुवं यजमानस्य राजनि प्र यत् भरे तुजये न प्रिया आऽधृषे ॥४॥ अहं रंधयं मृगयं श्रुतर्वणे यत् मा अजिंहीत वयुना चन आ-

नुपक्। अहं वेशं नमंमायवेऽकरमहं सव्याय पञ्जभिमरंधयं ॥५॥७॥ अहं स यो नवंवास्त्वं बृहद्रथं सं वृत्रेव दासं वृत्रहारुजं। यद्युध्यंतं प्रयंयंतमानुपग्दूरे पारे रजंसो रोचनाकरं ॥६॥ अहं सूर्यस्य परि यास्याशुभिः प्रतशेभिर्वहमान ओजसा। यन्मा सावो मनुष आहं निर्णिज ऋधक्रपे दासं कृत्व्यं हथैः ॥७॥ अहं संप्रहा नहुषो नहुष्टरः प्राष्ठावयं शवसा तुर्वशं यदुं। अहं न्यं१न्यं सहसा सहस्करं नव व्राधतो नवतिं च वक्षयं॥८॥ अहं सप्त स्रवतो धारयं वृषा द्रवित्न्वः पृथिव्यां सीरा अधि। अहमर्णांसि वि तिरामि सुक्रतुर्युधा विदं मनवे गातुमिष्टयें ॥९॥ अहं तदासु धारयं यदासु न देवश्चन त्वष्टाधारयद्रुशत्। स्याहं गवामूधःसु वक्षणास्वा मधोर्मधु प्राप्यं सोममाशिरं ॥१०॥ एवा देवाँ इंद्रो विश्वे नृन् प्र च्यौत्नेन मघवा सत्यराधाः। विश्वेत्ता ते हरिवः शचीवोऽभि तुरासः स्वयशो गृणंति ॥११॥८॥

॥५०॥ १-७ इंद्रो वैकुंठः ॥ इंद्रो वैकुंठः ॥ १, २ ६, ७ जगती। ३ ४ त्रिष्टुप्। ५ विराट्॥

॥५०॥ प्र वो महे मंदमानायांधसोऽर्चा विश्वानंराय विश्वाभुवे। इंद्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः ॥१॥ सो चिन्नु सख्या नर्यो द्रुनः स्तुतश्चर्कृत्य इंद्रो मावते नरे। विश्वासु धूषु वाजकृत्येषु सत्पते वृत्रे वाप्स्व१भि शूर मंदसे ॥२॥ के ते नर इंद्र ये त इषे ये ते सुम्नं संधन्य१मियक्षान्। के ते वाजायासुर्याय हिन्विरे के अप्सु स्वासूर्वरासु पौंस्ये ॥३॥ भुवस्त्वमिंद्र ब्रह्मणा महान्भुवो विश्वेषु सवनेषु यज्ञियः। भुवो नृँश्च्यौत्नो विश्वस्मिन्भरे ज्येष्ठश्च मंत्रो विश्वचर्षणे ॥४॥ अवा नु कं ज्यायान् यज्ञवनसो महीं तू ओमांचां

नुपक्अहं वेशं नम्रं आयवे अकरं अहं सव्याय पट्ऽगृभिं अरंधयं ॥५॥७॥ अहं सः यः नवंऽवास्वं बृहत्ऽरथंसं वृचाऽइव दासं वृचऽहा अरुजं यत् वर्धयंतं प्रथयंतं आनुपक् दूरे पारे रजसः रोचना अकरं॥६॥ अहं सूर्यस्य परि यामि आशुऽभिः प्र एतशेभिः वहमानः ओजसा यत् मा सावः मनुषः आहे निःऽनिजे ऋधक् कूपे दासं कृत्व्यं हथैः॥७॥ अहं सप्नऽहा नहुषः नहुःऽतरः प्र अश्रवयं शवसा तुर्वशं यदुं अहं नि अन्यं सहसा सहः करं नवं ग्राधतः नवतिं च वक्षयं॥८॥ अहं सप्त स्रवतः धारयं वृषा द्रुवित्वः पृथिव्यां सीराः अधि अहं अर्णांसि वि तिरामि सुऽक्रतुः युधा विदं मनवे गातुं इष्टये॥९॥ अहं तत् आसु धारयं यत् आसु न देवः चन त्वष्टा अधारयत् रुशत् स्याहं गवां ऊधःऽसु वक्षणासु आ मधोः मधु श्चात्यं सोमं आऽशिरं॥१०॥ एव देवान् इंद्रः विव्ये नॄन् प्र च्यौत्नेन मघऽवा सत्यऽराधाः विश्वा इत् ता ते हरिऽवः शचीऽवः अभि तुरासः स्वऽयशः गृणंति॥११॥८॥

॥५०॥ प्र वः महे मंदमानाय अंधसः अर्चं विश्वानराय विष्वऽभुवे इंद्रस्य यस्य सुऽमखं सहः महि श्रवः नृम्णं च रोदसी सपर्यतः॥१॥ सः चित् नु सख्या नर्यः इनः स्तुतः चर्कृत्यः इंद्रः माऽवते नरे विश्वासु धूःऽसु वाजऽकृत्येषु सत्ऽपते वृचे वा अप्ऽसु अभि शूर मंदसे॥२॥ के ते नरः इंद्र ये ते ह्विषे ये ते सुम्नं सऽधन्यं इयक्षान् के ते वाजाय असुर्याय हिन्विरे के अप्ऽसु स्वासु उर्वरासु पौंस्ये॥३॥ भुवः त्वं इंद्र ब्रह्मणा महान् भुवः विश्वेषु सवनेषु यज्ञियः भुवः नॄन् च्यौत्नः विश्वस्मिन् भरे ज्येष्ठः च मंत्रः विश्वऽचर्षणे॥४॥ अवं नु कं ज्यायान् यज्ञऽवनसः महीं ते ओमानं

कृण्वो विदुः। असो नु कमजरो वधीश्च विश्वेदेता सवना तूतुमा कृषे ॥५॥ एता विश्वा सवना तूतुमा कृषे स्वयं सूनो सहसो यानि दधिषे। वराय ते पात्रं धर्मण्ये तना यज्ञो मंत्रो ब्रह्मोद्यतं वचः ॥६॥ ये ते विप्र ब्रह्मकृतः सुते सचा वसूनां च वसुनश्च दावने। प्र ते सुम्नस्य मनसा पथा भुवन्मदे सुतस्य सोम्यस्यांधसः ॥७॥९॥

॥ ५१ ॥ १. ३. ५. ७. ९ देवाः। २. ४. ६. ८ अग्निः सौचीकः ॥ १. ३. ५. ७. ९ अग्निः सौचीकः। २. ४. ६. ८ देवाः ॥ त्रिष्टुप् ॥

॥ ५१ ॥ महत्तदुल्वं स्थविरं तदासीद्येनाविष्टितः प्रविवेशिथापः। विश्वा अपश्यज्जुहुधा ते अग्ने जातवेदस्तन्वो देव एकः ॥१॥ को मा ददर्श कतमः स देवो यो मे तन्वो बहुधा पर्यपश्यत्। क्व ह मिचावरुणा शियंत्यग्रेर्विश्वाः समिधो देवयानीः ॥२॥ ऐच्छाम त्वा बहुधा जातवेदः प्रविष्टमग्ने अप्स्वोषधीषु। तं त्वा यमो अचिकेच्चिचानो दशांतरुष्यादंतिरोचमानं ॥३॥ होत्रादहं वरुण विभ्यदायं नेदेव मा युनजन्नवं देवाः। तस्य मे तन्वो बहुधा निविष्टा एतमर्थं न चिकेताहमग्निः ॥४॥ एहि मनुर्देवयुर्यज्ञकामोऽरंकृत्या तमसि क्षेष्यग्ने। सुगान्पथः कृणुहि देवयानान्वह हव्यानि सुमनस्यमानः ॥५॥१०॥ अग्नेः पूर्वे भातरो अर्थमेतं रथीवाध्वानमन्वावरीवुः। तस्माद्विया वरुण दूरमायं गौरो न क्षेत्रोरविजे ज्यायाः ॥६॥ कुमस्त आयुरजरं यदग्ने यथा युक्तो जातवेदो न रिष्याः। अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजात ॥७॥ प्रयाजान्मे अनुयाजांश्च केवलानूर्जस्वंतं हविषो दत्त भागं। घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु

कृष्टयः विदुः असः नु कं अजरः वधीः च विश्वा इत् एता सवना तूतुमा कृषे ॥५॥ एता विश्वा सवना तूतुमा कृषे स्वयं सूनो सहसः यानि दधिषे वराय ते पाचं धर्मणे तना यज्ञः मंचः ग्रहं उत्-ऽयतं वचः ॥६॥ येते विप्र ग्रहऽकृतः सुते सचा वसूनां च वसुनः च दावने प्र ते सुम्नस्य मनसा पुरा भुवन् मदे सुतस्य सोम्यस्य अंधसः ॥७॥९॥

॥५१॥ महत् तत् उल्वं स्थविरं तत् आसीत् येन आऽविष्टितः प्रऽविवेशिथ अपः विश्वाः अपश्यत् बहुधा ते अग्ने जातऽवेदः तन्वः देवः एकः ॥१॥ कः मा ददर्श कतमः सः देवः यः मे तन्वः बहुधा परिऽअपश्यत् कं अहं मिचा वरुणा दिप्सयंति अग्नेः विश्वाः संऽइधः देवऽयानीः ॥२॥ ऐच्छाम त्वा बहुधा जातऽवेदः प्रऽविष्टं अग्ने अप्ऽसु ओषधीषु तं त्वा यमः अचिकेत् चित्रऽभानो° दशऽअंतरुष्यात् अतिऽरोचमानं ॥३॥ होचात् अहं वरुण बिभ्यत् आयं न इत् एव मा युनजन् अचं देवाः तस्य मे तन्वः बहुधा निऽविष्टाः एतं अर्थं न चिकेत अहं अग्निः ॥४॥ आ इहि मनुः देवऽयुः यज्ञऽकामः अरंऽकृत्य तमसि क्षेपि अग्ने सुऽगान् पथः कृणुहि देवऽयानान् वहं हव्यानि सुऽमनस्यमानः ॥५॥१०॥ अग्नेः पूर्वे भ्रातरः अर्थं एतं रथीऽइव अध्वान अनु आ अवरीवुः° तस्मात् भिया वरुण दूरं आयं गौरः न क्षेप्नोः अविजे ज्यायाः ॥६॥ कुमः ते आयुः अजरं यत् अग्ने यथा युक्तः जातऽवेदः न रिष्याः अर्थं वहासि सुऽमनस्यमानः भागं देवेभ्यः हविषः सुऽजात ॥७॥ प्रऽयाजान् मे अनुऽयाजान् च केवलान् ऊर्जस्वंतं हविषः दत्त भागं घृतं च अपां पुरुषं च ओषधीनां अग्नेः च दीर्घं आयुः अस्तु

देवाः ॥ ८ ॥ तवं प्रयाजा अनुयाजाश्च केवल ऊर्जस्वंतो हविषः संतु भागाः । तवाग्ने यज्ञोऽयमस्तु सर्वस्तुभ्यं नमंतां प्रदिशश्चतस्रः ॥ ९ ॥ ११ ॥

॥ ५२ ॥ १–६ अग्निः सौचीकः ॥ देवाः ॥ त्रिष्टुप् ॥

॥ ५२ ॥ विश्वे देवाः शास्तनं मा यथेह होतां वृतो मनवै यन्निषद्यै । प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानि ॥ १ ॥ अहं होता न्यसीदं यजीयान् विश्वे देवा मरुतो मा जुनंति । अहरहरश्विनाध्वर्यवं वां ब्रह्मा समिद्धवति साहुतिं वा ॥ २ ॥ अयं यो होता किरुस यमस्य कमप्यूहे यत्समंजंति देवाः । अहरहर्जायते मासिमास्यथा देवा दधिरे हव्यवाहं ॥ ३ ॥ मां देवा दधिरे हव्यवाहमपंम्लुक्तं बहु कृच्छ्रा चरंतं । अग्निर्विद्यान्यज्ञं नः कल्पयाति पंचयामं त्रिवृतं सप्ततंतुं ॥ ४ ॥ आ वो यक्ष्यमृतत्वं सुवीरं यथा वो देवा वरिवःकराणि । आ वाज्रोर्वजमिंद्रस्य धेयामथेमा विश्वाः पृतना जयाति ॥ ५ ॥ चीणि शता चीं सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् । औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयंत ॥ ६ ॥ १२ ॥

॥ ५३ ॥ १–३. ६–११ देवाः । ४. ५ अग्निः सौचीकः ॥ १–३. ६–११ अग्निः सौचीकः । ४. ५ देवाः ॥ १–५. ८ त्रिष्टुप् । ६. ७. ९–११ जगती ॥

॥ ५३ ॥ यमिच्छाम मनसा सोऽयमागाद्यज्ञस्य विद्वान्परुष्थिकित्वान् । स नो यक्षद्देवतांता यजीयान्नि हि पत्सदंतरः पूर्वो अस्मत् ॥ १ ॥ अरांधि होतां निषदा यजीयानभि प्रयांसि सुधितानि हि ख्यत् । यजामहे यज्ञियान्हंत देवाँ ईळांमहा ईड्याँ आज्येन ॥ २ ॥ साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्याँ । स आयुरागात्सुरभिर्वसानो

देवाः ॥८॥ तवं प्रऽयाजाः अनुऽयाजाः च केवलेऽऊर्जस्वंतः हविषः संतु भागाः तवं अग्ने यज्ञः अयं अस्तु सर्वः तुभ्यं नमंतां प्रऽदिशः चतस्रः ॥९॥११॥

॥५२॥ विश्वे देवाः शास्तनं मा यथा इह होता वृतः मनवै यत् निऽसद्यं प्रऽमे ब्रूत भागऽधेयं यथा वः येन पथा हव्यं आ वः वहानि ॥१॥ अहं होता नि असीदं यजीयान् विश्वे देवाः मरुतः मा जुनंति अहःऽअहः अश्विना आध्वर्यवं वां ब्रह्मा संऽइत् भवति सा आऽहुतिः वां ॥२॥ अयं यः होता किं ऊं सः यमस्य कं अपि ऊहे यत् संऽअंजंति देवाः अहःऽअहः जायते मासिऽमासि अथ देवाः दधिरे हव्यऽवाहं ॥३॥ मां देवाः दधिरे हव्यऽवाहं अपऽअम्लुक्तं बहु कृच्छ्रा चरंतं अग्निः विद्वान् यज्ञं नः कल्पयाति पंचऽयामं चिऽवृतं सप्तऽतंतुं ॥४॥ आ वः यष्टि अमृतऽत्वं सुऽवीरं यथा वः देवाः वरिवः करांणि आ बाह्वोः वज्रं इंद्रस्य धेयां अथ इमाः विश्वाः पृतनाः जयाति ॥५॥ चीणि शता चौ सहस्राणि अग्निं चिंशत् च देवाः नवं च असपर्यन् औक्षन् घृतैः अस्तृणन् बर्हिः अस्मै आत् इत् होतारं नि असादयंत ॥६॥१२॥

॥५३॥ यं ऐच्छाम मनसा सः अयं आ अगात् यज्ञस्य विद्वान् परुषः चिकित्वान् सः नः यक्षत् देवऽतांता यजीयान् नि हि सत्सत् अंतरः पूर्वः अस्मत् ॥१॥ अराधि होता निऽसदा यजीयान् अभि प्रयांसि सुऽधिता नि हि ख्यत् यजामहै यज्ञियान् हंत देवान् ईळामहै ईड्यान् आज्येन ॥२॥ साध्वीं अकः देवऽवीतिं नः अद्य यज्ञस्य जिह्वां अविदाम गुह्यां सः आयुः आ अगात् सुरभिः वसानः

भद्रामकर्दवहूतिं नो अद्य ॥३॥ तद्व वाचः प्रथमं मसीय येना-सुराँ अभि देवा असाम। ऊर्जाद उत यज्ञियासः पंच जना मम होत्रं जुषध्वं ॥४॥ पंच जना मम होत्रं जुषंतां गोजाता उत ये यज्ञियासः। पृथिवी नः पार्थिवात्पात्वंहसो ऽन्तरिक्षं दिव्यात्पा-त्वस्मान् ॥५॥१३॥ तंतुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान्। अनुल्वणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनं ॥६॥ अक्षानहो नह्यतनोत सोम्या इष्कृणुध्वं रशना ओत पिंशत। अष्टावंधुरं वहताभितो रथं येन देवासो अनयन्नभि प्रियं ॥७॥ अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र तरता सखायः। अत्रा जहाम ये असन्नशेवाः शिवान्वयमुत्तरे-माभि वाजान् ॥८॥ त्वष्टा माया वेदपसामपस्तमो विभत्पाचा देवपानानि शंतमा। शिशीते नूनं परशुं स्वायसं येन वृश्चा-देतशो ब्रह्मणस्पतिः ॥९॥ सतो नूनं कवयः सं शिशीत धीरा-भिर्याभिरमृताय तक्षथ। विद्वांसः पदा गुह्यानि कर्तन येन देवासो अमृतत्वमानशुः ॥१०॥ गर्भे योषामदधुर्वत्समास्न्य-पीच्येन मनसोत जिह्वया। स विश्वाहा सुमना योग्या अभि सिषासनिर्वनते वारं इज्जितिं ॥११॥१४॥

॥ ५४ ॥ १–६, गृहपुत्रयो वामदेव्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ ५४ ॥ तां सु ते कीर्तिं मघवन्महित्वा यत्त्वा भीते रोद-सी अह्वयेतां। प्रावो देवाँ अतिरो दासमोजः प्रजायै त्वष्ट्रे यदशिक्ष इंद्र ॥१॥ यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु। मायेत्सा ते यानिं युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से ॥२॥ क उ नु ते महिमनः समस्यास्म-

भद्रां अकः देवऽहूतिं नः अद्य ॥३॥ तत् अद्य वाचः प्रथमं मसीय येन असुरान् अभि देवाः असाम ऊर्जऽअदः उत यज्ञियासः पंच जनाः मम होत्रं जुषध्वं ॥४॥ पंच जनाः मम होत्रं जुषंतां गोऽजाताः उत ये यज्ञियासः पृथिवी नः पार्थिवात् पातु अंहसः अंतरिक्षं दिव्यात् पातु अस्मान् ॥५॥१३॥ नंतुं तन्वन् रजसः भानुं अनुं इहि ज्योतिष्मतः पथः रक्ष धिया कृतान् अनुल्वणं वयत जोगुवां अपः मनुः भव जनय दैव्यं जनं ॥६॥ अष्टाऽनहः नक्षतन् उत सोम्याः इष्कृणुध्वं रशनाः आ उत पिंशत अष्टाऽवंधुरं वहत अभितः रथं येन देवासः अनयन् अभि प्रियं ॥७॥ अश्मन्ऽवती रीयते सं रभध्वं उत् तिष्ठत प्र तरत सखायः अत्र जहाम ये असन् अशेवाः शिवान् वयं उत् तरेम अभि वाजान् ॥८॥ त्वष्टा मायाः वेत् अपसां अपःऽतमः बिभ्रत् पाचा देवऽपानानि शंऽतमा शिशीते नूनं परशुं सुऽआयसं येन वृक्षात् एतशः ब्रह्मणः पतिः ॥९॥ सुतः नूनं कवयः सं शिशीत आशीभिः याभिः अमृताय तक्षथ विद्वांसः पदा गुह्यानि कर्तन येन देवासः अमृतऽत्वं आनशुः ॥१०॥ गर्भे योषां अदधुः वत्सं आसनि अपीच्येन मनसा उत जिह्वया सः विश्वाहा सुऽमनाः योग्याः अभि सिसासनिः वनते कारः इत् जितिं ॥११॥१४॥

॥५४॥ तां सुते कीर्तिं मघऽवन् महिऽत्वा यत् त्वा भीते रोदसी अह्वयेतां प्र आवः देवान् आ अतिरः दासं ओजः प्रऽजायै त्वस्ये यत् अशिक्षः इंद्र ॥१॥ यत् अचरः तन्वा वृधानः बलानि इंद्र प्रऽब्रुवाणः जनेषु माया इत् सा ते यानि युद्धानि आहुः न अद्य शत्रुं ननु पुरा विवित्से ॥२॥ के कं नु ते महिमनः समस्य अस्मत्

त्पूर्व ऋषयोऽतंमापुः। यन्मातरं च पितरं च साकमजनयथास्तन्वः स्वायाः ॥३॥ चत्वारि ते असुर्याणि नामादाभ्यानि महिषस्य संति। त्वमंग तानि विश्वानि वित्से येभिः कर्माणि मघवञ्चकर्थ ॥४॥ त्वं विश्वा दधिषे केवलानि यान्यावियां च गुहा वसूनि। कामंमिन्मे मघवन्ना वि तारीस्त्वमाज्ञाता त्वमिंद्रासि दाता ॥५॥ यो अदंधाज्ज्योतिंषि ज्योतिरंतर्यो असृजन्मधुना संमधूनि। अध प्रियं शूषमिंद्राय मन्म ब्रह्मकृतो वृहदुक्थादवाचि ॥६॥ १५ ॥

॥ ५५ ॥ १–६ बृहदुक्थो वामदेव्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥ ५५ ॥ दूरे तन्नाम गुह्यं परांचैर्यत्त्वा भीते अह्वयेतां वयोधै। उदंस्तभ्नाः पृथिवीं द्यामभीकेऽभ्रातुः पुत्रान्मघवन्तित्विषाणः ॥१॥ महत्तन्नाम गुह्यं पुरुस्पृग्येनं भूतं जनयो येन भव्यं। प्रत्नं जातं ज्योतिर्यदस्य प्रियं प्रियाः समविशंत पंच ॥२॥ आ रोदंसी अपृणादोत मध्यं पंच देवाँ ऋतुशः सप्रसप्त। चतुस्त्रिंशता पुरुधा वि चष्टे सरूपेण ज्योतिषा विव्रतेन ॥३॥ यदुप श्रोच्छः प्रथमा विभानामजनयो येनं पुष्टस्य पुष्टं। यत्ते जामित्वमवरं परस्या महन्महत्या असुरत्वमेकं ॥४॥ विधुं ददाणं समने बहूनां युवानं संतं पलितो जगार। देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥५॥ १६ ॥ शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीळः। यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ॥६॥ ऐभिर्ददे वृष्ण्या पौंस्यानि येभिरौक्षद्वृत्रहत्याय वज्री। ये कर्मणः क्रियमाणस्य मह ऋते कर्ममुदजायंत देवाः ॥७॥ युजा कर्माणि जनयन्विष्वौजा

पूर्वे॑ ऋ॒षयः॑ अ॒न्तः अ॒पुः॒ यत् मा॒तर॑ं च॒ पि॒तर॑ं च॒ साक॑ं अजनयथाः॒ तन्वः॑ स्वायाः॥३॥ च॒त्वारि॑ ते॒ असु॑र्याणि॒ नाम॑ अदा॒भ्यानि॒ म॒हि॒षस्य॑ सन्ति॒ त्वं अ॑ङ्ग ताना॑ वित्से॒ येभिः॑ कर्मा॑णि मघऽवन् चकर्थ॥४॥ त्वं विश्वा॑ दधिषे केवलानि यानि॑ आ॒विः या च॒ गुहा॑ वसू॑नि कामे॑ इत् मे॒ मघ॑ऽवन् मा॒ वि ता॑रीः॒ त्वं आ॑ऽज्ञाता॒ त्वं इ॑न्द्र॒ असि॒ दाता॑॥५॥ यः अ॒दधा॑त् ज्योति॑षि॒ ज्योतिः॑ अ॒न्तः यः अ॑सृ॒जत् मधु॑ना॒ सं मधू॑नि अधा॑ प्रि॒यं भू॒पं इ॑न्द्रा॒य मन्म॑ ब्रह्मऽकृतः॒ बृह॒न्ऽउ॑क्थात् अवा॑चि॥६॥१५॥

॥५५॥ दूरे॑ तत् नाम॑ गुह्यं॑ परा॒चैः॒ यत् त्वा॒ भीते॑ अह्वयेतां व॒यः॒ऽधे उत् अ॑स्तभ्नाः पृथि॒वीं द्यां अ॒भीके॑ भ्रातुः॑ पु॒त्रान् म॒घ॒ऽव॒न् ति॒त्वि॒षा॒णः॥१॥ म॒हत् तत् नाम॑ गुह्यं॑ पु॒रु॒ऽस्पृक् येन॑ भू॒तं ज॒नय॑ः॒ येन॑ भ॒व्यं प्र॒त्नं जा॒तं ज्योतिः॑ यत् अ॒स्य॒ प्रि॒यं प्रि॒याः सं अ॒वि॒श॒न्त॒ पंच॑॥२॥ आ रोद॑सी॒ अ॒पृ॒णा॒त् आ उ॒त मध्यं॑ पंच॑ देवान् ऋ॒तु॒ऽशः॒ स॒प्त॒ऽसं॒प्त च॒तुः॒ऽचि॒ंश॒ता पु॒रु॒धा वि च॑ष्टे स॒ऽरू॒पेण॑ ज्योति॑षा॒ वि॒ऽअ॒व॒तेन॥३॥ यत् उ॑पः॒ औ॒च्छः॑ प्रथ॒मा वि॒ऽभा॒नां॑ अजनयः॒ येन॑ पु॒ष्टस्य॑ पु॒ष्टं यत् ते॒ जा॒मि॒ऽत्वं अ॑वरं॒ परस्या॑ः म॒हत् म॒हत्या॒ असु॑र॒ऽत्वं एक॑म्॥४॥ वि॒ऽधुं द॒द्रा॒णं समने॑ बहू॒नां युवा॑नं सं॒तं पलि॒तः॒ ज॒गा॒र॒ देव॑स्य पश्य॒ काव्यं॑ महि॒ऽत्वा अ॒द्य ममा॑र॒ सः॒ ह्यः सं आ॒न॥५॥१६॥ शा॒क्मना॑ शा॒कः॒ अ॒रु॒णः॒ सु॒ऽप॒र्णः॒ आ यः म॒हः॒ पू॒रः॒ स॒न॒नात् अ॒नी॒ळः॒ यत् चि॒केत॑ सत्यं इत् तत् न मो॒घं व॒सु॒ स्या॒हे॒ उत॒ जेता॑ उ॒त॒ दाता॑॥६॥ आ एभिः॑ ददे वृष्ण्या॑ पौंस्या॑नि॒ येभिः॑ औ॒शन्॑ वृ॒च॒ऽह॒त्याय॑ व॒ज्री ये कर्म॑णः क्रि॒यमा॑णस्य म॒हा ऋ॒तेऽक॑र्म॑ उत्ऽअजायंत देवाः॥७॥ युजा॑ कर्मा॑णि जनयन् विश्वऽओजाः

त्पूर्वे ऋषयोऽतंमापुः। यन्मातरं च पितरं च साकमजनयथास्तन्वः स्वायाः ॥३॥ चत्वारि ते असुर्याणि नामादाभ्यानि महिषस्य संति। त्वमंग तानि विश्वानि वित्से येभिः कर्माणि मघवञ्चकर्थ ॥४॥ त्वं विश्वा दधिषे केवलानि यान्यावियां च गुह्या वसूनि। कामंमिन्मे मघवन्मा वि तारीस्त्वमाज्ञाता त्वमिंद्रासि दाता ॥५॥ यो अदधाज्ज्योतिषि ज्योतिरंतर्यो असृजन्मधुना सं मधूनि। अर्ध प्रियं शूषमिंद्राय मन्मं ब्रह्मकृतो बृहदुक्थादवाचि ॥६॥ १५ ॥

॥ ५५ ॥ १-८ बृहदुक्थो वामदेव्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥५५॥ दूरे तन्नाम गुह्यं परांचैर्यत्त्वा भीते अह्वयेतां वयोधै। उदस्तभ्नाः पृथिवीं द्यामभीके भ्रातुः पुत्रान्मघवन्तित्विषाणः ॥१॥ महत्तन्नाम गुह्यं पुरुस्पृग्येनं भूतं जनयो येन भव्यं। प्रत्नं जातं ज्योतिर्यदस्य प्रियं प्रियाः समविशंत पंच ॥२॥ आ रोदसी अपृणादोत मध्यं पंच देवाँ ऋतुशः सप्तसप्त। चतुस्त्रिंशता पुरुधा वि चष्टे सरूपेण ज्योतिषा विव्रतेन ॥३॥ यदुप ओचंछः प्रथमा विभानामजनयो येन पुष्टस्य पुष्टं। यत्ते जामित्वमवरं परस्या महन्महत्या असुरत्वमेकं ॥४॥ विधुं दद्राणं समने बहूनां युवानं संतं पलितो जगार। देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥५॥ १६ ॥ शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीळः। यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ॥६॥ ऐभिर्ददे वृष्ण्या पौंस्यानि येभिरौक्षद्वृत्रहत्याय वज्री। ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजायंत देवाः ॥७॥ युजा कर्माणि जनयन्विष्वौजा

पूर्वे ऋषयः अन्तः आपुः यत् मातरं च पितरं च साकं अजनयथाः तन्वः स्वायाः॥३॥ चत्वारि ते असुर्याणि नामा अदाभ्यानि महिषस्य सन्ति त्वं अङ्ग तानि विश्वानि वित्से येभिः कर्माणि मघऽवन् चकर्थ॥४॥ त्वं विश्वा दधिषे केवलानि यानि आविः या च गुहा वसूनि कामे इत् मे मघऽवन् मा वि तारीः त्वं आऽज्ञाता त्वं इन्द्र असि दाता॥५॥ यः अदधात् ज्योतिषि ज्योतिः अन्तः यः असृजत् मधुना सं मधूनि अधि प्रियं भूषं इन्द्राय मन्म बृहऽकृतः बृहत्ऽउक्थात् अवाचि॥६॥१५॥

॥५५॥ दूरे तत् नाम गुह्यं पराचैः यत् त्वा भीते अह्वयेतां वयःऽधे उत् अस्तभ्नाः पृथिवीं द्यां अभीके भ्रातुः पुत्रान् मघऽवन् तितिविषाणः॥१॥ महत् तत् नाम गुह्यं पुरुऽस्पृक् येन भूतं जनयः येन भव्यं प्रत्नं जातं ज्योतिः यत् अस्य प्रियं प्रियाः सं अविशन्त पंच॥२॥ आ रोदसी अपृणात् आ उत मध्यं पंच देवान् ऋतुऽशः सप्तऽसप्त चतुःऽचिंशता पुरुधा वि चष्टे सऽरूपेण ज्योतिषा विऽव्रतेन॥३॥ यत् उषः औच्छः प्रथमा विऽभानां अजनयः येन पुष्टस्य पुष्टं यत् ते जामिऽत्वं अवरं परस्याः महत् महत्याः असुरऽत्वं एकं॥४॥ विऽधुं दद्राणं समने बहूनां युवानं सन्तं पलितः जगार देवस्य पश्य काव्यं महिऽत्वा अद्य ममार सः ह्यः सं आन॥५॥१६॥ शाकिना शाकः अरुणः सुऽपर्णः आ यः महः शूरः सनात् अनीळः यत् चिकेत सत्यं इत् तत् न मोघं वसु स्पार्हे उत जेता उत दाता॥६॥ आ एभिः ददे वृष्ण्या पौंस्यानि येभिः औक्षत् वृचऽहत्याय वज्री ये कर्मणः क्रियमाणस्य महा ऋतेऽकर्मे उत्ऽअजायंत देवाः॥७॥ युजा कर्माणि जनयन् विश्वऽओजाः

अशस्तिहा वि॒श्वम॑नास्तुरा॒याट्। पी॒त्वी सोम॑स्य दि॒व आ वृ॑धा॒नः शू॒रो नि॒र्युधा॑धम॒द्स्यून्॥ ८॥ १७॥

॥ ५६॥ १–७ वृहदुक्थो वामदेव्यः॥ विश्वे देवाः॥ १–३, ७ त्रिष्टुप्। ४–६ जगती॥

॥ ५६॥ इ॒दं त॒ एकं॒ पर॒ ऊ त॒ एकं॑ तृ॒तीये॑न॒ ज्योति॑षा॒ सं वि॑श॒स्व। सं॒वेश॑ने त॒न्व१॒॑श्चारु॑रेधि प्रि॒यो दे॒वानां॑ पर॒मे ज॒नित्रे॑॥ १॥ त॒नू॒पेऽ वाजिन्त॒न्व१॒॑ नय॑न्ती वा॒मम॒स्मभ्यं॒ धातु॒ शर्म॑ तु॒भ्यं॑। अहे॑ळतो म॒हो ध॒रुणा॑य दे॒वान्दि॒वीव॒ ज्योति॒ः स्वमा मि॑मीयाः॥ २॥ वा॒ज्यसि॒ वाजि॑नेना सु॒वे॒नीः सु॑वि॒तः स्तोमे॑ सुवि॒तो दि॒वे गाः। सु॒वि॒तो धर्म॑ प्रथ॒मानु॑ स॒त्या सु॑वि॒तो दे॒वान्त्सु॑वि॒तोऽनु॒ पत्म॑॥ ३॥ म॒हिम्न॑ ए॒षां पि॒तर॑श्चने॒शिरे॑ दे॒वा दे॒वेष्व॑दधुरपि॒ क्रतु॑। सम॑विव्यचुरुत यान्य॒स्मिंपु॑रे॒षां त॒नूषु॒ नि वि॑विशुः पु॒नः॥ ४॥ सहो॑भि॒र्विश्वं॒ परि॑ चक्रमू॒ रज॒ः पूर्वा॒ धामा॒न्यमि॑ता मि॒मा॑नाः। त॒नूषु॒ विश्वा॒ भुव॑ना॒ नि ये॑मिरे॒ प्रासा॑रयन्त पु॒रुध॑ प्र॒जा अनु॑॥ ५॥ द्विधा॑ सू॒नवो॒ऽसुरं॑ स्व॒र्विद॒मास्था॑पयन्त तृ॒तीये॑न॒ कर्म॑णा। स्वां प्र॒जां पि॒तर॒ः पित्र्यं॒ सह॒ आव॑रेष्वदधु॒स्तंतु॑मात॒तं॥ ६॥ नावा॒ न क्षोद॒ः प्रदि॑शः पृथि॒व्याः स्व॒स्तिभि॒रति॑ दुर्गा॒णि विश्वा॑। स्वां प्र॒जां वृ॑हदुक्थो महित्वाव॑रेष्वदधा॒दा परे॑षु॥ ७॥ १८॥

॥ ५७॥ १–६ वंपुः सुवंपुः सुतवंपुर्विश्ववंपुश्च गौपायनाः॥ विश्वे देवाः॥ गायत्री॥

॥ ५७॥ मा प्र गा॑म प॒थो व॒यं मा य॒ज्ञादि॑न्द्र सो॒मिनः॑। मा॑ नः॒ स्तेना॒ अरा॑तयः॥ १॥ यो य॒ज्ञस्य॑ प्रसा॒धन॒स्तंतु॑र्दे॒वेष्वा॑त॒तः। तमा॑हु॒तं न॑शीमहि॥ २॥ मनो॒ न्वा हु॑वामहे॒ नारा॑शंसेन॒ सोमे॑न। पि॒तॄणां॑ च॒ मन्म॑भिः॥ ३॥ आ त॑ ए॒तु मन॒ः पुन॒ः क्रत्वे॒ दक्षा॑य जी॒वसे॑। ज्योक् च॒ सूर्यं॑ दृ॒शे॥ ४॥ पुन॑र्नः पितरो॒ मनो॒ द-

अ॒ग्नि॒स्तिऽहा वि॒श्वऽम॑नाः तु॒रा॒षाट् पी॒त्वी सोम॑स्य दि॒वः आ वृ॒धा॒नः शू॒रः नि॒ः यु॒धा अ॒थ॒म॒त् दस्यू॑न् ॥ ८ ॥ १७ ॥

॥ ५६ ॥ इ॒दं ते॒ एकं॑ प॒रः अ॒ं ते॒ एकं॑ तृ॒तीये॑न ज्योति॑षा सं वि॑श॒स्व॒ सं॒ऽवेश॑ने त॒न्वः॑ चारुः॑ एधि॒ प्रि॒यः॑ देवा॑नां प॒रमे॑ ज॒नि॒त्रे॑ ॥ १ ॥ त॒नूः॒ते॒ वा॒जि॒न् त॒न्वं॑ नयं॑ती वा॒मं अ॒स्मभ्यं॑ धातु॒ शर्म॑ तु॒भ्यं॑ अहृ॑तः नहः॑ ध॒रु॒णा॒य दे॒वान् दि॒वि॒ऽइ॑व ज्योति॑ः स्वं॑ आ॒ मि॒मी॒याः॑ ॥ २ ॥ वा॒जी अ॒सि॒ वा॒र्जि॒नेन॑ सु॒ऽवे॒नीः॑ सु॒वि॒तः॑ स्तो॒मं॑ सु॒वि॒तः॑ दि॒वं॑ गाः॑ सु॒वि॒तः॑ धर्म॑ प्र॒थ॒मा अ॒नु॒ऽस॒त्या सु॒वि॒तः॑ दे॒वान् सु॒वि॒तः॑ अनु॑ प॒र्म ॥ ३ ॥ महि॒ऽत्वः॑ एषां॑ पि॒तरः॑ चन॑ ईशि॒रे॑ देवाः॑ देवे॑षु॑ अ॒दु॒धुः॑ अपि॑ क्रतुं॑ सं॒ऽअ॒वि॒व्य॒चुः॑ उ॒त यानि॑ अ॒स्पि॒पुः॑ आ॒ एषां॑ त॒नूषु॑ नि॒ वि॒वि॒श्युः॑ पुनः॑ ॥ ४ ॥ सहः॑ऽभिः॑ विश्वे॑ परि॑ च॒क्र॒मुः॑ रजः॑ पू॒र्वीः धामा॑नि अ॒मि॒ता॒ मि॒मा॒नाः॑ त॒नूषु॑ विश्वा॑ भुव॑ना नि॒ ये॒मि॒रे॒ प्र॒ऽअ॒सा॒र्यं॒त॒ पु॒रु॒ध प्र॒ऽजाः॑ अनु॑ ॥ ५ ॥ द्विधा॑ सू॒नवः॑ असु॑रं स्वः॑ऽविदं॑ आ॒ अ॒स्था॒प॒यं॒त॒ तृ॒तीये॑न कर्म॑णा स्वां प्र॒ऽजां पि॒तरः॑ पित्र्यं॑ सहः॑ आ॒ अ॒व॒रेषु॑ अ॒दु॒धुः॑ तंतुं॑ आ॒ऽततं॑ ॥ ६ ॥ नावा॑ न क्षोदः॑ प्र॒ऽदिशः॑ पृ॒थि॒व्याः॑ स्व॒स्ति॒ऽभिः॑ अति॑ दुः॒ऽगानि॑ विश्वा॑ स्वां प्र॒ऽजां बृ॒ह॒त्ऽउ॑क्थः महि॒ऽत्वा॑ आ॒ अ॒व॒रेषु॑ अ॒दु॒धा॒त् आ॒ परे॑षु ॥ ७ ॥ १८ ॥

॥ ५७ ॥ मा प्र॒ऽगा॒म॒ प॒थः व॒यं मा य॒ज्ञात् इ॑न्द्र सो॒मिनः॑ मा अं॑तः॑ स्थुः नः॑ अरा॑तयः ॥ १ ॥ यः य॒ज्ञस्य॑ प्र॒ऽसाध॑नः तंतुः॑ देवे॑षु॑ आ॒ऽततः॑ तं आ॒ऽहु॒तं नः॒ शो॒मि॒ह॒ि ॥ २ ॥ मनः॑ नु आ॒ऽहु॒वा॒महे॒ नाराश॑ंसेन सो॒मे॑न पि॒तॄणां॑ च॒ मन्म॑ऽभिः ॥ ३ ॥ आ॒ ते॒ एतु॑ मनः॑ पुनः॑ क्रत्वे॑ दक्षा॑य जी॒वसे॑ ज्योक् च॒ सूर्यं॑ दृ॒शे ॥ ४ ॥ पुनः॑ नः॒ पि॒तरः॑ मनः॑ द॒-

दातु दिव्यो जनः। जीवं व्रातं सचेमहि ॥५॥ वयं सोम व्रते तव मनस्तनूषु बिभ्रतः। प्रजावंतः सचेमहि ॥६॥१९॥

॥ ५८ ॥ १–१२ बंध्वादयो गौपायनाः ॥ मनश्चायतनं ॥ अनुष्टुप् ॥

॥५८॥ यत्ते यमं वैवस्वतं मनो जगामं दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥१॥ यत्ते दिवं यत्पृथिवीं मनो जगामं दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे॥२॥ यत्ते भूमिं चतुर्भृष्टिं मनो जगामं दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे॥३॥ यत्ते चतस्रः प्रदिशो मनो जगामं दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे॥४॥ यत्ते समुद्रमर्णवं मनो जगामं दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥५॥ यत्ते मरीचीः प्रवतो मनो जगामं दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे॥६॥२०॥ यत्ते अपो यदोषधीर्मनो जगामं दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे॥७॥ यत्ते सूर्यं यदुषसं मनो जगामं दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥८॥ यत्ते पर्वतान्बृहतो मनो जगामं दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे॥९॥ यत्ते विश्वमिदं जगन्मनो जगामं दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥१०॥ यत्ते परः परावतो मनो जगामं दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे॥११॥ यत्ते भूतं च भव्यं च मनो जगामं दूरकं। तत्त आ वर्तयामसीह क्षयाय जीवसे ॥१२॥२१॥

॥ ५९ ॥ १–१० बंध्वादयो गौपायनाः ॥ १–३ निर्ऋतिः । ४ निर्ऋतिः सोमश्च । ५. ६ अमुनीतिः । ७ लिंगोक्ता देवताः । ८. ९. १०[1] द्यावापृथिव्यौ । १०[1] द्यावापृथिव्यावेंद्रश्च ॥ १–७ त्रिष्टुप् । ८ पंक्तिः । ९ महापंक्तिः । १० पंक्त्युष्णिहौ ॥

॥५९॥ प्र तार्यायुः प्रतरं नवीयः स्यातारिव क्रतुमता रथस्य । अध च्यवान उत्तवीत्यर्थे परातरं सु निर्ऋतिं

दातु दैव्यः जनः जीवं यातं सचेमहि॥५॥ वयं सोम व्रते तव मनः तनूषु बिभ्रतः प्रजाऽवंतः सचेमहि॥६॥१९॥

॥५८॥ यत् ते यमं वैवस्वतं मनः जगामं दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे॥१॥ यत् ते दिवं यत् पृथिवीं मनः जगामं दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे॥२॥ यत् ते भूमिं चतुःऽभृष्टिं मनः जगामं दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे॥३॥ यत् ते चतस्रः प्रऽदिशः मनः जगामं दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे॥४॥ यत् ते समुद्रं अर्णवं मनः जगामं दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे॥५॥ यत् ते मरीचीः प्रऽवतः मनः जगामं दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे॥६॥२०॥ यत् ते अपः यत् ओषधीः मनः जगामं दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे॥७॥ यत् ते सूर्यं यत् उषसं मनः जगामं दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे॥८॥ यत् ते पर्वतान् बृहतः मनः जगामं दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे॥९॥ यत् ते विश्वं इदं जगत् मनः जगामं दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे॥१०॥ यत् ते परः पराऽवतः मनः जगामं दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे॥११॥ यत् ते भूतं च भव्यं च मनः जगामं दूरकं तत् ते आ वर्तयामसि इह क्षयाय जीवसे॥१२॥२१॥

॥५९॥ प्रऽतारि आयुः प्रऽतरं नवीयः स्यातांराऽइव क्रतुऽमता रथस्य अधं चयानः उत् तवीति अर्थं पराऽतरं सु निःऽचृं-

तिर्जिहीतां ॥१॥ सामन्नु राये निधिमन्वनं कारमहे सु पुरुध अ-
वांसि। ता नो विश्वानि जरिता ममत्तु परातरं सु निर्ऋतिर्जि-
हीतां ॥२॥ अभी षु यः पौंस्यैर्भविम द्यौर्न भूमिं गिरयो नाजान्।
ता नो विश्वानि जरिता चिकेत परातरं सु निर्ऋतिर्जिहीतां
॥३॥ मो षु णः सोम मृत्यवे परा दाः पश्येम नु सूर्यमुच्चरंतं। द्यु-
भिर्हितो जरिमा सू नो अस्तु परातरं सु निर्ऋतिर्जिहीतां ॥४॥
असुनीते मनो अस्मासु धारय जीवातवे सु प्र तिरा न आयुः।
रारंधि नः सूर्यस्य संदृशि घृतेन त्वं तन्वं वर्धयस्व ॥५॥२२॥ अ-
सुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगं। ज्योक्
पश्येम सूर्यमुच्चरंतमनुमते मृळया नः स्वस्ति ॥६॥ पुनर्नो असुं
पृथिवी ददातु पुनर्द्यौर्दिवो पुनरंतरिक्षं। पुनर्नः सोमस्तन्वं ददातु
पुनः पूषा पथ्यां३या स्वस्तिः ॥७॥ शं रोदसी सुबंधवे यही ऋ-
तस्य मातरा। भरंतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते
किं चनाममत् ॥८॥ अवं द्रुके अवं चिका दिवश्चरंति भेषजा।
क्षमा चरिष्णवेकवं भरंतामप यद्रपो द्यौः पृथिवि क्षमा रपो
मो षु ते किं चनाममत् ॥९॥ समिंद्रेरय गामनड्वाहं य आवहदु-
शीनराणा अनः। भरंतामप यद्रपो द्यौः पृथिवि क्षमा रपो
मो षु ते किं चनाममत् ॥१०॥२३॥

॥ ६० ॥ १–५. ७–१२ वंध्वादयो गोपायनाः । ६ अगस्त्यस्य स्वसैषां माता ॥ १–४. ६ असमाती राजा । ५ इंद्रः । ७–११ सुबंधोर्गोपितार्हानं । १२ हस्तः ॥ १–५ गायत्री । ६. ७ १०–१२ अनुष्टुप् । ८. ९ पंक्तिः ॥

॥ ६० ॥ आ जनं त्विषसंदृशं माहीनानामुपस्तुतं। अगंन्म वि-
भ्रतो नमः ॥१॥ असमातिं नितोशनं त्वेषं निययिनं रथं।
भजेरथस्य सत्पतिं ॥२॥ यो जनान्महिषाँ इवातितस्थौ प-
चीरवान्। उतापवीरवान्युधा ॥३॥ यस्येक्ष्वाकुरुप व्रते

तिः जिहीतां ॥१॥ सामन् नु राये निधिऽमत् नु अन्नं करामहे सु पुरुध श्रवाँसि ता नः विश्वानि जरिता ममत्तु पराऽतरं सु निः-ऽच्छृतिः जिहीतां ॥२॥ अभि सु अर्यः पौंस्यैः भवेम द्यौः न भूमिं गिरयः न अज्रान् ता नः विश्वानि जरिता चिकेत पराऽतरं सु निःऽच्छृतिः जिहीतां ॥३॥ मो' सु नः सोम मृत्यवे परा दाः पश्येम नु सूर्यं उत्ऽचरंतं द्युऽभिः हितः जरिमा सु नः अस्तु परा-ऽतरं सु निःऽच्छृतिः जिहीतां ॥४॥ असुंऽनीते मनः अस्मासु धारय जीवातवे सु प्रतिर् नः आयुः रंधि नः सूर्यस्य संऽदृशि घृतेन त्वं तन्वं वर्धयस्व ॥५॥२२॥ असुंऽनीते पुनः अस्मासु चक्षुः पुनः' प्राणं इह नः धेहि भोगं ज्योक् पश्येम सूर्यं उत्ऽचरंतं अनुंऽमते मृळयं नः स्वस्ति ॥६॥ पुनः नः असुं पृथिवी ददातु पुनः द्यौः देवी पुनः अंतरिक्षं पुनः नः सोमः तन्वं ददातु पुनः' पूषा पथ्यां या स्वस्तिः ॥७॥ शं रोदसी' सुऽवंधवे यह्वी' ऋतस्य मातरा भरंतां अपं यत् रपः द्यौः पृथिवि क्षमा रपः मो' सु ते किं चन आममत् ॥८॥ अवं द्रुके' अवं चिका दिवः चरंति भेषजा क्षमा चरिष्णु एककं भरंतां अपं यत् रपः द्यौः पृथिवि क्षमा रपः मो' सु ते किं चन आममत् ॥९॥ सं इंद्र इरय गां अनड्वाहं यः आ अवहत् उशीनराण्याः अनः भरंतां अपं यत् रपः द्यौः पृथिवि क्षमा रपः मो' सु ते किं चन आममत् ॥१०॥२३॥

॥६०॥ आ जनं त्वेषऽसंदृशं माहीनानां उपंऽस्तुतं अगंन्म विभृंतः नमः ॥१॥ असमातिं निऽतोशनं त्वेषं निऽयायिनं रथं भजेऽरंयस्य सत्ऽपतिं ॥२॥ यः जनान् महिपान्ऽइव अतिऽतस्थौ पवीरवान् उत अपवीरवान् युधा ॥३॥ यस्य इक्ष्वाकुः उपं व्रते

रेवान्मरायेधते। दिवीव पंच कृष्टयः॥४॥ इंद्रक्षत्रासमातिषु रथप्रोष्ठेषु धारय। दिवीव सूर्यं दृशे॥५॥ अगस्त्यस्य नद्यः सप्तीयुनक्षिरोहिता। पणीन्त्यंक्रमीरभि विश्वान्राजन्नराधसः॥६॥२४॥ अयं मातायं पितायं जीवातुरागमत्। इदं तवं प्रसर्पणं सुबंधवेहि निरिहि॥७॥ यथा युगं वरत्रया नह्यंति धरुणाय कं। एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये॥८॥ यथेयं पृथिवी मही दाधारेमान्वनस्पतीन्। एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये॥९॥ यमादहं वैवस्वतात्सुबंधोर्मन आभरं। जीवातवे न मृत्यवेऽथो अरिष्टतातये॥१०॥ न्यग्वातोऽवं वाति न्यक्तपति सूर्यः। नीचीनमघ्या दुहे न्यग्भवतु ते रपः॥११॥ अयं मे हस्तो भगवानयं मे भगवत्तरः। अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः॥१२॥२५॥४॥

॥ ६१ ॥ १–२१ नाभानेदिष्ठो मानवः ॥ पिण्डे देवाः ॥ त्रिष्टुप् ॥

॥ ६१ ॥ इदमित्था रौद्रं गूर्तवचा ब्रह्म क्रत्वा शच्यामंतराजौ। क्राणा यदस्य पितरा मंहनेष्ठाः पर्षत्पक्थे अहन्ना सप्त होतॄन्॥१॥ स इद्दानाय दभ्याय वन्वञ्यवानः सूदैरमिमीत वेदिं। तूर्वयाणो गूर्तवचस्तमः क्षोदो न रेत इतऊति सिंचत्॥२॥ मनो न येषु हवनेषु तिग्मं विपः शर्ध्या वनुषो द्रवंता। आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ॥३॥ कृष्णा यन्नोर्धरुणीषु सीदद्दिवो नपाताश्विना हुवे वां। वीतं मे यज्ञमा गंतं मे अन्नं चवन्यांसा नेषमस्मृतघ्नू॥४॥ प्रयिष्ट यस्य वीरकर्ममिष्णदनुष्ठितं नु नर्यो अपोहत्। पुनस्तदा वृहति यत्कनाया दुहितुरा अनु-

रेवान् मरायी एधते दिविऽइव पंच कृष्टयः॥४॥ इंद्र द्वाचा असमानिषु रथेऽप्रोष्ठेषु धारय दिविऽइव सूर्यं दृशे॥५॥ अगस्त्यस्य नत्ऽभ्यः सप्तीं युनक्षि रोहिता पणीन् नि अक्रमीः अभि विश्वान् राजन् अराधसः॥६॥२४॥ अयं माता अयं पिता अयं जीवातुः आ अगमत् इदं तवं प्रऽसर्पणं सुऽबंधो० आ इहि निःइहि॥७॥ यथा युगं वरत्रया नह्यंति धरुणाय कं एव दाधार ते मनः जीवातवे न मृत्यवे अथो अरिष्टऽतातये॥८॥ यथा इयं पृथिवी मही दाधार इमान् वनस्पतीन् एव दाधार ते मनः जीवातवे न मृत्यवे अथो अरिष्टऽतातये॥९॥ यमात् अहं वैवस्वतात् सुऽबंधोः मनः आ अभरं जीवातवे न मृत्यवे अथो अरिष्टऽतातये॥१०॥ न्यक् वातः अवं वाति न्यक् तपति सूर्यः नीचीनं अध्वा दुहे न्यक् भवतु ते रपः॥११॥ अयं मे हस्तः भगऽवान् अयं मे भगवत्ऽतरः अयं मे विश्वऽभेषजः अयं शिवऽअभिमर्शनः॥१२॥२५॥४॥

॥६१॥ इदं इत्या रौद्रं गूर्तऽवचाः ब्रह्म कृतं शच्यां अंतः आजीकृणा यत् अस्य पितरं मंहनेऽस्थाः पर्षत् पक्थे अहन् आ सप्त होतॄन्॥१॥ सः इत् दानाय दभ्याय वन्वन् च्यवानः सूदैः अमिमीत वेदिं तूर्वयाणः गूर्तऽवचःऽतमः द्योदः न रेतः इतःऽऊति सिंचत्॥२॥ मनः न येषु हवनेषु तिग्मं विपः शच्या वनुथः द्रवंता आ यः शर्याभिः तुविऽनृम्णः अस्य अथ्रीणीत आऽदिशं गभस्तौ॥३॥ कृष्णा यत् गोषु अरुणीषु सीदत् दिवः नपाता अश्विना हुवे वां धीतं मे यज्ञं आ गतं मे अन्नं ववन्वांसा न दर्षं अस्मृतऽध्रु०॥४॥ प्रथिष्ट यस्य वीरऽकर्म इष्णत् अनुंऽस्थितं नु नर्यः अपं औहत् पुनः तत् आ वृहति यत् कनायाः दुहितुः आःअनुं-

भूतमनर्वा ॥ ५ ॥ २६ ॥ मध्या यत्कर्वमभवद्भीके कामं कृणाने पितरि युवत्यां । मनानयेतो जहतुर्वियंता सानौ निषिक्तं सुकृतस्य योनौ ॥ ६ ॥ पिता यत्स्वां दुहितरमधिष्क्न्क्षया रेतः संजग्मानो नि षिंचत् । स्वाध्योऽजनयन्ब्रह्म देवा वास्तोष्पतिं व्रतपां निरतक्षन् ॥ ७ ॥ स ईं वृषा न फेनमस्यदाजौ स्मदा परेदपं दभ्रचेताः । सरत्पदा न दक्षिणा परावृङ् न ता नु मे पृश्न्यो जगृभ्रे ॥ ८ ॥ मष्टू न वह्निः प्रजाया उपब्दिरग्निं न नग्न उप सीददूधः । सनितेध्मं सनितोत वाजं स धर्ता जज्ञे सहसा यवीयुत् ॥ ९ ॥ मष्टू कनायाः सख्यं नवंग्वा ऋतं वदंत ऋतयुक्तिमग्मन् । द्विर्हसो य उप गोपमागुरदक्षिणासो अच्युता दुदुक्षन् ॥ १० ॥ २७ ॥ मष्टू कनायाः सख्यं नवीयो राधो न रेत ऋतमित्तुरण्यन् । शुचि यत्ते रेक्ण आयजंत सवर्दुघायाः पय उस्रियायाः ॥ ११ ॥ पश्वा यत्पश्चा वियुता बुधंतेति ब्रवीति वक्तरी रराणः । वसोर्वसुत्वा कारवोऽनेहा विश्वं विवेष्टि द्रविणमुप ष्टु ॥ १२ ॥ तदिन्वस्य परिषद्यानो अग्मन्पुरू सदंतो नार्पदं विभित्सन् । वि शुष्णस्य संयथितमनर्वा विदत्पुरुप्रजातस्य गुहा यत् ॥ १३ ॥ भगो ह नामोत यस्य देवाः स्व१र्ण ये चिपधस्थे निषेदुः । अग्निर्ह नामोत जातवेदाः श्रुधी नो होतर्ऋतस्य होतारुक् ॥ १४ ॥ उत त्या मे रोदांवचिमंता नासत्याविंद्र गूर्तये यजंध्ये । मनुष्वद्वृक्तर्वर्हिषे रराणा मंदू हितप्रयसा यिष्टु यज्यू ॥ १५ ॥ २८ ॥ अयं स्तुतो राजा वंदि वेधा अपश्च विप्रस्तरति स्वसेतुः । स कक्षीवंतं रेजयत्सो अग्निं नेमिं न चक्रमर्वतो रघुद्रु ॥ १६ ॥ स द्विबंधुर्वितरणो यष्टा सवर्धुं धेनुमस्वं दुह-

ऽभूतं अनवो॥५॥२६॥ मध्या यत् कर्वे अभवत् अभीके कामं कृणाने पितरि युवत्यां मनानकरेतः जहतुः विऽयंता सानौ निऽसिक्तं सुऽकृतस्य योनौ॥६॥ पिता यत् स्वां दुहितरं अधिऽस्कन् क्षमया रेतः संऽजग्मानः नि सिंचत् सुऽआर्यः अजनयन् वसे देवाः वास्तोः पतिं व्रतऽपां निः अतष्टन्॥७॥ सः ईं वृषा न फेनं अस्यत् आजौ सत् आ परा एत् अपं दभ्रऽचेताः सरत् पदा न दक्षिणा पराऽवृक्त ताः नु मे पृशन्यः जगृभ्रे॥८॥ मष्टु न वह्निः प्रऽजायाः उपब्दिः अग्निं न नग्नः उप सीदत् ऊधः सनिता इध्मं सनिता उत वाजं सः धर्ता जज्ञे सहसा यविऽयुत्॥९॥ मष्टु कनायाः सख्यं नवंऽग्वाः ऋतं वदंतः ऋतऽयुक्तिं अगमन् द्विऽबर्हसः ये उपं गोपं आ अगुः अदृक्षिणासः अच्युता दुधुक्षन्॥१०॥२७॥ मष्टु कनायाः सख्यं नवीयः राधः नरेतः ऋतं इत् तुरण्यन् शुचिं यत् ते रेकणः आ अयजंत सवःऽदुघायाः पयः उस्रियायाः॥११॥ पप्था यत् पप्था विऽयुता वुधंत इतिं ब्रवीति वक्करिं रराणः वसोः वसुऽत्वा कारवः अनेहा विश्वे विवेष्टि द्रविणं उप क्षु॥१२॥ तत् इत् नु अस्य परिऽसद्मानः अगमन् पुरु सदंतः नाभिं विभित्सन् वि शृण्वस्य संऽयथितं अनवो विदत् पुरुऽप्रजातस्य गुहा यत्॥१३॥ भगैः हु नाम उत यस्य देवाः स्वः न ये चिऽसध्स्ये निऽसेदुः अग्निः हु नाम उत जातऽवेदाः शृधि नः होतः ऋतस्य होता अध्रुक्॥१४॥ उत त्या मे रौद्री अचिऽमंता नासत्या इंद्र गूर्तये यजध्यै मनुष्वत् वृक्तऽबर्हिषे रराणा मंदू हितऽप्रयसा विधु यज्यू॥१५॥२८॥ अये स्तुतः राजा वंदि वेधाः अपः च विप्रः तरति स्वऽसेतुः सः कक्षीवंतं रेजयत् सः अग्निं नेमिं न चक्रं अर्वतः रघुऽद्रुं॥१६॥ सः द्विऽबंधुः वैतरणः यष्टा सवःऽधुं धेनुं अस्वं दुह-

द्यौः। सं यन्मित्रावरुणा वृंज उक्थैर्ज्येष्ठेभिरर्यमणं वरूथैः॥१७॥ तद्बंधुः सूरिर्दिवि ते धियंधा नाभानेदिष्ठो रपति प्र वेनन्। सा नो नाभिः परमास्य वा घाहं तत्पश्चा कतिथश्चिदास॥१८॥ इयं मे नाभिरिह मे सधस्थमिमे मे देवा अयमस्मि सर्वः। द्विजा अहं प्रथमजा ऋतस्येदं धेनुरदुहज्जायमाना॥१९॥ अधासु मंद्रो अरतिर्विभावावं स्यति द्विवर्तनिर्वनेषाट्। ऊर्ध्वा यच्छ्रेणिर्न शिश्रुदन्मक्षू स्थिरं शेवृधं सूत माता॥२०॥२९॥ अधा गाव उपमातिं कनाया अनु श्वातस्य कस्य चित्परेयुः। श्रुधि त्वं सुद्रविणो नस्त्वं यांळाश्वघ्नस्य वावृधे सूनृताभिः॥२१॥ अध त्वमिंद्र विद्या स्मान्महो राये नृपते वज्रबाहुः। रक्षा च नो मघोनः पाहि सूरीन्नेहसस्ते हरिवो अभिष्टौ॥२२॥ अध यद्राजाना गविष्टौ सरत्सरण्युः कारवे जरण्युः। विम्रः प्रेष्ठः स ह्येषां बभूव परा च वक्षदुत पर्षदेनान्॥२३॥ अधा न्वस्य जेन्यस्य पुष्टौ वृषा रेभंत ईमहे तदू नु। सरण्युरस्य सूनुरश्वो विप्रश्चासि श्रवसश्च सातौ॥२४॥ युवोर्यदि सख्यायास्मे शर्धाय स्तोमं जुजुषे नमस्वान्। विश्वच्यस्मिन्ना गिरः समीचीः पूर्वीर्वं गातुर्दाशत्सूनृतायै॥२५॥ स गृणानो अग्निर्देववानिति सुबंधुर्नमसा सूक्तैः। वर्धदुक्थैर्वचोभिरा हि नूनं व्यध्वंति पथस उरुषायाः॥२६॥ त ऊ पुणो महो यंजत्रा भूत देवास ऊतयें सजोषाः। ये व[illegible]जाँ अनयता वियंतो ये स्या निंचेतारो अमूराः॥२७॥३०॥

॥ ६२ ॥ १–११ नाभानेदिष्ठो मानवः ॥ १–६ विश्वे देवा ऋषयः। ७–११ मायर्पेदानसुतिः ॥ १–४ भगतो। ५ ८–९ अनुष्टुप्। ६ गिरसो वा। ७ विश्वे देवाः। १० गायत्री। ११ त्रिष्टुप्॥ नौ। ६ बृहती। ७ सतोबृहती।

॥ ६२ ॥ ये यज्ञेन दक्षिणया समक्ता इंद्रस्य सख्यममृतत्वमा-

ध्यै सं यत् मिचावरुणा वृंजे उक्थैः ज्येष्ठेभिः अर्यमणं वरूथैः ॥१७॥ तत्ऽवंधुः सूरिः दिवि ते धियंऽधाः नाभानेदिष्ठः रपति प्रवेनन् सा नः नाभिः परमा अस्य वा घ अहं तत् पश्या कतियः चित् आस॥१८॥ इयं मे नाभिः इह मे सधऽस्थं इमे मे देवाः अयं अस्मि सर्वः द्विऽजाः अहं प्रथमऽजाः ऋतस्य इदं धेनुः अदुहत् जायमाना॥१९॥ अध आसु मंद्रः अरतिः विभाऽवा अर्वं स्यति द्विऽवर्तनिः वनेषाट् ऊर्ध्वा यत् अर्णिः न शिश्नुः दन् मक्षु स्थिरं शेऽवृधं सूत माता ॥२०॥२९॥ अध गावः उपऽमातिं कनायाः अनुं श्यांतस्य कस्य चित् परा ईयुः श्रुधि त्वं सुऽदंविणः नः त्वं याट् आश्वऽघस्य वर्वृधे सूनृताभिः॥२१॥ अध त्वं इंद्र विद्धि अस्मान् महः राये नृऽपते वज्रंऽबाहुः रक्षा च नः मघोनः पाहि सूरीन् अनेहसः ते हरिऽवः अभिष्टौ॥२२॥ अध यत् राजानौ गोऽईष्टौ सरत् सरण्युः कारवे जरण्युः विप्रः प्रेष्ठः सः हि एषां बभूव परा च वक्षत् उत पर्षत् एनान्॥२३॥ अध नु अस्य जेन्यस्य पुष्टौ वृथा रेभंतः ईमहे तत् ऊं नु सरण्युः अस्य सूनुः अश्वः विप्रः च असि श्रवसः च सातौ॥२४॥ युवोः यदिं सख्यायं अस्मे शर्धाय स्तोमं जुजुषे नमस्वान् विश्वचं यस्मिन् आ गिरः संऽइचीः पूर्वीऽइव गातुः दाशत् सूनृतायै॥२५॥ सः गृणानः अतऽभिः देवऽवान् इतिं सुऽवंधुः नमसा सुऽउक्तिः वर्धत् उक्थैः वचःऽभिः आ हि नूनं वि अध्वा एति पयसः उस्रियायाः॥२६॥ ते ऊं सु नः महः यजत्राः भूत देवासः ऊतये सऽजोषाः ये वाजान् अनयत विऽअंतः ये स्य निऽचेतारः अमूराः॥२७॥३०॥१॥

॥६२॥ ये यज्ञेन दक्षिणया संऽअक्ताः इंद्रस्य सख्यं अमृतऽत्वं

नश। तेभ्यो भद्रमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः॥१॥ य उदाजन्पितरो गोमयं वस्वृतेनाभिदन्परिवत्सरे वलं। दीर्घायुत्वमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः॥२॥ य ऋतेन सूर्यमारोहयन् दिव्यप्रथयन्पृथिवीं मातरं वि। सुप्रजास्त्वमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः॥३॥ अयं नाभा वदति वल्गु वो गृहे देवपुचा ऋषयस्तच्छृणोतन। सुब्रह्मण्यमंगिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः॥४॥ विरूपास इदृषयस्त इमे भीरवेपसः। ते अंगिरसः सूनवस्ते अग्नेः परि जज्ञिरे॥५॥१॥ ये अग्नेः परि जज्ञिरे विरूपासो दिवस्परि। नवग्वो नु दशग्वो अंगिरस्तमः सचा देवेषु मंहते॥६॥ इंद्रेण युजा निः सृजंत वाघतो व्रजं गोमंतमश्विनं। सहस्रं मे ददतो अष्टकर्ण्यः प्रवो देवेष्वक्रत॥७॥ प्र नूनं जायतामयं मनुस्तोकेव रोहतु। यः सहस्रं शताश्वं सद्यो दानाय मंहते॥८॥ न तमंहोति कश्चन दिव इव सान्वारभे। सावर्ण्यस्य दक्षिणा वि सिंधुरिव पप्रथे॥९॥ उत दासा परिविषे स्मद्दिष्टी गोपरीणसा। यदुस्तुर्वश्च मामहे॥१०॥ सहस्रदा ग्रामणीर्मा रिषन्मनुः सूर्येणास्य यतमानेतु दक्षिणा। सावर्णेर्दिवः प्र तिरंत्वायुर्यस्मिन्नश्वांता असनाम वाजं॥११॥२॥

॥ ६३ ॥ १–११ गयः प्रातः॥ १–१४, १७ त्रिष्टुभो देवाः। १५, १६ पथ्या स्वस्तिः॥ १–१३ जगती। १५ जगती त्रिष्टुबा। १६, १७ त्रिष्टुप्॥

॥ ६३ ॥ परावतो ये दिधिषंत आप्यं मनुप्रीतासो जनिमा विवस्वतः। यया तेर्यं नहुष्यस्य बर्हिषि देवा आसते ते अधि ब्रुवंतु नः॥१॥ विश्वा हि वो नमस्यानि वंद्या नामानि देवा उत यज्ञियानि वः। ये स्थ जाता अदितेरुरुष्यरि ये पृथिव्यास्ते

आनश तेभ्यः भद्रं अंगिरसः वः अस्तु प्रति गृभ्णीत मानवं सुऽमेधसः॥१॥ ये उत्ऽआजन् पितरः गोऽमयं वसु ऋतेन अभिंदन् परिऽवत्सरे बलं दीर्घायुऽत्वं अंगिरसः वः अस्तु प्रति गृभ्णीत मानवं सुऽमेधसः॥२॥ ये ऋतेन सूर्यं आ अरोहयन् दिवि अप्रथयन् पृथिवीं मातरं वि सुप्रजाःऽत्वं अंगिरसः वः अस्तु प्रति गृभ्णीत मानवं सुऽमेधसः॥३॥ अयं नाभा वदति बल्गु वः गृहे देवंऽमुचाः ऋषयः तत् शृणोतन सुऽब्रह्मण्यं अंगिरसः वः अस्तु प्रति गृभ्णीत मानवं सुऽमेधसः॥४॥ विऽरूपासः इत् ऋषयः ते इत् गंभीरऽवेपसः ते अंगिरसः सूनवः ते अग्नेः परि जज्ञिरे॥५॥१॥ ये अग्नेः परि जज्ञिरे विऽरूपासः दिवः परि नवंऽग्वः नु दशंऽग्वः अंगिरःऽतमः सचा देवेषु मंहते॥६॥ इंद्रेण युजा निः सृजंत वाघतः व्रजं गोऽमंतं अश्विनं सहस्रं मे ददतः अष्टऽकर्ण्यः श्रवः देवेषु अक्रत॥७॥ प्र नूनं जायतां अयं मनुः तोकंऽइव रोहतु यः सहस्रं शतऽअश्वं सद्यः दानाय मंहते॥८॥ न तं अश्नोति कः चन दिवःऽइव सानुं आऽरभं सावर्ण्यस्य दक्षिणा वि सिंधुःऽइव पप्रथे॥९॥ उत दासा परिऽविषे स्मत्ऽदिष्टी॰ गोऽपरीणसा मदुः तुर्वः च मामहे॥१०॥ सहस्रऽदाः ग्रामऽनीः मा रिषत् मनुः सूर्येण अस्य यतमाना एतु दक्षिणा सावर्णेः देवाः प्र तिरंतु आयुः यस्मिन् अश्वांताः असनाम वाजं॥११॥२॥

॥६३॥ पराऽवतः ये दिधिषंते आप्यं मनुंऽप्रीतासः जनिमन विवस्वतः ययातेः ये नहुष्यस्य बर्हिषि देवाः आसते ते अधि ब्रुवंतु नः॥१॥ विश्वा हि वः नमस्यानि वंद्या नामानि देवाः उत यज्ञियानि वः ये स्थ जाताः अदितेः अत्ऽभ्यः परि ये पृथिव्याः ते

मं इह श्रुत हवं ॥२॥ येभ्यो माता मधुमत्पिन्वते पयः पीयूषं द्यौरदितिरद्रिबर्हाः । उक्थशुष्मान्वृषभरान्स्वप्नसस्ताँ आदित्याँ अनु मदा स्वस्तये ॥३॥ नृचक्षसो अनिमिषन्तो अर्हणा बृहद्देवासो अमृतत्वमानशुः । ज्योतीरथा अहिमाया अनागसो दिवो वर्माणं वसते स्वस्तये ॥४॥ सम्राजो ये सुवृधो यज्ञमाययुरपरिह्वृता दधिरे दिवि क्षयं । ताँ आ विवास नमसा सुवृक्तिभिर्महो आदित्याँ अदितिं स्वस्तये ॥५॥३॥ को वः स्तोमं राधति यं जुजोषथ विश्वे देवासो मनुषो यति ष्टन । को वोऽध्वरं तुविजाता अरं करद्यो नः पर्षदत्यंहः स्वस्तये ॥६॥ येभ्यो होचां प्रथमामायेजे मनुः समिद्धाग्निर्मनसा सप्त होतृभिः । त आदित्या अभयं शर्म यच्छत सुगा नः कर्त सुपथा स्वस्तये ॥७॥ य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मन्तवः । ते नः कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये ॥८॥ भरेष्विन्द्रं सुहवं हवामहेंऽहोमुचं सुकृतं दैव्यं जनं । अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये ॥९॥ सुचामणिं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिं । दैवीं नावं स्वरित्रामनागसमस्रवंतीमा रुहेमा स्वस्तये ॥१०॥४॥ विश्वे यजत्रा अधि वोचतोतये त्रायध्वं नो दुरेवाया अभिह्रुतः । सत्यया वो देवहूत्या हुवेम शृण्वतो देवा अवसे स्वस्तये ॥११॥ अपामीवामप विश्वामनाहुतिमपारातिं दुर्विदत्रामघायतः । आरे देवा द्वेषो अस्मद्युयोतनोरु णः शर्म यच्छता स्वस्तये ॥१२॥ अरिष्टः स मर्तो विश्व एधते प्र प्रजाभिर्जायते धर्मणस्परि । यमादित्यासो नयथा सुनीतिभिरति विश्वानि

मे हुव॑ श्रुत॑ हवं॑ ॥२॥ येभ्यः॑ माता॑ मधु॑ऽमत् पिन्व॑ते पयः॑ पीयू॑षं द्यौः॑ अदि॑तिः॑ अद्रि॑ऽबर्हाः॑ उक्थ॑ऽशुष्मान् वृष॑ऽभरान् सु॑ऽअ-र्षसः॑ तान् आ॑दित्यान् अनु॑ मद॑ स्व॒स्तये॑ ॥३॥ नृ॑ऽचक्षसः॑ अनि॑ऽमिषंतः॑ अर्हणा॑ बृहत् देवा॑सः॑ अमृत॑ऽत्वं आन॑शुः॑ ज्योतिः॑ऽरथाः॑ अहि॑ऽमायाः॑ अना॑गसः॑ दि॒वः॑ व॒र्माणं॑ वसते॑ स्व॒स्तये॑ ॥४॥ सं॑ऽराजः॑ ये सु॑ऽवृधः॑ यज्ञं॑ आ॑ऽययुः॑ अप॑रिऽह्वृताः॑ दधि॑रे दि॒वि क्षयं॑ तान् आ वि॑वास॒ नम॑सा सु॒वृक्ति॑ऽभिः॑ महः॑ आ॑दित्यान् अदि॑तिं स्व॒स्तये॑ ॥५॥३॥ कः॑ वः॑ स्तोमं॑ राधति॑ यं॑ जुजो॑षथ विश्वे॑ देवा॑सः॑ मनु॑षः॑ यति॑ स्थन॑ कः॑ वः॑ अध्व॑रं तु॒वि॑ऽजाताः॑ अरं॑ कर॒त् यः॑ नः॑ पर्षत् अति॑ अंहः॑ स्व॒स्तये॑ ॥६॥ येभ्यः॑ होत्रां॑ प्रथ॒मां आ॑ऽयेजे॑ मनुः॑ समि॑द्धः॑ऽअग्निः॑ मन॑सा सप्त होतृ॑ऽभिः॑ ते आ॑दित्याः॑ अभ॑यं शर्म॑ यच्छत सु॑ऽगा नः॑ कर्त॑ सु॑ऽपथा॑ स्व॒स्तये॑ ॥७॥ ये ईशि॑रे भुव॑नस्य प्र॑ऽचेतसः॑ विश्व॑स्य स्था॒तुः॑ जग॑तः॑ च॒ मंत॑वः॑ ते नः॑ कृतात् अकृ॑तात् एन॑सः॑ परि॑ अद्य देवा॑सः॑ पिपृत॑ स्व॒स्तये॑ ॥८॥ भरे॑षु इंद्रं॑ सु॑ऽहवं॑ हुवा॑महे अंहः॑ऽमुचं॑ सु॑ऽकृतं दैव्यं॑ जनं॑ अग्निं॑ मि॒त्रं वरु॑णं सा॒तये॑ भगं॑ द्यावा॑पृथि॒वी॑ मरु॑तः स्व॒स्तये॑ ॥९॥ सु॑ऽचा॒मा॑णं पृ॒थि॒वीं द्यां अने॑हसं सु॑ऽशर्मा॑णं अदि॑तिं सु॑ऽप्रनी॑तिं दैवीं॑ नावं सु॑ऽअरि॑त्रां अना॑गसं अस्र॑वंतीं आ रु॑हेम स्व॒स्तये॑ ॥१०॥४॥ विश्वे॑ यजत्राः॑ अधि॑ वोचत॒ नव॑ये चायध्वं नः॑ दुः॑ऽएवा॑यैः॑ अभि॑ऽह्रुतः॑ सत्यया॑ वः॑ देव॑ऽहूत्या हुवेम शृण्व॑तः देवाः॑ अव॑से स्व॒स्तये॑ ॥११॥ अप॑ अमी॑वां॑ अप॑ विश्वां॑ अना॑हुतिं॑ अप॑ अरा॑तिं दुः॑ऽविदां॑ अप॑ऽयतः॑ आरे॑ देवाः॑ द्वेषः॑ अस्मत् यु॒यो॒त॒न॒ उरु॑ नः॑ शर्म॑ यच्छत स्व॒स्तये॑ ॥१२॥ अरि॑ष्टः॑ सः॑ मनु॑ः॑ विश्वः॑ एध॒ते॒ प्र प्र॑ऽजाभिः॑ जायते॑ धर्मणः॑ परि॑ यं॑ आ॑दित्यासः॑ नय॑थ सु॒नी॒ति॑ऽभिः॑ अति॑ विश्वा॑नि

दुरिता स्वस्तये ॥१३॥ यं देवासोऽवथ वाजसातौ यं शूरसाता मरुतो हितेषु। प्रातर्यावाणं रथमिन्द्र सानसिमरिष्यन्तमा रुहेमा स्वस्तये ॥१४॥ स्वस्ति नः पथ्यासु धन्वसु स्वस्त्यप्सु वृजने स्वर्वति। स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरुतो दधातन ॥१५॥ स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति। सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा ॥१६॥ एवा मातेः सूनुरयावृधन्वो विश्वे आदित्या अदिते मनीषी। ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ॥१७॥५॥

॥ ६४ ॥ १-१७ गयः प्रातः ॥ विश्वे देवाः ॥ १-११ १३-१५ भगती । १२.१६.१७ त्रिष्टुप् ॥

॥६४॥ कथा देवानां कतमस्य यामनि सुमतुं नाम शृण्वतां मनामहे। को मृळाति कतमो नो मयस्करत्कतम ऊती अभ्या ववर्तति ॥१॥ ऋतायंति ऋतवो हृत्सु धीतयो वेनंति वेनाः पतयंत्या दिशः। न मंदिता विद्यते अन्य एभ्यो देवेषु मे अधि कामो अयंसत ॥२॥ नरो वा शंसं पृषणमगोह्यमग्निं देवेडमभ्यर्चसे गिरा। सूर्यामासा चंद्रमसा यमं दिवि चित्रं यातमुपसमक्तुमश्विना ॥३॥ कथा कविस्तुवीरयान्कया गिरा बृहस्पतिंवावृधते सुवृक्तिभिः। इत्र एकंपामुहवेभिर्घोरकैभिरहिः शृणोतु बुध्योऽहवीमनि ॥४॥ दक्षस्य यादिते जन्मंनि व्रते राजाना मित्रावरुणा विवासति। ऋतूतपंचाः पुरुरेतो अर्यमा मरुद्भिना विपुरुषेषु जन्मसु ॥५॥६॥ ते नो अर्यतो हवनश्रुतो हवं विश्वे शृण्वंतु वाजिनो मितद्रवः। मरुतस्मा मेधसातावि वन्वतो महो ये धनं समिथेषु जभ्रिरे ॥६॥ प्र वो वायुं रथयुजं पुरंधिं स्तोमैः कृणुध्वं सु-

दुःऽइता स्वस्तये ॥१३॥ यं देवासः अवथ वाजेऽसातौ यं शूरऽसाता मरुतः हिते धने प्रातःऽयावानं रथं इंद्र सानसिं अरिष्यंतं आ रुहेम स्वस्तये॥१४॥ स्वस्ति नः पथ्यासु धन्वऽसु स्वस्ति अप्ऽसु वृजने स्वःऽवति स्वस्ति नः पुत्रऽकृथेषु योनिषु स्वस्ति राये मरुतः दधातन॥१५॥ स्वस्तिः इत् हि प्रऽमतये अस्ति रेवतीस्वती अभि या वामं एति सा नः अमा सो अरणे नि पातु सुऽआवेशा भवतु देवऽगोपा॥१६॥ एव अस्तेः सूनुः अवीवृधत् वः विश्वे आदित्याः अदिते मनीषी ईशानासः नरः अमर्त्येन अस्तावि जनः दिव्यः गयेन॥१७॥५॥

॥६४॥ कथा देवानां कतमस्य यामनि सुऽमंतु नाम शृण्वतां मनामहे कः मृळाति कतमः नः मयः करत् कतमः ऊती अभि आ ववर्तति॥१॥ क्रतुऽयंति क्रतवः हृत्ऽसु धीतयः वेनंति वेनाः पतयंति आ दिशः न मर्डिता विद्यते अन्यः एभ्यः देवेषु मे अधि कामाः अयंसत॥२॥ नराशंसे वा पूषणे अगोह्यं अग्निं देवऽइळं अभि अर्चसे गिरा सूर्यामासा चंद्रमसा यमं दिवि चित्रं वातं उषसं अक्तु अश्विना॥३॥ कथा कविः तुविऽरवान् कया गिरा बृहस्पतिः ववृधते सुवृक्तिऽभिः अजः एकऽपात् सुऽहवेभिः ऋक्वऽभिः अहिः शृणोतु बुध्यः हवीमनि॥४॥ दक्षस्य वा अदितेः जन्मनि व्रते राजाना मित्रावरुणा आ विवासति अतूर्तेऽपथाः पुरुऽरथः अर्यमा सप्तऽहोता विषुऽरूपेषु जन्मऽसु॥५॥६॥ ते नः अर्वंतः हवनऽश्रुतः हवं विश्वे शृण्वंतु वाजिनः मित्रऽद्रवः सहस्रऽसाः मेधसातौऽइव त्मना महः ये धनं संऽइत्येषु जभ्रिरे॥६॥ प्र वः वायुं रथऽयुजं पुरंऽधिं स्तोमेः कृणुध्वं सु-

ख्यायं पूषणं । ते हि देवस्य सवितुः सवीमनि क्रतुं सचन्ते सुचितः सचेतसः ॥७॥ चित्रः सुप्र सुसा नद्यो महीरपो वनस्पतीन्पर्वतां अग्निमूतये । कृशानुमस्तृन्तिषं सुधस्थ आ रुद्रं रुद्रेषु रुद्रियं हवामहे ॥८॥ सरस्वती सरयुः सिंधुरूर्मिभिर्महो महीरवसा यंतु वक्षणीः । देवीरापो मातरः सूदयित्नवो घृतवत्पयो मधुमन्नो अर्चत ॥९॥ उत माता बृहद्दिवा शृणोतु नस्त्वष्टा देवेभिर्जनिभिः पिता वचः । ऋभुक्षा वाजो रथस्पतिर्भगो रुद्रः शंसः शशमानस्य पातु नः ॥१०॥७॥ रुद्रः संदृष्टौ पितुमाँ इव क्षयो भद्रा रुद्राणां मरुतामुपस्तुतिः । गोभिः श्याम यशसो जनेष्वा सदा देवास इळया सचेमहि ॥११॥ यां मे धियं मरुत इंद्र देवा अददात वरुण मित्र यूयं । तां पीपयत पयसेव धेनुं कुविन्निरो अधि रये वहाथ ॥१२॥ कुविदंग प्रति यथा चिदस्य नः सजात्यस्य मरुतो बुबोधथ । नाभा यत्रं प्रथमं संनसामहे तत्रं जामित्वमदितिर्दधातु ॥१३॥ ते हि द्यावापृथिवी मातरा मही देवी [illegible] यज्ञिये इतः । उभे विभृत उभयं भरीमभिः पुरू रजांसि पितृभिश्च सिंचतः ॥१४॥ वि षा होचा विष्वमश्नोति वार्यं बृहस्पतिररमतिः पनीयसी । ग्रावा यत्र मधुषुदुच्यते बृहदवीशंत मतिभिर्मनीषिणः ॥१५॥ एवा कविस्तुवीरवाँ ऋतद्रविणस्युर्द्रविणसश्चकानः । उक्थेभिरत्र मतिभिश्च विप्रोऽपीपयन्नदयो दिव्यानि जन्म ॥१६॥ एवा श्रुतेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी । इषुरासो नरो अमर्त्यासस्तोवि जनो दिव्यो गयेन ॥१७॥८॥

ख्यायं पूषणं ते हि देवस्य सवितुः सवीमनि क्रतुं सचन्ते सऽचितः सऽचेतसः ॥ ७ ॥ चित्रः सन्न सप्राः नद्यः महीः अपः वनस्पतीन् पर्वतान् अग्निं ऊतये कृशानुं अस्तॄन् तिष्यं सधऽस्थे आ रुद्रं रुद्रेषु रुद्रियं हुवामहे ॥ ८ ॥ सरस्वती सरयुः सिंधुः ऊर्मिऽभिः महः महीः अवसा आ यंतु वक्षणीः देवीः आपः मातरः सूदयित्न्वः घृतऽवत् पयः मधुऽमत् नः अर्चत ॥ ९ ॥ उत माता बृहत्ऽदिवा शृणोतु नः त्वष्टा देवेभिः जनिऽभिः पिता वचः ऋभुक्षाः वाजः रथ्यपतिः भगः रण्वः शंसः शशमानस्य पातु नः ॥ १० ॥ ७ ॥ रण्वः संऽदृष्टौ पितुमान्ऽइव क्षयः भद्रा रुद्राणां मरुतां उपऽस्तुतिः गोभिः स्याम यशसः जनेषु आ सदा देवासः इळया सचेमहि ॥ ११ ॥ यां मे धियं मरुतः इंद्र देवाः अददात वरुण मित्र यूयं तां पीपयत पयसाऽइव धेनुं कुवित् गिरः अधि रथे वहाथ ॥ १२ ॥ कुवित् अंग प्रति यथा चित् अस्य नः सऽजात्यस्य मरुतः बुबोधथ नाभा यत्र प्रथमं संऽनसामहे तत्र जामिऽत्वं अदितिः दधातु नः ॥ १३ ॥ ते हि द्यावापृथिवी मातरा मही देवी देवान् जन्मना यज्ञियें इऽशः उभे विभूतः उभयं भरीमऽभिः पुरु रेतांसि पितृऽभिः च सिंचाः ॥ १४ ॥ वि सा होत्रा विश्वं अश्नोति वार्यं बृहस्पतिः अरमतिः गविष्टयी यावा यत्र मधुऽसुत् उच्यते बृहत् अवीवशंत मतिभिः मनीषिणः ॥ १५ ॥ एव कविः तुविऽरवान् ऋतुऽज्ञाः द्रुष्णस्युः द्रविणसः चकानः उक्थेभिः अत्र मतिऽभिः च विप्रः अपीपयत् गयः दिव्यानि जन्म ॥ १६ ॥ एव ऋतेः सूनुः अवीवृधत् वः विश्वे आदित्याः अदिते मनीषी ईशानासः नरः अमर्त्येन अस्तावि जनः दिव्यः गयेन ॥ १७ ॥ ८ ॥

॥ ६५ ॥ १–१५ वसुकर्णो वासुक्रः ॥ विश्वे देवाः ॥ १–१४ जगती । १५ त्रिष्टुप् ॥

॥६५॥ अग्निरिंद्रो वरुणो मित्रो अर्यमा वायुः पूषा सरस्वती सजोषसः। आदित्या विष्णुर्मरुतः स्वर्बृहत्सोमो रुद्रो अदितिर्ब्रह्मणस्पतिः ॥१॥ इंद्राग्नी वृत्रहत्येषु सत्पती मिथो हिन्वाना तन्वा३ समोकसा। अंतरिक्षं महसा पप्रुरोजसा सोमो घृतश्रीर्महिमानमीरयन् ॥२॥ तेषां हि महा महतामनर्वणां स्तोमाँ इयर्म्यृतजा ऋतावृधां। ये अप्सवमर्णवं चित्ररांधसस्ते नो रासंतां महये सुमित्र्याः ॥३॥ स्वर्णरमंतरिक्षाणि रोचना द्यावाभूमी पृथिवी स्कंभुरोजसा। पृक्षा इव महयंतः सुरातयो देवाः स्तवंते मनुषाय सूरयः ॥४॥ मित्राय शिक्ष वरुणाय दाशुषे या सम्राजा मनसा न प्रयुच्छतः। ययोर्धाम धर्मणा रोचते बृहद्ययोरुभे रोदसी नाधसी वृतौ ॥५॥९॥ या गौर्वेतिनिं पर्येति निष्कृतं पयो दुहाना व्रतनीरवारतः। सा प्रयुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते ॥६॥ दिवक्षसो अग्निजिह्वा ऋतावृध ऋतस्य योनिं विमृशंत आसते। द्यां स्कंभित्यै३पं आ चक्रुरोजसा यज्ञं जनित्वी तन्वी३ नि मामृजुः ॥७॥ परिष्टिता पितरा पूर्वजावरी ऋतस्य योना दयतः समोकसा। द्यावापृथिवी वरुणाय सप्रथे घृतवत्पयो महिषाय पिन्वतः ॥८॥ पर्जन्यावाता वृषभा पुरीषिणेंद्रवायू वरुणो मित्रो अर्यमा। देवाँ आदित्याँ अदितिं हवामहे ये पार्थिवासो दिव्यासो अप्रये ॥९॥ त्वष्टारं वायुमृभवो य ओहते दैव्या होतारा पुरुधावृधा॥ स्तवै। बृहस्पतिं वृषखादं सुमेधसमिंद्रोतिं नरो अमर्त्येना- ॥१०॥१०॥ ब्रह्म गामश्वं जनयँ॥

पर्वताँ अपः। सूर्यं दिवि रोहयँ

॥ ६५ ॥ अग्निः इंद्रः वरुणः मित्रः अर्यमा वायुः पूषा सरस्वती सऽजोषसः आदित्याः विष्णुः मरुतः स्वः बृहत् सोमः रुद्रः अदितिः ब्रह्मणः पतिः ॥ १ ॥ इंद्राग्नी वृचऽहत्येषु सत्ऽपती० मिथः हिन्वाना तन्वा संऽओकसा अंतरिक्षं महि आ पप्रुः ओजसा सोमः घृतऽश्रीः महिमानं ईरयन् ॥ २ ॥ तेषां हि महा महतां अनर्वणां स्तोमान् इयर्मि चातऽज्ञाः चातऽवृधां ये अप्सवं अर्णवं चित्रऽरांधसः ते नः रासंतां महयं सुऽमित्र्याः ॥ ३ ॥ स्वःऽनरं अंतरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कंभुः ओजसा पृक्षाःऽइव महयंतः सुऽरातयः देवाः स्तवते मनुषाय सूरयः ॥ ४ ॥ मित्रार्यमन् शिक्ष वरुणाय दाशुषे या संऽराजा मनसा न प्रऽयुच्छतः ययोः धामं धर्मणा रोचते बृहत् ययोः उभे रोदसी नाधसी वृतौ ॥ ५ ॥ ॥ ९ ॥ या गीः वर्तनिं परिऽएति निःऽकृतं पयः दुहाना व्रतऽनीः अवारतः सा प्रऽवुवाणा वरुणाय दाशुषे देवेभ्यः दाशत् हविषा विवस्वते ॥ ६ ॥ दिवक्षसः अग्निऽजिह्वाः चातऽवृधः चातस्य योनिं विऽमृशंतः आसते द्यां स्कभित्वी अपः आ चक्रुः ओजसा यज्ञं जनित्वी तन्वि नि ममृजुः ॥ ७ ॥ परिऽक्षितां पितरा पूर्वऽजावरी० चातस्य योना क्षयतः संऽओकसा द्यावापृथिवी वरुणाय सऽव्रते० घृतऽवत् पयः महिषाय पिन्वतः ॥ ८ ॥ पर्जन्यावाता वृषभा पुरीषिणा इंद्रवायू वरुणः मित्रः अर्यमा देवान् आदित्यान् अदितिं हवामहे ये पार्थिवासः दिव्यासः अप्ऽसु ये ॥ ९ ॥ तंपीपयत् [illegible]भवः यः ओहते देव्या होतारा उपसं स्वस्तये बृहत्वः विश्वे आदित्याः अदितिम् इंद्रियं सोमं धनऽसाः ऊं ईमहे ॥ १० ॥ स्तोवि जनः दिव्यः गयेन ॥ १ ॥ ओषधीः वनस्पतीन् पृथिवीं पर्वतान् पृऽदानवः आयौ व्रता विऽसृ-

जंतो॒ अधि॒ द्वयो॑: ॥११॥ भु॒ज्युमंहसः॑ पिपृथो॒ निर॑श्विना॒ श्यावं॑ पु॒त्रं व॑धि॒मत्या॑ अजिन्वतं। क॒मु॒द्युवं॑ विम॒दायो॑हथुर्युवं॑ विष्णा॒प्वं॑१ विश्वका॒यावं॑ सृजथः ॥१२॥ पावी॑रवी तन्यतु॒रेक॑पाद्जो दि॒वो ध॒र्ता सिंधु॑रापः॒ समु॒द्रिय॑: । विश्वे॑ दे॒वास॑: शृणव॒न्वचां॑सि मे॒ सर॑स्वती स॒ह धी॒भिः पु॑रंध्या ॥१३॥ विश्वे॑ दे॒वाः स॒ह धी॒भिः पु॑रंध्या॒ मनो॒र्यज॑त्रा अ॒मृता॑ ऋतज्ञाः। रा॒ति॒षाचो॑ अभि॒षाच॑: स्व॒र्विद॒: स्व॑१॑र्गिरो॒ बृह॑ सू॒क्तं जु॑षेरत ॥१४॥ दे॒वान्व॑सिष्ठो अ॒मृ॒तान्ववंदे॒ ये विश्वा॒ भुव॑नाभि॒ प्रत॑स्थुः। ते नो॑ रासंतामुरुगा॒यम॒द्य यू॒यं पा॑त स्व॒स्तिभि॒: सदा॑ नः ॥१५॥११॥

॥ ६६ ॥ १–१५ वसुकर्णो वासुक्रः ॥ विश्वे देवाः ॥ १–१४ भगती । १५ त्रिष्टुप् ॥

॥ ६६ ॥ दे॒वान्हु॑वे बृहच्छ्रवसः स्व॒स्तये॑ ज्योति॒ष्कृतो॑ अध्व॒रस्य॒ प्रचे॑तसः। ये वा॑वृधुः प्र॒तरं॑ विश्ववेदस॒ इंद्र॑ज्येष्ठासो अ॒मृता॑ ऋता॒वृधः॑ ॥१॥ इंद्र॑प्रसूता॒ वरु॑णप्रशिष्टा॒ ये सूर्य॑स्य॒ ज्योति॑षो भा॒गमा॑नशुः। म॒रुद्ग॑णे॒ वृज॑ने॒ मन्म॑ धीमहि॒ मा॒घोने॑ य॒ज्ञं जन॑यंत सू॒र्यः ॥२॥ इंद्रो॒ वसु॑भिः॒ परि॑ पातु नो॒ गय॑मादि॒त्यैनो॑ अदितिः॒ शर्म॑ यच्छतु। रु॒द्रो रु॒द्रेभि॑र्दे॒वो मृ॑ळयाति नस्त्वष्टा॑ नो॒ ग्नाभि॑: सुवि॒ताय॑ जिन्वतु ॥३॥ अदि॑तिर्द्यावापृथि॒वी ऋ॒तं म॒हदिंद्रा॑विष्णू म॒रुतः॒ स्व॑र्बृहत्। [illegible] अव॑से हवामहे॒ वसू॑न्रु॒द्रान्त्सवि॒ता॑रं॒ [illegible] दि॒व्यासो॑ अ॒प॒॒ अभि॑वि॒रुणो॑ घृतव्रतः॒ पूषा [illegible] आहे॑त दैव्या॒ होता॑रा॒ गुरवा॑वृधः॥ अ॒मृता॑ विश्ववेदसः [illegible] सुमे॒धसं॑मिंदि॒रं॑सो॒ नरो॒ अम॑र्त्येना॒॒ वृषा॑ य॒ज्ञो वृष॑णः॒ [illegible] गमध्वं॑ जन॒यं॑ ॥

ष्कृतः। वृष॑णा॒ [illegible] दि॒वि रो॒हय॑

जंतः अधि क्षमि॥११॥ भुज्युं अंहसः पिपृथः निः अश्विना श्यावं पुत्रं वध्रिऽमत्याः अजिन्वतं कमऽद्युवं विऽमदाय जहृथुः युवं विष्णाप्वं विश्वकाय अवं सृजथः॥१२॥ पावीरवी तन्यतुः एकऽपात् अजः दिवः धर्ता सिंधुः आपः समुद्रियः विश्वे देवासः शृणवन् वचांसि मे सरस्वती सह धीभिः पुरंऽध्या॥१३॥ विश्वे देवाः सह धीभिः पुरंऽध्या मनोः यजंचाः अमृताः ऋतऽज्ञाः रातिऽसाचः अभिऽसाचः स्वःऽविदः स्वः गिरः बर्हिः सुऽउक्तं जुषेरत॥१४॥ देवान् वसिष्ठः अमृतान् ववंदे ये विश्वा भुवना अभिप्रऽतस्थुः ते नः रासंतां उरुऽगायं अद्य यूयं पात स्वस्तिऽभिः सदा नः॥१५॥११॥

॥६६॥ देवान् हुवे बृहत्ऽश्रवसः स्वस्तये ज्योतिःऽकृतः अध्वरस्य प्रऽचेतसः ये ववृधुः प्रऽतरं विश्वऽवेदसः इंद्रंऽज्येष्ठासः अमृताः ऋतऽवृधः॥१॥ इंद्रंऽप्रसूताः वरुणऽप्रशिष्टाः ये सूर्यस्य ज्योतिषः भागं आनशुः मरुत्ऽगणे वृजने मन्म धीमहि माघोने यज्ञं जनयंत सूरयः॥२॥ इंद्रः वसुंऽभिः परि पातु नः गयं आदित्यैः नः अदितिः शर्म यच्छतु रुद्रः रुद्रेभिः देवः मृळयाति नः त्वष्टा नः ग्नाभिः सुविताय जिन्वतु॥३॥ अदितिः द्यावापृथिवी ऋतं महत् इंद्रावि॒ष्णू मरुतः स्वः बृहत् देवान् आदित्यान् अवसे हुवेम अदितिं हवामहे यः पितारं सुऽदंससं॥४॥ सरस्वान् धीभिः [illegible] वायुः अश्विना बर्हिऽकृतः विः विश्वे आदित्याः अदितिं इंद्रियं सोमं धत्त बर्हिः असुरं अंहसः॥५॥ स्तोवि जनः दिव्यः गयेन॥१॥ ओषधीः वनस्पतिं देवाः वृषणः हविःऽदानवः आपः पर्जन्यः वृषणः

वृषस्तुभः ॥६॥ अग्नीषोमा वृषणा वाजसातये पुरुप्रशस्ता वृषणा उप ब्रुवे। यावीजिरे वृषणो देवयज्यया ता नः शर्म त्रिवरूथं वि यंसतः ॥७॥ धृतव्रताः क्षत्रिया यज्ञनिष्कृतो बृहद्दिवा अध्वराणामभिश्रियः। अग्निहोतार ऋतसापो अद्रुहोऽपो असृजन्वृचतूर्यं ॥८॥ द्यावापृथिवी जनयन्नभि व्रताप ओषधीर्वनिनो यज्ञिया। अन्तरिक्षं स्वरा पप्रुरूतये वशं देवासस्त्वीनि मामृजुः ॥९॥ धर्तारौ दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः। आप ओषधीः प्र तिरंतु नो गिरो भगो रातिर्वाजिनो यंतु मे हवं ॥१०॥१३॥ समुद्रः सिंधू रजो अन्तरिक्षमज एकपात्तनयित्नुरर्णवः। अहिर्बुध्नियः शृणवद्वचांसि मे विश्वे देवास उत सूरयो मम ॥११॥ स्याम वो मनवो देववीतये प्रांचो नो यज्ञं प्र णयत साधुया। आदित्या रुद्रा वसवः सुदानव इमा ब्रह्म शस्यमानानि जिन्वत ॥१२॥ दैव्या होतारा प्रथमा पुरोहित ऋतस्य पंथामन्वेमि साधुया। क्षेत्रस्य पतिं प्रतिवेशमीमहे विश्वान्देवाँ अमृताँ अप्रयुच्छतः ॥१३॥ वसिष्ठासः पितृवद्वाचमक्रत देवाँ ईळाना ऋषिवत्स्वस्तये। प्रीता इव ज्ञातयः कामसेत्यास्मे देवासोऽवं धूनुता वसु ॥१४॥ देवान्वसिष्ठो अमृतान्ववंदे ये विश्वा भुवनाभि प्रतस्थुः। ते नो रासंतामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥१५॥१४॥

वृषऽस्तुभः॥६॥ अग्नीषोमा वृषणा वाजऽसातये पुरुऽप्रशस्ता वृषणौ उप ब्रुवे यौ ईजिरे वृषणः देवऽयज्यया ता नः शर्म वि-ऽवरूथं वि यंसतः॥७॥ धृतऽव्रताः क्षुचियाः यज्ञनिःऽकृतः बृ-हत्ऽदिवाः अध्वराणां अभिऽश्रियः अग्निऽहोतारः ऋतुऽसापः अद्रुहः अपः असृजन् अनु वृचऽतूर्यं॥८॥ द्यावापृथिवी जनयन् अभि व्रता आपः ओषधीः वनिनानि यज्ञिया अंतरिक्षं स्वः आ पप्रुः ऊतये वशं देवासः तन्वि नि मम्रुजुः॥९॥ धर्तारः दिवः ऋ-भवः सुऽहस्ताः वातापर्जन्या महिषस्य तन्यतोः आपः ओषधीः प्र तिरंतु नः गिरः भगः रातिः वाजिनः यंतु मे हवं॥१०॥१३॥ समुद्रः सिंधुः रजः अंतरिक्षं अजः एकऽपात् तनयित्नुः अर्णवः अहिः बुध्न्यः शृणवत् वचांसि मे विश्वे देवासः उत सूर्यः मम ॥११॥ स्यामं वः मनवः देवऽवीतये प्रांचं नः यज्ञं प्र नयत साधु-ऽया आदित्याः रुद्राः वसवः सुऽदानवः इमा ब्रह्म शस्यमानानि जिन्वत॥१२॥ दैव्या होतारा प्रथमा पुरःऽहिता ऋतस्य पंथां अ-नु एमि साधुऽया देवस्य पतिं प्रतिऽवेशं ईमहे विश्वान् देवान् अमृतान् अप्रऽयुच्छतः॥१३॥ वसिष्ठासः पितृऽवत् वाचं अक्रत देवान् ईळानाः ऋषिऽवत् स्वस्तये प्रीताःऽइव ज्ञातयः कामं आऽइत्य अस्मे देवासः अवं धूनुत वसु॥१४॥ देवान् वसिष्ठः अमृतान् ववंदे ये विश्वा भुवना अभि प्रऽतस्थुः ते नः रासंतां उ-रुगायमद्य यूयं पात स्वस्तिऽभिः सदा नः॥१५॥१४॥

वरुणः धृतऽव्रतः पूषा १५

अमृताः विश्वऽवेदसः शर्म नः यंत पिता नः ऋतऽप्रजाता बृहतीं ॥१२॥ वृषा यज्ञः वृषणः संतु यज्ञियाऽजन्यः अयास्यः उक्थं इंद्राय ऽकृतः वृषणा द्यावापृथिवी ऋतऽवः दिवः पुत्रासः असुरस्य

वीराः । विप्रं पदमंगिरसो दधाना यज्ञस्य धाम प्रथमं मनंत ॥२॥ हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् । बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाँ अगायत् ॥३॥ अवो द्वाभ्यां पर एकया गा गुहा तिष्ठंतीरनृतस्य सेतौ । बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा आकर्वि हि तिस्र आवः ॥४॥ विभिद्या पुरं शयथेमपाचीं निस्त्रीणि साकमुदधेरकृंतत् । बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः ॥५॥ इंद्रो बलं रक्षितारं दुघानां करेणेव वि चकर्ता रवेण । स्वेदांजिभिराशिरमिच्छमानोऽरोदयत्पणिमा गा अमुष्णात् ॥६॥१५॥ स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः । ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदेभिर्द्रविणं व्यानट् ॥७॥ ते सत्येन मनसा गोपतिं गा इयानासः इषणयंत धीभिः । बृहस्पतिर्मिथोअवद्यपेभिरुदुस्रियां असृजत स्वयुग्भिः ॥८॥ तं वर्धयंतो मतिभिः शिवाभिः सिंहमिव नानदंतं सधस्थे । बृहस्पतिं वृषणं शूरसातौ भरेभरे अनु मदेम जिष्णुं ॥९॥ यदा वाजमसनद्विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म । बृहस्पतिं वृषणं वर्धयंतो नाना संतो विभृतो ज्योतिरासा ॥१०॥ सत्यामाशिषं कृणुता वयोधै कीरिं चिद्ध्यवथ स्वेभिरेवैः । पंथा मृधो अप भवंतु विश्वाल्द्रोदसी शृणुतं विश्वमिन्वे ॥११॥ इंद्रो मह्ना महतो अर्णवस्य वि मूर्धानमभिनदर्बुदस्य । अहन्नहिमरिणात्सप्त सिंधून्दिवो वाप्रथिवी प्रावतं नः ॥१२॥१६॥

वीराः विप्रं पदं अंगिरसः दधानाः यज्ञस्य धामं प्रथमं मनंत ॥२॥ हंसैःऽइव सखिंऽभिः वावदत्ऽभिः अश्मन्ऽमयानि नहना विऽअस्यन् बृहस्पतिः अभिऽकनिक्रदत् गाः उत प्रऽअस्तौत् उत् च विद्वान् अगायत् ॥३॥ अवः द्वाभ्यां परः एकया गाः गुहा तिष्ठंतीः अनृतस्य सेतौ बृहस्पतिः तमंसि ज्योतिः इच्छन् उत् उषाः आ अकः वि हि तिस्रः आवः० ॥४॥ विऽअभिद्य पुरं शयथा ईं अपाचीं निः चीणि साकं उदऽधेः अकृंतत् बृहस्पतिः उपसं सूर्यं गां अर्कं विवेद् स्तनयन्ऽइव द्यौः ॥५॥ इंद्रः वलं रक्षितारं दुघानां करेणंऽइव वि चकर्त रवेण स्वेदांजिऽभिः आऽशिरं इच्छमानः अरोदयत् पणिं आ गाः अमुष्णात् ॥६॥ १५॥ सः ईं सत्येभिः सखिंऽभिः शुचत्ऽभिः गोऽधायसं वि धनऽसैः अदर्दः० ब्रह्मणः पतिः वृषंऽभिः वराहैः घर्मंऽस्वेदेभिः द्रविणं वि आनट् ॥७॥ ते सत्येन मनसा गोऽपतिं गाः इयानासः इषणयंत धीभिः बृहस्पतिः मिथःऽअवद्यपेभिः उत् उस्रियाः असृजत स्वयुक्ऽभिः ॥८॥ तं वर्धयंतः मतिऽभिः शिवाभिः सिंहंऽइव नानदंतं सधऽस्थे बृहस्पतिं वृषणं शूरऽसातौ भरेऽभरे अनु मदेम जिष्णुं ॥९॥ यदा वाजं असनत् विश्वऽरूपं आ द्यां अरुक्षत् उत्ऽतराणि सद्म बृहस्पतिं वृषणं वर्धयंतः नाना संतः बिभ्रतः ज्योतिः आसा ॥१०॥ सत्यां आऽशिषं कृणुत वयःऽधे कीरिं चित् हि अवथ स्वेभिः एवैः पथा मधुः अप भवंतु विश्वाः तत् रोदसी शृणुतं विश्वंऽइन्वे० ॥११॥ इंद्रः महा महतः अर्णवस्य वि मूर्धानं अभिनत् अर्बुदस्य अहन् अहिं अरिणात् सप्त सिंधून् देवैः द्यावापृथिवी प्रऽअवतं नः ॥१२॥ १६॥

॥ ६८ ॥ १–१२ अयास्यः ॥ बृहस्पतिः ॥ त्रिष्टुप् ॥

॥६८॥ उद्प्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः। गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्का अनावन् ॥१॥ सं गोभिरांगिरसो नक्षमाणो भगं इवेदर्यमणं निनाय। जनेमित्रो न दंपती अनक्ति बृहस्पते वाजयाशूँरिवाजौ ॥२॥ साध्वर्या अतिथिनीरिषिराः स्पार्हाः सुवर्णा अनवद्यरूपाः। बृहस्पतिः पर्वतेभ्यो वितूर्या निर्गा ऊपे यवमिव स्थिविभ्यः ॥३॥ आप्रुषायन्मधुन ऋतस्य योनिमवक्षिपन्नर्क उल्कामिव द्योः। बृहस्पतिरुद्धरन्नश्मनो गा भूम्या उद्नेव वि त्वचं बिभेद ॥४॥ अप ज्योतिषा तमो अंतरिक्षादुद्नः शीपालमिव वातः आजत्। बृहस्पतिरनुमृश्या वलस्याभ्रमिव वात आ चक्र आ गाः ॥५॥ यदा वलस्य पीयतो जसुं भेद्बृहस्पतिरग्नितपोभिरर्कैः। दुद्भिनत् जिह्वा परिविष्टमाददाविर्निधीरंकृणोदुस्रियाणां ॥६॥१७॥ बृहस्पतिरमत् हि त्यदासां नाम स्वरीणां सदने गुहा यत्। आंडेव भित्त्वा शकुनस्य गर्भमुदुस्रियाः पर्वतस्य त्मनाजत् ॥७॥ अश्मापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि क्षियंतं। निष्टज्जभार चमसं न वृक्षाद्बृहस्पतिर्विरवेण वि कृत्य ॥८॥ सोपामंविंदत्सः स्वर्षाः सो अग्निं सो अर्केण वि बबाधे तमांसि। बृहस्पतिर्गोवपुषो वलस्य निर्मज्जानं न पर्वणो जभार ॥९॥ हिमेव पर्णा मुषिता वनानि बृहस्पतिनाकृपयद्वलो गाः। अनानुकृत्यमपुनश्चकार यात्सूर्यामासा मिथ उच्चरांतः ॥१०॥ अभि श्यावं न कृशनेभिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन्। रात्र्यां तमो अदधुर्ज्योतिरह्न्बृहस्पतिर्भिनदद्रिं विदज्जाः ॥११॥ दुदमं-

॥६८॥ उद्ऽमुतः न वयः रक्षमाणाः वावदतः अभियस्यऽइव घोषाः गिरिऽभ्रजः न ऊर्मयः मदन्तः बृहस्पतिं अभि अर्काः अनावन् ॥१॥ सं गोभिः आंगिरसः नक्षमाणः भगःऽइव इत् अर्यमणं निनाय जनेमित्रः न दंऽपतीं० अनक्ति बृहस्पते वाजयं आपून्ऽइव आजौ॥२॥ साधुऽअर्याः अतिथिनीः इषिराः स्याहोः सुऽवर्णीः अनवद्यऽरूपाः बृहस्पतिः पर्वतेभ्यः विऽतूर्यं निः गाः ऊपे यवंऽइव स्थिविऽभ्यः॥३॥ आऽमुपायन् मधुना ऋतस्य योनिं अवऽक्षिपन् अर्कः उल्कांऽइव द्योः बृहस्पतिः उद्धरन् अश्मनः गाः भूम्याः उद्नाऽइव वि त्वचं विभेद्॥४॥ अयं ज्योतिषा तमः अंतरिक्षात् उद्नः शीपालंऽइव वातः आजत् बृहस्पतिः अनुऽमृश्य वलस्य अभंऽइव वातः आ चक्रे आ गाः ॥५॥ यदा वलस्य पीयतः जसुं भेत् बृहस्पतिः अग्नितपःऽभिः अर्कैः दृतऽभिः न जिह्वा परिऽविष्टं आदत् आविः निऽधीन् अकृणोत् उस्रियाणां॥६॥१७॥ बृहस्पतिः अमंत हित्यत् आसां नामं स्वरीणां सदने गुहा यत् आंडाऽइव भित्त्वा शकुनस्य गर्भे उत् उस्रियाः पर्वतस्य त्मना आजत्॥७॥ अश्मा अपिंऽनद्धं मधु परि अपश्यत् मत्स्यं न दीने उदनि क्षियंतं निः तत् जभार चमसं न वृक्षात् बृहस्पतिः विऽरवेण विऽकृत्यं ॥८॥ सः उषां अविंदत् सः स्वः० सः अग्निं सः अर्केण वि ववाधे तमांसि बृहस्पतिः गोऽवपुषः वलस्य निःमज्जानं न पर्वणः जभार॥९॥ हिमाऽइव पर्णा मुषिता वनानि बृहस्पतिना अकृपयत् वलः गाः अनानुऽकृत्यं अपुनः० चकार यात् सूर्यामासा मिथः उत्ऽचरांतः॥१०॥ अभि श्यावं न कृशनेभिः अश्वं नक्षत्रेभिः पितरः द्यां अपिंशन् रात्र्यां तमः अदधुः ज्योतिः अहन् बृहस्पतिः भिनत् अद्रिं विदत् गाः॥११॥ इदं अ-

कर्म नमो अभियाय यः पूर्वीरन्वानोनवीति। बृहस्पतिः स हि गोभिः सो अश्वैः स वीरेभिः स नृभिर्नो वयो धात्॥१२॥१८॥५॥

॥ ६९ ॥ १–१२ सुमित्रो वाध्र्यश्वः ॥ अग्निः ॥ १, २ जगती । ३–१२ त्रिष्टुप् ॥

॥ ६९ ॥ भद्रा अग्नेर्वध्र्यश्वस्य संदृशो वामी प्रणीतिः सुरणा उपेतयः। यदीं सुमित्रा विशो अयं इंधते घृतेनाहुतो जरते दविद्युतत् ॥१॥ घृतमग्नेर्वध्र्यश्वस्य वर्धनं घृतमन्नं घृतम्यस्य मेदनं। घृतेनाहुत उर्विया वि पप्रथे सूर्य इव रोचते सर्पिरासुतिः ॥२॥ यत्ते मनुर्यदनीकं सुमित्र्यः समीधे अग्ने तदिदं नवीयः। स रेवच्छोच स गिरो जुषस्व स वाजं दर्षि स इह श्रवो धाः ॥३॥ यं त्वा पूर्वमीळितो वध्र्यश्वः समीधे अग्ने स इदं जुषस्व। स नः स्तिपा उत भवा तनूपा दाचं रेवस्व यदिदं ते अस्मे ॥४॥ भवा द्युम्नी वाध्र्यश्वात गोपा मा त्वा तारीदभिमातिर्जनानां। शूर इव धृष्णुश्यवनः सुमित्र्यः प्र नु वोचं वाध्र्यश्वस्य नाम ॥५॥ समज्यां पर्यग्निमूर्णोद्दासा वृचाय्यार्यो जिगेष। शूर इव धृष्णुश्यवनो जनानां त्वमग्ने पृतनायूँरभि ष्याः ॥६॥१९॥ दीर्घंतंतुर्बृहदुद्यायमग्निः सहस्रंस्तरीः शतनीथं ऋभ्वां। द्युमान् द्युमत्सु नृभिर्मृज्यमानः सुमित्रेषु दीदयो देवयत्सु ॥७॥ त्वे धेनुः सुदुघा जातवेदोऽमन्यतेव समना संवपुक्। त्वं नृभिर्दक्षिणावद्भिरग्ने सुमित्रेभिरिध्यसे देवयद्भिः ॥८॥ देवाश्चित्ते अमृता जातवेदो महिमानं वाध्र्यश्व प्र वोचन्। यत्संपृच्छं मानुषीर्विश आयन्त्वं नृभिरजयस्त्वावृधेभिः ॥९॥ पितेव पुत्रमं-

कर्म नमः अभियायं यः पूर्वीः अनु आऽनोनवीति बृहस्पतिः सः हि गोभिः सः अश्वैः सः वीरेभिः सः नृऽभिः नः वयः धात् ॥१२॥१८॥५॥

॥ ६९ ॥ भद्राः अग्नेः वाघ्रिऽअश्वस्य संऽदृशः वामी प्रऽनीतिः सुऽरणाः उपंऽइतयः यत् ईं सुऽमिचाः विशः अयें इंधते घृतेन आऽहुतः जरते दविद्युतत् ॥१॥ घृतं अग्नेः वाघ्रिऽअश्वस्य वर्धनं घृतं अन्नं घृतं ऊं इति अस्य मेदनं घृतेन आऽहुतः उर्विया वि पप्रथे सूर्यःऽइव रोचते सर्पिःऽआसुतिः ॥२॥ यत् ते मनुः यत् अनीकं सुऽमिचः संऽईधे अग्ने तत् इदं नवीयः सः रेवत् णोच सः गिरः जुषस्व सः वाजं दर्षि सः इह श्रवः धाः ॥३॥ यं त्वा पूर्वे ईळितः वाघ्रिऽअश्वः संऽईधे अग्ने सः इदं जुषस्व सः नः स्तिऽपाः उतभवं तनूऽपाः दाशुषे रक्षस्व यत् इदं ते अस्मे इति ॥४॥ भवं द्युम्नी वाघ्रिऽअश्व उत गोपाः मा त्वा तारीत् अभिऽमातिः जनानां शूरःऽइव धृष्णुः च्यवनः सुऽमिचः प्र नु वोचं वाघ्रिऽअश्वस्य नाम ॥५॥ सं अज्यां पर्वत्यां वसूनि दासा वृत्राणि आर्या जिगेथ शूरःऽइव धृष्णुः च्यवनः जनानां त्वं अग्ने पृतनाऽयून् अभि स्याः ॥६॥

॥ १९ ॥ दीर्घऽतंतुः बृहत्ऽउक्षा अयं अग्निः सहस्रऽस्तरीः शतऽनीथः ऋभ्वा द्युऽमान् द्युमतऽसुं नृऽभिः मृज्यमानः सुऽमिवेषु दीदयः देवयतऽसुं ॥७॥ त्वे इति धेनुः सुऽदुघा जातऽवेदः असश्चताऽइव सूनृता सवःऽधुक् त्वं नृऽभिः दक्षिणावतऽभिः अग्ने सुऽमिचेभिः इध्यसे देवयतऽभिः ॥८॥ देवाः चित् ते अमृताः जातऽवेदः महिमानं वाघ्रिऽअश्व प्र वोचन् यत् संऽमृच्छे मानुषीः विशः आर्यन् त्वं नृऽभिः अजयः त्वाऽवृधेभिः ॥९॥ पिताऽइव पुत्रं अ-

विभरुपस्थे त्वामग्ने वध्र्यश्वः समीधे। जुषाणो अस्य समिधं यविष्ठोत पूर्वो अवनोर्व्राधतश्चित् ॥१०॥ श्वघ्नीव वैध्र्यश्वस्य शचून्नृभिर्जिगाय सुतसोमवद्भिः। समनं चिददहश्चिचभानोऽव व्राधंतमभिनद्बृधश्चित् ॥११॥ अयमग्निर्वैध्र्यश्वस्य वृत्रहा संस्कात्मेद्धो नमसोपवाक्यः। स नो अजामीरुत वा विजामीनभि तिष्ठ शर्धतो वाध्र्यश्व ॥१२॥२०॥

॥ ७० ॥ १–११ समिद्धो वाध्र्यश्वः ॥ आग्नं ॥ त्रिष्टुप् ॥

॥ ७० ॥ द्रुमां मे अग्ने समिधं जुषस्वेळस्पदे प्रति हर्या घृताचीं। वर्धेन्पृथिव्याः सुदिनत्वे अह्नामूर्ध्वो भव सुक्रतो देवयज्या ॥१॥ आ देवानामयया वेह यातु नराशंसो विश्वरूपेभिरश्वैः। याता यथा नमसा मियेधो देवेभ्यो देवतमः सुपूदन् ॥२॥ श्वघ्नीतममीळते दूत्याय हविष्मंतो मनुष्यासो अग्निं। बर्हिष्टरश्वैः सुवृता रयेना देवान्वक्षि नि षदेह होतः ॥३॥ वि प्रथतां देवजुष्टं तिरश्चा दीर्घं द्राघ्मा सुरभि भूत्वस्मे। अहेळता मनसा देव बर्हिरिंद्रज्येष्ठाँ उशतो यक्षि देवान् ॥४॥ दिवो वा सानुं स्पृशता वरीयः पृथिव्या वा मातर्या वि श्रयध्वं। उशतीर्द्वारो महिना महद्भिर्देवं रथं रथयुर्धारयध्वं ॥५॥२१॥ देवी दिवो दुहितरा सुशिल्पे उषासानक्ता सदतां नि योनौ। आ वां देवास उशती उशंत उरौ सीदंतु सुभगे उपस्थे ॥६॥ ऊर्ध्वो यावां बृहद्भिः समिद्धः प्रिया धामान्यदितेरुपस्थे। पुरोहितावृत्विजा यज्ञे अस्मिन् विदुष्टरा द्रविणमा यजेथां ॥७॥ तिस्रो देवीर्बर्हिरिदं वरीय आ सीदत चकृमा वः स्योनं। मनुष्वद्यज्ञं सुधिता हवींषीळा देवी घृतपदी जुषंत ॥८॥

विभः उपऽस्थे त्वा अग्ने वध्रिऽअश्वः सपर्यन् जुषाणः अस्य संऽइधे यविष्ठ उत पूर्वान् अवनोः ग्राधतः चित् ॥१०॥ शश्वत् अग्निः वध्रिऽअश्वस्य शर्चून् नृऽभिः जिगाय सुतसोमवत्ऽभिः समनं चित् अदहः चित्रऽभानोः अवं ग्राधंतं अभिनत् वृधः चित् ॥११॥ अयं अग्निः वध्रिऽअश्वस्य वृत्रऽहा सनुकात् प्रऽईडः नमंसा उपऽवाक्यः सः नः अजामीन् उत वा विऽजामीन् अभि तिष्ठ शर्धतः वाध्रिऽअश्व ॥१२॥२०॥

॥७०॥ इमां मे अग्ने संऽइधं जुषस्व इळः पदे प्रति हर्य घृताचीं वर्ष्मन् पृथिव्याः सुदिनऽत्वे अह्नां ऊर्ध्वः भव सुऽऋतोः देवऽयज्या ॥१॥ आ देवानां अयऽयावा इह यातु नराशंसः विश्वऽरूपेभिः अश्वैः ऋतस्य पथा नमसा मियेधः देवेभ्यः देवऽतमः सुसूदत् ॥२॥ शश्वत्ऽतमं ईळते दूत्याय हविष्मंतः मनुष्यासः अग्निं वहिष्ठैः अश्वैः सुऽवृता रथेन आ देवान् वक्षि नि सद इह होतां ॥३॥ वि प्रथतां देवऽजुष्टं तिरश्चा दीर्घं द्राघ्मा सुरभि भूतु अस्मे अहेळता मनसा देव वहिः इंद्रऽज्येष्ठान् उशतः यक्षि देवान् ॥४॥ दिवः वा सानुं स्पृशतं वरीयः पृथिव्या वा मातरया वि श्रयध्वं उशतीः द्वारः महिना महत्ऽभिः देवं रथं रथऽयुः धारयध्वं ॥५॥२१॥ देवी दिवः दुहितरा सुऽशिल्पे उपसानक्ता सदतां नि योनौ आ वां देवासः उशती उशंतः उरौ सीदंतु सुऽभगे उपऽस्थे ॥६॥ ऊर्ध्वः यावां बृहत् अग्निः संऽइद्धः मिया धामानि अदितेः उपऽस्थे पुरःऽहितौ ऋत्विजा यज्ञे अस्मिन् विदुःऽतरा द्रविणं आ यजेथां ॥७॥ तिस्रः देवीः वहिः इदं वरीयः आ सीदत चकृम वः स्योनं मनुष्वत् यज्ञं सुऽधिता हवींषि इळा देवी घृतऽपदी जुषंत ॥८॥

देवं त्वष्टर्यद्वं चारुत्वमानञ्जदंगिरसामभवः सचाभूः। स देवानां पाथ उप प्र विद्वानुशन्यक्षि द्रविणोदः सुरत्नः ॥९॥ वनस्पते रशनया नियूया देवानां पाथ उप वक्षि विद्वान्। स्वदाति देवः कृणवद्धवींष्यवतां द्यावापृथिवी हवं मे ॥१०॥ अग्ने वह वरुणमिष्टये न इंद्रं दिवो मरुतोंऽतरिक्षात्। सीदंतु बर्हिर्विश्व आ यजंत्राः स्वाहा देवा अमृता मादयंतां ॥११॥२२॥

॥ ७१ ॥ १–११ बृहस्पतिः ॥ ज्ञानं ॥ १–८. १०. ११ त्रिष्टुप् । ९ जगती ॥

॥ ७१ ॥ बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः । यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः ॥१॥ सक्तुमिव तितउना पुनंतो यत्र धीरा मनसा वाचमक्रत । अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥२॥ यज्ञेन वाचः पदवीयमायन्तामन्वविंदन्नृषिषु प्रविष्टां । तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवंते ॥३॥ उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनां । उतो त्वस्मै तन्वं१ वि सस्रे जायेव पत्य उशती सुवासाः ॥४॥ उत त्वै सख्ये स्थिरपीतमाहुर्नैनं हिन्वंत्यपि वाजिनेषु । अधेन्वा चरति मायया एष वाचं शुश्रुवाँ अफलामपुष्पां ॥५॥२३॥ यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति । यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पंथां ॥६॥ अक्षण्वंतः कर्णवंतः सखायो मनोजवेष्वसमा बभूवुः । आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ॥७॥ ह्रदा तष्टेषु मनसो जवेषु यद्ब्राह्मणाः संयजंते सखायः । अत्राह त्वं वि जहुर्वे-

देवं त्वष्टुः यत् हु चारुऽत्वं आनट् यत् अंगिरसां अभवः सचाऽभूः सः देवानां पाथः उप प्र विद्वान् उशन् यक्षि द्रविणःऽदः सुऽरत्नः॥९॥ वनस्पते रशनया निऽयूय देवानां पाथः उप बर्हि विद्वान् स्वदाति देवः कृणवत् हवींषि अवतां द्यावापृथिवी हवं मे ॥१०॥ आ अग्ने वह वरुणं इष्टये नः इंद्रं दिवः मरुतः अंतरिक्षात् सीदंतु बर्हिः विश्वे आ यजत्राः स्वाहा देवाः अमृताः मादयंतां ॥११॥२२॥

॥७१॥ बृहस्पते प्रथमं वाचः अग्रं यत् प्र ऐरत नाम्ऽधेयं दधानाः यत् एषां श्रेष्ठं यत् अरिप्रं आसीत् प्रेणा तत् एषां निऽहितं गुहा आविः॥१॥ सक्तुंऽइव तितउना पुनंतः यत्र धीराः मनसा वाचं अक्रत अत्र सखायः सख्यानि जानते भद्रा एषां लक्ष्मीः निऽहिता अधि वाचि ॥२॥ यज्ञेन वाचः पदवीयं आयन् तां अनु अविंदन् ऋषिषु प्रऽविष्टां तां आऽभृत्य वि अदधुः पुरुऽत्रा तां सप्त रेभाः अभि सं नवंते ॥३॥ उत त्वः पश्यन् न ददर्श वाचं उत त्वः शृण्वन् न शृणोति एनां उतो त्वस्मै तन्वं वि सस्रे जायाऽइव पत्ये उशती सुऽवासाः॥४॥ उत त्वं सख्ये स्थिरऽपीतं आहुः न एनं हिन्वंति अपि वाजिनेषु अधेन्वा चरति मायया एषः वाचं शुश्रुऽवान् अफलां अपुष्पां॥५॥२३॥ यः तित्याज सचिऽविदं सखायं न तस्य वाचि अपि भागः अस्ति यत् ईं शृणोति अलकं शृणोति नहि प्रऽवेद सुऽकृतस्य पंथां॥६॥ अक्षण्ऽवंतः कर्णिऽवंतः सखायः मनःऽजवेषु असमाः बभूवुः आदघासः उपऽकक्षासः ऊं त्वे हृदाःऽइव स्नात्वाः ऊं त्वे ददृश्रे॥७॥ हृदा तष्टेषु मनसः जवेषु यत् ब्राह्मणाः संऽयजंते सखायः अत्र अह त्वं वि जहुः वेः

द्याभिरोहंब्रह्माणो वि चरन्त्वे ॥८॥ इमे ये नार्वाङ् परश्चरन्ति न ब्राह्मणासो न सुतेकरासः। त एते वाचमभिपद्य पापया सिरीस्तंत्रं तन्वते अप्रजज्ञयः ॥९॥ सर्वे नंदन्ति यशसागतेन सभासाहेन सख्या सखायः। किल्बिषस्पृत्पितुषणिर्ह्येषामरं हितो भवति वाजिनाय ॥१०॥ ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शकरीषु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥११॥२४॥२॥

॥ ७२ ॥ १–९ बृहस्पतिर्बृहस्पतिर्वा लौक्य अदितिर्वा दाक्षायणी ॥ देवाः ॥ अनुष्टुप् ॥

॥७२॥ देवानां नु वयं जाना प्र वोचाम विपन्यया। उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे ॥१॥ ब्रह्मणस्पतिरेता सं कर्मार इवाधमत्। देवानां पूर्व्ये युगेऽसतः सदजायत ॥२॥ देवानां युगे प्रथमेऽसतः सदजायत। तदाशा अन्वजायन्त तदुत्तानपदस्परि ॥३॥ भूर्जज्ञ उत्तानपदो भुव आशा अजायन्त। अदितेर्दक्षो अजायत दक्षाद्वदितिः परि ॥४॥ अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव। तां देवा अन्वजायन्त भद्रा अमृतबंधवः ॥५॥१॥ यद्देवा अदः सलिले सुसंरब्धा अतिष्ठत। अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत ॥६॥ यद्देवा यतयो यथा भुवनान्यपिन्वत। अत्रा समुद्र आ गूळ्हमा सूर्यमजभर्तन ॥७॥ अष्टौ पुत्रासो अदितेर्ये जातास्तन्वस्परि। देवाँ उप प्रैत्सप्तभिः परा मार्ताडमास्यत् ॥८॥ सप्तभिः पुत्रैरदितिरुप प्रैत्पूर्व्यं युगं। प्रजायै मृत्यवे त्वत्पुनर्मार्ताडमाभरत् ॥९॥२॥

॥ ७३ ॥ १–११ गौरिवीतिः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥७३॥ जनिष्ठा उग्रः सहसे तुरायं मंद्र ओजिष्ठो बहुला-

द्याभिः ओहंऽब्रह्माणः वि चरंति ऊं त्वे॥८॥ इमे ये न अर्वाक् न परः चरंति न ब्राह्मणासः न सुतेऽकरासः ते एते वाचं अभिऽपद्य पापया सिरीः तंत्रं तन्वते अप्रंऽजज्ञयः॥९॥ सर्वे नंदंति यशसा आऽगतेन सभाऽसहेन सख्या सखायः किल्विषऽस्मृत् पितुऽसनेः हि एषां अरं हितः भवंति वाजिनाय॥१०॥ ऋचां त्वः पोषं आस्ते पुपुष्वान् गायत्रं त्वः गायति शक्करीषु ब्रह्मा त्वः वदति जातऽविद्यां यज्ञस्य मात्रां वि मिमीते ऊं त्वः॥११॥२४॥२॥

॥७२॥ देवानां नु वयं जाना प्र वोचाम् विपन्यया उक्थेषु शस्यमानेषु यः पश्यात् उत्ऽतरे युगे॥१॥ ब्रह्मणः पतिः एता सं कर्मारःऽइव अधमत् देवानां पूर्व्ये युगे असतः सत् अजायत॥२॥ देवानां युगे प्रथमे असतः सत् अजायत तत् आशाः अनु अजायंत तत् उत्तानऽपदः परि॥३॥ भूः जज्ञे उत्तानऽपदः भुवः आशाः अजायंत अदितेः दक्षः अजायत दक्षात् ऊं अदितिः परि॥४॥ अदितिः हि अजनिष्ट दक्ष या दुहिता तव तां देवाः अनु अजायंत भद्राः अमृतऽबंधवः॥५॥१॥ यत् देवाः अदः सलिले सुऽसंरब्धाः अतिष्ठत अत्र वः नृत्यतां ऽइव तीव्रः रेणुः अप आयत॥६॥ यत् देवाः यतयः यथा भुवनानि अपिन्वत अत्र समुद्रे आ गूळ्हं आ सूर्यं अजभर्तन॥७॥ अष्टौ पुत्रासः अदितेः ये जाताः तन्वः परि देवान् उप प्र ऐत् सप्तऽभिः परा मार्ताडं आस्यत्॥८॥ सप्तऽभिः पुत्रैः अदितिः उप प्र ऐत् पूर्व्यं युगं प्रऽजायै मृत्यवे त्वत् पुनः मार्ताडं आ अभरत्॥९॥२॥

॥७३॥ जनिष्ठाः उग्रः सहसे तुराय मंद्रः ओजिष्ठः बहुलऽअं-

भिमानः। अवर्धन्निंद्रं मरुतश्चिदत्त माता यद्वीरं दधनद्धनिष्ठा ॥१॥ दुहो निषत्ता पृश्नी चिदेवैः पुरू शंसेन वावृधुष्ट इंद्रं। अभीवृतेव ता महापदेन ध्वांतात्प्रपित्वादुदरंत गर्भाः ॥२॥ ऋघ्वा ते पादा प्र यजिगास्यर्वन्वाजा उत ये चिदत्वं। त्वमिंद्र साला-वृकान्त्सहस्रमासन्दधिषे अश्विना ववृत्याः॥३॥ समना तूर्णिरुप यासि यज्ञमा नासत्या सख्याय वक्षि। वसाव्यामिंद्र धारयः सहस्राश्विना शूर ददतुर्मघानि ॥४॥ मंदमान ऋतादधि प्रजायै सखिभिरिंद्र इषिरेभिरर्वां। आभिर्हि माया उप दस्युमागान्मिहः प्र तमा अवपत्तमांसि ॥५॥३॥ सनामाना चिद्धवसयो न्यस्मा अवाहन्निंद्र उपसो यथानः। ऋघ्वैरगच्छः सखिभिर्निकामैः साकं प्रेतिष्ठा हृद्या जघंथ ॥६॥ त्वं जघंथ नमुचिं मखस्युं दासं कृष्णान ऋघ्रये विमायं। त्वं चकर्थ मनवे स्योनान्पथो देवयां-जसेव यानान् ॥७॥ त्वमेतानि पप्रिषे वि नामेशान इंद्र दधिषे गभस्ती। अनु त्वा देवाः शवसा मदंत्युपरिबुध्नान्निनंथ्वकर्थ ॥८॥ चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्विच्छद्यात्। पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ॥९॥ अश्वादियायेति यद्वदंत्योजसो जातमुत मंन्य एनं। मन्यो-रियाय हर्म्येषु तस्थौ यतः प्रजज्ञ इंद्रो अस्य वेद ॥१०॥ वयः सुपर्णा उप सेदुरिंद्रं प्रियमेधा ऋषयो नाधमानाः। अप ध्वांतमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ॥११॥४॥

॥ ७४ ॥ १-६ गौरिवीतिः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥७४॥ वसूनां वा चर्कृषे इयक्षन्त्रिया वां यज्ञैर्वा रोदस्योः।

भिमानः अवर्धन् इंद्रं मरुतः चित् अत्रं माता यत् वीरं दुधनत् धनिष्ठा॥१॥ दुहः निऽसत्ता पृश्नी चित् एवैः पुरु शंसेन ववृधुः ते इंद्रं अभिवृता ऽइव ता महाऽपदेन ध्वांतात् प्रऽपित्वात् उत् अरंत गर्भोः॥२॥ ऋघ्वा ते पादा प्र यत् जिगांसि अवर्धन् वाजाः उत ये चित् अत्रं त्वं इंद्र सालावृकान् सहस्रं आसन् दधिषे अश्विना आ ववृत्याः॥३॥ सुमना तूर्णिः उप यासि यज्ञं आ नासत्या सख्याय वक्षि वसाव्यां इंद्र धारयः सहस्रा अश्विना शूर ददतुः मघानि॥४॥ मंदमानः ऋतात् अधि प्रऽजायै सखिऽभिः इंद्रः दुपिरेभिः अर्थं आ आभिः हि मायाः उप दस्युं आ अगात् मिहः प्र तस्राः अवपत् तमांसि॥५॥३॥ सऽनामाना चित् ध्वसयः नि अस्मै अवं अहन् इंद्रः उपसः यथा अनः ऋघ्वैः अगच्छः सखिऽभिः निऽकामैः साकं प्रतिऽस्था हृद्या जघंथ॥६॥ त्वं जघंथ नमुचिं मखस्युं दासं कृष्णानः ऋपये विऽमायं त्वं चकर्थ मनवे स्योनान् पथः देवऽत्रा अंजसाऽइव यानान्॥७॥ त्वं एतानि पप्रिषे वि नामं ईशानः इंद्र दधिषे गभस्तौ अनु त्वा देवाः शवसा मदंति उपरिऽबुध्नान् वनिनः चकर्थ॥८॥ चक्रं यत् अस्य अप्ऽसु आ निऽसत्तं उतो' तत् अस्मै मधु इत् चच्छद्यात् पृथिव्यां अतिऽसितं यत् ऊधः पयः गोषु अदधाः ओषधीषु॥९॥ अश्वात् इयाय इति यत् वदंति ओजसः जातं उत मन्ये एनं मन्योः इयाय हर्म्येषु तस्थौ यतः प्रऽजज्ञे इंद्रः अस्य वेद॥१०॥ वयः सुऽपर्णाः उप सेदुः इंद्रं प्रियऽमेधाः ऋपयः नाधमानाः अप ध्वांतं ऊर्णुहि पूर्धि चक्षुः मुमुग्धि अस्मान् निधयाऽइव बद्धान्॥११॥४॥

॥७४॥ वसूनां वा चर्कृषे इयक्षन् धिया वा यज्ञैः वा रोदस्योः

अवंतो वा ये रयिमंतः सातौ वनुं वा ये सुश्रुणुं सुश्रुतो धुः ॥१॥ हवं एषामसुरो नक्षत द्यां श्रवस्यता मनसा निंसत क्षां। चक्षाणा यत्र सुवितायं देवा द्यौर्न वारेभिः कृणवंत स्वैः ॥२॥ इयमे-षामृतानां गीः सुवंतातां ये कृपणंत रत्नं। धियं च यज्ञं च साधंतस्ते नो धांतु वसव्यं १ मसामि॥३॥ आ तत्त इंद्रायवः पनंताभि य ऊर्वं गोमंतं ततृत्सान्। सकृत्स्वं १ ये पुरुपुत्रां महीं सहस्रधारां वृहतीं दुदुक्षन् ॥४॥ शचीव इंद्रमवसे कृणुध्वमनानतं दमयंतं पृतन्यून्। ऋभुक्षणं मघवानं सुवृक्तिं भर्ता यो वज्रं नर्यं पुरुक्षुः ॥५॥ यद्वावानं पुरुतमं पुरापाठा वृचेहेंद्रो नामान्यप्राः। अचेति प्रासहस्पतिस्तुविष्मान्यदीमुश्मसि कर्तवे करत्तत् ॥६॥५॥

॥ ७५ ॥ १–९ सिंधुद्वीप ऋषयः ॥ नद्यः ॥ जगती ॥

॥ ७५ ॥ प्र सु वं आपो महिमानमुत्तमं कारुर्वोचाति सदने विवस्वतः। प्र सप्तसप्त चेधा हि चक्रमुः प्र सृत्वरीणामति सिंधुरोजसा ॥१॥ प्र नेऽरदद्वरुणो यातवे पथः सिंधो यद्वाजाँ अभ्यद्रवस्त्वं। भूम्या अधि प्रवता यासि सानुना यदेषामग्रं जगतामिरज्यसि ॥२॥ दिवि स्वनो यतते भूम्योपर्यनंतं शुष्ममुदियर्ति भानुना। अभ्रादिव प्र स्तनयंति वृष्टयः सिंधुर्यदेति वृषभो न रोरुवत् ॥३॥ अभि त्वा सिंधो शिशुमिन्न मातरो वाश्रा अर्षंति पयसेव धेनवः। राजेव युध्वा नयसि त्वमित्सिचौ यदासामग्रं प्रवतामिनक्षसि ॥४॥ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥५॥६॥ तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वेत्या त्या। त्वं

अवंतः वा ये रयिऽमंतः सातौ वनुं वा ये सुऽश्रुणुं सुऽश्रुतः धुः० ॥१॥ हवं एषां असुरः नक्षत द्यां श्रवस्यता मनसा निंसत क्षां चक्षाणाः यत्र सुविताय देवाः द्यौः न वारेभिः कृणवंत स्वैः॥२॥ इयं एषां अमृतानां गीः सर्वऽनाता ये कृपणंत रत्नं धियं च यज्ञं च साधंतः ते नः धांतु वसव्यं असामि॥३॥ आ तत् ते इंद्र आयवः पनंत अभि ये जुवे गोऽमंतं नितृत्सान् सकृत्ऽस्वं ये पुरुऽपुचां महीं सहस्रंऽधारां बृहतीं दुधुक्षन्॥४॥ शचीऽवः इंद्र अवसे कृणुध्वं अनानतं दमयंतं पृतन्यून् ऋभुक्षणं मघऽवानं सुऽवृक्तिं भर्ता यः वज्रं नयं पुरुऽक्षुः॥५॥ यत् ववानं पुरुऽतमं पुरापाट् आ वृऽहा इंद्रः नामानि अप्राः अचेति प्रऽसहः पतिः तुविऽष्मान् यत् ईं उश्मसि कर्तवे करत् तत्॥६॥५॥

॥७५॥ प्र सु वः आपः महिमानं उत्ऽतमं कारुः वोचाति सदने विवस्वतः प्र सप्तऽसप्त त्रेधा हि चक्रमुः प्र सृत्वरीणां अति सिंधुः ओजसा॥१॥ प्र ते अरदत् वरुणः यातवे पथः सिंधो यत् वाजान् अभि अद्रवः त्वं भूम्याः अधि प्रऽवता यासि सानुना यत् एषां अयं जगतां इरज्यसि॥२॥ दिवि स्वनः यतते भूम्या उपरि अनंतं शुष्मं उत् इयर्ति भानुना अभात्ऽइव प्र स्तनयंति वृष्टयः सिंधुः यत् एति वृषभः न रोरुवत्॥३॥ अभि त्वा सिंधो शिशुं इत् न मातरः वाश्राः अर्षंति पयसाऽइव धेनवः राजाऽइव युध्वा नयसि त्वं इत् सिचौ यत् आसां अयं प्रऽवतां इनक्षसि॥४॥ इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचत परुष्णि आ असिक्न्या मरुत्ऽवृधे वितस्तया आर्जीकीये शृणुहि आ सुऽसोमया॥५॥६॥ तृष्टऽआमया प्रथमं यातवे सऽजूः सुऽसर्वा रसया श्वेत्या त्यं

सिंधो कुभया गोमतीं क्रुमुं मेहत्न्वा सरथं याभिरीयसे ॥६॥ ऋजीत्येनी रुशंती महित्वा परि ज्रयाँसि भरते रजाँसि। अदब्धा सिंधुरपसामपस्तमाश्वा न चित्रा वपुषीव दर्शता ॥७॥ स्वश्वा सिंधुः सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती। ऊर्णावती युवतिः सीलमावत्युताधि वस्ते सुभगा मधुवृधं ॥८॥ सुखं रथं युयुजे सिंधुरश्विनं तेन वाजं सनिषद्स्मिन्नाजौ। महान्ह्यस्य महिमा पनस्यतेऽदब्धस्य स्वयशसो विरुक्षिणः ॥९॥७॥

॥ ७६ ॥ १-८ मरुत्कर्णी रैरावतः सर्पः ॥ ग्रावाणः ॥ जगती ॥

॥ ७६ ॥ आ वं ऋंजस ऊर्जो व्युष्टिष्विंद्रं मरुतो रोदसी अनक्तन। उभे यथा नो अहेनी सचाभुवा सदःसदो वरिवस्यात उद्भिदा ॥१॥ तदु श्रेष्ठं सवनं सुनोतनात्यो न हस्तेयतो अद्रिः सोतरि। विदद्यूर्यो अभिभूति पौंस्यं महो राये चित्तरते यदर्वतः ॥२॥ तदिद्यस्य सवनं विवेरपो यथा पुरा मनवे गातुमश्रेत्। गोअर्णसि त्वाष्ट्रे अश्वनिर्णिजि प्रेमध्वरेष्वध्वराँ अशिश्रयुः ॥३॥ अप हत रक्षसो भंगुरावतः स्कभायत निर्ऋतिं सेधतामतिं। आ नो रयिं सर्ववीरं सुनोतन देवाव्यं भरत श्लोकमद्रयः ॥४॥ दिवश्चिदा वोऽमवत्तरेभ्यो विभ्वना चिदाश्वपस्तरेभ्यः। वायोश्चिदा सोमरभस्तरेभ्योऽग्नेश्चिदर्चे पितुकृत्तरेभ्यः ॥५॥८॥ भुरंतु नो यशसः सोतवंधसो यावाणो वाचा दिविता दिवित्मता। नरो यत्रं दुहते काम्यं मधवाघोपयंतो अभितो मिथस्तुरः ॥६॥ सुन्वंति सोमं रथिरासो अद्रयो निरस्य रसं गविषो दुहंति ते। दुहंत्यूधरुपसेचनाय कं नरो हव्या न

सिंधो॑ कुभया गो॒ऽमती॑ क्रुमुं मेहत्न्वा स॒ऽरथं॑ याभिः ई॒यसे॑॥ ६॥ चृजी॑ती एनी॑ रुशंती महि॒ऽत्वा परि॑ ज्रयाँसि भरते॒ रजाँसि अ॒दब्धा सिंधुः॒ अपसा॑म॒ अपः॑ऽतमा अश्वा॑ न चि॒त्रा वपु॑षीऽइव दर्श॒ता॥ ७॥ सु॒ऽअश्वा॑ सिंधुः सु॒ऽरथा॑ सु॒ऽवासाः॑ हिर॒ण्ययी॑ सु॒ऽकृता॑ वा॒जिनी॑ऽवती ऊर्णा॑ऽवती यु॒वति॑ः सी॒लमा॑ऽवती उ॒त अधि॑ वस्ते सु॒ऽभगा॑ मधु॒ऽवृध॑म्॥ ८॥ सु॒ऽखं रथं॑ युयुजे सिंधु॑ः अ॒श्विने॑ तेन॑ वाजं॑ सनि॒ष्यत्॑ अस्मिन् आजौ॑ महान् हि अ॒स्य॒ महि॒मा यन॒स्यते॑ अदंभ्यस्य स्व॒ऽयंशसः॑ वि॒ऽरप्शि॑नः॥ ९॥ ७॥

॥ ७६॥ आ वः॑ भृंजसे॒ ऊर्जां॑ वि॒ऽउष्टिषु॒ इंद्रं॑ मरुतः॑ रोदसी॑ अनक्तन॒ उभे॑ यथा॑ नः॒ अहं॑नी॑ स॒चा॒ऽभुवा॑ सदः॑ऽसदः॑ वरि॒वः॒ऽस्यात॑ः उत्ऽभिदा॥ १॥ तत् ऊं॑ श्रेष्ठं॑ सवनं॑ सुनो॒त॒न॒ आ॒र्यः॑ न ह॒स्त॑ऽयतः॑ अद्रिः॑ सो॒तरि॑ विदत् हि॒ अ॒र्यः॑ अभि॑ऽभूति॑ पौंस्यं॑ महः॑ रा॒ये चि॒त् त॒रुते॒ यत् अर्व॑तः॥ २॥ तत् इत् हि अ॒स्य॒ सव॑नं॑ वि॒वेः॑ अ॒पः॑ यथा॑ पु॒रा मन॑वे गा॒तुं॑ अश्रे॑त् गो॒ऽअ॑र्णसि॑ त्वा॒ष्ट्रे अश्व॑ऽनि॒र्नि॑जि॒ प्र ई॒ं॑ अ॒ध्व॒रेषु॑ अ॒ध्व॒रान् अ॒शि॒श्रयुः॑॥ ३॥ अयं॑ हत॒ र॒क्षसः॑ भंगुर॑ऽवतः॑ स्क॒भा॒यत॑ निः॑ऽऋ॑तिं॑ सेधत॒ अम॑तिं॑ आ नः॑ र॒यिं स॒र्वं॑ऽवीरं॑ सुनोतन॒ देव॑ऽअ॒व्यं॑ भरत॒ श्लोकं॑ अद्र॒यः॑॥ ४॥ दि॒वः चि॒त् आ वः॑ अम॑वत्ऽतरेभ्यः वि॒ऽभ्वनं॑ चित् आ॒श्व॑यः॑ऽतरेभ्यः वा॒योः चि॒त् आ सोम॑रभः॑ऽतरेभ्यः अ॒ग्नेः चि॒त् अर्चं॑ पितृ॒कृत्ऽतरेभ्यः॥ ५॥ ८॥ भुर॑तं॑ नः॒ य॒शसः॑ सोतुं॑ अंधसः॑ यावा॑णः वा॒चा दि॒विता॑ दि॒वित्म॑ता नरः॑ यच॑ दुहते॒ काम्यं॑ मधु॑ आऽघो॒षयं॑तः॒ अभि॑तः॑ मि॒थः॑ऽतुरः॑॥ ६॥ सुन्व॑ंति॑ सोमं॑ र॒थि॒रासः॑ अद्र॑यः निः॑ अ॒स्य॒ रसं॑ गो॒ऽइ॒वः॑ दुहं॑ति॒ ते दुहं॑ति॒ ऊध॑ः उप॒ऽसेच॑नाय कं॑ नरः॑ हव्या॑ न

मर्जयंत आसभिः॥७॥ एते नरः स्वपसो अभूतन य इंद्राय सुनुथ सोममद्रयः। वामंवामं वो दिव्याय धाम्ने वसुंवसु वः पार्थिवाय सुन्वते ॥८॥९॥

॥ ७७ ॥ १–८ स्यूमरश्मिर्भार्गवः ॥ मरुतः ॥ १–४ ६–८ त्रिष्टुप् । ५ जगती ॥

॥७७॥ अभ्रप्रुषो न वाचा प्रुषा वसु हविष्मंतो न यज्ञा विजानुषः। सुमारुतं न ब्रह्माणमर्हसे गणमस्तोषेषां न शोभसे॥१॥ त्रिये मयीसो अंजीरकृण्वत सुमारुतं न पूर्वीरति क्षपः। दिवस्पुत्रास एता न तेतिर आदित्यासस्ते अत्का न वावृधुः॥२॥ प्र ये दिवः पृथिव्या न वर्हणा त्मना रिरिच्रे अभ्रान्न सूर्यः। पाजस्वंतो न वीराः पनस्यवो रिशादसो न मर्या अभिद्यवः॥३॥ युष्माकं बुध्ने अपां न यामनि विधुर्यति न मही अथुर्यति। विश्वप्सुर्यज्ञो अवाग्यंसु वः प्रयस्वंतो न सत्वाच आ गत॥४॥ यूयं धूर्षु प्रयुजो न रश्मिभिर्ज्योतिष्मंतो न भासा व्युष्टिषु। श्येनासो न स्वयशसो रिशादसः प्रवासो न प्रसितासः परिप्रुषः॥५॥१०॥ प्र यद्वध्वे मरुतः परात्काद्यूयं महः संवरणस्य वस्वः। विदानासो वसवो राध्यस्यारात्तिद्वेषः सनुतर्युयोत॥६॥ य उदृचि यज्ञे अध्वरेष्टा मरुद्भो न मानुषो ददाशत्। रेवत्स वयो दधते सुवीर्यं स देवानामपि गोपीथे अस्तु॥७॥ ते हि यज्ञेषु यज्ञियासु ऊमा आदित्येन नाम्ना शंभविष्ठाः। ते नोऽवंतु रथतूर्मनीषां महश्च यामन्नध्वरे चकानाः॥८॥११॥

॥ ७८ ॥ १–८ स्यूमरश्मिर्भार्गवः ॥ मरुतः ॥ १.३ ४ ८ त्रिष्टुप् । २.५–७ जगती ॥

॥७८॥ विप्रासो न मन्मभिः स्वाध्यो देवाव्योऽन यज्ञैः स्वर्णरः। राजानो न चित्राः सुसंदृशः क्षितीनां न मर्या अ-

मर्जयंते आसऽभिः॥७॥ एते नरः सुऽअपसः अभूतन ये इंद्राय सुनुथ सोमं अद्रयः वामंऽवामं वः दिव्यायधाम्ने वसुऽवसु वः पार्थिवाय सुन्वते ॥८॥९॥

॥७७॥ अभ्रऽमुषः न वाचा मुषु वसुं हविष्मंतः न यज्ञाः विऽजानुषः सुऽमारुतं न ब्रह्माणं अर्हसे गणं अस्तोपि एषां न शोभसे॥१॥ श्रिये मयीसः अंजीन् अकृण्वत सुऽमारुतं न पूर्वीः अतिं क्षपः दिवः पुत्रासः एताः न येतिरे आदित्यासः ते अक्राः न ववृधुः॥२॥ प्र ये दिवः पृथिव्याः न बर्हणा त्मना रिरिचे अभात् न सूर्यः पाजस्वंतः न वीराः पनस्यवः रिशादसः न मयीः अभिऽद्यवः॥३॥ युष्माकं बुध्ने अपां न यामनि विषुर्यतिं न मही अथर्यतिं विश्वऽप्सुः यज्ञः अर्वाक् अयं सु वः प्रयस्वंतः न सत्राचः आ गत॥४॥ यूयं धूःऽसु प्रऽयुजः न रश्मिऽभिः ज्योतिष्मंतः न भासा विऽउष्टिषु श्येनासः न स्वऽयंशसः रिशादसः प्रवासः न प्रऽसितासः परिऽमुषः॥५॥१०॥ प्र यत् बर्हध्वे मरुतः पराकात् यूयं महः संऽवरणस्य वस्वः विदानासः वसवः राध्यस्य आरात् चित् द्वेषः सनुतः युयोत॥६॥ यः उत्ऽऋचि यज्ञे अध्वरेऽस्याः मरुत्ऽभ्यः न मानुषः ददाशत् रेवत् सः वयः दधते सुऽवीरं सः देवानां अपि गोऽपीये अस्तु॥७॥ ते हि यज्ञेषु यज्ञियासः ऊमाः आदित्येन नाम्ना शंऽभविष्ठाः ते नः अवंतु रथऽतूः मनीषां महः च यामन् अध्वरे चकानाः॥८॥११॥

॥७८॥ विप्रासः न मन्मंऽभिः सुऽआध्यः देवऽअव्यः न यज्ञैः सुऽअप्नसः राजानः न चित्राः सुऽसंदृशः क्षितीनां न मयीः अ-

रेपसः॥१॥ अग्निर्न ये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सुदानवः। प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमा ऋतं यते॥२॥ वातासो न ये धुनयो जिगत्नवोऽग्नीनां न जिह्वा विरोकिणः। वर्मण्वंतो न योधाः शिमीवंतः पितॄणां न शंसाः सुरातयः॥३॥ रथानां न येरवः सनाभयो जिगीवांसो न शूरा अभिद्यवः। वरेयवो न मर्या घृतप्रुषोऽभिस्वर्तारो अर्कं न सुष्टुभः॥४॥ अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्यः सुदानवः। आपो न निम्नैरुदभिर्जिगत्नवो विश्वरूपा अंगिरसो न सामभिः॥५॥१२॥ यावाणो न सूरयः सिंधुमातर आदर्दिरासो अद्रयो न विश्वहा। शिप्रूला न क्रीळयः सुमातरो महाग्रामो न यामन्रुत त्विषा॥६॥ उषसां न केतवोऽध्वरश्रियः शुभंयवो नांजिभिर्व्यश्वितन्। सिंधवो न ययियो भ्राजदृष्टयः परावतो न योजनानि ममिरे॥७॥ सुभागान्नो देवाः कृणुता सुरत्नान-स्मान्स्तोतॄन्मरुतो वावृधानाः। अधि स्तोत्रस्य सख्यस्य गात सनाद्धि वो रत्नधेयानि संति॥८॥१३॥

॥७९॥ १-७ अग्निः सौचीको वैश्वानरो वा सप्तिर्वा वाजंभरः ॥ अग्निः ॥ त्रिष्टुप्॥

॥७९॥ अपश्यमस्य महतो महित्वममर्त्यस्य मर्त्यासु विक्षु। नाना हनू विभृते सं भरेते असिन्वती वप्सती भूयसीभिः॥१॥ गुहा शिरो निहितमृधगक्षी असिन्वन्नत्ति जिह्वया वनानि। अत्राणमस्य पदभिः सं भरंत्युत्तानहस्ता नमसाधि विक्षु॥२॥ प्र मातुः प्रतरं गुह्यमिच्छन्कुमारो न वीरुधः सर्पदुर्वीः। ससं न पक्वमविदच्छुचंत रिरिह्वांसं रिप उपस्थे अंतः॥३॥ तद्दामुतं रोदसी प्र ब्रवीमि जायमानो मातरा

रेपसः॥१॥ अग्निः न ये भ्राजसा रुक्मऽवक्षसः वातासः न स्व-ऽयुजः सद्यःऽऊतयः मरुद्भ्रातरः न ज्येष्ठाः सुऽनीतयः सुऽशर्माणः न सोमाः ऋतं यते॥२॥ वातासः न ये धुनयः जिगत्नवः अग्नीनां न जिह्वाः विऽरोकिणः वर्मण्ऽवंतः न योधाः शिमीऽवंतः पितॄणां न शंसाः सुऽरातयः॥३॥ रथ्यानां न ये अराः सऽनाभयः जिगीवांसः न शूराः अभिऽद्यवः वरेऽयवः न मर्याः घृतऽप्रुषः अभिऽस्वर्तारः अर्कं न सुऽस्तुभः॥४॥ अश्वासः न ये ज्येष्ठासः आशवः दिधिषवः न रथ्यः सुऽदानवः आपः न निम्नैः उदऽभिः जिगत्नवः विश्वऽरूपाः अंगिरसः न सामऽभिः॥५॥१२॥ यातवाणः न सूरयः सिंधुऽमातरः आऽदृद्रासः अद्रयः न विश्वहा शिशूलाः न क्रीळयः सुऽमातरः महाऽयामः न यामन् उत त्विषा॥६॥ उपसां न केतवः अध्वरऽश्रियः शुभंऽयवः न अंजिऽभिः वि अश्वितन् सिंधवः न ययियः भ्राजत्ऽऋष्टयः पराऽवतः न योजनानि मुमिरे॥७॥ सुऽभागान् नः देवाः कृणुत सुऽरत्नान् अस्मान् स्तोतॄन् मरुतः ववृधानाः अधि स्तोत्रस्य सख्यस्य गात सनात् हि वः रत्नऽधेयानि संति॥८॥१३॥

॥७९॥ अपश्यं अस्य महतः महिऽत्वं अमर्त्यस्य मर्त्यासु विक्षु नानां हनूं विऽभृतेः सं भरंते असिन्वती बप्सती भूरि अत्तः॥१॥ गुहा शिरः निऽहितं ऋधक् अद्धी असिन्वन् अत्रि जिह्वया वनानि अचाणि अस्मै पट्ऽभिः सं भरंति उत्तानऽहस्ताः नमसा अधि विक्षु॥२॥ प्र मातुः प्रऽतरं गुह्यं इच्छन् कुमारः न वीरुधः सर्पन् उर्वीः ससं न पक्वं अविदत् शुचंतं रिरिह्वांसं रिपः उपऽस्थे अंतः॥३॥ तत् वां ऋतं रोदसी प्र ब्रवीमि जायमानः मातरा

गर्भो असि। नाहं देवस्य मर्त्यश्चिकेताग्निरंग विचेताः स प्रचेताः॥४॥ यो अस्मा अन्नं तृषा ३ दधात्याज्येर्घृतेनुहोति पुष्यति। तस्मै सहस्रमक्षभिर्वि चक्षेऽग्ने विष्यतः प्रत्यङ्ङसि त्वं॥५॥ किं देवेषु त्यज एनश्चकर्थाग्ने पृच्छामि नु त्वामविद्वान्। अक्रीळन्क्रीळन्हरिरत्तवेऽदन्वि पर्वेशश्चकर्ते गामिवासिः॥६॥ विपूचो अश्वान्युयुजे वनेजा ऋजीतिभी रशनाभिर्गृभीतान्। चक्षदे मित्रो वसुभिः सुजातः समानृधे पर्वभिर्वावृधानः॥७॥१४॥

॥ ८० ॥ १-७ अग्निः सौचीक वैश्वानरो वा ॥ अग्निः ॥ त्रिष्टुप् ॥

॥ ८० ॥ अग्निः समिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठां। अग्नी रोदसी वि चरत्समंजन्नग्निर्नारीं वीरकुक्षिं पुरंधिं॥१॥ अग्नेरग्नसः समिदस्तु भद्राग्निर्महो रोदसी आ विवेश। अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते पुरूणि॥२॥ अग्निर्ह त्यं जरतः कर्णमावाग्निरद्भो निरदहज्जरूथं। अग्निरत्रिं घर्म उरुष्यदंतरग्निर्नृमेधं प्रजयासृजत्सं॥३॥ अग्निर्दाद्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति। अग्निर्दिवि हव्यमा ततानाग्नेर्धामानि विभृता पुरुत्रा॥४॥ अग्निमुक्थैर्ऋषयो वि ह्वयंतेऽग्निं नरो यामनि वाधितासः। अग्निं वयो अंतरिक्षे पतंतोऽग्निः सहस्रा परि याति गोनां॥५॥ अग्निं विशं ईळते मानुषीर्या अग्निं मनुषो नहुषो वि जाताः। अग्निर्गीर्धर्वीं पथ्यामृतस्याग्नेर्गव्यूतिर्घृत आ निषत्ता॥६॥ अग्ने वह्निं ऋभवस्ततक्षुरग्निं महामवोचामा सुवृक्तिं। अग्ने प्राव जरितारं यविष्ठाग्ने महि द्रविणमा यजस्व॥७॥१५॥

गर्भेः अत्ति न अहं देवस्य मर्त्यः चिकेत अग्निः अंग विऽचेताः सः प्रऽचेताः ॥४॥ यः अस्मै अन्नं तृपु आऽदधाति आज्यैः घृतैः जुहोति पुष्यति तस्मै सहस्रं अक्षऽभिः वि चक्षे अग्ने विश्वतः प्रत्यङ् असि त्वं ॥५॥ किं देवेषु त्यजः एनः चकर्थ अग्ने पृच्छामि नु त्वा अविद्वान् अक्रीळन् क्रीळन् हरिः अत्तवे अदन् वि पर्वऽशः चकर्त गांऽइव असिः ॥६॥ विपूचः अश्वान् युयुजे वनेऽजाः ऋज्रीतिऽभिः रशनाभिः गृभीतान् चक्षदे मिचः वसुंऽभिः सुऽजातः सं आनृधे पर्वऽभिः ववृधानः ॥७॥१४॥

॥८०॥ अग्निः सप्तिं वाजंऽभरं ददाति अग्निः वीरं शुत्यं कर्मनिःऽस्यां अग्निः रोदसी वि चरत् संऽअंजन् अग्निः नारीं वीरऽकुक्षिं पुरंऽधिं ॥१॥ अग्नेः अग्नसः संऽइत् असतु भद्रा अग्निः मही रोदसी आ विवेश अग्निः एकं चोदयत् समत्ऽसु अग्निः वृत्राणि दयते पुरूणि ॥२॥ अग्निः हि त्यं जरंतः कर्णे आव अग्निः अत्ऽभ्यः निःअदहत् जरूथं अग्निः अर्चिं घर्मे उरुष्यत् अंतः अग्निः नृऽमेधं प्रऽजया असृजत् सं ॥३॥ अग्निः दात् द्रविणं वीरऽपेशाः अग्निः ऋषिं यः सहस्रा सनोति अग्निः दिवि हव्यं आ ततान अग्नेः धामानि विऽभृता पुरुऽत्रा ॥४॥ अग्निं उक्थैः ऋषयः वि ह्वयंते अग्निं नरः यामनि बाधितासः अग्निं वयः अंतरिक्षे पतंतः अग्निः सहस्रा परि याति गोनां ॥५॥ अग्निं विशः ईळते मानुषीः याः अग्निं मनुषः नहुषः वि जाताः अग्निः गांधर्वी पत्न्यां ऋतस्य अग्नेः गर्भूतिः घृते आ निऽसत्ता ॥६॥ अग्नये मह ऋभवः ततक्षुः अग्निं महां अवोचाम सुऽवृक्तिं अग्ने प्र अव जरितारं यविष्ठ अग्ने महि द्रविणं आ यजस्व ॥७॥१५॥

॥ ८१ ॥ १–७ विश्वकर्मा भौवनः ॥ विश्वकर्मा ॥ त्रिष्टुप् ॥

॥ ८१ ॥ य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः । स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आ विवेश ॥ १ ॥ किं स्विदासीदधिष्ठानमारंभणं कतमत्स्वित्कथासीत् । यतो भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥ २ ॥ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् । सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥ ३ ॥ किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥ ४ ॥ या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा । शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं वृधानः ॥ ५ ॥ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्यां । मुह्यन्त्वन्ये अभितो जनासं इहास्माकं मघवा सूरिरस्तु ॥ ६ ॥ वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम । स नो विश्वानि हवनानि जोषद्विश्वशंभूरवसे साधुकर्मा ॥ ७ ॥ १६ ॥

॥ ८२ ॥ १–७ विश्वकर्मा भौवनः ॥ विश्वकर्मा ॥ त्रिष्टुप् ॥

॥ ८२ ॥ चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने । यदेदंता अदहन्नस्य पूर्वे आदिद्यावापृथिवी अप्रथेतां ॥ १ ॥ विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् । तेषामिष्टानि समिषा मदंति यत्रा सप्तऋषीन्पर एकमाहुः ॥ २ ॥ यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा । यो देवानां नामधा एक एव तं संप्रश्नं भुवना यंत्यन्या ॥ ३ ॥ त आयजंत द्रविणं समं-

॥८१॥ यः इमा विश्वा भुवनानि जुह्वत् ऋषिः होता नि असीदत् पिता नः सः आऽशिषा द्रविणं इच्छमानः प्रऽयम्-ऽछत् अवरान् आ विवेश ॥१॥ किं स्वित् आसीत् अधिऽस्थानं आऽरंभणं कतमत् स्वित् कथा आसीत् यतः भूमिं जनयन् विश्वऽकर्मा वि द्यां और्णोत् महिना विश्वऽचक्षाः ॥२॥ विश्वतः-ऽचक्षुः उत विश्वतःऽमुखः विश्वतःऽबाहुः उत विश्वतःऽपात् सं बाहुऽभ्यां धमति सं पतत्रैः द्यावाभूमी जनयन् देवः एकः ॥३॥ किं स्वित् वनं कः उ सः वृक्षः आस यतः द्यावापृथिवी निः-ऽततक्षुः मनीषिणः मनसा पृच्छत इत् उ तत् यत् अधिऽतिष्ठत् भुवनानि धारयन् ॥४॥ या ते धामानि परमाणि या अवमा या मध्यमा विश्वऽकर्मन् उत इमा शिक्ष सखिऽभ्यः हविषि स्व-धाऽवः स्वयं यजस्व तन्वं वृधानः ॥५॥ विश्वऽकर्मन् हविषा वावृ-धानः स्वयं यजस्व पृथिवीं उत द्यां मुह्यंतु अन्ये अभितः जनासः इह अस्माकं मघऽवा सूरिः अस्तु ॥६॥ वाचः पतिं विश्वऽकर्माणं ऊतये मनःऽजुवं वाजे अद्य हुवेम सः नः विश्वानि हवनानि जोषत् विश्वऽशंभूः अवसे साधुऽकर्मा ॥७॥१६॥

॥८२॥ चक्षुषः पिता मनसा हि धीरः घृतं एने अजनत् नम्न-माने यदा इत् अंतः अदहंत पूर्वे आत् इत् द्यावापृथिवी अ-प्रथेतां ॥१॥ विश्वऽकर्मा विऽमनाः आत् विऽहायाः धाता वि-ऽधाता परमा उत संऽदृक् तेषां इष्टानि सं इषा मदंति यत्र सप्त-ऽऋषीन् परः एकं आहुः ॥२॥ यः नः पिता जनिता यः विऽधा-ता धामानि वेद भुवनानि विश्वा यः देवानां नामऽधाः एकः एव तं संऽप्रश्नं भुवना यंति अन्या ॥३॥ ते आ अयजंत द्रविणं सं

स्मा ऋषयः पूर्वे जरितारो न भूना। असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥४॥ परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति। कं स्विन्नभ प्रथमं दंद्र आपो यत्र देवाः समपश्यंत विश्वे ॥५॥ तमिन्नभ प्रथमं दंद्र आपो यत्र देवाः समगच्छंत विश्वे। अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः ॥६॥ न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव। नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति ॥७॥ १७॥

॥ ८३ ॥ १–७ मन्युस्तापसः ॥ मन्युः ॥ १ जगती । २–७ त्रिष्टुप् ॥

॥८३॥ यस्ते मन्योऽविधद्वज्र सायक सह ओजः पुपति विश्वमानुषक्। साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्वता ॥१॥ मन्युरिंद्रो मन्युरेवास देवो मन्युर्होता वरुणो जातवेदाः। मन्युं विश ईळते मानुषीर्याः पाहि नो मन्यो तपसा सजोषाः ॥२॥ अभीहि मन्यो तवस तवीयान्तपसा युजा वि जहि शत्रून्। अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ॥३॥ त्वं हि मन्यो अभिभूत्योजाः स्वयंभूर्भामो अभिमातिषाहः। विश्वचर्षणिः सहुरिः सहावानस्मास्वोजः पृतनासु धेहि ॥४॥ अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः। तं त्वा मन्यो अक्रतुर्जिहीळाहं स्वा तनूर्बलदेयाय मेहि ॥५॥ अयं ते अस्युप मेह्यर्वाङ् प्रतीचीनः सहुरे विश्वधायः। मन्यो वज्रिन्नभि मामा ववृत्स्व हनाव दस्यूँरुत बोध्यापेः ॥६॥ अभि प्रेहि दक्षिणतो भवा मेऽधा वृत्राणि जंघनाव भूरि। जुहोमि ते धरुणं मध्वो अग्रमुभा उपांशु प्रथमा पिबाव ॥७॥ १८॥

अस्मै चर्षयः पूर्वे जरितारः न भूना असूतं सूतं रजसि निऽसत्ते ये भूतानि संऽअकृण्वन् इमानि॥४॥ परः दिवा परः एना पृथिव्या परः देवेभिः असुरैः यत् अस्ति किं स्वित् गर्भं प्रथमं दध्रे आपः यत्र देवाः संऽअपश्यंत विश्वे॥५॥ तं इत् गर्भं प्रथमं दध्रे आपः यत्र देवाः संऽअगच्छंत विश्वे अजस्य नाभौ अधि एकं अर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः॥६॥ न तं विदाथ यः इमा जजानं अन्यत् युष्माकं अंतरं बभूव नीहारेण प्रावृताः जल्प्या च असुऽतृपः उक्थऽशसः चरंति॥७॥१७॥

॥८३॥ यः ते मन्यो अविधत् वज्र सायक सहः ओजः पुष्यति विश्वं आनुषक् सत्यामं दासं आर्यं त्वया युजा सहःऽकृतेन सहसा सहस्वता॥१॥ मन्युः इंद्रः मन्युः एव आसत देवः मन्युः होता वरुणः जातऽवेदाः मन्युं विशः ईळते मानुषीः याः पाहि नः मन्यो तपसा सऽजोषाः॥२॥ अभि इहि मन्यो तवसः तवीयान् तपसा युजा वि जहि शत्रून् अमित्रऽहा वृत्रऽहा दस्युऽहा च विश्वा वसूनि आ भर त्वं नः॥३॥ त्वं हि मन्यो अभिभूतिऽओजाः स्वयंऽभूः भामः अभिमातिऽसहः विश्वऽचर्षणिः सहुरिः सहावान् अस्मासु ओजः पृतनासु धेहि॥४॥ अभागः सन् अप परांऽइतः अस्मि तव क्रत्वा तविषस्य प्रऽचेतः तं त्वा मन्यो अक्रतुः जिहीळ अहं स्वा तनूः बलऽदेयाय मा आ इहि॥५॥ अयं ते अस्मि उप मा आ इहि अर्वाङ् प्रतीचीनः सहुरे विश्वऽधायः मन्यो वज्रिन् अभि मां आ ववृत्स्व हनाव दस्यून् उत बोधि आपेः॥६॥ अभि प्र इहि दक्षिणतः भव मे अध वृत्राणि जंघनाव भूरि जुहोमि ते धरुणं मध्वः अग्रं उभौ उपऽअंशु प्रथमा पिबाव॥७॥१८॥

॥ ८४ ॥ १–७ मन्युस्तापसः ॥ मन्युः ॥ १–३ त्रिष्टुप् । ४–७ जगती ॥

॥ ८४ ॥ त्वया मन्यो सरथमारुजंतो हर्षमाणासो धृषिता मरुत्वः । तिग्मेषव आयुधा संशिशाना अभि प्र यंतु नरो अग्निरूपाः ॥ १ ॥ अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि । हत्वाय शत्रून्वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व ॥ २ ॥ सहस्व मन्यो अभिमातिमस्मे रुजन्मृणन्प्रमृणन्प्रेहि शत्रून् । उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वं ॥ ३ ॥ एको बहूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि । अकृत्तरुक्त्वया युजा वयं द्युमंतं घोषं विजयाय कृण्महे ॥ ४ ॥ विजेषकृदिंद्र इवानवब्रवोऽस्माकं मन्यो अधिपा भवेह । प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ ॥ ५ ॥ आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरं । क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि ॥ ६ ॥ संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः । भियं दधाना हृदयेषु शत्रवः पराजितासो अप नि लयंतां ॥ ७ ॥ १९ ॥ ६ ॥

॥ ८५ ॥ १–४१ मृगारः सार्पिराज्ञी ॥ १–५ सोमः । ६–१६ मृगारविवाहः । १७ देवाः । १८ सोमार्कौ । १९ चंद्रमाः । २०–२८ नृणां विवाहमंत्रा आशीःप्रायाः । २९, ३० वधूवासःसंस्पर्शनिंदा । ३१ वस्त्रनाञ्जिनी देवपत्नी । ३२–४१ मृगारः ॥ १–१३. १५–१७. २२. २५. २८–३३ ३५. ३८–४० ४५–४९ अनुष्टुप् । १४. १९–२१. २३. २४. २६. ३६. ३७. ४४ त्रिष्टुप् । १८. ३४. ४३ जगती । ३१ उपरिष्टाद्बृहती ॥

॥ ८५ ॥ सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः । ऋतेनादित्यास्तिष्ठंति दिवि सोमो अधि श्रितः ॥ १ ॥ सोमेनादित्या बलिनः सोमेन पृथिवी मही । अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥ २ ॥ सोमं मन्यते पपिवान्यत्संपिंषंत्योषधिं । सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥ ३ ॥ आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः । ग्राव्णा-

॥८४॥ त्वया मन्यो सऽरथमाऽरुजन्तः हर्षमाणासः धृषिताः मरुत्वः तिग्मऽइषवः आयुधा संऽशिशानाः अभि प्र यन्तु नरः अग्निऽरूपाः॥१॥ अग्निःऽइव मन्यो त्विषितः सहस्व सेनाऽनीः नः सहुरे हूतः एधि हत्वाय शत्रून् विभजस्व वेदः ओजः मिमानः विमृधः नुदस्व॥२॥ सहस्व मन्यो अभिऽमातिं अस्मे रुजन् मृणन् प्रऽमृणन् प्र इहि शत्रून् उग्रं ते पाजः ननु आ रुरुध्रे वशी वशं नयसे एकऽजत्वं॥३॥ एकः बहूनां असि मन्यो ईळितः विशंऽविशं युधये सं शिशाधि अकृत्तऽरुक् त्वया युजा वयं द्युऽमंतं घोषं विऽजयाय कृण्महे॥४॥ विजेषऽकृत् इंद्रःऽइव अनवऽव्रवः अस्माकं मन्यो अधिऽपाः भव इह प्रियं ते नाम सहुरे गृणीमसि विद्म तं उत्सं यतः आऽबभूथ॥५॥ आऽभूत्या सहऽजाः वज्र सायक सहः बिभर्षि अभिऽभूते उत्ऽतरं कृत्वा नः मन्यो सह मेदी एधि महाऽधनस्य पुरुऽहूत संऽसृजित्॥६॥ संऽसृष्टं धनं उभयं संऽआकृतं अस्मभ्यं दत्तां वरुणः च मन्युः भियं दधानाः हृदयेषु शत्रवः पराऽजितासः अप नि लयंतां॥७॥१९॥६॥

॥८५॥ सत्येन उत्तभिता भूमिः सूर्येण उत्तभिता द्यौः ऋतेन आदित्याः तिष्ठंति दिवि सोमः अधि श्रितः॥१॥ सोमेन आदित्याः बलिनः सोमेन पृथिवी मही अथो नक्षत्राणां एषां उपऽस्थे सोमः आऽहितः॥२॥ सोमं मन्यते पपिऽवान् यत् संऽपिंषंति ओषधिं सोमं यं ब्रह्माणः विदुः न तस्य अश्नाति कः चन॥३॥ आच्छत्ऽविधानैः गुपितः बाहुऽतैः सोमः रक्षितः याव्नां

मिच्छूखन्तिष्ठसि न ते अघ्नाति पार्थिवः ॥४॥ यत्ते देव प्रपिवति तत आ प्यायसे पुनः । वायुः सोमस्य रक्षिता समानां मास आकृतिः ॥५॥२०॥ रैभ्यासीदनुदेयी नाराशंसी न्योचनी । सूर्यायाः भद्रमिद्वासो गाथयेति परिष्कृतं ॥६॥ चित्तिरा उपबर्हणं चक्षुरा अभ्यंजनं । द्यौर्भूमिः कोश आसीद्यदयात्सूर्या पतिं ॥७॥ स्तोमा आसन्प्रतिधयः कुरीरं छंद ओपशः । सूर्यायाः अश्विना वराग्निरासीत्पुरोगवः ॥८॥ सोमो वधूयुरभवदश्विनास्तामुभा वरा । सूर्या यत्पत्ये शंसंतीं मनसा सवितादददात् ॥९॥ मनो अस्या अंत आसीद्द्यौरासीदुत छदिः । शुक्रावनड्वाहावास्तां यदयात्सूर्या गृहं ॥१०॥२१॥ ऋक्सामाभ्यामभिहितौ गावौ ते सामनावितः । श्रोत्रं ते चक्रे आस्तां दिवि पंथाश्चराचरः ॥११॥ शुची ते चक्रे यात्या व्यानो अक्ष आहतः । अनो मनस्मयं सूर्यारोहत्प्रयती पतिं ॥१२॥ सूर्यायां वहतुः प्रागात्सविता यमवासृजत् । अघासु हन्यंते गावोऽर्जुन्योः पर्युह्यते ॥१३॥ यदश्विना पृच्छमानावयातं चिचक्रेण वहतुं सूर्यायाः । विश्वे देवा अनु तदामजानन्पुत्रः पितरावचृणीत पूषा ॥१४॥ यदयातं शुभस्पती वरेयं सूर्यामुपं । कथैकं चक्रं वामासीत्कथ देष्ट्रायं तस्थथुः ॥१५॥२२॥ द्वे ते चक्रे सूर्ये ब्रह्माणं ऋतुथा विदुः । अथैकं चक्रं यद्गुहा तदद्धातय इद्विदुः ॥१६॥ सूर्यायै देवेभ्यो मित्राय वरुणाय च । ये भूतस्य प्रचेतस इदं तेभ्योऽकरं नमः ॥१७॥ पूर्वापरं चरतो माययैतौ शिशू क्रीळंतौ परि यातो अध्वरं । विश्वान्यन्यो भुवनाभिचष्टे ऋतूँरन्यो विदधज्जायते पुनः ॥१८॥

इत् शृण्वन् तिष्ठसि न ते अश्नाति पार्थिवः॥४॥ यत् त्वा देव प्रऽपिबन्ति तर्तः आ प्यायसे पुनः वायुः सोमस्य रक्षिता समानां मासः आऽकृतिः॥५॥२०॥ ऋभी आसीत् अनुऽदेयी नाराशंसी निऽओचनी सूर्यायाः भद्रं इत् वासः गाथया एति परिऽकृतं॥६॥ चित्तिः आः उपऽबर्हणं चक्षुः आः अभिऽअंजनं द्यौः भूमिः कोशः आसीत् यत् अयात् सूर्या पतिं॥७॥ स्तोमाः आसन् प्रतिऽधयः कुरीरं छंदः ओपशः सूर्यायाः अश्विना वरा अग्निः आसीत् पुरःऽगवः॥८॥ सोमः वधूऽयुः अभवत् अश्विना आस्तां उभा वरा सूर्या यत् पत्ये शंसन्तीं मनसा सविता अददात्॥९॥ मनः अस्याः अनः आसीत् द्यौः आसीत् उत छदिः शुक्रौ अनड्वाहौ आस्तां यत् अयात् सूर्या गृहं॥१०॥२१॥ ऋक्ऽसामाभ्यां अभिऽहितौ गावौ ते सामनौ इतः श्रोत्रं ते चक्रे आस्तां दिवि पंथाः चराचरः॥११॥ शुची ते चक्रे यात्याः विऽआनः अक्षः आऽहतः अनः मनस्मयं सूर्या आ अरोहत् प्रऽयती पतिं॥१२॥ सूर्यायाः वहतुः प्र अगात् सविता यं अवऽअसृजत् अघासु हन्यंते गावः अर्जुन्योः परि उह्यते॥१३॥ यत् अश्विना पृच्छमानौ अयातं चिऽचक्रेण वहतुं सूर्यायाः विश्वे देवाः अनु तत् वां अजानन् पुत्रः पितरौ अवृणीत पूषा॥१४॥ यत् अयातं शुभः पती वरेऽयं सूर्या उप कं एकं चक्रं वां आसीत् कं देष्ट्रायं तस्थथुः॥१५॥२२॥ द्वे ते चक्रे सूर्ये ब्रह्माणः ऋतुऽथा विदुः अथ एकं चक्रं यत् गुहा तत् अद्रातयः इत् विदुः॥१६॥ सूर्यायै देवेभ्यः मित्राय वरुणाय च ये भूतस्य प्रऽचेतसः इदं तेभ्यः अकरं नमः॥१७॥ पूर्वऽअपरं चरतः मायया एतौ शिशू क्रीळंतौ परि यातः अध्वरं विश्वानि अन्यः भुवना अभिऽचष्टे ऋतून् अन्यः विऽदधत् जायते पुनः॥१८॥

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रं । भागं देवेभ्यो वि दधात्यायन्प्र चंद्रमास्तिरते दीर्घमायुः ॥ १९ ॥ सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रं । आ रोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व ॥ २० ॥ २३ ॥ उदीर्ष्वातः पतिवती ह्येषा विश्वावसुं नमसा गीर्भिरीळे । अन्यामिच्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्यं विद्धि ॥ २१ ॥ उदीर्ष्वातौ विश्वावसो नमसेळामहे त्वा । अन्यामिच्छ प्रफर्व्यं१सं जायां पत्या सृज ॥ २२ ॥ अनृक्षरा ऋजवः संतु पंथा येभिः सखायो यंति नो वरेयं । समर्यमा सं भगो नो निनीयात्सं जास्पत्यं सुयममस्तु देवाः ॥ २३ ॥ प्र त्वा मुंचामि वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवः । ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या दधामि ॥ २४ ॥ प्रेतो मुंचामि नामुतः सुबद्धाममुतस्करं । यथेयमिंद्र मीढ्वः सुपुत्रा सुभगासति ॥ २५ ॥ २४ ॥ पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन । गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥ २६ ॥ इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि । एना पत्या तन्वं१सं सृजस्वाधा जिव्री विदथमा वदाथः ॥ २७ ॥ नीललोहितं भवति कृत्यासक्तिर्व्यज्यते । एधंते अस्या ज्ञातयः पतिर्बंधेषु बध्यते ॥ २८ ॥ परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु । कृत्यैषा पद्वतीं भूत्वा जाया विंशते पतिं ॥ २९ ॥ अश्रीरा तनूर्भवति रुशती पापयामुया । पतिर्यदध्वोऽवासता स्वमंगमभिधित्सते ॥ ३० ॥ २५ ॥ ये वध्वश्चंद्रं वहतुं यक्ष्मा यंति जनादनं । पुनस्तान्यज्ञिया देवा नयंतु यत आगताः ॥ ३१ ॥ मा

नवंःऽनवःभवति जायमानः अह्नां केतुः उषसां एति अग्रं भागं देवेभ्यः वि दधाति आऽयन् प्र चंद्रमाः तिरते दीर्घं आयुः॥१९॥ सुऽकिंशुकं शल्मलिं विश्वऽरूपं हिरण्यऽवर्णं सुऽवृतं सुऽचक्रं आ रोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व॥२०॥२३॥ उत् ईर्ष्व अतः पतिऽवती हि एषा विश्वऽवसुं नमसा गीःऽभिः ईळे अन्यां इच्छ पितृऽसदं विऽअक्तां सः ते भागः जनुषा तस्यं विद्धि ॥२१॥ उत् ईर्ष्व अतः विश्वऽवसोः नमसा ईळामहे त्वा अन्यां इच्छ प्रऽफर्व्यं सं जायां पत्या सृज॥२२॥ अनृक्षराः ऋजवः संतु पंथाः येभिः सखायः यंति नः वरेऽयं सं अर्यमा सं भगः नः निनीयात् सं जाःपत्यं सुऽयमं अस्तु देवाः॥२३॥ प्र त्वा मुंचामि वरुणस्य पाशात् येन त्वा अबध्नात् सविता सुऽशेवः ऋतस्य योनौ सुऽकृतस्य लोके अरिष्टां त्वा सह पत्या दधामि॥२४॥ प्र इतः मुंचामि न अमुतः सुऽबद्धां अमुतः करं यथा इयं इंद्र मीढ्वः सुऽपुत्रा सुऽभगा असति॥२५॥२४॥ पूषा त्वा इतः नयतु हस्तऽगृह्य अश्विना त्वा प्र वहतां रथेन गृहान् गच्छ गृहऽपत्नी यथा असः वशिनी त्वं विदथं आ वदासि॥२६॥ इह प्रियं प्रऽजया ते सं कृध्यतां अस्मिन् गृहे गार्हऽपत्याय जागृहि एना पत्या तन्वं सं सृजस्व अधं जिवीं विदथं आ वदाथः॥२७॥ नीललोहितं भवति कृत्या आसक्तिः वि अज्यते एधंते अस्याः ज्ञातयः पतिः बंधेषु बध्यते॥२८॥ परा देहि शामुल्यं ब्रह्मऽभ्यः वि भज वसु कृत्या एषा पतिऽवती भूत्वी आ जाया विशते पतिं॥२९॥ अश्रीरा तनूः भवति रुशती पापया अमुया पतिः यत् वध्वः वासंसा स्वं अंगं अभिऽधित्सते॥३०॥२५॥ ये वध्वः चंद्रं वहतुं यक्ष्माः यंति जनात् अनु पुनः तान् यज्ञियाः देवाः नयंतु यतः आऽगताः॥३१॥ मा

विंदन्परिपंथिनो य आसीदंति दंपती । सुगेभिंर्दुर्गमतीतामपं द्रांत्वरातयः ॥३२॥ सुमंगलीरियं वधूरिमां समेत पश्यत । सौभाग्यमस्यै दत्त्वायाथास्तं वि परेतन ॥३३॥ तृष्टमेतत्कटुकमेतदपाष्ठवद्विषवन्नैतदत्तवे । सूर्या यो ब्रह्मा विद्यात्स इद्वाधूयमर्हति ॥३४॥ आशसनं विशसनमथो अधिविकर्तनं । सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुंधति ॥३५॥२६॥ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः । भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥३६॥ तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या३वपंति । या नः ऊरू उशती विश्रयांते यस्यामुशंतः प्रहरांम शेपं ॥३७॥ तुभ्यमग्ने पर्यवहन्सूर्या वहतुना सह । पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥३८॥ पुनः पत्नीमग्निरदादायुषा सह वर्चसा । दीर्घायुरस्या यः पतिर्जीवाति शरदः शतं ॥३९॥ सोमः प्रथमो विविदे गंधर्वो विविद उत्तरः । तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥४०॥२७॥ सोमो ददद्गंधर्वाय गंधर्वो दददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमां ॥४१॥ इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतं । क्रीळंतौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥४२॥ आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा । अदुर्मंगलीः पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे ॥४३॥ अघोरचक्षुरपतिघ्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः । वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥४४॥ इमां त्वमिंद्र मीढ्वः सुपुत्रां सुभगां कृणु । दशास्यां पुत्राना

विद्वन् परिऽपंथिनः ये आऽसीदंति दंऽपंती० सुऽगेभिः दुःऽगं अतिं इतां अपं द्रांतु अरातयः ॥३२॥ सुऽमंगलीः इयं वधूः इमां सं ऽएतं पश्यत सौभाग्यं अस्यै दत्त्वायऽथं अस्तं वि परा इतन ॥३३॥ तृष्टं एतत् कटुकं एतत् अपाष्ठऽवत् विषऽवत् न एतत् अत्तवे सूर्यां यः ब्रह्मा विद्यात् सः इत् वाधूऽयं अर्हति ॥३४॥ आऽशसनं विऽशसनं अथो अधिऽविकर्तनं सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुंधति ॥३५॥२६॥ गृभ्णामि ते सौभगऽत्वाय हस्तं मया पत्या जरत्ऽअष्टिः यथा असः भगः अर्यमा सविता पुरंऽधिः मह्यं त्वा अदुः गार्हपत्याय देवाः ॥३६॥ तां पूषन् शिवऽतमां आ ईरयस्व यस्यां बीजं मनुष्याः वपंति या नः ऊरू उशती विऽश्रयाते यस्यां उशंतः प्रऽहरांम शेपं ॥३७॥ तुभ्यं अग्रे पर्यं अवहन् सूर्यां वहतुना सह पुनः पतिंऽभ्यः जायां दाः अग्ने प्रऽजया सह ॥३८॥ पुनः पत्नीं अग्निः अदात् आयुषा सह वर्चसा दीर्घऽआयुः अस्याः यः पतिः जीवाति शरदः शतं ॥३९॥ सोमः प्रथमः विविदे गंधर्वः विविदे उत्ऽतरः तृतीयः अग्निः ते पतिः तुरीयः ते मनुष्यऽजाः ॥४०॥२७॥ सोमः ददत् गंधर्वाय गंधर्वः ददत् अग्नये रयिं च पुचान् च अदात् अग्निः मह्यं अथो इमां ॥४१॥ इह एव स्तं मा वि यौष्टं विश्वं आयुः वि अश्नुतं क्रीळंतौ पुत्रैः नप्तृऽभिः मोदमानौ स्वे गृहे ॥४२॥ आ नः प्रऽजां जनयतु प्रजाऽपतिः आऽजरसाय सं अनक्तु अर्यमा अदुःऽमंगलीः पतिऽलोकं आ विश शं नः भव द्विऽपदे शं चतुःऽपदे ॥४३॥ अघोरऽचक्षुः अपतिऽघ्नी एधि शिवा पशुऽभ्यः सुऽमनाः सुऽवर्चाः वीरऽसूः देवऽकामा स्योना शं नः भव द्विऽपदे शं चतुःऽपदे ॥४४॥ इमां त्वं इंद्र मीढ्वः सुऽपुत्रां सुऽभगां कृणु दशं अस्यां पुचान् आ

धेहि पतिमेकादशं कृधि ॥ ४५ ॥ सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्वां भव। ननांदरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥ ४६ ॥ समंजंतु विश्वे देवाः समापो हृदयानि नौ। सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥ ४७ ॥ २८ ॥ ३ ॥

॥ ८६ ॥ १–२३ वृषाकपिरैंद्र इंद्राणींद्रश्च समूदिरे ॥ पंक्तिः ॥

॥ ८६ ॥ वि हि सोतोरसृक्षत नेंद्रं देवमंमंसत। यत्रामंदद्वृषाकंपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिंद्र उत्तरः ॥ १ ॥ परा हींद्र धावंसि वृषाकंपेरति व्यथिः। नो अहु प्र विंदस्यन्यत्र सोमंपीतये विश्वस्मादिंद्र उत्तरः ॥ २ ॥ किमयं त्वां वृषाकपिश्चकार हरितो मृगः। यस्मा इरस्यसीदु न्व१र्यो वा पुष्टिमद्वसु विश्वस्मादिंद्र उत्तरः ॥ ३ ॥ यमिमं त्वं वृषाकपिं प्रियमिंद्राभिरक्षसि। श्वा न्वस्य जंभिषदपि कर्णे वराहयुर्विश्वस्मादिंद्र उत्तरः ॥ ४ ॥ प्रिया तृष्टानि मे कपिर्व्यक्ता व्यदूदुषत्। शिरो न्वस्य राविषं न सुगं दुष्कृते भुवं विश्वस्मादिंद्र उत्तरः ॥ ५ ॥ १ ॥ न मत्स्त्री सुभसत्तरा न सुयाशुतरा भुवत्। न मत्प्रतिच्यवीयसी न सक्थ्युद्यमीयसी विश्वस्मादिंद्र उत्तरः ॥ ६ ॥ उवे अंव सुलाभिके यथेवांग भविष्यति। भसन्मे अंव सक्थ्यं मे शिरो मे वीव ह्यति विश्वस्मादिंद्र उत्तरः ॥ ७ ॥ किं सुबाहो स्वंगुरे पृथुष्टो पृथुजाघने। किं शूरपत्नि नस्त्वमभ्यमीषि वृषाकपिं विश्वस्मादिंद्र उत्तरः ॥ ८ ॥ अवीरामिव मामयं शरारुरभि मन्यते। उताहमस्मि वीरिणींद्रपत्नी मरुत्सखा विश्वस्मादिंद्र उत्तरः ॥ ९ ॥ संहोत्रं स्म पुरा नारी समनं वावं गच्छति। वेधा ऋतस्य वीरिणींद्रपत्नी म-

धेहि मतिं एकादशं कृधि ॥४५॥ संऽराज्ञीं श्वशुरि भव संऽराज्ञीं श्वश्र्वां भव ननांदरि संऽराज्ञीं भव संऽराज्ञीं अधि देवृषु ॥४६॥ सं अंजंतु विश्वे देवाः सं आपः हृदयानि नौ सं मातरिश्वा सं धाता सं उ देष्ट्री दधातु नौ ॥४७॥२८॥३॥

॥८६॥ वि हि सोतोः असृक्षत न इंद्रं देवं अमंसत यत्र अमदत् वृषाकपिः अयेः पुत्रेषु मत्ऽसखा विश्वस्मात् इंद्रः उत्ऽतरः ॥१॥ परा हि इंद्र धावसि वृषाकपेः अति व्यथिः नो अहं प्र विंदसि अन्यत्र सोमऽपीतये विश्वस्मात् इंद्रः उत्ऽतरः॥२॥ किं अयं त्वां वृषाकपिः चकार हरितः मृगः यस्मिं इरस्यसि इत् उ नु अयेः वा पुष्टिऽमत् वसु विश्वस्मात् इंद्रः उत्ऽतरः॥३॥ यं इमं त्वं वृषाकपिं प्रियं इंद्र अभिऽरक्षसि श्वा नु अस्य जंभिषत् अपि कर्णे वराहऽयुः विश्वस्मात् इंद्रः उत्ऽतरः ॥४॥ प्रिया तृष्टानि मे कपिः विऽअंका वि अदूदुषत् शिरः नु अस्य राविषं न सुऽगं दुःऽकृते भुवं विश्वस्मात् इंद्रः उत्ऽतरः ॥५॥१॥ न मत् स्त्री सुभसत्ऽतरा न सुयाशुंऽतरा भुवत् न मत् प्रतिऽच्यवीयसी न सक्थ्यं उत्ऽयमीयसी विश्वस्मात् इंद्रः उत्ऽतरः॥६॥ उवे अंब सुलाभिके यथाऽइव अंग भविष्यति भसत् मे अंब सक्थ्यं मे शिरः मे विऽइव हृष्यति विश्वस्मात् इंद्रः उत्ऽतरः ॥७॥ किं सुऽवाहो॰ सुऽअंगुरे पृथुंऽस्रो॰ पृथुंऽजघने किं शूरऽपत्नि नः त्वं अभि अमीषि वृषाकपिं विश्वस्मात् इंद्रः उत्ऽतरः ॥८॥ अवीराँऽइव मां अयं शरारुः अभि मन्यते उत अहं अस्मि वीरिणी इंद्रऽपत्नी मरुत्ऽसखा विश्वस्मात् इंद्रः उत्ऽतरः॥९॥ संऽहोत्रं स्म पुरा नारी समनं वा अव गच्छति वेधाः ऋतस्य वीरिणी इंद्रऽपत्नी म-

हीयते विश्वस्मादिंद्र उत्तरः ॥१०॥२॥ इंद्राणीमासु नारिषु सुभगामहमश्रवं । नहास्या अपरं चन जरसा मरते पतिर्विश्वस्मादिंद्र उत्तरः ॥११॥ नाहमिंद्राणि रारण सख्युर्वृषाकपेर्ऋते । यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिंद्र उत्तरः ॥१२॥ वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे । घसत्त इंद्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिंद्र उत्तरः ॥१३॥ उक्षणो हि मे पंचदश साकं पचंति विंशतिं । उताहमद्मि पीव इदुभा कुक्षी पृणंति मे विश्वस्मादिंद्र उत्तरः ॥१४॥ वृषभो न तिग्मशृंगोऽन्तर्यूथेषु रोरुवत् । मंथस्तं इंद्र शं हृदे यं ते सुनोति भावयुर्विश्वस्मादिंद्र उत्तरः ॥१५॥३॥ न सेशे यस्य रंवतेऽन्तरा सक्थ्या३ कपर्दम् । सेदीशे यस्य रोमशं निषेदुषो विजृंभते विश्वस्मादिंद्र उत्तरः ॥१६॥ न सेशे यस्य रोमशं निषेदुषो विजृंभते । सेदीशे यस्य रंवतेऽन्तरा सक्थ्या३ कपर्दद्विश्वस्मादिंद्र उत्तरः ॥१७॥ अयमिंद्र वृषाकपिः परस्वंतं हतं विंदत् । असिं सूनां नवं चरुमादेधस्यान् अचितं विश्वस्मादिंद्र उत्तरः ॥१८॥ अयमेमि विचाकशद्विचिन्वन्दासमार्यं । पिबामि पाकसुत्वनोऽभि धीरमचाकशं विश्वस्मादिंद्र उत्तरः ॥१९॥ धन्व च यत्कृतं च कतिं स्वित्ता वि योजना । नेदीयसो वृषाकपेऽस्तमेहि गृहाँ उप विश्वस्मादिंद्र उत्तरः ॥२०॥ पुनरेहि वृषाकपे सुविता कल्पयावहै । य एषः स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिंद्र उत्तरः ॥२१॥ यदुदंचो वृषाकपे गृहमिंद्राजगंतन । क्व१स्य पुत्रधो मृगः कमगञ्जन्योपनो विश्वस्मादिंद्र उत्तरः ॥२२॥ पर्शुर्ह नाम मानवी साकं स-

हीयते विश्वस्मात् इंद्रः उत्ऽतरः ॥१०॥२॥ इंद्राणीं आसु नारिषु सुऽभगां अहं अश्रवं नहि अस्याः अपरं चन जरसा मरते पतिः विश्वस्मात् इंद्रः उत्ऽतरः ॥११॥ न अहं इंद्राणि रारण सख्युः वृषाकपेः ऋते यस्य इदं अप्यं हविः प्रियं देवेषु गच्छति विश्वस्मात् इंद्रः उत्ऽतरः ॥१२॥ वृषाकपायि रेवति सुऽपुत्रे आत् ऊं सुऽस्नुषे घसत् ते इंद्रः उक्षणः प्रियं काचित्ऽकरं हविः विश्वस्मात् इंद्रः उत्ऽतरः॥१३॥ उक्षणः हि मे पंचऽदश साकं पचंति विंशतिं उत अहं अभि पीवः इत् उभा कुक्षी' पृणंति मे विश्वस्मात् इंद्रः उत्ऽतरः॥१४॥ वृषभः न तिग्मऽशृंगः अंतः यूथेषु रोरुवत् मंथः ते इंद्र शं हृदे यं ते सुनोति भावयुः विश्वस्मात् इंद्रः उत्ऽतरः॥१५॥ ॥३॥ न सः ईशे यस्य रंवते अंतरा सक्थ्या कपृत् सः इत् ईशे यस्य रोमशं निऽसेदुषः विऽजृंभते विश्वस्मात् इंद्रः उत्ऽतरः॥१६॥ न सः ईशे यस्य रोमशं निऽसेदुषः विऽजृंभते सः इत् ईशे यस्य रंवते अंतरा सक्थ्या कपृत् विश्वस्मात् इंद्रः उत्ऽतरः॥१७॥ अयं इंद्र वृषाकपिः परस्वंतं हतं विदत् असिं सूनां नवं चरुं आत् एधस्य अनः आऽचितं विश्वस्मात् इंद्रः उत्ऽतरः॥१८॥ अयं एमि विऽचाकशत् विऽचिन्वन् दासं आर्यं पिबामि पाकऽसुत्वनः अभि धीरं अचाकशं विश्वस्मात् इंद्रः उत्ऽतरः॥१९॥ धन्वं च यत् कृंतत्रं च कतिं स्वित् ता वि योजना नेदीयसः वृषाकपे अस्तं आ इहि गृहान् उप विश्वस्मात् इंद्रः उत्ऽतरः ॥२०॥ पुनः आ इहि वृषाकपे सुविता कल्पयावहै यः एषः स्वप्नऽनंशनः अस्तं एषि पथा पुनः विश्वस्मात् इंद्रः उत्ऽतरः॥२१॥ यत् उदंचः वृषाकपे गृहं इंद्र अजगंतन कं स्यः पुत्रऽघः मृगः कं अगन् जनऽयोपनः विश्वस्मात् इंद्रः उत्ऽतरः॥२२॥ पश्युः ह नाम मानवी साकं सू-

सूव विंशतिं। भद्रं भल त्यस्या अभूद्यस्या उदरमामंयद्विश्वस्मा-दिंदु उत्तरः ॥२३॥४॥

॥ ८७ ॥ १–२५ मायुः ॥ अग्नी रक्षोहा ॥ १–२१ त्रिष्टुप्। २२–२५ अनुष्टुप् ॥

॥८७॥ रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्टमुपं यामि शर्म। शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तं॥१॥ अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेदः समिद्धः। आ जिह्वया मूरदेवान्भस्व क्रव्यादो वृक्त्वपि धत्स्वासन् ॥२॥ उभोभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं च। उतांतरिक्षे परि याहि राजञ्जंभैः सं धेह्यभि यातुधानान् ॥३॥ यज्ञैरिषूः संनमंमानो अग्ने वाचा शल्यां अशनिभिर्दिहानः। ताभिर्विध्य हृदये यातुधानान्प्रतीचो बाहून्प्रति भङ्ध्येषां ॥४॥ अग्ने त्वचं यातुधानस्य भिंधि हिंस्राशनिर्हरसा हंत्वेनं। प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णं ॥५॥५॥ यत्रेदानीं पश्यंसि जातवेदस्तिष्ठंतमग्न उत वा चरंतं। यद्वांतरिक्षे पथिभिः पतंतं तमस्तां विध्य शर्वा शिशानः ॥६॥ उतालब्धं स्पृणुहि जातवेद आलेभानादृष्टिभिर्यातुधानात्। अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विंकास्तमदंत्वेनीः ॥७॥ इह प्र ब्रूहि यतमः सो अग्ने यो यातुधानो य इदं कृणोति। तमा रभस्व समिधा यविष्ठ नृचक्षंसश्चक्षुषे रंधयैनं ॥८॥ तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञं प्राचीं वसुभ्यः प्र णय प्रचेतः। हिंस्रं रक्षांस्यभि शोशुचानं मा त्वा दभन्यातुधानां नृचक्षः ॥९॥ नृचक्षा रक्षः परि पश्य विक्षु तस्य त्रीणि प्रति शृणीह्यग्ने। तस्याग्ने पृष्टीर्हरसा शृणीहि चेधा

सूव विंशतिं भद्रं भल् त्यस्यै अभूत् यस्याः उदरं आमंयत् विश्वस्मात् इंद्रः उत्ऽतरः॥२३॥४॥

॥८७॥ रक्षःऽहनं वाजिनं आ जिघर्मि मित्रं प्रथिष्टं उपं यामि शर्म शिशानः अग्निः क्रतुंऽभिः संऽइद्धः सः नः दिवा सः रिषः पातु नक्तं॥१॥ अयःऽदंष्ट्रः अर्चिषा यातुऽधानान् उप स्पृश जातऽवेदः संऽइद्धः आ जिह्वया मूरऽदेवान् रभस्व क्रव्यऽअदः वृक्षी अपि धत्स्व आसन्॥२॥ उभा उभयाविन् उप धेहि दंष्ट्रा हिंस्रः शिशानः अवरं परं च उत अंतरिक्षे परि याहि राजन् जंभैः सं धेहि अभि यातुऽधानान्॥३॥ यज्ञैः इषूः संऽनमंमानः अग्ने वाचा शल्यान् अशनिंऽभिः दिहानः ताभिः विध्य हृदये यातुऽधानान् प्रतीचः बाहून् प्रति भङ्धि एषां॥४॥ अग्ने त्वचं यातुऽधानस्य भिंधि हिंस्राः अशनिः हरसा हंतु एनं प्र पर्वाणि जातऽवेदः शृणीहि क्रव्यऽअत् क्रविष्णुः वि चिनोतु वृक्णं॥५॥ ॥५॥ यत्ं इदानीं पश्यसि जातऽवेदः तिष्ठंतं अग्ने उत वा चरंतं यत् वा अंतरिक्षे पथिऽभिः पतंतं तं अस्तां विध्य शर्वा शिशानः॥६॥ उत आऽलंब्यं स्पृणुहि जातऽवेदः आऽलेभानात् ऋष्टिऽभिः यातुऽधानात् अग्ने पूर्वैः नि जहि शोशुचानः आमऽअदः क्विंकाः तं अदंतु एनीः॥७॥ इह प्र ब्रूहि यतमः सः अग्ने यः यातुऽधानः यः इदं कृणोति तं आ रभस्व संऽइधा यविष्ठ नृऽचक्षसः चक्षुषे रंधय एनं॥८॥ तीक्ष्णेन अग्ने चक्षुषा रक्ष यज्ञं नः च वसुंऽभ्यः प्र नय प्रऽचेतः॰ हिंस्रं रक्षांसि अभि शोशुचानं मा त्वा दभन् यातुऽधानाः नृऽचक्षः॥९॥ नृऽचक्षाः रक्षः परि पश्य विक्षु तस्य चीर्णिं प्रति शृणीहि अर्या तस्य अग्ने पृष्टीः हरसा शृणीहि चेधा

मूलं यातुधानस्य वृश्च ॥ १० ॥ ६ ॥ चिर्योतुधानः प्रसितिं त एतृतं यो अग्ने अनृतेन हंति । तमर्चिषा स्फूर्जेयज्जातवेदः समक्षमेनं गृणते नि वृङ्धि ॥ ११ ॥ तदग्ने चक्षुः प्रति धेहि रेभे शफारुजं येन पश्यसि यातुधानं । अथर्ववज्ज्योतिषा दैव्येन सत्यं धूर्वंतमचितं न्योष ॥ १२ ॥ यदग्ने अद्य मिथुना शपांतो यद्वाचस्तृष्टं जनयंत रेभाः । मन्योर्मनसः शरव्या३जायंते या तया विध्य हृदये यातुधानान् ॥ १३ ॥ परा शृणीहि तपसा यातुधानान्पराग्ने रक्षो हरसा शृणीहि । परार्चिषा मूरदेवाञ्छृणीहि परासुतृपो अभि शोशुचानः ॥ १४ ॥ पराद्य देवा वृजिनं शृणंतु प्रत्यगेनं शपथा यंतु तृष्टाः । वाचास्तेनं शरव ऋच्छंतु मर्मन्विश्वस्येतु प्रसितिं यातुधानः ॥ १५ ॥ ७ ॥ यः पौरुषेयेण क्रविषा समंक्ते यो अश्वेन पशुना यातुधानः । यो अघ्न्याया भरति क्षीरमग्ने तेषां शीर्षाणि हरसापि वृश्च ॥ १६ ॥ संवत्सरीणं पय उस्रियायास्तस्य माशीद्यातुधानो नृचक्षः । पीयूषमग्ने यतमस्तितृप्सात्तं प्रत्यंचमर्चिषा विध्य मर्मन् ॥ १७ ॥ विषं गवां यातुधानाः पिबंत्वा वृश्चंतामदितये दुरेवाः । पैरेनान्देवः सविता ददातु परा भागमोषधीनां जयंतां ॥ १८ ॥ सुनादग्ने मृणसि यातुधानान्न त्वा रक्षांसि पृतनासु जिग्युः । अनु दह सहमूरान्क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥ १९ ॥ त्वं नो अग्ने अधरादुदक्तात्त्वं पश्चादुत रक्षा पुरस्तात् । प्रति ते ते अजरासस्तपिष्ठा अघशंसं शोशुचतो दहंतु ॥ २० ॥ ८ ॥ पश्चात्पुरस्तादधरादुदक्तात्कविः काव्येन परि पाहि राजन् । सखे सखायमजरो जरिम्णेऽग्ने मर्ताँ अमर्त्यस्त्वं नः ॥ २१ ॥ परि त्वाग्ने पुरं वयं विप्रं

मूलं यातुऽधानस्य वृश्च ॥१०॥६॥ चिः यातुऽधानः प्रऽसितिं ते एतु कृतं यः अग्ने अनृतेन हंति तं अर्चिषा स्फूर्जयन् जातुऽवेदः संऽअक्षं एनं गृणते नि वृङ्धि ॥११॥ तत् अग्ने चक्षुः प्रति धेहि रेभे शफऽआरुजे येन पश्यसि यातुऽधानं अथर्वऽवत् ज्योतिषा दैव्येन सत्यं धूर्वंतं अचितं नि ओष ॥१२॥ यत् अग्ने अद्य मिथुना शपातः यत् वाचः तूष्णीं जनयंत रेभाः मन्योः मनसः शरव्या जायते या तया विध्य हृदये यातुऽधानान् ॥१३॥ परा शृणीहि तपसा यातुऽधानान् परा अग्ने रक्षः हरसा शृणीहि परा अर्चिषा मूरऽदेवान् शृणीहि परा असुऽनृपः अभि शोशुचानः ॥१४॥ परा अद्य देवाः वृजिनं शृणंतु प्रत्यक् एनं शपथाः यंतु तृष्टाः वाचाऽस्तेनं शरवः ऋच्छंतु मर्मन् विश्वस्य एतु प्रऽसितिं यातुऽधानः ॥१५॥७॥ यः पौरुषेयेण क्रविषा संऽअक्ते यः अश्वेन पशुना यातुऽधानः यः अघ्न्यायाः भरति क्षीरं अग्ने तेषां शीर्षाणि हरसा अपि वृश्च ॥१६॥ संवत्सरीणं पयः उस्रियायाः तस्य मा अशीत् यातुऽधानः नृऽचक्षः पीयूषं अग्ने यतमः तितृप्सात् तं प्रत्यंचं अर्चिषा विध्य मर्मन् ॥१७॥ विषं गवां यातुऽधानाः पिबंतु आ वृश्चंतां अदितये दुःऽएवाः परा एनान् देवः सविता ददातु परा भागं ओषधीनां जयंतां ॥१८॥ सनात् अग्ने मृणसि यातुऽधानान् न त्वा रक्षांसि पृतनासु जिग्युः अनु दह सहऽमूरान् क्रव्यऽअदः मा ते हेत्याः मुक्षत दैव्यायाः ॥१९॥ त्वं नः अग्ने अधरात् उदक्तात् त्वं पश्चात् उत रक्ष पुरस्तात् प्रति ते ते अजरासः तपिष्ठाः अघऽशंसं शोशुचतः दहंतु ॥२०॥८॥ पश्चात् पुरस्तात् अधरात् उदक्तात् कविः काव्येन परि पाहि राजन् सखे सखायं अजरः जरिम्णे अग्ने मतीन् अमर्त्यः त्वं नः ॥२१॥ परि त्वा अग्ने पुरं वयं विप्रं

सहस्य धीमहि। धृषद्वर्णं दिवेदिवे हंतारं भंगुरावतां ॥२२॥ विषेणं भंगुरावतः प्रतिं ष्म रक्षसो दह। अग्ने तिग्मेन शोचिषा तपुरग्राभिर्ऋष्टिभिः ॥२३॥ प्रत्यग्ने मिथुना दंह यातुधानां किमीदिना। सं त्वा शिशामि जागृह्यदब्धं विप्र मन्मभिः ॥२४॥ प्रत्यग्ने हरसा हरः शृणीहि विश्वतः प्रतिं। यातुधानस्य रक्षसो बलं वि रुज वीर्यं ॥२५॥९॥

॥ ८८ ॥ १–१९ मूर्धन्वानांगिरसो वामदेव्यो वा ॥ सूर्यवैश्वानरौ ॥ त्रिष्टुप् ॥

॥ ८८ ॥ हविष्पांतमजरं स्वर्विदिं दिविस्पृश्याहुतं जुष्टमग्नौ। तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथंत ॥१॥ गीर्णं भुवनं तमसापगूळ्हमाविः स्वरभवज्जाते अग्नौ। तस्य देवाः पृथिवी द्यौरुतापोऽरण्यन्नोषधीः सख्ये अस्य ॥२॥ देवेभिर्न्विपितो यज्ञियेभिरग्निं स्तोषाण्यजरं बृहंतं। यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अंतरिक्षं ॥३॥ यो होतासीत्प्रथमो देवजुष्टो यं समांजन्नाज्येना वृणानाः। स पत्नीवंरं स्या जगद्यच्छ्वाचमग्निरकृणोज्जातवेदाः ॥४॥ यज्जातवेदो भुवनस्य मूर्धन्नतिष्ठो अग्ने सह रोचनेन। तं त्वाहेम मतिभिर्गीर्भिरुक्थैः स यज्ञियो अभवो रोदसिप्राः ॥५॥१०॥ मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन्। मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन् ॥६॥ हृशेन्यो यो महिना समिद्धोऽरोचत दिवियोनिर्विभावा। तस्मिन्नग्नौ सूक्तवाकेन देवा हविर्विश्व आजुहवुस्तनूपाः ॥७॥ सूक्तवाकं प्रथममादिदग्निमादिद्धविरजनयंत देवाः। स एषां यज्ञो अभवत्तनूपास्तं द्यौर्वेद तं पृथिवी तमापः ॥८॥ यं दे-

सहस्य धीमहि धृषत्ऽवर्णं दिवेऽदिवे हंतारं भंगुरऽवतां॥२२॥ विषेण भंगुरऽवतः प्रति स्म रक्षसः दह अग्ने तिग्मेन शोचिषा तपुःऽअग्राभिः ऋष्टिऽभिः॥२३॥ प्रति अग्ने मिथुना दह यातुऽधानां किमीदिनां सं त्वा शिशामि जागृहि अदब्धं विप्र मन्मऽभिः॥२४॥ प्रति अग्ने हरसा हरः शृणीहि विश्वतः प्रति यातुऽधानस्य रक्षसः बलं वि रुज वीर्यं॥२५॥९॥

॥८८॥ हविः पांतं अजरं स्वःऽविदिं दिविऽस्पृशं आऽहुतं जुष्टं अग्नौ तस्य भर्मणे भुवनाय देवाः धर्मणे कं स्वधया पप्रथंत॥१॥ गीर्णं भुवनं तमसा अपऽगूळ्हं आविः स्वः अभवत् जाते अग्नौ तस्य देवाः पृथिवी द्यौः उत आपः अरंणयन् ओषधीः सख्ये अस्य॥२॥ देवेभिः नु इषितः यज्ञियेभिः अग्निं स्तोषाणि अजरं बृहंतं यः भानुना पृथिवीं द्यां उत इमां आऽततान रोदसी अंतरिक्षं॥३॥ यः होता आसीत् प्रथमः देवऽजुष्टः यं संऽआंजन् आज्येन वृणानाः सः पतचि इत्वरं स्याः जगत् यत् स्वाचं अग्निः अकृणोत् जातऽवेदाः॥४॥ यत् जातऽवेदः भुवनस्य मूर्धन् अतिष्ठः अग्ने सह रोचनेन तं त्वा अहेम मतिऽभिः गीःऽभिः उक्थैः सः यज्ञियः अभवः रोदसिऽप्राः॥५॥१०॥ मूर्धा भुवः भवति नक्तं अग्निः ततः सूर्यः जायते प्रातः उत्ऽयन् मायां ऊं तु यज्ञियानां एतां अपः यत् नूर्णिः चरंति प्रऽजानन्॥६॥ इडेन्यः यः महिना संऽइद्धः अरोचत दिविऽयोनिः विभाऽवा तस्मिन् अग्नौ सूक्तऽवाकेन देवाः हविः विश्वे आ अजुहवुः तनूऽपाः॥७॥ सूक्तऽवाकं प्रथमं आत् इत् अग्निं आत् इत् हविः अजनयंत देवाः सः एषां यज्ञः अभवत् तनूऽपाः तं द्यौः वेद तं पृथिवी तं आपः॥८॥ यं दे-

वासोऽजनयंताग्निं यस्मिन्नाजुहवुर्भुवनानि विश्वा । सो अर्चिषा पृथिवीं द्यामुतेमामृजूयमानो अतपन्महित्वा ॥९॥ स्तोमेन हि दिवि देवासो अग्निमजीजनञ्छक्तिभी रोदसिप्रां । तमू अकृण्वन् त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः ॥१०॥११॥ यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयं । यदा चरिष्णू मिथुनावभूतामादिन्मापश्यन्भुवनानि विश्वा ॥११॥ विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन् । आ यस्तताने उषसो विभातीरपो ऊर्णोति तमो अर्चिषा यन् ॥१२॥ वैश्वानरं कवयो यज्ञियासोऽग्निं देवा अजनयन्नजुर्यं । नक्षत्रं प्रत्नममिनच्चरिष्णु यक्षस्याध्यक्षं तविषं बृहंतं ॥१३॥ वैश्वानरं विश्वहा दीदिवांसं मंचैरग्निं कविमच्छा वदामः । यो महिम्ना परिबभूवोर्वी उतावस्तादुत देवः परस्तात् ॥१४॥ द्वे स्रुती अशृणवं पितृणामहं देवानामुत मर्त्यानां । ताभ्यामिदं विश्वमेजत्समेति यदंतरा पितरं मातरं च ॥१५॥१२॥ द्वे संमीची बिभृतश्चरंतं शीर्षतो जातं मनसा विमृष्टं । स प्रत्यङ्विश्वा भुवनानि तस्थावप्रयुच्छन्तरणिर्भ्राजमानः ॥१६॥ यच्चा यदंते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद । आ शेकुरित्सधमादं सखायो नक्षंत यज्ञं क इदं वि वोचत् ॥१७॥ कत्यग्नयः कति सूर्यासः कत्युषासः कत्वु स्विदापः । नोपस्पिजं वः पितरो वदामि पृच्छामि वः कवयो विद्मने कं ॥१८॥ यावन्माचमुषसो न प्रतीकं सुपर्ण्योऽवसते मातरिश्वः । तावद्दधात्युप यज्ञमायन्ब्राह्मणो होतुरवरो निषीदन् ॥१९॥१३॥

वासः अजनयंत अग्निं यस्मिन् आ अजुहवुः भुवनानि विश्वा सः अर्चिषा पृथिवीं द्यां उत इमां ऋजुः अयमानः अतपत् महि-ऽत्वा॥९॥ स्तोमेन हि दिवि देवासः अग्निं अजीजनन् शक्तिऽभिः रोदसिऽप्रां तं ऊं अकृण्वन् त्रेधा भुवे कं सः ओषधीः पचति विश्वऽरूपाः॥१०॥११॥ यदा इत् एनं अदधुः यज्ञियासः दिवि देवाः सूर्ये आदितेयं यदा चरिष्णू मिथुनौ अभूतां आत् इत् प्र अपश्यन् भुवनानि विश्वा॥११॥ विश्वस्मै अग्निं भुवनाय देवाः वैश्वानरं केतुं अह्नां अकृण्वन् आ यः ततान उषसः विऽभातीः अपो ऊर्णोति तमः अर्चिषा यन्॥१२॥ वैश्वानरं कवयः यज्ञियासः अग्निं देवाः अजनयन् अजुर्यं नक्षत्रं प्रत्नं अमिनत् चरिष्णु यक्षस्य अधिऽअक्षं तविषं बृहंतं॥१३॥ वैश्वानरं विश्वहा दीदिऽवांसं मंत्रैः अग्निं कविं अच्छ वदामः यः महिम्ना परिऽबभूव उर्वी उत अवस्तात् उत देवः परस्तात्॥१४॥ द्वे सुती अशृणवं पितॄणां अहं देवानां उत मर्त्यानां ताभ्यां इदं विश्वं एजत् सं एति यत् अं-तरा पितरं मातरं च॥१५॥१२॥ द्वे संऽईची० विभृतः चरंतं शीर्ष-तः जातं मनसा विऽमृष्टं सः प्रत्यङ् विश्वा भुवनानि तस्थौ अग्रेऽयुञ्जन् तरणिं भ्राजमानः॥१६॥ यत्र वदंते अवरः परः च यज्ञऽन्योः कतरः नौ वि वेद आ शेकुः इत् सधऽमादं सखायः न-क्षंत यज्ञं कः इदं वि वोचत्॥१७॥ कति अग्नयः कति सूर्यासः कति उषसः कति ऊं स्वित् आपः न उपऽस्पिजं वः पितरः वदामि पृच्छामि वः कवयः विद्मनेषं कं॥१८॥ यावत्ऽमात्रं उषसः न प्र-तीकं सुऽपर्ण्यः वसते मातरिश्वः तावत् दधाति उपमं यज्ञं आऽयन् ब्राह्मणः होतुः अवरः निऽसीदन्॥१९॥१३॥

॥ ८९ ॥ १–१८ रेणुः ॥ १–४. ६–१८ इंद्रः । ५ इंद्रासोमौ ॥ त्रिष्टुप् ॥

॥ ८९ ॥ इंद्रं स्तवा नृतमं यस्य मह्ना विबबाधे रोचना वि ज्मो अंतान्। आ यः पप्रौ चर्षणीधृद्वरोभिः प्र सिंधुभ्यो रिरिचानो महित्वा ॥ १ ॥ स सूर्यः पर्युरू वरांस्येंद्रो ववृत्याद्रथ्येव चक्रा। अतिष्ठंतमपस्यं न सर्गं कृष्णा तमांसि त्विषा जघान ॥ २ ॥ समानमस्मा अनपावृदर्चे क्ष्मया दिवो असमं बर्ह नर्यं। वि यः पृथिव्व जनिमान्यर्य इंद्रश्चिकाय न सखायमीषे ॥ ३ ॥ इंद्राय गिरो अनिशितसर्गा अपः प्रेरयं सगरस्य बुध्नात्। यो अक्षेणेव चक्रिया शचीभिर्विष्वक्तस्तंभ पृथिवीमुत द्यां ॥ ४ ॥ आपाँतमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी। सोमो विश्वान्यतसा वनानि नावाचिंद्रं प्रतिमानानि देभुः ॥ ५ ॥ १४ ॥ न यस्य द्यावापृथिवी न धन्व नांतरिक्षं नाद्रयः सोमो अक्षाः। यदस्य मन्युरधिनीयमानः शृणाति वीळु रुजति स्थिराणि ॥ ६ ॥ जघान वृत्रं स्वधितिर्वनेव रुरोज पुरो अरदन्न सिंधून्। विभेद गिरिं नवमिन्न कुंभमा गा इंद्रो अकृणुत स्वयुग्भिः ॥ ७ ॥ त्वं ह त्यदृणया इंद्र धीरोऽसिन्ने पर्वं वृजिना शृणासि। प्र ये मित्रस्य वरुणस्य धाम युजं न जना मिनंति मित्रं ॥ ८ ॥ प्र ये मित्रं प्रार्यमणं दुरेवाः प्र संगिरः प्र वरुणं मिनंति। न्य१मित्रेषु वधमिंद्र तुम्रं वृषन्वृषाणमस्वं शिशीहि ॥ ९ ॥ इंद्रो दिव इंद्र ईशे पृथिव्या इंद्रो अपामिंद्र इत्पर्वतानां। इंद्रो वृधामिंद्र इन्मेधिराणामिंद्रः क्षेमे योगे हव्य इंद्रः ॥ १० ॥ १५ ॥ प्राकृव्य इंद्रः प्र वृधो अहंभ्यः प्रांतरिक्षात्प्र समुद्रस्य धासेः। प्र वातस्य प्रथसः प्रज्मो अंतात्प्र सिंधुभ्यो रिरिचे प्र क्षितिभ्यः ॥ ११ ॥ प्र शोशुचत्या उषसो न केतुरस्न्वा तें वर्तनामिंद्र हेतिः। अश्मे-

॥८९॥ इंद्रं स्तव नृतमं यस्य महा विबबाधे रोचना वि ज्मः अंतान् आ यः पप्रौ चर्षणिधृत् वरः अभिः प्र सिंधुभ्यः रिरिचानः महित्वा ॥१॥ सः सूर्यः परि उरू वरांसि आ इंद्रः ववृत्यात् रथ्या इव चक्रा अतिष्ठंतं अपस्यं न सर्गं कृष्णा तमांसि त्विषा जघान ॥२॥ समानं अस्मै अनपवृत् अर्चे क्षमया दिवः असमं मह्ने नव्यै वि यः पृष्ठाइव जनिमानि अर्यः इंद्रः चिकाय न सखायं ईषे ॥३॥ इंद्राय गिरः अनिशितसर्गाः अपः प्र ईरय सगरस्य बुध्नात् यः अक्षेणइव चक्रिया शचीभिः विष्वक्तस्तंभ पृथिवीं उत द्यां ॥४॥ आपांतमन्युः तृपलप्रभर्मा धुनिः शिमीवान् शरुमान् ऋजीषी सोमः विश्वानि अत्सा वनानि न अर्वाक् इंद्रं प्रतिमानानि देभुः ॥५॥१४॥ न यस्य द्यावापृथिवी न धन्व न अंतरिक्षं न अद्रयः सोमः अक्षाः यत् अस्य मन्युः अधिनीयमानः शृणाति वीळु रुजति स्थिराणि ॥६॥ जघान वृत्रं स्वधितिः वनाइव रुरोज पुरः अरदत् न सिंधून् विभेद गिरिं नवं इत् न कुंभं आ गाः इंद्रः अकृणुत स्वयुक्भिः ॥७॥ त्वं ह त्यत् ऋणयाः इंद्र धीरः असिः न पर्व वृजिना शृणासि प्र ये मित्रस्य वरुणस्य धामं युजं न जनाः मिनंति मित्रं ॥८॥ प्र ये मित्रं प्र अर्यमणं दुःएवाः प्र संगिरः प्र वरुणं मिनंति नि शुमित्रेषु दधं इंद्र तुभ्यं वृषन् वृषाणं अरुषं शिशीहि ॥९॥ इंद्रः दिवः इंद्रः ईशे पृथिव्याः इंद्रः अपां इंद्रः इत् पर्वतानां इंद्रः वृधां इंद्रः इत् मेधिराणां इंद्रः क्षेमे योगे हव्यः इंद्रः ॥१०॥१५॥ प्र अक्रुडभ्यः इंद्रः प्र वृधः अहंडभ्यः प्र अंतरिक्षात् प्र समुद्रस्य धासेः प्र वातस्य प्रथसः प्र ज्मः अंतात् प्र सिंधुभ्यः रिरिचे प्र क्षितिडभ्यः ॥११॥ प्र शोशुचत्याः उषसः न केतुः असिन्वाने वर्तता इंद्र हेतिः अयमाः

व विध्य दिव आ सृजानस्तपिष्ठेन हेषसा द्रोघमित्रान् ॥१२॥ अन्वह मासा अन्विद्दनान्यन्वोषधीरनु पर्वतासः। अन्विंद्रं रोदसी वावशाने अन्वापो अजिहत जायमानं ॥१३॥ कहिं स्वित्सा तं इंद्र चेत्यासदधस्य यद्विनदो रघ्र एषत्। मिचक्रुवो यच्छसने न गावः पृथिव्या आपृगमुया शयंते ॥१४॥ शचूयंतो अभि ये नंस्तत्ते महि व्राधंत ओगणासं इंद्र। अंधेनामित्रास्तमसा सचंतां सुज्योतिषो अक्तवस्ताँ अभि ष्युः ॥१५॥ पुरूणि हि त्वा सवना जनानां ब्रह्माणि मंदंग्गृणतामृषीणां। इमामाघोषन्नवसा सहूतिं तिरो विश्वाँ अर्चतो याह्यर्वाङ् ॥१६॥ एवा ते वयमिंद्र भुंजतीनां विद्याम सुमतीनां नवानां। विद्याम वस्तोरवसा गृणंतो विश्वामित्रा उत त इंद्र नूनं ॥१७॥ शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं वाजसातौ। शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां ॥१८॥१६॥

॥ ९० ॥ १–१६ नारायणः ॥ पुरुषः ॥ १–१५ अनुष्टुप् । १६ त्रिष्टुप् ॥

॥ ९० ॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलं ॥१॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं। उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥ एतावानस्य महिमातो ज्यायांश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः। ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥४॥ तस्माद्विराळजायत विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥१७॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत।

ऽइव विध्य दिवः आ सृजानः तपिष्टेन हेषसा द्रोघऽमित्रान्॥१२॥ अनु अहं मासाः अनु इत् वनानि अनु ओषधीः अनु पर्वतासः अनु इंद्रं रोदसी वावशाने अनु आपः अजिहत जायमानं ॥१३॥ कहि स्वित् सा ते इंद्र चेत्या असत् अघस्य यत् भिनदः रक्षः आऽईपत् मिचऽक्रुवः यत् शसने न गावः पृथिव्याः आऽपृक् असुया शयंते॥१४॥ शचुऽयंतः अभि ये नः ततस्रे महि व्राधंतः ओगणासः इंद्र अधेनं अमित्राः तमसा सचंतां सुऽज्योतिषः अक्रुवः तान् अभि स्युः०॥१५॥ पुरूणि हि त्वा सवना जनानां ब्रह्माणि मंदन् गृणतां ऋषीणां द्रुमा आऽघोषन् अवसा सऽहूतिं तिरः विश्वान् अर्चतः याहि अर्वाङ्॥१६॥ एव ते वयं इंद्र भुंजतीनां विद्याम सुऽमतीनां नवानां विद्याम वस्तोः अवसा गृणंतः विश्वामित्राः उत ते इंद्र नूनं॥१७॥ शुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं वाजऽसातौ शृण्वंतं उग्रं ऊतये समत्ऽसु भवंतं वृत्राणि संऽजितं धनानां॥१८॥१६॥

॥९०॥ सहस्रऽशीर्षा पुरुषः सहस्रऽअक्षः सहस्रऽपात् सः भूमिं विश्वतः वृत्वा अति अतिष्ठत् दशऽअंगुलं॥१॥ पुरुषः एव इदं सर्वं यत् भूतं यत् च भव्यं उत अमृतऽत्वस्य ईशानः यत् अन्नेन अतिऽरोहति॥२॥ एतावान् अस्य महिमा अतः ज्यायान् च पुरुषः पादः अस्य विश्वा भूतानि विऽपात् अस्य अमृतं दिवि॥३॥ विऽपात् ऊर्ध्वः उत् ऐत् पुरुषः पादः अस्य इह अभवत् पुनः ततः विष्वङ् वि अक्रामत् साशनानशने अभि॥४॥ तस्मात् विऽराट् अजायत विऽराजः अधि पुरुषः सः जातः अति अरिच्यत पश्चात् भूमिं अथो पुरः॥५॥१७॥ यत् पुरुषेण हविषा देवाः यज्ञं अतन्वत

वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ ६ ॥ तं यज्ञं ब-र्हिषि प्रौक्षन्पुरुषं जातमग्रतः । तेन देवा अयजंत साध्या ऋष-यश्च ये ॥ ७ ॥ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं । पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥ ८ ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ९ ॥ तस्मादश्वा अजायंत ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ १० ॥ १८ ॥ यत्पुरुषं व्यदधुः क-तिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥ ११ ॥ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ १२ ॥ चंद्रमा मनसो जा-तश्चक्षोः सूर्यो अजायत । मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ १३ ॥ नाभ्या आसीदंतरिक्षं शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना अबध्न-न्पुरुषं पशुं ॥ १५ ॥ यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथ-मान्यासन् । ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः ॥ १६ ॥ १९ ॥ ७ ॥

॥ ९१ ॥ १–१५ अरुणो वैतहव्यः ॥ अग्निः ॥ १–१४ भगती । १५ त्रिष्टुप् ॥

॥ ९१ ॥ सं जागृवद्भिर्जरमाण इध्यते दमे दमूना दुव-यन्विक्ष्वग्निदे । विश्वस्य होता हविषो वरेण्यो विभुर्वि-भावा सुषखा सखीयते ॥ १ ॥ स दर्शतश्रीरतिथिर्गृहेगृहे वनेवने शिश्रिये तक्ववीरिव । जनेजनं जन्यो नाति मन्यते विश आ क्षेति विश्पतिर्विशंविशं ॥ २ ॥ सुदक्षो दक्षैः क्रतुना-

वसंतः अस्य आसीत् आज्यं ग्रीष्मः इध्म शरत् हविः॥६॥ तं यज्ञं बर्हिषि प्र औक्षन् पुरुषं जातं अग्रतः तेन देवाः अयजंत साध्याः ऋषयः च ये॥७॥ तस्मात् यज्ञात् सर्वऽहुतः संऽभृतं पृषदाज्यं पशून् तान् चक्रे वायव्यान् आरण्यान् ग्राम्याः च ये॥८॥ तस्मात् यज्ञात् सर्वऽहुतः ऋचः सामानि जज्ञिरे छंदांसि जज्ञिरे तस्मात् यजुः तस्मात् अजायत॥९॥ तस्मात् अश्वाः अजायंत ये के च उभयादतः गावः ह जज्ञिरे तस्मात् तस्मात् जाताः अजावयः॥१०॥ ॥१८॥ यत् पुरुषं वि अदधुः कतिधा वि अकल्पयन् मुखं किं अस्य कौ बाहू कौ ऊरू पादौ उच्येते॥११॥ ब्राह्मणः अस्य मुखं आसीत् बाहू राजन्यः कृतः ऊरू तत् अस्य यत् वैश्यः पद्भ्यां शूद्रः अजायत॥१२॥ चंद्रमाः मनसः जातः चक्षोः सूर्यः अजायत मुखात् इंद्रः च अग्निः च प्राणात् वायुः अजायत॥१३॥ नाभ्याः आसीत् अंतरिक्षं शीर्ष्णः द्यौः सं अवर्तत पद्भ्यां भूमिः दिशः श्रोत्रात् तथा लोकान् अकल्पयन्॥१४॥ सप्त अस्य आसन् परिधयः त्रिः सप्त समिधः कृताः देवाः यत् यज्ञं तन्वानाः अबध्नन् पुरुषं पशुं॥१५॥ यज्ञेन यज्ञं अयजंत देवाः तानि धर्माणि प्रथमानि आसन् ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः॥१६॥१९॥७॥

॥९१॥ सं जागृवत्ऽभिः जरमाणः इध्यते दमे दमूनाः इषयन् इळः पदे विश्वस्य होता हविर्यः वरेण्यः विऽभुः विभाऽवा सुऽसखा सखिऽयते॥१॥ सः दर्शतऽश्रीः अतिथिः गृहेऽगृहे वनेऽवने शिश्रिये तक्ववीःऽइव जनेऽजनं जन्यः न अति मन्यते विशः आ क्षेति विश्यः विशेऽविशं॥२॥ सुऽदक्षः दक्षैः क्रतुना अ-

सि सुक्रतुरग्ने कविः काव्येनासि विश्ववित् । वसुर्वसूनां क्षयसि त्वमेक इद्यावा च यानि पृथिवी च पुष्यतः ॥३॥ प्रजानन्नग्ने तव योनिमृत्वियमिळायास्पदे घृतवन्तमासदः । आ त्वे चिकित्र उषसामिवेतयोऽरेपसः सूर्यस्येव रश्मयः ॥४॥ तव श्रियो वर्ष्यस्येव विद्युतश्चिकित्र उषसां न केतवः । यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमास्ये ॥५॥२०॥ तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयन्त मातरः । तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा ॥६॥ वातोपधूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे । आ ते यतन्ते रथ्यो३ यथा पृथक्शर्धांस्यग्ने अजराणि धक्षतः ॥७॥ मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतमं मतिं । तमिद्वेम हविषा समानमित्समिन्महे वृणते नान्यं त्वत् ॥८॥ त्वामिदत्र वृणते त्वायवो होतारमग्ने विदथेषु वेधसः । यद्ध्वयंतो दधति प्रयांसि ते हविष्मंतो मनवो वृक्तबर्हिषः ॥९॥ तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निदृतायतः । तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥१०॥ ॥२१॥ यस्तुभ्यमग्ने अमृताय मर्त्यः समिधा दाशदुत वा हविष्कृति । तस्य होता भवसि यासि दूत्यमुप ब्रुवे यजस्यध्वरीयसि ॥११॥ इमा अस्मै मतयो वाचो अस्मदाँ ऋचो गिरः सुष्टुतयः समग्मत । वसूयवो वसवे जातवेदसे वृद्धासु चिद्यवसेनो यासु चाकनन् ॥१२॥ इमां ब्रह्मणस्पतिं नवीयसीं वोचेयमस्मा उशते शृणोतु नः । भूया अन्तरा हृद्यस्य निष्पृचे जायेव पत्य उशती सुवासाः ॥१३॥ यस्मिन्ब्रह्मास

सि सुऽक्रतुः अग्ने कविः काव्येन असि विश्वऽवित् वसुः वसूनां क्षयसि त्वं एकः इत् द्यावा च यानि पृथिवी च पुष्यतः॥३॥ प्रऽजानन् अग्ने तव योनिं ऋत्वियं इळायाः पदे घृतऽवंतं आ असदः आ ते चिकित्रे उपसांऽइव एतयः अरेपसः सूर्यस्यऽइव रश्मयः॥४॥ तव श्रियः वर्पसःऽइव विऽद्युतः चिचाः चिकित्रे उपसां न केतवः यत् ओषधीः अभिऽसृष्टः वनानि च परि स्वयं चिनुषे अन्नं आस्ये॥५॥२०॥ तं ओषधीः दधिरे गर्भं ऋत्वियं तं आपः अग्निं जनयंत मातरः तं इत् समानं वनिनः च वीरुधः अंतःऽवंतीः च सुवते च विश्वहा॥६॥ वातऽउधूतः इषितः वशान् अनु तृषु यत् अन्नाः वेविषत् विऽतिष्ठसे आ ते यतंते रथ्यः यथा पृथक् शर्धांसि अग्ने अजराणि धक्षतः॥७॥ मेधाऽकारं विदथस्य प्रऽसाधनं अग्निं होतारं परिऽभूतमं मतिं तं इत् अभि हुविषा आ समानं इत् तं इत् महे वृणते न अन्यं त्वत्॥८॥ त्वां इत् अत्र वृणते त्वाऽयवः होतारं अग्ने विदथेषु वेधसः यत् देवऽयंतः दधति प्रयांसि ते हुविष्मंतः मनवः वृक्तऽबर्हिषः॥९॥ तव अग्ने होत्रं तव पोत्रं ऋत्वियं तव नेष्ट्रं त्वं अग्निt ऋतुऽयतः तव प्रऽशास्त्रं त्वं अध्वरिऽयसि ब्रह्मा च असि गृहऽपतिः च नः दमे॥१०॥२१॥ यः तुभ्यं अग्ने अमृताय मर्त्यः सं ऽइधा दाशत् उत वा हविःऽकृति तस्य होता भवसि यासि दूत्यं उप ब्रूषे यजसि अध्वरिऽयसि॥११॥ इमाः अस्मै मतयः वाचः अस्मत् आ ऋचः गिरः सुऽस्तुतयः सं अग्मत वसुऽयवः वसवे जातऽवेदसे वृद्धासु चित् वर्धनः यासु चाकनत्॥१२॥ इमां प्रत्नाय सुऽस्तुतिं नवीयसीं वोचेयं अस्मे उशते शृणोतु नः भूयाः अंतरा हृदि अस्य निऽस्पृशे जायाऽइव पत्ये उशती सुऽवासाः॥१३॥ यस्मिन् अश्वासः

ऋषभासं उक्षणो वृशा मेषा अवसृष्तास आहुताः। कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये ॥१४॥ अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः। वाजसनिं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तं ॥१५॥२२॥

॥ ९२ ॥ १–१५ शार्यातो मानवः ॥ विश्वे देवाः ॥ जगती ॥

॥९२॥ यज्ञस्य वो रथ्यं विश्पतिं विशां होतारमक्तोरतिथिं विभावसुं। शोचिष्केशं घृतनिर्णिजं विभुं रुद्रमध क्रतुर्यजतो द्यामशायत ॥१॥ द्रुममंजस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनं। अक्तुं न यह्वमुषसः पुरोहितं ननूनपातमरुषस्य निंसते ॥२॥ वळस्य नीथा वि पणेश्च मन्महे वया अस्य प्रहुता आसुरत्वे। यदा घोरासो अमृतत्वमाशतादिज्जनंस्य दैव्यस्य चर्किरन् ॥३॥ ऋतस्य हि प्रसितिर्द्यौरुरु व्यचो नमो मह्यरमतिः पनीयसी। इंद्रो मित्रो वरुणः सं चिकित्रिरेऽथो भगः सविता पूतदक्षसः ॥४॥ प्र रुद्रेण ययिना यंति सिंधवस्तिरो महीमरमतिं दधन्विरे। येभिः परिज्मा परियन्नुरु ज्रयो वि रोरुवज्जठरे विश्वमुक्षते ॥५॥२३॥ क्राणा रुद्रा मरुतो विश्वकृष्टयो दिवः श्येनासो असुरस्य नीळयः। तेभिश्चष्टे वरुणो मित्रो अर्यमेंद्रो देवेभिरर्वशेभिरर्वशः ॥६॥ इंद्रे भुजं शशमानासं आशत सूरो दृशीके वृषणश्च पौंस्ये। प्र ये न्वस्यार्हणा ततक्षिरे युजं वज्रं नृषदनेषु कारवः ॥७॥ सूरश्चिदा हरितो अस्य रीरमदिंद्रादा कश्चिन्नयते नवीयसः। भीमस्य वृष्णो जठरादभिश्वसो दिवेदिवे सहुरिः सन्नवाधितः ॥८॥ स्तोमं वो अद्य रुद्राय शिक्वसे क्षयद्वीराय

ऋषभासः उक्षणः वशाः मेषाः अवऽसृष्टासः आऽहुताः कीलालऽपे सोमऽपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये॥१४॥ अहाविं अग्ने हविः आस्ये ते सुचिऽइव घृतं चम्विऽइव सोमः वाजऽसनिं रयिं अस्मे सुऽवीरं प्रऽशस्तं धेहि यशसं बृहंतं ॥१५॥२२॥

॥९२॥ यज्ञस्य वः रथ्यं विश्पतिं विशां होतारं अक्तोः अतिथिं विभाऽवसुं शोचन् शुष्कासु हरिणीषु जर्भुरत् वृषा केतुः यजतः द्यां अशायत॥१॥ इमं अंजःऽपां उभये अकृण्वत धर्माणं अग्निं विदथस्य साधनं अक्तुं न यह्वं उषसः पुरःऽहितं तनूऽनपातं अरुषस्य निंसते॥२॥ वट् अस्य नीषा वि पणेः च मन्महे वयाः अस्य प्रऽहुताः आसुः अत्तवे यदा घोरासः अमृतऽत्वं आशत आत् इत् जनस्य दैव्यस्य चर्किरन्॥३॥ ऋतस्य हि प्रऽसितिः द्यौः उरु व्यचः नमः मही अरमतिः पनीयसी इंद्रः मित्रः वरुणः सं चिकित्रिरे अर्यो भगः सविता पूतऽदक्षसः॥४॥ प्र रुद्रेण यायिना यंति सिंधवः तिरः महीं अरमतिं दधन्विरे येभिः परिऽज्मा परिऽयन् उरु ज्रयः वि रोरुवत् जठरे विश्वं उक्षते॥५॥२३॥ क्राणाः रुद्राः मरुतः विश्वऽकृष्टयः दिवः श्येनासः असुरस्य नीळयः तेभिः चष्टे वरुणः मित्रः अर्यमा इंद्रः देवेभिः अवशेभिः अवंशः॥६॥ इंद्रे भुजं शशमानासः आशत सूरः दृशीके वृषणः च पौंस्ये प्रये नु अस्य अहना ततक्षिरे युजं वज्रं नृऽसदनेषु कारवः॥७॥ सूरः चित् आ हरितः अस्य रीरमत् इंद्रात् आ कः चित् भयते तवीयसः भीमस्य वृष्णः जठरात् अभिऽश्वसः दिवेऽदिवे सहुरिः स्तन् अवाधितः॥८॥ स्तोमं वः अद्य रुद्राय शिक्वसे क्षयत्ऽवीराय

नमसा दिदिष्टन। येभिः शिवः स्ववाँ एवयावभिर्दिवः सिषक्ति स्वयशा निकामभिः॥९॥ ते हि प्रजाया अभरन्त वि श्रवो बृहस्पतिर्वृषभः सोमजामयः। यज्ञैरथर्वा प्रथमो वि धारयद्वेदा ऋक्षभृगवः सं चिकिरे॥१०॥२४॥ ते हि द्यावापृथिवी भूरिरेतसा नराशंसस्थतुरंगो यमोऽदितिः। देवस्त्वष्टा द्रविणोदा ऋभुक्षणः प्र रोदसी मरुतो विष्णुरर्हिरे॥११॥ उत स्य नं उशिजामुर्विया कविरहिः शृणोतु बुध्नो हवीमनि। सूयामासा विचरंता दिविक्षितां धिया शमीनहुषी अस्य बोधतं॥१२॥ प्र नः पूषा चरथं विश्वदेव्योऽपां नपादवतु वायुरिष्टये। आत्मानं वस्यो अभि वातमर्चत तदश्विना सुहवा यामनि श्रुतं॥१३॥ विशामासामभयानामधिक्षितं गीर्भिरु स्वयशसं गृणीमसि। ग्नाभिर्विश्वाभिरदितिमनर्वणमक्तोर्युवानं नृमणा अधा पतिं॥१४॥ रेभदत्र जनुषा पूर्वो अंगिरा यावाण ऊर्ध्वा अभि चक्षुरध्वरं। येभिर्विहाया अभवद्विचक्षणः पाथः सुमेकं स्वधितिर्वेनन्वति॥१५॥२५॥

॥९३॥ १—१५ तान्वः पाय्यैः ॥ विश्वे देवाः ॥ १,४—८,१०,१२,१३ प्रस्तारपंक्तिः। २ ३ १२ अनुष्टुप्। ९ सप्तपदाऽतिशक्वरीपंक्तिः। ११ भुरिगनुष्टुप्। १५ पुरस्ताद्बृहती॥

॥९३॥ महि द्यावापृथिवी भूतमुर्वी नारी यह्वी न रोदसी सदं नः। तेभिर्नः पातं सह्यस एभिर्नः पातं शूषणि॥१॥ यज्ञेयज्ञे स मर्त्यो देवान्त्संपर्यति। यः सुम्नैर्दीर्घश्रुत्तम आविवासात्येनान्॥२॥ विश्वेषामिरज्यवो देवानां वामेहः। विश्वे हि विश्वमहसो विश्वे यज्ञेषु यज्ञियाः॥३॥ ते घा राजानो अमृतस्य मंद्रा अर्यमा मित्रो वरुणः परिज्मा। कद्रुद्रो नृणां स्तुतो मरुतः पूषणो भगः॥४॥ उत नो नक्तमपां वृषण्वसू

नमंसा दिदिष्टन् येभिः शिवः स्वऽवान् एवयावऽभिः दिवः सिसक्ति स्वऽर्यशाः निकामऽभिः॥९॥ ते हि प्रऽजायाः अभरंत वि श्रवः बृहस्पतिः वृषभः सोमऽजामयः यज्ञैः अथर्वा प्रथमः विधारयत् देवाः दक्षैः भृगवः सं चिकिचिरे॥१०॥२४॥ ते हि द्यावापृथिवी भूरिऽरेतसा नराशंसः चतुरऽअंगः यमः अदितिः देवः त्वष्टा द्रविणःऽदाः ऋभुक्षणः प्र रोदसी मरुतः विष्णुः अहिरे॥११॥ उत स्यः नः उशिजाँ उर्विया कविः अहिः शृणोतु बुध्यः हवीमनि सूर्यामासा विऽचरंता दिविऽक्षिता धिया शमीनहुषी अस्य बोधतं॥१२॥ प्र नः पूषा चरथं विश्वऽदेव्यः अपां नपात् अवतु वायुः इष्टये आत्मानं वस्यः अभि वातं अर्चत तत् अश्विना सुऽहवा यामनि श्रुतं॥१३॥ विशं आसां अभयानां अधिऽक्षितं गीःऽभिः ऊं स्वऽर्यशसं गृणीमसि मासिः विश्वाभिः अदितिं अनर्वणं अक्तोः युवानं नृऽमनाः अध पतिं॥१४॥ रेभत् अत्र जनुषा पूर्वः अंगिराः पावाणः ऊर्ध्वाः अभि चक्षुः अध्वरं येभिः विऽहायाः अभवत् विऽचक्षणः पाथः सुऽमेकं स्वऽधितिः वनंनऽवति॥१५॥२५॥

॥९३॥ महि द्यावापृथिवी भूतं उर्वी नारी यह्वी न रोदसी सदं नः तेभिः नः पातं सह्यसः एभिः नः पातं शूषणि॥१॥ यज्ञेऽयज्ञे सः मर्त्यः देवान् सपर्येति यः सुम्नैः दीर्घश्रुत्ऽतमः आऽविवासाति एनान्॥२॥ विश्वेषां इरज्यवः देवानां वाः महः विश्वे हि विश्वऽमहसः विश्वे यज्ञेषु यज्ञियाः॥३॥ ते घ राजानः अमृतस्य भद्राः अर्यमा मित्रः वरुणः परिऽज्मा कत् रुद्रः नृणां स्तुतः मरुतः पूषणः भगः॥४॥ उत नः नक्तं अपां वृषण्ऽवसूः

सूर्यामासा सदनाय सधन्या। सचा यत्साद्येपामहिर्बुध्नेषु बुध्यः ॥५॥२६॥ उत नो देवावश्विना शुभस्पती धामभिर्मित्रावरुणा उरुष्यतां। मह: स राय एषतेऽति धन्वेव दुरिता ॥६॥ उत नो रुद्रा चिन्मृळतामश्विना विश्वे देवासो रथस्पतिर्भगः। ऋभुर्वाज ऋभुक्षण: परिज्मा विश्ववेदसः ॥७॥ ऋभुर्ऋभुक्षा ऋभुर्विधतो मद ऋा ते हरी जूजुवानस्य वाजिना। दुष्टरं यस्य सामं चिदर्ध-ग्यज्ञो न मानुषः ॥८॥ कृधी नो अह्रयो देव सवित: स चं स्तुषे मघोनां। सहो न इंद्रो वह्निभिर्नेषां चर्षणीनां चक्रं रश्मिं न योंयुवे ॥९॥ ऐषु द्यावापृथिवी धातं महदुस्मे वीरेषु विश्वचर्ष-णि श्रवः। पृक्षं वाजस्य सातयें पृक्षं रायोत तुर्वणें ॥१०॥२७॥ एतं शंसमिंद्रास्मयुष्वं कूचित्संतं सहसावन्नभिष्टये सदा पाह्य-भिष्टये। मेदतां वेदता वसो ॥११॥ एतं मे स्तोमं तना न सूर्यं द्यु-तद्यामानं वावृधंत नृणां। संवनंनं नाश्वं तष्टेवानंपच्युतं ॥१२॥ वावर्तं येषां राया युक्तियां हिरण्ययीं। नेमधिता न पौंस्या वृषेव विष्टांता ॥१३॥ प्र तदुःशीमे पृथवाने वेने प्र रामे वो-चमसुरे मघवंत्सु। ये युक्ताय पंच शतास्मयु पथा विथाव्ये-यां ॥१४॥ अधीन्वचं सप्तिं चं सप्त चं। सद्यो दिदिष्ट तान्वः सद्यो दिदिष्ट पार्थ्यः सद्यो दिदिष्ट मायवः ॥१५॥२८॥

॥९४॥ १–१४ सर्वुदः काद्रवेयः सर्पः ॥ ग्रावाणः ॥ १–४ ६, ८–१३ जगती। ५. ७. १४ त्रिष्टुप्॥

॥९४॥ प्रेते वदंतु प्र वयं वदाम ग्रावभ्यो वाचं वदता व-दद्भ्यः। यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेंद्राय सोमिनः ॥१॥ एते वदंति शतवत्सहस्रवद्भि रैदंति हरितेभिरासभिः। विष्वी ग्रावाणः सुकृतः सुकृत्यया होतु-

सूर्यामासा सदनाय सुऽधन्या सचा यत् सादि एषां अहिः बुध्नेषु बुध्न्यः॥५॥२६॥ उत नः देवी अश्विना शुभः पती धामऽभिः मित्रावरुणौ उरुष्यतां महः सः रायः आ ईषते अतिं धन्वऽइव दुःऽइता॥६॥ उत नः रुद्रा चित् मृळतां अश्विना विश्वे देवासः रथ-पतिः भगः ऋभुः वाजः ऋभुक्षणः परिऽज्मा विष्वऽवेदसः॥७॥ ऋभुः ऋभुक्षाः ऋभुः विधतः मदः आ ते हरी ऋजुवानस्य वाजिना दुस्तरं यस्य सामं चित् ऋधक् यज्ञः न मानुषः॥८॥ कृधि नः अह्रयः देव सवितः सः च स्तुषे मघोनां सहो नः इंद्रः वह्निऽभिः नि एषां चर्षणीनां चक्रं रश्मिं न योयुवे॥९॥ आ एषु द्यावापृथिवी धातं महत् अस्मे वीरेषु विष्वऽचर्षणि श्रवः पृक्षं वाजस्य सातये पृक्षं राया उत तुर्वणे॥१०॥२७॥ एतं शंसं इंद्र अस्मऽयुः त्वं कूऽचित् संतं सहसाऽवन् अभिष्टये सदा पाहि अभिष्टये मदतां वेदतां वसो॥११॥ एतं मे स्तोमं तना न सूर्ये द्युतत्ऽयामानं ववृधंत नृणां सुऽवनंनं न अश्व्यं तष्टाऽइव अनपऽच्युतं॥१२॥ ववर्तत येषां राया युक्ता एषां हिरण्ययी नेमऽधिता न पौंस्या वृषाऽइव विष्टऽअंता॥१३॥ प्र तत् दुःऽशीमे पृथवाने वेने प्र रामे वोचं असुरे मघवत्ऽसु ये युक्ताय पंच शता अस्मऽयु पथा विऽश्रावि एषां॥१४॥ अधि इत् नु अचं सप्रतिं च सप्न च सद्यः दिदिष्ट नाभंः सद्यः दिदिष्ट पार्ष्यः सद्यः दिदिष्ट मायवः॥१५॥२८॥

॥९४॥ प्र एते वदंतु प्र वयं वदाम यावंऽभ्यः वाचं वदत वदत्ऽभ्यः यत् अद्रयः पर्वताः साकं आशवः श्लोकं घोषं भरथ इंद्राय सोमिनः॥१॥ एते वदंति शतऽवंत सहस्रंऽवत् अभि क्रंदंति हरितेभिः आसऽभिः विष्टी यावाणः सुऽकृतः सुऽकृत्यया होतुः

घित्पूर्वे हविरद्यमाशत ॥२॥ एते वदंत्यविदन्नना मधु न्यूं-
खयंते अधि पक्ष आमिषि । वृक्षस्य शाखामरुणस्य वप्सं-
तस्ते सूभर्वो वृषभाः प्रेमरावियुः ॥३॥ बृहद्वदंति मदिरेण
मंदिनेंद्रं क्रोशंतोऽविदन्नना मधु । संरभ्या धीराः स्वसृभि-
रनर्तिषुराघोषयंतः पृथिवीमुपब्दिभिः ॥४॥ सुपर्णा वाचं-
मक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः । न्यङ्ङि
यंत्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्येसितः ॥५॥२९॥
उषा इव प्रवहंतः समायंसुः साकं युक्ता वृषणो बिभ्रतो
धुरः । यच्छुसंतो जयसाना अरावियुः शुष्म एषां प्रोथयो
अवेतामिव ॥६॥ दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो
दशयोजनेभ्यः । दशाभीशुभ्यो अचेताजरेभ्यो दश धुरो दश
युक्ता वहंत्याः ॥७॥ ते अद्रयो दशयंचास आशवस्तेषामाधानं
पर्येति हर्यतं । न ऊं सुतस्य सोम्यस्यांधसोऽशोः पीयूषं प्रथ-
मस्य भेजिरे ॥८॥ ते सोमादो हरी इंद्रस्य निंसतेऽशुं दुहंतो
अध्यासते गवि । तेभिर्दुग्धं पपिवान्सोम्यं मध्विंद्रो वर्धते
प्रयते वृषायते ॥९॥ वृषा वो अंशुर्न किलारिषाथनेळावंतः
सदमित्स्यनाशिताः । रैवत्येव महसा चारवः स्थन यस्य
यावाणो अजुषध्वमध्वरं ॥१०॥३०॥ तृदिला अतृदिलासो
अद्रयोऽश्मना अशृथिता अमृत्यवः । अनातुरा अजराः
स्थामविष्णवः सुपीवसो अतृपिता अतृष्णजः ॥११॥ ध्रुवा
एव वः पितरो युगेयुगे क्षेमकामासः सदसो न युंजते । अ-
जुर्यासो हरिषाचो हरिव्रव आ द्यां रवेण पृथिवीमशुश्रवुः
॥१२॥ तदिद्वदंत्यद्रयो विमोचने यामंजंजस्पा इव घेदुपब्दि-
भिः । वपंतो बीजमिव धान्याकृतः पूंचंति सीमं न मिनंति

चित् पूर्वे हविःऽअद्यं आशत॥२॥ एते वदंति अविदन् अना मधु नि ऊंखयंते अधि पक्वे आमिंपि वृष्ट्यस्य शखां अरुणस्य बप्संतः ते सूभर्वाः वृषभाः प्रऽईं अराविषुः॥३॥ बृहत् वदंति मदिरेण मंदिना इंद्रं क्रोशंतः अविदन् अना मधु संऽरभ्य धीराः स्वसृंऽभिः अनर्तिषुः आऽघोषयंतः पृथिवीं उपऽब्दिऽभिः॥४॥ सुऽपर्णीः वाचं अक्रत उप द्यवि आऽखरे कृष्णाः इषिराः अनर्तिषुः न्यक् नि यंति उपरस्य निःऽकृतं पुरुऽरेतः दधिरे सूर्यऽश्वितः॥५॥२९॥ उताःऽइव प्रऽवहंतः संऽआयमुः साकं युक्ताः वृषणः बिभ्रतः धुरः यत् ध्वसंतः जयसानाः अरांविषुः मुखे एषां प्रोथयः अवेतांऽइव॥६॥ दशावनिऽभ्यः दशंऽकक्ष्येभ्यः दशंऽयोक्त्रेभ्यः दशंऽयोजनेभ्यः दशाभीशुऽभ्यः अचेत अजरेभ्यः दशं धुरः दशं युक्ताः वहंत्ऽभ्यः॥७॥ ते अद्रयः दशंऽयंचासः आशवः तेषां आऽधानं परि एति हर्यतं ते ऊं सुतस्य सोम्यस्य अंधसः अंशोः पीयूषं प्रथमस्य भेजिरे॥८॥ ते सोमऽअदः हरी इंद्रस्य निंसते अंशुं दुहंतः अधि आसते गवि तेभिः दुग्धं पपिऽवान् सोम्यं मधु इंद्रः वर्धते प्रथते वृषऽयते॥९॥ वृषा वः अंशुः न किलं रिषाथन इळाऽवंतः सदं इत् स्थन आशिताः रेवत्याऽइव महसा चारवः स्थन यस्य मावाणः अजुषध्वं अध्वरं॥१०॥३०॥ नृदिलाः अतृदिलासः अद्रयः अश्मनाः अशृथिताः अमृत्यवः अनातुराः अजराः स्थ अमंविष्णवः सुऽपीवसः अतृपिताः अतृष्णऽजः॥११॥ ध्रुवाःऽएव वः पितरः युगेऽयुगे क्षेमंऽकामासः सदसः न युंजते अजुर्यासः हरिऽसाचः हरिद्रवः आ द्यां रवेण पृथिवीं अस्पृधवः॥१२॥ तत् इत् वदंति अद्रयः विऽमोचने यामन् अंजःपाःऽइव घ इत् उपब्दिऽभिः वपंतः बीजंऽइव धान्यऽकृतः पृंचंति सोमं न मिनंति

वर्धन्तः ॥१३॥ सुते अध्वरे अधि वाचमक्रता क्रीळयो न मातरं तुदन्तः। वि षू मुंचा सुष्टुवुषो मनीषां वि वर्तन्तामद्रयश्चायमानाः ॥१४॥३१॥४॥

॥ ९५ ॥ १. ३. ६. ८–१०. १२. १४. १७ पुरूरवा ऐळः। २. ४. ५. ७. ११. १३. १५. १६. १८ उर्वशी ॥ १. ३. ६. ८–१०. १२. १४. १७ उर्वशी। २. ४. ५. ७. ११. १३. १५. १६. १८ पुरूरवा ऐळः ॥ त्रिष्टुप् ॥

॥९५॥ हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु। न नौ मंत्रा अनुदितास एते मयस्करन्परतरे चनाहन् ॥१॥ किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव। पुरूरवः पुनरस्तं परेहि दुरापना वात इवाहमस्मि ॥२॥ इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः। अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयन्त धुनयः ॥३॥ सा वसु दधती श्वशुराय वय उषो यदि वष्टयन्तिगृहात्। अस्तं ननक्षे यस्मिञ्चाकन्दिवा नक्तं शयिता वैतसेन ॥४॥ किः स्म माहुः शथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि। पुरूरवोऽनु ते केतमायं राजा मे वीर तन्वस्तदासीः ॥५॥१॥ या सुजूर्णिः श्रेणिः सुम्नआपिर्देवी देष्णं पयस्वती चरण्युः। ता अंजयोऽरुणयो न सस्रुः श्रिये गावो न धेनवोऽनवन्त ॥६॥ समस्मिञ्जायमान आसत ग्रा उतेमवर्धन्नद्यः स्वगूर्ताः। महे यत्त्वा पुरूरवो रणायावर्धयन्दस्युहत्याय देवाः ॥७॥ सचा यदासु जह्नतीष्वत्कममानुषीषु मानुषो निषेवे। अप स्म मत्तरसन्ती न भुज्युस्ता अंचसन्नथस्पृशो नाश्वाः ॥८॥ यदासु मर्तो अमृतासु निस्पृक्सं क्षोणीभिः क्रतुभिर्न पृङ्क्ते। ता आतयो न तन्वः शुंभत स्वा अश्वासो न क्रीळयो दंदगानाः ॥९॥ विद्युन्न या पतन्ती दविद्योन्नरन्ती मे अप्या काम्यानि। जनिष्टो अपो नयः सुजातः प्रोर्वशीं तिरत

बप्सतः॥१३॥ सुते अध्वरे अधि वाचं अक्रत आ क्रीळयः न मातरं तुदंतः वि सु मुंच सुसुऽवुषः मनीषां वि वर्तंतां अद्रयः चायमानाः॥१४॥३१॥४॥

॥ ९५ ॥ हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु न नौ मंत्राः अनुदिताससः एते मयः करन् परऽतरे चन अहन् ॥१॥ किं एता वाचा कृणव तवं अहं प्र अक्रमिषं उषसां अग्रियाऽइव पुरूरवः पुनः अस्तं परा इहि दुःऽआपना वातःऽइव अहं अस्मि ॥२॥ इषुः न श्रिये इषुऽधेः असना गोऽसाः ऋतऽसाः न रंहिः अवीरे क्रतौ वि दविद्युतत् न उरा न मायुं चितयंत धुनयः ॥३॥ सा वसुं दधती श्वशुराय वयः उषः यदि वष्टि अंतिऽगृहात् अस्तं ननक्षे यस्मिन् चाकन् दिवा नक्तं श्रथिता वैतसेन ॥४॥ चिः स्म मा अहः श्रथयः वैतसेन उत स्म मे अव्यत्यै पृणासि पुरूरवः अनु ते केतं आयं राजा मे वीरं तन्वः तत् आसीः ॥५॥१॥ या सुऽजूर्णिः श्रेणिः सुम्नेऽआपिः हृदेऽचक्षुः न यंयिनी चरण्युः ताः अंजयः अरुणयः न ससुः श्रिये गावः न धेनवः अनवत ॥६॥ सं अस्मिन् जायमाने आसत मा उत ईं अवर्धन् नद्यः स्वऽगूर्ताः महे यत् त्वा पुरूरवः रणाय अवर्धयन् दस्युऽहत्याय देवाः॥७॥ सचा यत् आसु जहतीषु अत्कं अमानुषीषु मानुषः निऽसेवे अप स्म मत् तरसंती न भुज्युः ताः अचसन् रथऽस्पृशः न अश्वाः॥८॥ यत् आसु मर्तः अमृतासु निऽस्पृक् सं क्षोणीभिः क्रतुऽभिः न पृंक्ते ताः आतयः न तन्वः शुंभत स्वाः अश्वासः न क्रीळयः दंदशानाः॥९॥ विऽद्युत् न या पतंती दविद्योत् भरंती मे अप्या काम्यानि जनिष्टो अपः नयः सुऽजातः प्र उर्वशीं तिरत

दीर्घमायुः ॥१०॥२॥ जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः। अशासं त्वा विदुषी सस्मिन्नहन्न म आपृणोः किमभुग्वदासि ॥११॥ कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन्। को दंपती समनसा वि यूयोदध यदग्निः श्वशुरेषु दीदयत् ॥१२॥ प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रंददाधै शिवायै। प्र तन्ने हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः ॥१३॥ सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गंतवा उ। अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः ॥१४॥ पुरूरवो मा मृथा मा प्र पप्नो मा त्वा वृकासो अशिवास उ क्षन्। न वै स्त्रैणानि सख्यानि संति सालावृकाणां हृदयान्येता ॥१५॥३॥ यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः। घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि ॥१६॥ अंतरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः। उप त्वा रातिः सुकृतस्य तिष्ठाच्चि वर्तस्व हृदयं तप्यते मे ॥१७॥ इति त्वा देवा इम आहुरेळ यस्येमेतदृषसि मृत्युबंधुः। प्रजा ते देवान्हविषा यजाति स्वर्ग उ त्वमपि मादयासे ॥१८॥४॥

॥ ९६ ॥ १–१३ वसुः सर्वहरिर्वैंद्रः ॥ हरिस्तुतिः ॥ १–११ जगती। १२, १३ त्रिष्टुप् ॥

॥९६॥ प्र ते महे विदथे शंसिषं हरी प्र ते वन्वे वनुषो हर्यतं मदं। घृतं न यो हरिभिश्चारु सेचत आ त्वा विशंतु हरिवर्पसं गिरः ॥१॥ हरिं हि योनिमभि ये समस्वरन्हिन्वंतो हरी दिव्यं यथा सदः। आ यं पृणंति हरिभिर्न धेनव इंद्राय शूषं हरिवंतमर्चत ॥२॥ सो अंस्य वज्रो हरिणो य आयसो हरिर्नि-

दीर्घं आयुः ॥ १० ॥ २ ॥ जज्ञिषे इत्था गोऽपीच्याय हि दधार्थ तत् पुरूरवः मे ओजः अशंसं त्वा विदुषी सस्मिन् अहन् न मे आ अपृणोः किं अभुक् वदासि ॥ ११ ॥ कदा सूनुः पितरं जातः इच्छात् चक्रन् न अश्रुं वर्तयत् विऽजानन् कः दंऽपतीऽ सऽमनसा वि यूयोत् अध यत् अग्निः श्वऽपुरिषु दोदयत् ॥ १२ ॥ प्रति ब्रवाणि वर्तयते अश्रुं चक्रन् न क्रंदत् आऽध्ये शिवायै प्र तत् ते हिनव यत् ते अस्मे परा इहि अस्तं नहि मूर मा आपरः ॥ १३ ॥ सुऽदेवः अद्य प्रऽपतेत् अनावृत् पराऽवतं परमां गंतवे ऊं अध शयीत निःऽऋतेः उपऽस्थे अध एनं वृकाः रभसासः अद्युः ॥ १४ ॥ पुरूरवः मा मृथाः मा प्र पप्तः मा त्वा वृकासः अशिवासः ऊं क्षन् न वै स्त्रैणानि सख्यानि संति सालावृकाणां हृदयानि एता ॥ १५ ॥ ३ ॥ यत् विऽरूपा अचरं मर्त्येषु अवसं रात्रीः शरदः चतसः घृतस्य स्तोकं सकृत् अहः आश्नां तात् एव इदं ततृपाणा चरामि ॥ १६ ॥ अंतरिक्षऽप्रां रजसः विऽमानीं उर्वशीं वसिष्ठः उप यामि रात्रिः सुऽकृतस्य तिष्ठात् नि वर्तस्व हृदयं तप्यते मे ॥ १७ ॥ इति त्वा देवाः इमे आहुः ऐळ यथा ईं एतत् भवसि मृत्युऽबंधुः प्रऽजा ते देवान् हविषा यजाति स्वःऽगे ऊं त्वं अपि मादयासे ॥ १८ ॥ ४ ॥

॥ ९६ ॥ प्रऽते महे विदथे शंसिषं हरी प्रऽते वन्वे वनुषः हर्यतं मदं घृतं न यः हरिऽभिः चारु सेचते आ त्वा विशंतु हरिऽवर्पसं गिरः ॥ १ ॥ हरिं हि योनिं अभि ये संऽअस्वरन् हिन्वंतः हरी दिव्यं यथा सदः आ यं पृणंति हरिऽभिः न धेनवः इंद्राय शूषं हरिऽवंतं अर्चत ॥ २ ॥ सः अस्य वज्रः हरितः यः आयसः हरिः नि-

कामो हरिरा गभस्त्योः। द्युम्नी सुशिप्रो हरिमन्युसायक इंद्रे नि रूपा हरिता मिमिक्षिरे॥३॥ दिवि न केतुरधि धायि हर्यतो विव्यचद्वज्रो हरितो न रंह्या। तुदद्हिं हरिशिप्रो य आयसः सहस्रशोका अभवद्धरिंभरः॥४॥ त्वंत्वमह्यया उप-स्तुतः पूर्वेभिरिंद्र हरिकेश यज्वभिः। त्वं हर्यसि तव विश्व-मुक्थ्य१मसामि राधो हरिजात हर्यतं॥५॥५॥ ता वज्रिणं मंदिनं स्तोम्यं मद इंद्रं रथे वहतो हर्यता हरी। पुरूण्यस्मै सवनानि हर्यत इंद्राय सोमा हरयो दधन्विरे॥६॥ अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन्हरयो हरी तुरा। अर्वद्भिर्यो हरिभिर्जोषमीयते सो अस्य कामं हरिवंतमानशे॥७॥ ह-रिश्मश्रुर्हरिकेश आयस्तस्तुरस्येये यो हरिपा अवर्धत। अर्वद्भिर्यो हरिभिर्वाजिनीवसुरति विश्वा दुरिता पारि-षद्धरी॥८॥ सुवेव यस्य हरिणी विपेततुः शिप्रे वाजाय हरिणी दविध्वतः। प्र यत्कृते चमसे मर्मृजद्धरी पीत्वा मदस्य हर्यतस्यांधसः॥९॥ उत स्म सद्म हर्यतस्य पत्न्योरत्यो न वाजं हरिवाँ अचिक्रदत्। महो चिद्धि धिषणाहर्यदोजसा बृहद्भयो दधिषे हर्यतश्चिदा॥१०॥६॥ आ रोदसी हर्यमा-णो महित्वा नव्यंनव्यं हर्यसि मन्म नु प्रियं। प्र पत्न्यमसुर हर्यतं गोरविष्कृधि हरये सूर्याय॥११॥ आ त्वा हर्यंतं प्र-युजो जनानां रथे वहंतु हरिशिप्रमिंद्र। पिबा यथा प्रति-भृतस्य मध्वो हर्यन्यज्ञं संधमादे दशोणिं॥१२॥ अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते। ममद्धि सोमं मधु-मंतमिंद्र सुता वृषञ्जठर आ वृषस्व॥१३॥७॥

ऽकामः हरिः आ गर्भस्त्योः द्युम्नी सुऽशिप्रः हरिमन्युऽसायकः इन्द्रे नि रूपा हरिता मिमिक्षिरे ॥३॥ दिवि न केतुः अधि धायि हर्यतः विव्यचत् वज्रः हरितः न रंह्या तुदत् अहिं हरिऽशिप्रः यः आयसः सहस्रऽशोकाः अभवत् हरिऽभरः ॥४॥ त्वंऽवे अहर्यथाः उपऽस्तुतः पूर्वेभिः इन्द्र हरिऽकेश यज्वऽभिः त्वं हर्यसि तवं विश्वं उक्थ्यं असामि राधः हरिऽजात हर्यतं ॥५॥५॥ ता वज्रिणं मंदिनं स्तोम्यं मदे इन्द्रं रथे वहतः हर्यता हरी पुरूणि अस्मे सवनानि हर्यते इन्द्राय सोमाः हरयः दधन्विरे ॥६॥ अरं कामाय हरयः दधन्विरे स्थिराय हिन्वन् हरयः हरी तुरा अवंत्ऽभिः यः हरिऽभिः जोषं ईयते सः अस्य कामं हरिऽवंतं आनशे ॥७॥ हरिऽश्मश्रुः हरिऽकेशः आयसः तुरःऽपेयः यः हरिऽपाः अवर्धत अवंत्ऽभिः यः हरिऽभिः वाजिनीऽवसुः अति विश्वा दुःऽइता पारिषत् हरी ॥८॥ सुवाऽइव यस्य हरिणी विऽपेततुः शिप्रे वाजाय हरिणी दविध्वतः प्र यत् कृते चमसे मर्मृजत् हरी पीत्वा मदस्य हर्यतस्य अंधसः ॥९॥ उत स्म सद्म हर्यतस्य पस्त्योः अत्यः न वाजं हरिऽवान् अचिक्रदत् महीं चित् हि धिषणा अहर्यत् ओजसा बृहत् वयः दधिषे हर्यतः चित् आ ॥१०॥६॥ आ रोदसी हर्यमाणः महिऽत्वा नव्यंऽनव्यं हर्यसि मन्म नु प्रियं प्र पस्त्यं असुर हर्यतं गोः आविः कृधि हरये सूर्याय ॥११॥ आ त्वा हर्यंतं प्रऽयुजः जनानां रथे वहंतु हरिऽशिप्रं इन्द्र पिबं यथां प्रतिऽभृतस्य मध्वः हर्यन् यज्ञं सधऽमादे दशऽओणिं ॥१२॥ अपाः पूर्वेषां हरिऽवः सुतानां अथो इदं सवनं केवलं ते मम्दि सोमं मधुऽमंतं इन्द्र सचा वृषन् जठरे आ वृषस्व ॥१३॥७॥

॥ ९७ ॥ १-२३ भिषगाथर्वणः ॥ ओषधीस्तुतिः ॥ अनुष्टुप् ॥

॥९७॥ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा । मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥१॥ शतं वो अंब धामानि सहस्रमुत वो रुहः । अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥२॥ ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः । अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥३॥ ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे । सनेयमश्वं गां वासं आत्मानं तव पूरुष ॥४॥ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता । गोभाज इत्किलासथ यत्सनवथ पूरुषं ॥५॥८॥ यत्रौषधीः समग्मत राजानः समिताविव । विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ॥६॥ अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसं । आवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥७॥ उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धनं सनिष्यन्तीनामात्मानं तव पूरुष ॥८॥ इष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः । सीराः पतत्रिणीः स्थन यदामयति निष्कृथ ॥९॥ अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः । ओषधीः प्राचुच्यवुर्यत्किं च तन्वो३ रपः ॥१०॥९॥ यदिमा वाजयन्नहमोषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥११॥ यस्यौषधीः प्रसर्पथांगमंगं परुष्परुः । ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ॥१२॥ साकं यक्ष्म प्र पत चाषेण किकिदीविना । साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥१३॥ अन्या वो अन्यामवत्वन्यान्यस्या उपावत । ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥१४॥ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुंचंत्वंहसः ॥१५॥१०॥ मुंचंतु मा शपथ्या३दथो वरुण्यादुत । अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात् ॥१६॥ मुंचंतु मा मरुतो मृत्योरधि दुष्कृतादेनसः । यज्ञैर्यातयित्नवो यज्ञैर्हवनश्रुतः ॥१७॥ मुंचंतु मा पितरो गर्भमेतं यमिच्छन्ति मनसा यं जगन्वान् । तन्वः सुतो मा पितृषदो गृभायाविर्हि निर्ऋतिरेषो अस्मान् ॥१८॥ मुंचंतु मा पितरो गर्भमेतं यमिच्छन्ति मनसा यं जगन्वान् । तन्वः सुतो मा पितृषदो गृभायाविर्हि निर्ऋतिरेषो अस्मान् ॥१९॥ मुंचंतु मा पितरो गर्भमेतं यमिच्छन्ति मनसा यं जगन्वान् । तन्वः सुतो मा पितृषदो गृभायाविर्हि निर्ऋतिरेषो अस्मान् ॥२०॥ मुंचंतु मा पितरो गर्भमेतं यमिच्छन्ति मनसा यं जगन्वान् । तन्वः सुतो मा पितृषदो गृभायाविर्हि निर्ऋतिरेषो अस्मान् ॥२१॥ मुंचंतु मा पितरो गर्भमेतं यमिच्छन्ति मनसा यं जगन्वान् । तन्वः सुतो मा पितृषदो गृभायाविर्हि निर्ऋतिरेषो अस्मान् ॥२२॥ मुंचंतु मा पितरो गर्भमेतं यमिच्छन्ति मनसा यं जगन्वान् । तन्वः सुतो मा पितृषदो गृभायाविर्हि निर्ऋतिरेषो अस्मान् ॥२३॥

॥९७॥ याः ओषधीः पूर्वाः जाताः देवेभ्यः त्रिऽयुगं पुरा मनै नु बभ्रूणाँ अहं शतं धामानि सप्त च ॥१॥ शतं वः अम्ब धामानि सहस्रं उत वः रुहः अधं शतऽक्रत्वः यूयं इमं मे अगदं कृत ॥२॥ ओषधीः प्रति मोदध्वं पुष्पवतीः प्रऽसूवरीः अश्वाःऽइव सऽजित्वरीः वीरुधः पारयिष्णवः ॥३॥ ओषधीः इति मातरः तत् वः देवीः उप ब्रुवे सनेयं अश्वं गां वासः आत्मानं तवं पुरुष ॥४॥ अश्वत्थे वः निऽसदनं पर्णे वः वसतिः कृता गोऽभाजः इत् किलं असथ यत् सनवथ पुरुषं ॥५॥८॥ यवं ओषधीः संऽअग्मत राजानः समितौऽइव विप्रः सः उच्यते भिषक् रक्षःऽहा अमीवऽचातनः ॥६॥ अश्वऽवतीं सोमऽवतीं ऊर्जयंतीं उदऽओजसं आ अवित्सि सर्वाः ओषधीः अस्मै अरिष्टऽतातये ॥७॥ उत् शुष्माः ओषधीनां गावः गोस्थात्ऽइव ईरते धनं सनिष्यंतीनां आत्मानं तवं पुरुष ॥८॥ इष्कृतिः नाम वः माता अथो यूयं स्थ निःऽकृतीः सीराः पतत्रिणीः स्थन यत् आमयति निः कृथ ॥९॥ अतिं विश्वाः परिऽस्थाः स्तेनःऽइव मृजं अक्रमुः ओषधीः प्र अचुच्यवुः यत् किं च तन्वः रपः ॥१०॥९॥ यत् इमाः वाजयन् अहं ओषधीः हस्ते आऽदधे आत्मा यक्ष्मस्य नश्यति पुरा जीवऽगृभः यथा ॥११॥ यस्य ओषधीः प्रऽसर्पथ अंगंऽअंगं परुःऽपरुः ततः यक्ष्मं वि बाधध्वे उग्रः मध्यमशीःऽइव ॥१२॥ साकं यक्ष्म प्र पत चाषेण किकिदीविना साकं वातस्य ध्राज्या साकं नश्य निऽहाकया ॥१३॥ अन्या वः अन्यां अवतु अन्या अन्यस्याः उप अवत ताः सर्वाः संऽविदानाः इदं मे प्र अवत वचः ॥१४॥ याः फलिनीः याः अफलाः अपुष्पाः याः च पुष्पिणीः बृहस्पतिऽप्रसूताः ताः नः मुंचंतु अंहसः ॥१५॥१०॥ मुंचंतु मा शपथ्यात् अथो वरुण्यात्

दुत। अथो यमस्य पड्वीशात्सर्वस्माद्देवकिल्बिषात्॥१६॥ अव॒प-
तंतीरवदन्दिव ओषधयस्परि। यं जीवमश्नवामहै न स रिष्याति॒
पूरुषः ॥१७॥ या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः।
तासां त्वमस्युत्तमारं कामाय॒ शं हृदे॥१८॥ या ओषधीः सोमरा-
ज्ञीर्विष्ठिताः पृथि॒वीमनु। बृहस्पतिप्रसूता अस्यै सं दत्त वीर्यं
॥१९॥ मा वो रिषत्खनिता यस्मै चाहं खनामि वः। द्विपच्चतु-
ष्पदस्माकं सर्वमस्त्वनातुरं॥२०॥ याश्चेदमुपशृण्वंति याश्च दूरं
परागताः। सर्वाः संगत्य वीरुधोऽस्यै सं दत्त वीर्यं॥२१॥ ओष-
धयः सं वदंते सोमेन सह राज्ञा। यस्मै कृणोति ब्राह्मणस्तं रा-
जन्पारयामसि॥२२॥ त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः।
उपस्तिरस्तु सोऽस्माकं यो अस्माँ अभिदासति॥२३॥११॥

॥ ९८ ॥ १–१२ देवापिरार्ष्टिषेणः ॥ देवाः ॥ त्रिष्टुप् ॥

॥९८॥ बृहस्पते प्रति मे देवतामिहि मित्रो वा यद्वरुणो
वासि पूषा। आदित्यैर्वा यद्वसुभिर्मरुत्वान्त्स पर्जन्यं शंत-
नवे वृषाय ॥१॥ आ देवो दूतो अजिरश्चिकित्वान्त्वेदवापे
अभि मामगच्छत्। प्रतीचीनः प्रति मामा ववृत्स्व दधामि
ते द्युमतीं वाचमासन् ॥२॥ अस्मे धेहि द्युमतीं वाचमा-
सन्बृहस्पते अनमीवामिषिरां। यया वृष्टिं शंतनवे वनाव दि-
वो द्रप्सो मधुमाँ आ विवेश ॥३॥ आ नो द्रप्सा मधुमंतो
विगुंत्विंद्रं देह्यधिरथं सहस्रं। नि षीद होत्रमृतुथा यजस्व
देवान्देवापे हविषा सपर्य ॥४॥ आर्ष्टिषेणो होत्रमृषिर्नि-
षीदन्देवापिर्देवसुमतिं चिकित्वान्। स उत्तरस्मादधरं स-
मुद्रमपो दिव्या असृजद्वर्षो अभि ॥५॥ अस्मिन्त्समुद्रे अध्यु-

उत अर्णो यमस्य पड्वीशात् सर्वस्मात् देवऽकिल्विषात् ॥१६॥ अवऽपतंतीः अवदन् दिवः ओषधयः परि यं जीवं अश्नवामहै न सः रिष्याति पुरुषः ॥१७॥ याः ओषधीः सोमऽराज्ञीः बह्वीः शतऽविचक्षणाः तासां त्वं असि उत्ऽतमा अरं कामाय शं हृदे ॥१८॥ याः ओषधीः सोमऽराज्ञीः विऽस्थिताः पृथिवीं अनु बृहस्पतिंऽप्रसूताः अस्यै सं दत्त वीर्यं ॥१९॥ मा वः रिषत् खनिता यस्मै च अहं खनामि वः द्विऽपत् चतुःऽपत् अस्माकं सर्वं अस्तु अनातुरं ॥२०॥ याः च इदं उपऽशृण्वंति याः च दूरं पराऽगताः सर्वाः संऽगत्य वीरुधः अस्यै सं दत्त वीर्यं ॥२१॥ ओषधयः सं वदंते सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणः तं राजन् पारयामसि ॥२२॥ त्वं उत्ऽतमा असि ओषधे तव वृक्षाः उपस्तयः उपस्तिः अस्तु सः अस्माकं यः अस्मान् अभिऽदासति ॥२३॥११॥

॥९८॥ बृहस्पते प्रति मे देवतां इहि मित्रः वा यत् वरुणः वा असि पूषा आदित्यैः वा यत् वसुऽभिः मरुत्वान् सः पर्जन्यं शंऽतनवे वृषय ॥१॥ आ देवः दूतः अजिरः चिकित्वान् त्वत् देवऽआपे अभि मां अगच्छत् प्रतीचीनः प्रति मां आ ववृत्स्व दधामि ते द्युऽमतीं वाचं आसन् ॥२॥ अस्मे धेहि द्युऽमतीं वाचं आसन् बृहस्पते अनमीवां इषिरां यया वृष्टिं शंऽतनवे वनाव दिवः द्रुप्सः मधुऽमान् आ विवेश ॥३॥ आ नः द्रुप्साः मधुऽमंतः विशंतु इंद्रं देहि अधिऽरथं सहस्रं नि सीद होतः ऋतुऽथा यजस्व देवान् देवऽआपे हविषा सपर्य ॥४॥ आर्ष्टिषेणः होतं ऋषिः निऽसीदन् देवऽआपिः देवऽसुमतिं चिकित्वान् सः उत्ऽतरस्मात् अधरं समुद्रं अपः दिव्याः असृजत् वर्षीः अभि ॥५॥ अस्मिन् समुद्रे अधि

न्तरस्मिन्नापो देवेभिर्निवृता अतिष्ठन्। ता अद्रवन्नार्ष्टिषेणेन सृष्टा देवापिना प्रेषिता मरुद्भिरोषधे॥६॥१२॥ यद्देवापिः शंतनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत्। देवश्रुतं वृष्टिवनिं ररा-णो बृहस्पतिर्वाचमस्मा अयच्छत्॥७॥ यं त्वा देवापिः शुशु-चानो अग्न आर्ष्टिषेणो मनुष्यः समीधे। विश्वेभिर्देवैरनुमद्य-मानः प्र पर्जन्यमीरया वृष्टिमन्तं॥८॥ त्वां पूर्व ऋषयो गीर्भि-रायन्वामध्वरेषु पुरुहूत विश्वे। सहस्राणयधिरथान्यस्मे आ नो यज्ञं रोहिदश्वोप याहि॥९॥ एतान्यग्ने नवतिर्नव त्वे आहुता-न्यधिरथा सहस्रा। तेभिर्वर्धस्व तन्वः शूर पूर्वीर्दिवो नो वृष्टि-मिषितो रिरीहि॥१०॥ एतान्यग्ने नवतिं सहस्रा सं प्र यच्छ वृषणं इंद्राय भागं। विद्वान्पथ ऋतुशो देवयानान्यौलानं दिवि देवेषु धेहि॥११॥ अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षांसि सेध। अस्मात्समुद्राद्बृहतो दिवो नोऽपां भूमानमुप नः सृजेह॥१२॥१३॥

॥ ९९ ॥ १-१२ यतो वैखानसः ॥ ईंद्रः ॥ त्रिष्टुप् ॥

॥ ९९ ॥ कं नश्चित्रमिषण्यसि चिकित्वान्पृथुग्मानं वाश्रं वावृधध्यै। कस्य दातु शवसो व्युष्टौ तक्षद्वज्रं वृषभुरम-पिन्वत्॥१॥ स हि द्युता विद्युता वेति साम पृथुं योनिम-सुरत्वा ससाद। स सनीळेभिः प्रसहानो अस्य भ्रातुर्न ऋते सप्तथस्य मायाः॥२॥ स वाजं यातापदुष्पदा यन्त्स्वर्षाता परि षदत्सनिष्यन्। अनर्वा यच्छतदुरस्य वेदो घ्नञ्छ्मश्र-देवाँ अभि वर्पसा भूत्॥३॥ स यह्वोऽवनीर्गोष्वर्वा जुहो-ति प्रध्न्यासु सस्निः। अपादो यत्र युज्यासोऽरथा द्रोण्य-

उत्ऽतरस्मिन् आपः देवेभिः निऽवृताः अतिष्ठन् ताः अद्रवन् आर्ष्टिषेणेन सृष्टाः देवऽआपिना प्रऽइषिताः मरुत्वतीषु ॥ ६ ॥ ॥ १२ ॥ यत् देवऽआपिः शंऽतनवे पुरःऽहितः होत्राय वृतः कृपमाणः अदीधेत् देवऽश्रुतं वृष्टिऽवनिं रराणः बृहस्पतिः वाचं अस्मे अयच्छत् ॥ ७ ॥ यं त्वा देवऽआपिः शुशुचानः अग्ने आर्ष्टिषेणः मनुष्यः संऽईधे विश्वेभिः देवैः अनुऽमद्यमानः प्र पर्जन्यं ईरय वृष्टिऽमंतं ॥ ८ ॥ त्वां पूर्वे ऋषयः गीःऽभिः आयन् त्वां अध्वरेषु पुरुऽहूत विश्वे सहस्राणि अधिऽरथानि अस्मे आ नः यज्ञं रोहित्ऽअश्व उप याहि ॥ ९ ॥ एतानि अग्ने नवतिः नवं ते आऽहुतानि अधिऽरथा सहस्रा तेभिः वर्धस्व तन्वः शूर पूर्वीः दिवः नः वृष्टिं इषितः रिरीहि ॥ १० ॥ एतानि अग्ने नवतिं सहस्रा सं प्रयच्छ वृष्णे इंद्राय भागं विद्वान् पथः ऋतुऽशः देवऽयानान् अपि औलानं दिवि देवेषु धेहि ॥ ११ ॥ अग्ने बाधस्व वि मृधः वि दुःऽगहां अप अमीवां अप रक्षांसि सेध अस्मात् समुद्रात् बृहतः दिवः नः अस्मां भूमानं उप नः सृज इह ॥ १२ ॥ १३ ॥

॥ ९९ ॥ कं नः चित्रं इषण्यसि चिकित्वान् पृषुऽग्मानं वाघ्रं ववृधध्यै कत् तस्य दातु शवसः विऽउष्टौ तक्षत् वज्रं वृत्रऽतुरं अपिन्वत् ॥ १ ॥ सः हि द्युता विऽद्युतां वेति सामं पृथुं योनिं असुरऽत्वा आ ससाद सः सऽनीळेभिः प्रऽसहानः अस्य भातुः न ऋते सप्तथस्य मायाः ॥ २ ॥ सः वाजं यातां अपदुःऽपदा यन् स्वः ऽसाता परि सदत् सनिष्यन् अनर्वा यत् शतऽदुरस्य वेदः मन् शिप्रऽदेवान् अभि वर्पसा भूत् ॥ ३ ॥ सः यह्वीः अवनीः गोषु अर्वा आ जुहोति प्रऽधन्यासु सस्निः अपादः यत्र युज्यासः अरथाः द्रोणि-

स्वास ईरते घृतं वाः ॥ ४ ॥ स रुद्रेभिरशंस्तवार ऋभ्वा हिन्वो गयमारेअवद्य आगात्। वम्रस्य मन्ये मिथुना विवव्री अन्नम-भीत्यारोदयन्मुषायन् ॥ ५ ॥ स इद्दासं तुवीरवं पतिर्दन्षळक्षं त्रिंशीर्षाणं दमन्यत्। अस्य वितो त्वोजसा वृधानो विपा वराहमयोअयया हन् ॥ ६ ॥ १४ ॥ स दुह्रेण मनुष ऊर्ध्वसान आ सांविपदंशसानाय शर्ह। स नृतमो नहुषोऽस्मत्सुजातः पुरोऽभिनदर्हन्दस्युहत्ये ॥ ७ ॥ सो अभियो न यवस उदन्यन्क्षयाय गातुं विदन्नो अस्मे। उप यत्सीदद्दिदुं शरीरैः श्येनीऽयो-ऽपाष्टिर्हन्ति दस्यून् ॥ ८ ॥ स ग्राधतः शवसानेभिरस्य कुत्साय शुष्णं कृपणे परादात्। अयं कविमनयच्छस्यमानमत्कं यो अस्य सनितोत नॄणां ॥ ९ ॥ अयं दंशस्यन्नेयँभिरस्य दस्मो देवेभिर्वरुणो न मायी। अयं कनीनं ऋतुपा अवेद्यमिमीतारं यश्चतुष्पात् ॥ १० ॥ अस्य स्तोमेभिरौशिज ऋजिश्वा व्रजं दर-यदृषभेण पिप्रोः। सुत्वा यद्यजतो दीदयद्गीः पुर इयानो अभि वर्पसा भूत् ॥ ११ ॥ एवा महो असुर वक्षथाय वम्रकः पड्विरूपं सर्पदिद्वे। स ईयानः करति स्वस्तिमस्मा इषमूर्जं सु-क्षितिं विश्वमाभाः ॥ १२ ॥ १५ ॥ ८ ॥

॥ १०० ॥ १–१२ दुह्रस्पुर्णादत' ॥ विश्वे देवाः ॥ १–११ जगती । १२ विराट् ॥

॥ १०० ॥ इंद्र इद्धर्यो मघवन्त्सुतमा वदिद्युज इह स्तुतः सुतपा वोधि नो वृधे। देवेभिर्नः सविता प्रावतु श्रुतमा सर्वतातिमदितिं वृणीमहे ॥ १ ॥ भरांय सु भरत भागमृत्वियं प्र वा-यवे शुचिपे क्रंददिष्टये। गौरस्य यः पयसः पीतिमानश आ सर्वतातिमदितिं वृणीमहे ॥ २ ॥ आ नो देवः सविता सांविष-

ऽश्वासः ईरते घृतं वाः० ॥४॥ सः रुद्रेभिः अशस्तऽवारः ऋभ्वा हिन्वी गयं आरेऽअवद्यः आ अगात् वसुऽस्य मन्ये मिथुना विऽवंवी० अचें अभिऽइत्यं अरोदयत् मुपायन् ॥५॥ सः इत् दासं तुविऽरवं यतिः दन् यट्ऽअक्षं चिऽशीर्षाणं दमन्यत् अस्य चितः नु ओजसा वृधानः विपा वराहं अयःऽअयया हन्० ॥६॥१४॥ सः दुह्वणे मनुषे ऊर्ध्वसानः आ साविषत् अशस्तानायं शरुं सः नृऽनमः नहुषः अस्मत् सुऽजातः पुरः अभिनत् अहन् दस्युऽहत्ये ॥७॥ सः अभ्रियः न यवसे उदन्यन् क्षयाय गातुं विदत् नः अस्मे उर्वं यत् सीदत् इंदुं शरीरैः श्येनः अयःऽअपाष्टिः हंति दस्यून् ॥८॥ सः त्राधतः शवसानेभिः अस्य कुत्साय शुष्णं कृपणे परा अदात् अयं कविं अनयत् शस्यमानं अत्कं यः अस्य सनिता उत नृणां ॥९॥ अयं दशस्यन् नर्यैभिः अस्य दस्मः देवेभिः वरुणः न मायी अयं कनीनः ऋतुऽपाः अवेदि अमिमीत अरुं यः चतुःऽपात् ॥१०॥ अस्य स्तोमेभिः औशिजः ऋजिश्वा व्रजं दरयत् वृषभेण पिप्रोः सुत्वा यत् यजतः दीदयत् गीः पुरः इयानः अभि वर्पसा भूत् ॥११॥ एव महः असुर बध्नयाय वसुकः षट्ऽभिः उर्वं सर्पत् इंद्रं सः इयानः करति स्वस्तिं अस्मे इषं ऊर्जं सुऽक्षितिं विश्वं आ अभाः० ॥१२॥१५॥८॥

॥१००॥ इंद्र इह मघऽवन् त्वाऽवंत् इत् भुजे इह स्तुतः सुतऽपाः बोधि नः वृधे देवेभिः नः सविता प्र अवतु श्रुतं आ सर्वऽतातिं अदितिं वृणीमहे ॥१॥ भरायसुभरत् भागं ऋत्वियं प्र वायवे शुचिऽपे क्रंदत्ऽइष्टये गौरस्य यः पयसः पीतिं आनशे आ सर्वऽतातिं अदितिं वृणीमहे ॥२॥ आ नः देवः सविता साविषत्

इयं ऋजूयते यजमानाय सुन्वते। यथा देवान्प्रतिभूषेम पाकवदा सर्वतातिमदितिं वृणीमहे ॥३॥ इंद्रो अस्मे सुमना अस्तु विश्वहा राजा सोमः सुवितस्याध्येतु नः। यथायथा मित्रधितानि संदधुरा सर्वतातिमदितिं वृणीमहे ॥४॥ इंद्र उक्थेन शवसा परुंदधे बृहस्पते प्रतरीतास्यायुपः। यज्ञो मनुः प्रमतिर्नः पिता हि कमा सर्वतातिमदितिं वृणीमहे॥५॥ इंद्रस्य नु सुकृतं दैव्यं सहोऽग्निर्गृहे जरिता मेधिरः कविः। यज्ञस्य भूद्विदथे चारुतमम आ सर्वतातिमदितिं वृणीमहे॥६॥१६॥ न वो गुहा चकृम भूरि दुष्कृतं नाविष्यं वसवो देवहेळनं। माकिर्नो देवा अनृतस्य वर्पस आ सर्वतातिमदितिं वृणीमहे॥७॥ अपामीवां सविता सांविषन्यग्वरीय इदपं सेधंत्वद्रयः। गावा यच्च मधुपुदुच्यते बृहदा सर्वतातिमदितिं वृणीमहे ॥८॥ ऊर्ध्वो गावो वसवोऽस्तु सोतरि विश्वा द्वेपांसि सनुतर्युयोत। स नो देवः सविता पायुरीड्य आ सर्वतातिमदितिं वृणीमहे॥९॥ ऊर्जं गावो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अंग्ध्वे। तनूरेव तन्वो अस्तु भेषजमा सर्वतातिमदितिं वृणीमहे॥१०॥ ऋतुप्रावा जरिता शश्वतामव इंद्र द्रुद्रा प्रमतिः सुतावतां। पूर्णमूर्धदिव्यं यस्य सिक्तय आ सर्वतातिमदितिं वृणीमहे॥११॥ चित्रस्ते भानुः क्रतुमा अभिष्टिः संति स्पृधो जरणिमा अधृष्टाः। रजिष्टया रज्यां मघ्व आ गोसूतूर्पति पर्यये दुवस्युः ॥१२॥१७॥

॥ १०१ ॥ १–१२ युपः सौम्यः ॥ विश्वे देवा ऋत्विजो या ॥ १–३. ७. ८. १०. ११ त्रिष्टुप्। ४. ६ गायत्री। ५ बृहती। ९. १२ जगती ॥

॥१०१॥ उद्बुध्यध्वं समनसः सखायः समग्निमिंध्वं बहवः सनीळाः। दधिक्रामग्निमुषसं च देवीमिंद्रावतोऽवसे नि

वयः चृजुऽयते यजमानाय सुन्वते यथा देवान् प्रतिऽभूषेम पाकऽवत् आ सर्वऽतातिं अदितिं वृणीमहे ॥३॥ इंद्रः असे सुऽमनाः अस्तु विश्वहा राजा सोमः सुवितस्य अधि एतु नः यथाऽयथा मित्रऽधितानि संऽदधुः आ सर्वऽतातिं अदितिं वृणीमहे ॥४॥ इंद्रः उक्थेन शवसा परुः दधे बृहस्पते प्रऽतरीता असि आयुषः यज्ञः मनुः प्रऽमतिः नः पिता हि कं आ सर्वऽतातिं अदितिं वृणीमहे ॥५॥ इंद्रस्य नु सुऽकृतं दैव्यं सहः अग्निः गृहे जरिता मेधिरः कविः यज्ञः च भूत् विदथे चारुः अंतमः आ सर्वऽतातिं अदितिं वृणीमहे ॥६॥१६॥ न वः गुहा चकृम भूरि दुःऽकृतं न आविःऽत्यं वसवः देवऽहेळनं माकिः नः देवाः अनृतस्य वपसः आ सर्वऽतातिं अदितिं वृणीमहे ॥७॥ अप अमीवां सविता साविषत् न्यक् वरीयः इत् अप सेधंतु अद्रयः यावा यत्र मधुऽसुत् उच्यते बृहत् आ सर्वऽतातिं अदितिं वृणीमहे ॥८॥ ऊर्ध्वः यावा वसवः अस्तु सोतरि विश्वा द्वेषांसि सनुतः युयोतु सः नः देवः सविता पायुः ईड्यः आ सर्वऽतातिं अदितिं वृणीमहे ॥९॥ ऊर्जं गावः यवसे पीवः अत्तन ऋतस्य याः सदने कोशे अग्ध्ये तनूः एव तन्वः अस्तु भेषजं आ सर्वऽतातिं अदितिं वृणीमहे ॥१०॥ क्रतुऽप्रावा जरिता शश्वतां अवः इंद्रः इत् भद्रा प्रऽमतिः सुतऽवतां पूर्णः ऊर्धः दिव्यं यस्य सिक्त्यै आ सर्वऽतातिं अदितिं वृणीमहे ॥११॥ चित्रः ते भानुः क्रतुऽप्राः अभिष्टिः संति स्पृधः जरणिऽप्राः अधृष्टाः रजिष्ठया रज्या पन्थः आ गोः तूतूर्षति परि अयं दुवस्युः ॥१२॥१७॥

॥१०१॥ उत् बुध्यध्वं सऽमनसः सखायः सं अग्निं इध्वं बहवः सऽनीळाः दधिऽक्रां अग्निं उषसं च देवीं इंद्रऽवतः अवसे नि

ह्वये वः ॥१॥ मंद्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं कृणुध्वं। इष्कृणुध्वमायुधारं कृणुध्वं प्रांचं यज्ञं प्र णयता सखायः ॥२॥ युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजं। गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात् ॥३॥ सीरा युंजंति कवयो युगा वि तन्वते पृथक्। धीरा देवेषु सुम्नया ॥४॥ निरोहावान्कृणोतन सं वरत्रा दधातन। सिंचामहा अवतमुद्रिणं वयं सुपेकमनुपक्षितं ॥५॥ इष्कृताहावमवतं सुवरत्रं सुपेचनं। उद्रिणं सिंचे अक्षितं ॥६॥१८॥ प्रीणीताश्वान्हितं जयाथ स्वस्तिवाहं रथमित्कृणुध्वं। द्रोणाहावमवतमश्मचक्रमंसचकोशं सिंचता नृपाणं ॥७॥ व्रजं कृणुध्वं स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि। पुरः कृणुध्वमायसीरधृष्टा मा वः सुस्रोच्चमसो दंहता तं ॥८॥ आ वो धियं यज्ञियां वर्त ऊतये देवीं देवा यजता यज्ञियामिह। सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥९॥ आ तू पिंच हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः। परि व्रजध्वं दश कक्ष्याभिरुभे धुरौ प्रति वहिं युनक्त ॥१०॥ उभे धुरौ वहिरापिप्देमानोऽंतर्योनेव चरति द्विजानिः। वनस्पतिं वन आस्थापयध्वं नि घ्रुवं दधिध्वमखनंत उत्सं ॥११॥ कर्मन्नरः कर्मकृतः सचध्वं नि चोदयंत सुदत वाजसातये। निष्टिग्र्यः पुत्रमा च्यावयोतय इंद्रं सवार्य दुह सोमपीतये ॥१२॥१९॥

॥१०२॥ १–१२ मुद्गलो भार्म्यश्वः ॥ देवता इंद्रो वा ॥ १, ३, १२ बृहती । २ ४–११ त्रिष्टुप् ॥

॥१०२॥ प्र ते रथं मिथूकृतमिंद्रोऽवतु धृष्णुया। अस्मिन्नाजौ पुरुहूत श्रवाय्ये धनभक्षेषु नोऽव ॥१॥ उत्स्म वातो

हूये वः॥१॥ मंद्रा कृणुध्वं धियः आ तनुध्वं नावं अरित्रऽपरणीं कृणुध्वं इष्कृणुध्वं आयुधा अरं कृणुध्वं प्रांचं यज्ञं प्र नयत सखायः ॥२॥ युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपत इह बीजं गिरा च श्रुष्टिः सऽभराः असत् नः नेदीयः इत् सृण्यः पक्वं आ इयात् ॥३॥ सीरा युंजंति कवयः युगा वि तन्वते पृथक् धीराः देवेषुं सुम्नऽया ॥४॥ निः आऽहावान् कृणोतन सं वरत्राः दधातन सिंचा-मैहे अवतं उद्रिणं वयं सुऽसेकैः अनुपऽक्षितं ॥५॥ इष्कृतऽआहावं अवतं सुऽवरत्रं सुऽसेचनं उद्रिणं सिंचे अक्षितं ॥६॥१८॥ प्रीणीत अश्वान् हितं जयाथ स्वस्तिऽवाहं रथं इत् कृणुध्वं द्रोणऽआहावं अवतं अश्मंऽचक्रं अंसंवऽकोशं सिंचत नृऽपानं॥७॥ व्रजं कृणुध्वं सः हि वः नृऽपानः वर्मी सीव्यध्वं बहुला पृथूनि पुरः कृणुध्वं आयसीः अधृष्टाः मा वः सुस्रोत् चमसः देवपानं॥८॥ आ वः धियं यज्ञियां वर्तं ऊतये देवीः देवीं यजतां यज्ञियां इह सा नः दुहीयत् यवसाऽइव गत्वी सहस्रंऽधारा पयसा मही गौः॥९॥ आ तु सिंच हरिं इंद्रोः उपऽस्थे वाशीभिः तक्षत अश्मन्ऽमयीभिः परि स्वजध्वं दशं कक्ष्याभिः उभे धुरौ प्रति वहिं युनक्त॥१०॥ उभे धुरौ वहिंः आऽपिप्देमानः अंतःयोनाऽइव चरति द्विऽजानिः वनस्पतिं वने आ अस्थापयध्वं नि सु दधिध्व अखनंतः उत्सं ॥११॥ कपृत् नरः कपृथं उत् दधातन चोदयंत खुदत वाजंऽसातये निष्टिग्र्यः पुरं आ चयवय ऊतये इंद्रंऽसवाधः इह सोमंऽपीतये॥१२॥१९॥

॥१०२॥ प्र ते रथं मिथुऽकृतं इंद्रः अवतु धृष्णुऽया अस्मिन् आजौ पुरुऽहूत श्रवाय्ये धनऽभक्षेषुं नः अव॥१॥ उत् स्म वातः

वहति वासो अस्या अधिरथं यदजयत्सहस्रं। रथीरभून्मुद्गलानी गविष्टौ भरे कृतं व्यचेदिंद्रसेना ॥२॥ अंतर्यच्छ जिघांसतो वज्रमिंद्राभिदासतः। दासस्य वा मघवन्नार्यस्य वा सनुतर्यावया वधं ॥३॥ उन्नो हूदमंपिवज्जहेंषाणः कूटं स्म तृंहदुभिमातिमेति। प्र सुष्कभारः श्रवं इच्छमानोऽजिरं वाहू अंभरत्सिषासन् ॥४॥ न्यंक्रंदयन्नुपयंत एनममेंहयन्वृषभं मध्य आजेः। तेन सूभंर्वं शतवंत्सहस्रं गवां मुद्गलः प्रधनें जिगाय ॥५॥ कर्कर्दवे वृषभो युक्त आसीदवावचीत्सारथिरस्य केशी। दुधेर्युक्तस्य द्रवतः सहानस ऋच्छंति ष्मा निष्पदो मुद्गलानीं ॥६॥२०॥ उत प्रधिमुदहन्नस्य विद्वानुपायुनग्वंसगमत्र शिक्षन्। इंद्र उदावत्पतिमघ्यानामरेंहत पद्याभिः ककुद्मान् ॥७॥ शुनमंष्ट्राव्यचरत्कपर्दी वरत्रायां दावानह्यमानः। नृम्णानिं कृण्वन्बहवे जनांय गाः पस्पशानस्तविषीरधत्त ॥८॥ इमं तं पश्य वृषभस्य युंजं काष्ठाया मध्ये दुघणं शयानं। येनं जिगायं शतवंत्सहस्रं गवां मुद्गलः पृतनाज्येषु ॥९॥ आरे अघा को न्वित्था ददर्श यं युंजंति तम्वा स्थापयंति। नास्मै तृणं नोदकमा भरंत्युत्तरो धुरो वहति प्रदेदिशन् ॥१०॥ परिवृक्तेव पतिविद्यमानद्पीप्यांना कूचक्रेणेव सिंचन्। एषैषा चिद्रथ्या जयेम सुमंगलं सिनवदस्तु सातं ॥११॥ त्वं विश्वस्य जगंतश्चक्षुरिंद्रासि चक्षुषः। वृषा यदाजिं वृषंणा सिषांससि चोदयन्वध्रिणा युजा ॥१२॥२१॥

॥१०३॥ ऋषिरत्र ऐंद्रः ॥ १-३.५-११ इंद्रः। ४ बृहस्पतिः। १२ सप्ता। १३ इंद्रो मरुतो वा ॥ १-१२ त्रिष्टुप्। १३ अनुष्टुप् ॥

॥१०३॥ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्-

वहन्ति वासः अस्याः अधिऽरथं यत् अजयत् सहस्रं रथीः अभूत् मुद्गलानीं गोऽइष्टौ भरे कृतं वि अचेत् इन्द्रऽसेना॥२॥ अंतः यच्छ जिघांसतः वज्रं इन्द्र अभिऽदासंतः दासस्य वा मघऽवन् आर्यस्य वा सनुतः युवय वधं॥३॥ उद्नः हृदं अपिवत् जर्हृषाणः कूटं स्म तृंहत् अभिऽमातिं एति प्र मुष्कऽभारः अवः दुच्छमानः अजिरं बाहू अभरत् सिसासन्॥४॥ नि अक्रंदयन् उपऽयंतः एनं अमेहयन् वृषभं मध्ये आजेः नेनं सूभर्वं शतऽवत् सहस्रं गवां मुद्गलः प्रऽधने जिगाय॥५॥ ककर्दवे वृषभः युक्तः आसीत् अवावचीत् सारथिः अस्य केशी दुधेः युक्तस्य द्रवतः सह अनसा चृच्छंतिं स्म निःऽपदः मुद्गलानीं॥६॥२०॥ उत प्रऽधिं उत् अहन् अस्य विद्वान् उप अयुन क्वंसगं अर्चं शिष्टान् इंद्रः उत् आवत् पतिं अघ्यानां अरंहत पद्याभिः ककुत्ऽमान्॥७॥ शुनं अष्ट्राऽवी अचरत् कपर्दी वरत्रायां दारुं आऽनह्यमानः नृम्णानिं कृण्वन् वहवे जनाय गाः पस्पशानः तविषीः अधत्त॥८॥ इमं तं पश्य वृषभस्य युंजं काष्ठायाः मध्ये दुऽघनं शयानं येन जिगाय शतऽवत् सहस्रं गवां मुद्गलः पृतनाज्येषु॥९॥ आरे अघा कः नु इत्था ददर्श यं युंजंति तं ऊं आ स्थापयंति न अस्मै तृणं न उदकं आ भरंति उत्ऽतरः धुरः वहति प्रऽदेदिशत्॥१०॥ परिवृक्ताऽइव पतिऽविद्या आनृद् पीयाना कूचक्रेणऽइव सिंचन् एयऽएष्या चित् रथ्या जयेम सुऽमंगलं सनेऽवत् अस्तु सातं॥११॥ त्वं विश्वस्य जगतः चक्षुः इंद्र असि चक्षुषः वृषा यत् आजिं वृषणा सिसाससि चोदयन् वज्रिणा युजा॥१२॥२१॥

॥१०३॥ आप्नुः शिशानः वृषभः न भीमः घनाघनः क्षोभणः

ऋषणीनां । संक्रंदनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिंद्रः ॥१॥ संक्रंदनेनानिमिषेण जिष्णुना युत्कारेण दुश्यवनेन धृष्णुना । तदिंद्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥२॥ स इषुहस्तैः स निषंगिभिर्वशी संस्रष्टा स युध इंद्रो गणेन । संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३॥ बृहस्पते परि दीया रथेन रक्षोहामिचाँ अपबाधमानः । प्रभंजन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां ॥४॥ बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः । अभिवीरो अभिसत्वा सहोजा जैत्रमिंद्र रथमा तिष्ठ गोवित् ॥५॥ गोत्रभिदं गोविदं वज्रबाहुं जयंतमज्मं प्रमृणंतमोजसा । इमं सजाता अनु वीरयध्वमिंद्रं सखायो अनु सं रभध्वं ॥६॥२२॥ अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिंद्रः । दुश्यवनः पृतनाषाळयुध्योऽस्माकं सेना अवतु प्र युत्सु ॥७॥ इंद्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देवसेनानामभिभंजतीनां जयंतीनां मरुतो यंत्वग्रं ॥८॥ इंद्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रं । महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥९॥ उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि । उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यंतु घोषाः ॥१०॥ अस्माकमिंद्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयंतु । अस्माकं वीरा उत्तरे भवंत्वस्माँ उ देवा अवता हवेषु ॥११॥ अमीषां चित्तं प्रतिलोभयंती गृहाणांगान्यप्वे परेहि । अभि प्रेहि निर्दह हृत्सु शोकैरंधेनामित्रास्तमसा

चर्षणीनां सꣳऽक्रंदनः अनिऽमिषः एकऽवीरः शतं सेनाः अजयत् साकं इंद्रः॥१॥ सꣳऽक्रंदनेन अनिऽमिषेण जिष्णुना युत्ऽकारेण दुःऽच्यवनेन धृष्णुना तत् इंद्रेण जयत तत् सहध्वं युधः नरः इषुऽहस्तेन वृष्णा॥२॥ सः इषुऽहस्तैः सः निषंगिऽभिः वशी सꣳऽस्रष्टा सः युधः इंद्रः गणेन संसृष्टऽजित् सोमऽपाः बाहुऽशर्धी उग्रऽधन्वा प्रतिऽहिताभिः अस्ता॥३॥ बृहस्पते परि दीय रथेन रक्षोऽहा अमित्रान् अपऽबाधमानः प्रऽभंजन् सेनाः प्रऽमृणः युधा जयन् अस्माकं एधि अविता रथानां॥४॥ बलऽविज्ञायः स्थविरः प्रऽवीरः सहस्वान् वाजी सहमानः उग्रः अभिऽवीरः अभिऽसत्वा सहूःऽजा जैत्रं इंद्र रथं आ तिष्ठ गोऽवित्॥५॥ गोत्रऽभिदं गोऽविदं वज्रऽबाहुं जयंतं अज्मं प्रऽमृणंतं ओजसा इमं सऽजातास अनु वीरयध्वं इंद्रं सखायः अनु सं रभध्वं॥६॥२२॥ अभि गोत्राणि सहसा गाहमानः अदयः वीरः शतऽमन्युः इंद्रः दुःऽच्यवनः पृतनाषाट् अयुध्यः अस्माकं सेनाः अवतु प्र युत्ऽसु॥७॥ इंद्रः आसां नेता बृहस्पतिः दक्षिणा यज्ञः पुरः एतु सोमः देवऽसेनानां अभिऽभंजतीनां जयंतीनां मरुतः यंतु अग्रं॥८॥ इंद्रस्य वृष्णः वरुणस्य राज्ञः आदित्यानां मरुतां शर्धः उग्रं महाऽमनसां भुवनऽच्यवानां घोषः देवानां जयतां उत् अस्थात्॥९॥ उत् हर्षय मघऽवन् आयुधानि उत् सत्वनां मामकानां मनांसि उत् वृत्रऽहन् वाजिनां वाजिनानि उत् रथानां जयतां यंतु घोषाः॥१०॥ अस्माकं इंद्रः समृतेषु ध्वजेषु अस्माकं याः इषवः ताः जयंतु अस्माकं वीराः उत्ऽतरे भवंतु अस्मान् उ देवाः अवत हवेषु॥११॥ अमीषां चित्तं प्रतिऽलोभयंती गृहाणांगानि अप्वे परेहि अभि प्रेहि निः दह हृत्ऽसु शोकैः अंधेन अमित्राः तमसा

सचंतां ॥१२॥ प्रेता जयता नर इंद्रो वः शर्म यच्छतु। उग्रा वः संतु वाहवोऽनाधृष्या यथासथ ॥१३॥२३॥

॥ १०४ ॥ १–११ अष्टको वैश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१०४॥ असावि सोमः पुरुहूत तुभ्यं हरिभ्यां यज्ञमुप याहि तूयं। तुभ्यं गिरो विप्रवीरा इयाना दधन्विर इंद्र पिबा सुतस्य ॥१॥ अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरं पृणस्व। मिमिक्षुर्यमद्रय इंद्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः ॥२॥ प्रोयां पोतिं वृणे द्यमिं सत्यां प्रयै सुतस्य हर्यश्व तुभ्यं। इंद्र धेनाभिरिह मादयस्व धीभिर्विश्वाभिः शच्या गृणानः ॥३॥ उती शचीवस्तव वीर्येण वयो दधाना उशिजं ऋतज्ञाः। प्रजावदिंद्र मनुषो दुरोणे तस्युर्गृणंतः सधमाद्यासः ॥४॥ प्रणीतिभिष्टे हर्यश्व सुष्टोः सुपुम्नस्य पुरुरुचो जनासः। महिष्ठामूतिं वितिरे दधानाः स्तोतारं इंद्र तव सूनृताभिः ॥५॥२४॥ उप ब्रह्माणि हरिवो हरिभ्यां सोमस्य याहि पीतये सुतस्य। इंद्र त्वा यज्ञः क्षमंमाणमानड् दाश्वाँ अध्वरस्य प्रकेतः ॥६॥ सहस्रवाजमभिमातिषाहं सुतेरणं मघवानं सुवृक्तिं। उप भूषंति गिरो अप्रतीतमिंद्रं नमस्या जरितुः पनंत ॥७॥ सप्तापो देवीः सुरणा अमृक्ता याभिः सिंधुमतरं इंद्र पूर्भित्। नवतिं स्रोत्या नव च स्रवंतीर्द्यावेयो गातुं मनुषे च विंदः ॥८॥ अपो महीरभिशस्तेरमुंचोऽजांगरा-स्वधि देव एकः। इंद्र यास्त्वं वृत्रतूर्ये चकर्थ ताभिर्विश्वायुस्त-न्वं पुपुष्याः ॥९॥ वीरेण्यः क्रतुरिंद्रः सुशस्तिरुतापि धेना पुरुहूतमीट्टे। आदंयवृत्रमकृणोदु लोकं ससाहे शत्रूः पृतना अभिष्टिः ॥१०॥ शुनं हुवेम मघवानमिंद्रमस्मिन्भरे नृतमं

सचंतां ॥१२॥ प्र इत् जयंत नरः इंद्रः वः शर्म यच्छतु उग्याः वः संतु बाहवः अनाधृष्याः यथा असथ ॥१३॥२३॥

॥१०४॥ असावि सोमः पुरुऽहूत तुभ्यं हरिऽभ्यां यज्ञं उप याहि नूयं तुभ्यं गिरः विप्रऽवीराः इयानाः दधन्विरे इंद्र पिब सुतस्य ॥१॥ अप्ऽसु धूतस्य हरिऽवः पिब इह नृऽभिः सुतस्य जठरं पृणस्व मिमिघुः यं अद्रयः इंद्र तुभ्यं तेभिः वर्धस्व मदं उक्थऽवाहः ॥२॥ प्र उग्यां पीतिं वृणे इयं मि सत्यां प्रऽयै सुतस्य हरिऽअश्व तुभ्यं इंद्र धेनाभिः इह मादयस्व धीभिः विश्वाभिः शच्या गृणानः ॥३॥ ऊतीशचीऽवः तव वीर्येण वयं दधानाः उशिजः ऋतऽज्ञाः प्रजाऽवत् इंद्र मनुषः दुरोणे तस्थुः गृणंतः सधऽमाद्यासः ॥४॥ प्रनीतिऽभिः ते हरिऽअश्व सुऽस्तोः सुऽसुम्नस्य पुरुऽरुचः जनासः महिष्ठां ऊतिं विऽतिरे दधानाः स्तोतारः इंद्र तव सूनृताभिः ॥५॥२४॥ उप ब्रह्माणि हरिऽवः हरिऽभ्यां सोमस्य याहि पीतये सुतस्य इंद्र त्वा यज्ञः क्षमंमाणं आनट् दाश्वान् असि अध्वरस्य प्रऽकेतः ॥६॥ सहस्रऽवाजं अभिमातिऽसहं सुते ऽरणं मघऽवानं सुऽवृक्तिं उप भूषंति गिरः अप्रतिऽइतं इंद्रं नमस्याः जरितुः पनंत ॥७॥ सप्त आपः देवीः सुऽरणाः अमृक्ताः याभिः सिंधुं अतरः इंद्र पूःऽभित् नवतिं स्रोत्याः नव च स्रवंतीः देवेभ्यः गातुं मनुषे च विंदुः ॥८॥ अपः महीः अभिऽशस्तेः अमुंचः अजागः आसु अधि देवः एकः इंद्र याः त्वं वृत्रऽतूर्ये चकर्थ ताभिः विश्वऽआयुः तन्वे पुपुष्याः ॥९॥ वीरियः ऋतुः इंद्रः सुऽशस्तिः उत अपि धेना पुरुऽहूतं इट्टे आर्दयत् वृत्रं अकृणोत् उ लोकं ससहे शुक्रः मृतनाः अभिष्टिः ॥१०॥ शुनं हुवेम मघऽवानं इंद्रं अस्मिन् भरे नृऽतमं

वाजसातौ। शृण्वंतमुग्रमूतये समत्सु घ्नंतं वृत्राणि संजितं धनानां॥११॥२५॥

॥१०५॥ १–११ कौत्सो दुर्मित्रो नाद्या सुमित्रो गुणत' सुमित्रो वा नाद्या दुर्मित्रो गुणत' ॥ इंद्रः॥ १ उष्णिग्गायत्री पा। २ ७ पिपीलिकमध्या। ३–६ ८–१० उष्णिक्। ११ त्रिष्टुप्॥

॥१०५॥ कदा वसो स्तोत्रं हर्यत आवं शमश्वा रुधद्वाः। दीर्घं सुतं वाताप्याय॥१॥ हरी यस्य सुयुजा विव्रता वेरवंतानु शेपा। उभा रजी न केशिना पतिर्दन्॥२॥ अप योरिंद्रः पापज आ मर्तो न शंश्रमाणो विभीवान्। शुभे यद्युयुजे तविषीवान्॥३॥ सचायोरिंद्रश्चर्कृषऽ ऊँ उपानसः सपर्यन्। नदयोर्विव्रतयोः शूर इंद्रः॥४॥ अधि यस्थौ केशवंता व्यचस्वंता न पुष्ट्यै। वनोति शिप्राभ्यां शिप्रिणीवान्॥५॥२६॥ प्रास्तौद्बप्सौजा ऋष्वेभिस्ततक्ष शूरः शर्वसा। ऋभुर्न ऋतुभिर्मातरिश्वा॥६॥ वज्रं यशक्रे सुहनाय दस्यवे हिरीशो हिरीमान्। अरुजहनुरहुतं न रजः॥७॥ अव नो वृजिना शिशीह्यृचा वनेमानृचः। नाव्रता यज्ञ ऋधग्जोपति त्वे॥८॥ ऊर्ध्वा यत्ते चेतिनी भूद्यज्ञस्य धूर्षु सन्नन्। सजूर्नावं स्वयशसं सचायोः॥९॥ प्रिये ते पृश्निरुपसेचनी भूच्छ्रुये दविरेपाः। यया स्वे पाजे सिंचस उत्॥१०॥ शतं वा यदसुर्यं प्रति त्वा सुमित्र इत्यास्तौद्दुर्मित्र इत्यास्तौत्। आवो यद्दस्युहत्ये कुत्सपुत्रं प्रावो यद्दस्युहत्ये कुत्सवत्सं॥११॥२७॥५॥

॥१०६॥ १–११ भृग्वाश काश्यप' ॥ अश्विनौ ॥ त्रिष्टुप्॥

॥१०६॥ उभा उ नूनं तदिदर्यायेथे वि तन्वाथे धियो वस्त्रापसेव। सधीचीना यातवे प्रेमजीगः सुदिनेव पृक्ष आ तंसयेथे॥१॥ उष्टारेव फर्वरेषु श्रयेथे प्रायोगेव

वाजेऽसाती शूरवंतं उग्रं ऊतये समत्सु भरंतं वृत्राणि संऽजितं धनानां॥११॥२५॥

॥१०५॥ कदा वसो' स्तोत्रं हर्यते आ अर्वं श्मश्रु रुधत्वाः० दीर्घं सुतं वाताप्याय ॥१॥ हरी' यस्य सुऽयुजा विऽअर्वता वेः अर्वंता अनु शेपा उभा रजी' न केशिना पतिः दन्॥२॥ अप योः इंद्रः पार्यजे आ मतेः न श्मश्रुमाणः विभीवान् शुभे यत् युयुजे तविषीऽवान्॥३॥ सचा आयोः इंद्रः चकृपे आ उपानसः सप्-र्यन् नद्योः विऽअर्वतयोः शूरः इंद्रः॥४॥ अधि यः तस्थौ केशंऽवंता व्यचस्वंता न पुष्ट्यै वनोति शिप्राभ्यां शिप्रिणीऽवान्॥५॥२६॥ प्र अस्तौत् ऋभ्वऽओजाः ऋभ्वेभिः ततक्षे शूरः शवसा ऋभुः न क्रतुंऽभिः मातरिश्वा॥६॥ वज्रं यः चक्रे सुऽहनाय दस्यवे हिरी-मशः हिरीमान् अरुतऽहनुः अङ्गुतं न रजः॥७॥ अर्व नः वृजि-ना शिशीहि ऋचा वनेम अनृचः न अर्वता यज्ञः ऋधक् जोष-ति त्वे'॥८॥ ऊर्ध्वा यत् ते चेतिनी भूत् यज्ञस्य धूःऽसु सद्मन् सऽजूः नावं स्वऽयंशसं सचा आयोः॥९॥ स्त्रिये ते पृश्निः उपऽसेचनी भूत् स्त्रिये दर्विः अरेपाः मया स्वे पात्रे सिंचसे उत्॥१०॥ शतं वा यत् असुर्य प्रति त्वा सुऽमित्रः इत्था अस्तौत् दुःऽमित्रः इत्था अ-स्तौत् आवः यत् दस्युऽहत्ये कुत्सऽपुत्रं प्र आवः यत् दस्युऽहत्ये कुत्सऽवत्सं॥११॥२७॥५॥

॥१०६॥ उभौ नूनं तत् इत् अर्यऽईये' वि तन्वाथे' धियः वस्त्रा अपसाऽइव सध्रीचीना यातवे प्र ईं अजीगः' सुदिनाऽइव पृक्षः आ तंसयेथे'॥१॥ उष्टाराऽइव फर्वरेषु श्रयेथे' प्रायोगाऽइव

श्वाच्या शासुरेथः। दूतेव हि ष्ठो यशसा जनेषु मापं स्थातं महि-पेवावपानात् ॥२॥ साकंयुजा शकुनस्येव पक्षा पृक्षेव चित्रा यजुरा गमिष्टं। अग्रिरिव देवयोर्दिद्योसा परिज्मानेव यजथः पुरुत्रा ॥३॥ आपी वो अस्मे पितरेव पुत्रोयेव रुचा नृपतीव तुर्या। इयेंव पुष्ट्यै किरणेवभुज्यै ष्टुंष्टीवानेव हवमा गमिष्टं ॥४॥ वंसगेव यूषयो शिंवाता मित्रेव ऋता शतरा शातपंता। वाजेवोच्चा वयसा घर्म्येष्ठा मेषेवेषा संपर्या३पुरीषा ॥५॥१॥ सृणेव जभरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका। उद्न्यजेव जेमना मदेरू ता मे जराय्वजरं मरायु ॥६॥ पत्रेव चचैरं जारं मरायु क्षत्रेवार्येषु तर्तरीथ उग्रा। ऋभू नापंत्खरमजा खरजुर्वायुने पर्फरत्क्षयद्रयीणां ॥७॥ घर्मेव मधु जठरे सुनेरू भगोऽविता तुर्फरी फारिवारं। पतरेव चचरा चंद्रनिर्णिङ्मनंक्षुगा मनन्या३न जग्मीं ॥८॥ बृहंतेव गंभरेषु प्रतिष्ठां पादेव गाधं तरंते विदाथः। कर्णेव शासुरनु हि स्मराथोऽशेव नो भजतं चित्रमप्नः ॥९॥ आरंगरेव मध्वरेयेषे सारघेव गविं नीचीनंवारे। कीनारेव स्वेदमासिंचिदाना क्षामेवोजा सूयवसात्संचेथे ॥१०॥ ऋध्याम स्तोमं सनुयाम वाजमा नो मंचैं सरथेहोपं यातं। यशो न पक्षं मधु गोषुंतरा भूतांशो अश्विनोः कामंमप्राः ॥११॥२॥

॥ १०७ ॥ १–११ दिव्यो दधिक्रा वा प्राजापत्या ॥ दधिक्रणा सहातारो वा ॥ १–३. ५–११ त्रिष्टुप् । ४ जगती ॥

॥ १०७ ॥ आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निरमोचि। महि ज्योतिः पितृभिर्दत्तमागादुरुः पंथा

श्वाच्यो शासुः आ दुष्टरो दूताऽइव हि स्थः यशसा जनेषु मा अप स्यातं महियाऽइव द्यवऽपानीत॥२॥ साकंऽयुजा शकुनस्यऽइव पक्षा पप्थाऽइव चित्रा यजुंषः आ गमिष्टं अभिःऽइव देवऽयोः दीदिऽवांसा परिज्मानाऽइव यजथः पुरुऽचा॥३॥ आ पी॑वः अस्मे॑ पितरांऽइव युंवा उषाऽइव रुचा नृपतीऽइव॰ तुर्ये इर्योऽइव पुष्टै किरणाऽइव भुज्यै श्रुष्टीवानाऽइव हवं आ गमिष्टं॥४॥ वंसगाऽइव पूपर्यो शिंवातो मिचाऽइव क्रतू शतरो शतपंता वाजाऽइव उच्चा वयसा घर्म्येऽस्था मेषाऽइव द्रुषा सपर्यो पुरीषा॥५॥१॥ सूर्याऽइव जभरी॑ तुफरीतू॑ नैतोशाऽइव तुफरी॑ पफरीका उदन्यजाऽइव जेमना मदेरू॑ ता मे जरायु अजरं मरायु॥६॥ पुजाऽइव चर्चरं जारं मरायु क्षद्मऽइव अर्यपु ततरीथः उषा क्रभू॑ न आ॑पत् खरमजा खरऽजुंः वायुः न पफरत् क्षयत् रयीणां॥७॥ घर्माऽइव मधु जठरे सनेरू॑ भगेऽअविता तुफरी॑ फारिवा अरं पतराऽइव चचरा चंद्रऽनिर्निक् मनःऽक्षंगा मनन्या न जग्मी॑॥८॥ बृहंताऽइव गंभरेषु प्रतिऽस्था पादाऽइव गाधं तरते विदाथः कर्णाऽइव शासुः अनु हि सरायः अंशाऽइव नः भजतं चित्रं अभ्रः॥९॥ आरंगराऽइव मधु आ ईरयेथे॑ सारघाऽइव गवि नीचीनऽबारे कीनाराऽइव स्वेदे आऽसिस्विदाना क्षामऽइव ऊर्जा सुयवसऽअत् सचेथे॑॥१०॥ क्रुध्यामं स्तोमं सतुयामं वाजं आ नः मंचं सऽरथा इह उप यातं यशः न पक्वं मधु गोषु अंतः आ भूतऽअंशः अश्विनोः कामं अप्राः॥११॥२॥

॥१०७॥ आविः अभूत् महि माघोनं एषां विश्वं जीवं तमसः निः अमोचि महि ज्योतिः पितृऽभिः दत्तं आ अगात् उरुः पंथाः

दक्षिणाया अदर्शि॥१॥ उच्चा दिवि दक्षिणावंतो अस्थुर्ये अश्व-दाः सह ते सूर्येण। हिरण्यदा अमृतत्वं भजंते वासोदाः सोम प्र तिरंत आयुः॥२॥ दैवी पूर्तिर्दक्षिणा देवयज्या न कवारिभ्यो नहि ते पृणंति। अथा नरः प्रयतदक्षिणासोऽवद्यभिया बहवः पृणंति॥३॥ शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते हविः। ये पृणंति प्र च यच्छंति संगमे ते दक्षिणां दुहते सप्तमातरं॥४॥ दक्षिणावान्प्रथमो हूत एति दक्षिणावान्यामणीरग्रमेति। तमेव मन्ये नृपतिं जनानां यः प्रथमो दक्षिणामाविवाय॥५॥३॥ तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासं। स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध॥६॥ दक्षिणाश्वं दक्षिणा गां ददाति दक्षिणा चंद्रमुत यद्धिरण्यं। दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन्॥७॥ न भोजा मम्रुर्न न्यर्थमीयुर्न रिष्यंति न व्यथंते ह भोजाः। इदं यद्विश्वं भुवनं स्वश्चैतत्सर्वं दक्षिणाभ्यो ददाति॥८॥ भोजा जिग्युः सुरभिं योनिमग्रे भोजा जिग्युर्वध्वं१या सुवासाः। भोजा जिग्युरंतःपेयं सुरायां भोजा जिग्युर्ये अहूताः प्रयंति॥९॥ भोजायाश्वं सं मृजंत्याशुं भोजायास्ते कन्या२शुंभमाना। भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रं॥१०॥ भोजमश्वाः सुष्ठुवाहो वहंति सुवृद्रथो वर्तते दक्षिणायाः। भोजं देवासोऽवता भरेषु भोजः शत्रून्त्समनीकेषु जेता॥११॥४॥

॥१०८॥ १ ३. ५. ७. ९ पणयोऽसुराः। २. ४. ६ ८. १०. ११ सरमा देवशुनी॥ १ ३. ५. ७. ९ सरमा। २. ४. ६. ८. १०. ११ पणयः॥ त्रिष्टुप्॥

॥१०८॥ किमिच्छंती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः

दक्षिणायाः अदर्शि॥१॥ उच्चा दिवि दक्षिणाऽवंतः अस्युः ये अश्वऽदाः सह ते सूर्येण हिरण्यऽदाः अमृतऽत्वं भजंते वासःऽदाः सोम प्रतिरंते आयुः॥२॥ दैवीं पूर्तिः दक्षिणा देवऽयज्या न कवऽअरिभ्यः नहि ते पूर्णंति अर्थं नरः प्रयंतऽदक्षिणासः अवद्यऽभिया बहवः पृणंति॥३॥ शतऽधारं वायुं अर्कं स्वःऽविदं नृऽचक्षसः ते अभि चक्षते हविः ये पृणंति प्र च यच्छंति संऽगमे ते दक्षिणां दुहते सप्तऽमातरं॥४॥ दक्षिणाऽवान् प्रथमः हूतः एति दक्षिणाऽवान् यामऽनीः अर्यं एति तं एव मन्ये नृऽपंति जनानां यः प्रथमः दक्षिणां आऽविवाय॥५॥३॥ तं एव ऋषिं तं ऊं ब्रह्माणं आहुः यज्ञऽन्यं सामऽगां उक्थऽशसं सः शुक्रस्य तन्वः वेद तिस्रः यः प्रथमः दक्षिणया ररार्ध॥६॥ दक्षिणा अश्वं दक्षिणा गां ददाति दक्षिणा चंद्रं उत यत् हिरण्यं दक्षिणा अन्नं वनुते यः नः आत्मा दक्षिणां वर्मं कृणुते विऽजानन्॥७॥ न भोजाः ममुः न निऽअर्थं ईयुः न रिष्यति न व्यथते ह भोजाः इदं यत् विश्वं भुवनं स्वः० च एतत् सर्वं दक्षिणा एभ्यः ददाति॥८॥ भोजाः जिग्युः सुरभि योनिं अर्यं भोजाः जिग्युः वध्यं या सुऽवासाः भोजाः जिग्युः अंतःऽपेयं सुरायाः भोजाः जिग्युः ये अहूताः प्रऽयंति॥९॥ भोजाय अश्वं सं मृजंति आशुं भोजाय आस्ते कन्या शुभमाना भोजस्य इदं पुष्करिणीऽइव वेश्म परिऽकृतं देवमानाऽइव चित्रं॥१०॥ भोजं अश्वाः सुधुऽवाहः वहंति सुऽवृत् रथः वर्तते दक्षिणायाः भोजं देवासः अवत भरेषु भोजः शत्रून् संऽअनीकेषु जेता॥११॥४॥

॥१०८॥ किं इच्छंती सरमा प्रऽइदं आनट् दूरे ह्यध्वा जगुरिः

पराचैः। कास्मेहितिः का परितक्म्यासीत्क्यं रसाया अतरः पयाँसि॥१॥ इंद्रस्य दूतीरिषिता चरामि महः इच्छंती पणयो निधीन्वः। अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयाँसि॥२॥ कीदृङिंद्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात्। आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति॥३॥ नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात्। न तं गूहंति स्रवतो गभीरा हता इंद्रेण पणयः शयध्वे॥४॥ इमा गावः सरमे या ऐच्छः परि दिवो अंतान्सुभगे पतंती। कस्त एना अव सृजादयुध्युतास्माकमायुधा संति तिग्मा॥५॥५॥ असेन्या वः पणयो वचांस्यनिषव्यास्तन्वः संतु पापीः। अधृष्टो व एतवा अस्तु पंथा बृहस्पतिर्व उभया न मृळात्॥६॥ अयं निधिः सरमे अद्रिबुध्नो गोभिरश्वेभिर्वसुभिर्न्यृष्टः। रक्षंति तं पणयो ये सुगोपा रेकु पदमलकमा जगंथ॥७॥ एह गमन्नृषयः सोमशिता अयास्यो अंगिरसो नवग्वाः। त एतमूर्वं वि भजंत गोनामथैतद्वचः पणयो वमन्नित्॥८॥ एवा च त्वं सरम आजगंथ प्रबाधिता सहसा दैव्येन। स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम॥९॥ नाहं वेद भातृत्वं नो स्वसृत्वमिंद्रो विदुरंगिरसश्च घोराः। गोकामा मे अच्छदयन्यदायमपात इत पणयो वरीयः॥१०॥ दूरमित पणयो वरीय उद्गावो यंतु मिनतीर्बृतेनं। बृहस्पतिर्या अविंदद्विगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः॥११॥६॥

॥१०९॥ १–७ बृहस्पतिर्वसिष्ठो वा मैत्रावरुणो वा ऋषिः॥ विश्वे देवाः॥ १–५ त्रिष्टुप्। ६.७ अनुष्टुप्॥

॥१०९॥ तेऽवदन्प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलि-

परा॒चैः का अ॒स्मेऽहि॑तिः का परि॑ऽतक्म्या आ॒सी॒त् कथं॑ र॒सायाः॑ अ॒तरः॑ पयाँसि ॥१॥ इंद्रस्य दू॒तीः इ॒षि॒ता चरा॑मि म॒हः इ॒च्छंती॑ पण॒यः नि॒ऽधीन् वः॑ अ॒ति॒ऽस्कदः॑ भि॒यसा॑ तत् नः॑ आ॒व॒त् तथा॑ र॒सायाः॑ अ॒तरं॑ पयाँसि॥२॥ कीह॑ड् इंद्रः॑ सरमे॑ का ह॒ग्गी॑का यस्य॑ इ॒दं दू॒तीः अस॑रः परा॒कात् आ च॒ गच्छा॑त् मि॒त्रं एन॑ दधाम॒ अथ॑ गवां॑ गोऽप॑तिः नः॑ भवाति ॥३॥ न अ॒हं तं वे॒द॒ दभ्यं॑ दभ॑त् सः यस्य॑ इ॒दं दू॒तीः अस॑रं परा॒कात् न तं गू॑हंति॒ स्रव॑तः गभी॒राः ह॒ताः इंद्रे॑ण पण॒यः श॒यध्वे॑ ॥४॥ इ॒माः गावः॑ सरमे॑ याः ऐ॒च्छः परि॑ दि॒वः अं॒तान् सु॒ऽभगे॒ पत॑ंती कः ते॒ एनाः॑ अव॑ सृजात् अयु॑ध्वी उ॒त अ॒स्माकं॑ आयु॑धा सं॒ति॒ ति॒ग्मा ॥५॥५॥ अ॒से॒न्या वः॑ पण॒यः वचाँसि अ॒नि॒षु॒व्याः॑ अ॒न्त्वः॑ सं॒तु॒ पा॒पीः॑ अधृ॑ष्टः वः॑ एत॒वै अ॑स्तु॒ पंथाः॑ बृहस्प॑तिः वः॑ उ॒भया॑ न मृळात्॥६॥ अ॒यं नि॒ऽधिः स॒र॒मे॒ अद्रि॑ऽवुग्नः गोभिः॑ अश्वे॑भिः वसु॑ऽभिः नि॒ऽगृ॑ष्टः रक्षं॑ति तं पण॒यः ये सु॒ऽगोपाः॑ रेकु॑ पदं अ॒लक॑ं आ ज॒गं॑थ ॥७॥ आ इ॒ह ग॒मन् ऋ॒षय॑ः सोम॑ऽशिताः अ॒या॒स्यः॑ अं॒गि॒रसः॑ नव॑ऽग्वाः ते एतं॑ ऊ॒र्वं॑ वि भ॑जंत॒ गोना॑म् अथ॑ एतत् वचः॑ पण॒यः॑ वम॑न् इत् ॥८॥ एव च॒ त्वं स॒र॒मे॒ आऽज॑गंथ प्रऽबा॑धिता सहसा दै॒व्येन॑ स्वसा॑रं त्वा॒ कृ॒णवै॒ मा पुनः॑ गाः॑ अथ॑ ते॒ गवां॑ सु॒ऽभगे॑ भजाम ॥९॥ न अ॒हं वे॒द॒ भ्रातृ॑ऽत्वं नो॑ स्वसृ॑ऽत्वं इंद्रः॑ विदुः॑ अं॒गि॒रसः॑ च॒ घो॒राः गोऽका॑माः मे॒ अ॒च्छ॒दयन् यत् आय॑न् अप॑ अ॒ता॒रः॒ इत॒ पण॒यः॒ वरी॑यः ॥१०॥ दूरं इ॒त॒ पण॒यः॒ वरी॑यः उत् गाव॑ः यंतु मिनतीः ऋ॒तेन॑ बृहस्प॑तिः याः अ॒वि॒दत् नि॒ऽगू॑ळ्हाः सोमः॑ पा॒वा॒णः ऋ॒षय॑ः च॒ विप्राः॑ ॥११॥६॥

॥१०९॥ ते अ॒व॒दन् प्र॒थ॒माः ब्र॒ह्म॒ऽकि॒ल्बि॒षे अ॒कू॒पा॒रः स॒लि॒-

लो मातरिश्वा। वीळुहरास्तप उग्रो मयोभूरापो देवीः प्रथमजा ऋतेन॥१॥ सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणीयमानः। अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय॥२॥ हस्तेनैव ग्राह्य आधिरस्या ब्रह्मजायेयमिति चेदवोचन्। न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ॥३॥ देवा एतस्यामवदंत पूर्वे सप्तऋषयस्तपसे ये निषेदुः। भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन्॥४॥ ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमंगं। तेन जायामन्वविंदद्बृहस्पतिः सोमेन नीतां जुह्वा न देवाः॥५॥ पुनर्वै देवा अददुः पुनर्मनुष्या उत। राजानः सत्यं कृण्वाना ब्रह्मजायां पुनर्ददुः॥६॥ पुनर्दाय ब्रह्मजायां कृत्वी देवैर्निकिल्विषं। ऊर्जं पृथिव्या भक्तायोरुगायमुपासते॥७॥७॥

॥ ११० ॥ १–११ जमदग्निर्ब्रह्मतुतो वा रामः ॥ आग्निः ॥ त्रिष्टुप् ॥

॥११०॥ समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः। आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः॥१॥ तनूनपात्पथ ऋतस्य यानान्मध्वा समंजन्त्स्वदया सुजिह्व। मन्मानि धीभिरुत यज्ञमृंधन्देवत्रा च कृणुह्यध्वरं नः॥२॥ आजुह्वान ईड्यो वंद्यश्चा याह्यग्ने वसुभिः सजोषाः। त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान्॥३॥ प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नां। व्युं प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनं॥४॥ व्यचस्वतीरुर्विया वि श्रयंतां पतिभ्यो न जनयः शुंभमानाः। देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भ-

लः मातरिश्वा वीळुऽहराः तपः उग्रः मयःऽभूः आपः देवीः प्रथमऽजाः ऋतेन ॥१॥ सोमः राजा प्रथमः ब्रह्मऽजायां पुनः प्र अयच्छत् अहणीयमानः अनुऽऋतिता वरुणः मित्रः आसीत् अग्निः होता हस्तऽगृह्य आ निनाय ॥२॥ हस्तेन एव ग्राह्यः आऽधिः अस्याः ब्रह्मऽजायाः इयं इति च इत् अवोचन् न दूताय प्रऽहये तस्ये एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ॥३॥ देवाः एतस्यां अवदंत पूर्वे सप्तऽऋषयः तपसे ये निऽसेदुः भीमा जाया ब्राह्मणस्य उपऽनीता दुःऽधां दधाति परमे विऽओमन् ॥४॥ ब्रह्मऽचारी चरति वेविषत् विषः सः देवानां भवति एकऽअंगः तेन जायां अनु अविंदत् बृहस्पतिः सोमेन नीतां जुह्वं न देवाः ॥५॥ पुनः वै देवाः अददुः पुनः मनुष्याः उत राजानः सत्यं कृण्वानाः ब्रह्मऽजायां पुनः ददुः ॥६॥ पुनःऽदाय ब्रह्मऽजायां कृत्वी देवैः निऽकिल्विषं ऊर्जं पृथिव्याः भक्षाय उरुऽगायं उप आसते ॥७॥७॥

॥ ११० ॥ संऽइद्धः अद्य मनुषः दुरोणे देवः देवान् यजसि जातऽवेदः आ च वह मित्रऽमहः चिकित्वान् त्वं दूतः कविः असि प्रऽचेताः ॥१॥ तनूऽनपात् पथः ऋतस्य यानान् मध्वा संऽअंजन् स्वदया सुऽजिह्व मन्मानि धीभिः उत यज्ञं ऋंधन् देवऽत्रा च कृणुहि अध्वरं नः ॥२॥ आऽजुह्वानः ईड्यः वंद्यः च आ याहि अग्ने वसुऽभिः सऽजोषाः त्वं देवानां असि यह्व होता सः एनान् यक्षि इषितः यजीयान् ॥३॥ प्राचीनं बर्हिः प्रऽदिशा पृथिव्याः वस्तोः अस्याः वृज्यते अग्रे अह्नां वि ऊं प्रथते विऽतरं वरीयः देवेभ्यः अदितये स्योनं ॥४॥ व्यचस्वतीः उर्विया वि श्रयंतां पतिऽभ्यः न जनयः शुंभमानाः देवीः द्वारः बृहतीः विश्वंऽइन्वाः देवेभ्यः भ-

वत सुप्रायणाः ॥५॥८॥ आ सुष्वयंती यजते उपाके उषासानक्ता सदतां नि योनौ। दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने ॥६॥ दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै। प्रचोदयंता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशंता ॥७॥ आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयंती। तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदंतु ॥८॥ य इमे द्यावापृथिवी जनित्वी रूपैरपिंशद्भुवनानि विश्वा। तमद्य होतरिषितो यजीयान्देवं त्वष्टारमिह यक्षि विद्वान् ॥९॥ उषावंसृज त्मन्या समंजन्देवानां पाथ ऋतुथा हवींषि। वनस्पतिः शमिता देवो अग्निः स्वदंतु हव्यं मधुना घृतेन ॥१०॥ सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः। अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदंतु देवाः ॥११॥ ९॥

॥ १११ ॥ १–१० मनीषिण ऐडयः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१११॥ मनीषिणः प्र भरध्वं मनीषां यथायथा मतयः संति नृणां। इंद्रं सत्यैरेरयामा कृतेभिः स हि वीरो गिर्वणस्युर्विदानः ॥१॥ ऋतस्य हि सदसो धीतिरद्यौत्सं गोर्न्ययो वृषभो गोभिरानट्। उदंतिष्टत्रविषेण रवेण महांति चित्सं विव्याचा रजांसि ॥२॥ इंद्रः किल श्रुत्या अस्य वेद स हि जिष्णुः पथिकृत्सूर्याय। आन्मेनां कृष्णत्वच्युतो भुवनोः पतिर्दिवः संनजा अमंतीतः ॥३॥ इंद्रो महा महतो अर्णवस्य व्रतामिनादंगिरोभिर्गृणानः। पुरूणि चिच्चि तंताना रजांसि दाधार यो धरुणं सत्यतातां ॥४॥ इंद्रो दिवः प्रतिमानं पृथिव्या विश्वा वेद सवना हंति शुष्णं। महीं चिद्यामातनोदु-

वत् सुप्रऽअयनाः॥५॥८॥ आ सुस्वयंती यजते उपाके उषासानक्ता सदतां नि योनौ दिव्ये योपस्थे बृहती सुऽरुक्मे अधि श्रियं शुक्रऽपिशं दधाने॥६॥ देव्या होतारा प्रथमा सुऽवाचा मिमाना यज्ञं मनुषः यजध्यै प्रऽचोदयंता विदथेषु कारू प्राचीनं ज्योतिः प्रऽदिशा दिशंता॥७॥ आ नः यज्ञं भारती तूयं एतु इळा मनुष्वत् इह चेतयंती तिस्रः देवीः बर्हिः आ इदं स्योनं सरस्वती सुऽअयसः सदंतु॥८॥ यः इमे द्यावापृथिवी जनित्वी रूपैः अपिंशत् भुवनानि विश्वा तं अद्य होतः इषितः यजीयान् देवं त्वष्टारं इह यक्षि विद्वान्॥९॥ उपऽअवसृज त्मन्या समंऽअंजन् देवानां पाथः चतुरा हवींषि वनस्पतिः शमिता देवः अग्निः स्वदंतु हव्यं मधुना घृतेन॥१०॥ सद्यः जातः वि अमिमीत यज्ञं अग्निः देवानां अभवत् पुरःऽगाः अस्य होतुः प्रऽदिशि ऋतस्य वाचि स्वाहाऽकृतं हविः अदंतु देवाः॥११॥९॥

॥१११॥ मनीषिणः प्रभरध्वं मनीषां यथाऽयथा मतयः संति नृणां इंद्रं सत्यैः आ ईरयाम कृतेभिः सः हि वीरः गिर्वणस्युः विदानः॥१॥ ऋतस्य हि सदसः धीतिः अद्यौत् सं गाष्टेयः वृषभः गोभिः आनट् उत् अतिष्ठत् तविषेण रवेण महांति चित् सं विव्याच रजांसि॥२॥ इंद्रः किलं श्रुत्यं अस्य वेद सः हि जिष्णुः पथिऽकृत् सूर्यायै अतनेनां कृण्वन् अर्चुतः भुवत् गोः पतिः दिवः सनऽजाः अप्रतिऽइतः॥३॥ इंद्रः महा महतः अर्णवस्य व्रता अमिनात् अंगिरःऽभिः गृणानः पुरूणि चित् नि ततान रजांसि दाधार यः धरुणं सत्यऽतातां॥४॥ इंद्रः दिवः प्रतिऽमानं पृथिव्याः विश्वा वेद सवना हंति शुष्णं महीं चित् द्यां आ अतनोत्

त्सूर्येण चास्कंभ चित्कंभनेन स्कभीयान्॥५॥१०॥ वज्रेण हि वृत्र-हा वृत्रमस्तरदेवस्य शूशुवानस्य मायाः। वि धृष्णो अत्र धृषता जघंथाथाभवो मघवन्बाह्वोजाः॥६॥ सचैत यदुपसः सूर्येण चि-त्रामस्य केतवो रामविंदन्। आ यच्चक्षंद्दशये दिवो न पुनर्यतो नकिरद्धा नु वेद॥७॥ दूरं किल प्रथमा जग्मुरासामिंद्रस्य याः प्रसवे ससुरापः। क्व स्विदर्यं क्व वुध्न आसामापो मध्यं क्व वो नूनमंतः॥८॥ सृजः सिंधूँरहिना जयसानाँ आदित्ता: प्र विविज्रे जवेन। मुमुक्षमाणा उत या मुमुच्रेऽधेदेता न रमंते नितिक्ताः॥९॥ सध्रीचीः सिंधुमुशतीरिवायन्त्सनाज्जार आरितः पूर्भि-दासां। अस्तमा ते पार्थिवा वसून्यस्मे जग्मुः सूनृता इंद्र पूर्वीः॥१०॥११॥

॥ ११२ ॥ १–१० नभःप्रभेदनो वैरूपः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥११२॥ इंद्र पिब प्रतिकामं सुतस्य प्रातःसावस्तव हि पूर्वपीतिः। हर्षस्व हंतवे शूर शत्रूनुक्थेभिष्टे वीर्या३ प्र ववाम॥१॥ यस्ते रथो मनसो जवीयानेंद्र तेन सोमपेयाय याहि। तूयमा ते हरयः प्र द्रवंतु येभिर्यासि वृषभिर्मंदमानः॥२॥ ह-रित्वता वर्चसा सूर्यस्य शैधे रूपैस्तन्वं स्पर्शयस्व। अस्माभिरिंद्र सखिभिर्हुवानः सध्रीचीनो मादयस्वा निषद्य॥३॥ यस्य त्यच्छे महिमानं मदेष्विमे मही रोदसी नाविविक्तां। तदोक आ हरिभिरिंद्र युक्तैः प्रियेभिर्याहि प्रियमन्नमच्छ॥४॥ यस्य शश्वत्पपिवाँ इंद्र शत्रूननानुकृत्या रणा चकर्थ। स ते पुरंधिं तविषीमियर्ति स ते मदाय सुत इंद्र सोमः॥५॥१२॥ इदं ते पात्रं सनवित्तमिंद्र पिबा सोममेना शंतक्रतो। पूर्णं आहावो मंदिरस्य मध्यो यं विश्व इदभिहर्यंति देवाः॥६॥ वि हि त्वा-

सूर्येण चास्कंभे चित् स्कंभनेन स्कभीयान् ॥५॥१०॥ वज्रेण हि वृत्रऽहा वृत्रं अस्तः अदेवस्य मूर्णुवानस्य मायाः वि धृष्णो अत्र धृषता जघंथ अर्ष अभवः मघऽवन् बाहुऽओजाः ॥६॥ सचंत यत् उषसः सूर्येण चित्रां अस्य केतवः रां अविंदन् आ यत् नक्षंचं दर्हशे दिवः न पुनः यतः नकिः अद्धा नु वेद् ॥७॥ दूरं किलं प्रथमाः जग्मुः आसां इंद्रस्य याः मऽस्वे ससुः आपः कं स्वित् अर्यं कं वुधः आसां आपः मध्यं कं वः नूनं अंतः ॥८॥ सृजः सिंधून् अहिना जग्यसानान् आत् इत् एताः प्र विविज्रे जवेन मुमुक्षमाणाः उत याः मुमुचे अध इत् एताः न रमंते निऽतिक्ताः ॥९॥ सध्रीचीः सिंधुं उशतीः ऽइव आयन् सनात् जारः आरितः पूःऽभित् आसां अस्तं आ ते पार्थिवा वसूनि अस्मे जग्मुः सूनृताः इंद्र पूर्वीः ॥१०॥११॥

॥११२॥ इंद्र पिब प्रतिऽकामं सुतस्य प्रातःऽसावः तव हि पूर्वेऽपीतिः हर्षस्व हंतवे शूर शत्रून् उक्थेभिः ते वीर्या प्र ब्रवाम ॥१॥ यः ते रथः मनसः जवीयान् आ इंद्र तेन सोमऽपेयाय याहि तूयं आ ते हरयः प्रऽद्रवंतु येभिः यासि वृषऽभिः मंदमानः ॥२॥ हरिऽवता वर्चसा सूर्यस्य श्रेष्ठैः रूपैः तन्वं स्पर्शयस्व अस्माभिः इंद्र सखिऽभिः हुवानः सध्रीचीनः मादयस्व निऽसद्य ॥३॥ यस्य त्यत् ते महिमानं मदेषु द्रमे महीं रोदसी न अविंविक्तां तत् ओकः आ हरिऽभिः इंद्र युक्तैः प्रियेभिः याहि प्रियं अन्नं अच्छ ॥४॥ यस्य शश्वत् पपिऽवान् इंद्र शत्रून् अननुऽकृत्या रणया चकर्थ सः ते पुरंऽधिं तविषीं इयर्ति सः ते मदाय सुतः इंद्र सोमः ॥५॥१२॥ इदं ते पात्रं सनऽवित्तं इंद्र पिब सोमं एना शतऽक्रतो पूर्णः आऽहावः मदिरस्य मध्वः यं विश्वे इत् अभिऽहर्यंति देवाः ॥६॥ वि हि त्वां

मिंद्र पुरुधा जनांसो हितप्रयसो वृषभ हूयंते। अस्माकं ते मधुमत्तमानीमा भुवन्त्सवना तेषु हर्य ॥७॥ प्र तं इंद्र पूर्व्याणि प्र नूनं वीर्या वोचं प्रथमा कृतानि। सतीनमन्युरथथायो अद्रिं सुवेदनामकृणोर्ब्रह्मणे गां ॥८॥ नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनां। न ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्चं ॥९॥ अभिख्या नो मघवन्नाधमानान्त्सखे बोधि वसुपते सखीनां। रणं कृधि रणकृत्सत्यशुष्माभक्ते चिदा भजा राये अस्मान् ॥१०॥ ११३॥ ९॥

॥ ११३ ॥ १–१० शतप्रभेदनो वैरूपः ॥ इंद्रः ॥ १–९ भगती। १० त्रिष्टुप् ॥

॥११३॥ तमस्य द्यावापृथिवी सचेतसा विश्वेभिर्देवैरनु शुष्ममावतां। यदैत्कृण्वानो महिमानमिंद्रियं पीत्वी सोमस्य क्रतुमाँ अवर्धत ॥१॥ तमस्य विष्णुर्महिमानमोजसांशुं दधन्वान्मधुनो वि रप्शते। देवेभिरिंद्रो मघवा सयावभिर्वृत्रं जघन्वाँ अभवद्वरेण्यः ॥२॥ वृत्रेण यद्हिना विभ्रदायुधा समस्थिथा युधये शंसमाविदे। विश्वे ते अत्र मरुतः सह त्मनावर्धन्नुग्र महिमानमिंद्रियं ॥३॥ जज्ञान एव व्यबाधत स्पृधः प्रापश्यद्वीरो अभि पौंस्यं रणे। अवृश्चदद्रिमव सस्यदः सृजदस्तभ्नान्नाकं स्वपस्यया पृथुं ॥४॥ आदिंद्रः सचा तविषीरपत्यत वरीयो द्यावापृथिवी अवाधत। अवाभरद्वृषितो वज्रमायसं शेवं मित्राय वरुणाय दाशुषे ॥५॥१४॥ इंद्रस्याच तविषीभ्यो विरप्शिनं ऋघायतो अरंहयंत मन्यवे। वृत्रं यदुग्रो व्यवृश्चदोजसापो विभ्रतं तमसा परीवृतं ॥६॥ या वीर्याणि प्रथमानि कर्त्वा महित्वेभिर्यतमानी समीयतुः। ध्वांतं तमोऽवं दध्वसे हत इंद्रो मह्ना पूर्वहूतावन-

इंद्र पुरुधा जनासः हितऽप्रयसः वृषभ हूयंते अस्माकं ते मधुमत्ऽतमानि इमा भुवन् सवना तेषु हर्य ॥७॥ प्र ते इंद्र पूर्व्याणि प्र नूनं वीर्या वोचं प्रथमा कृतानि सतीनऽमन्युः अप्रथयः अद्रिं सुऽवेदनां अकृणोः ब्रह्मणे गां॥८॥ नि सु सीद गणऽपते गणेषु त्वां आहुः विप्रऽतमं कवीनां न ऋते त्वत् क्रियते किं चन आरे महां अर्कं मघऽवन् चित्रं अर्च ॥९॥ अभिऽख्या नः मघऽवन् नाधमानान् सखे बोधि वसुऽपते सखीनां रणं कृधि रणऽकृत् सत्यऽशुष्म अर्भके चित् आभज राये अस्मान्॥१०॥१३॥९॥

॥११३॥ तं अस्य द्यावापृथिवी सऽचेतसा विश्वेभिः देवैः अनुं शुष्मं आवतां यत् ऐत् कृष्वानः महिमानं इंद्रियं पीत्वी सोमस्य क्रतुऽमान् अवर्धत ॥१॥ तं अस्य विष्णुः महिमानं ओजसा अंशुं दुधन्वान् मधुनः वि रप्शते देवेभिः इंद्रः मघऽवा सयावऽभिः वृत्रं जघन्वान् अभवत् वरेण्यः॥२॥ वृत्रेण यत् अहिना बिभ्रत् आयुधा संऽअस्थिथाः युधये शंसं आऽविदे विश्वे ते अत्र मरुतः सह त्मना अवर्धन् उग्र महिमानं इंद्रियं॥३॥ जज्ञानः एव वि अबाधत स्पृधः प्र अपश्यत् वीरः अभि पौंस्यं रणं अवृश्चत् अद्रिं अवंसऽस्यदः सृजत् अस्तभात् नाकं सुऽअपस्यया पृथुं॥४॥ आत् इंद्रः सचा तविषीः अपत्यत वरीयः द्यावापृथिवी अबाधत अवं अभरत् धृषितः वज्रं आयसं शेवं मित्राय वरुणाय दाशुषे॥५॥ ॥१४॥ इंद्रस्य अत्र तविषीभ्यः विऽरप्शिनः कृधायतः अरंहयंत मन्यवे वृत्रं यत् उग्रः वि अवृश्चत् ओजसा अपः बिभ्रत तमसा परिऽवृतं॥६॥ या वीर्याणि प्रथमानि कर्वी महिऽत्वेभिः यतमानौ संऽईयतुः ध्वांतं तमः अव दध्वसे हते इंद्रः महा पूर्वऽहूतौ अ-

पत्यत ॥७॥ विश्वे देवासो अध वृष्ण्यानि ते ऽवर्धयन्त्सोमवत्या वचस्यया। रङ्गं वृचमहिमिंद्रस्य हन्मनाग्निर्न जंभैस्तृष्वन्नमाव-यत् ॥८॥ भूरि दक्षेभिर्वचनेभिर्ऋक्वभिः सख्येभिः सख्यानि प्र वोचत। इंद्रो धुनिं च चुमुरिं च दंभयञ्छ्युद्यामनस्या शृणुते द-भीतये ॥९॥ त्वं पुरूण्या भरा स्वर्ण्या येभिर्मंसै निवचनानि शं-सन्। सुगेभिर्विश्वा दुरिता तरेम विदो षु ण उर्विया गाधमद्य ॥१०॥१५॥

॥११४॥ १–१० सप्तर्षिरूपो धर्मो वा तापसः ॥ विश्वे देवाः ॥ १–३ ५–१० त्रिष्टुप्। ४ जगती ॥

॥११४॥ घर्मा समंता त्रिवृतं व्यापतुस्तयोर्जुष्टिं मात-रिश्वा जगाम। दिवस्पयो दिधिषाणा अवेषन्विदुर्देवाः स-हसामानमर्कै ॥१॥ तिस्रो देष्ट्राय निर्ऋतीरुपासते दीर्घ-श्रुतो वि हि जानंति वह्नयः। तासां नि चिक्युः कवयो निदानं परेषु या गुह्येषु व्रतेषु ॥२॥ चतुष्कपर्दा युवतिः सुपेशा घृत-प्रतीका वयुनानि वस्ते। तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयं ॥३॥ एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे। तं पाकेन मनसापश्यमंतितस्तं माता रेळ्हि स उ रेळ्हि मातरं ॥४॥ सुपर्णे विप्राः कवयो वचोभिरेकं संतं बहुधा कल्पयंति। छंदांसि च दधतो अध्वरेषु यहान्त्सोमस्य मिमते द्वादश ॥५॥१६॥ षट्त्रिंशांश्च चतुरः कल्पयंतश्छंदांसि च दधत आद्वादशं। यज्ञं विमाय कवयो मनीष ऋक्सामाभ्यां प्र रथं वर्तयंति ॥६॥ चतुर्दशान्ये महि-मानो अस्य तं धीरा वाचा प्र णयंति सप्त। आमानं तीर्थं क इह प्र वोचद्येन पथा प्रपिवंते सुतस्य ॥७॥ सहस्रधा पंचदशा-न्युक्था यावद्द्यावापृथिवी तावदित्तत्। सहस्रधा महिमानः

पत्यत॥७॥ विश्वे देवासः अध वृष्ण्यानि ते अवर्धयन् सोमऽवत्या वचस्यया रङ्गं वृचं अहिं इंद्रस्य हन्मना अग्निः न जंभैः तृपु अन्नं आवयत्॥८॥ भूरिं दक्षेभिः वचनेभिः ऋक्वऽभिः सख्येभिः सख्यानि प्र वोचत इंद्रः धुनिं च चुमुरिं च दंभयन् अद्याऽमनस्या शृणुते दभीतये॥९॥ त्वं पुरूणि आ भरः सुऽअश्व्या येभिः मंसै निऽवचनानि शंसन् सुऽगेभिः विश्वा दुःऽइता तरेम विदो सु नः उर्विया गाधं अद्य॥१०॥१५॥

॥११४॥ घर्मा संऽअंता चिऽवृतं वि आपतुः तयोः जुष्टिं मानरिष्वा जगाम दिवः पयः दिधिषाणाः अवेपन् विदुः देवाः सहऽसामानं अर्कं॥१॥ तिस्रः देष्ट्रायं निःऽऋतीः उप आसते दीर्घऽश्रुतः वि हि जानंति वह्नयः तासां नि चिक्युः कवयः निऽदानं परेषु याः गुह्येषु व्रतेषु॥२॥ चतुःऽकपर्दा युवतिः सुऽपेशाः घृतऽप्रतीका वयुनानि वस्ते तस्यां सुऽपर्णा वृषणा नि सेदतुः यत्र देवाः दधिरे भागऽधेयं॥३॥ एकः सुऽपर्णः सः समुद्रं आ विवेश सः इदं विश्वं भुवनं वि चष्टे तं पाकेन मनसा अपश्यं अंतितः तं माता रेळ्हि सः ऊं रेळ्हि मातरं॥४॥ सुऽपर्णं विप्राः कवयः वचःऽभिः एकं संतं बहुधा कल्पयंति छंदांसि च दधतः अध्वरेषु यहान् सोमस्य मिमते द्वादश॥५॥१६॥ षट्ऽत्रिंशान् च चतुरः कल्पयंतः छंदांसि च दधतः आऽद्वादशं यज्ञं विऽमायं कवयः मनीषा ऋक्ऽसामाभ्यां प्र रथं वर्तयंति॥६॥ चतुःऽदश अन्ये महिमानः अस्य तं धीराः वाचा प्र नयंति सप्त आप्नानं तीर्थे कः इह प्र वोचत् येन पथा प्रऽपिवंते सुतस्य॥७॥ सहस्रधा पंचऽदशानि उक्था यावत् द्यावापृथिवी तावत् इत् तत् सहस्रधा महिमानः

सहस्रं यावद्बृहद्विष्टितं तावती वाक् ॥ ८ ॥ कच्छन्दसां योगमा वेद धीरः को धिष्ण्यां प्रति वाचं पपाद। कमृत्विजामष्टमं शूरमाहुर्हरी इन्द्रस्य नि चिकाय कः स्वित् ॥ ९ ॥ भूम्या अंतं पर्येकं चरंति रथस्य धूषु युक्तासो अस्थुः। अमस्य दायं वि भजंत्येभ्यो यदा यमो भवति हर्म्ये हितः ॥ १० ॥ १७ ॥

॥ ११५ ॥ १–९ उपस्तुतो वार्ष्टिहव्यः ॥ अग्निः ॥ १–७ जगती । ८ त्रिष्टुप् । ९ शक्करी ॥

॥ ११५ ॥ चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावृणेति धातवे । अनूधा यदि जीजनद्धा च नु ववक्ष सद्यो महि दूत्यं१चरन् ॥ १ ॥ अग्निर्ह नामं धायि दन्नपस्तमः सं यो वना युवते भस्मना दता । अभिप्रमुरा जुह्वा स्वध्वर इनो न प्रोथमानो यवसे वृषा ॥ २ ॥ तं वो विं न दुपदे देवमंधस इंदुं प्रोथंतं प्रवपंतमर्णवं । आसा वह्निं न शोचिषा विरप्शिनं महिव्रतं न सरजंतमध्वनः ॥ ३ ॥ वि यस्य ते जयसानस्याजर धक्षोर्न वाताः परि संत्यच्युताः । आ रण्वासो युयुधयो न सत्वनं चित्रं नशंत प्र शिषंत इष्टये ॥ ४ ॥ स इद्भिः कण्वतमः कण्वसखायः परस्यांतरस्य तरुषः । अग्निः पातु गृणतो अग्निः सूरीनग्निर्ददातु तेषामवो नः ॥ ५ ॥ १८ ॥ वाजिंतमाय सह्यसे सुपित्र्य नृषु च्यवानो अनु जातवेदसे । अनुद्रे चिद्यो धृषता वरं सते महिंतमाय धन्वनेदविष्यते ॥ ६ ॥ एवाग्निमंतिः सह सूरिभिर्वसुं इत्वे सहसः सूनरो नृभिः । मित्रासो न ये सुधिता ऋतायवो द्यावो न द्युम्नैरभि संति मानुषान् ॥ ७ ॥ ऊर्जो नपात्सहसावन्नितिं त्वोपस्तुतस्य वंदते वृषा वाक् । त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥ ८ ॥ इतिं त्वाग्ने वृष्टिहव्यस्य पुत्रा उपस्तुतास

सहस्रं यावत् ब्रह्म विऽस्थितं तावती वाक्॥८॥ कः छन्दसां योगं आ वेद धीरः कः धिष्ण्यां प्रति वाचं पपाद कं ऋत्विजां श्रुष्टिमं शूरं आहुः हरी इंद्रस्य नि चिकाय कः स्वित्॥९॥ भूम्याः अंते परि एकं चरंति रथस्य धूःऽसु युक्तासः अस्युः श्रमस्य दायं वि भजंति एभ्यः यदा यमः भवति हर्म्ये हितः॥१०॥१७॥

॥११५॥ चित्रः इत् शिशोः तरुणस्य वक्षथः न यः मातरौ अपिऽएति धातवे अनूधाः यदि जीजनत् अधा च नु ववक्ष सद्यः महि दूत्यं चरन्॥१॥ अग्निः ह नामं धायि दन् अपःऽतमः सं यः वना युवते भस्मना दता अभिऽप्रमुरा जुह्वा सुऽअध्वरः इनः न प्रोथमानः यवसे वृषा॥२॥ तं वः विं न दुऽसदं देवं अंधसः इंदुं प्रोथंतं प्रऽवपंतं अर्णवं आसा वह्निं न शोचिषा विऽराजानं महिंऽव्रतं न सरजंतं अध्वनः॥३॥ वि यस्य ते जयसानस्य अजरं धक्षोः न वातः परि संति अच्युताः आ रखासः युयुधयः न सत्वनं चितं नशंत प्र शिषंतः इष्टये॥४॥ सः इत् अग्निः कण्वऽतमः कण्वऽसखा अर्यः परस्य अंतरस्य तरुषः अग्निः पातु गृणतः अग्निः सूरीन् अग्निः ददातु तेषां अवः नः॥५॥१८॥ वाजिन्ऽतमाय सह्यसे सुऽपित्र्य नृषु च्यवानः अनु जातऽवेदसे अनुद्रे चित् यः धृषता वरं सते महिन्ऽतमाय धन्वना इत् अविष्यते॥६॥ एव अग्निः मतेः सह सूरिऽभिः वसुः स्तवे सहसः सूनरः नृऽभिः मित्रासः न ये सुऽधिताः ऋतऽयवः द्यावः न द्युभिः अभि संति मानुषान्॥७॥ ऊर्जः नपात् सहसाऽवन् इति त्वा उपऽस्तुतस्य वंदते वृषा वाक् त्वां स्तोषाम् त्वया सुऽवीरः द्राघीयः आयुः प्रऽतरं दधानाः॥८॥ इति त्वा अग्ने वृष्टिऽहव्यस्य पुत्राः उपऽस्तुतासः

ऋषयोऽवोचन्। तांश्च पाहि गृणतश्च सूरीन्वपड्वषट्कृत्यूर्ध्वासो अनक्षन्नमो नम इत्यूर्ध्वासो अनक्षन् ॥९॥१९॥

॥ ११६ ॥ १–९ अग्निपुतः सौरोऽग्निर्यूपो वा सौरः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥११६॥ पिबा सोमं महत इंद्रियाय पिबा वृत्राय हंतवे शविष्ठ। पिब राये शवसे हूयमानः पिब मध्वस्तृपदिंद्रा वृषस्व ॥ १ ॥ अस्य पिब क्षुमतः प्रस्थितस्येंद्र सोमस्य वरमा सुतस्य। स्वस्तिदा मनसा मादयस्वावाचीनो रेवते सौभगाय ॥ २ ॥ ममत्तु त्वा दिव्यः सोम इंद्र ममत्तु यः सूयते पार्थिवेषु। ममत्तु येन वरिवश्चकर्थ ममत्तु येन निरिणासि शत्रून् ॥३॥ आ द्विबर्हा अमिनो यात्विंद्रो वृषा हरिभ्यां परिषिक्तमंधः। गव्या सुतस्य प्रभृतस्य मध्वः सचा खेदामरुणहा वृषस्व ॥ ४ ॥ नि तिग्मानिं भाशयन्भाश्यान्यवं स्थिरा तनुहि यातुजूनां। उग्रायं ते सहो बलं ददामि प्रतीत्या शत्रून्विगदेषु वृश्च ॥ ५ ॥ २० ॥ व्यर्यं इंद्र तनुहि श्रवांस्योजः स्थिरेव धन्वनोऽभिमातीः। अस्मद्र्यग्वावृधानः सहोभिरनिभृष्टस्तन्वं वावृधस्व ॥ ६ ॥ इदं हविर्मघवन्तुभ्यं रातं प्रति सम्राळहृणानो गृभाय। तुभ्यं सुतो मघवन्तुभ्यं पक्वोऽद्रींद्र पिब च प्रस्थितस्य ॥ ७ ॥ अद्रीदिंद्र प्रस्थितेमा हवींषि चनो दधिष्व यजतोत सोमं। प्रयस्वंतः प्रति हर्यामसि त्वा सत्याः संतु यजमानस्य कामाः ॥८॥ प्रेंद्राग्निभ्यां सुवचस्यामियर्मि सिंधाविव प्रेरयं नावमर्कैः। अर्या इव परि चरंति देवा ये अस्मभ्यं धनदा उद्भिदश्च ॥ ९ ॥ २१ ॥

॥ ११७ ॥ १–९ भिक्षुः ॥ धनाद्यदानप्रशंसा ॥ १, २ जगती। ३–९ त्रिष्टुप् ॥

॥११७॥ न वा उ देवाः क्षुधमिद्वधं ददुरुताशितमुप गच्छंति मृत्यवः।

ऋषयः ऊचुः तान् त्वं पाहि गृणतः च सूरीन् वषट् वषट् इति ऊर्ध्वासः अनुष्टान् नमः नमः इति ऊर्ध्वासः अनुष्टान् ॥ ९ ॥ १९ ॥

॥ ११६ ॥ पिब सोमं महते इंद्रियाय पिब वृत्राय हंतवे शविष्ठ पिब राये शवसे हूयमानः पिब मध्वः तृपत् इंद्र आ वृषस्व ॥ १ ॥ अस्य पिब क्षुधंतः प्रऽस्थितस्य इंद्र सोमस्य वरं आ सुतस्य स्वः लिऽदाः मनसा मादयस्व अर्वाचीनः रेवते सौभगाय ॥ २ ॥ ममत्तु त्वा दिव्यः सोमः इंद्र ममत्तु यः सूयते पार्थिवेषु ममत्तु येन वरिवः चकर्थ ममत्तु येन निऽरिणासि शत्रून् ॥ ३ ॥ आ द्विऽबर्हाः अमिनः यातु इंद्रः वृषा हरिऽभ्यां परिऽसिक्तं अंधः गविं आ सुतस्य प्रऽभृतस्य मध्वः सचा खेदां अरुणऽहा आ वृषस्व ॥ ४ ॥ नि तिग्मानि भाशयन् भाज्यानि अव स्थिरा तनुहि यातुऽजूनां उग्राय ते सहः बलं ददामि प्रतिऽइत्यं शत्रून् विऽगदेषु वृश्च ॥ ५ ॥ २० ॥ वि अर्यः इंद्र तनुहि श्रवांसि ओजः स्थिराऽइव धन्वनः अभिऽमातीः अस्मद्र्यक् ववृधानः सहःऽभिः अनिऽभृष्टः तन्वं ववृधस्व ॥ ६ ॥ इदं हविः मघऽवन् तुभ्यं रातं प्रति संऽरात् अहृणानः गृभाय तुभ्यं सुतः मघऽवन् तुभ्यं पक्वः अद्धि इंद्र पिब च प्रऽस्थितस्य ॥ ७ ॥ अद्धि इत् इंद्र प्रऽस्थिता इमा हवींषि चनः दधिष्व पचता उत सोमं प्रयस्वंतः प्रति हर्यामसि त्वा सत्याः संतु यजमानस्य कामाः ॥ ८ ॥ प्र इंद्राग्निऽभ्यां सुऽवचस्यां इयं मिं सिंधौऽइव प्र ईरयं नावं अर्कैः अयासःऽइव परि चरंति देवाः ये अस्मभ्यं धनऽदाः उतऽभिदः च ॥ ९ ॥ २१ ॥

॥ ११७ ॥ न वै ऊं देवाः क्षुधं इत् वधं ददुः उत आशितं उप गच्छंति मृत्यवः उतो अमृतत्वं वसीयान् अनाशितः भवति यत् अनाशितः अमृतः तत् अशितः मर्तः किं कृणवति ॥ १ ॥ न वा उ एतत् म्रियसे न रिष्यसि देवां इत् एषि पथिभिः सुगेभिः यत्र यंति सुकृतः नापि दुष्कृतः तत्र गच्छ गृहपते सः अस्थाः ॥ २ ॥ इमे जीवाः वि मृतैः आवविऽस्रन् अथा वयं प्रऽजया सं सदेम अति धन्वेव दुरितानि विश्वा सर्वा उषसः मृधः जयेम ॥ ३ ॥ अपेत वीतं वि च सर्पतातः इतः एतं कृणुत देवयानं इतः एते प्रजां अमृतं वहंतः वि पक्षाभ्यां दयध्वं यथा नः ॥ ४ ॥ अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा अथा पितॄन् सुविदत्रां उपेहि यमेन ये सधमादं मदंति ॥ ५ ॥ यौ ते श्वानौ यमरक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ताभ्यां एनं परिदेहि राजन् स्वस्ति अस्मै अनमीवं च धेहि ॥ ६ ॥ उरूणसौ असुतृपौ उदुंबलौ यमस्य दूतौ चरतः जनां अनु तौ अस्मभ्यं दृशये सूर्याय पुनः दातां असुं अद्य इह भद्रं ॥ ७ ॥ यमाय सोमं सुनुत यमाय जुहुत हविः यमं ह यज्ञः गच्छति अग्निदूतः पुरोहितः यमाय क्रियते हविः ॥ ८ ॥ यमाय घृतवत् हविः जुहोत प्रऽकविः मृदे यमः नः श्रेष्ठः अधिऽराजः अस्तु अस्मान् मा हिंसीत् द्विषते रंधयैनं ॥ ९ ॥ यमाय दुग्धं अंगिरोभिः आहुतं यमः दाधार पयः अप्ऽसु अंतरा तेन सत्येन जागृत अवऽपानं अशीमहि ॥ १० ॥ यमाय घृतं दुदुषः परिऽस्रुतं नारायणासः परिषिंचंति अक्षरं पितृऽषु क्षयं जगतः अप्ऽसु अंतरा सर्वं तत् धत्ते असुरेषु अवऽपानं अशीमहि ॥ ११ ॥ यमाय मधुमत् तृणं राजन् हव्यं जुषस्व नः गोऽमत् अग्ने अविऽमत् मधु बृहत् वदेम विदथे सुऽवीराः ॥ १२ ॥ यमाय सोमः पवते यमाय क्रियते हविः यमं ह यज्ञः गच्छति अग्निदूतः पुरोहितः यमाय पितरः हविः ॥ १३ ॥ यमाय सोमं सुनुत यमाय जुहुत हविः यमं ह यज्ञः गच्छति अग्निदूतः पुरोहितः यमाय क्रियते हविः ॥ १४ ॥ यमाय घृतवत् हविः जुहोत प्रऽकविः मृदे यमः नः श्रेष्ठः अधिऽराजः अस्तु अस्मान् मा हिंसीत् द्विषते रंधयैनं ॥ १५ ॥ यमाय दुग्धं अंगिरोभिः आहुतं यमः दाधार पयः अप्ऽसु अंतरा तेन सत्येन जागृत अवऽपानं अशीमहि ॥ १६ ॥ यमाय घृतं दुदुषः परिऽस्रुतं नारायणासः परिषिंचंति अक्षरं पितृऽषु क्षयं जगतः अप्ऽसु अंतरा सर्वं तत् धत्ते असुरेषु अवऽपानं अशीमहि ॥ १७ ॥ यमाय मधुमत् तृणं राजन् हव्यं जुषस्व नः गोऽमत् अग्ने अविऽमत् मधु बृहत् वदेम विदथे सुऽवीराः ॥ १८ ॥ यमाय सोमः पवते यमाय क्रियते हविः यमं ह यज्ञः गच्छति अग्निदूतः पुरोहितः यमाय पितरः हविः ॥ १९ ॥ यमाय सोमं सुनुत यमाय जुहुत हविः यमं ह यज्ञः गच्छति अग्निदूतः पुरोहितः यमाय क्रियते हविः ॥ २० ॥ यमाय घृतवत् हविः जुहोत प्रऽकविः मृदे यमः नः श्रेष्ठः अधिऽराजः अस्तु अस्मान् मा हिंसीत् द्विषते रंधयैनं ॥ २१ ॥

च्छंति मृत्यवः। उतो रयिः पृणतो नोप दस्यत्युतापृणन्मर्डितारं न विंदते ॥१॥ य आघ्राय चकमानाय पित्वोऽन्नवान्त्सन्नमिताय॑ोपजग्मुषे। स्थिरं मनः कृणुते सेवते पुरोतो चित्स मर्डितारं न विंदते ॥२॥ स इद्भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय। अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायं ॥३॥ न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः। अपास्मात्प्रेयान्न तदोको अस्ति पृणंतमन्यमरणं चिदिच्छेत् ॥४॥ पृणीयादिन्नाधमानाय तव्यान्द्राघीयांसमनु पश्येत पंथां। ओ हि वर्तते रथ्येव चक्रान्यमन्यमुप तिष्ठंत रायः ॥५॥२२॥ मोघमन्नं विंदते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य। नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥६॥ कृपन्चित्फालु आशितं कृणोति यन्नध्वानमप वृंक्ते चरित्रैः। वदन्ब्रह्मावदतो वनीयान्पृणन्नापिरपृणंतमभि ष्यात् ॥७॥ एकपाद्भूयो द्विपदो वि चक्रमे द्विपाच्चिपादमभ्येति पश्चात्। चतुष्पादेति द्विपदामभिस्वरे संपश्यन्पंक्तीरुपतिष्ठमानः ॥८॥ समौ चिदस्तो न समं विविष्टः समातरा चिन्न समं दुहाते। यमयोश्चिन्न समा वीर्याणि ज्ञाती चित्संतौ न समं पृणीतः ॥९॥२३॥

॥ ११८ ॥ १–९ वरुथ्य आमहीयव ॥ चरमो रक्षोहा ॥ गायत्री ॥

॥ ११८ ॥ अग्ने हंसि न्यृचिणं दीद्यन्मर्त्येष्वा। स्वे क्षये शुचिव्रत ॥१॥ उत्तिष्ठसि स्वाहुतो घृतानि प्रति मोदसे। यत्ते सुचः समस्थिरन् ॥२॥ स आहुतो वि रोचतेऽग्निरीळेन्यो गिरा। सुचा प्रतीकमज्यते ॥३॥ घृतेनाग्निः समज्यते मधु-

च्छंति मृत्यवः उतो रयिः पृणतः न उप दस्यति उत अपृणन् मर्डितारं न विंदते॥१॥ यः आघ्राय चकमानाय पित्वः अन्नऽवान् सन् रफिताय उपऽजग्मुषे स्थिरं मनः कृणुते सेवते पुरा उतो चित् सः मर्डितारं न विंदते॥२॥ सः इत् भोजः यः गृहवे ददाति अन्नऽकामाय चरते कृशाय अरं अस्मै भवति यामऽहूतौ उत अपरीषु कृणुते सखायं॥३॥ न सः सखा यः न ददाति सख्ये सचाऽभुवे सचमानाय पित्वः अप अस्मात् प्र इयात् न तत् ओकः अस्ति पृणंतं अन्यं अरणं चित् इच्छेत्॥४॥ पृणीयात् इत् नाधमानाय तव्यान् द्राघीयांसं अनु पश्येत् पंथां ओ हि वर्तंते रथ्याऽइव चक्रा अन्यंऽअन्यं उप तिष्ठंत रायः॥५॥२२॥ मोघं अन्नं विंदते अप्रऽचेताः सत्यं ब्रवीमि वधः इत् सः तस्य न अर्यमणं पुष्यति नो सखायं केवलऽअघः भवति केवलऽआदी॥६॥ कृधन् इत् फालः आशितं कृणोति यत् अध्वानं अप वृंक्ते चरित्रैः वदन् ब्रह्मा अवदतः वनीयान् पृणन् आपिः अपृणंतं अभि स्यात्॥७॥ एकंऽपात् भूयः द्विऽपदः वि चक्रमे द्विऽपात् त्रिऽपादं अभि एति पश्चात् चतुःऽपात् एति द्विऽपदां अभिऽस्वरे संऽपथ्यं पंक्तीः उपऽतिष्ठमानः॥८॥ समौ चित् हस्तौ न समं विविष्टः संऽमातरा चित् न समं दुहाते यमयोः चित् न समा वीर्याणि ज्ञातीं चित् संतौ न समं पृणीतः॥९॥२३॥

॥११८॥ अग्ने हंसि नि अचिणं दीद्यत् मर्त्येषु आ स्वे क्षये शुचिऽव्रत॥१॥ उत तिष्ठसि सुऽआहुतः घृतानि प्रति मोदसे मत्वा सुचः संऽअस्थिरन्॥२॥ सः आऽहुतः वि रोचते अग्निः ईळेन्यः गिरा सुचा प्रतीकं अज्यते॥३॥ घृतेन अग्निः सं अज्यते मधु-

प्रतीक आहुतः। रोचमानो विभावसुः ॥४॥ जरमाणः समिध्यसे देवेभ्यो हव्यवाहन। तं त्वा हवन्त मर्त्याः ॥५॥२४॥ तं मर्ता अमर्त्य घृतेनाग्निं संपर्यत। अदाभ्यं गृहपतिं ॥६॥ अदाभ्येन शोचिषाग्ने रक्षस्त्वं दह। गोपा ऋतस्य दीदिहि ॥७॥ स त्वमग्ने प्रतीकिन् प्रत्योष यातुधान्यः। उरुक्षयेषु दीद्यत् ॥८॥ तं त्वा गीर्भिरुरुक्षया हव्यवाहं समीधिरे। यजिष्ठं मानुषे जने ॥९॥२५॥

॥ ११९ ॥ १–१३ लव ऐंद्रः ॥ आत्मस्तुतिः ॥ गायत्री ॥

॥११९॥ इति वा इतिं मे मनो गामश्वं सनुयामितिं। कुवित्सोमस्यापामितिं ॥१॥ प्र वाता इव दोधत उन्मा पीता अयंसत। कुवित्सोमस्यापामितिं ॥२॥ उन्मा पीता अयंसत रथमश्वा इवाशवः। कुवित्सोमस्यापामितिं ॥३॥ उप मा मतिरस्थित वाश्रा पुत्रमिव प्रियं। कुवित्सोमस्यापामितिं ॥४॥ अहं तष्टेव वंधुरं पर्यचामि हृदा मतिं। कुवित्सोमस्यापामितिं ॥५॥ नहि मे अक्षिपच्चनाच्छान्त्सुः पंचं कृष्टयः। कुवित्सोमस्यापामितिं ॥६॥२६॥ नहि मे रोदसी उभे अन्यं पक्षं चन प्रतिं। कुवित्सोमस्यापामितिं ॥७॥ अभि द्यां महिना भुवमभी३मां पृथिवीं महीं। कुवित्सोमस्यापामितिं ॥८॥ हंताहं पृथिवीमिमां नि दधानीह वेह वा। कुवित्सोमस्यापामितिं ॥९॥ ओषमित्पृथिवीमहं जंघनानीह वेह वा। कुवित्सोमस्यापामितिं ॥१०॥ दिवि मे अन्यः पक्षो३धो अन्यमचीकृपं। कुवित्सोमस्यापामितिं ॥११॥ अहमस्मि महामहोऽभिन्भ्यमुदीषितः। कुवित्सोमस्यापामितिं ॥१२॥ गृहो याम्यरंकृतो देवेभ्यो हव्यवाहनः। कुवित्सोमस्यापामितिं ॥१३॥२७॥६॥

ऽप्रतीकः आऽहुतः रोचमानः विभाऽवसुः ॥४॥ जरमाणः सं दु-
ध्यसे देवेभ्यः हव्यऽवाहन् तं त्वा हुवंत मर्त्याः ॥५॥२४॥ तं मर्ताः
अमर्त्यं घृतेन अग्निं सपर्यत अदाभ्यं गृहऽपतिं ॥६॥ अदाभ्येन
शोचिषा अग्ने रक्षः त्वं दह गोपाः ऋतस्य दीदिहि ॥७॥ सः त्वं अग्ने
प्रतीकेन प्रति ओष यातुऽधान्यः उरुऽक्षयेषु दीद्यत् ॥८॥ तं त्वा
गीःऽभिः उरुऽक्षयाः हव्यऽवाहं सं ईधिरे यजिष्ठं मानुषे जने
॥९॥२५॥

॥११९॥ इति वै इति मे मनः गां अश्वं सनुयां इति कुवित् सो-
मस्य अपां इति ॥१॥ प्र वातां ऽइव दोधतः उत् मा पीताः अयं-
सत कुवित् सोमस्य अपां इति ॥२॥ उत् मा पीताः अयंसत रथे
अश्वाःऽइव आशवः कुवित् सोमस्य अपां इति ॥३॥ उप मा म-
तिः अस्थित वाश्रा पुत्रंऽइव प्रियं कुवित् सोमस्य अपां इति
॥४॥ अहं तष्टाऽइव वंधुरे परि अचामि हृदा मतिं कुवित् सोमस्य
अपां इति ॥५॥ नहि मे अक्षिऽपत् चन अच्छान्सुः पंच कृष्टयः
कुवित् सोमस्य अपां इति ॥६॥२६॥ नहि मे रोदसी' उभे' अन्यं
पक्षं चन प्रति कुवित् सोमस्य अपां इति ॥७॥ अभि द्यां महिना
भुवं अभि इमां पृथिवीं महीं कुवित् सोमस्य अपां इति ॥८॥ हंत
अहं पृथिवीं इमां नि दधानि इह वा इह वा कुवित् सोमस्य अपां
इति ॥९॥ ओषं इत् पृथिवीं अहं जंघनानि इह वा इह वा कुवित्
सोमस्य अपां इति ॥१०॥ दिवि मे अन्यः पक्षः अधः अन्यं अचीं-
कृषं कुवित् सोमस्य अपां इति ॥११॥ अहं अस्मि महाऽमहः अ-
भिऽनभ्यं उत्ऽईषितः कुवित् सोमस्य अपां इति ॥१२॥ गृहः या-
मि अरंऽकृतः देवेभ्यः हव्यऽवाहनः कुवित् सोमस्य अपां इति
॥१३॥२७॥६॥

॥ १२० ॥ १–९ बृहद्दिव आथर्वणः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१२०॥ तदिदास॒ भुव॑नेषु॒ ज्येष्ठं॒ यतो॑ ज॒ज्ञ उ॒ग्रस्त्वे॒षनृ॑म्णः। स॒द्यो ज॑ज्ञा॒नो नि रि॑णाति॒ शत्रू॒ननु॒ यं विश्वे॒ मद॑त्यू॒माः ॥१॥ वा॒वृ॒धा॒नः शव॑सा॒ भूयो॑जाः॒ शत्रु॑र्दा॒साय॑ भि॒यसं॑ दधाति। अ॒व्य॒नच्च॒ व्यन॑च्च॒ सस्नि॒ सं ते॒ नव॑न्त॒ प्रभृ॑ता॒ मदे॑षु ॥२॥ त्वे क्रतु॒मपि॑ वृञ्जन्ति॒ विश्वे॒ द्विर्यदे॒ते त्रिर्भव॑न्त्यू॒माः। स्वा॒दोः स्वादी॑यः स्वा॒दुना॑ सृजा॒ समदः॑ सु मधु॒ मधु॑नाभि यो॒धीः ॥३॥ इति॑ चि॒द्धि त्वा॒ धना॒ जय॑न्तं॒ मदे॑मदे अनु॒मद॑न्ति॒ विप्राः॑। ओजी॑यो धृष्णो स्थि॒रमा त॑नुष्व॒ मा त्वा॑ दभन्यातु॒धाना॑ दुरे॒वाः॥४॥ त्वया॑ व॒यं शं॑शद्महे॒ रणे॑षु प्रपश्यं॒तो यु॒धेन्या॑नि॒ भूरि॑। चो॒दया॑मि त॒ आयु॑धा॒ वचो॑भिः॒ सं ते॑ शिशामि॒ ब्रह्म॑णा॒ वयां॑सि ॥५॥१॥ स्तु॒षेय्यं॑ पुरु॒वर्प॑समृभ्वमि॒न्त॑ममाश्वमाशा॒नां। आ दर्षते॒ शव॑सा॒ सप्त॑ दानू॒न्म सांसते॒ प्रति॑मानानि॒ भूरि॑॥६॥ नि तद्धि॑षेऽवरं॒ परं॑ च॒ यस्मि॒न्नावि॑थावं॒सा दु॒रोणे॑। आ मा॒तरा॑ स्थापयसे जिगा॒नू अत॑ इनोषि॒ कर्वे॑रा पुरू॒णि॥७॥ इ॒मा ब्रह्म॑ बृहद्दिवो॒ विव॑क्तीन्द्रा॒य शू॒षमं॑गिरः स्व॒र्षाः। म॒हो गो॒त्रस्य॑ क्षयति स्वरा॒जो दु॒रश्च॒ विश्वा॑ अवृणोदप॒ स्वाः ॥८॥ एवा॑ महान्बृहद्दिवो॒ अथ॑र्वावोचत्स्वां त॒न्व१॑मिंद्रमे॑व। स्वसा॑रो मातरिश्वरीरया॒ हिन्वं॑ति॒ च॒ शव॑सा॒ वर्ध॑यंति च ॥९॥२॥

॥ १२१ ॥ १–१० हिरण्यगर्भः प्राजापत्यः ॥ ऋ ॥ त्रिष्टुप् ॥

॥१२१॥ हि॒र॒ण्य॒ग॒र्भः समव॑र्त॒ताग्रे॑ भू॒तस्य॑ जा॒तः पति॒रेक॑ आसीत्। स दा॑धार पृथि॒वीं द्यामु॒तेमां कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥१॥ य आ॑त्म॒दा ब॑ल॒दा यस्य॒ विश्व॑ उपास॒ते प्र॒शिषं॒ यस्य॑ दे॒वाः। यस्य॑ छा॒यामृतं॒ यस्य॑ मृ॒त्युः कस्मै॑ दे॒वाय॑ ह॒-

॥१२०॥ तत् इत् आस भुवनेषु ज्येष्ठं यतः जज्ञे उग्रः त्वेषऽनृम्णः सद्यः जज्ञानः नि रिणाति शत्रून् अनु यं विश्वे मदन्ति ऊमाः ॥१॥ ववृधानः शवसा भूरिऽओजाः शत्रुः दासाय भियसं दधाति अविंऽअनत् च विऽअनत् च सस्निं सं ते नवन्त प्रऽभृता मदेषु ॥२॥ त्वे क्रतुं अपि वृञ्जन्ति विश्वे द्विः यत् एते त्रिः भवन्ति ऊमाः स्वादोः स्वादीयः स्वादुना सृज सं अदः सु मधु मधुना अभि योधीः ॥३॥ इति चित् हि त्वा धना जयन्तं मदेऽमदे अनुऽमदन्ति विप्राः ओजीयः धृष्णो स्थिरं आ तनुष्व मा त्वा दभन् यातुऽधानाः दुःऽएवाः ॥४॥ त्वया वयं शाशदमहे रणेषु प्रऽपश्यन्तः युधेन्यानि भूरि चोदयामि ते आयुधा वचःऽभिः सं ते शिष्णामि ब्रह्मणा वयांसि ॥५॥१॥ स्तुषेयं पुरुऽवर्पसं ऋभ्वं इनऽतमं आप्यं आप्यानां आ दर्षते शवसा सप्त दानून् प्र साक्षते प्रतिऽमानानि भूरि ॥६॥ नि तत् दधिषे अवरं परं च यस्मिन् आविथ अवसा दुरोणे आ मातरा स्थापयसे जिगत्नू अतः इनोषि कवेरा पुरूणि ॥७॥ इमा ब्रह्म बृहत्ऽदिवः विवक्ति इंद्राय शूषं अंगियः स्वःऽसाः महः गोत्रस्य क्षयति स्वऽराजः दुरः च विश्वाः अवृणोत् अप स्वाः ॥८॥ एव महान् बृहत्ऽदिवः अथर्वा अवोचत् स्वां तन्वं इंद्र एव स्वसारः मातरिश्वरीः अरिप्राः हिन्वंति च शवसा वर्धयंति च ॥९॥२॥

॥१२१॥ हिरण्यऽगर्भः सं अवर्तत अग्रे भूतस्य जातः पतिः एकः आसीत् सः दाधार पृथिवीं द्यां उत इमां कस्मै देवाय हविषा विधेम ॥१॥ यः आत्मऽदाः बलऽदाः यस्य विश्वे उपऽआसते प्रऽशिषं यस्य देवाः यस्य छाया अमृतं यस्य मृत्युः कस्मै देवाय हु-

विधेम ॥२॥ यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥३॥ यस्येमे हिमवंतो महित्वा यस्य समुद्रं रसया सहाहुः। यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥४॥ येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः। यो अंतरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥५॥३॥ यं क्रंदसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने। यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥६॥ आपो ह यद्बृहतीर्विश्वमायन्गर्भं दधाना जनयंतीरग्निं। ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥७॥ यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयंतीर्यज्ञं। यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ॥८॥ मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान। यश्चापश्चंद्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥९॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां ॥१०॥४॥

॥ १२२ ॥ १-८ चित्रमहा वामिष्टः ॥ अग्निः ॥ १, ५ त्रिष्टुप् । २-४ ६-८ जगती ॥

॥१२२॥ वसुं न चित्रमहसं गृणीषे वामं शवसस्तिथिमद्विषेण्यं । स रासते शुरुधो विश्वधायसोऽग्निर्होता गृहपतिः सुवीर्यं ॥१॥ जुषाणो अग्ने प्रति हर्य मे वचो विश्वानि विद्वान्वयुनानि सुक्रतो । धृतनिर्णिग्वह्नयसे गातुमेरय तव देवा अजनयन्तु व्रतं ॥२॥ सन्न धामानि परियन्नमर्त्यो दाश्वाध्वरे सुकृते सामहस्व । सुवीरेण रयिणाग्ने स्वाभुवा

विधेम ॥२॥ यः प्राणतः निमिषतः महित्वा एकः इत् राजा जगतः बभूव यः ईशे अस्य द्विपदः चतुष्पदः कस्मै देवाय हविषा विधेम ॥३॥ यस्य इमे हिमवन्तः महित्वा यस्य समुद्रं रसया सह आहुः यस्य इमाः प्रदिशः यस्य बाहू कस्मै देवाय हविषा विधेम ॥४॥ येन द्यौः उग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः यः अन्तरिक्षे रजसः विमानः कस्मै देवाय हविषा विधेम ॥५॥३॥ यं क्रन्दसी अवसा तस्तभाने अभि ऐक्षेतां मनसा रजमाने यत्र अधि सूरः उत उदितः विभाति कस्मै देवाय हविषा विधेम ॥६॥ आपः ह यत् बृहतीः विश्वं आयन् गर्भं दधानाः जनयन्तीः अग्निं ततः देवानां सं अवर्तत असुः एकः कस्मै देवाय हविषा विधेम ॥७॥ यः चित् आपः महिना परि अपश्यत् दक्षं दधानाः जनयन्तीः यज्ञं यः देवेषु अधि देवः एकः आसीत् कस्मै देवाय हविषा विधेम ॥८॥ मा नः हिंसीत् जनिता यः पृथिव्याः यः वा दिवं सत्यधर्मा जजान यः च आपः चन्द्राः बृहतीः जजान कस्मै देवाय हविषा विधेम ॥९॥ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां ॥१०॥४॥

॥१२२॥ वसुं न चित्रमहसं गृणीषे वामं शवः अतिथिं अद्रिवः नः रासते शुरुधः विश्वधायसः अग्निः होता गृहपतिः सुक्रतुः ॥१॥ जुषाणः अग्ने प्रति हर्य मे वचः विश्वानि विद्वान् वयुनानि सुक्रतो घृतनिर्णिक् ब्रह्मणे गातुं इत ईरय तव देवाः अजनयन् अनु व्रतं ॥२॥ सप्त धामानि परियन् अमर्त्यः दाशन् दाशुषे सुकृते मनुष्वते अग्ने सुआभुवा रयिणा सुआभुवं

यस्त आनट् समिधा तं जुषस्व ॥३॥ यज्ञस्य केतुं प्रथमं पुरोहितं हविष्मंत ईळते सप्त वाजिनं। शृण्वंतमग्निं घृतपृष्ठमुक्षणं पृणंतं देवं पृणते सुवीर्यं ॥४॥ त्वं दूतः प्रथमो वरेण्यः स हूयमानो अमृताय मत्स्व। त्वां मर्जयन्मरुतो दाशुषो गृहे त्वां स्तोमेभिर्भृगवो वि रुरुचुः ॥५॥५॥ इषं दुहन्नदुघां विश्वधायसं यज्ञप्रिये यजमानाय सुन्वते। अग्ने घृतस्नुस्त्विळृतानि दीद्यद्वर्तिर्यज्ञं परियन्नृतूयसे ॥६॥ त्वामिदस्या उषसो व्युष्टिषु दूतं कृण्वाना अयजंत मानुषाः। त्वां देवा महयाय्याय वावृधुराज्यमग्ने निमृजंतो अध्वरे ॥७॥ नि त्वा वसिष्ठा अहंत वाजिनं गृणंतो अग्ने विदथेषु वेधसः। रायस्पोषं यजमानेषु धारय यूयं पात स्वस्तिभिः सदा नः ॥८॥६॥

॥ १२३ ॥ १–८ वेनः ॥ वेनः ॥ त्रिष्टुप् ॥

॥ १२३ ॥ अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने। इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहंति ॥१॥ समुद्रादूर्मिमुदियर्ति वेनो नभोजाः पृष्ठं हरितस्य दर्शि। घृतस्य सानावधि विष्टपि भ्राट् समानं योनिमभ्यनूषत व्राः ॥२॥ समानं पूर्वीरभि वावशानास्तिष्ठन्वत्सस्य मातरः सनीळाः। घृतस्य सानावधि चक्रमाणा रिहंति मध्वो अमृतस्य वाणीः ॥३॥ जानंतो रूपमकृपंत विप्रा मृगस्य घोषं महिषस्य हि ग्मन्। घृतेन यंतो अधि सिंधुमस्युर्विदद्गंधर्वो अमृतानि नाम ॥४॥ अप्सरा जारमुपसिष्मियाणा योषा बिभर्ति परमे व्योमन्। चरंत्प्रियस्य योनिषु प्रियः सन्त्सीदत्पक्षे हिरण्यये स वेनः ॥५॥७॥ नाके सुपर्णमुप यत्पतंतं हृदा वेनंतो अभ्यचक्षत त्वा। हिरण्यपक्षं वरुणस्य दोषणि

यः ते आनट् संऽइधा तं जुषस्व ॥३॥ यज्ञस्य केतुं प्रथमं पुरःऽहितं हविष्मंतः ईळते सप्त वाजिनं गृणंतं अग्निं घृतऽपृष्ठं उक्षणं गृणंतं देवं गृणते सुऽवीर्यं ॥४॥ त्वं दूतः प्रथमः वरेण्यः सः हूयमानः अमृताय मर्त्य त्वां मर्जयन् मरुतः दाशुषः गृहे त्वां स्तोमेभिः भृगवः वि रुरुचुः ॥५॥५॥ इषं दुहन् सुऽदुघां विश्वऽधायसं यज्ञऽप्रियं यजमानाय सुऽक्रतो० अग्ने घृतऽस्नुः विः ऋतानि दीद्यत् वर्तिः यज्ञं परिऽयन् सुक्रतुऽयसे ॥६॥ त्वां इत् अस्याः उषसः विऽउष्टिषु दूतं कृण्वानाः अयजंत मानुषाः त्वां देवाः महयाय्याय ववृधुः आज्यं अग्ने निऽमृजंतः अध्वरे ॥७॥ नि त्वा वसिष्ठाः अहुंत वाजिनं गृणंतः अग्ने विदथेषु वेधसः रायः पोषं यजमानेषु धारय यूयं पात स्वस्तिऽभिः सदा नः ॥८॥६॥

॥१२३॥ अयं वेनः चोदयत् पृश्निऽगर्भाः ज्योतिःऽजरायुः रजसः विऽमाने इमं अपां संऽगमे सूर्यस्य शिशुं न विप्राः मतिऽभिः रिहंति ॥१॥ समुद्रात् ऊर्मिं उत् इयर्ति वेनः नभःऽजाः पृष्ठं हर्यतस्य दर्शि ऋतस्य सानौ अधि विष्टपि भ्राट् समानं योनिं अभि अनूषत व्राः ॥२॥ समान पूर्वीः अभि वावशानाः तिष्ठन् वत्सस्य मातरः सऽनीळाः ऋतस्य सानौ अधि चक्रमाणाः रिहतिं मध्वः अमृतस्य वाणीः ॥३॥ जानंतः रूपं अकृपंत विप्राः मृगस्य घोषं महिषस्य हि ग्मन् ऋतेन यंतः अधि सिंधुं अस्थुः विदत् गंधर्वः अमृतानि नाम ॥४॥ अप्सराः जारं उपऽसिष्मियाणा योषां विभर्ति परमे विऽओमन् चरत् प्रियस्य योनिंपु प्रियः सन् सीदत् पक्षे हिरण्ययें सः वेनः ॥५॥७॥ नाके सुऽपर्णं उप यत् पतंतं हृदा वेनंतः अभि अचक्षत त्वा हिरण्यऽपक्षं वरुं-

णस्य दूतं यमस्य योनौ शकुनं भुरण्युं॥६॥ ऊर्ध्वो गंधर्वो अधि नाके अस्थात्प्रत्यङ्चित्रा बिभ्रदस्यायुधानि। वसानो अत्कं सुरभिं दृशे कं स्वर्णं नाम जनत प्रियाणि॥७॥ द्रप्सः समुद्रमभि यज्जिगाति पश्यन्गृध्रस्य चक्षसा विधर्मन्। भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि॥८॥८॥

॥ १२४॥ १, ५–९ अग्निवरुणसोमानां निहवः। २–४ अग्निः॥ १–४ अग्निः। ५–८ यवानिपातं। ९ इंद्रः॥ १–३, ८, ९ त्रिष्टुप्। ४ जगती॥

॥१२४॥ इमं नो अग्न उप यज्ञमेहि पंचयामं त्रिवृतं सप्तंतुं। असो हव्यवाळुत नः पुरोगा ज्योगेव दीर्घं तम आशयिष्ठाः॥१॥ अदेवाहेवः प्रचता गुहा यन्प्रपश्यमानो अमृतत्वमेमि। शिवं यत्संतमशिवो जहामि स्वात्सख्यादरणीं नाभिमेमि॥२॥ पश्यन्नन्यस्या अतिथिं वयायां ऋतस्य धाम वि मिमे पुरूणि। शंसामि पित्रे असुराय शेवमयज्ञियाद्यज्ञियं भागमेमि॥३॥ वह्नीः समा अकरमंतरस्मिन्विंद्रे वृणानः पितरं जहामि। अग्निः सोमो वरुणस्ते व्यंते पर्यावर्द्राष्ट्रं तदवाम्यायन्॥४॥ निर्मीया उ त्ये असुरा अभूवन्त्वं च मा वरुण कामयासे। ऋतेन राजन्ननृतं विविंचन्ममं राष्ट्रस्याधिपत्यमेहि॥५॥९॥ इदं स्वरिदमिदास वाममयं प्रकाश उर्वंतरिक्षं। हनाव वृत्रं निरेहि सोम हविष्टा संतं हविषा यजाम॥६॥ कविः काव्या दिवि रूपमासजदप्रभूती वरुणो निरपः सृजत्। क्षेमं कृण्वाना जनयो न सिंधवस्ता अस्य वर्णं शुचयो भरिभ्रति॥७॥ ता अस्य ज्येष्ठमिंद्रियं संचंते ता ईमा क्षेति स्वधया मदंतीः। ता इं विशो न राजानं वृणाना वीभत्सुवो अप वृत्रादतिष्ठन्॥८॥

णस्य दूतं यमस्य योनौ शकुनं भुरण्युं ॥६॥ ऊर्ध्वः गंधर्वः अधि नाके अस्थात् प्रत्यङ् चित्रा बिभ्रत् अस्य आयुधानि वसानः अ-र्कं सुरभिं दृशे कं स्वः न नाम जनत प्रियाणि ॥७॥ दृप्सः समुद्रं अभि यत् जिगाति पश्यन् गृध्रस्य चक्षसा विऽधर्मन् भानुः शु-क्रेण शोचिषा चकानः तृतीये चक्रे रजसि प्रियाणि ॥८॥८॥

॥१२४॥ इमं नः अग्ने उप यज्ञं आ इहि पंचऽयामं त्रिऽवृतं स-प्तऽतंतुं असः हव्यऽवाट् उत नः पुरःऽगाः ज्योक् एव दीर्घं तमः आ अशयिष्ठाः ॥१॥ अदेवात् देवः प्रऽचतां गुहा यन् प्रऽपश्यं-मानः अमृतऽत्वं एमि शिवं यत् संतं अशिवः जहामि स्वात् स-ख्यात् अरणी नाभिं एमि ॥२॥ पश्यन् अन्यस्याः अतिथिं वया-र्याः ऋतस्य धाम वि मिमे पुरूणि शंसामि पित्रे असुराय शेवं अयज्ञियात् यज्ञियं भागं एमि ॥३॥ बह्वीः समाः अकरं अंतः अ-स्मिन् इंद्रं वृणानः पितरं जहामि अग्निः सोमः वरुणः ते अवंते परिऽआवर्तं राष्ट्रं तत् अवामि आऽअयन् ॥४॥ निःऽमायाः ऊं इत्ये असुराः अभूवन् त्वं च मा वरुण कामयासे ऋतेन राजन् अनृतं विऽविंचन् मम राष्ट्रस्य अधिऽपत्यं आ इहि ॥५॥९॥ इदं स्वः इदं इत् आस वामं अयं प्रऽकाशः उरु अंतरिक्षं हनावं वृत्रं निःऽएहि सोम हविः त्वा संतं हविषा यजाम ॥६॥ कविः कविऽत्वा दिवि रूपं आ असजत् अप्रऽभूती वरुणः निः अपः सृजत् क्षेमं कृण्वा-नाः जनयः न सिंधवः ताः अस्य वर्णं शुचयः भरिभ्रति ॥७॥ ताः अस्य ज्येष्ठं इंद्रियं सचंते ताः ईं आ क्षेति स्वधया मदंतीः ताः ईं विशः न राजानं वृणानाः वीभ्रत्सुवः अप वृचात् अतिष्ठन् ॥८॥

वीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरंतं। अनुष्टुभ-
मनु चर्चूर्यमाणमिंद्रं नि चिक्युः कवयो मनीषा ॥९॥१०॥

॥ १२५ ॥ १-८ वागांभृणी ॥ वागांभृणी ॥ १-३-८ त्रिष्टुप् । २ जगती ॥

॥१२५॥ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्म्यहमिंद्राग्नी अहमश्विनोभा ॥१॥
अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगं। अहं दधामि
द्रविणं हविष्मते सुप्राव्ये ३ यजमानाय सुन्वते॥२॥ अहं राष्ट्री संग-
मनी वसूनां चिकितुषी प्रथमा यज्ञियानां। तां मा देवा व्यदधुः
पुरुत्रा भूरिस्थात्रां भूर्यावेशयंतीं॥३॥ मया सो अन्नमत्ति यो वि-
पश्यति यः प्राणिति य ईं शृणोत्युक्तं। अमंतवो मां त उप क्षियं-
ति श्रुधि श्रुत श्रद्धिवं ते वदामि॥४॥ अहमेव स्वयमिदं वदामि
जुष्टं देवेभिरुत मानुषेभिः। यं कामये तंतमुग्रं कृणोमि तं ब्रह्माणं
तमृषिं तं सुमेधां॥५॥११॥ अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे
शरवे हंतवा उ। अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ
विवेश॥६॥ अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वंतः स-
मुद्रे। ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि
॥७॥ अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा।
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव॥८॥१२॥

॥ १२६ ॥ १-८ कुत्सालमहिमः शैलूषिरंहोमुग्वा वामदेव्यः ॥ विश्वे देवाः ॥ १-७ उपरि-
ष्टाद्बृहती । ८ त्रिष्टुप् ॥

॥१२६॥ न तमंहो न दुरितं देवासो अष्ट मर्त्यं। सजोषसो य-
मर्यमा मित्रो नयति वरुणो अति द्विषः॥१॥ तद्वि वयं वृणीमहे
वरुण मित्रार्यमन्। येना निरंहसो यूयं पाथ नेथा च मर्त्यम-

वीभत्सूनाँ सऽयुजँ हंसं आहुः अपां दिव्यानाँ सख्ये चरंतं अनु-ऽस्तुभँ अनु चर्चूर्यमाणं इंद्रँ नि चिक्युः कवयः मनीषा ॥९॥१०॥

॥१२५॥ अहं रुद्रेभिः वसुऽभिः चरामि अहं आदित्यैः उत विश्वऽदेवैः अहं मित्रावरुणा उभा बिभर्मि अहं इंद्राग्नी अहं अश्विना उभा ॥१॥ अहं सोमं आहनसं बिभर्मि अहं त्वष्टारं उत पूषणं भगं अहं दधामि द्रविणं हविष्मते सुप्रऽअयें यजमानाय सुन्वते ॥२॥ अहं राष्ट्री संऽगमनी वसूनां चिकितुषी प्रथमा यज्ञि-यानां तां मा देवाः वि अदधुः पुरुऽत्रा भूरिऽस्थात्रां भूरि आऽवे-शयंतीं ॥३॥ मया सः अन्नं अत्ति यः विऽपश्यति यः प्राणिति यः ईं शृणोति उक्तं अमंतवः मां ते उप क्षियंति श्रुधि श्रुत श्रद्धिऽवं ते वदामि ॥४॥ अहं एव स्वयं इदं वदामि जुष्टं देवेभिः उत मानु-षेभिः यं कामये तंऽतं उग्रं कृणोमि तं ब्रह्माणं तं ऋषिं तं सुऽमेधां ॥५॥११॥ अहं रुद्राय धनुः आ तनोमि ब्रह्मऽद्विषे शरवे हंतवे ऊं अहं जनाय समदं कृणोमि अहं द्यावापृथिवी आ विवेश ॥६॥ अहं सुवे पितरं अस्य मूर्धन् मम योनिः अप्ऽसु अंतः समुद्रे नतः वि तिष्ठे भुवना अनु विश्वा उत अमूं द्यां वर्ष्मणा उप स्पृ-शामि ॥७॥ अहं एव वातःऽइव प्र वामि आऽरभमाणा भुव-नानि विश्वा परः दिवा परः एना पृथिव्या एतावती महिना सं बभूव ॥८॥१२॥

॥१२६॥ न तं अंहः न दुःऽइतं देवासः अष्ट मर्त्यं सऽजोषसः यं अर्यमा मित्रः नयति वरुणः अति द्विषः ॥१॥ तत् हि वयं वृणीमहे वरुण मित्र अर्यमन् येन निः अंहसः यूयं पाथ नेथ च मर्त्यं अ-

ति द्विषः ॥२॥ ते नूनं नोऽयमूतये वरुणो मित्रो अर्यमा। नयिष्ठा उ नो नेषणि पर्षिष्ठा उ नः पर्षणयति द्विषः ॥३॥ यूयं विश्वं परि पाथ वरुणो मित्रो अर्यमा। युष्माकं शर्मणि प्रिये स्याम सुप्रणीतयोऽति द्विषः ॥४॥ आदित्यासो अति स्रिधो वरुणो मित्रो अर्यमा। उग्रं मरुद्भीं रुद्रं हुवेमेंद्रमग्निं स्वस्तयेऽति द्विषः ॥५॥ नेतारऊ षु णस्तिरो वरुणो मित्रो अर्यमा। अति विश्वानि दुरिता राजानश्चर्षणीनामति द्विषः ॥६॥ शुनमस्मभ्यमूतये वरुणो मित्रो अर्यमा। शर्म यच्छंतु सप्रथ आदित्यासो यदीमहे अति द्विषः ॥७॥ यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुंचता यजत्राः। एवो ष्वस्मन्मुंचता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ॥८॥१३॥

॥ १२७ ॥ १–८ कुशिकः सौभरो रात्रिर्वा भारद्वाजी ॥ रात्रिस्तवः ॥ गायत्री ॥

॥१२७॥ रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः। विश्वा अधि श्रियोऽधित ॥१॥ ओर्वप्रा अमर्त्या निवतो देव्युद्वतः। ज्योतिषा बाधते तमः ॥२॥ निरु स्वसारमस्कृतोषसं देव्यायती। अपेदु हासते तमः ॥३॥ सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि। वृक्षे न वसतिं वयः ॥४॥ नि यामासो अविक्षत नि पद्वंतो नि पक्षिणः। नि श्येनासश्चिदर्थिनः ॥५॥ यावया वृक्यं वृकं यवय स्तेनमूर्म्ये। अथा नः सुतरा भव ॥६॥ उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित। उष ऋणेव यातय ॥७॥ उप ते गा इवाकरं वृणीष्व दुहितर्दिवः। रात्रि स्तोमं न जिग्युषे ॥८॥१४॥

॥ १२८ ॥ १–९ विहव्यः ॥ विश्वे देवाः ॥ १–८ त्रिष्टुप् । ९ जगती ॥

॥१२८॥ ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेधानास्तन्वं

तिं द्विषः॥२॥ ते नूनं नः अयं ऊतये वरुणः मित्रः अर्यमा नयिष्ठाः ऊं नः नेषणि परिषदाः ऊं नः पर्षणि अतिं द्विषः॥३॥ यूयं विश्वं परि पाथ वरुणः मित्रः अर्यमा युष्माकं शर्मणि प्रिये स्याम सुऽप्रनीतयः अतिं द्विषः॥४॥ आदित्यासः अतिं स्रिधः वरुणः मित्रः अर्यमा उयं मरुत्ऽभिः रुद्रं हुवेम इंद्रं अग्निं स्वस्तये अतिं द्विषः॥५॥ नेतारः ऊं सु नः तिरः वरुणः मित्रः अर्यमा अतिं विश्वानि दुःऽइता राजानः चर्षणीनां अतिं द्विषः॥६॥ शुनं अस्मभ्यं ऊतये वरुणः मित्रः अर्यमा शर्म यच्छंतु सऽप्रथः आदित्यासः यत् ईमहे अतिं द्विषः॥७॥ यथा हु त्यत् वसवः गौर्यं चित् पदि सितां अमुंचत यजत्राः एवो सु अस्मत् मुंचत वि अंहः प्र तारि अग्ने प्रऽतरं नः आयुः॥८॥१३॥

॥१२७॥ रात्रीं वि अख्यत् आऽयती पुरुऽचा देवी अक्षाऽभिः विश्वाः अधि श्रियः अधित॥१॥ आ उरु अप्राः अमर्त्यो निऽवतः देवी उत्ऽवतः ज्योतिषा बाधते तमः॥२॥ निः ऊं स्वसारं अकृत उषसं देवी आऽयती अप इत् ऊं हासते तमः॥३॥ सा नः अद्य यस्याः वयं नि ते यामन् अविक्ष्महि वृष्टे न वसतिं वयः॥४॥ नि यामासः अविक्षत नि पत्ऽवंतः नि पक्षिणः नि श्येनासः चित् अर्थिनः॥५॥ यवयं वृक्यं वृकं यवयं स्तेनं ऊर्म्ये अघं नः सुऽतरा भव॥६॥ उयं मा पेपिशत् तमः कृष्णं विऽअक्तं अस्थित उषः ऋणाऽईव यातय॥७॥ उषं ते गाःऽईव आ अकरं वृणीष्व दुहितः दिवः रात्रिं स्तोमं न जिग्युषे॥८॥१४॥

॥१२८॥ मम अग्ने वर्चः विऽहवेषु अस्तु वयं त्वा इंधानाः तनूऽपां

पुषेम। मह्यं नमंतां प्रदिशश्चतंस्रस्त्वयार्ध्यक्षेण पृतना जयेम॥१॥ मम देवा विहवे संतु सर्व इंद्रावंतो मरुतो विष्णुरग्निः। समांतरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामे अस्मिन्॥२॥ मयि देवा द्रविणमा यजंतां मय्याशीरस्तु मयि देवहूतिः। दैव्या होतारो वनुषंत पूर्वेऽरिष्टाः स्याम तन्वा सुवीराः॥३॥ मह्यं यजंतु मम यानि हव्याकूतिः सत्या मनसो मे अस्तु। एनो मा नि गां कतमच्चनाहं विश्वे देवासो अधि वोचता नः॥४॥ देवीः षळुर्वीरुरुनः कृणोत विश्वे देवास इह वीरयध्वं। मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन्॥५॥१५॥ अग्ने मन्युं प्रतिनुदन्परेषामदब्धो गोपाः परि पाहि नस्त्वं। प्रत्यंचो यंतु निगुतः पुनस्तेऽमैषां चित्तं प्रबुधां वि नेशत्॥६॥ धाता धातॄणां भुवनस्य यस्पतिर्देवं वातारमभिमातिषाहं। इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पांतु यजमानं न्यर्थात्॥७॥ उरुव्यचा नो महिषः शर्म यंसदस्मिन्हवे पुरुहूतः पुरुक्षुः। स नः प्रजायै हर्यश्व मृळयेंद्र मा नो रीरिषो मा परा दाः॥८॥ ये नः सपत्ना अप ते भवंत्विंद्राग्निभ्यामव बाधामहे तान्। वसवो रुद्रा आदित्या उपरिस्पृशं मोयं चेत्तारमधिराजमक्रन्॥९॥१६॥१०॥

॥ १२९ ॥ १–९ प्रजापतिः परमेष्ठी ॥ भाववृत्तं ॥ त्रिष्टुप् ॥

॥ १२९ ॥ नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्। किमावरीवः कुह कस्य शर्मन्नंभः किमासीद्गहनं गभीरं॥१॥ न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः। आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास॥२॥ तम आसीत्त-

पुपेम मह्यं नमंतां मऽदिशः चतस्रः त्वया अधिऽअद्येण पृतनाः जयेम ॥१॥ मम देवाः विऽहवे संतु सर्वे इंद्रऽवंतः मरुतः विष्णुः अग्निः मम अंतरिक्षं उरुऽलोकं अस्तु मह्यं वातः पवतां कामे अस्मिन् ॥२॥ मयि देवाः द्रविणं आ यजंतां मयि आऽशीः अस्तु मयि देवऽहूतिः दैव्याः होतारः वनुषंत पूर्वे अरिष्टाः स्याम तन्वा सुऽवीराः ॥३॥ मह्यं यजंतु मम यानि हव्या आऽकूतिः सत्या मनसः मे अस्तु एनः मा नि गां कतमत् चन अहं विश्वे देवासः अधि वोचत नः ॥४॥ देवीः षट् उर्वीः उरु नः कृणोत विश्वे देवासः इह वीरयध्वं मा हास्महि प्रऽजया मा तनूभिः मा रधाम द्विषते सोम राजन् ॥५॥१५॥ अग्ने मन्युं प्रतिऽनुदन् परेयां अदब्धः गोपाः परि पाहि नः त्वं प्रत्यंचः यंतु निऽगुतः पुनः ते अमा एषां चित्तं प्रऽबुधां वि नेशत् ॥६॥ धाता धातॄणां भुवनस्य यः पतिः देवं चातारं अभिमातिऽसहं इमं यज्ञं अश्विना उभा बृहस्पतिः देवाः पांतु यजमानं निऽअर्थात् ॥७॥ उरुऽव्यचाः नः महिषः शर्म यंसत् अस्मिन् हवे पुरुऽहूतः पुरुऽक्षुः सः नः प्रऽजायै हरिऽअश्व मृळय इंद्र मा नः रिरिषः मा परा दाः ॥८॥ ये नः सऽपत्नाः अप ते भवंतु इंद्राग्निऽभ्यां अव बाधामहे तान् वसवः रुद्राः आदित्याः उपरिऽस्पृशं मा उग्रं चेत्तारं अधिऽराजं अक्रन् ॥९॥१६॥ ॥१०॥

॥ १२९ ॥ न असत् आसीत् नो सत् आसीत् तदानीं न आसीत् रजः नो विऽओम परः यत् किं आ अवरीवः कुह कस्य शर्मन् अंभः किं आसीत् गहनं गभीरं ॥१॥ न मृत्युः आसीत् अमृतं न तर्हि न रात्र्याः अह्नः आसीत् प्रऽकेतः आनीत् अवातं स्वधया तत् एकं तस्मात् ह अन्यत् न परः किं चन आस ॥२॥ तमः आसीत्

मंसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदं। तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकं ॥३॥ कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्। सतो बंधुमसति निरविंदन्हृदि प्रतीष्या कवयो मनीषा ॥४॥ तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त्। रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥५॥ को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः। अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥६॥ इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न। यो अस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद ॥७॥१७॥

॥ १३० ॥ १–७ यज्ञः प्राजापत्यः ॥ भाववृत्तं ॥ १ जगती । २–७ त्रिष्टुप् ॥

॥ १३० ॥ यो यज्ञो विश्वतस्तंतुभिस्तत एकशतं देवकर्मभिरायतः । इमे वयंति पितरो य आययुः प्र वयाप वयेत्यासते तते ॥१॥ पुमाँ एनं ततनुत उत्कृणत्ति पुमान्वि तत्ने अधि नाके अस्मिन्। इमे मयूखा उप सेदुरू सदः सामानि चक्रुस्तसराणयोतवे ॥२॥ कासीत्प्रमा प्रतिमा किं निदानमाज्यं किमासीत्परिधिः क आसीत्। छंदः किमासीत्प्रउगं किमुक्थं यद्देवा देवमयजंत विश्वे ॥३॥ अग्नेर्गायत्र्यभवत्सयुग्वोष्णिहया सविता सं बभूव। अनुष्टुभा सोम उक्थैर्महस्वान्बृहस्पतेर्बृहती वाचमावत् ॥४॥ विराण्मित्रावरुणयोरभिश्रीरिंद्रस्य त्रिष्टुविह भागो अह्नः। विश्वान्देवाञ्जगत्या विवेश तेन चाकॢप्र ऋषयो मनुष्याः ॥५॥ चाकॢपे तेन ऋषयो मनुष्या यज्ञे जाते पितरो नः पुराणे। प-

तमसा गूळ्हं अग्रे अप्रऽकेतं सलिलं सर्वं आ: इदं तुच्छ्येन आभु अपिऽहितं यत् आसीत् तपसः तत् महिना अजायत एकं॥३॥ कामः तत् अग्रे सं अवर्तत अधि मनसः रेतः प्रथमं यत् आसीत् सतः बंधुं असति निः अविंदन् हृदि प्रतिऽइष्यं कवयः मनीषा ॥४॥ तिरश्चीनः विऽततः रश्मिः एषां अधः स्वित् आसी३त् उपरि स्वित् आसी३त् रेतःऽधाः आसन् महिमानः आसन् स्वधा अवस्तात् प्रऽयतिः परस्तात्॥५॥ कः अद्धा वेद कः इह प्र वोचत् कुतः आऽजाता कुतः इयं विऽसृष्टिः अर्वाक् देवाः अस्य विऽसर्जनेन अथ कः वेद यतः आऽबभूव॥६॥ इयं विऽसृष्टिः यतः आऽबभूव यदि वा दधे यदि वा न यः अस्य अधिऽअक्षः परमे विऽओमन् सः अंग वेद यदि वा न वेद॥७॥१७॥

॥१३०॥ यः यज्ञः विश्वतः तंतुऽभिः ततः एकऽशतं देवऽकर्मेभिः आऽयतः इमे वयंति पितरः ये आऽययुः प्र वय अप वय इति आसते ततं॥१॥ पुमान् एनं ननुते उत् कृणत्ति पुमान् वि ततने अधि नाके अस्मिन् इमे मयूखाः उप सेदुः जं सदः सामानि चक्रुः तसराणि ओतवे॥२॥ का आसीत् प्रऽमा प्रतिऽमा किं निऽदानं आज्यं किं आसीत् परिऽधिः कः आसीत् छंदः किं आसीत् प्रऽउगं किं उक्थं यत् देवाः देवं अयजंत विश्वे॥३॥ अग्नेः गायत्री अभवत् सऽयुग्वा उष्णिहया सविता सं बभूव अनुऽस्तुभा सोमः उक्थैः महस्वान् बृहस्पतेः बृहती वाचं आवत्॥४॥ विऽराट् मित्रावरुणयोः अभिऽश्रीः इंद्रस्य त्रिऽस्तुप् इह भागः अहः विश्वान् देवान् जगती आ विवेश तेन चाकॢपे ऋषयः मनुष्याः ॥५॥ चाकॢपे तेन ऋषयः मनुष्याः यज्ञे जाते पितरः नः पुराणे प-

श्वन्मन्ये मनसा चक्षसा तान्य इमं यज्ञमयजंत पूर्वे ॥६॥ सह-स्तोमाः सहछंदस आवृतः सहप्रमा ऋषयः सप्त दैव्याः। पूर्वेषां पंथामनुदृश्य धीरा अन्वालेभिरे रथ्योऽ३न रश्मीन् ॥७॥१८॥

॥१३१॥ १-७ सुकीर्तिः काक्षीवतः ॥ १-३ ६.७ इंद्रः । ४.५ अश्विनौ ॥ १-३. ५-७ त्रिष्टुप् । ४ अनुष्टुप् ॥

॥१३१॥ अप प्राचं इंद्र विश्वाँ अमित्रानपापांचो अभिभूते नुदस्व। अपोदींचो अप शूराधराचं उरौ यथा तव शर्मन्मदेम ॥१॥ कुविदंग यवमंतो यवं चिद्यथा दांत्यनुपूर्वं वियूय। इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः ॥२॥ नहि स्थूयंतुथा यातमस्ति नोत श्रवो विविदे संगमेषु। गव्यंत इंद्रं सख्याय विप्रा अश्वायंतो वृषणं वाजयंतः ॥३॥ युवं सुरामंमश्विना नमुंचावासुरे सचा। विपिपाना शुभस्पती इंद्रं कर्मस्वावतं ॥४॥ पुत्रमिव पितरावश्विनोभेंद्रावथुः काव्यैर्दंसनाभिः। यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥५॥ इंद्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः। बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥६॥ तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम। स सुत्रामा स्ववाँ इंद्रो अस्मे आराच्चिद्वेषः सनुतर्युयोतु ॥७॥१९॥

॥१३२॥ १-७ शकपूतो नार्मेधः ॥ १ लिंगोक्तदेवताः । २-७ मित्रावरुणौ ॥ १ त्र्यवसानाष्टिः । २ ६ प्रस्तारपंक्तिः । ३-५ विराड्रूपा । ७ महाबृहतीगर्भा बृहती ॥

॥१३२॥ ईजानमिद्यौर्गृणाति वसुरीजानं भूमिरभि प्रभूषणि। ईजानं देवावश्विनावभि सुम्नैरवर्धतां ॥१॥ ता वां मित्रावरुणा धारयत्क्षिती सुपुत्रेषितत्वता यजामसि। युवोः क्राणाय सख्यैरभि ष्याम रद्भसः ॥२॥ अथा चिन्नु यह्वि-

श्यंन् मन्ये मनसा चक्षसा तान् ये इमं यज्ञं अयजंत पूर्वे ॥ ६ ॥ सहऽस्तोमाः सहऽछंदसः आऽवृतः सहऽप्रमाः ऋषयः सप्त दैव्याः पूर्वेषां पंथां अनुऽदृश्य धीराः अनुऽआलेभिरे रथ्यः न रश्मीन् ॥ ७ ॥ १८ ॥

॥ १३१ ॥ अप प्राचः इंद्र विश्वान् अमित्रान् अप अपाचः अभिऽभूते नुदस्व अप उदीचः अप शूर अधराचः उरौ यथा तव शर्मन् मदेम ॥ १ ॥ कुवित् अंग यवंऽमंतः यवं चित् यथा दांति अनुऽपूर्वं विऽयूय इहऽइह एषां कृणुहि भोजनानि ये बर्हिषः नमःऽवृक्तिं न जग्मुः ॥ २ ॥ नहि स्थूरि ऋतुऽथा यातं अस्ति न उत श्रवः विविदे संऽगमेषु गव्यंतः इंद्र सख्याय विप्राः अश्वऽयंतः वृषणं वाजयंतः ॥ ३ ॥ युवं सुरामं अश्विना नमुंचौ आसुरे सचा विऽपिपाना शुभः पती इंद्र कर्मंऽसु आवतं ॥ ४ ॥ पुरंऽइव पितरौ अश्विना उभा इंद्र आवथुः काव्यैः दंसनाभिः यत् सुऽरामं वि अपिबः शचीभिः सरस्वती त्वा मघऽवन् अभिऽणक् ॥ ५ ॥ इंद्रः सुऽचामा स्वऽवान् अवंऽभिः सुऽमृळीकः भवतु विश्वऽवेदाः वार्धतां द्वेषः अभयं कृणोतु सुऽवीर्यस्य पतयः स्याम ॥ ६ ॥ तस्य वयं सुऽमतौ यज्ञियस्य अपि भद्रे सौमनसे स्याम सः सुऽचामा स्वऽवान् इंद्रः अस्मे आरात् चित् द्वेषः सनुतः युयोतु ॥ ७ ॥ १९ ॥

॥ १३२ ॥ ईजानं इत् द्यौः गूर्तऽवसुः ईजानं भूमिः अभि प्रऽभूषणि ईजानं देवौ अश्विनौ अभिसुष्टिऽअवर्धतां ॥ १ ॥ तावां मित्रावरुणा धारयत्ऽधिती सुऽसुम्ना इषितत्वता यजामसि युवोः क्राणाय सख्यैः अभि स्याम रक्षसः ॥ २ ॥ अध चित् नु यत् दि-

धिषामहे वामभि प्रियं रेक्णः पत्यमानाः। दद्वाँ वा यत्पुप्यति रेक्णः सम्वारुन्नकिरस्य मघानि ॥३॥ असावन्यो असुर सूयत द्यौस्त्वं विश्वेषां वरुणासि राजा। मूर्धा रथस्य चाकन्नतावृतेनं-सांतकधुक् ॥४॥ अस्मिन्स्वे३तच्छकपूत एनो हिते मित्रे निगंतान्हंति वीरान्। अवोर्वा यद्वातनूष्वः प्रियासु यज्ञियास्वर्वा ॥५॥ युवोर्हि माता दितिर्विचेतसा द्यौर्न भूमिः पयसा पपूतनि। अव प्रिया दिदिष्टन सूरो निनिक्त रश्मिभिः ॥६॥ युवं ह्यंग्रराजावसीदतं तिष्ठद्रथं न धूर्षदं वनर्षदं। ता नः कणूकयंतीर्नृमेधस्तवे अंहसः सुमेधस्तवे अंहसः ॥७॥२०॥

॥ १२३ ॥ १-७ मुद्गः पैजवनः ॥ इंद्रः ॥ १-३ शक्करी। ४-६ महापंक्तिः। ७ त्रिष्टुप् ॥

॥ १२३ ॥ प्रो ष्वस्मै पुरोरथमिंद्राय शूषमर्चत। अभीके चिदु लोककृत्संगे समत्सु वृत्रहास्माकं बोधि चोदिता नभंतामन्यकेषां ज्याका अधि धन्वसु ॥१॥ त्वं सिंधूँरवासृजोऽधराचो अहन्नहिं। अणश्चुरिंद्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि ष्वजामहे नभंतामन्यकेषां ज्याका अधि धन्वसु ॥२॥ वि षु विश्वा अरातयोऽर्यो नशंत नो धियः। अस्तासि शत्रवे वधं यो न इंद्र जिघांसति या ते रातिर्दिदिवसु नभंतामन्यकेषां ज्याका अधि धन्वसु ॥३॥ यो न इंद्राभितो जनो वृकायुरादिदेशति। अधस्पदं तमीं कृधि विवाधो अंसि सासहिर्नभंतामन्यकेषां ज्याका अधि धन्वसु ॥४॥ यो न इंद्राभिदासति सनाभिर्यश्च निष्ट्यः। अव तस्य बलं तिर महीव द्यौरध त्मना नभंतामन्यकेषां ज्याका अधि धन्वसु ॥५॥ वयमिंद्र त्वायवः सखित्वमा रभामहे। नहि त्वद्रिग्वपामन्यदस्ति नः पृथा नयाति

धियामहे वां अभि प्रियं रेक्णः पत्यमानाः दुद्यान् वा यत् पुप्यंति रेक्णः सं जंभारन् नकिः अस्य मघानि ॥३॥ असौ अन्यः असुर सूयत द्यौः त्वं विश्वेषां वरुण असि राजा मूर्धा रथस्य चाकन् न एतावंता एनसा अंतकऽभुक् ॥४॥ अस्मिन् सु एतत् शकऽपूते एनः हिते मित्रे निऽगंतान् हंति वीरान् अवोः वा यत् धात् तनूपुं अवः प्रियासु यज्ञियासु अवी ॥५॥ युवोः हि माता अदितिः विऽचेतसा द्यौः न भूमिः पयसा पुपूतनि अवं प्रिया दिदिष्टन् सूरः नि नित्क्त रश्मिऽभिः ॥६॥ युवं हि अप्नऽराजौ असीदतं निष्टत् रथं न धूःऽसदं वनऽसदं ताः नः कणूकऽयंतीः नृऽमेधः तुचे अंहसः सुऽमेधः तुचे अंहसः ॥७॥२०॥

॥१३३॥ प्रो सु अस्मै पुरःऽरथं इंद्राय शूषं अर्चत अभीकें चेत् जंभलोकऽकृत् संऽगे समत्ऽसु वृत्रऽहा अस्माकं बोधि चोदिता नभंतां अन्यकेषां ज्याकाः अधि धन्वऽसु ॥१॥ त्वं सिंधून् अवं असृजः अधराचः अहन् अहिं अशयुः इंद्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि स्वजामहे नभंतां अन्यकेषां ज्याकाः अधि धन्वऽसु ॥२॥ वि सु विश्वाः अरातयः अर्यः नशंत नः धियः अस्ताः असि शचंवे वधं यः नः इंद्र जिघांसति या ते रातिः ददिः वसु नभंतां अन्यकेषां ज्याकाः अधि धन्वऽसु ॥३॥ यः नः इंद्र अभितः जनः वृकऽयुः आऽददेशति अधःऽपदं तं कृधि विऽवाधः असि सुसहिः नभंतां अन्यकेषां ज्याकाः अधि धन्वऽसु ॥४॥ यः नः इंद्र अभिऽदासति सऽनाभिः यः च निष्ट्यः अवं तस्य बलं तिर महीऽइव द्यौः अध त्मना नभंतां अन्यकेषां ज्याकाः अधि धन्वऽसु ॥५॥ वयं इंद्र त्वायवः सखिऽत्वं आ वृणीमहे ऋतस्य नः पथा नय अति

विश्वानि दुरिता नभंतामन्यकेषाँ ज्याका अधि धन्वसु ॥ ६ ॥ अस्मभ्यं सु त्वमिंद्र तां शिक्षु या दोहते प्रति वरं जरित्रे। अच्छिद्रोधी पीपयद्यथा नः सहस्रधारा पयसा मही गौः ॥ ७ ॥ २१ ॥

॥ १३४ ॥ १–६ सांपाता यौवनाश्वः । ६. ७ गोधा ॥ इंद्रः ॥ १–६ महापंक्तिः । ७ पंक्तिः ॥

॥ १३४ ॥ उभे यदिंद्र रोदसी आपप्रायोषा इव । महांतं त्वा महीनां सम्राजं चर्षणीनां देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ १ ॥ अव स्म दुर्हणायतो मर्तस्य तनुहि स्थिरं। अधस्पदं तमीं कृधि यो अस्माँ आदिदेशति देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ २ ॥ अव त्वा बृहतीरिषो विश्वधेंद्रा अमिचहन्। शचीभिः शक्र धूनुहींद्र विश्वाभिरूतिभिर्देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ३ ॥ अव यत्त्वं शंतक्रतविंद्र विश्वानि धूनुषे । रयिं न सुन्वते सचा सहस्रिणीभिरूतिभिर्देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ४ ॥ अव स्वेदा इवाभितो विषुक्पतंतु द्विषवः। दूवौया इव तंतवो व्यस्मदेतु दुर्मतिर्देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ५ ॥ दीर्घं ह्यंकुशं यथा शक्तिं बिभर्षि मंतुमः। पूर्वेण मघवन्पदाजो वयां यथा यमो देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ६ ॥ नकिर्देवा मिनीमसि नकिरा योपयामसि मंत्रश्रुत्यं चरामसि । पक्षेभिरपिकक्षेभिरत्राभि सं रभामहे ॥ ७ ॥ २२ ॥

॥ १३५ ॥ १–७ कुमारो यामायनः ॥ यमः ॥ अनुष्टुप् ॥

॥ १३५ ॥ यस्मिन्वृक्षे सुपलाशे देवैः संपिबते यमः । अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति ॥ १ ॥ पुराणाँ अनु-

विश्वानि दुःऽइता नभन्तां अन्यकेषाँ ज्याकाः अधि धन्वऽसु॥६॥ अस्मभ्यँ सु त्वं इंद्र तां शिक्ष या दोहते प्रति वरं जरित्रे अच्छिद्रऽऊधी पीपयत् यथा नः सहस्रंऽधारा पयसा मही गौः॥७॥२१॥

॥१३४॥ उभे यत् इंद्र रोदसी आऽपप्राथ उषाःऽइव महान्तं त्वा महीनाँ संऽराजं चर्षणीनां देवी जनित्री अजीजनत् भद्रा जनित्री अजीजनत्॥१॥ अवं स्म दुःऽहनायतः मर्तस्य तनुहि स्थिरं अधःऽपदं तं ईं कृधि यः अस्मान् आऽदिदेशति देवी जनित्री अजीजनत् भद्रा जनित्री अजीजनत्॥२॥ अवं त्याः बृहतीः इषः विश्वऽचंद्राः अमित्रऽहन् शचीभिः शक्र धूनुहि इंद्र विश्वाभिः ऊतिऽभिः देवी जनित्री अजीजनत् भद्रा जनित्री अजीजनत्॥३॥ अवं यत् त्वं शतऽक्रतो इंद्र विश्वानि धूनुषे रयिं न सुन्वते सचा सहस्रिणीभिः ऊतिऽभिः देवी जनित्री अजीजनत् भद्रा जनित्री अजीजनत्॥४॥ अवं स्वेदाःऽइव अभितः विष्वक् पतंतु दिद्यवः दूर्वायाःऽइव तंतवः वि अस्मत् एतु दुःऽमतिः देवी जनित्री अजीजनत् भद्रा जनित्री अजीजनत्॥५॥ दीर्घं हि अंकुशं यथा शक्तिं बिभर्षि मंतुऽमः पूर्वेण मघऽवन् पदा अजः वर्या यथा यमः देवी जनित्री अजीजनत् भद्रा जनित्री अजीजनत्॥६॥ नकिः देवाः मिनीमसि नकिः आ योपयामसि मंत्रऽश्रुत्यं चरामसि पक्षेभिः अपिऽकक्षेभिः अत्र अभि सं रभामहे ॥७॥२२॥

॥१३५॥ यस्मिन् वृक्षे सुऽपलाशे देवैः संऽपिबंते यमः अत्र नः विश्पतिः पिता पुराणान् अनु वेनति॥१॥ पुराणान् अनु-

वेनँतं चरँतं पापयामुया। असूयन्नभ्यचाकशं तस्मा अस्पृहयं पुनः॥२॥ यं कुमार् नवं रथमचक्रं मनसाकृणोः। एकेंपं विश्वतः प्रांचमपश्यन्नधि तिष्ठसि॥३॥ यं कुमार् प्रावर्तयो रथं विप्रेभ्यस्परि। तं सामानु प्रावर्तत समितो नाव्याहितं॥४॥ कः कुमारमजनयद्रथं को निरवर्तयत्। कः स्वित्तद्य नो ब्रूयादनुदेयी यथाभवत्॥५॥ यथाभवदनुदेयी ततो अग्रमजायत। पुरस्ताद्बुध्न आततः पश्चान्निरयणं कृतं॥६॥ इदं यमस्य सादनं देवमानं यदुच्यते। इयमस्य धम्यते नाळीरयं गोभिः परिष्कृतः॥७॥२३॥

॥१३६॥ १–७ सुनयो वातरशनाः॥ १ भूतिः। २ वातभूतिः। ३ विप्रभूतिः। ४ पृषाणकः। ५ करिक्रतः। ६ एतशः। ७ ऋष्यशृंगः॥ केशिनः॥ अनुष्टुप्॥

॥१३६॥ केश्य१ग्निं केशी विषं केशी बिभर्ति रोदसी। केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते॥१॥ सुनयो वातरशनाः पिशंगा वसते मला। वातस्यानु ध्राजिं यंति यद्देवासो अविक्षत॥२॥ उन्मदिता मौनेयेन वाताँ आ तस्थिमा वयं। शरीरदस्माकं यूयं मर्तासो अभि पश्यथ॥३॥ अंतरिक्षेण पतति विश्वा रूपावचाकशत्। मुनिर्देवस्यदेवस्य सौकृत्याय सखा हितः॥४॥ वातस्याश्वो वायोः सखायो देवेषितो मुनिः। उभौ समुद्रावा क्षेति यश्च पूर्व उतापरः॥५॥ अप्सरसां गंधर्वाणां मृगाणां चरणे चरन्। केशी केतस्य विद्वान्त्सखा स्वादुर्मदिंतमः॥६॥ वायुरस्मा उपामंथत्पिनष्टि स्मा कुनंनमा। केशी विषस्य पात्रेण यद्रुद्रेणापिबत्सह॥७॥२४॥

॥१३७॥ १–७ सप्त ऋषय ऋक्षयः॥ विश्वे देवाः॥ अनुष्टुप्॥

॥१३७॥ उत देवा अवहितं देवा उन्नयथा पुनः। उता-

ऽवेनँतं चरँतं पापया अमुया अमूयन् अभि अचाकशं तस्मै अस्पृहयं पुनः"॥२॥ यं कुमार नवं रथं अचक्रं मनसा अकृणोः एकऽईषं विश्वतः प्राचं अपश्यन् अधि तिष्ठसि॥३॥ यं कुमार प्र अवर्तयः रथं विप्रेभ्यः परि तं साम अनु प्र अवर्तत सं इतः नावि आऽहितं॥४॥ कः कुमारं अजनयत् रथं कः निः अवर्तयत् कः स्वित् तत् अद्य नः ब्रूयात् अनुऽदेयी यथा अभवत्॥५॥ यथा अभवत् अनुऽदेयी ततः अयं अजायत पुरस्तात् बुधः आऽततः पश्चात् निःऽअयनं कृतं॥६॥ इदं यमस्य सदनं देवऽमानं यत् उच्यते इयं अस्य धम्यते नाळीः अयं गीःऽभिः परिऽकृतः॥७॥२३॥

॥ १३६ ॥ केशी अग्निं केशी विषं केशी बिभर्ति रोदसी केशी विश्वं स्वःदृशे केशी इदं ज्योतिः उच्यते॥१॥ मुनयः वातऽरशनाः पिशंगा वसते मला वातस्य अनुं ध्राजिं यंति यत् देवासः अविक्षत॥२॥ उतऽआदिताः मौनेयेन वातान् आ तस्थिम वयं शरीरा इत् अस्माकं यूयं मर्तासः अभि पश्यथ॥३॥ अंतरिक्षेण पततिं विश्वा रूपा अवऽचाकशत् मुनिः देवस्यऽदेवस्य सौकृत्याय सखा हितः॥४॥ वातस्य अश्वः वायोः सखा अधो देवऽईषितः मुनिः उभौ समुद्रौ आ क्षेति यः च पूर्वः उत अपरः॥५॥ अप्सरसां गंधर्वाणां मृगाणां चरणे चरन् केशी केतस्य विद्वान् सखा स्वादुः मदिन्ऽतमः॥६॥ वायुः अस्मै उप अमंथत् पिनष्टि स्म कुनंनमा केशी विषस्य पात्रेण यत् रुद्रेण अपिबत् सह॥७॥२४॥

॥ १३७ ॥ उत देवाः अवंऽहितं देवाः उत् नयथ पुनः उत

गंधुक्रुपं देवा देवा जीवयथा पुनः ॥१॥ द्वाविमौ वातौ वात आ सिंधोरा परावतः। दक्षं ते अन्य आ वातु परान्यो वातु यद्रपः ॥२॥ आ वात वाहि भेषजं वि वात वाहि यद्रपः। त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥३॥ आ त्वागमं शंतातिभिरथो अरिष्टतातिभिः। दक्षं ते भद्रमाभारिषं परा यक्ष्मं सुवामि ते ॥४॥ चायंतामिह देवास्त्रायंतां मरुतां गणः। चायंतां विश्वा भूतानि यथायमरपा असत् ॥५॥ आप इद्वा उ भेषजीरापो अमीवचातनीः। आपः सर्वस्य भेषजीस्तास्ते कृण्वंतु भेषजं ॥६॥ हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी। अनामयित्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि ॥७॥२५॥

॥ १३८ ॥ १-६ अंग औरवः ॥ इंद्रः ॥ जगती ॥

॥ १३८ ॥ तव त्य इंद्र सख्येषु वह्नय ऋतं मन्वाना अददिरुर्वलं। यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय मन्मन्नहंत्य दंसयः ॥१॥ अवासृजः प्रस्वः सप्तयो गिरीनुदाज उस्रा अपिबो मधु प्रियं। अवर्धयो वनिनो अस्य दंससा शुशोच सूर्यं ऋतजातया गिरा ॥२॥ वि सूर्यो मध्ये अमुचद्रथं दिवो विदद्दासायं प्रतिमानमार्यः। दृळ्हानि पिप्रोरसुरस्य मायिन इंद्रो व्यस्यच्छकुवाँ ऋजिश्वना ॥३॥ अनाधृष्टानि धृषितो व्यस्यन्निधीरदेवाँ अमृणद्यास्यः। मासेव सूर्यो वसु पुर्यमा ददे गृणानः शवँूरशृणाद्विरुक्मता ॥४॥ अयुद्धसेनो विभ्वा विभिंदता दासंवृचहा तुज्यानि तेजते। इंद्रस्य वज्रादबिभेदभिश्नथः प्राक्रामच्छुष्मूरजहादुपा अनः ॥५॥ एता त्या ते श्रुत्यानि केवला य-

आगंः चक्रुषं देवाः देवाः जीवयथ पुनरिति॥१॥ द्वौ इमौ वातौ वातः आ सिंधोः आ पराऽवतः दक्षं ते अन्यः आ वातु परः अन्यः वातु यत् रपः॥२॥ आ वात वाहि भेषजं वि वात वाहि यत् रपः त्वं हि विश्वऽभेषजः देवानां दूतः ईयसे॥३॥ आ त्वा अगमं शंतातिऽभिः अथो अरिष्टतातिऽभिः दक्षं ते भद्रं आ अभार्षं परा यक्ष्मं सुवामि ते॥४॥ चायंतां इह देवाः चायंतां मरुतां गणः चायंतां विश्वा भूतानि यथा अयं अरपाः असत्॥५॥ आपः इत् वै उं भेषजीः आपः अमीवऽचातनीः आपः सर्वस्य भेषजीः ताः ते कृण्वंतु भेषजं॥६॥ हस्ताभ्यां दशंऽशाखाभ्यां जिह्वा वाचः पुरःऽगवी अनामयित्नुऽभ्यां त्वा ताभ्यां त्वा उप स्पृशामसि॥७॥२५॥

॥१३८॥ तवं त्ये इंद्र सख्येषु वह्नयः चित्रं मन्वानाः वि अदर्दिरुः वलं यत् दशस्यन् उपसः रिणन् अपः कुत्साय मन्मन् अर्चयः च दंसयः॥१॥ अव असृजः प्रऽस्वः स्रंचयः गिरीन् उत् आजः उस्राः अपिंवः मधु प्रियं अवर्धयः वनिनः अस्य दंससा शुशोच सूर्यः चितऽजातया गिरा॥२॥ वि सूर्यः मध्ये अमुचत् रथं दिवः विदत् दासाय प्रतिऽमानं आर्यः दृळ्हानि पिप्रोः असुरस्य मायिनः इंद्रः वि आस्यत् चकृऽवान् चृजिश्वना॥३॥ अनाधृष्टानि धृषितः वि आस्यत् निऽधीन् अदेवान् अमृणत् अयास्यः मासाऽइव सूर्यः वसु पुरं आ दद्रे गृणानः शर्चून् अशृणात् विरुक्मता॥४॥ अयुद्धऽसेनः विऽभ्वा विऽभिंदुना दासंत् वृचऽहा तुज्यानि तेजते इंद्रस्य वज्रात् अविभेत् अभिऽअर्थः प्र अक्रामत् शुंध्यूः अजहात् उपाः अनः॥५॥ एता त्या ते शुत्यानि केवला यत्

देक् एकमकृणोरयज्ञं। मासां विधानमदधा अधि द्यवि त्वया विभिन्नं भरति प्रधिं पिता ॥६॥२६॥

॥ १३९॥ १–६ विश्वावसुर्देवगंधर्वः ॥ १–३ सविता। ४–६ विश्वावसुः ॥ त्रिष्टुप् ॥

॥१३९॥ सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ अजस्रं। तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन्विश्वा भुवनानि गोपाः ॥१॥ नृचक्षा एष दिवो मध्य आस्त आपप्रिवान्रोदसी अंतरिक्षं। स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुं ॥२॥ रायो बुध्नः संगमनो वसूनां विश्वा रूपाभि चष्टे शचीभिः। देव इव सविता सत्यधर्मेंद्रो न तस्थौ समरे धनानां ॥३॥ विश्वावसुं सोम गंधर्वमायौ दक्षपितरहतेना व्यायन्। तदन्ववैदिंद्रो रारहाण आसां परि सूर्यस्य परिधीरपश्यत् ॥४॥ विश्वावसुरभि तन्नो गृणातु दिव्यो गंधर्वो रजसो विमानः। यद्वा घा सत्यमुत यन्न विद्म धियो हिन्वानो धिय इन्नो अव्याः ॥५॥ सस्तिमविंदुचरणे नदीनामपावृणोद्धुरो अश्मव्रजानां। प्रासां गंधर्वो अमृतानि वोचदिंद्रो दक्षं परि जानादहीनां ॥६॥२७॥

॥ १४० ॥ १–६ अग्निः पावकः ॥ अग्निः ॥ १ विष्टारपंक्तिः। २–४ सतोबृहती। ५ अपरिष्टाज्ज्योतिः। ६ त्रिष्टुप् ॥

॥१४०॥ अग्ने तव श्रवो वयो महि भ्राजंते अर्चयो विभावसो। बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे ॥१॥ पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना। पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥२॥ जज्ञो नपाज्जातवेदः सुशस्तिभिर्मंदस्व धीतिभिर्हितः। त्वे इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥३॥ दूरज्यन्नग्ने प्रथयस्व जंतुभिरस्मे रायो अमर्त्य। स दर्शतस्य व-

एकः एकं अकृणोः अयज्ञं मासां विऽधानं अदधाः अधि द्यवि त्वया विऽभिन्नं भरति प्रऽधिं पिता ॥ ६ ॥ २६ ॥

॥ १३९ ॥ सूर्यैऽरश्मिः हरिऽकेशः पुरस्तात् सविता ज्योतिः उत् अयान् अजस्रं तस्य पूषा प्रऽसवे याति विद्वान् संऽपश्यन् विश्वा भुवनानि गोपाः ॥ १ ॥ नृऽचक्षाः एषः दिवः मध्ये आस्ते आपप्रिऽवान् रोदसी अंतरिक्षं सः विश्वाचीः अभि चष्टे घृताचीः अंतरा पूर्वं अपरं च केतुं ॥ २ ॥ रायः बुध्नः संऽगमनः वसूनां विश्वा रूपा अभि चष्टे शचीभिः देवःऽईव सविता सत्यऽधर्मा इंद्रः न तस्थौ संऽअरे धनानां ॥ ३ ॥ विश्वऽवसुं सोम गंधर्वं आपः दृहन्पुपीः तत् ऋतेन वि आयन् तत् अनुऽअवैत् इंद्रः ररहाणः आसां परि सूर्यस्य मरिऽधीन् अपश्यत् ॥ ४ ॥ विश्वऽवसुः अभि तत् नः गृणातु दिव्यः गंधर्वः रजसः विऽमानः यत् वा घ सत्यं उत यत् न विद्म धियः हिन्वानः धियः इत् नः अव्याः ॥ ५ ॥ सखिं अविंदत् चरणे नदीनां अपं अवृणोत् दुरः अश्मऽव्रजानां प्र आसां गंधर्वः अमृतानि वोचत् इंद्रः दक्षं परि जानात् अहीनां ॥ ६ ॥ २७ ॥

॥ १४० ॥ अग्ने तव श्रवः वयः महि भ्राजंते अर्चयः विभाऽवसो बृहत्ऽभानो शवसा वाजं उक्थ्यं दधासि दाशुषे कवे ॥ १ ॥ पावकऽवर्चाः शुक्रऽवर्चाः अनूनऽवर्चाः उत् इयर्षि भानुना पुचः मातरा विऽचरन् उप अवसि पृणक्षि रोदसी उभे ॥ २ ॥ ऊर्जः नपात् आतऽवेदः सुशस्तिऽभिः मंदस्व धीतिऽभिः हितः त्वे इषः सं दधुः भूरिऽवर्पसः चिचऽऊतयः वामऽजाताः ॥ ३ ॥ दूरऽज्यन् अग्ने प्रऽयतस्व जंतुऽभिः अस्मे रायः अमर्त्यः सः दर्शतस्य व-

पुषो॒ वि रा॑जसि पृणक्षि॒ सान॑सिं क्र॒तुं ॥४॥ इ॒ष्कर्तारं॑मध्व॒रस्य॒ प्र-चे॑तसं॒ क्षय॑न्तं॒ राध॑सो म॒हः। रा॒तिं वा॒मस्य॑ सुभगां॒ म॒हीमि॑षं॒ द-धा॑सि॒ सान॑सिं र॒यिं ॥५॥ ऋ॒तावा॑नं महि॒षं वि॒श्वद॑र्शतम॒ग्निं सु॒म्नाय॑ दधिरे पु॒रो जना॑ः। श्रु॒त्क॒र्णं स॒प्रथ॑स्तमं त्वा गि॒रा दैव्यं मा-नु॑षा यु॒गा ॥६॥२८॥

॥ १४१ ॥ १–६ अग्निस्तापसः ॥ विश्वे देवाः ॥ अनुष्टुप् ॥

॥१४१॥ अग्ने॒ अच्छा॑ वदे॒ह नः॑ प्र॒त्यङ्ङु॒ः सु॒मना॑ भव। प्र नो॑ यच्छ विशस्पते धन॒दा अ॑सि न॒स्त्वं ॥१॥ प्र नो॑ यच्छत्वर्य॒मा प्र भग॒ः प्र बृह॒स्पति॑ः। प्र दे॒वाः प्रो॑त सू॒नृता॑ रा॒यो दे॒वी द॑दातु नः॥२॥ सोम॑ं राजा॑नमवसे॒ऽग्निं गी॒र्भिर्ह॑वामहे। आ॒दि॒त्यान्विष्णु॑ं सू॒र्यं ब्रह्मा॑णं॒ च बृह॒स्पति॑ं॥३॥ इ॒न्द्र॒वा॒यू बृह॒स्पति॑ं सु॒हवे॒ह ह॑वामहे। यथा॑ नः॒ सर्व॒ इज्जन॒ः संग॑त्यां सु॒मना॒ असा॑न्॥४॥ अ॒र्य॒मण॑ं बृह॒स्पति॒मिन्द्रं॑ दा॒नाय॑ चोदय। वात॑ं विष्णु॑ं सर॒स्वती॑ं सवि॒तार॑ं च वाजिन॑ं॥५॥ त्वं नो॑ अग्ने अ॒ग्निभि॒र्ब्रह्म॑ य॒ज्ञं च॑ वर्धय। त्वं नो॑ देवता॒तये॑ रा॒यो दा॒नाय॑ चोदय॥६॥२९॥

॥ १४२ ॥ १–८ शार्ङ्गाः । १, २ जरिता । ३ ४ द्रोणः । ५ ६ सारिसृक्वः । ७, ८ लंयमित्रः ॥ अग्निः ॥ १, २ जगती । ३–६ त्रिष्टुप् । ७, ८ अनुष्टुप् ॥

॥१४२॥ अ॒यम॑ग्ने जरि॒ता ते॑ अ॒भूदपि॒ सह॑सः सूनो नह्यन्य-दस्त्या॑पं। भद्रं॒ हि शर्म॑ त्रिवरू॒थमस्ति॑ त॒ आरे॑ हिंसा॒नाम॑पं दि॒द्युमा कृ॑धि ॥१॥ प्रव॑त्ते अग्ने॒ जनि॑मा पितू॒यतः॑ सा॒चीव॒ विश्वा॒ भुव॑ना॒ न्यृ॑ञ्जसे। प्र सप्र॑यः॒ प्र स॑निषंत नो॒ धिय॑ः पुर॒श्चरं॑ति पशु॒पा इ॑व॒ त्मना॑॥२॥ उ॒त वा॒ उ॒ परि॑ वृणक्षि॒ बप्स॑दः॒ प्र हो॑त॒रग्ने॒ उल॑पस्य स्वधावः। उ॒त खि॒ल्या उ॒र्वरा॑णां भवंति॒ मा ते॑ हृ॒तिं तवि॑षीं॒ चुक्रु॑धाम ॥३॥ यदु॒द्यतो॑ नि॒वतो॒ यासि॒ शीभं॑

पुंपः वि राजसि पृणक्षि सानसिं क्रतुं॥४॥ इष्कर्तारं अध्वरस्य प्रऽचेतसं क्षयंतं राधसः महः रातिं वामस्य सुऽभगां महीं इषं दधासि सानसिं रयिं॥५॥ ऋतऽवानं महिषं विश्वऽदर्शतं अग्निं सुम्नाय दधिरे पुरः जनाः श्रुतऽकर्णं सुप्रयःऽतमं त्वा गिरा दैव्यं मानुषा युगा॥६॥२८॥

॥१४१॥ अग्ने अच्छ वद इह नः प्रत्यङ् नः सुऽमनाः भव प्र नः यच्छ विशः पते धनऽदाः असि नः त्वं॥१॥ प्र नः यच्छतु अर्यमा प्र भगः प्र बृहस्पतिः प्र देवाः प्र उत सूनृता रायः देवी ददातु नः॥२॥ सोमं राजानं अवसे अग्निं गीःऽभिः हवामहे आदित्यान् विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिं॥३॥ इंद्रवायू बृहस्पतिं सुऽहवा इह हवामहे यथा नः सर्वः इत् जनः संऽगत्यां सुऽमनाः असत्॥४॥ अर्यमणं बृहस्पतिं इंद्रं दानाय चोदय वातं विष्णुं सरस्वतीं सवितारं च वाजिनं॥५॥ त्वं नः अग्ने अग्निऽभिः ब्रह्म यज्ञं च वर्धय त्वं नः देवऽहूतये रायः दानाय चोदय॥६॥२९॥

॥१४२॥ अयं अग्ने जरिता ते अभूत् अपिः सहसः सूनो नहि अन्यत् अस्ति अपऽभद्रं हि शर्म चिऽवरूथं अस्ति ते आरे हिंसानां अप दिद्युं आ कृधि॥१॥ प्रऽवत् ते अग्ने जनिमा पितुऽयतः साचीऽइव विश्वा भुवना नि ऋंजसे प्र सप्रयः प्र सनिषंत नः धियः पुरः चरंति पशुपाःऽइव त्मना॥२॥ उत वै ऊं परि वृणक्ति बप्सत् वहोः अग्ने उलपस्य स्वधाऽवः उत खिल्याः उर्वराणां भवंति मा ते हेतिं तविषीं चुक्रुधामन्॥३॥ यत् उतऽवतः निऽवतः यासि

वस्त्पृथंगेपि प्रगर्धिनीव सेना। यदा ते वातो अनुवाति शोचिर्वप्नेव श्मश्रु वपसि प्रभूमं॥४॥ प्रत्यस्य श्रेणयो दह्र एकं नियानं बहवो रथासः। बाहू यदग्ने अनुमर्मृजानो न्यङ्ङत्रानामन्वेषि भूमिं॥५॥ उत्ते शुष्मा जिहतामुत्ते अर्चिरुत्ते अग्ने शशमानस्य वाजाः। उच्छ्वञ्चस्व नि नम वर्धमान आ त्वाद्य विश्वे वसवः सदंतु॥६॥ अपामिदं न्ययनं समुद्रस्य निवेशनं। अन्यं कृणुष्वेतः पंथां तेन याहि वशाँ अनु॥७॥ आयने ते परायणे दूर्वा रोहंतु पुष्पिणीः। हृदाश्च पुंडरीकाणि समुद्रस्य गृहा इमे॥८॥३०॥७॥

॥ १४३ ॥ १-६ ऋषिः मौद्गल्यः ॥ अग्निर्देवता ॥ अनुष्टुप् ॥

॥ १४३ ॥ त्यं चिदश्वमृतजुरमर्थमश्वं न यातवे। कक्षीवंतं यदी पुना रथं न कृणुषे नवं॥१॥ त्यं चिदश्वं न वाजिनमरेणवो यमन्नंत। दक्षं यंतारिं न वि यंतमस्रिधं यविष्ठमा रजः॥२॥ नरा दंसिष्ठावत्रये शुभ्रा सिषासतं धियः। अथा हि वां दिवो नरा पुनः स्तोमो न विशसे॥३॥ चित्ते तद्वां सुराधसा रातिः सुमतिरश्विना। आ यन्नः सदने पृथौ समने पथ्येवो नरा॥४॥ युवं भुज्युं समुद्र आ रजसः पार ईषितं। यातमच्छा पतत्रिभिर्नासत्या सातये कृतं॥५॥ आ वां सुम्नैः शंयू इव मंहिष्ठा विश्ववेदसा। समस्मे भूषतं नरोत्सं न पिप्युषीरिषः॥६॥१॥

॥ १४४ ॥ १-६ सुपर्णोऽमार्क्यपुत्र ऊर्ध्वकृशनो वा यामायनः ॥ इंद्रः ॥ १, ३, ४ गायत्री। २ बृहती। ५ सतोबृहती। ६ विराट्पंक्तिः ॥

॥ १४४ ॥ अयं हि ते अमर्त्य इंदुरत्यो न पत्यते। दक्षो विश्वायुर्वेधसे॥१॥ अयमस्मासु काव्यं ऋभुर्वाजो दास्वते। अयं विभर्त्यूर्ध्वकृशनं मदमृभुने कृत्व्यं मदं॥२॥ घृषुः श्येनाय कृत्वने आसु स्वासु वंसगः। अवं दीधेदहीशुवः॥३॥ यं सुपर्णः

बर्सत् पृथक् एषि प्रगर्धिनीऽइव सेना यदा ते वातः अनुऽवाति शोचिः वप्नाऽइव शमस्थु वपसि प्रभूमं॥४॥ प्रति अस्य श्रेणयः दृंहऽश्रे एकं निऽयानं वहवः रथासः वाहू यत् अग्ने अनुऽमर्मृजानः न्यङ् उत्तानां अनुऽएषि भूमिं॥५॥ उत् ते शुष्माः जिहतां उत् ते अर्चिः उत् ते अग्ने शशमानस्य वाजाः उत् स्तुचस्व नि नम वर्धमानः आ त्वा अद्य विश्वे वसवः सदंतु॥६॥ अपां इदं निऽअयनं समुद्रस्य निऽवेशनं अन्यं कृणुष्व इतः पंथां तेन याहि वशान् अनु॥७॥ आऽअयने ते पराऽअयने दूर्वाः रोहंतु पुष्पिणीः हृदाः च पुंडरीकाणि समुद्रस्य गृहाः इमे॥८॥३०॥७॥

॥१४३॥ त्यं चित् अश्विं कृतऽजुरं अर्थं अश्वं न यातवे कक्षीवंतं यदिपुनः रथं न कृणुथः नवं॥१॥ त्यं चित् अश्वं न वाजिनं अरेणवः यं अत्नत हव्हं यंथिं न वि स्यतं अश्विं यविष्ठं आ रजः॥२॥ नरा दंसिष्ठा अवसे शुभा सिसासतं धियः अर्थं हि वां दिवः नरा पुनः स्तोमः न विऽअशसे॥३॥ चित्रं तत् वां सुऽराधसा रातिः सुऽमतिः अश्विना आ यत् नः सदने पृथौ समने पर्वथः नरा॥४॥ युवं भुज्युं समुद्रे आ रजसः पारे ईंखितं यातं अच्छ पतत्रिऽभिः नासत्या सातये कृतं॥५॥ आ वां सुम्नैः शंयूऽइव० मंहिष्ठा विश्वऽवेदसा सं अस्मे भूषतं नरा उत्सं न पिप्युषीः इषः॥६॥७॥

॥१४४॥ अयं हि ते अमर्त्यः इंदुः अत्यः न पत्यते दक्षः विश्वऽआयुः वेधसे॥१॥ अयं अस्मासु काव्यः कृभुः वजः दास्वते अयं विभर्ति ऊर्ध्वऽकृशनं मदं कृभुः न कृत्व्यं मदं॥२॥ घृषुः श्येनाय कृत्वने आसु स्वासुं वंसगः अवदीधेत् अहीशुवः॥३॥ यं सुऽपर्णः

परावतः श्येनस्य पुच आभरत्। शतचक्रं यो अर्हो वर्तनिः ॥४॥ यं ते श्येनश्चारुमवृकं पदाभरदरुणं मानमंधसः। एना वयो वि तार्यायुर्जीवस एना जागार बंधुता ॥५॥ एवा तदिंद्र इंदुना देवेषु चिद्धारयाते महि त्यजः। क्रत्वा वयो वि तार्यायुः सुक्रतो क्रत्वा-यमस्मदा सुतः ॥६॥२॥

॥ १४५ ॥ १–६ इंद्राणी ॥ उपनिषत्सपत्नीबाधनं ॥ १–५ अनुष्टुप्। ६ पंक्तिः ॥

॥१४५॥ इमां खनाम्योषधिं वीरुधं बलवत्तमां। यया सपत्नीं बाधते यया संविंदते पतिं ॥१॥ उत्तानपर्णे सुभगे देवजूते सहस्वति। सपत्नीं मे परा धम पतिं मे केवलं कुरु ॥२॥ उत्तराहमुत्तरा उत्तरेदुत्तराभ्यः। अधा सपत्नी या ममाधरा साधराभ्यः ॥३॥ नह्यस्या नाम गृभ्णामि नो अस्मिन्नमते जने। परामेव परावतं सपत्नीं गमयामसि ॥४॥ अहमस्मि सहमानाथ त्वमसि सासहिः। उभे सहस्वती भूत्वी सपत्नीं मे सहावहै ॥५॥ उपेतेऽधां सहमानामभि त्वाधां सहीयसा। मामनु प्र ते मनो वत्सं गौरिव धावतु पया वारिव धावतु ॥६॥३॥

॥ १४६ ॥ १–६ देवमुनिरारण्यः ॥ अरण्यानी ॥ अनुष्टुप् ॥

॥१४६॥ अरण्यान्यरण्यान्यसौ या प्रेव नश्यसि। कथा ग्रामं न पृच्छसि न त्वा भीरिव विंदतीङ्ग ॥१॥ वृषारवाय वदते यदुपावति चिच्चिकः। आघाटिभिरिव धावयन्नर-ण्यानिर्महीयते ॥२॥ उत गाव इवादंत्युत वेश्मेव दृश्यते। उतो अरण्यानिः सायं शकटीरिव सर्जति ॥३॥ गामंगैष आ ह्वयति दार्वंगैषो अपावधीत्। वसन्नरण्यान्यां सायमक्रुंददिति मन्यते ॥४॥ न वा अरण्यानिर्हन्त्यन्यश्चे-

परा॒ऽवर्तः श्ये॒नस्य॑ पु॒त्रः आ अ॑भरत् गृ॒तऽचक्रं॑ यः अ॒ह्नः व॒र्तनिः॑ ॥४॥ यं ते॒ श्ये॒नः चारु॑ अवृ॒कं प॒दा आ अ॑भरत् अरु॑णं मा॒नं अंध॑सः एना॑ वयः॑ वि ता॑रि॒ आयुः॑ जी॒वसे॑ एना॑ जागार॑ बंधुता॑॥५॥ एव॑ तत् इंद्रः इंदु॑ना दे॒वेषु॑ चित् धार॑यते॒ महि॑ त्यज॑ः ऋचा॑ वयः॑ वि ता॑रि॒ आयुः॑ सु॒ऽकृतो॑° ऋत्वा॑ अ॒यं अ॒स्मत् आ सु॑तः॑॥६॥२॥

॥१४५॥ इ॒मां ख॑नामि॒ ओष॑धिं वी॒रुधं॑ बल॑वत्ऽतमां यया॑ स॒ऽअ॒यत्नीं॑ बाधते॒ यया॑ सं॒ऽविंदते॑ पति॑॥१॥ उत्ता॑नऽपर्णे सु॒ऽभगे॑ दे॒व॑ऽजूते सहस्वति॑ स॒ऽपत्नीं॑ मे॒ परा॑ धम॒ पति॑ं मे॒ केव॑लं कुरु॥२॥ उत्ऽत॑रा॒ अहं॑ उ॒त्ऽत॒रे॒ उत्ऽत॑रा इत् उत्ऽत॑राभ्यः अ॒धं स॒ऽपत्नीं॑ या मम॑ अ॒धरा॑ सा अ॒धरा॑भ्यः॑॥३॥ नहि॑ अ॒स्याः॑ नाम॑ गृ॒भ्णामि॑ नो॑ अ॒स्मिन् र॒मते॒ जने॑ परा॑ एव॑ परा॒ऽवतं॑ स॒ऽपत्नीं॑ गमयामसि॑ ॥४॥ अ॒हं अ॒स्मि॒ सह॑माना अ॒धं त्वं अ॒सि॒ स॒स॒हिः उ॒भे॑ 'सह॑स्वती' भू॒त्वी स॒ऽपत्नीं॑ मे॒ सह॒ावहै॒॥५॥ उप॑ ते॒ अ॒धां सह॑मानां अ॒भि त्वा॒ अ॒धां सहीयसा॑ मां अनु॑ प्र ते॒ मनः॑ व॒त्सं गौः॑ऽइ॑व धावतु॒ प॒था वा॒ः॑ऽइ॑व धावतु॒॥६॥३॥

॥१४६॥ अर॑ण्यानि अर॑ण्यानि अ॒सौ या प्र॒ऽइ॑व नश्य॑सि कथा॑ ग्रामं॑ न पृ॒च्छ॒सि॒ न त्वा॒ भीः॑ऽइ॑व विंदती॒ई॑॥१॥ वृष॑ऽरवाय॑ वदते॒ यत् उप॒ऽअ॑वंति चिच्चिकः॑ आघा॒टिभिः॑ऽइव धावय॑न् अर॒ण्या॒निः॑ मही॑यते॒॥२॥ उत॑ गावः॑ऽइव अद॑ंति॒ उत॑ वेश्म॑ऽइव दृ॒श्य॒ते॒ उतो॑ अर॒ण्या॒निः॑ सा॒यं श॒कटी॑ः॑ऽइव सर्ज॑ति॒॥३॥ गां अं॑ग एषः॑ आ ह्व॒यति॒ दारु॑ अं॑ग एषः॑ अप॑ अव॒धीत् वस॑न् अर॒ण्या॒न्यां सा॒यं अक्रु॑क्षत् इति॑ मन्यते॒॥४॥ न वै अर॑ण्या॒निः॑ हंति॒ अन्यः॑ च॒

नाभिगच्छति । स्वादोः फलस्य जग्ध्वाय यथाकामं नि षद्यते ॥५॥ आंजनगंधिं सुरभिं बहून्नामकृपीवलां । प्राहं मृगाणां मातरमरण्यानिमशंसिषं ॥६॥४॥

॥ १४७ ॥ १–५ सुवेदाः शैरीषिः ॥ इंद्रः ॥ १–४ जगती । ५ त्रिष्टुप् ॥

॥१४७॥ यत्ते दधामि प्रथमाय मन्यवेऽहन्यद्बृत्रं नर्यं विवेरपः । उभे यत्ता भवतो रोदसी अनु रेजते शुष्मात्पृथिवी चिदद्रिवः ॥१॥ त्वं मायाभिरनवद्य मायिनं प्रवस्यता मनसा वृत्रमर्दयः । त्वामिन्नरो वृणते गविष्टिषु त्वां विश्वासु हव्यास्विष्टिषु ॥२॥ ऐषु चाकंधि पुरुहूत सूरिषु वृधासो ये मघवन्नानशुर्मघं । अर्चंति तोके तनये परिष्टिषु मेधसाता वाजिनमर्वये धने ॥३॥ स इन्नु रायः सुभृतस्य चाकनन्मदं यो अस्य रंह्यं चिकेतति । त्वावृधो मघवन्दाश्वंध्वरो मष्टू स वाजं भरते धना नृभिः ॥४॥ त्वं गर्भाय महिना गृणान उरू कृधि मघवञ्छग्धि रायः । त्वं नो मित्रो वरुणो न मायी पित्वो न दस्म दयसे विभक्ता ॥५॥५॥

॥ १४८ ॥ १–५ पुरुमीढ्यः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१४८॥ सुश्राणासं इंद्र स्तुमसि त्वा समवांसश्च तुविनृम्ण वाजं । आ नो भर सुवितं यस्य चाकन्मना तना सनुयाम त्वोताः ॥१॥ चाश्वस्वमिंद्र शूर जातो दासीर्विशः सूर्येण सख्याः । गुहा हितं गुह्यं गूळ्हमप्सु विभूमसिं प्रस्रवणे न सोमं ॥२॥ अर्यो वा गिरो अभ्यर्च विद्वानूपीणां विप्रः सुमतिं चकानः । ते स्याम ये रणयंत सोमैरनोत तुभ्यं रथोळ्हो भद्राः ॥३॥ इमा ब्रह्मेंद्र तुभ्यं नंसि दा नृभ्यो नृणां शूर शर्वः । तेभिर्भव सक्रतुर्येषु चाकन्नुत त्रायस्व गृणत उत स्तीन् ॥४॥

इत् न अभिऽगच्छंति स्वादोः फलस्य जग्ध्यायं यथाऽकामं नि पद्यते ॥५॥ आंजनऽगंधिं सुरभिं बहुऽअन्नां अकृषिऽवलां प्र अहं मृगाणां मातरं अरण्यानिं अशंसिषं ॥६॥४॥

॥१४७॥ अत् ते दधामि प्रथमाय मन्यवे अहन् यत् वृत्रं नर्यं विवेः अपः उभे यत् त्वा भवतः रोदसी अनु रेजते शुष्मात् पृथिवी चित् अद्रिऽवः ॥१॥ त्वं मायाभिः अनवद्य मायिनं अवस्यता मनसा वृत्रं अर्दयः त्वां इत् नरः वृणते गोऽईष्टिषु त्वां विश्वासुहव्यासु इष्टिषु ॥२॥ आ एषु चाकंधि पुरुऽहूत सूरिषु वृधासः ये मघऽवन् आनशुः मघं अर्चंति तोके तनये परिष्टिषु मेधऽसाता वाजिनं अह्रये धने ॥३॥ सः इत् नु रायः सुऽभृतस्य चाकनत् मदं यः अस्य रंह्यं चिकेतति त्वाऽवृधः मघऽवन् दाशुऽअध्वरः मक्षु सः वाजं भरते धना नृऽभिः ॥४॥ त्वं शर्धाय महिना गृणानः उरु कृधि मघऽवन् शग्धि रायः त्वं नः मित्रः वरुणः न मायी पित्वः न दस्म दयसे विऽभक्ता ॥५॥५॥

॥१४८॥ सुस्वानासः इंद्र स्तुमसि त्वा ससऽवांसः च तुविऽनृम्ण वाजं आ नः भर सुवितं यस्य चाकन् तमना तना सनुयाम त्वाऽऊताः ॥१॥ ऋघ्वः त्वं इंद्र शूर जातः दासीः विशः सूर्येण सह्याः गुहा हितं गुह्यं गूळ्हं अप्ऽसु विभृमसि प्रऽसवंणे न सोमं ॥२॥ अर्यः वा गिरः अभि अर्च विद्वान् ऋषीणां विप्रः सुऽमतिं चकानः ते स्याम ये रणयंत सोमैः एना उत तुभ्यं रघऽओळ्हः भक्षीः ॥३॥ इमा ब्रह्म इंद्र तुभ्यं शंसि दाः नृऽभ्यः नृणां शूर शर्वः नेमिः भव सऽक्रतुः येषु चाकन् उत चायस्व गृणतः उत स्तीन् ॥४॥

शृधी हवमिंद्र शूर पृथ्या उत स्तवसे वेन्यस्यार्कैः। आ यस्ते योनिं घृतवंतमस्वारूर्मिन्न निम्निर्द्रवयंत वक्वाः ॥५॥६॥

॥ १४९ ॥ १–५ अर्चन्हैरण्यस्तूपः ॥ सविता ॥ त्रिष्टुप् ॥

॥१४९॥ सविता यंत्रैः पृथिवीमरम्णाद्स्कंभने सविता द्यामदृंहत्। अश्वमिवाधुक्षद्धुनिमंतरिक्षमतूर्तं बर्हः सविता समुद्रं ॥१॥ यच्चा समुद्रः स्कंभितो व्यौनद्पां नपात्सविता तस्य वेद। अतो भूरत आ उत्थितं रजोऽतो द्यावापृथिवी अप्रथेतां ॥२॥ पश्येदमन्यदभवद्यजत्रमभर्त्यस्य भुवनस्य भूना। सुपर्णो अंग सवितुर्गरुत्मान्पूर्वो जातः स उ अस्यानु धर्मं ॥३॥ गाव इव ग्रामं यूयुधिरिवाश्वान्वाश्रेव वत्सं सुमना दुहाना। पतिरिव जायामभि नो न्येतु धर्ता दिवः सविता विश्ववारः॥४॥ हिरण्यस्तूपः सवितर्यथा त्वांगिरसो जुह्वे वाजे अस्मिन्। एवा त्वार्चन्नवसे वंदमानः सोमस्येवांशुं प्रति जागराहं ॥५॥७॥

॥ १५० ॥ १–५ मृळीको वासिष्ठः ॥ अग्निः ॥ १–३ पृहती । ४ उपरिष्टाज्ज्योतिर्जगती पा । ५ उपरिष्टाज्ज्योतिः ॥

॥१५०॥ समिद्धस्त्वंसमिध्यसे देवेभ्यो हव्यवाहन। आदित्यै रुद्रैर्वसुभिर्न आ गंहि मृळीकायं न आ गंहि ॥१॥ इमं यज्ञमिदं वचो जुजुषाण उपागंहि। मर्तासस्त्वा समिधान हवामहे मृळीकायं हवामहे ॥२॥ त्वामु जातवेदसं विश्ववारं गृणे धिया। अग्ने देवाँ आ वंह नः प्रियव्रतान्मृळीकायं प्रियव्रतान् ॥३॥ अग्निर्देवो देवानामभवत्पुरोहितोऽग्निं मनुष्याऽऋषयः समीधिरे। अग्निं महो धनसातावहं हुवे मृळीकं धनसातये ॥४॥ अग्निरत्रिं भरद्वाजं गविष्टिरं प्रावन्नः

श्रुधि हवं इंद्र पूर् पृथ्याः उत स्तवसे वेन्यस्य अर्कैः आ यः ते योनिं घृतऽवंतं असदाः ऊर्मिः न निम्नैः द्रवयंत वक्वाः॥५॥६॥

॥१४९॥ सविता यंत्रैः पृथिवीं अरम्णात् अस्कंभने सविता द्यां अहंहत् अश्वैऽइव अधुक्षत् धुनिं अंतरिक्षं अतूर्तं बर्हः सविता समुद्रं॥१॥ यत्रं समुद्रः स्कभितः वि औनत् अपां नपात् सविता तस्य वेद अतः भूः अतः आः उत्ऽयंतं रजः अतः द्यावापृथिवी अप्रथेतां॥२॥ पश्चा इदं अन्यत् अभवत् यजत्रं अमर्त्यस्य भुवनस्य भूना सुऽपर्णः अंग सवितुः गरुत्मान् पूर्वः जातः सः ऊं अस्य अनु धर्मं॥३॥ गावःऽइव ग्रामं युयुधिःऽइव अश्वान् वाश्याऽइव वत्सं सुऽमनाः दुहाना पतिःऽइव जायां अभि नः नि एतु धर्ता दिवः सविता विश्वऽवारः॥४॥ हिरण्यऽरूपः सवितः यथा त्वा आंगिरसः जुह्वे वाजे अस्मिन् एव त्वा अर्चन् अवसे वंदमानः सोमस्यऽइव अंशुं प्रति जागर् अहं॥५॥७॥

॥१५०॥ संऽइंद्धः चित् सं इध्यसे देवेभ्यः हव्यऽवाहन् आदित्यैः रुद्रैः वसुऽभिः नः आ गहि मृळीकाय नः आ गहि॥१॥ इमं यज्ञं इदं वचः जुजुषाणः उपऽआगंहि मतीसः त्वा संऽइधान हवामहे मृळीकाय हवामहे॥२॥ त्वां ऊं जातऽवेदसं विश्वऽवारं गृणे धिया अग्ने देवान् आ वह नः प्रियऽव्रतान् मृळीकाय प्रियऽव्रतान्॥३॥ अग्निः देवः देवानां अभवत् पुरःऽहितः अग्निं मनुष्याः ऋषयः सं ईधिरे अग्निं महः धनेऽसातौ अहं हुवे मृळीकं धनेऽसातये॥४॥ अग्निः अर्चिं भरतऽवाजं गविष्टिरं प्र आवत् नः

कण्वं चसदस्युं आऽहुवे अग्निं वसिष्ठः हुवते पुरःऽहितः मृळीकाय पुरःऽहितः ॥५॥८॥

॥ १५१ ॥ श्रद्धया अग्निः सं इध्यते श्रद्धया हूयते हविः श्रद्धां भगस्य मूर्धनि वचसा आ वेदयामसि ॥१॥ प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः प्रियं भोजेषु यज्वऽसु इदं मे उदितं कृधि ॥२॥ यथा देवाः असुरेषु श्रद्धां उग्रेषु चक्रिरे एवं भोजेषु यज्वऽसु अस्माकं उदितं कृधि ॥३॥ श्रद्धां देवाः यजमानाः वायुऽगोपाः उप आसते श्रद्धां हृदय्यया आऽकूत्या श्रद्धया विंदते वसु ॥४॥ श्रद्धां प्रातः हवामहे श्रद्धां मध्यंदिनं परि श्रद्धां सूर्यस्य निऽमुचि श्रद्धे श्रत् धापय इह नः ॥५॥९॥११॥

॥ १५२ ॥ शासः इत्था महान् असि अमिचऽखादः अद्भुतः न यस्य हन्यते सखा न जीयते कदा चन ॥१॥ स्वस्तिऽदाः विशः पतिः वृत्रऽहा विऽमृधः वशी वृषा इंद्रः पुरः एतु नः सोमऽपाः अभयंऽकरः ॥२॥ वि रक्षः वि मृधः जहि वि वृत्रस्य हनूः रुज वि मन्युं इंद्र वृत्रऽहन् अमित्रस्य अभिऽदासतः ॥३॥ वि नः इंद्र मृधः जहि नीचा यच्छ पृतन्यतः यः अस्मान् अभिऽदासति अधरं गमय तमः ॥४॥ अप इंद्र द्विषतः मनः अप जिज्यासतः वधं वि मन्योः शर्म यच्छ वरीयः यवय वधं ॥५॥१०॥

॥ १५३ ॥ ईखयंतीः अपस्युवः इंद्रं जातं उप आसते भेजानासः सुऽवीर्यं ॥१॥ त्वं इंद्र बलात् अधि सहसः जातः ओजसः त्वं वृषन् वृषा इत् असि ॥२॥ त्वं इंद्र असि वृत्रऽहा वि अंतरिक्षं अतिरः उरु

कण्वं चसदस्युं आऽहुवे अग्निं वसिष्ठः हुवते पुरःऽहितः मृळीकाय पुरःऽहितः ॥५॥८॥

॥ १५१ ॥ श्रद्धया अग्निः सं इध्यते श्रद्धया हूयते हविः श्रद्धां भगस्य मूर्धनि वचसा आ वेदयामसि ॥१॥ प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः प्रियं भोजेषु यज्वऽसु इदं मे उदितं कृधि ॥२॥ यथा देवाः असुरेषु श्रद्धां उग्रेषु चक्रिरे एवं भोजेषु यज्वऽसु अस्माकं उदितं कृधि ॥३॥ श्रद्धां देवाः यजमानाः वायुऽगोपाः उप आसते श्रद्धां हृदय्यया आऽकूत्या श्रद्धया विंदते वसु ॥४॥ श्रद्धां प्रातः हुवामहे श्रद्धां मध्यंदिनं परि श्रद्धां सूर्यस्य निऽमुचि श्रद्धे श्रत् धापय इह नः ॥५॥ ९॥ ११॥

॥ १५२ ॥ शासः इत्था महान् असि अमिचऽखादः अद्भुतः न यस्य हन्यते सखा न जीयते कदा चन ॥१॥ स्वस्तिऽदाः विशः पतिः वृचऽहा विऽमृधः वशी वृषा इंद्रः पुरः एतु नः सोमऽपाः अभयंऽकरः ॥२॥ वि रक्षः वि मृधः जहि वि वृचस्य हनूं रुज वि मन्युं इंद्र वृचऽहन् अमित्रस्य अभिऽदासतः ॥३॥ वि नः इंद्र मृधः जहि नीचा यच्छ पृतन्यतः यः अस्मान् अभिऽदासति अधरंगमय तमः ॥४॥ अप इंद्र द्विषतः मनः अप जिज्यासतः वधं वि मन्योः शर्म यच्छ वरीयः यवय वधं ॥५॥ १०॥

॥ १५३ ॥ ईंखयंतीः अपस्युवः इंद्रं जातं उप आसते भेजानासः सुऽवीर्यं ॥१॥ त्वं इंद्र बलात् अधि सहसः जातः ओजसः त्वं वृषन् वृषा इत् असि ॥२॥ त्वं इंद्र असि वृचऽहा वि अंतरिक्षं अतिरः उत्

द्यामस्तभ्ना ओजसा ॥३॥ त्वमिंद्र सजोषसमर्कं बिभर्षि बाह्वोः। वज्रं शिशान ओजसा ॥४॥ त्वमिंद्राभिभूरसि विश्वा जातान्योजसा। स विश्वा भुव आभवः ॥५॥११॥

॥१५३॥ १-५ यमी ॥ भाववृत्तं ॥ अनुष्टुप् ॥

॥१५४॥ सोम एकेभ्यः पवते घृतमेक उपासते। येभ्यो मधु प्रधावति तांश्चिदेवापि गच्छतात् ॥१॥ तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः। तपो ये चक्रिरे महस्तांश्चिदेवापि गच्छतात् ॥२॥ ये युध्यंते प्रधनेषु शूरासो ये तनूत्यजः। ये वा सहस्रदक्षिणास्तांश्चिदेवापि गच्छतात् ॥३॥ ये चित्पूर्व ऋतसाप ऋतावान ऋतावृधः। पितॄन्तपस्वतो यम तांश्चिदेवापि गच्छतात् ॥४॥ सहस्रणीथाः कवयो ये गोपायंति सूर्यं। ऋषीन्तपस्वतो यम तपोजाँ अपि गच्छतात् ॥५॥१२॥

॥१५५॥ १-५ शिरिंबिठौ भारद्वाजः ॥ अलक्ष्मीघ्नं । २.३ ब्रह्मणस्पतिः । ४ विश्वे देवाः ॥ अनुष्टुप् ॥

॥१५५॥ अरायि काणे विकटे गिरिं गच्छ सदान्वे। शिरिंबिठस्य सत्वभिस्तेभिष्ट्वा चातयामसि ॥१॥ चत्तो इतश्चत्तामुतः सर्वा भूणान्यारुषी। अराय्यं ब्रह्मणस्पते तीक्ष्णशृंगोदृषन्हि ॥२॥ अदो यद्दारु प्लवते सिंधोः पारे अपूरुषं। तदा रभस्व दुर्हणो तेन गच्छ परस्तरं ॥३॥ यद्ध प्राचीरजगंतोरो मंडूरधाणिकीः। हता इंद्रस्य शत्रवः सर्वे बुद्बुदयाशवः ॥४॥ परीमे गामनेषत पर्यग्निमहृषत। देवेष्वक्रत श्रवः क इमाँ आ दधर्षति ॥५॥१३॥

॥१५६॥ १-६ जेतुरात्रेयः ॥ अग्निः ॥ गायत्री ॥

॥१५६॥ अग्निं हिन्वंतु नो धियः सप्तिमाशुमिवाजिषु। तेन

द्यां अस्तभ्नाः ओजसा॥३॥ त्वं इंद्र सऽजोषसं अर्कं विभर्षि बाह्वोः वज्रं शिशानः ओजसा॥४॥ त्वं इंद्र अभिऽभूः असि विश्वा जातानि ओजसा सः विश्वाः भुवः आ अभवः॥५॥११॥

॥१५४॥ सोमः एकेभ्यः पवते घृतं एके उप आसते येभ्यः मधु प्रऽधावति तान् चित् एव अपि गच्छतात्॥१॥ तपसा ये अनाधृष्याः तपसा ये स्वः ययुः तपः ये चक्रिरे महः तान् चित् एव अपि गच्छतात्॥२॥ ये युध्यंते प्रऽधनेषु शूरासः ये तनूऽत्यजः ये वा सहस्रंऽदक्षिणाः तान् चित् एव अपि गच्छतात्॥३॥ ये चित् पूर्वे ऋतऽसापः ऋतऽवानः ऋतऽवृधः पितॄन् तपस्वतः यम तान् चित् एव अपि गच्छतात्॥४॥ सहस्रंऽनीथाः कवयः ये गोपायंति सूर्यं ऋषीन् तपस्वतः यम तपःऽजान् अपि गच्छतात्॥५॥१२॥

॥१५५॥ अरायि काणे विऽकटे गिरिं गच्छ सदान्वे शिरिंबिठस्य सत्वऽभिः तेभिः त्वा चातयामसि॥१॥ चत्तो इतः चत्ता अमुतः सर्वा भूम्यानि आरुषी अरायं ब्रह्मणः पते तीक्ष्णऽशृंग उत्ऽऋषन् इहि॥२॥ अदः यत् दारु प्लवते सिंधोः पारे अपुरुषं तत् आ रभस्व दुःऽहनो तेन गच्छ परःऽतरं॥३॥ यत् ह प्राचीः अजगंत उरः मंडूरऽधाणिकीः हताः इंद्रस्य शत्रवः सर्वे बुबुदऽयाशवः॥४॥ परि इमे गां अनेषत परि अग्निं अहृषत देवेषु अक्रत श्रवः कः इमान् आ दधर्षति॥५॥१३॥

॥१५६॥ अग्निं हिन्वंतु नः धियः सप्तिं आपुंऽइव आजिषु तेन

जेषम धनंधनं ॥१॥ यया गा आकरामहे सेनयाग्ने तवोत्या। तां नो हिन्व मघत्तये ॥२॥ आग्ने स्थूरं रयिं भर पृथुं गोमंतमश्विनं। अंगिरस्वद्वर्तया पणिं ॥३॥ अग्ने नक्षत्रमजरमा सूर्यं रोहयो दिवि। दधज्ज्योतिर्जनेभ्यः ॥४॥ अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत्। बोधा स्तोत्रे वयो दधत् ॥५॥१४॥

॥ १५७ ॥ १–५ भुवन आपयः साधनो वा भौवनः ॥ विश्वे देवाः ॥ द्विपदा विराट् ॥

॥१५७॥ इमा नु कं भुवना सीषधामेंद्रश्च विश्वे च देवाः ॥१॥ यज्ञं च नस्तन्वं च प्रजां चादित्यैरिंद्रः सह चौक्रपाति ॥२॥ आदित्यैरिंद्रः सगणो मरुद्भिरस्माकं भूत्वविता तनूनां ॥३॥ हुवाय देवा असुरान्यदायन्देवा देवत्वमभिरक्षमाणाः ॥४॥ प्रत्यंचमर्कं मनयञ्छचीभिरादित्स्वधामिधिरां पर्यपश्यन् ॥५॥१५॥

॥ १५८ ॥ १–५ चक्षुः सौर्यः ॥ सूर्यः ॥ गायत्री ॥

॥१५८॥ सूर्यो नो दिवस्पातु वातो अंतरिक्षात्। अग्निर्नः पार्थिवेभ्यः ॥१॥ जोषा सवितर्यस्य ते हरः शतं सवाँ अर्हति। पाहि नो दिद्युतः पतंत्याः ॥२॥ चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः। चक्षुर्धाता दधातु नः ॥३॥ चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः। सं चेदं वि च पश्येम ॥४॥ सुसंदृशं त्वा वयं प्रति पश्येम सूर्य। वि पश्येम नृचक्षसः ॥५॥१६॥

॥ १५९ ॥ १–६ शची पौलोमी ॥ शची पौलोमी ॥ अनुष्टुप् ॥

॥१५९॥ उदसौ सूर्यो अगादुदयं मामको भगः। अहं तद्विद्वला पतिमभ्यसाक्षि विषासहिः ॥१॥ अहं केतुरहं मूर्धाहमुग्रा विवाचनी। ममेदनु क्रतुं पतिः सेहानाया उपाचरेत् ॥२॥ मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट्

जेष्म धनंऽधनं॥१॥ यया गाः आऽकरामहे सेनया अग्ने तवऽऊत्या तां नः हिन्व मघत्तये॥२॥ आ अग्ने स्थूरं रयिं भर पृथुं गोऽमंतं अश्विनंऽग्धिखं वर्तय पणिं॥३॥ अग्ने नक्षत्रं अजरं आ सूर्ये रोहयः दिवि दर्धत् ज्योतिः जनेभ्यः॥४॥ अग्ने केतुः विशां असि प्रेष्ठः श्रेष्ठः उपस्थेऽसत् बोध स्तोत्रे वयः दधत्॥५॥१४॥

॥१५७॥ उमा नु कं भुवना सीसधाम इंद्रः च विश्वे च देवाः॥१॥ यज्ञं च नः तन्वं च प्रऽजां च आदित्यैः इंद्रः सह चोक्रुपाति॥२॥ आदित्यैः इंद्रः सऽगणः मरुत्ऽभिः अस्माकं भूतु अविता तनूनां॥३॥ हत्वाय देवाः असुरान् यत् आयन् देवाः देवऽत्वं अभिऽरक्षमाणाः॥४॥ प्रत्यंचं अर्कं अनयन् शचीभिः आत् इत् स्वधां इपिरां परि अपश्यन्॥५॥१५॥

॥१५८॥ सूर्यः नः दिवः पातु वातः अंतरिक्षात् अग्निः नः पार्थिवेभ्यः॥१॥ जोषं सवितः यस्ते हरः शतं सवान् अर्हति पाहि नः दिद्युतः पतंत्याः॥२॥ चक्षुः नः देवः सविता चक्षुः नः उत पर्वतः चक्षुः धाता दधातु नः॥३॥ चक्षुः नः धेहि चक्षुषे चक्षुः विऽख्यै तनूभ्यः सं चऽइदं वि च पश्येम॥४॥ सुऽसंदृशं त्वा वयं प्रतिं पश्येम सूर्य वि पश्येम नृऽचक्षसः॥५॥१६॥

॥१५९॥ उत् असौ सूर्यः अगात् उत् अयं मामकः भगः अहं तत् विद्वला पतिं अभि असाक्षि विऽससहिः॥१॥ अहं केतुः अहं मूर्धा अहं उग्रा विऽवाचनी मम इत् अनु क्रतुं पतिः सेहानायाः उपऽआचरेत्॥२॥ मम पुत्राः शत्रुऽहनः अथो मे दुहिता विऽ

राट्। उताहमस्मि संजया पत्यौ मे श्लोक उत्तमः॥३॥ येनेंद्रो हविषा कृत्व्यभवद्द्युम्न्युत्तमः। इदं तदक्रि देवा असपत्ना किलाभुवं॥४॥ असपत्ना सपत्नघ्नी जयंत्यभिभूवरी। आवृक्षमन्यासां वर्चो राधो अस्थेयसामिव॥५॥ समजैषमिमा अहं सपत्नीरभिभूवरी। यथाहमस्य वीरस्य विराजानि जनस्य च॥६॥१७॥

॥ १६० ॥ १–५ पूरणो वैश्वामित्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१६०॥ तीव्रस्याभिवयसो अस्य पाहि सर्वरथा वि हरी इह मुंच। इंद्र मा त्वा यजमानासो अन्ये नि रीरमन्तुभ्यमिमे सुतासः॥१॥ तुभ्यं सुतास्तुभ्यमु सोत्वासस्त्वां गिरः स्वाच्या आ ह्वयंति। इंद्रेदमद्य सवनं जुषाणो विश्वस्य विद्वाँ इह पाहि सोमं॥२॥ य उंशता मनसा सोममस्मै सर्वहृदा देवकामः सुनोति। न गा इंद्रस्तस्य परा ददाति प्रशस्तमिच्चारुमस्मै कृणोति॥३॥ अनुस्पष्टो भवत्येषो अस्य यो अस्मै रेवाच सुनोति सोमं। निररत्नौ मघवा तं दधाति मत्सद्धिपो हंत्यनानुदिष्टः॥४॥ अश्वायंतो गव्यंतो वाजयंतो हवामहे त्वोपगंतवा उ। आभूषंतस्ते सुमतौ नवायां वयमिंद्र त्वा शुनं हुवेम॥५॥१८॥

॥ १६१ ॥ १–५ यक्ष्मनाशनः प्रागापत्यः ॥ राजयक्ष्मं ॥ १–४ त्रिष्टुप् । ५ अनुष्टुप् ॥

॥१६१॥ मुंचामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात्। याहिर्जग्राह यदि वैतदेनं तस्या इंद्राग्नी प्र मुमुक्तमेनं॥१॥ यदि क्षितायुर्यदि वा परेतो यदि मृत्योरंतिकं नीत एव। तमा हरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय॥२॥ सहस्राक्षेण शतशारदेन श-

ऽराट् उत अहं अस्मि संऽजया पत्यौ मे श्लोकः उत्ऽतमः ॥३॥ येन इंद्रः हविषा कृत्वी अभवत् द्युम्नी उत्ऽतमः इदं तत् अक्रि देवाः असपत्ना किलं अभुवं ॥४॥ असपत्ना सपत्नऽघ्नी जयंती अभिऽभूवरी आ अवृक्षं अन्यासां वर्चः राधः अस्थेयसांऽइव ॥५॥ सं अजैषं इमाः अहं सऽपत्नीः अभिऽभूवरी यथा अहं अस्य वीरस्य विऽराजानि जनस्य च ॥६॥ १७ ॥

॥ १६० ॥ तीव्रस्य अभिऽवयसः अस्य पाहि सर्वऽरथा वि हरीं इह मुंच इंद्र मा त्वा यजमानासः अन्ये नि रीरमन् तुभ्यं इमे सुतासः ॥१॥ तुभ्यं सुताः तुभ्यं उं सोत्वासः त्वां गिरः स्वाभ्यः आ ह्वयंति इंद्र इदं अद्य सवनं जुषाणः विश्वस्य विद्वान् इह पाहि सोमं ॥२॥ यः उशता मनसा सोमं अस्मै सर्वऽहृदा देवऽकामः सुनोति नगाः इंद्रः तस्य परा दाति अऽशस्तं इत् चारुं अस्मै कृणोति ॥३॥ अनुंऽस्पष्टः भवति एषः अस्य यः अस्मै रेवान् न सुनोति सोमं निः अरन्धीं मघऽवा तं दधाति ब्रह्मऽद्विषः हंति अननुऽदिष्टः ॥४॥ अश्वऽयंतः गव्यंतः वाजयंतः हवामहे त्वा उपऽगंतवे उं आऽभूषंतः ते सुऽमतौ नवायां वयं इंद्र त्वा पुनं हुवेम ॥५॥ १८ ॥

॥ १६१ ॥ मुंचामि त्वा हविषा जीवनाय कं अज्ञातऽयक्ष्मात् उत राजऽयक्ष्मात् यार्हिः जयाहं यदि वा एतत् एनं तस्याः इंद्राग्नी प्र मुमुक्तं एनं ॥१॥ यदि क्षितऽआयुः यदि वा परेऽइतः यदि मृत्योः अंतिकं निऽइतः एव तं आ हरामि निःऽऋतेः उपऽस्थात् अस्पार्षं एनं शतऽशारदाय ॥२॥ सहस्रऽअक्षेण शतऽशारदेन शु-

तायुषा हविषाहार्षमेनं। शतं यथेमं शरदो नयातीर्द्रो विश्वस्य दुरितस्य पारं॥३॥ शतं जीव शरदो वर्धमानः शतं हेमंताञ्छतमु वसंतान्। शतमिंद्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः॥४॥ आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नवः। सर्वांग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदं॥५॥१९॥

॥ १६२॥ १–६ रक्षोहा ब्राह्मः ॥ गर्भसंस्रावे प्रायश्चित्तं ॥ अनुष्टुप् ॥

॥१६२॥ ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः। अमीवा यस्ते गर्भं दुर्णामा योनिमाशये॥१॥ यस्ते गर्भममीवा दुर्णामा योनिमाशये। अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत्॥२॥ यस्ते हंतिं पतयंतं निपत्सुं यः संरीसृपं। जातं यस्ते जिघांसति तमितो नाशयामसि॥३॥ यस्ते ऊरू विहरत्यंतरा दंपती शये। योनिं यो अंतरारेळिह तमितो नाशयामसि॥४॥ यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते। प्रजां यस्ते जिघांसति तमितो नाशयामसि॥५॥ यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते। प्रजां यस्ते जिघांसति तमितो नाशयामसि॥६॥२०॥

॥ १६३॥ १–६ विमुचो वाध्र्यश्वः ॥ यक्ष्मघ्नं ॥ अनुष्टुप् ॥

॥१६३॥ अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि। यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते॥१॥ ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्। यक्ष्मं दोषण्यं मंसाभ्यां बाहुभ्यां वि वृहामि ते॥२॥ आंत्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि। यक्ष्मं मतस्नाभ्यां यकृः प्लाशिभ्यो वि वृहामि ते॥३॥ ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्यां। यक्ष्मं श्रो-

तऽआयुषा हविषा आ अहार्षं एनं शतं यथा इमं शरदः नयाति इंद्रः विश्वस्य दुःऽइतस्य पारं॥३॥ शतं जीव शरदः वर्धमानः शतं हेमंतान् शतं ऊं वसंतान् शतं इंद्राग्नी सविता बृहस्पतिः शतऽआयुषा हविषा इमं पुनः दुः॥४॥ आ अहार्षं त्वा अविदं त्वा पुनः आ अगाः पुनःऽनव सर्वंऽअंग सर्वं ते चक्षुः सर्वं आयुः च ते अविदं॥५॥१९॥

॥१६२॥ ब्रह्मणा अग्निः संऽविदानः रक्षःऽहा बाधतां इतः अमीवा यः ते गर्भं दुःऽनामा योनिं आऽशये॥१॥ यः ते गर्भं अमीवा दुःऽनामा योनिं आऽशये अग्निः तं ब्रह्मणा सह निःक्रव्यऽअदं अनीनशत्॥२॥ यः ते हंति पतयंतं निऽसत्वं यः सरीसृपं जातं यः ते जिघांसति तं इतः नाशयामसि॥३॥ यः ते ऊरू विऽहरति अंतरा दंऽपती° शये योनिं यः अंतः आऽरेळिहे तं इतः नाशयामसि॥४॥ यः त्वा भ्राता पतिः भूत्वा जारः भूत्वा निऽपद्यते प्रऽजां यः ते जिघांसति तं इतः नाशयामसि॥५॥ यः त्वा स्वप्नेन तमसा मोहयित्वा निऽपद्यते प्रजां यः ते जिघांसति तं इतः नाशयामसि॥६॥२०॥

॥१६३॥ अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकात् अधि यक्ष्मं शीर्षण्यं मस्तिष्कात् जिह्वायाः वि वृहामि ते॥१॥ ग्रीवाभ्यः ते उष्णिहाभ्यः कीकसाभ्यः अनूक्यात् यक्ष्मं दोषण्यं अंसाभ्यां बाहुऽभ्यां वि वृहामि ते॥२॥ आंत्रेभ्यः ते गुदाभ्यः वनिष्ठोः हृदयात् अधि यक्ष्मं मतस्नाभ्यां यकृः प्लाशिऽभ्यः वि वृहामि ते॥३॥ ऊरुऽभ्यां ते अष्ठीवत्ऽभ्यां पार्ष्णिऽभ्यां प्रऽपदाभ्यां यक्ष्मं श्रो-

णिभ्यां भासदाभ्यंसतो वि वृहामि ते॥४॥ मेहनाद्वनंकरणाल्लो-मभ्यस्ते नखेभ्यः। यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते॥५॥ अंगादंगाल्लोम्नोलोम्नो जातं पर्वणिपर्वणि। यक्ष्मं सर्वस्मादा-त्मनस्तमिदं वि वृहामि ते॥६॥२१॥

॥ १६४ ॥ १–५ प्रचेताः ॥ दुःस्वप्नघ्नं ॥ १ २ ४ अनुष्टुप्। ३ त्रिष्टुप्। ५ पंक्तिः ॥

॥१६४॥ अपेहि मनसस्पतेऽप क्राम परश्चर। परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः॥१॥ भद्रं वै वरं वृणते भद्रं युंजंति दक्षिणं। भद्रं वेवस्वते चक्षुर्बहुधा जीवतो मनः॥२॥ यदाशसा निःशसाभिशसोपारिम जाग्रतो यत्स्वपंतः। अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद्दधातु॥३॥ यदिंद्र ब्रह्मणस्पतेऽभिद्रोहं चरामसि। प्रचेता न आंगिरसो विपृतां पात्वंहसः॥४॥ अजै-ष्माद्यासनाम चाभूमानागसो वयं। जाग्रत्स्वप्नः संकल्पः पापो यं द्विष्मस्तं स चृच्यतु यो नो द्वेष्टि तमृच्यतु॥५॥२२॥

॥ १६५ ॥ १–५ कपोतो नैर्ऋतः ॥ कपोतोपहतो प्रायश्चित्तं वैश्वदेवं ॥ त्रिष्टुप् ॥

॥१६५॥ देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम। तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे॥१॥ शिवः कपोत इषितो नो अस्त्वनागा देवाः शकुनो गृहेषु। अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु॥२॥ हेतिः पक्षिणी न दभात्यस्मा-न्नाष्ट्रां पदं कृणुते अग्निधाने। शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिंसीदिह देवाः कपोतः॥३॥ यदुलूको वदति मोघ-मेतद्यत्कपोतः पदमग्नौ कृणोति। यस्य दूतः प्रहित एष एत-त्तस्मै यमाय नमो अस्तु मृत्यवे॥४॥ ऋचा कपोतं नुदत प्र-

णिऽभ्यां भासदात् भंससः वि वृहामि ते ॥४॥ मेहनात् वृनऽकरणात् लोमऽभ्यः ते नखेभ्यः यक्ष्मं सर्वस्मात् आत्मनः तं इदं वि वृहामि ते ॥५॥ अंगात्ऽअंगात् लोम्नःऽलोम्नः जातं पर्वणिऽपर्वणि यक्ष्मं सर्वस्मात् आत्मनः तं इदं वि वृहामि ते ॥६॥२१॥

॥ १६४ ॥ अप इहि मनसः पते अप क्राम परः चर परः निःऽऋत्यै आ चक्ष्व बहुधा जीवतः मनः ॥१॥ भद्रं वै वरं वृणते भद्रं युंजंति दक्षिणं भद्रं वै वस्ते चक्षुः बहुऽचा जीवतः मनः ॥२॥ यत् आऽशसा निःऽशसा अभिऽशसा उपऽआरिम जार्यतः यत् स्वपंतः अभिः विष्थानि अप दुःऽकृतानि अजुष्टानि आरे अस्मत् दधातु ॥३॥ यत् इंद्र ब्रह्मणः पते अभिऽद्रोहं चरामसि प्रऽचेताः नः आंगिरसः क्षिपतां पातु अंहसः ॥४॥ अजैष्म अद्य असनाम च अभूम अनागसः वयं जायत्ऽस्वप्नः संऽकल्पः पापः यं द्विष्मः तं सः ऋच्छतु यः नः द्वेष्टि तं ऋच्छतु ॥५॥२२॥

॥ १६५ ॥ देवाः कपोतः इषितः यत् इच्छन् दूतः निःऽऋत्याः इदं आऽजगाम तस्मै अर्चाम कृणवाम निःऽकृतिं शं नः अस्तु द्विऽपदे शं चतुःऽपदे ॥१॥ शिवः कपोतः इषितः नः अस्तु अनागाः देवाः शकुनः गृहेषु अग्निः हि विप्रः जुषतां हविः नः परि हेतिः पक्षिणी नः वृणक्तु ॥२॥ हेतिः पक्षिणी न दभाति अस्मान् आक्ष्यां पदं कृणुते अग्निऽधाने शं नः गोभ्यः च पुरुषेभ्यः च अस्तु मा नः हिंसीत् इह देवाः कपोतः ॥३॥ यत् उलूकः वदति मोघं एतत् यत् कपोतः पदं अग्नौ कृणोति अस्य दूतः प्रऽहितः एषः एतत् तस्मै यमाय नमः अस्तु मृत्यवे ॥४॥ ऋचा कपोतं नुदत प्र-

णोदमिषं मदेंतः परि गां नयध्वं। संयोपयंतो दुरितानि विश्वा हित्वा न ऊर्जं प्र पंतात्पतिष्ठः ॥५॥२३॥

॥ १६६ ॥ १-५ ऋषभो वैराजः शाक्वरो वा ॥ सपत्नघ्नं ॥ १-४ अनुष्टुप् । ५ महापंक्तिः ॥

॥१६६॥ ऋषभं मा समानानां सपत्नानां विषासहिं। हंतारं शत्रूणां कृधि विराजं गोपतिं गवां ॥१॥ अहमस्मि सपत्नहेंद्र इवारिष्टो अक्षतः। अधः सपत्ना मे पदोरिमे सर्वे अभिष्ठिताः ॥२॥ अत्रैव वोऽपि नह्याम्युभे आर्ष्णी इव ज्यया। वाचस्पते नि षेधेमान्यथा मदधरं वदान् ॥३॥ अभिभूरहमागमं विश्वकर्मेण धाम्ना। आ वश्चित्तमा वो व्रतमा वोऽहं समितिं ददे ॥४॥ योग-क्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्धानमक्रमीं। अधस्पदान्म उद्वदत मंडूकी इवोदकान्मंडूकी उदकादिव ॥५॥२४॥

॥ १६७ ॥ १-४ विश्वामित्रजमदग्नी ॥ १, २, ४ इंद्रः । ३ लिंगोक्तदेवताः ॥ जगती ॥

॥१६७॥ तुभ्येदमिंद्र परि षिच्यते मधु त्वं सुतस्य कलशस्य राजसि। त्वं रयिं पुरुवीरामु नस्कृधि त्वं तपः परितप्यांजयः स्वः ॥१॥ स्वर्जितं महि मंदानमंधसो हवामहे परि शक्रं सुतां उप। इमं नो यज्ञमिह बोधि गंहि स्पृधो जयंतं मघवानमीमहे ॥२॥ सोमस्य राज्ञो वरुणस्य धर्मणि बृहस्पतेरनुमत्या उ शर्मणि। नवाहमद्य मघवन्नुपस्तुतौ धातर्विधातः कलशाँ अभक्षयं ॥३॥ प्रसूतो भक्षमकरं चरावपि स्तोमं चेमं प्रथमः सूरिरुन्मृजे। सुते सुतेन यद्यागमं वां प्रति विश्वामित्रजमदग्नी दमे ॥४॥२५॥

॥ १६८ ॥ १-३ अनिलो वातायनः ॥ वायुः ॥ त्रिष्टुप् ॥

॥१६८॥ वातस्य नु महिमानं रथस्य रुजन्नेति स्तनयन्न-

ऽनोदे इषे मदेतः परि गां नयध्वं संऽयोपयेतः दुःऽइतानि विश्वा हित्वा नः ऊर्जे प्र पतात् पतिष्ठः ॥५॥२३॥

॥१६६॥ ऋषभं मा समानानां सऽपत्नानां विऽसासहिं हंतारं शत्रूणां कृधि विऽराजं गोऽपतिं गवां ॥१॥ अहं अस्मि सपत्न-ऽहा इंद्रःऽइव अरिष्टः अक्षतः अधःसऽपत्नाः मे पदोः इमे सर्वे अभिऽस्थिताः ॥२॥ अत्र एव वः अपि नह्यामि उभे आर्नी-ऽइव० ज्यया वार्चः पते नि सेध इमान् यथा मत् अधरं वदान् ॥३॥ अभिऽभूः अहं आ अगमं विश्वऽकर्मेण धाम्ना आ वः चित्तं आ वः व्रतं आ वः अहं संऽइतिं ददे ॥४॥ योगऽक्षेमं वः आऽदायं अहं भूयासं उत्ऽतमः आ वः मूर्धानं अक्रमीं अधःऽपदान् मे उत् वदत मंडूकाःऽइव उदकात् मंडूकाः उदकात्ऽइव ॥५॥२४॥

॥१६७॥ तुभ्यं इदं इंद्र परि सिच्यते मधु त्वं सुतस्य कलशस्य राजसि त्वं रयिं पुरुऽवीरां ऊं नः कृधि त्वं तपः परिऽतप्य अजयः स्वः० ॥१॥ स्वःऽजितं महि मंदानं अंधसः हवामहे परि शक्रं सुतान् उप इमं नः यज्ञं इह बोधि आ गहि स्मृधः जयंतं मघऽवानं ईमहे ॥२॥ सोमस्य राज्ञः वरुणस्य धर्मणि बृहस्पतेः अनुऽमत्याः ऊं शर्मणि तव अहं अद्य मघऽवन् उपऽस्तुतौ धातः विऽधातः० कलशान् अभक्षयं ॥३॥ प्रऽसूतः भक्षं अकरं चरौ अपि स्तोमं च इमं प्रथमः सूरिः उत् मृजे सुते सातेन यदि आ अगमं वां प्रति विश्वाभिचजमद्भी दमे ॥४॥२५॥

॥१६८॥ वातस्य नु महिमानं रथस्य रुजन् एति स्तनयन्

स्य घोषः। दिविस्पृग्यात्यरुणानि कृण्वन्नुतो एति पृथिव्या रेणुमस्यन् ॥१॥ सं प्रेरते अनु वातस्य विष्ठा एनं गच्छन्ति समनं न योषाः। ताभिः सयुक्सरथं देव ईयतेऽस्य विश्वस्य भुवनस्य राजा ॥२॥ अन्तरिक्षे पथिभिरीयमानो न नि विशते कतमच्चनाहः। अपां सखा प्रथमजा ऋतावा क्व स्विज्जातः कुत आ बभूव ॥३॥ आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः। घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम ॥४॥२६॥

॥ १७१ ॥ १-४ अगस्त्य ऋषिः ॥ मारुतः ॥ त्रिष्टुप् ॥

॥ १७१ ॥ मयोभूर्वातो अभि वातु भेषजं ऊर्जस्वतीरोषधीराकिरता। पीवस्वतीर्जीवधन्याः पिबन्त्वनमीवा ऋतसाय पत्नीर्द्रुद्र मृळ ॥१॥ याः सरूपा विरूपा एकरूपा यासामग्निरिष्टया नामानि वेद। या अङ्गिरसमप्नवस्तप उग्रम्नाभ्यः पर्जन्य महि शर्म यच्छ ॥२॥ या देवेषु तन्वमैरयन्त यासां सोमो विश्वा रूपाणि वेद। ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिह गोष्ठे रिरीहि ॥३॥ प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः। शिवाः सतीरुप नो गोष्ठमाकस्तासां वयं प्रजया सं सदेम ॥४॥२७॥

॥ १७० ॥ १-३ विश्वे देवे ॥ मरुतः ॥ १-३ त्रिष्टुप् । ४ जगती ॥ चतुर्ऋचं सूक्तम् ॥

॥ १७० ॥ बिभाद्भृष्टिमिवतु नो अस्मे मध्यावृधं यज्ञपतावविन्दन्। वातंकृतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ॥१॥ बिभाद्भृष्टिमनुमृतं वाजमातमं धर्मन्दिवो धरुणे सत्यमर्पितं। अमिष्टा वृष्टा दम्यस्तमं ज्योतिरदेद्यौर्हरुहा संपन्नहा ॥२॥ इदं श्रेष्ठं ज्योतिषां

अस्य घोषः दिविऽस्पृक् याति अरुणानि कृण्वन् उतो' एति पृथिव्या रेणुं अस्यन्॥१॥ सं प्रऽइते अनु वातस्य विऽस्थाः आ एनं गच्छंति समनं न योषाः ताभिः सऽयुक् सऽरथं देवः ईयते अस्य विश्वस्य भुवनस्य राजा॥२॥ अंतरिक्षे पथिऽभिः ईयमानः न नि विशते कतमत् चन अहः' आपां सखा प्रथमऽजाः ऋतऽवा क्व स्वित् जातः कुतः आ बभूव॥३॥ आत्मा देवानां भुवनस्य गर्भः यथाऽवशं चरति देवः एषः घोषाः इत् अस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम॥४॥२६॥

॥१६९॥ मयःऽभूः वातः अभि वातु उस्राः ऊर्जस्वतीः ओषधीः आ रिशंतां पीवस्वतीः जीवऽधन्याः पिबंतु अवसाय पत्ऽवते रुद्र मृळ॥१॥ याः सऽरूपाः विऽरूपाः एकऽरूपाः यासां अग्निः इत्या नामानि वेद याः अंगिरसः तपसा इह चक्रुः ताभ्यः पर्जन्य महि शर्म यच्छ॥२॥ याः देवेषु तन्वं ऐरयंत यासां सोमः विश्वा रूपाणि वेद ताः अस्मभ्यं पयसा पिन्वमानाः प्रजाऽवंतीः इंद्र गोऽस्थे रिरीहि॥३॥ प्रजाऽपतिः महि एताः रराणः विश्वैः देवैः पितृऽभिः संऽविदानः शिवाः सतीः उप नः गोऽस्थं आ इहि' तासां वयं प्रऽजया सं सदेम॥४॥२७॥

॥१७०॥ विऽभ्राट् बृहत् पिबतु सोम्यं मधु आयुः दधत् यज्ञऽपतौ अविंऽहुतं वातऽजूतः यः अभिऽरक्षति तमना प्रऽजाः पुपोष पुरुधा वि राजति॥१॥ विऽभ्राट् बृहत् सुऽभृतं वाजऽसातमं धर्मन् दिवः धरुणे सत्यं अर्पितं अमिचऽहा वृचऽहा दस्युहन्ऽतमं ज्योतिः जज्ञे असुरऽहा सपत्नऽहा॥२॥ इदं श्रेष्ठं ज्योतिषां

ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत्। विश्वभ्राड्बृहाजो मह्सूर्यो दृश उरु पप्रथे सह ओजो अच्युतं ॥३॥ विभ्राजञ्ज्योतिषा स्वर्१रगच्छो रोचनं दिवः। येनेमा विश्वा भुवनान्याभृता विश्वकर्मणा विश्वदेव्यावता ॥४॥२८॥

॥ १७१ ॥ १-४ इरो भार्गवः ॥ इंद्रः ॥ गायत्री ॥

॥१७१॥ त्वं त्यमिंद्र प्रावः सुतावतः। अपृणोः सोमिनो हवं ॥१॥ त्वं मघस्य दोधतः शिरोऽव त्वचो भरः। अगच्छः सोमिनो गृहं ॥२॥ त्वं त्यमिंद्र मर्त्यमास्त्रबुभायं वेन्यं। मुहुः श्रथ्रा मनस्यवे ॥३॥ त्वं त्यमिंद्र सूर्यं पश्चा संतं पुरस्कृधि। देवानां चित्सिरो वधं ॥४॥२९॥

॥ १७२ ॥ १-४ संवर्तः ॥ उषाः ॥ द्विपदा ॥

॥१७२॥ आ याहि वनसा सह गावः सचंत वर्तनिं यदूधभिः ॥१॥ आ याहि वस्या धिया महिष्ठो जार्यन्मघः सुदानुभिः ॥२॥ पितुभृतो न तंतुमिन्मुदानवः प्रतिं दध्मो यजामसि ॥३॥ उषा अप स्वसुस्तमः सं वर्तयति वर्तनिं सुजातता ॥४॥३०॥

॥ १७३ ॥ १-६ ध्रुवः ॥ राष्ट्रं भृतिः ॥ अनुष्टुप् ॥

॥ १७३ ॥ आ त्वाहार्षमंतरेधि ध्रुवस्तिष्ठाविचाचलिः। विशस्त्वा सर्वा वांछंतु मा त्वद्राष्ट्रमधि भ्रशत् ॥१॥ इहैवधि माप च्योष्ठाः पर्वत इवाविचाचलिः। इंद इवह ध्रुवस्तिष्ठह राष्ट्रमु धारय ॥२॥ इममिंद्रो अदीधरद्ध्रुवं ध्रुवेण हविषा। तस्मै सोमो अधि ब्रवन्नमां उ ब्रह्मणस्पतिः ॥३॥ ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे। ध्रुवं विश्वमिदं जगद्ध्रुवो राजा विशामयं ॥४॥ ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्प-

ज्योतिः उत्ऽतमं विश्वऽजित् धनुऽजित् उच्यते बृहत् विश्वऽभ्राट् भाजः महि सूर्यः दृशे उरु पप्रथे सहः ओजः अच्युतं ॥३॥ विऽभ्राजन् ज्योतिषा स्वः अगच्छः रोचनं दिवः येन इमा विश्वा भुवनानि आऽभृता विश्वऽकर्मणा विश्वदेव्यऽवता ॥४॥२८॥

॥१७१॥ त्वं त्यं इटतः रथं इंद्र प्र आवः सुतऽवंतः अपृणोः सोमिनः हवं ॥१॥ त्वं मघस्य दोधतः शिरः अव त्वचः भरः अगच्छः सोमिनः गृहं ॥२॥ त्वं त्यं इंद्र मर्त्यं आत्ऽवुभायं वेन्यं सुहुः अथाः मनुष्यवे ॥३॥ त्वं त्यं इंद्र सूर्यं पश्चा संतं पुरः कृधि देवानां चित् तिरः वशं ॥४॥२९॥

॥१७२॥ आ याहि वनसा सह गावः सचंत वर्तनिं यत् जर्धऽभिः ॥१॥ आ याहि वस्व्या धिया महिष्ठः जारयत्ऽमखः सुदानुऽभिः ॥२॥ पितुऽभृतः न तंतुं इत् सुऽदानवः प्रति दध्मः यजामसि ॥३॥ उपाः अप स्वसुः तमः सं वर्तयति वर्तनिं सुऽजातता ॥४॥३०॥

॥१७३॥ आ त्वा अहार्षं अंतः एधि ध्रुवः तिष्ठ अविंऽचाचलिः विशः त्वा सर्वाः वांछतु मा त्वत् राष्ट्रं अधि भ्रशत् ॥१॥ इह एव एधि मा अप च्योष्ठाः पर्वतःऽइव अविंऽचाचलिः इंद्रःऽइव इह ध्रुवः तिष्ठ इह राष्ट्रं उं धारय ॥२॥ इमं इंद्रः अदीधरत् ध्रुवं ध्रुवेण हविषा तस्मै सोमः अधि ब्रवत् तस्मै उं ब्रह्मणः पतिः ॥३॥ ध्रुवा द्यौः ध्रुवा पृथिवी ध्रुवासः पर्वताः इमे ध्रुवं विश्वं इदं जगत् ध्रुवः राजा विशां अयं ॥४॥ ध्रुवं ते राजा वरुणः ध्रुवं देवः बृहस्प-

तिः। ध्रुवं त इंद्राग्नी रा॒ष्ट्रं धा॑रयतां ध्रु॒वं ॥५॥ ध्रु॒वं ध्रु॒वेण॑ हविषा॒भि सोमं॑ मृशामसि। अथो॑ त॒ इंद्रः॑ केव॒ली॒र्विशो॑ ब॒लिह॑तंस्करत् ॥६॥३१॥

॥ १७४ ॥ १–५ अभीवर्तः ॥ राष्ट्रः स्तुतिः ॥ अनुष्टुप् ॥

॥१७४॥ अ॒भी॒व॒र्तेन॑ हविषा॒ येने॑द्रो॒ अभि॑वावृ॒ते। तेना॒स्मान्ब्र॑ह्मणस्पते॒ऽभि रा॒ष्ट्राय॑ वर्तय ॥१॥ अ॒भि॒वृ॒त्य स॒पत्ना॒न॒भि या नो॒ अरा॑तयः। अ॒भि पृ॑त॒न्यंत॑ं तिष्ठा॒भि यो न॑ इर॒स्यति॑ ॥२॥ अ॒भि त्वा॑ दे॒वः स॑वि॒ताभि सोमो॑ अवीवृतत्। अ॒भि त्वा॒ विश्वा॑ भू॒तान्य॑भीव॒र्तो यथास॑सि ॥३॥ येने॑द्रो हविषा कृ॒त्व्यभ॑वद्द्यु॒म्न्यु॑त्त॒मः। इ॒दं तदक्रि देवा असप॒त्नः किला॑भुवं ॥४॥ अस॑पत्नः स॒पत्न॑हाभिरा॒ष्ट्रो वि॑षास॒हिः। यथा॒हमे॑षां भू॒तानां॑ वि॒राजा॑नि॒ जन॑स्य च ॥५॥३२॥

॥ १७५ ॥ १–४ ऊर्ध्वग्रावार्बुदिः ॥ ग्रावाणः ॥ गायत्री ॥

॥१७५॥ प्र वो॑ ग्रावाणः सवि॒ता दे॒वः सु॑वतु॒ धर्म॑णा। धू॒र्षु यु॑ज्यध्वं सुनुत ॥१॥ ग्रावा॑णो॒ अप॑ दुच्छुना॒मप॑ सेधत दुर्म॒तिं। उ॒क्षाः क॑र्तन भेष॒जं ॥२॥ ग्रावा॑ण उपरप्सु॒ मं॑हीयंते॒ सजो॑षसः। वृष्णे॒ दध॑तो॒ वृष्ण्यं॑ ॥३॥ ग्रावा॑णः सवि॒ता नु वो॑ दे॒वः सु॑वतु॒ धर्म॑णा। यज॑मानाय सुन्व॒ते ॥४॥३३॥

॥ १७६ ॥ १–४ सूनुरार्भवः ॥ १ ऋभवः । २–४ अग्निः ॥ १, ३, ४ अनुष्टुप् । २ गायत्री ॥

॥१७६॥ प्र सू॒नवं॑ ऋभू॒णां वृ॒हन्न॑वंत वृजना। क्षामा॒ ये वि॒ष्यधा॑यसोऽभ्यन्धे॒नुं न मा॒तर॑ं ॥१॥ प्र दे॒वं दे॒व्या धि॒या भर॑ता जातवेदसं। ह॒व्या नो॑ वक्षदानु॒षक् ॥२॥ अ॒यमु॒ ष्य प्र दे॑व॒युर्होता॑ यज्ञा॒य नी॑यते। रथो॒ न यो॒रभी॑वृतो॒ घृणी॑वाञ्चेतति॒

तिः ध्रुवं ते इंद्रः च अग्निः च राष्ट्रं धारयतां ध्रुवं ॥५॥ ध्रुवं ध्रुवेण हविषा अभि सोमं मृशामसि अथो ते इंद्रः केवलीः विशः बलिऽहृतः करत् ॥६॥३१॥

॥१७४॥ अभिऽवर्तेन हविषा येन इंद्रः अभिऽववृते तेन अस्मान् ब्रह्मणः पते अभि राष्ट्राय वर्तय ॥१॥ अभिऽवृत्य सऽपत्नान् अभि याः नः अरातयः अभि पृतन्यंतं तिष्ठ अभि यः नः दुरस्यति ॥२॥ अभि त्वा देवः सविता अभि सोमः अवीवृतत् अभि त्वा विश्वा भूतानि अभिऽवर्तेः यथा असंसि ॥३॥ येन इंद्रः हविषा कृत्वी अभवत् द्युम्नी उत्ऽतमः इदं तत् अक्रि देवाः असपत्नः किलं अभुवं ॥४॥ असपत्नः सपत्नऽहा अभिऽराष्ट्रः विऽसासहिः यथा अहं एषां भूतानां विऽराजानि जनस्य च ॥५॥३२॥

॥१७५॥ प्र वः यावाणः सविता देवः सुवतु धर्मणा धूःऽसु युज्यध्वं सुनुत ॥१॥ यावाणः अप दुच्छुनां अप सेधत दुःऽमतिं उस्राः कर्तन भेषजं ॥२॥ यावाणः उपरेषु आ महीयंते सऽजोषसः वृष्णे दधतः वृष्ण्यं ॥३॥ यावाणः सविता नु वः देवः सुवतु धर्मणा यजमानाय सुन्वते ॥४॥३३॥

॥१७६॥ प्र सूनवः ऋभूणां बृहत् नुवंत वृजनां क्षामं ये विष्वऽधायसः अधारयन् धेनुं न मातरं ॥१॥ प्र देवं देव्या धिया भरत जातऽवेदसं हव्या नः वक्षत् आनुषक् ॥२॥ अयं जुः स्यः प्र देवऽयुः होता यज्ञाय नीयते रथः न योः अभिऽवृतः घृणिऽवान् चेतति

त्मना ॥३॥ अयमग्निरुरुष्यत्यमर्तादिव जन्मनः। सहस्रात्सहीयान्देवो जीवातवे कृतः ॥४॥३४॥

॥ १७७ ॥ १–३ पतंगः प्राजापत्यः ॥ मायाभेदः ॥ १ जगती । २, ३ त्रिष्टुप् ॥

॥१७७॥ पतंगमक्तमसुरस्य मायया हृदा पश्यंति मनसा विपश्चितः। समुद्रे अंतः कवयो वि चक्षते मरीचीनां पदमिच्छंति वेधसः ॥१॥ पतंगो वाचं मनसा बिभर्ति तां गंधर्वोऽवदद्गर्भे अंतः। तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पांति ॥२॥ अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरंतं। स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वंतः ॥३॥३५॥

॥ १७८ ॥ १–३ अरिष्टनेमिस्तार्क्ष्यः ॥ तार्क्ष्यः ॥ त्रिष्टुप् ॥

॥१७८॥ त्यमू षु वाजिनं देवजूतं सहावानं तरुतारं रथानां। अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम ॥१॥ इंद्रस्येव रातिमाजोहुवानाः स्वस्तये नावमिवा रुहेम। उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषाम ॥२॥ सद्यश्चिद्यः शवसा पंच कृष्टीः सूर्य इव ज्योतिषापस्ततान। सहस्रसाः शतसा अस्य रंहिर्न स्मा वरंते युवतिं न शर्यां ॥३॥३६॥

॥ १७९ ॥ १ शिबिरौशीनरः । २ प्रतर्दनः काशिराजः । ३ वसुमना रौहिदश्वः ॥ इंद्रः ॥ १ अनुष्टुप् । २, ३ त्रिष्टुप् ॥

॥१७९॥ उत्तिष्ठतावं पश्यतेंद्रस्य भागमृत्वियं। यदि श्रातो जुहोतन यद्यश्रातो ममत्तन ॥१॥ श्रातं हविरो ष्विंद्र प्र याहि जगाम सूरो अध्वनो विमध्यं। परि त्वासते निधिभिः सखायः कुलपा न व्राजपतिं चरंतं ॥२॥ श्रातं मन्य

त्मना ॥३॥ अयं अग्निः उरुष्यति अमृतात्ऽइव जन्मनः सहसः चित् सहीयान् देवः जीवातवे कृतः ॥४॥३४॥

॥१७७॥ पतंगं अक्तं असुरस्य मायया हृदा पश्यंति मनसा विपःऽचितः समुद्रे अंतः कवयः वि चक्षते मरीचीनां पदं इच्छंति वेधसः ॥१॥ पतंगः वाचं मनसा बिभर्ति तां गंधर्वः अवदत् गर्भे अंतः तां द्योतमानां स्वर्यं मनीषां ऋतस्य पदे कवयः नि पांति ॥२॥ अपश्यं गोऽपां अनिंऽपद्यमानं आ च परा च पथिऽभिः चरंतं सः सध्रीचीः सः विषूचीः वसानः आ वरीवर्ति भुवनेषु अंतः ॥३॥३५॥

॥१७८॥ त्यं ऊं सु वाजिनं देवऽजूतं सहऽवानं तरुतारं रथानां अरिष्टऽनेमिं पृतनाजं आशुं स्वस्तये तार्क्ष्यं इह हुवेम ॥१॥ इंद्रस्यऽइव रातिं आऽजोहुवानाः स्वस्तये नावंऽइव आ रुहेम उर्वीं न पृथ्वीं बहुले गभीरे मा वां आऽदंतौ मा परांऽदतौ रिषाम ॥२॥ सद्यः चित् यः शवसा पंच कृष्टीः सूर्यःऽइव ज्योतिषा अपः ततानं सहस्रऽसाः शतऽसाः अस्य रंहिः न स्म वरंते युवतिं न शर्यां ॥३॥३६॥

॥१७९॥ उत् तिष्ठत अव पश्यत इंद्रस्य भागं ऋत्वियं यदिं श्रातः जुहोतन यदिं अश्रातः ममत्तन ॥१॥ श्रातं हविः ओ सु इंद्र प्र याहि जगामं सूरः अध्वनः विऽमध्यं परिं त्वा आसते निधिऽभिः सखायः कुलुऽपाः न राजऽपतिं चरंतं ॥२॥ श्रातं मन्ये

ऊर्धनि श्रातमग्नौ सुश्रातं मन्ये तहतं नवीयः । माध्यंदिनस्य सवनस्य दृभः पिबेंद्र वज्रिन्पुरुकृज्जुषाणः ॥३॥३७॥

॥१८०॥ १-३ जय ऐंद्रः ॥ इंद्रः ॥ त्रिष्टुप् ॥

॥१८०॥ प्र संसाहिषे पुरुहूत शत्रूञ्ज्येष्ठस्ते शुष्म इह रातिरस्तु । इंद्राभरं दक्षिणेना वसूनि पतिः सिंधूनामसि रेवतीनां ॥१॥ मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगंथा परस्याः । सृकं संशाय पविमिंद्र तिग्मं वि शत्रूंस्ताळ्हि वि मृधो नुदस्व ॥२॥ इंद्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनां । अपानुदो जनममित्रयंतमुरुं देवेभ्यो अकृणोरु लोकं ॥३॥३८॥

॥१८१॥ १ प्रयो वासिष्ठः । २ सप्रथो भारद्वाजः । ३ धर्मः सौर्यः ॥ विश्वे देवाः ॥ त्रिष्टुप् ॥

॥१८१॥ प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् । धातुर्द्युतानात्सवितुश्च विष्णोः रथंतरमा जभारा वसिष्ठः ॥१॥ अविंदन्ते अतिहितं यदासीद्यज्ञस्य धाम परमं गुहा यत् । धातुर्द्युतानात्सवितुश्च विष्णोर्भरद्वाजो बृहदा चक्रे अग्नेः ॥२॥ तेऽविंदन्मनसा दीध्यानाः यजुःष्कन्नं प्रथमं देवयानं । धातुर्द्युतानात्सवितुश्च विष्णोरा सूर्यादभरन्धर्ममिते ॥३॥३९॥

॥१८२॥ १-३ तपुर्मूर्धा वाहिस्मतः ॥ बृहस्पतिः ॥ त्रिष्टुप् ॥

॥१८२॥ बृहस्पतिर्नयतु दुर्गहा तिरः पुनर्नेषद्यशंसाय मन्म । क्षिपदश्स्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥१॥ नराशंसो नोऽवतु प्रयाजे शं नो अस्त्वनुयाजो हवेषु । क्षिपदश्स्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥२॥ तपुर्मूर्धा तपतु रक्षसो ये ब्रह्मद्विषः शरवे

ऊर्धनि श्रातं अग्नौ सुऽश्रीतं मन्ये तत् कृतं नवीयः माध्यंदिनस्य सवनस्य दृघः पिब इंद्र वज्रिन् पुरुऽकृत् जुषाणः ॥३॥३७॥

॥१८०॥ प्र ससहिषे पुरुऽहूत शत्रून् ज्येष्ठः ते शुष्मः इह रातिः अस्तु इंद्र आ भर दक्षिणेन वसूनि पतिः सिंधूनां असिरेवतीनां ॥१॥ मृगः न भीमः कुचरः गिरिऽस्थाः परावतः आ जगंथ परस्याः सृकं संऽशाय पविं इंद्र तिग्मं वि शत्रून् ताळ्हि वि मृधः नुदस्व ॥२॥ इंद्र क्षत्रं अभि वामं ओजः अजायथाः वृषभ चर्षणीनां अपः अनुदः जनं अमिनऽयंतं उरुं देवेभ्यः अकृणोः उ लोकं ॥३॥३८॥

॥१८१॥ प्रथः च यस्य सऽप्रथः च नामं आनुंऽस्तुभस्य हविषः हविः यत् धातुः द्युतानात् सवितुः च विष्णोः रथंऽतरं आ जभार वसिष्ठः ॥१॥ अविंदन् ते अतिंऽहितं यत् आसीत् यज्ञस्य धामं परमं गुहा यत् धातुः द्युतानात् सवितुः च विष्णोः भरत्ऽवाजः बृहत् आ चक्रे अग्नेः ॥२॥ ते अविंदन् मनसा दीध्यानाः यजुः स्कन्नं प्रथमं देवऽयानं धातुः द्युतानात् सवितुः च विष्णोः आ सूर्यात् अभरन् घर्मं एते ॥३॥३९॥

॥१८२॥ बृहस्पतिः नयतु दुःऽगहा तिरः पुनः नेषत् अघऽशंसाय मन्म क्षिपत् अशस्तिं अपं दुःऽमतिं हन् अथं करत् यजमानाय शं योः ॥१॥ नराशंसः नः अवतु प्रऽयाजे शं नः अस्तु अनुऽयाजः हवेषु क्षिपत् अशस्तिं अपं दुःऽमतिं हन् अथं करत् यजमानाय शं योः ॥२॥ तपुंऽमूर्धा तपतु रक्षसः ये बलऽद्विषः शरवे

हंतवा उ । क्षिपदश॑स्तिमप॑ दुर्म॒तिं हन्नथा॑ कर्द्यजमानाय॒ शं यो: ॥ ३ ॥ ४० ॥

॥ १८३ ॥ १–३ प्रजावान्प्राजापत्यः ॥ ऋतृथं यजमानपत्नीहोत्राशिषः ॥ त्रिष्टुप् ॥

॥ १८३ ॥ अप॑श्यं त्वा॒ मन॑सा॒ चेकि॑तानं॒ तप॑सो जा॒तं तप॑सो॒ विभू॑तं । इ॒ह प्र॒जामि॒ह र॒यिं र॑रा॒णः प्र जा॑यस्व प्र॒जया॑ पुत्रकाम ॥ १ ॥ अप॑श्यं त्वा॒ मन॑सा॒ दीध्या॑नां॒ स्वायां॑ त॒नू ऋत्व्ये॒ नाध॑मानां। उप॒ मामु॒च्चा यु॑व॒तिर्वे॑भूया॒: प्र जा॑यस्व प्र॒जया॑ पुत्रकामे ॥ २ ॥ अ॒हं गर्भ॑मदधा॒मोष॑धीष्व॒हं विश्वे॑षु भुव॒नेष्व॒न्तः। अ॒हं प्र॒जा अ॑जनयं पृथि॒व्याम॒हं जनि॑भ्यो अप॒रीषु॑ पु॒त्रान् ॥ ३ ॥ ४१ ॥

॥ १८४ ॥ १–३ त्वष्टा गर्भकर्ता विष्णुर्वा प्राजापत्यः ॥ लिंगोक्तदेवताः । गर्भाधानाशीः ॥ अनुष्टुप् ॥

॥ १८४ ॥ विष्णु॒र्योनिं॑ कल्पयतु॒ त्वष्टा॑ रू॒पाणि॑ पिंशतु । आ सिं॑चतु प्र॒जाप॑तिर्धा॒ता गर्भं॑ दधातु ते ॥ १ ॥ गर्भं॑ धेहि सिनीवालि॒ गर्भं॑ धेहि सरस्वति । गर्भं॑ ते अ॒श्विनौ॑ दे॒वावा ध॑त्तां पुष्क॒रस्र॑जा ॥ २ ॥ हिर॑ण्ययी अ॒रणी॒ यं नि॒र्मंथ॑तो अ॒श्विना॑ । तं ते॒ गर्भं॑ हवामहे दश॒मे मा॒सि सू॒तवे ॥ ३ ॥ ४२ ॥

॥ १८५ ॥ १–३ मत्यधृतिर्वारुणिः ॥ अदितिः । स्वस्त्ययनं ॥ गायत्री ॥

॥ १८५ ॥ महि॑ त्रीणामवो॑ऽस्तु द्यु॒क्षं मि॒त्रस्या॑र्य॒म्णः। दु॒राध॑र्षं वरु॑णस्य ॥ १ ॥ न॒हि ते॑षाम॒मा च॒न नाध्व॑सु वार॒णेषु॑। ईशे॑ रि॒पु-र॒घशं॑सः ॥ २ ॥ यस्मै॑ पु॒त्रासो॒ अदि॑ते॒: प्र जी॒वसे॒ मर्ता॑य। ज्योति॒र्यच्छ॒न्त्यज॑स्रं ॥ ३ ॥ ४३ ॥

॥ १८६ ॥ १–३ उलो वातायनः ॥ वायुः ॥ गायत्री ॥

॥ १८६ ॥ वात॒ आ वा॑तु भेष॒जं श॒म्भु म॑यो॒भु नो॑ हृ॒दे। प्र ण॒ आयूं॑षि तारिषत् ॥ १ ॥ उ॒त वा॑त पि॒तासि॑ न उ॒त भ्रा॒तोत

हंतवे जं क्षिपत् अशंस्तिं अप दुःऽमतिं हुन् अथ कृत् यजमानाय शं योः ॥३॥४०॥

॥१८३॥ अपश्यं त्वा मनसा चेकितानं तपसः जातं तपसः विऽभूतं इह प्रऽजां इह रयिं रराणः प्र जायस्व प्रऽजया पुत्रऽकाम् ॥१॥ अपश्यं त्वा मनसा दीध्यानां स्वायां तनू ऋत्व्ये नाधमानां उप मां उत्ऽआ युवतिः बभूयाः प्र जायस्व प्रजया पुत्रऽकामे ॥२॥ अहं गर्भं अदधां ओषधीषु अहं विश्वेषु भुवनेषु अंतः अहं प्रऽजाः अजनयं पृथिव्यां अहं जनिंऽभ्यः अपरीषु पुत्रान् ॥३॥४१॥

॥१८४॥ विष्णुः योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आ सिंचतु प्रजाऽपतिः धाता गर्भं दधातु ते ॥१॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति गर्भं ते अश्विनौ देवौ आ धत्तां पुष्करऽस्रजा ॥२॥ हिरण्ययीं अरणीं यं निःऽमंथतः अश्विना तं ते गर्भं हवामहे दशमे मासि सूतवे ॥३॥४२॥

॥१८५॥ महि चीनां अवः अस्तु द्युक्षं मित्रस्य अर्यमणः दुःऽआधर्षं वरुणस्य ॥१॥ नहि तेषां अमा चन न अध्वंऽसु वारणेषु ईशे रिपुः अघऽशंसः ॥२॥ यस्मै पुत्रासः अदितेः प्र जीवसे मर्त्याय ज्योतिः यच्छंति अजस्रं ॥३॥४३॥

॥१८६॥ वातः आ वातु भेषजं शंऽभु मयःऽभु नः हृदे प्र नः आयूंषि तारिषत् ॥१॥ उत वात पिता असि नः उत भ्राता उत

नः सखा। स नो जीवातवे कृधि ॥२॥ यद्दो वात ते गृहेऽमृतस्य निधिर्हितः। ततो नो देहि जीवसे ॥३॥४४॥

॥ १८७ ॥ १–५ वत्स आग्नेयः ॥ अग्निः ॥ गायत्री ॥

॥१८७॥ प्राग्नये वाचमीरय वृषभाय क्षितीनां। स नः पर्षदति द्विषः ॥१॥ यः परस्याः परावतस्तिरो धन्वातिरोचते। स नः पर्षदति द्विषः ॥२॥ यो रक्षांसि निजूर्वति वृषा शुक्रेण शोचिषा। स नः पर्षदति द्विषः ॥३॥ यो विश्वाभि विपश्यति भुवना सं च पश्यति। स नः पर्षदति द्विषः ॥४॥ यो अस्य पारे रजसः शुक्रो अग्निरजायत। स नः पर्षदति द्विषः ॥५॥४५॥

॥ १८८ ॥ १–३ श्येन आग्नेयः ॥ अग्निर्जातवेदाः ॥ गायत्री ॥

॥१८८॥ प्र नूनं जातवेदसमश्वं हिनोत वाजिनं। इदं नो बर्हिरासदे ॥१॥ अस्य प्र जातवेदसो विप्रवीरस्य मीळ्हुषः। महीमियर्मि सुष्टुतिं ॥२॥ या रुचो जातवेदसो देवत्रा हव्यवाहनीः। ताभिर्नो यज्ञमिन्वतु ॥३॥४६॥

॥ १८९ ॥ १–३ सार्पराज्ञी ॥ सार्पराज्ञी सूर्या वा ॥ गायत्री ॥

॥१८९॥ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्स्वः ॥१॥ अंतश्चरति रोचनास्य प्राणादपानती। व्यख्यन्महिषो दिवं ॥२॥ त्रिंशद्धाम वि राजति वाक्पतंगाय धीयते। प्रति वस्तोरह द्युभिः ॥३॥४७॥

॥ १९० ॥ १–३ अघमर्षणो माधुच्छंदसः ॥ भाववृत्तं ॥ अनुष्टुप् ॥

॥१९०॥ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥१॥ समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥२॥ सूर्याचं-

नः सखा सः नः जीवातवे कृधि ॥२॥ यत् अदः वातः ते गृहे अमृतस्य निऽधिः हितः ततः नः देहि जीवसे ॥३॥४४॥

॥१८७॥ प्र अग्नये वाचं ईरय वृषभाय क्षितीनां सः नः पर्षत् अति द्विषः ॥१॥ यः परस्याः पराऽवतः तिरः धन्व अतिऽरोचते सः नः पर्षत् अति द्विषः ॥२॥ यः रक्षांसि निऽजूर्वति वृषा शुक्रेण शोचिषा सः नः पर्षत् अति द्विषः ॥३॥ यः विश्वा अभि विऽपश्यति भुवना सं च पश्यति सः नः पर्षत् अति द्विषः ॥४॥ यः अस्य पारे रजसः शुक्रः अग्निः अजायत सः नः पर्षत् अति द्विषः ॥५॥४५॥

॥१८८॥ प्र नूनं जातऽवेदसं अश्वं हिनोत वाजिनं इदं नः बर्हिः आऽसदे ॥१॥ अस्य प्र जातऽवेदसः विप्रऽवीरस्य मीळ्हुषः महीं इयर्मि सुऽस्तुतिं ॥२॥ याः ऋचः जातऽवेदसः देवऽत्रा हव्यऽवाहनीः ताभिः नः यज्ञं इन्वतु ॥३॥४६॥

॥१८९॥ आ अयं गौः पृश्निः अक्रमीत् असदत् मातरं पुरः पितरं च प्रऽयन् स्वः० ॥१॥ अंतः चरति रोचना अस्य प्राणात् अपऽअनतः वि अख्यत् महिषः दिवं ॥२॥ विंशत् धामं वि राजति वाक् पतंगाय धीयते प्रति वस्तोः अह द्युऽभिः ॥३॥४७॥

॥१९०॥ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥१॥ समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥२॥ सूर्याचं-

दृमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चांतरिक्ष-
मथो स्वः ॥३॥४८॥

॥ १९१॥ १-४ संवननः ॥ १ अग्निः। २-४ संज्ञानं ॥ १. २. ४ अनुष्टुप्। ३ त्रिष्टुप्॥

॥१९१॥ संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ। इळस्पदे स-
मिध्यसे स नो वसून्या भर॥१॥ सं गच्छध्वं सं वदध्वं सं वो मनां-
सि जानतां। देवा भागं यथा पूर्वे संजानाना उपासते ॥२॥
समानी मंत्रः समितिः समानी समानं मनः सह चित्तमेषां।
समानं मंत्रमभि मंत्रये वः समानेन वो हविषा जुहोमि ॥३॥
समानी व आकूतिः समाना हृदयानि वः। समानमस्तु वो
मनो यथा वः सुसहासति ॥४॥४९॥८॥८॥१२॥१०॥

॥ इति दशमं मंडलं समाप्तं ॥

॥ इति शार्मण्यदेशोत्पन्नेनेंगलंडदेशनिवासिना भट्टमोक्ष-
मूलरेण तृतीयवारं श्रेष्ठादर्शैकमत्येन परिशो-
धितग्वेदसंहिता समाप्ता ॥

द्रुमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चांतरिक्ष-
मथो स्वः॥३॥४८॥

॥१९१॥ संऽसमिद् युवसे वृषन्नग्ने विश्वानि अर्यः आ इळः
पदे सं इध्यसे सः नः वसूनि आ भर॥१॥ सं गच्छध्वं सं वदध्वं सं
वः मनांसि जानतां देवाः भागं यथा पूर्वे संऽजानानाः उपऽआ-
सते॥२॥ समानः मंत्रः संऽइतिः समानी समानं मनः सह चित्तं
एषां समान मंत्रं अभि मंत्रये वः समानेन वः हविषा जुहोमि
॥३॥ समानी वः आऽकूतिः समाना हृदयानि वः समानं अस्तु
वः मनः यथा वः सुऽसह असति॥४॥४९॥८॥८॥१२॥१०॥

॥ इति दशमं मंडलं समाप्तं ॥

॥ इति शार्मण्यदेशोत्पन्नेनेंगलंडदेशनिवासिना भट्टमोक्ष-
मूलरेण तृतीयवारं श्रेष्ठादर्शैकमत्येन परिशो-
धितग्वेदसंहिता समाप्ता ॥

LINGUISTIC PUBLICATIONS

OF

TRUBNER & CO.,

57 AND 59, LUDGATE HILL, LONDON, E.C.

Jataka Stories. With the Commentary and Collection of Buddhist Fairy Tales Fables and Folk Lore Translated from the original Pali by T Rhys Davids (The First Part of the Commentary contains the most complete account we yet have of the Life of Buddha) [*In preparation.*

Kern. The Âryabhatiya with the Commentary Bhatadîpikâ of Paramadîçvara edited by Dr H Kern 4to pp x and 107 9s

Kielhorn A Grammar of the Sanskrit Language By F Kielhorn Ph D, Superintendent of Sanskrit Studies in Deccan College Registered under Act xxv of 1867 Demy 8vo pp xvi and 260 cloth 1870 10s 6d

Kistner Buddha and his Doctrines A Bibliographical Essay By Otto Kistner Imp 8vo pp iv and 32 sewed 2s 6d

Laghu Kaumudi. A Sanskrit Grammar By Varadarâja With an English Version Commentary and References By James R Ballantyne LL D Principal of the Sanskrit College Benares 8vo pp xxxv and 424 cloth 1l 11s 6d

Maha Vira-Charita; or the Adventures of the Great Hero Rama An Indian Drama in Seven Acts Translated into English Prose from the Sanskrit of Bhavabhuti By John Pickford M A Crown 8vo cloth, pp xvi and 172 5s

Manava-Kalpa-Sutra, being a portion of this ancient Work on Vaidik Rites, together with the Commentary of Kumarila Swamin. A Facsimile of the MS No 17 in the Library of Her Majesty's Home Government for India With a Preface by Theodor Goldstucker Oblong folio pp 268 of letterpress and 121 leaves of facsimiles Cloth. 4l 4s

Megha-Duta (Cloud Messenger) By Kalidâsa. Translated from the Sanskrit into English verse with Notes and Illustrations By the late H H Wilson The Vocabulary by Francis Johnson New Edition. 4to cloth pp xi and 180 10s 6d

Muir Original Sanskrit Texts on the Origin and History of the People of India their Religion and Institutions Collected Translated and Illustrated by John Muir Esq., D C L., LL.D Ph.D Vol I Mythical and Legendary Accounts of the Origin of Caste with an Inquiry into its existence in the Vedic Age Second Edition, rewritten and greatly enlarged. 8vo cloth pp xx and 538 1l 1s Vol II The Trans-Himalayan Origin of the Hindus and their Affinity with the Western Branches of the Aryan Race Second Edition revised, with additions 8vo cloth, pp xxx and 512 1l 1s Vol III The Vedas Opinions of their Authors and later Indian Writers on their Origin Inspiration and Authority Second edition, revised and enlarged 8vo cloth, pp xxx and 312 16s Vol IV Comparison of the Vedic with the later representations of the principal Indian Deities. Second edition revised 8vo cloth, pp xvi and 524. 1l 1s Vol V Contributions to a Knowledge of the Cosmogony Mythology, Religious Ideas Life and Manners of the Indians in the Vedic Age. 8vo cloth pp xvi and 492 1l 1s.

Müller Max Müller's Lecture on Buddhist Nihilism Delivered before the General Meeting of the Association of German Philologists at Kiel, 28th September, 1869. 1s

Nagananda; or, the Joy of the Snake World. A Buddhist Drama in Five Acts. Translated into English Prose, with Explanatory Notes, from the Sanskrit of Sri Harsha-Deva. By Palmer Boyd B.A With an Introduction by Professor Cowell Crown 8vo cloth, pp xxx and 100 4s 6d.

Nalopákhyánam. Story of Nala, an Episode of the Mahá Bhárata: the Sanskrit text, with a copious Vocabulary, Grammatical Analysis, and Introduction by Monier Williams M.A. The Metrical Translation by the Very Rev. H. H. Milman, D.D. 1860. Second edition. 8vo. cloth. 21*s*

Naradiya Dharma Sastram; or, the Institutes of Narada. Translated for the First Time from the unpublished Sanskrit original. By Dr. Julius Jolly, University, Wurzburg. With a Preface, Notes chiefly critical, an Index of Quotations from Narada in the principal Indian Digests, and a general Index. *Crown 8vo., pp. xxxv and 144.* cloth. 10*s* 6*d*

Prakrita-Prakasa; or, the Prakrit Grammar of Vararuchi, with the Com-

Preface, and corrections. 8vo. pp. xxxi and 204. 14*s*

Rat

Rig-Veda. The Hymns of the Rig-Veda. The Samhita and Pada Texts in parallel columns. Reprinted from M. Muller's Editio Princeps. In 2 Vols. 8vo.

Rig-Veda. The Sacred Hymns of the Brahmins, as preserved to us in the oldest collection of religious poetry, the Rig Veda-Sanhita, translated and explained. By F. Max Muller, M.A. Vol. I. 8vo. cloth, pp. clii and 264. 12*s*. 6*d*

Rig

the Press.)

Sakuntalá. A Sanskrit Drama in Seven Acts. Edited by Monier Williams, M.A., D.C.L., Boden Professor of Sanskrit. Second Edition. 8vo. cloth. 21*s*

Schlagintweit. Buddhism in Tibet. Illustrated by Literary Documents and Objects of Religious Worship. With an Account of the Buddhist Systems preceding it in India. By Emil de Schlagintweit, LL.D. With a Folio Atlas of 20 Plates and 20 Tables of Native Prints in the Text. Royal 8vo. pp. xxv and 404. 2*l* 2*s*

Schleicher. Compendium of the Comparative Grammar of the Indo-
Aug. st Schleicher. Translated from
Chr. Coll. Camb. Part I. Phonology
Roots and Stems. Numerals. 8vo

Sherring. The Sacred City of the Hindus. An Account of Benares in Ancient and Modern Times. By the Rev. M. A. Sherring, M.A., LL.D. and Prefaced with an Introduction by Fitzedward Hall, Esq., D.C.L. *With Illustrations. 8vo. pp. xxxvi. and 388.* cloth. 21*s*.

Steele. An Eastern Love Story. Kusa Jatakaya. A Buddhistic Legendary Poem, with other Stories. By Thomas Steele, Ceylon Civil Service. Crown 8vo., pp. xii. and 260. 6*s*

Surya-Siddhanta (Translation of the). A Text Book of Hindu Astronomy, with Notes and Appendix, &c. By W. D. Whitney. 8vo. boards, pp. iv and 354. 1*l* 11*s* 6*d*

Sutta Nipata; or, Dialogues and Discourses of Gotama Buddha. Translated from the Pali, with Introduction and Notes. By Sir M. Coomára Swámy. Crown 8vo. pp. xxxvi. and 160, cloth. 6*s*.

Trubner's Bibliotheca Sanscrita A Catalogue of Sanskrit Literature, chiefly printed in Europe To which is added a Catalogue of Sanskrit Works printed in India, and a Catalogue of Pali Books Constantly for sale by Trübner & Co Crown 8vo sd pp 84 2s 6d

Weber. On the Râmâyana By Dr Albrecht Weber, Berlin Translated from the German by the Rev D C Boyd M.A Reprinted from 'The Indian Antiquary' Feap 8vo sd, pp 130 5s

Wheeler. The History of India from the Earliest Ages By J Talboys Wheeler Vol I containing the Vedic Period and the Mahâ Bhârata With Map Demy 8vo pp lxxv and 576, cloth, 1867 18s Vol II The Ramayana and the Brahmanic Period. Demy 8vo pp lxxxvii and 680 with 2 Maps cloth 21s. Vol III Hindu, Buddhist, and Brahmanical. Demy 8vo pp xxiv and 500 With 2 Maps, cloth 1874 18s Vol IV Part I India under Mussulman Rule 8vo pp xxxii and 420, cloth 14s

Whitney. Language and the Study of Language Twelve Lectures on the Principles of Linguistic Science By W D Whitney Third Edition, augmented by an Analysis Crown 8vo cloth, pp xl and 504 10s 6d

Whitney. Language and its Study, with especial reference to the Indo- [illegible] Professor of Sanskrit, [illegible] ntroduction, Notes, [illegible] and an Index, by [illegible] 5s

Whitney. Oriental and Linguistic Studies The Veda; the Avesta; the Science of Language By William Dwight Whitney, Professor of Sanskrit and Comparative Philology in Yale College Crown 8vo cloth, pp x and 418 12s.

Whitney Oriental and Linguistic Studies By W D Whitney, Professor of Sanskrit. Second Series Contents the East and West—Religion and Mythology—Orthography and Phonology—Hindû Astronomy Crown 8vo cloth pp 446 12s

Williams. A Dictionary, English and Sanskrit. By Monier Williams, M A. Published under the Patronage of the Honourable East India Company 4to pp xii. and 862 cloth. 1855 3l 3s

Williams A Practical Grammar of the Sanskrit Language, arranged with reference to the Classical Languages of Europe, for the use of English Students, by Monier Williams, M A Third Edition In 8vo cloth 1864 15s

Williams. A Sanskrit English Dictionary Etymologically and Philologically Arranged. With Special Reference to Greek, Latin, Gothic, German Anglo-Saxon, and other Cognate Indo-European Languages By Monier Williams M A., Boden Professor of Sanskrit in the University of Oxford. In demy 4to cloth. 1872 4l 14s 6d

Wilson. A Dictionary in Sanskrit and English Translated, amended, and enlarged from an original compilation prepared by learned Natives for the College of Fort William by H H Wilson. The Third Edition edited by Jagunmohana Tarkalankara and Khettramohana Mookerjee Published by Gyanendrachandra Rayachoudhuri and Brothers. 4to. pp 1008 Calcutta 1874 3l 3s

Wilson Works of the late Horace Hayman Wilson, M A, F R S. Vols I and II Essays and Lectures chiefly on the Religion of the Hindus by the late H H Wilson M.A., F R S Collected and edited by Dr Reinhold Rost 2 vols cloth, pp x and 399 vi and 416 3l 12s Vols III IV, and V Essays Analytical, Critical, and Philological on Subjects connected with Sanskrit Literature Collected and edited by Dr Reinhold Rost. 3 vols 8vo cloth, pp 408 406 and 390 1l 16s Vols VI VII, VIII, IX, and X In 2 Parts. Vishnu Puráná, a System of Hindu Mythology and Tradition Translated from the original Sanskrit and Illustrated by Notes derived chiefly from other Puráṇas By the late H H Wilson. Edited by Fitzedward Hall M A., D C L Vols I. to V (Part [illegible] 3l 3s Vols XI and XII. Select Spe[illegible] m the Original Sanskrit. By the la[illegible] 2 vols 8vo cloth, pp. lxx. and [illegible]